चारकरनाभी शुभनहीं है ६ सबवेदोंका अधिष्ठाताब्रह्मा है और गायत्री ब्रह्माजीके अंगसे उत्पन्न होनेवाली कहीजातीहै सो इनका मूर्त्तिरहित वा मूर्त्तिसहित जोड़ाहै जहाँ ब्रह्माजीहैं वहाँ सरस्वती देवीहैं और जहाँ सरस्वतीजी हैं वहाँ ब्रह्माजीभी हैं ७ । ८ जैसे कि सूर्य्यकी घाम छायासे रहित कभीनहीं रहती वैसेही गायत्रीभी ब्रह्माजीके पाससे कभी नहीं हटती है ९ ब्रह्माजी वेदकीराशि हैं और गायत्री उसकी अधिष्ठात्री है इसहेतुसे गायत्रीके संगगमन करनेमें ब्रह्माजीको कुछदोषनहीं है १० ऐसाहोनेपरभी पूर्वके प्रजापति ब्रह्माजी अपनी पुत्रीके संगमकरनेसे बड़े लज्जितहुए और क्रोधसे कामदेवको यह शापदेतेभये ११ कि जो तैंनेमेराभी मन अपने बाणों से चलायमान करदिया इसहेतुसे शीघ्रही तेरेशरीरको शिवजी भस्मकरेंगे १२ इसकेपीछे कामदेव ब्रह्माजीको प्रसन्नंकरके यह वचन बोला कि आपमुझको निरपराध मारनेको योग्यनहीं हैं १३ हे चतुराननजी आपने मुझको ऐसाहीरचा है कि मैं अपने बाणोंसे शरीर धारियोंकी इन्द्रियोंको चलायमान करदेताहूं १४ हेविभो आपने पूर्वही ऐसाकहाथा कि तुझको बड़े २ यत्नोंसेभी जैसेबने तैसे स्त्री पुरुषों के मनोंको बिना किसी विचारके चलायमान करदेना योग्यहै १५ हे पिता इसहेतुसे आपने मुझनिरपराधीको शाप दियाहै इस्से हेभगवन् आप प्रसन्नहोकर मेरेशरीर प्राप्तहोनेका बरदानदो १६ ब्रह्माजीबोले वैवस्वतमनुकेअन्तमें यादवकुलके बीच राम अर्थात् बलदेवनामनर मेरेसत्त्वप्रधानसे उत्पन्नहोगा १७ और वहीराक्षसोंका मारनेवालाहोकर द्वारकामें वसेगा और उसीके समान उसका छोटाभाई श्रीकृष्णभी होगा उसकातू पुत्रहोगा १८ इसप्रकारसे शरीरको प्राप्तहो सम्पूर्ण भोगोंको भोगकर भरतवंशके अन्तमें तू वत्सराजाका पुत्रहोके विद्याधरोंका अधिपतिहो प्रलयकाल पर्य्यन्त सुखोंको भोगकरधर्म

एवंशापप्रसादाभ्यामुपेतःकुसुमायुधः । शोकप्रमोदाभियुतो जगामसयथागतम् २१
(मनुरुवाच) कोऽसौयदुरितिप्रोक्तो यद्वंशेकामसम्भवः । कथञ्चदग्धोरुद्रेण किम
र्थंकुसुमायुधः २२ भरतस्यान्वयेकस्य काचसृष्टिःपुराभवत् । एतत्सर्वंसमाचक्ष्व मूल
तःसंशयोहिमे २३ (मत्स्यउवाच) यासादेहार्धसम्भूता गायत्रीब्रह्मवादिनी । जननी
यामनोर्देवी शतरूपाशतेन्द्रिया २४ रतिर्मनस्तपोबुद्धिर्महदादिसमुद्भवः । ततःसशत
रूपायां सप्तापत्यान्यजीजनत् २५ येमरीच्यादयःपुत्रा मानसास्तस्यधीमतः । तेषामय
मभूल्लोकःसर्वज्ञानात्मकःपुरा २६ ततोऽसृजद्वामदेवं त्रिशूलवरधारिणम् । सनत्कुमार
ञ्चविभुं पूर्वेषामपिपूर्वजम् २७ वामदेवस्तुभगवानसृजन्मुखतोद्विजान् । राजन्यान
सृजद्बाह्वोर्विट्शूद्रानूरुपादयोः २८ विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषिच । छन्दांसि
चससर्जादौ पर्ज्जन्यंचततःपरम् २९ ततःसाध्यगणानीशस्त्रिनेत्रानसृजत्पुनः । कोटी
श्चचतुराशीतिर्जरामरणवर्ज्जिताः ३० वामोऽसृजन्नमर्त्यांस्तान् ब्रह्मणाविनिवारितः ।
नैवंविधाभवेत्सृष्टिर्जरामरणवर्ज्जिता ३१ शुभाशुभात्मिकायातु सैवसृष्टिःप्रशस्यते । ए
वंस्थितःसतेनादौ सृष्टेस्थाणुरतोऽभवत् ३२ स्वायम्भुवोमनुर्धीमांस्तपस्तप्त्वासुदुश्च
रम् । पत्नीमेवापरूपाढ्यामनन्तींनामनामतः ३३ प्रियव्रतोत्तानपादौ मनुस्तस्यामजी

के सम्बन्धसे फिर मेरे समीप प्राप्तहोगा १९ । २० ऐसे शाप और अनुग्रहसे युक्तहुआ कामदेव बड़े
आनन्दको मानकर जहाँ से आयाथा वहाँही चलागया २१ मनुजीबोले हे भगवन् वह यदुकौनथा
जिसके बंशमें कामदेव उत्पन्नहुआ और उस कामदेवको शिवजीने किसकारणसे भस्मकर दिया
२२ और भरतबंशमें किसके कौनसी सन्तानहुई यहसबमेरे आगेमूल समेत वर्णनकरो २३ मत्स्यजी
बोले वह ब्रह्माजी के अर्ध शरीरसे उत्पन्नहोनेवाली जो ब्रह्मवादिनी गायत्री है और मनसे उत्पन्न
होने के कारण से शतरूपा शतेन्द्रिया अर्थात् सैंकड़ों इन्द्रियों वाली उस गायत्री के महत्तत्त्व से
रतिमन तप और बुद्धि यहसब उत्पन्न हुए और उसी शतरूपा सरस्वती में ब्रह्माजीने सातपुत्र
उत्पन्न किये २४ । २५ जो मरीच्यादिक सातपुत्र हैं वह तो मानसी हैं अर्थात् ब्रह्माजी के म-
नसे उत्पन्न हैं उन्हीं का यह भुवलोक सर्वज्ञात्मक होताभया २६ इसके अनन्तर ब्रह्माजी त्रिशूल-
धारी शिवजी को रचतेभये फिर सबसे पूर्वहोनेवाले सनत्कुमारोंको रचा २७ इन शिवजी महाराज
ने अपने मुखसे तो ब्राह्मणोंको भुजाओं से क्षत्रियों को जांघोंसे वैश्योंको और पैरों से शूद्रोंकोरचा २८
फिर बिजली बज्र बादल इन्द्रधनुष और वेदोंको रचके परमउत्तम जल रूपमेघोंको भी रचा २९
इसके अनन्तर साध्य देवों के गण अपने तीनों नेत्र और जरामरणसे रहित चौरासीलक्ष योनियों
को भी शिवजीरचतेभये ३० ब्रह्माजी से निषेध कियेहुए भी शिवजीने जरामरणादि से रहितही उ-
नमनुष्यादिकों को रचा तब ब्रह्माजीने शिवजी से कहा कि जरामरण से रहित सृष्टिको रचनायोग्य
नहीं है ३१ क्योंकि सृष्टिवहयोग्य है जो कि जरामरण अर्थात् शुभाशुभ इनदोनों से संयुक्त हो
ब्रह्माजीके ऐसे बचनोंको सुनकर शिवजी स्थितहोगये इसीसे इनकोस्थाणु कहते हैं ३२ इसकेपीछे
बड़े बुद्धिमान् स्वायंभुवने बड़ीभारी दुश्चर तपकरके सुन्दर रूपयुक्त अनन्तीनाम अपनी पत्नीको

जनत्। धर्मस्यकन्याचतुरा सुनृतानामभामिनी ३४ उत्तानपादात्तनयान् प्रापमन्थरगामिनी। अपस्यतिमपस्यन्तं कीर्त्तिमंतंध्रुवंतथा ३५ उत्तानपादोऽजनयत् सुनृतायां प्रजापतिः। ध्रुवोवर्षसहस्राणि त्रीणिकृत्वातपःपुरा ३६ दिव्यमापततःस्थानमचलंब्रह्मणोवरात्। तमेवपुरतःकृत्वा ध्रुवंसप्तर्षयःस्थिताः ३७ धन्यानाममनोःकन्या ध्रुवाच्छिष्टमजीजनत्। अग्निकन्यातुसुच्छाया शिष्टात्सासुषुवेसुतान् ३८ कृपंरिपुंजयंवृत्तं वृकंचवृकतेजसम्। चक्षुषंब्रह्मदौहित्र्यां विरिण्यांसरिपुंजयः ३९ वीरणस्यात्मजायांतु चक्षुर्मनुमजीजनत्। मनुर्वैराजकन्यायां नड्वलायांसचाक्षुषः ४० जनयामासतनयान् दश शूरानकल्मषान्। ऊरुःपूरुःशतद्युम्नस्तपस्वीसत्यवाक्हविः ४१ अग्निष्टुदतिरात्रश्चसुद्युम्नश्चापराजितः।अभिमन्युस्तुदशमो नड्वलायामजायत४२ऊरोरजनयत्पुत्रांषडाग्नेयीतुसुप्रभान्।अग्निंसुमनसंख्यातिं क्रतुमंगिरसंगयम्४३ पितृकन्यासुनीथातुवेनमंगादजीजनत्। वेनमन्यायिनंविप्रा ममन्थुस्तत्करादभूत्। पृथुर्नाममहातेजाः सपुत्रौद्वावजीजनत् ४४ अन्तर्धानस्तुमारीचं शिखण्डिन्यामजीजनत्। हविर्धानात्षडाग्नेयी धिषणाऽजनयत्सुतान्। प्राचीनवर्हिषंसाङ्गं यमंशुक्रंबलंशुभम् ४५ प्राचीनवर्हिर्भगवान् महानासीत्प्रजापतिः। हविर्धानाःप्रजास्तेन बहवःसम्प्रवर्त्तिताः ४६ सवर्णायान्तु सामुद्र्यान्दशाधत्तसुतान्प्रभुः। सर्वेप्रचेतसोनाम धनुर्वेदस्यपारगाः ४७ तत्तपोरक्षिता

प्राप्तकिया ३३ उसी अनन्तीस्त्रीमें मनुने प्रियव्रत और उत्तानपाद इन दोनों पुत्रोंको उत्पन्न किया और सुनृता नामधर्मकी पुत्री जोकि अत्यन्त चतुरथी उसनेउत्तानपादके योगसे अपस्यति अपस्यन्त कीर्त्तिमन्त और ध्रुव इनचारों पुत्रोंको उत्पन्न किया ३४ । ३५ अर्थात् प्रजापति उत्तानपाद से उस सुनृता स्त्री में यहचारपुत्रहुए फिर ध्रुवजीने तीनहजार वर्षतक दारुण तपकिया उसतपके द्वारा ब्रह्माजी के प्रसन्नहोने से ध्रुवने उत्तम और अचल स्थानपाया ३६ । ३७ उस ध्रुव से धन्यानाम मनुकी पुत्रीमें शिष्टउत्पन्न हुआ और शिष्टसे अग्निकी पुत्री सुच्छायामें रूपु रिपुंजयवृत्त वृक और तेजस यह पांच पुत्रहुए रिपुंजय ब्रह्माकी दौहितृ विरिणी नाम स्त्री में चक्षुषको उत्पन्न करताभया फिर उस विरिणी के पुत्रचक्षुष मनु ने नड्वलानाम कन्या में इन आगे लिखेहुए पापरहित दश पुत्रों को उत्पन्न किया उनके नाम ऊरु[१] पूरु[२] तपस्वी शतद्युम्न[३] सत्यवाक्[४] हवि[५] अग्निष्टुत[६] अतिरात्र[७] सुद्युम्न[८] अपराजित[९] और अभिमन्युं[१०] यह दशपुत्र नड्वला के हुए ३८ । ४२ । ऊरु मनु से अग्नि की पुत्री ने अग्नि सुमनस ख्याति क्रतु आंगिरा और गय इन सुन्दर कांतिवाले छः पुत्रों को उत्पन्नकिया और अग्नि राजाके संयोग से पितरोंकी कन्यासुनीथा ने राजा बेनको उत्पन्न किया उस अन्यायी राजाबेनको ब्राह्मणों ने मथन किया उसके मथनेसे बेनके हाथसे बड़ा तेजस्वी राजापृथु उत्पन्नहुआ उस पृथुके दो पुत्रहुए उनदोनों में से बड़े अन्तर्धानने शिखंडिनी स्त्री में मारीच को उत्पन्न किया और हविर्धान के सकाशसे अग्निकी पुत्री धिषणाने प्राचीनवर्हिष सांग यम शुक्र बल और शुभ इन छः पुत्रों को उत्पन्न किया ४३ । ४५ प्राचीन वर्हिष बडा प्रजापति हुआ उसने बहुतसी हविर्धान प्रजा उत्पन्न करी ४६ अर्थात् समुद्र की कन्या सवर्णा में दशपुत्रों को उत्पन्न

वृक्षा बभुर्लोकेसमन्ततः । देवादेशाच्चतानग्निरदहद्द्रविनन्दन ४८ सोमकन्याऽभव
त्पत्नी मारीषांनामविश्रुता । तेभ्यस्तुदक्षमेकंसा पुत्रमग्र्यमजीजनत् ४९ दक्षादनन्तरं
वृक्षानौषधानिचसर्वशः । अजीजनत्सोमकन्या नन्दींचन्द्रवतींतथा ५० सोमांशस्य
चतस्यापि दक्षस्याशीतिकोटयः । तासांतुविस्तरंवक्ष्ये लोकेयःसुप्रतिष्ठितः ५१ द्विपद
श्चाभवन्केचित् केचिद्बहुपदानराः । बलीमुखाःशंकुकर्णाः कर्णप्रावरणास्तथा ५२
अश्वऋक्षमुखाःकेचित् केचित्सिंहाननास्तथा । श्वशूकरमुखाःकेचित् केचिदुष्ट्रमुखा
स्तथा ५३ जनयामासधर्मात्मा म्लेच्छान्सर्व्वाननेकशः । ससृष्ट्वामनसादक्षः स्त्रियःप
श्चादजीजनत् ५४ ददौसदशधर्माय कश्यपायत्रयोदश । सप्तविंशतिसोमाय ददौनक्ष
त्रसंज्ञिताः । देवासुरमनुष्यादि ताभ्यःसर्वमभूज्जगत् ५५ ॥

इतिश्रीमत्स्यपुराणे चतुर्थोऽध्यायः ४ ॥

(ऋषयऊचुः) देवानांदानवानाञ्च गन्धर्व्वोरगरक्षसाम् । उत्पत्तिंविस्तरेणैव
सूत ! ब्रूहियथातथम् १ (सूतउवाच) सङ्कल्पाद्दर्शनात्स्पर्शात् पूर्वेषांसृष्टिरुच्यते ।
दक्षात्प्राचेतसादूर्ध्वं सृष्टिर्मैथुनसम्भवा २ प्रजासृजेतिव्यादिष्टः पूर्वंदक्षःस्वयम्भुवा ।

करताभया वह सब प्रचेतसनामसे प्रसिद्धहोकर धनुर्वेदके पारदर्शी होते भये ४७ उन्हींके तपों से रक्षितहुए वृक्ष इसलोकमें सब ओरको प्रकाशितहुए जब उनवृक्षोंसे सबलोक आच्छादित होगया तब देवताओंकी आज्ञासे उनवृक्षोंको अग्निने भस्मकरदिया फिर उन सब प्रचेतसोंके योगसे चन्द्रमाकी मारीषानाम कन्याने एक उत्तम दक्ष प्रजापतिनाम पुत्रको उत्पन्नकिया ४८।४९ फिर दक्ष के उत्पन्नहोनेकेपीछे उस चन्द्रकन्याने वृक्षों समेत सम्पूर्ण औषधियोंको और चन्द्रवती नदीको उत्पन्नकिया ५० फिर उस सोमके अंशवाले दक्ष प्रजापतिके भी अस्सीकिरोड़ सन्तान उत्पन्न हुईं उन्हीं सन्तानोंके विस्तारसे दक्ष प्रजापति विख्यात होरहाहै उसकी सन्तानों में कोई तो दो पैरे वालेहुए कोई बहुत पैरोंवाले मनुष्य कोई बन्दरके समान मुखवाले शंकुके समान तीक्ष्णकानोंवाले उन्हींकानोंसे ढकेहुए और बहुतसे अन्य २ प्रकारकेभी जीवोंको रचताभया ५१।५२ घोड़े रीछकेसेमुखवाले कोई सिंहकेसमान मुखवाले शूकरकेसमान मुखवाले ऊंटकेसे मुखवाले मनुष्योंको और म्लेच्छोंकोभी वह धर्मात्मादक्ष रचताभया फिर मनसे इस सृष्टिको रचकर स्त्रियोंकोभी मनसेही रचताभया ५३ । ५४ फिर दक्षने दशस्त्रियां धर्मकोदीनी तेरह कश्यपजीकोदीनी और नक्षत्र संज्ञक सत्ताईसस्त्रियां चन्द्रमाकोदीनी उन सब स्त्रियोंसे अपने २ पतियोंके योगसे देवता मनुष्य और पशुपक्षी आदिक सबप्रकारका जगत् उत्पन्न होताभया ५५॥

इतिश्रीमत्स्यपुराणभाषाटीकायांचतुर्थोऽध्यायः ४ ॥

ऋषियोंने पूछा हे सूतजी आपहमपर दयाकरके देवता दानव गन्धर्व उरग और राक्षसोंकी उत्पत्ति अच्छेप्रकारसे विस्तार पूर्व्वक वर्णन कीजिये १ सूतजीबोले कि सृष्टिकी आदिमें पूर्व्वकेमनुष्योंकी उत्पत्ति संकल्पसे दर्शनसे और स्पर्शसेभी होतीभई और दक्ष प्राचेतससे पीछे सबसृष्टिकी उत्पत्ति मैथुनसे अर्थात् स्त्री पुरुषके संयोगसे होजाती भई २ प्रथम ब्रह्माजीकी आज्ञासे दक्ष प्रजापति

यथाससर्जचैवादौ तथैवश्रृणुतद्विजाः ! ३ यदातुसृजतस्तस्य देवर्षिगणपन्नगान्। न
वृद्धिमगमल्लोकस्तदामैथुनयोगतः। दक्षःपुत्रसहस्राणि पाञ्चजन्यामजीजनत् ४ तां
स्तुदृष्ट्वामहाभागः सिसृक्षुर्विविधाःप्रजाः। नारदःप्राहहर्यश्वान् दक्षपुत्रान्समागतान् ५
भुवःप्रमाणंसर्वत्र ज्ञात्वोर्ध्वमधएवच। ततःसृष्टिंविशेषेण कुरुध्वमृषिसत्तमाः ! ६ तेतु
तद्वचनंश्रुत्वा प्रयाताःसर्वतोदिशम्। अद्यापिनानिवर्त्तन्ते समुद्रादिवसिन्धवः ७ हर्यश्वे
षुप्रणष्टेषु पुनर्दक्षःप्रजापतिः। विरिण्यामेवपुत्राणां सहस्रमसृजत्प्रभुः ८ शबलानामते
विप्राः समेताःसृष्टिहेतवः। नारदोऽनुगतान्प्राह पुनस्तान्पूर्ववत्सतान्। भुवःप्रमाणंस
र्वत्र ज्ञात्वाभ्रातृनथोपुनः ९ आगत्यचाथसृष्टिञ्च करिष्यथविशेषतः। तेऽपितेनैवमा
र्गेण जग्मुर्भ्रातृन्यथापुरा १० ततःप्रभृतिनभ्रातुः कनीयान्मार्गमिच्छति। अन्विषन्दुः
खमाप्नोति तेनतत्परिवर्जयेत् ११ ततस्तेषुविनष्टेषु षष्टिंकन्याःप्रजापतिः। वैरिण्याञ्ज
नयामास दक्षःप्राचेतसस्तथा १२ प्रादात्सदशधर्माय कश्यपायत्रयोदश। सप्तविंशति
सोमाय चतस्रोरिष्टनेमये १३ द्वेचैवभृगुपुत्राय द्वेकृशाश्वायधीमते। द्वेचैवाङ्गिरसेतद्व
त्तासान्नामानिविस्तरात् १४ श्रृणुध्वंदेवमातॄणां प्रजाविस्तरमादितः। मरुत्वतीवसूर्या
मी लम्बाभानुररुन्धती १५ सङ्कल्पाचमुहूर्त्ताच साध्याविश्वाचभामिनी। धर्म्मपत्न्यः

जिसप्रकारसे कि आदिमें सृष्टिको रचतेभये सो मैं कहताहूं तुम सब चित्तलगाकर सुनों ३ जब कि
दक्ष प्रजापतिने सृष्टिकोरचा और देवता ऋषिगण और सर्पादिक इनसबसेभी लोकका विस्तार न
हुआ तब दक्षने पांचजनी नाम स्त्रीमें मैथुनकेयोगसे हजारपुत्र पैदाकिये ४ फिर बहुतसी प्रजारचने
की इच्छावाले दक्षके यहाँ महाभाग नारदमुनि आकर प्राप्तहुए और हर्यश्वनामादिक दक्षके दशोंपुत्रोंसे
समझाकर यहवचनकहा कि तुम सब पृथ्वीके ऊपरनीचेके प्रमाणको जानकर अपनी विशेष
प्रजाकी रचनाकरो ५।६ इसप्रकारके उसनारदके वचनको सुनकर वह सब दक्षकेपुत्र सब दिशाओंको
चलेगये वह आजतकभी लौटकर नहींआये जैसे कि समुद्रमें नदी मिलकर गुप्तहोजाती हैं उसीप्रकार
यहसबपुत्रभी पृथ्वीपर जाकर जहाँ तहाँ बासकरतेहुए रहगये और घरको फिर नहींआये ७ जब
इसप्रकारसे हर्यश्वादिक दशोपुत्र नष्टहोगये तब दक्ष प्रजापतिने अपनी विरिणीनाम स्त्रीमें फिर
हजारपुत्रोंको उत्पन्नकिया ८ वह सब सबलनामवाले बिप्रप्रजारचने के लिये संयुक्तहुए तब फिर
पूर्वकेही समान नारदमुनि उनसेभीबोले कि तुमपृथ्वीके प्रमाणको जानकर अपने भाइयोंके ढूंढ़ने
कोजाओ ९ फिर उनको साथलेकर तुम सब सृष्टिको रचोगे ऐसावचन सुनकर वह सबभी उसीमार्गहोकर
जहाँ कि सबभाई गयेथे उसीमार्गको चलेगये १० इसके पीछे जबयहछोटेभाई उन बड़े
भाइयोंके ढूँढनेमें महादुखीहुए और वहकहीं न मिले तो वहभी खेदितहोकर जहाँतहाँको चल देते
भये ११ जब इसप्रकारसे वह दक्ष के पुत्रभी नष्ट होगये तबदक्ष प्रजापति ने उसी अपनी विरिणी
स्त्रीमें साठ कन्या उत्पन्न करीं १२ उनमेंसे दश धर्मराजकोदीं तेरह कश्यपजीको सत्ताईस चन्द्रमा
को चार अरिष्टनेमिको दो भृगुजीको दोकृशाश्वको और दोअंगिरसमुनिको देताभया इनसबकेनाम
क्रम पूर्व्वक कहनेके लिये प्रथम देवताओं की माताओं के विस्तारको कहते हैं मरुत्वती वसूः

समाख्यातास्तासांपुत्रान्निबोधत १६ विश्वेदेवांस्तुविश्वायाः साध्यासाध्यानजीजनत्।
मरुत्वत्यांमरुत्वन्तो वसोस्तुवसवस्तथा १७ भानोस्तुभानवस्तद्वन् मुहूर्त्तायांमुहूर्त्तकाः।
लम्बायांघोषनामानो नागवीर्याऽस्तुयामिजाः १८ पृथिवीतलसम्भूतमरुन्धत्यामजाय
त। सङ्कल्पायास्तुसंकल्पो वसुसृष्टिन्निबोधत १९ ज्योतिष्मन्तस्तुयेदेवा व्यापकाःसर्व
तोदिशम्। वसवस्तेसमाख्यातास्तेषांसर्गन्निबोधत २० आपोध्रुवश्चसोमश्च धरश्चै
वानिलोऽनलः। प्रत्यूषश्चप्रभासश्च वसवोऽष्टौप्रकीर्तिताः २१ आपस्यपुत्राश्चत्वारः
शान्तोवैदण्डएवच। शाम्बोऽथमणिवक्त्रश्च यज्ञरक्षाधिकारिणा २२ ध्रुवस्यकालपुत्र
स्तु वर्चाःसोमादजायत। द्रविणोहव्यवाहश्च धरपुत्रावुभौस्मृतौ २३ कल्याणिन्यांततः
प्राणो रमणःशिशिरोऽपिच। मनोहराऽनिलात्पुत्रानवापाथहरेःसुता २४ शिवामनोज
वम्पुत्रमविज्ञातगतिन्तथा। अवापाचानलात्पुत्रावग्निप्रायगुणौपुनः २५ अग्निपुत्रः
कुमारस्तु शरस्तम्बेव्यजायत। तस्यशाखोविशाखश्च नैगमेयश्चपृष्ठजाः २६ अपत्यं
कृत्तिकानान्तु कार्तिकेयस्ततःस्मृतः। प्रत्यूषसत्त्वृषिःपुत्रो विभुर्नाम्नाथदेवलः। विश्व
कर्माप्रभासस्य पुत्रःशिल्पीप्रजापतिः २७ प्रासादभवनोद्यान प्रतिमाभूषणादिषु। तडा
गारामकूपेषु स्मृतःसोमरवर्धकिः २८ अजैकपादहिर्बुध्न्यो विरूपाक्षोऽथरैवतः। हरश्च
बहुरूपश्च त्र्यम्बकोभुवनेश्वरः २९ सावित्रश्चजयन्तश्च पिनाकीचापराजितः!।

यामी लम्बा भानु अरुंधती १३।१५ संकल्पा मुहूर्त्ता साध्या और विश्वां यहदश तो धर्मराज
की पत्नी कही हैं इनके पुत्र यहहैं कि विश्वाके विश्वेदेवहुए साध्याके साध्य संज्ञक देवता हुए
मरुत्वतीके मरुद्गण संज्ञक देवताहुए बसुके बसुसंज्ञक देवताहुए १६।१७ भानुके भानव-मुहूर्त्ताके
मुहूर्त्तक-लंबाके घोषनामक-यामीके नागवीर्य्यपुत्र अरुन्धतीके पृथ्वीतलमें होनेवाले देवगण उत्पन्न
हुए और संकल्पाके संकल्पनाम पुत्रहुआ इसप्रकारसे तो यहसब पुत्रहुए अब बसुओंकी सृष्टिको सुनों
ज्योतिरूप प्रकाशवाले सब दिशाओंमें व्याप्त ऐसे जो देवताहैं वह सबवसव कहाते हैं उनके नाम
यहहैं आप-ध्रुव-सोम-धर-अनिल-अनल-प्रत्यूष और प्रभास यह अष्टबसुहैं १८।२१ आपके चारपुत्रहुए
शान्त-दण्ड-शांब और मणिवक्र यहचारो यज्ञकीरक्षाके अधिकारी हैं २२ ध्रुवके बालपुत्रहुआ सोमके
वर्चाहुआ और द्रविण और हव्यवाह यह दोपुत्र धरके सकाशसे कल्याणी स्त्रीमें उत्पन्नहुए और प्राण
रमण शिशिर इनतीनपुत्रोंको बायुके योगसे हरिकीपुत्री मनोहरा उत्पन्नकरतीभई २३। २४ और
अग्निके संयोगसे शिवास्त्रीमें मनोजव और अविज्ञात गति यह दोपुत्र अग्निकेही समान गुणवाले
होतेभये २५ फिर शरोंकेगुच्छेमें अग्निकापुत्र स्वामिकार्त्तिक उत्पन्नहुआ इसके अनन्तर कृत्तिकामें
शाख विशाख और नैगमेय यह तीनपुत्र उत्पन्नहुए इसीहितुसे इनको कार्त्तिकेय अर्थात् कृत्तिकाकी
सन्तानभी कहते हैं और प्रत्यूषकेपुत्र देवलनाम समर्थऋषि उत्पन्नहुए-प्रभासका पुत्र बिश्वकर्मा
नाम प्रजापति शिल्पी होताभया २६।२७यह विश्वकर्मा देवताओंके मकान बगीचे मूर्त्ति भूषण तड़ाग
और क्रीड़ाआदिके स्थानोंके बनानेके निमित्त देवताओंका कारीगरहुआ २८ और अजैकपाद अहि-
र्बुध्न्ये विरूपाक्ष्य रैवर्त बहुरूप त्र्यंबक भुवनेश्वर २९ सावित्र जयन्त अपराजित अर्थात् जो किसीसे

एतेरुद्राःसमाख्याता एकादशगणेश्वराः ३० एतेषांमानसानान्तु त्रिशूलवरधारिणाम्। कोटयश्चतुराशीतिस्तत्पुत्राश्चाक्षयामताः ३१ दिक्षुसर्वासुयेरक्षां प्रकुर्वन्तिगणेश्वराः। पुत्रपौत्रसुताश्चैते सुरभीगर्भसम्भवाः ३२ ॥ इतिश्रीमत्स्यपुराणेपञ्चमोऽध्यायः ५ ॥

(सूत उवाच) कश्यपस्यप्रवक्ष्यामि पत्नीभ्यःपुत्रपौत्रकान्। अदितिर्दितिर्दनुश्चैव अरिष्टासुरसातथा १ सुरभिर्विनतातद्वत्ताम्राक्रोधवशाइरा। कद्रूर्विश्वामुनिस्तद्वत्तासां पुत्रान्निबोधत २ तुषितानामयेदेवाश्चाक्षुषस्यान्तरेमनोः। वैवस्वतेऽन्तरेचैते आदित्या द्वादशस्स्मृताः ३ इन्द्रोधाताभगस्त्वष्टामित्रोऽथवरुणोयमः। विवस्वान्सवितापूषा अंशुमान्विष्णुरेवच ४ एतेसहस्रकिरणा आदित्याद्वादशस्स्मृताः। मारीचात्कश्यपादाप पुत्रानदितिरुत्तमान् ५ भृशाश्वस्यऋषेःपुत्रा देवप्रहरणाःस्मृताः। एतेदेवगणाविप्राः प्रतिमन्वन्तरेषुच ६ उत्पद्यन्तेप्रलीयन्ते कल्पेकल्पेतथैवच। दितिःपुत्रद्वयंलेभे कश्यपादितिनःश्रुतम् ७ हिरण्यकशिपुञ्चैव हिरण्याक्षंतथैवच। हिरण्यकशिपोस्तद्वज्जातंपुत्र चतुष्टयम् ८ प्रह्लादश्चानुह्लादश्च संह्लादोह्लादएवच। प्रह्लादपुत्रआयुष्मान् शिविर्वाष्कलएवच ९ विरोचनश्चतुर्थश्च सबलिंपुत्रमाप्तवान्। बलेःपुत्रशतंत्वासीद्बाणज्येष्ठं ततोद्विजाः १० धृतराष्ट्रस्तथासूर्यश्चन्द्रश्चन्द्रांशुतापनः। निकुम्भनाभोगुर्वक्षः कुक्षिभीमोविभीषणः ११ एवमाद्यास्तुबहवो बाणज्येष्ठागुणाधिकाः। बाणःसहस्रबाहुश्च स

विजय न कियाजाय-पिनाकी[११] यहग्यारहरुद्र गणेश्वरकहाते हैं २९। ३० इनमानस त्रिशूलधारी रुद्रगणों की चौरासी किरोड़ संख्याकही है और इनकेपुत्रभी अनन्तहैं ३१ और जो गणेश्वर सब दिशाओंमें रक्षाकरते हैं वह सब इनएकादश रुद्रोंकेपुत्र पौत्रोंकेभी पुत्रकहे हैं ३२ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांपंचमोऽध्यायः ५ ॥

सूतजीबोले अब कश्यपजीकी स्त्रियों से जो२ पुत्र उत्पन्नहुएहैं उनको कहतेहैं अदिति-दिति-दनु अरिष्टा-सुरसा१ सुरभि-विनता-नम्रा-क्रोधवशा-इरा-कद्रू-विश्वामुनि यहतेरह तो कश्यपजीकी स्त्रियां होतीभईं अब इनसे जो पुत्रहुए उनकोसुनों २ चाक्षुषमन्वन्तरमें कश्यपजीके पुत्र तुषितनाम देवताहुए फिर बैवस्वत मनु के अन्त में कश्यपजी के बारह आदित्य उत्पन्नहुए ३ उनके नामयह हैं इन्द्र[१] धाता[२] भृगु[३] त्वष्टा[४] मित्र[५] बरुण[६] यम[७] विवस्वान्[८] सविता[९] पूषा[१०] अंशुमान्[११] बिष्णु[१२] यह सहस्र किरणवाले बारह आदित्य मरीचिऋषि से उत्पन्नहोकर कश्यपजीके योगसे अदितिको उत्तमपुत्र होकर प्राप्तहुए ४।५ और भृशाश्वऋषि के पुत्र देवप्रहरण नामसे विख्यातमनु मनु और कल्पकल्पके पीछे उत्पन्नहोते हैं और लीनभी होजाते हैं और यहभी सुनाजाता है कि कश्यपजी से दितिनाम स्त्रीमें दोपुत्र उत्पन्नहुए ६। ७ जिनमें बड़ा हिरण्यकशिपु और दूसरा हिरण्याक्ष था हिरण्यकशिपुके प्रह्लाद-अनुह्लाद-संह्लाद और ह्लाद यहचारपुत्रहुए ८ प्रह्लादके आयुष्मान्[१] शिवि[२] वाष्कल[३] और विरोचन[४] यह चारपुत्रहुए फिर विरोचन के बलिहुआ और हे ऋषिलोगो राजाबलिके सौ१०० पुत्रहुए उनमें सबसेबड़ा बाणासुरहुआ ९।१० और धृतराष्ट्र सूर्य्य चन्द्र- चन्द्रांशु-तापन-निकुम्भ-नाभ गुर्वक्ष-कुक्षिभीम और विभीषणको आदि लेकर बहुतसे बाणा-

र्वास्त्रगणसंयुतः १२ तपसातोषितोयस्य पुरेघसतिशूलभृत् । महाकालत्वमगमत्साम्यं
यश्चपिनाकिनः १३ हिरण्याक्षस्यपुत्रोऽभूदुलूकःशकुनिस्तथा । भूतसन्तापनश्चैवं म
हानाभस्तथैवच १४ एतेभ्यःपुत्रपौत्राणां कोटयःसप्तसप्ततिः । महाबलामहाकाया नाना
रूपामहौजसः १५ दनुःपुत्रशतंलेभे कश्यपाद्बलदर्पितम् । विप्रचित्तिःप्रधानोऽभूद्ये
षांमध्येमहाबलः १६ द्विमूर्द्धाशकुनिश्चैव तथाशंकुशिरोधरः । अयोमुखःशम्बरश्च क
पिशोनामतस्तथा १७ मारीचिर्मेघवांश्चैव इरागर्भशिरास्तथा । विद्रावणश्चकेतुश्च के
तुवीर्यःशतह्रदः १८ इन्द्रजित्सप्तजिच्चैव वज्रनाभस्तथैवच । एकचक्रोमहाबाहुर्वज्रा
क्षस्तारकस्तथा १९ असिलोमापुलोमाच विन्दुर्बाणोमहासुरः । स्वर्भानुर्वृषपर्वाच एव
माद्यादनोःसुताः २० स्वर्भानोस्तुप्रभाकन्या शचीचैवपुलोमजा । उपदानवीमयस्यासी
त्तथामन्दोदरीकुहूः २१ शर्मिष्ठासुन्दरीचैव चन्द्राचवृषपर्वणः । पुलोमाकालकाचैव
वैश्वानरसुतेहिते २२ बह्वपत्येमहासत्वे मारीचस्यपरिग्रहे । तयोःषष्टिसहस्राणि दान
वानाममभूत्पुरा २३ पौलोमान्कालकेयांश्च मारीचोऽजनयत्पुरा । अवध्यायेऽमराणांवै
हिरण्यपुरवासिनः २४ चतुर्मुखाल्लब्धवरास्तेह्यताविजयेनतु । विप्रचित्तिःसैंहिकेयान्
सिंहिकायामजीजनत् २५ हिरण्यकशिपोर्यैवै भागिनेयास्त्रयोदश । व्यंसःकल्पश्चराजे
न्द्रोनलोवातापिरेवच २६ इल्वलोनमुचिश्चैव श्वसृपश्चाजनस्तथा । नरकःकालनाभश्च

सुरके भाई होतेभये बाणासुरके शरीरमें हजार भुजाहुईं और सम्पूर्ण शस्त्र विद्याओंमें भी बड़ाकुशलथा ११ । १२ जिसकी तपस्यासे प्रसन्नहोकर शिवजी उसीकेपुरमें बासकरतेरहे और बहुत काल पर्य्यन्त वह बाणासुर वहाँ रहकर शिवजीके समान गुणवाला होताभया १३ और दूसरेभाई हिरण्याक्षके उलूक शकुनि भूतसन्तापन और महानाभ यह चारपुत्रहुए १४ इसके अनन्तर इसके सबपुत्र पौत्रादिक ७७ किरोड़ होतेभये १५ और कश्यपजीके संयोगसे उनकी दनुनाम स्त्रीमें बड़े बलगर्वित सौ १०० पुत्र उत्पन्नहुए इनसबमें विप्रचित्तिनाम पुत्र बड़ाबलवान् विख्यातहुआ १६ इनके विशेष द्विमूर्द्धा-शकुनि-शंकु-शिरोधर-अयोमुख-शम्बर-कपिश-मारीचि-मेघवान्-इपुगर्भ-शिरा-विद्रावण-केतु-केतुवीर्य-शतहृद-इंद्रजित् सप्तजित्-बज्रनाभ-एकचक्र-महाबाहु-बज्राक्ष-तारकासुर १७। १९असिलोमा-पुलोमा-विन्दु-बाण-महासुर-स्वर्भानु-वृषपर्वा इत्यादि नामवाले दनुके पुत्रहुए २०स्वर्भानुके प्रभानाम कन्याहुई-पुलोमाके शचीनाम कन्याहुई और मयअसुरके उपदानवी मन्दोदरी और कुहू यह तीन कन्यापैदाहुईं २१ वृषपर्वाअसुरके शर्मिष्ठा-सुन्दरी और चन्द्रा यह कन्याहुईं और पुलोमा और कालकानाम अग्निकी महापराक्रमी दोनोंकन्या कश्यपकेसंग बिवाहीगईंथीं उनदोनों पुलोमा और कालकानाम कन्याओंमें कश्यपजीके प्रसंगसे साठहजार असुर उत्पन्नहुए वह असुरों से अजितहोकर हिरण्यपुरवासी दैत्यहुए २२ । २४ ब्रह्माजीसे इनसबको बरमिले युद्धमें इनकी कभी पराजय न हुई और विप्रचित्ति दैत्य अपनी सिंहिका स्त्रीमें सैंहिकेय संज्ञक असुरोंको उत्पन्न करताभया २५ और व्यंस-कल्प-राजेन्द्र-नल-वातापि-इल्वल-नमुचि-श्वसृप-अजन-नरक-कालनाभ

सरमाणस्तथैवच २७ कालवीर्य्यश्चविख्यातो दनुवंशविवर्द्धनाः । संह्लादस्यतुदैत्यस्य निवातकवचास्स्मृताः २८ अवध्याःसर्वदेवानां गन्धर्व्वोरगरक्षसाम् । येहताभर्गमाश्रित्य त्वर्जुनेनरणाजिरे २९ षट्कन्याजनयामास ताम्रामारीचवीजतः । शूकीश्येनीचभासीच सुग्रीवीगृध्रिकाशुचिः ३० शूकीशूकानुलूकांश्च जनयामासधर्म्मतः । श्येनीश्येनांस्तथाभासी कुररानप्यजीजनत् ३१ गृध्रीगृध्रान्कपोतांश्च पारावतविहंगमान् । हंससारसक्रौञ्चांश्च प्लवान्शुचिरजीजनत् ३२ अजाश्वमेषोष्ट्रखरान् सुग्रीवीचाप्यजीजनत् । एषताम्रान्वयःप्रोक्तो विनतायांनिबोधत ३३ गरुडःपततांनाथो अरुणश्चपतत्रिणाम् । सौदामिनीतथाकन्या येयंनभसिविश्रुता ३४ सम्पातिश्च जटायुश्च अरुणस्यसुतावुभौ । सम्पातिपुत्रोबभ्रुश्च शीघ्रगश्चापिविश्रुतः ३५ जटायुषःकर्णिकारः शतगामीचविश्रुतौ । सारसीरज्जुबालश्च भेरुण्डश्चापितत्सुताः ३६ तेषामनन्तमभवत् पक्षिणांपुत्रपौत्रकम् । सुरसायाःसहस्रन्तु सर्पाणामभवत् पुरा ३७ सहस्रशिरसांकद्रूः सहस्रञ्चापिसुव्रत !। प्रधानास्तेषुविख्याताः षट्विंशतिररिन्दम !३८ शेषवासुकिकर्कोट शंखैरावतकम्बलाः।धनञ्जयमहानील पद्माश्वतरतक्षकाः ३९ एलापत्रमहापद्म धृतराष्ट्रबलाहकाः । शंखपालमहाशंख पुष्पदंष्ट्रशुभाननाः ४० शंकुरोमाचबहुलो वामनःपाणिनस्तथा। कपिलोदुर्मुखश्चापि पतञ्जलिरितिस्मृताः ४१

सरमाण और कलवीर्य यह तेरह असुर हिरण्यकशिपुके भानजेहोकर दानवोंके वंशके बढ़ानेवाले होतेभये संह्लाद दैत्यके निवात-कवच संज्ञक पुत्रहोतेभये २६ । २८ यह निवात कवच असुर सब देवता उरग गन्धर्व और राक्षसोंसेभी नहीं मारेगयेथे तब द्वापरमें आकर शिवजीकी सहायतासे अर्जुननेरणमें इनकाबधकियाहै २९ कश्यपजीके योगसे ताम्रास्त्रीकेशूकी-श्येनी-भासी-सुग्रीवा गृध्रिका-शुचि यह छः कन्या उत्पन्नहुईं ३० शूकीस्त्री के तोते और उल्लू पक्षी पैदाहुए श्येनीकेबाज पैदाहुए-भासीके चील्ह आदिक पक्षीहुए ३१ गृध्रीकस्त्रीके गिद्ध-कपोत-परेवा पक्षी पैदाहुए शुचिस्त्री के हंस सारस-कूर्जपक्षी और मुर्गाबी पक्षीहोतेहुए ३२ सुग्रीवाके बकरी घोडे मेंढ़े ऊंट गधे आदि जीव उत्पन्नहुए यह तो ताम्राका बंश वर्णनहुआ अब विनताके बंशको कहते हैं ३३ विनताके कश्यपजीके संयोगसे पक्षियोंकाराजा गरुड़ सूर्य्यका सारथी अरुण और आकाशमें प्रसिद्ध एक सौदामिनीकन्या यह सन्तान उत्पन्नहुईं ३४ यह अरुणभी पक्षियोंका राजाथा इसीसे इसके सम्पाती और जटायु यह दोपुत्र उत्पन्नहुए सम्पातीके बभ्रू और शीघ्रग यहदोपुत्रहुए और जटायुकेकर्णिकार और शतगामी नाम दोपुत्रहुए इनदोनोंकेसारस रज्जुबाल और भेरुण्ड यहतीन पुत्रहुए ३५।३६फिर इनसबपक्षियोंके अनन्तपुत्र पौत्रादिकहुए सुरसाके हजारसर्प उत्पन्नहुए ३७ कद्रूके हजार बिच्छू और सर्पादिक उत्पन्नहुए हे सुव्रत इनसबसर्पोंमें छब्बीस सर्प विख्यातहुए ३८ उनके यह नाम हैं शेष[1] वासुकि[2] कर्कोटि[3] शंख[4] ऐरावत[5] कंबल[6] धनंजय[7] महानील[8] पद्म[9] अश्वतर[10] तक्षक[11] एलापत्र[12] महापद्म[13] धृतराष्ट्र[14] बलाहक[15] शंखपाल[16] महाशंख[17] पुष्पदंष्ट्र[18] शुभानन[19] शंकुलोमा[20] बहुल[21] बामन[22] पाणिनि[23] कपिल[24]

एषामनन्तमभवत् सर्वेषांपुत्रपौत्रकम्। प्रायशोयत्पुरादग्धं जनमेजयमंदिरे ४२
दंष्ट्रिणांनियुतंतेषां भीमसेनादगात्क्षयम्। रक्षोगणंक्रोधवशा स्वनामानमजीजनत् ४३
रुद्राणाञ्चगणंतद्वद् गोमहिष्योवरांगनाः। सुरभिर्जनयामास कश्यपात्संयतव्रता ४४
मुनिर्मुनीनाञ्चगणं गणमप्सरसांतथा। तथाकिन्नरगन्धर्व्वानरिष्टाऽजनयद्बहून् ४५
तृणवृक्षलतागुल्ममिरासर्वमजीजनत्। विश्वातुयक्षरक्षांसि जनयामासकोटिशः ४६
ततएकोनपञ्चाशन्मरुतःकश्यपाद्दितिः। जनयामासधर्म्मज्ञान् सर्वानमरवल्लभान्४७

इतिश्रीमत्स्यपुराणेकश्यपान्वयोनामषष्ठोऽध्यायः ६॥

(ऋषय ऊचुः) दितेःपुत्राःकथंजाता मरुतोदेववल्लभाः। देवैर्जग्मुश्चसापत्नैः कस्मात्ते
सख्यमुत्तमम् १ (सूत उवाच)पुरादेवासुरेयुद्धे हतेषुहरिणासुरैः पुत्रपौत्रेषुशोकार्त्ता गत्वाभू
लोकमुत्तमम् २ स्यमन्तपञ्चकक्षेत्रे सरस्वत्यास्तटेशुभे। भर्तुराराधनपरा तपउग्रंचचा
रह ३ तदादितिर्दैत्यमाता ऋषिरूपेणसुव्रत!। फलाहारातपस्तेपे कृच्छ्रंचान्द्रायणादि
कम् ४ यावद्वर्षशतंसाग्रं जाताशोकसमाकुला। ततःसातपसातप्ता वसिष्ठादीनपृच्छत
५ कथयन्तुभवन्तोमे पुत्रशोकविनाशनम्। व्रतंसौभाग्यफलदमिहलोकेपरत्रच ६ ऊचु

दुर्मुखं[२५] और पतंजलि[२६] यह छव्बीस सर्पमुख्यहोते भये ३९। ४१ फिर इनसर्पों के अनन्तपुत्र पौत्रादिक होतेभये प्रथम इनसर्पोंमेंसे दशहजार सर्पोंका नाश तो भिमिसेनके सम्बन्धसेहुआ फिर असंख्य सर्पोंको यज्ञमें जनमेजय ने भस्मकरवाया क्रोधबशास्त्रीके अपनेनामके अनुसार क्रोधवाले राक्षस उत्पन्नहुए और कश्यपजीकेही सकाशसे सुरभीसे गौ महिषी और सुन्दर स्त्रियां उत्पन्नहोती भई ४२। ४४ मुनिनामस्त्री मुनियोंके गणोंको उत्पन्न करके अप्सरा गणोंकोभी उत्पन्न करतभिई अरिष्टास्त्रीसे बहुतसे किन्नर गन्धर्व्वादिक होतेभये ४५ इरानामस्त्री बहुतसे तृण गुल्म बेल लता आदिक बनस्पतियोंको उत्पन्न करतीभई विष्टपास्त्री किरोड़ों यक्ष राक्षसोंको पैदाकरतीभई ४६ इसके अनन्तर दितिस्त्रीने कश्यपजीके संयोगसे बड़े धर्मज्ञ और सब देवताओंके प्यारे ४९ मरुद्गण संज्ञक देवताओंको उत्पन्न किया ४७॥

इतिश्रीमत्स्यपुराणभाषाटीकायांकश्यपान्वयोनामषष्ठोऽध्यायः ६॥

शौनकादिऋषिबोले हेसूतजी दितिके पुत्र मरुद्गण देवताओंके प्यारे कैसे होतेभये क्योंकि देवताओंसे और दितिके पुत्र दैत्योंसे तो बड़ीभारी शत्रुताथी ऐसाहोनेपर इनका उत्तम स्नेहकैसे हुआ १ सूतजी बोले प्रथम देवता और दैत्योंके युद्धमें विष्णु भगवान्ने असुरोंको मारडाला तब पुत्र पौत्रादिकों के शोकसे पीड़ितहोकर उनकीमातादिति इस पृथ्वीतलमें प्राप्त होतीभई २ और सरस्वती नदी के उत्तम तटपर स्यमन्तक नाम क्षेत्रमें अपने स्वामी के आराधनमें तत्पर होकर उग्रतपस्या करती भई ३ उससमय उसदितिने ऋषिकारूप धारणकरके फलोंका आहार करके चान्द्रायण ब्रतकोकिया ४ इसकेपीछे उसने दिव्य सौ १०० बर्षतक तपस्याको करके पुत्रोंके शोकसे महापीड़ित होके वसिष्ठादिक ऋषियोंसे पूछा ५ कि आपसब ऋषिलोग मेरे पुत्रोंकेशोक नाशकरनेवाले ऐसे ब्रतको बताओ जो कि इसलोकमें सुखका देनेवाला और परलोकमें हितका करनेवालाहोय ६ तब सब

वसिष्ठप्रमुखा मदनद्वादशीव्रतम् । यस्याःप्रभावादभवत् सुतशोकविवर्जिताः ७ (ऋ
षय ऊचुः) श्रोतुमिच्छामहेसूत ! मदनद्वादशीव्रतम् । सुतानेकोनपञ्चाशद् येनलेभे
दितिःपुनः ८ (सूतउवाच) यद्वसिष्ठादिभिःपूर्वं दितेःकथितमुत्तमम् । विस्तरेणतदे
वेदं मत्सकाशान्निबोधत ९ चैत्रमासिसितेपक्षे द्वादश्यांनियतव्रतः । स्थापयेदव्रणंकुम्भं
सिततण्डुलपूरितम् १० नानाफलयुतंतद्वदिक्षुदण्डसमन्वितम् । सितवस्त्रयुगच्छन्नं
सितचन्दनचर्चितम् ११ नानाभक्ष्यसमोपेतं सहिरण्यन्तुशक्तितः । ताम्रपात्रंगुड़ोपेतं
तस्योपरिनिवेशयेत् १२ तस्मादुपरिकामन्तु कदलीदलसंस्थितम् । कुर्य्याद्भार्याद्वयोपे
तं रतिंतस्यचवामतः १३ गन्धंधूपंततोदद्याद् गीतंवाद्यञ्चकारयेत् । तदभावेकथांकु
र्य्यात् कामकेशवयोर्नरः १४ कामनाम्नोहरेरर्चां स्नापयेद्गन्धवारिणा । शुक्लपुष्पाक्षत
तिलैरर्चयेन्मधुसूदनम् १५ कामायपादौसंपूज्य जङ्घेसौभाग्यदायच । ऊरूस्मरायेति
पुनर्मन्मथायेतिवैकटिम् १६ स्वच्छोदरायेत्युदरमनङ्गायेत्युरोहरेः । मुखंपद्ममुखायेति
बाहूपञ्चशरायवै १७ नमःसर्व्वात्मनेमौलिमर्चयेदितिकेशवम् । ततःप्रभातेतंकुम्भं ब्रा
ह्मणायनिवेदयेत् १८ ब्राह्मणान्भोजयेद्भक्त्या स्वयञ्चलवणादृते । भुक्त्वातुदक्षिणांदद्या

वसिष्ठादिक ऋषि उसको मदनद्वादशी १२ का व्रतबतलातेहुए और कहनेलगे कि इसद्वादशीकेव्रत
से तू पुत्रों के शोकसे निवृत्त होजायगी ७ ऋषिबोले हे सूतजी हमभी उस मदन द्वादशी के व्रत
को सुनने की इच्छाकरते हैं जिसके कि व्रतकरने से दिति के फिर ४९ पुत्रउत्पन्नहुए ८ सूतजी
बोले कि जो वसिष्ठादिक मुनियों ने दितिको उत्तमव्रत बतायाथा उसको मैं विस्तारसे वर्णनकर-
ताहूं तुम चित्तलगाकर सुनो ९ चैत्रशुक्ला द्वादशीको नियमपूर्व्वक व्रतधारण करके छिद्रादि रहित
उत्तम कलशको श्वेत चांवलों से पूर्ण करे १० फिर उसको ऋतुफल और ईखके गांड़े से युक्तकर
श्वेतबस्त्रों से आच्छादित करके श्वेतचंदन से चर्चितकरे ११ फिर अनेकप्रकार के भक्ष्यपदार्थों
से और शक्तिके अनुसार सुवर्ण सहित गुड़से भरेहुए तांबेके पात्रको उसके ऊपर स्थापितकरे १२
उसके ऊपर केलेके पत्तेपर कामदेवकी मूर्त्ति स्थापितकरे उस मूर्त्तिको दोस्त्रियों की मूर्त्तिसे युक्त करे
फिर कामदेव की मूर्त्तिके बामभाग में कामदेव की स्त्री रतिको स्थापितकरे १३ फिर चन्दनादिगंध
धूप दीप नैवेद्यादि से पूजनकर गीत वाद्यकर कामदेव और श्रीकृष्णजी की कथाको वर्णनकरे १४
और कामदेवके नाम से हरि भगवानका पूजनकरे अर्थात् गन्धयुक्त जलसे विष्णुकी मूर्त्तिको स्नान
करावे और सफेदचंदन सफेदपुष्प अक्षतआदि से मधुसूदन भगवान्का पूजनकरे १५ अब पूजनका
क्रमसुनो कामायनमः ऐसा कहकर भगवान् के चरणोंका पूजनकरे सौभाग्यदायनमः ऐसा कहकर
पिंडलियोंका पूजनकरे स्मरायनमः ऐसाकहके जंघाओं का पूजनकरे मन्मथायनमः इसमंत्रसेकमर
का पूजनकरे १६ स्वच्छोदरायनमः यहकहके उदर का अनंगायनमः छाती को पद्ममुखाय नमः
मुखको पंचशरायनमः बाहुओंको और सर्वात्मनेनमः ऐसाकहकर केशव भगवान् के मस्तककापूजन
करे इस रीति से भगवान् के अंगोंका पूजनकर फिर प्रातःकाल उठकर शुद्धतापूर्वक उसकलश को
ब्राह्मणके अर्थदेदे १७ । १८ फिर शक्तिके अनुसार ब्राह्मणोंका भोजनकरावे और आप अलोनाभो-

दिमंमन्त्रमुदीरयेत् १९ प्रीयतामत्रभगवान् कामरूपीजनार्दनः । हृदयेसर्वभूतानां य आनन्दोऽभिधीयते २० अनेनविधिनासर्वं मासिमासिव्रतंचरेत् । उपवासीत्रयोदश्यामर्चयेद्विष्णुमव्ययम् २१ फलमेकञ्चसम्प्राश्य द्वादश्याम्भूतलेस्वपेत् । ततस्त्रयोदशेमासि घृतधेनुसमन्विताम् २२ शय्यांदद्यादनङ्गाय सर्वोपस्करसंयुताम् । काञ्चनंकामदेवञ्च शुक्लांगाञ्चपयस्विनीम् २३ वासोभिर्द्विजदाम्पत्यं पूज्यंशक्त्याविभूषणैः । शय्या गन्धादिकंदद्यात् प्रीयतामित्युदीरयेत् २४ होमःशुक्लतिलैःकार्य्यः कामनामानिकीर्त्तयेत् । गव्येनहविषातद्वत् पायसेनचधर्म्मवित् २५ विप्रेभ्योभोजनन्दद्याद्वित्तशाठ्यंविवर्जयेत् । इक्षुदण्डानथोदद्यात् पुष्पमालाश्चशक्तितः २६ यःकुर्याद्विधिनानेन मदनद्वादशीमिमाम् । ससर्वपापनिर्मुक्तः प्राप्नोतिहरिसाम्यताम् २७ इहलोकेवरान्पुत्रान् सौभाग्यफलमश्नुते । यःस्मरःसंस्मृतोविष्णुरानन्दात्मामहेश्वरः २८ सुखार्थीकामरूपेण स्मरेदङ्गजमीश्वरम् । एतच्छ्रुत्वाचकारासौ दितिःसर्वमशेषतः २९ कश्यपोव्रतमाहात्म्यादागत्यपरयामुदा । चकारकर्कशांभूयो रूपयौवनशालिनीम् ३० वरैराच्छन्दयामास सातुवव्रेततोवरम् । पुत्रंशक्रवधार्थाय समर्थममितौजसम् ३१ वरयामिमहात्मानं सर्वामरनिषूदनम् । उवाचकश्यपोवाक्यमिन्द्रहन्तारमूर्जितम् ३२ प्रदास्याम्यहमेवेह किंत्वेत

जनकरे फिर भोजनकराकर जब दक्षिणादे तब इसमंत्रको उच्चारणकरे १९ अर्थात् इस वचन को कहै कि यहां वह कामरूपी भगवान् प्रसन्नहोयँ जो संपूर्ण प्राणियों के हृदय में आनन्दस्वरूप कहे जाते हैं २० इस संपूर्ण प्रकारसे विधिपूर्व्वक प्रतिमास व्रतकरे और इसव्रतका करनेवाला पुरुष त्रयोदशीके दिन विष्णुका पूजनकरे २१ औरद्वादशीके दिनएकफलका भोजनकरके पृथ्वीपरसोवै फिर वारह महीनेपीछे पुरुषोत्तम तेरहवें महीनेमें घृत धेनु अर्थात् घृतकी गौ बनाके उसका दानकरे २२ और कामदेवकी प्रीतिके निमित्त सर्व्व वस्तुओंसे युक्त शय्या दानकरे उस शय्यापर सुवर्णकी कामदेव की मूर्त्ति ब्राह्मणको देकर श्वेत गौकाभी विधि पूर्वक दानकरे २३ और शक्तिके अनुसारब्राह्मण ब्राह्मणीके जोड़ोंको जिमावै और उनका वस्त्राभरणसे पूजनकरे शय्यापरसुगन्धित बस्तुओंकाभी दान करे इसकेपीछे प्रसन्न होकर ब्राह्मणसे सुन्दर वचन वाले २४ कामदेवके नामोंका कीर्त्तन पूर्व्वक श्वेत तिल और गौके दूधकी खीरसे अग्निमें हवनकरे २५ फिर वित्तशाठ्य से रहित यथाशक्ति ब्राह्मणोंका भोजनकराके उनके अर्थ ईखके गांडे और पुष्पोंकी माला अर्पण करे २६ जो पुरुष इस विधिसे इसमदन द्वादशीको करता है वह सब पापोंसे छूटकर विष्णुमें लीनहोजाता है २७ और इसलोकमें उत्तम पुत्रोंको प्राप्तकरके अन्तमें सौभाग्य फलको भोगताहै जो कि कामदेवको विष्णु रूप आनन्दात्मा और महेश्वर रूपकहाहै २८ इसीसे सुखकी इच्छा करनेवाला मनुष्य उस विष्णु के शरीरसे उत्पन्न हुए कामदेवको ध्यानकरे इसप्रकार इस सब माहात्म्यकोदितिने सुनकर इस उत्तम व्रतको किया २९ तब इसव्रतके प्रभावसे उसके समीप वड़े आनन्दमें भरे कश्यपजी आये और तपस्यासे कृशांग होनेवाली उस दितिको रूप यौवनसे संयुक्तकरके यह कहतेभये कि बरदान मांग तब उस दितिने बड़े अतुलबलवाला सब देवताओं समेत इन्द्रकाभी मारनेवाला पुत्रमांगा यह

त्क्रियतांशुभे !। आपस्तम्वःकरोत्विष्टिं पुत्रीयामद्यसुव्रते ! ३३ विधास्यामिततोगर्भमि
न्द्रशत्रुनिषूदनम् । आपस्तम्वस्ततश्चक्रे पुत्रेष्टिन्द्रविणाधिकाम् ३४ इन्द्रशत्रुर्भवस्वे
ति जुहावचसविस्तरम् । देवामुमुदिरेदैत्या विमुखाःस्युश्चदानवाः ३५ दित्यांगर्भमथा
धत्त कश्यपःप्राहतांपुनः । त्वयायत्नोविधातव्यो ह्यस्मिन्गर्भेवरानने ! ३६ सम्वत्सरश
तंत्वेकमस्मिन्नेवतपोवने । सन्ध्यायांनैवभोक्तव्यं गर्भिण्यावरवर्णिनि ! ३७ नस्थातव्यं
नगन्तव्यं वृक्षमूलेषुसर्वदा । नोपस्करेषूपविशेन् मुसलोलूखलादिषु ३८ जलेचनावगा
हेत शून्यागारञ्चवर्जयेत् । वल्मीकायांनतिष्ठेत नचोद्विग्नमनाभवेत् ३९ विलिखेन्ननखै
र्भूमिन्नाङ्गारेणनभस्मना । नशयालुःसदातिष्ठेद्व्यायामञ्चविवर्जयेत् ४० नतुषांगारभ
स्मास्थि कपालिषुसमाविशेत् । वर्जयेत्कलहंलोकैर्गात्रभङ्गंतथैवच ४१ नमुक्तकेशाति
ष्ठेत नाशुचिःस्यात्कदाचन । नशयीतोत्तरशिरा नचापरांशिराःक्वचित् ४२ नवस्त्रहीना
नोद्विग्ना नचार्द्रावरणासती । नामङ्गल्यांवदेद्वाचं नचहास्याधिकाभवेत् ४३ कुर्य्यात्तु
गुरुशुश्रूषां नित्यंमाङ्गल्यतत्परा । सर्व्वौषधीभिःकोष्णेन वारिणास्नानमाचरेत् ४४कृत
रक्षासुभूषाच वास्तुपूजनतत्परा । तिष्ठेत्प्रसन्नवदना भर्तुःप्रियहितेरता ४५ दानशी
लातृतीयायां पार्वण्यंनक्रमाचरेत् । इतिवृत्ताभवेन्नारी विशेषेणतुगर्भिणी ४६ यस्तुत

सुनकर कश्यपजी बोले ३० । ३२ कि तुझे तबहीं बड़े अतुल पराक्रम और तेज ऐश्वर्य्य युक्त
इन्द्रादि देवताओंका मारनेवाला पुत्रदूंगा जब कि तू इसतपको छोड़कर आपस्तंबनाम मुनिसे
पुत्रसम्बन्धी यज्ञकरावेगी ३३ इसकेपीछे दितिने बहुतसा द्रव्य खर्चकरके आपस्तंबजीसे पुत्रेष्टियज्ञ
करवाया और इन्द्रका शत्रुबढ़े ऐसे मंत्रोंसे यज्ञकी अग्निमें हवनकरवाया और जिस समय देवता
प्रसन्न होरहेथे और दैत्य दानव बिमुखहोरहेथे उस समयपर कश्यपजीने दितिकेगर्भ धारण किया
और वहवचन भी दितिसे कहा कि हे बरानने तुझको इस गर्भका बड़ा यत्न करना चाहिये ३४ ।
३६ हे उत्तम बर्णवाली तुमको इसी तपोबनमें सौ १०० बर्षतक यत्नपूर्वक रहना चाहिये और
गर्भिणी होकर तू कभी सन्ध्या समयमें भोजन न करियो ३७ वृक्षोंकी जड़मेंकभी जाकर न ठहरना
और बुहारी मूसल और ऊखल इनके समीप कभी न बैठना ३८ जलमें कभी गोतानमारना सूने
मकानमें न जाना सर्पकी बामीके पास खड़ी न होना और कभी तुझको उनमनी भी न होना चाहिये
३९ नखोंसे पृथ्वी न खोदना आगके कोयलेसे या राखसे कभी लकीरे न करना हर समय न
सोना न किसीप्रकारकी कसरत करना ४० तुष अंगार भस्म अस्थि और कपाल इनपै पैर न रखना
मनुष्योंसे कलह न करना अंगड़ाई न तोरना ४१ खुलेबालोंसे कभी न रहना-अशुद्ध कभी न रहना
उत्तरकीओर शिरकरके अथवा खट्वाकी पगाँतनकी ओर शिरकरके कभी न सोना ४२ नंगी न
रहना शोकसे दुखी न रहना गीलेबस्त्र न धारण करना अशुभ वचन न बोलना अधिक हास्य न करना
४३ गुरूकी और स्वामीकी सेवाकरना नित्य मंगलमें तत्पररहना सर्व्वौषधीयुक्त मन्दोष्ण जलसे
स्नानकरना ४४ रक्षा विधान पूर्व्वक सुन्दर शृंगारकर वास्तु पूजनमें तत्पररहना प्रसन्न मुखरहना
भर्त्ताके हितमें सदैव अनुरक्त रहना पर्वणीकी रात्रिमें दानकरनको तत्पररहना इन सब विधियोंसे

स्याभवेत्पुत्रः शीलायुर्वृद्धिसंयुतः । अन्यथागर्भपतनमवाप्नोतिनसंशयः ४७ तस्मात्त्वमनयावृत्त्या गर्भेऽस्मिन्यत्नमाचर । स्वस्त्यस्तुतेगमिष्यामि तथेत्युक्तस्तयापुनः ४८ पश्यतांसर्वभूतानां तत्रैवान्तरधीयत । ततःसाकश्यपोक्तेन विधिनासमतिष्ठत ४९ अथभीतस्तथेन्द्रोऽपि दितेःपार्श्वमुपागमत् । विहायदेवसदनं तच्छुश्रूषुरवस्थितः ५० दितेश्छिद्रान्तरप्रेप्सुरभवत्पाकशासनः । विनीतोऽभवदव्यग्रः प्रशान्तवदनोबहिः ५१ अजानन्किलतत्कार्य्यमात्मनःशुभमाचरन् । ततोवर्षशतान्तेसा न्यूनेतुदिवसैस्त्रिभिः ५२ मेनेकृतार्थमात्मानं प्रीत्याविस्मितमानसा । अकृत्वापादयोःशौच प्रसुप्तामुक्तमूर्धजा ५३ निद्राभरसमाक्रान्ता दिवापरशिराःक्वचित् । ततस्तदन्तरंलब्ध्वा प्रविष्टस्तुशचीपतिः ५४ वज्रेणसप्तधाचक्रे तंगर्भंत्रिदशाधिपः । ततःसप्तैवतेजाताः कुमाराःसूर्य्यवर्चसः ५५ रुदन्तःसप्तवेताला निषिद्धागिरिदारिणा । भूयोऽपिरुदतश्चैतानेकैकंसप्तधाहरिः ५६ चिच्छेदवृत्रहन्तावै पुनस्तदुदरेस्थितः । एवमेकोनपञ्चाशद्भूत्वातेरुरुदुर्भृशम् ५७ इन्द्रोनिवारयामास मारोदीष्टपुनःपुनः । ततःसचिन्तयामास किमेतदितिवृत्रहा ५८ धर्म्मस्यकस्यमाहात्म्यात् पुनःसञ्जीवितास्त्वमी । विदित्वाध्यानयोगेन मदनद्वादशीफलम् ५९ नूनमेतत्परिणत मधुनाकृष्णपूजनात् । वज्रेणापिहताः

स्त्रियोंको रहना योग्य है और गर्भिणी स्त्रीको तो इस विधिसे अवश्यही रहना योग्यहै ४५ । ४६ इस विधिकेपीछे उसस्त्रीके जो पुत्र उत्पन्नहोगा वह उत्तम आयुवाला और वृद्धिसे युक्त होवेगा इसके विपरीत रहनेमें निस्सन्देह गर्भपातहोजाता है ४७ इसी निमित्त तू इस गर्भकी इसविधिसे बड़े यत्न पूर्व्वक रक्षाकर तेरा कल्याणहो अबमैं जाताहूं ऐसा कश्यपजीसे सुनकर उस दितिनेभी सब बातोंको अंगीकार किया ४८ फिरसबके देखतेही देखते कश्यपजी वहीं अन्तर्द्धान होगये और दितिनेभी अपने गर्भकी इसी विधिसे यत्न पूर्व्वक रक्षाकरी ४९ इसकेपीछे इन्द्र अत्यन्त भयभीत होकर अपने स्वर्गको छोड़कर दितिके समीपरहकर उसीकी सेवाकरनेलगा ५० और दितिकेछिद्रोंके देखनेकी इच्छा करके नम्रतासे बड़ाव्यग्रचित्त बाहरसे प्रसन्न भीतरसे म्लान होकर अपने कार्य्यको श्रेष्ट न जानकर शुभाचरण करने लगा जबइसी प्रकारसे सौ १००वर्ष व्यतीत होनेमें तीनदिनबाकी रहगये तबवह दिति अपनेको धन्य और कृतार्थमानतीभई और बड़ीप्रसन्नता करके विस्मित चित्तसे पैरोंकी शुद्धिकिये विना खुलेही बालोंसे एकदिन सो जाती भई ५१ । ५३ और एक समय निद्रासे व्याकुल होके दिनमेंही शय्यापर विपरीतिशयन करने लगी इस छिद्रको देखतेही इन्द्रने वहाँ आकर अपने वज्रसे उसगर्भके सातखंड करदिये फिर सूर्य्यके समान तेजवाले सातखंडके सातपुत्र होगये५४।५५और वहसातोंवेताल रोनेलगे तबइन्द्रने उनरोतेहुयोंको बन्दकरके प्रत्येकके सात २ टुकड़े करदिये और वहगर्भ उसके उदरहीमें स्थितरहे इसरीतिके वहउनचासो समयपर उत्पन्नहोकर रोने लगे ५६।५७ फिरभी इन्द्र उनको रोनेसे निवारण करताभयाकि तुम बारंबारमतरोवो और विचार किया कि यहमेरे वज्रसे खंड २ होकरभी नहींमरे ऐसा कौनसाधर्म है जिसके कारण यहजीतेहीरहे ऐसे बहुत ध्यान करनेसे जानाकि यह मदन द्वादशीका फल है और निश्चय करके जानलिया कि

सन्तो नविनाशमवाप्नुयुः ६० एकोऽप्यनेकतामाप यस्मादुदरगोप्यलम् । अबध्यानूनमेतेवै तस्माद्देवाभवन्त्विति६१यस्मान्मारुदतेत्युक्ता रुदन्तोगर्भसंस्थिताः ।मरुतोनाम तेनाम्ना भवन्तुमखभागिनः ६२ ततःप्रसाद्यदेवेशः क्षमस्वेतिदितिंपुनः । अर्थशास्त्रं समास्थाय मयैतद्दुष्कृतंकृतम् ६३ कृत्वामरुद्गणंदेवैः समानममराधिपः । दितिंविमानमारोप्य ससुतामनयद्दिवम् ६४ यज्ञभागभुजोजाता मरुतस्तेततोद्विजाः । न जग्मुरैक्यमसुरैरतस्ते सुरवल्लभाः ६५ इति श्रीमत्स्यपुराणेमरुदुत्पत्तौमदनद्वादशीव्रतंनाम सप्तमोऽध्यायः ७ ॥

(ऋषय ऊचुः) आदिसर्गश्चयः सूत ! कथितोविस्तरेणतु । प्रतिसर्गञ्चयेयेषामधिपास्तान्वदस्वनः १ (सूत उवाच) यदाभिषिक्तस्सकलाधिराज्ये पृथुर्धरित्र्यामधिपोबभूव । तदौषधीनामधिपंचकार यज्ञव्रतानांतपसाञ्चचन्द्रम् २ नक्षत्रताराद्विज वृक्षगुल्मलतावितानस्यचरुक्मगर्भः । अपामधीशंवरुणंधनानां राज्ञांप्रभुंवैश्रवणञ्च तद्वत् ३ विष्णुंरवीणामधिपंवसूनामग्निञ्च लोकाधिपतिश्चकार । प्रजापतीनामधिपंचदक्षञ्चकार शक्रंमरुतामधीशम्४ दैत्याधिपानामथदानवानां प्रह्लादमीशञ्चयमंपितृणाम् । पिशाचरक्षःपशुभूतयक्षवेतालराजन्त्वथशूलपाणिम् ५ प्रालेयशैलञ्चपतिंगिरीणामीशं समुद्रंससरिन्नदानाम् । गन्धर्वविद्याधरकिन्नराणामीशं पुनश्चित्ररथंचका

यह कृष्णके पूजन करने से वज्रसे भी हतहोकर नाशको नहीं प्राप्त हुए हैं ५८ । ६० जोकि एकही गर्भ उदरमें अनेकताको प्राप्तहोगया इसहेतुसे इनका मरण निश्चयकरके किसी प्रकारसेभी नहीं होनेके योग्यहै यह अवश्य देवताहोने चाहियें ६१ जोकिमत रोवो इस निषेध करनेसेभी रोतेही रहे इसीसे मरुत्नामसे प्रसिद्ध होवेंगे और यज्ञमेंभी इनका भागहोगा ६२ ऐसा कहकर इन्द्र दितिको प्रसन्न करके यह वचन बोलाकि तुम क्षमाकरो मैंने अपने प्रयोजन के निमित्त यह दुष्कृत किया है ६३ तब इन्द्र इनमरुद्गणोंको देवताओंके समान करके उनपुत्रों समेत दितिको विमानमें बैठाकर स्वर्गमें लेआया ६४ हे द्विजलोगो तभीसे वह सबमरुद्गण यज्ञके भागको ग्रहण करतेभये औरदैत्यों में संयुक्त नहीं रहे और सबदेवताओंके प्यारे होतेभये ६५ ॥

इति श्रीमत्स्यपुराणभाषाटीकायां मरुदुत्पत्तौ मदनद्वादशीव्रतं नाम सप्तमोऽध्यायः ७ ॥

ऋषियोंनेपूछा--हेसूतजी महाराज आपने जोयह आदिसर्ग अर्थात् सृष्टिके आदिकी रचना कहीहै इसके प्रतिसर्ग समेत इनके जो अधिपहैं उन सबको हमारे आगे वर्णन कीजिये १ सूतजीबोले जब सम्पूर्ण पृथ्वीकाअधिपति राजा पृथुहोताभया अर्थात् सब पृथ्वीके राज्यका अभिषेक पृथुके अर्थ होता भया तब ब्रह्माजी ने यज्ञ व्रत और तप इनकातो स्वामीचन्द्रमाको बनाया और नक्षत्र तारा द्विज वृक्ष गुल्म और वेलआदिका आपअधिकार लिया धनोंके अधिप कुबेर जलोंके वरुण आदित्यों के विष्णु--वसुओं समेत लोकोंकेअधिप अग्नि--प्रजापतियोंके दक्ष और मरुद्गणोंका अधिप इन्द्र होता भया २।४ दैत्यदानवोंका अधिप प्रह्लादको पितरोंका धर्मराजको करके राक्षस पिशाच भूत पशु यक्ष और वेताल इनसबका अधिपति शिवजीको किया ५ पर्व्वतों का राजा हिमाचल नदनदी आदिका

२६ नागाधिपंवासुकिमुग्रवीर्यं सर्पाधिपं तक्षकमादिदेश । दिशांङ्गजानामधिपञ्चकार ग
जेन्द्रमैरावतनामधेयम् ७ सुपर्णमीशम्पततामथाश्व राजानमुच्चैःश्रवसञ्चकार । सिंहं
मृगाणांवृषभंगवाञ्च वृक्षंपुनःसर्ववनस्पतीनाम् ८पितामहःपूर्वमथाभ्यषिञ्चच्चैतान्पुनः
सर्वदिशाधिनाथान् । पूर्वेणदिक्पालमथाभ्यषिञ्चन्नाम्ना सुधर्माणमरातिकेतुम् ९ ततोऽ
धिपंदक्षिणतश्चकार सर्वेश्वरंशंखपदाभिधानम् । सकेतुमन्तञ्चदिगीशमीशश्चकार प
श्चाद्भुवनाण्डगर्भः ,१० हिरण्यरोमाणमुदग्दिगीशं प्रजापतिर्देवसुतञ्चकार । अद्यापि
कुर्वन्तिदिशामधीशाः शत्रून्दहन्तस्तुभुवोभिरक्षाम् ११ चतुर्भिरेभिःपृथुनामधेयोनृपोऽ
भिषिक्तःप्रथमंपृथिव्याम् । गतेऽन्तरेचाक्षुषनामधेये वैवस्वताख्येचपुनःप्रवृत्ते १२ प्र
जापतिःसोऽस्यचराचरस्य बभूवसूर्य्यान्वयवंशचिह्नः १३ ॥

इतिश्रीमत्स्यपुराणे आधिपंत्याभिषेचनं नामाष्टमोऽध्यायः ८ ॥

(सूत उवाच) एवंश्रुत्वामनुःप्राह पुनरेवजनार्दनम् । पूर्वेषाञ्चरितंब्रूहि मनूनांमधु
सूदन ! १ (मत्स्य उवाच) मन्वन्तराणिसर्वाणि मनूनांचरितञ्चयत् । प्रमाणञ्चैव
कालस्यतच्छृणुष्वसमाहितः २ एकचित्तःप्रशान्तात्माशृणुमार्तण्डनन्दन ! । यामानाम
पुरादेवा आसन्स्वायम्भुवान्तरे ३ सप्तैवऋषयःपूर्वे ये मरीच्यादयस्स्मृताः । आग्नीध्र-

पति समुद्र गन्धर्व विद्याधर और किन्नरोंका अधिपति चित्ररथहोताभया पर्व्वतादिकों में रहनेवाले
बड़े २ नाग सर्पादिकोंका राजा वासुकि सर्प और सबसर्पों काराजा तक्षक होताभया सबदिशाओंके
हाथियोंकाराजा ऐरावत इन्द्रका हाथी पक्षियोंका राजा गरुड़ अश्वोंका उच्चैःश्रवा मृगोंका सिंहगौओं
का राजा आंकिल वृषभ और वृक्षोंका राजा पीपलको बनाया ६ । ८ इसरीतिसे ब्रह्माजी ने इन
सबकेहुए देवतादिकोंको अपने २ स्थानोंपर राज्यदिया अबसब दिशाओंके पृथक् २ अधिपतियों को
कहताहूं—पूर्वदिशाका पतिसुधर्मानाम अराति केतुको बनाया ९ दक्षिण दिशाका राजा शंखपदनाम
सर्वेश्वरको बनाया पश्चिमदिशांका राजा सकेतुमन्त ईश्वरको बनाया और हिरण्यरोम देवसुतको
ब्रह्माजीने उत्तर दिशाकाराजा बनाया यह सबदिशाओंके पति अबभी सबशत्रुओंको दग्धकरते हुए
सबपृथ्वीभरकी रक्षा करतेहैं इन चारोंदिशाओं के पतियों समेत सम्पूर्ण पृथ्वीके राज्यका अभिषेक
राजा पृथुकोहोकर प्रथमही राज्य तिलकहुआ अर्थात् जब चाक्षुष मनुकाराज्य होचुका तब वैवस्वत
मनु प्रवृत्तहुआ उससमय वह सूर्य्यवंशमें उत्पन्न होने वाला राजापृथु इस चराचर जगत्काप्रजा-
पति होताभया १० । १३ ॥

इति श्रीमत्स्यपुराणभाषाटीकायामाधिपत्याभिषेचनंनामाऽष्टमोऽध्यायः ८ ॥

सूतजीबोले कि इसरीतिसे मनुजी इसकथाको सुनकर फिर मत्स्यरूप विष्णु भगवान् से पूछते
भये कि हे मधुसूदनजी आप कृपा करके पूर्वमें होनेवाले मनुओंके चरित्रोंको वर्णनकीजिये १ मत्स्य
जीबोले-सब मनुओंके अन्तर सबके कालके प्रमाण और सबके चरित्रोंको मैं कहताहूं २ हे सूर्य्य के
पुत्रतुम एकाग्रचित्त और प्रशान्तात्मासे मनलगाकर सुनो कि प्रथम स्वायंभुवमनुके अन्तर में या-

श्चाग्निबाहुश्च सहःसवनएवच ४ ज्योतिष्मान्द्युतिमान्हव्यो मेधामेधातिथिर्वसुः।
स्वायम्भुवस्यास्यमनोर्दशैतेवंशवर्द्धनाः ५ प्रतिसर्गमिमेकृत्वा जग्मुर्यत्परमम्पदम्।
एतत्स्वायम्भुवम्प्रोक्तं स्वारोचिषमतःपरम् ६ स्वारोचिषस्यतनयाश्चत्वारोदेववर्चसः।
नभोनभस्यप्रसृति भानवःकीर्तिवर्द्धनाः ७ दत्तोनिश्च्यवनस्तम्बः प्राणःकश्यपएवच।
और्वोवृहस्पतिश्चैव सप्तैतेऋषयःस्मृताः ८ देवाश्चतुषितानाम स्मृताःस्वारोचिषेऽन्तरे।
हव्रीन्द्रःसुकृतोमूर्तिरापोज्योतिरयस्स्मयाः ९ वसिष्ठस्यसुताःसप्तयेप्रजापतयःस्मृताः। द्वि
तीयमेतत्कथितं मन्वन्तरमतःपरम् १० औत्तमीयंप्रवक्ष्यामि तथामन्वन्तरंशुभम्। मनु
र्नामौत्तमिर्यत्र दशपुत्रानजीजनत् ११ ईषऊर्जश्चतर्जश्च शुचिःशुक्रस्तथैवच। मधुश्च
माधवश्चैव नभस्योऽथनभास्तथा १२ सहःकनीयानेतेषामुदारःकीर्तिवर्द्धनः। भावना
स्तत्रदेवाःस्यु रूर्जाःसप्तर्षयःस्मृताः १३ कौकुरुण्डिश्चदाल्भ्यश्च शंखःप्रवहणःशिवः।
सितश्चसस्मितश्चैव सप्तैतेयोगवर्द्धनाः १४ मन्वन्तरंचतुर्थंतु तामसन्नामविश्रुतम्। क
विःपृथुस्तथैवाग्निरकपिःकपिरेवच १५ तथैवजल्पधीमानौ मुनयःसप्तनामतः। साध्या
देवगणायत्र कथितास्तामसेऽन्तरे १६ अकल्मषस्तथाधन्वी तपोमूलस्तपोधनः। तपो
रतितपस्यश्च तपोद्युतिपरन्तपौ १७ तपोभागीतपोयोगी धर्माचाररताःसदा। तामस
स्यसुताःसर्वे दशवंशविवर्द्धनाः १८ पञ्चमस्यमनोस्तद्वद्रैवतस्यान्तरंशृणु। ऐन्द्रबाहुः

मानामवाले देवता होतेभये और प्रथमहोनेवाले मरीच्यादिक ऋषि सप्तऋषि होकर विख्यातहुए और आग्नीध्र[१] आग्निबाहु[२] सह[३] सवन[४] ज्योतिष्मान्[५] द्युतिमान्[६] हव्य[७] मेधा[८] मेधातिथि[९] और वसु[१०] यह दश इस स्वायंभुव मनुके वंशको बढ़ानेवालेहुए ३। ५ यहसब प्रतिसर्ग अर्थात् अपनी२ रचना को रचके फिर परमपदको प्राप्तहोतेभये यह तो स्वायंभुव मनुकी रचनाकही इसके पीछे स्वारोचिष मनुहोता भया ६ स्वारोचिष मनुके देवताओंकी समान कांतिवाले चार पुत्र नभ-नभस्य-प्रसृति-और भानव—यह वंशवर्द्धननाम से विख्यातहुए और दत्त-निश्च्यवन-स्तम्ब-प्राण-कश्यप-और्व और वृहस्पति यह सप्तऋषिहुए ७। ८ स्वारोचिष मनुके अन्तरमें तुषितनाम के देवताहोतेभये और हव्रीन्द्र-सुकृत-मूर्त्ति-आप-ज्योति-अय-और स्मय यह सातवासिष्ठके पुत्र प्रजापति होतेभये इसप्रकार से यह दूसरा मन्वन्तर होताभया ९। १० अब औत्तमिनाम मन्वन्तरको सुनो-औत्तमिनामवाला मनु ईष ऊर्ज तर्ज शुचि शुक्र मधुमाधव नभस्य नभा और सहइननामवाले दशपुत्रोंको उत्पन्न करता भया ११ और इनके छोटेभाई उदार और कीर्त्तिवर्द्धन नाम उत्पन्नहुए उससमय भावनानामवाले देवताहोते भये और ऊर्ज संज्ञक सप्तऋषि होतेभये १२। १३ उसीकाल में कौकुरुंडि-दाल्भ्य-शंख प्रवहण-शिव-सित और सस्मित यह सात योगीश्वर होतेभये १४ चौथामनु तामसनाम हुआ उस के राज्यमें कवि-पृथु-अग्नि-अकपि-कपि-जल्प-और धीमान् यह सात ऋषिहोतेभये उससमय साध्य-संज्ञक देवताओंका पूजनहोताभया १५।१६ अकल्मष्धन्वी-तपोमूल-तपोधन-तपोरति-तपस्य तपोद्युति-परंतप तपोभागी और तपोयोगी यह धर्माचरणवाले दशपुत्र तामस मनुके वंशबढ़ानेवाले उत्पन्न हुए १७। १८ अब पांचवें रैवतमनुके अन्तरको सुनो इसमनुके समयमें ऐन्द्रबाहु-सुबाहु

सुबाहुश्च पर्जन्यःसोमपोमुनिः १९ हिरण्यरोमासप्ताश्वः सप्तैतेऋषयःस्मृताः। देवाश्चाभूतरजसस्तथाप्रकृतयःशुभाः २० अरुणस्तत्त्वदर्शीच धृतिमान्हव्यवान्कविः। युक्तोऽनिरुत्सुकःसत्वो निर्मोहोऽथप्रकाशकः २१ धर्मवीर्यबलोपेता दशैतेरैवतात्मजाः। भृगुःसुधामाविरजाः सहिष्णुर्नादएवच २२ विवस्वानतिनामाच षष्ठेसप्तर्षयोऽपरे। चाक्षुषस्यान्तरेदेवा लेखानामपरिश्रुताः २३ ऋभवोऽथऋभाद्याश्च वारिमूलादिवौकसः। चाक्षुषस्यान्तरेप्रोक्ता देवानाम्पञ्चयोनयः २४ रुरुप्रभृतयस्तद्वच्चाक्षुषस्य सुतादश। प्रोक्ताःस्वायम्भुवेवंशे येमयापूर्वमेवतु २५ अन्तरंचाक्षुषंचैतन्मया तेपरिकीर्त्तितम्।सप्तमंतत्प्रवक्ष्यामि यद्वैवस्वतमुच्यते २६ अत्रिश्चैववसिष्ठश्च कश्यपोगौतमस्तथा। भरद्वाजस्तथायोगीविश्वामित्रःप्रतापवान् २७ जमदग्निश्चसप्तैते साम्प्रतंयेमहर्षयः।कृत्वा धर्म्मव्यवस्थानं प्रयान्तिपरमम्पदम् २८ साध्याविश्वेचरुद्राश्च मरुतोवसवोऽश्विनौ। आदित्याश्चसुरास्तद्वत् सप्तदेवगणाःस्मृताः २९ इक्ष्वाकुप्रमुखाश्चास्यदशपुत्राःस्मृता भुवि। मन्वन्तरेषुसर्वेषु सप्तसप्तमहर्षयः ३० कृत्वाधर्म्मव्यवस्थानंप्रयान्तिपरमम्पदम्। सावर्ण्यस्यप्रवक्ष्यामि मनोर्भावितथान्तरम् ३१ अश्वत्थामाशरद्वांश्च कौशिकोगालवस्तथा।शतानन्दःकाश्यपश्च रामश्चऋषयःस्मृताः ३२धृतिर्वरीयान्यवसः सुवर्णोवृष्टिरेवच।चरिष्णुरीड्यःसुमतिर्वसुः शुक्रश्चवीर्यवान् ३३ भविष्यादशसावर्णेर्मनोः पुत्राःप्रकीर्त्तिताः। रौच्यादयस्तथान्येऽपि मनवःसम्प्रकीर्त्तिताः ३४ रुचेःप्रजापतेःपुत्रोरौच्यो

पर्जन्य[३] सोम[४] मुनि[५] हिरण्यरोमा[६] और सप्ताश्व यह सात सप्तऋषि होतेभये और रजोगुणकी प्रकृति वालेभूत नाम देवताहोतेभये १९। २० इसरैवत मनुके अरुण-तत्त्वदर्शी-धृतिमान्-हव्यवान्-कवि-युक्त-निरुत्सुक सत्व-निर्मोह-और प्रकाशक यह दशपुत्रधर्मवीर्य्य और पराक्रमोंसे युक्त होकर उत्पन्न होतेभये और छठेमनुकेअन्तरमें भृगु-सुधामा-विरजा-सहिष्णु-नाद २१।२२विवस्वान् और अतिनाम यह सप्तऋषि होतेभये और चाक्षुष मनुके अन्तरमें लेखानामवाले देवताहोतेभये २३ इनके सिवाय ऋभव ऋभाद्य वारिमूला-और दिवौकस यह पांचयोनियों वाले देवताभी चाक्षुषमनुके अन्तर में हुए २४ और रुरुको आदि लेकर दशपुत्र भी इनचाक्षुषमनुके होतेभये दशहीपुत्र स्वायंभुवमनु के भी होतेभये इसरीतिसे यह चाक्षुषमनुका अन्तर मैंने तेरे आगेकहा अब वैवस्वत नाम सातवें मनु कावर्णन करते हैं उसको सुनो २५। २६ अत्रि वसिष्ठ कश्यप गौतम भरद्वाज विश्वामित्र और जमदग्नि यह जो सातों ऋषि आजकल भी वर्त्तमानहैं वह भी धर्मकी व्यवस्था करके परमपदको प्राप्त होजातेहैं २७। २८ साध्या विश्वेदेवा रुद्रा मरुद्गणा वसव अश्विनीकुमार और आदित्य यहसात देवताओंके गणहोतेभये और इक्ष्वाकु आदिक दशपुत्र इस वैवस्वतमनुके होतेभये सब मन्वन्तरों में सातसात महर्षिहोतेहैं और सातोंधर्मकी व्यवस्थाकरके परमपदको प्राप्तहोजाते हैं इसमनुकेपीछे सावर्णिनाम मनुकेजन्मको कहतेहैं २९।३० सावर्णिमनुके राज्यमें अश्वत्थामा-शरद्वान्-कौशिकी-गालव शतानन्द-काश्यप और राम यह सप्तऋषिहुए ३१। ३२ और धृति-वरीयान्-यवस-सुपर्ण-वृष्टि-चरिष्णु-ईड्य-सुमति-वसु-शुक्र और वीर्य्यवान् यह दशपुत्र सावर्णिमनुके होंयगे इसमनुके सिवायरौच्या-

नामभविष्यति । मनुर्भूतिसुतस्तद्वद्भौत्योनामभविष्यति ३५ ततस्तुमेरुसावर्णिर्ब्रह्मसूनुर्मनुःस्मृतः । ऋतश्चऋतधामाच विष्वक्सेनोमनुस्तथा ३६ अतीतानागताश्चैते मनवःपरिकीर्तिताः । षडूनंयुगसाहस्रमेभिर्व्याप्तंनराधिप ! ३७ स्वेस्वेऽन्तरेसर्वमिदमुत्पाद्य सचराचरम् । कल्पक्षयेविनिर्वृत्ते मुच्यन्तेब्रह्मणासह ३८ एतेयुगसहस्रान्ते विनश्यन्ति पुनःपुनः । ब्रह्माद्याविष्णुसायुज्यं यातायास्यन्तिवैद्विजाः ३९ ॥

इतिश्रीमत्स्यपुराणेमन्वन्तरानुकीर्तनं नामनवमोऽध्यायः ९ ॥

(ऋषय ऊचुः) बहुभिर्धरणीभुक्ता भूपालैःश्रूयतेपुरा । पार्थिवाःपृथिवीयोगात् पृथिवीकस्ययोगतः १ किमर्थञ्चकृतासंज्ञा भूमेःकिंपारिभाषिणी । गौरितीयञ्चविख्याता सूत ! कस्माद्ब्रवीहिनः २ (सूत उवाच) वंशेस्वायम्भुवस्यासीदङ्गोनामप्रजापतिः । मृत्योस्तुदुहितातेन परिणीतासुदुर्मुखा ३ सुनीथानामतस्यास्तु वेनोनामसुतःपुरा । अधर्म्मनिरतश्चासीद्बलवान्वसुधाधिपः ४ लोकेऽप्यधर्म्मकृज्जातः परभार्यापहारकः । धर्म्माचारस्यसिद्ध्यर्थं जगतोऽथमहर्षिभिः ५ अनुनीतोऽपिनददावनुज्ञांसयदाततः । शापेनमारयित्वैनमराजकभयार्दिताः ६ ममन्थुर्ब्राह्मणास्तस्य बलाद्देहमकल्मषाः । तत्कायान्मथ्यमानात्तु निपेतुर्म्लेच्छजातयः ७ शरीरेमातुरंशेन कृष्णाञ्जनसमप्रभाः । पितुरंशस्यचांशेन धार्मिकोधर्म्मचारिणः ८ उत्पन्नोदक्षिणाद्धस्तात्स धनुःसशरोगदी ।

दिक अन्यभी मनुकहेहैं ३३ । ३४ रुचिनाम प्रजापतिका पुत्ररौच्यनामसे विख्यात होगा भूतिका पुत्र भौत्यनाम से विख्यातहोगा ३५ फिर ब्रह्माका पुत्र सुमेरु सावर्णिनाम होगा और ऋत–ऋतधामा और विष्वक्सेन यहतीनों मनुवारंवार होचुके और होतेहैं और होवेंगे हे राजन् यह सब चौदहमनु ९९४ युगोंतक भोगतेहैं अर्थात् एक २ मनु इकहत्तरयुगोंतक रहताहै यहांयुगके कहनेसे दिव्ययुगोंको जानना ३६।३७ अपने २ युगोंमें अपनी २ रचनासे यहसबमनु इसचराचर जगत्को रचतेहैं फिर कल्पके अन्तमें ब्रह्माजी समेत सबमोक्षको प्राप्तहोतेहैं यहसबमनु हजारयुगोंके अन्तमें बारंबार नष्ट होतेहैं और अन्तको ब्रह्माजी समेत विष्णुभगवान्में सायुज्यमोक्षको प्राप्तहोजातेहैं ३८। ३९ ॥

इति श्रीमत्स्यपुराणभाषाटीकायां मन्वन्तरानुकीर्त्तनंनाम नवमोऽध्यायः ९ ॥

ऋषियोंने पूछा-हे सूतजी पहले बहुतसे राजा लोगोंने इसपृथ्वीपर राज्यकिया है और सबराजा पृथ्वीके योगसे पार्थिव कहातेहैं यह पृथ्वी किसके योगसे कहाती है और इस भूमिकी गौ संज्ञा किस कारणसे हुईहै यह सब हमारे आगे वर्णन कीजिये १ । २ सूतजी बोले हे द्विजवर्य्यलोगो स्वायम्भुव नाम मनुके वंशमें अंगनाम एकप्रजापति होताभया उसने महादुर्मुखा सुनीथानाम मृत्युकी पुत्री से अपना विवाह किया ३ उस अंगके योगसे सुनीथानाम स्त्रीमें वेननाम पुत्रहुआ उसकेपीछे वही संम्पूर्ण पृथ्वीका राजाहुआ परन्तु वह वेन अपनीमाताके अंशसे सदैव अधर्मका कर्त्ता महा पापी परस्त्रीगामी और प्रजाको अनेक प्रकारकी पीड़ा देनेवाला हुआ उसको महर्षि लोगोंने जगत्के धर्माचरणकी सिद्धिके और प्रजाके सुखके निमित्त अनेक प्रकारकी शिक्षाभीकरी परन्तु वह किसी प्रकारसे भी न माना तब तो सब ब्राह्मणोंने उसको शापदेकर मारडाला फिर राज्यके भयसे उन परहित

दिव्यतेजोमयवपुः सरत्नकवचांगदः ९ पृथोरेवाभवद्यत्नात् ततःपृथुरजायत । सविप्रै
रभिषिक्तोऽपि तपःकृत्वासुदारुणम् १० विष्णोर्वरेणसर्वस्य प्रभुत्वमगमत्पुनः । निः
स्वाध्यायवषट्कारं निर्धर्मंवीक्ष्यभूतलम् ११ दग्धुमेवोद्यतःकोपाच्छरेणामितविक्रमः ।
ततोगोरूपमास्थाय भूःपलायितुमुद्यता १२ पृष्ठतोऽनुगतस्तस्याः पृथुर्दीप्तशरासनः ।
ततःस्थित्वैकदेशेतु किंकरोमीतिचाब्रवीत् १३ पृथुरप्यवदद्वाक्यमीप्सितंदेहिसुव्रते ! ।
सर्वस्यजगतःशीघ्रं स्थावरस्यचरस्यच १४ तथैवसाब्रवीद्भूमिर्दुदोहसनराधिपः । स्वके
पाणौपृथुर्वत्सं कृत्वास्वायम्भुवंमनुम् १५ तदन्नमभवच्छुद्धं प्रजाजीवन्तियेनवै । ततस्तु
ऋषिभिर्दुग्धावत्सःसोमस्तदाभवत् १६ दोग्धाबृहस्पतिरभूत्पात्रं वेदस्तपोरसः । वे
दैश्चवसुधादुग्धादोग्धामित्रस्तदाभवत् १७ इन्द्रोवत्सःसमभवत् क्षीरमूर्जस्करंबलम् ।
देवानांकाञ्चनंपात्रंपितृणांराजतंतथा १८ अन्तकश्चाभवद्दोग्धा यमोवत्सःस्वधारसः ।
अलावुपात्रंनागानांतक्षको वत्सकोऽभवत् १९ विषंक्षीरंततोदोग्धा धृतराष्ट्रोऽभवत्पुनः ।
असुरैरपिदुग्धेयमायसेशक्रपीडिनीम् २० पात्रेमायामभूद्वत्सः प्राह्लादिस्तुविरोचनः ।
दोग्धाद्विमूर्धातत्रासीन्मायायेनप्रवर्त्तिता २१ यक्षैश्चवसुधादुग्धापुरान्तर्द्धानमीप्सुभिः ।

ब्राह्मणोंने उस वेनके शरीरको मथनकिया उसके मथनेसे उसके शरीरमें जो माताका अंशथा उस अंशके प्रभावसे काले काजलके समान म्लेच्छ जातिके मनुष्य उत्पन्नहुए और पिताके अंशकेकारण उसके दक्षिणहाथसे धर्मका प्रवर्त्तक हाथोंमें धनुष्बाणलिये दिव्य और रूपतेजसेयुक्त सुन्दररत्नमयी बाजूबन्द आदि आभूषणोंसे अलंकृत एक परम धार्मिक पुरुष उत्पन्नहुआ उसीको ब्राह्मणोंने पृथुनाम धरकर राज्यपर अभिषेक किया इसके अनन्तर उसपृथुने बड़ाउत्तम तपकिया तब विष्णुजीके वरदानसे वह सम्पूर्ण पृथ्वीका राजाहुआ उस समय इस पृथ्वीपर स्वाध्याय और वषट् कर्मादि धर्मोंको न देखकर अतुलबल वाले राजापृथुने क्रोधहोके पृथ्वीको अपने बाणों करके दग्धकरनेका विचारकिया तब यह भूमिगौका रूपधारण करके पृथुके आगे होकरभागी और राजाभी अपने अत्यन्ततेज वाले धनुष्बाणको लेकर उसकेपीछेभागा तब वह गौ एकस्थानपर स्थितहोकर यह वचनबोली कि हे महाराज मैं क्याकरूं ४।१३ तबपृथुने कहा कि हे सुव्रते तू सम्पूर्ण चराचर जगत्के हितके निमित्त मेरे मनोवाञ्छित फलको सिद्धकर राजाके इस वचनको सुनकर पृथ्वीनेकहा तथास्तु अर्थात् ऐसाही होगा उस समय राजापृथुने उस गौरूपा पृथ्वीका बछड़ा मनुको बनाकर उसको अपने हाथोंपरही दुहा १४।१५ तब प्रजाका जीवनरूप शुद्ध अन्न उत्पन्नहुआ फिर चन्द्रमाको बछड़ा बनाकर ऋषियोंने उसगौको दोहा और बृहस्पतिजीनेभी दोहा तब वेदपात्रहुए और रस उत्पन्नहुआ फिर जबवेदोंने पृथ्वीको दोहा तब सूर्य्य दोहनेवाला हुआ और इन्द्र बछड़ाबना उस समय बल और तेजरूपी दूध उत्पन्नहुआ जबकाल दोहनेवालाहुआ उस समय यमको बछड़ा देवताओंको सुवर्णका पात्र और पितरोंको चाँदीकापात्र बनाकर अमृतरस उत्पन्न किया और नागोंने तूंबीकापात्र और तक्षकको बछड़ा बनाकर विषरूपी दूधको दोहा-इसकेपीछे इन्द्रको पीड़ादेनेके लिये धृतराष्ट्र और दैत्योंने भी लोहेका पात्रबनाकर उस गौको दोहा उसपात्रमें माया उत्पन्नहुई जब द्विमूर्द्धा असुर दोहनेवाला

कृत्वावैश्रवणंवत्समामपात्रेमहीपते ! २२ प्रेतरक्षोगणैर्दुग्धा धारारुधिरमुल्वणम् । रौ
प्यनाभोऽभवद्दोग्धा सुमालीवत्सएवतु २३ गन्धर्वैश्चपुरादुग्धा वसुधासाप्सरोगणैः ।
वत्संचैत्ररथंकृत्वागन्धान्पद्मदलेतथा २४ दोग्धावररुचिर्नामनाटवेदस्यपारगः । गि
रिभिर्वसुधादुग्धारत्नानिविविधानिच २५ औषधानिचदिव्यानि दोग्धामेरुर्महाचलः ।
वत्सोऽभूद्धिमवांस्तत्र पात्रंशैलमयंपुनः २६ वृक्षैश्चवसुधादुग्धा क्षीरंछिन्नप्ररोहणम् ।
पालाशपात्रदोग्धातु शालःपुष्पलताकुलः २७ प्लक्षोऽभवत्ततोवत्सः सर्ववृक्षोधनाधिपः।
एवमन्यैश्चवसुधातदादुग्धायथेप्सितम् २८ आयुर्धनानिसौख्यञ्च पृथौराज्यंप्रशास
ति । नदरिद्रस्तदाकश्चिन्नरोगी नचपापकृत् २९ नोपसर्गभयंकिञ्चित् पृथौराजनिशा
सति । नित्यंप्रमुदितालोका दुःखशोकविवर्जिताः ३० धनुष्कोट्याचशैलेन्द्रानुत्सार्य्य
समहाबलः । भुवस्तलंसमंचक्रेलोकानांहितकाम्यया ३१ नपुरग्रामदुर्गाणि नचायुधध
रानराः । क्षयातिशयदुःखञ्च नार्थशास्त्रस्यचादरः ३२ धर्मैकवासनालोकाः पृथौ रा
ज्यंप्रशासति । कथितानिचपात्राणि यत्क्षीरञ्चमयातव ३३ येषांयत्ररुचिस्तत्तद्दे

प्रह्लाद और विरोचन बछड़ेभये तब द्विमूर्द्धा ने माया प्रवृत्तकरी १६ । २१ प्रथम गुप्त विचरने
की इच्छा करनेवाले यक्षोंने पृथ्वीको दोहा तब कुबेर बछड़ा और कच्ची मृत्तिकाकापात्र बनाया २२
तब नाना माया उत्पन्नहुईं जब प्रेत राक्षसोंने पृथ्वीको दोहा तब रौप्यनाभ दुहनेवाला और सुमाली
बछड़ाहुआ उस समय उल्वण रुधिरकीधारा उत्पन्नहुई २३ प्रथम अप्सरा और गन्धर्वगणों
नेभी जब पृथ्वीको दोहाथा उससमय चैत्ररथ गन्धर्वको बछड़ा और पद्मरूपपत्रका पात्र बनायाथा २४
वहाँ नाट्य विद्याका जाननेवाला वररुचिनाम ऋषि दोहनेवालाथा उससे शृंगारहुए जब पर्वतों
करके पृथ्वी दोहीगई तब अनेक प्रकारके रत्न उत्पन्नहुए २५ जब बड़ा बलवान् सुमेरु पर्व्वत दोहनेवालाहुआ
उस समय हिमवान् बछड़ाहुआ और शिलारूपीपात्रमें औषधियां उत्पन्न हुईं २६ जब
वृक्षोंने पृथ्वीको दोहा तब अंकुरोंमें निकसनेवाला दूध उत्पन्न हुआ उस समय ढाककेपत्तोंका पात्र
बनायाथा जब पुष्पोंवाली लताओं समेत सालकावृक्ष दोहनेवालाहुआ तबपिलखनका वृक्ष बछड़ा
था उसी समयसे वह सालवृक्ष सब वृक्षों के धनका अधिप होकर सबसे ऊंचाहुआ इसरीतिसे इस
पृथ्वीको इनसबने और अन्य२ नेभी दोहा २७ । २८ जब राजापृथु राज्यकरताथा उससमय आयुष
और धन सबको प्राप्तहुआ उसके समयमें कोईभी दरिद्री रोगी और पाप करनेवाला न हुआ २९
पृथुके राज्यमें चौरादिकोंकाभी भय न हुआ सब लोग दुःख शोकसे रहित होकर सदैव प्रसन्न रहते
थे ३० वह महाबल वीर्य्यवाला राजा अपने धनुषके अग्रभागसे पर्व्वतोंको साफकरके प्रजाके सुख
के निमित्त पृथ्वीतलको समान करताथा ३१ उसराजाके उत्तम प्रबन्ध और भयसे उसराज्यके पुर
ग्रामादिमें भी बाहरके चौरादिक बचावके लिये कोई किला गढ़आदि नहीं बनवातेथें और न कोई
किसीके भयसे शस्त्रोंको धारण करताथा उसके समयमें सबके दुःखोंका ऐसा नाशहोगयाथा कि अपनेभी
प्रयोजनके निमित्त किसीको कोई उपाय नहींकरना पड़ताथा ३२ सब प्रजामात्रकी धर्ममें
ही निष्ठा होगईथी पृथ्वी दोहनेके समय जिन २ लोगोंके जो२ पात्रबने और दूधउत्पन्न हुआ उन २

यंतेभ्योविजानता। यज्ञश्राद्धेषुसर्वेषु मयातुभ्यंनिवेदितम् ३४ दुहितृत्वङ्गतायस्मात् पृथोर्धर्म्मवतोमहीम्। तदानुरागयोगाच्च पृथिवीविश्रुताबुधैः ३५॥

इति श्रीमत्स्यपुराणे वैन्याभिवर्णनो नाम दशमोऽध्यायः १०॥

(ऋषय ऊचुः) आदित्यवंशमखिलं वदसूत ! यथाक्रमम्। सोमवंशञ्चतत्त्वज्ञ ! यथावद्वक्तुमर्हसि १ (सूत उवाच) विवस्वान्कश्यपात्पूर्वमादित्यामभवत्सुतः। तस्य पत्नीत्रयंतद्वत्संज्ञाराज्ञीप्रभातथा २ रैवतस्यसुताराज्ञी रेवतंसुषुवेसुतम् । प्रभाप्रभातं सुषुवेत्वाष्ट्रीसंज्ञातथामनुम् ३ यमश्चयमुनाचैव यमलौतुबभूवतुः। ततस्तेजोमयंरूपमसहन्तीविवस्वतः ४ नारीमुत्पादयामासस्वशरीरादनिन्दिताम्। त्वाष्ट्रीस्वरूपेणनाम्ना छायेतिभामिनीतदा ५ किङ्करोमीतिपुरतः स्थितांतामभ्यभाषत। छाये ! त्वंभजभर्तारमस्मदीयंवरानने ! ६ अपत्यानिमदीयानि मातृस्नेहेनपालय। तथेत्युक्तातुसादेवमगमत्कापिसुव्रता ७ कामयामासदेवोऽपि संज्ञेयमितिचादरात्। जनयामासतस्यांतु पुत्रञ्चमनुरूपिणम् ८ सवर्णत्वाच्चसावर्णिर्म्मनो वैवस्वतस्यच। ततःशनिंचतपतींविष्टिं चैवक्रमेणतु ९ छायायांजनयामास संज्ञेयमितिभास्करः। छायास्वपुत्रेभ्यधिकं स्नेहंचक्रे मनौतथा १० पूर्वोमनुस्तुचक्षामनयमः क्रोधमूर्च्छितः। सन्तर्जयामासतदा पादमुद्यम्य

की प्रसन्नताके अर्थ यज्ञोंमें और श्राद्धोंमें वही वही देना योग्य है यह सब बिधिमैंने तुझसे वर्णन करीं ३३। ३४ इस धर्मात्मा पृथुराजाको यह पृथ्वी पुत्रीभावसे प्राप्त होतीभई इसी योगके कारण से इसभूमिकानाम पृथ्वी विख्यातहुआ ३५॥

इति श्रीमत्स्यपुराणभाषाटीकायां वैन्याभिवर्णनोनामदशमोऽध्यायः १०॥

ऋषियोंनेपूछा-हे सूतजी आप यथार्थ क्रमसे सूर्य्यवंश और चन्द्रवंशको वर्णन कीजिये १ सूतजी बोले-प्रथम अदितिस्त्रीमें कश्यपजीसे सूर्य्य उत्पन्नहुए उनकी संज्ञा राज्ञी और प्रभा यह तीनों नाम वाली तीन स्त्रियां होतीभईं २ इनमें वह रैवतकीपुत्री राज्ञीनाम सूर्य्यकीस्त्रीने रेवतनाम पुत्रको उत्पन्न किया प्रभास्त्रीने प्रभातनामपुत्र उत्पन्न किया और संज्ञानाम स्त्री ने मनुनामपुत्रको उत्पन्न किया और इसीस्त्रीने यम और यमुना इनदोनों पुत्र पुत्रियोंकोभी उत्पन्नकिया फिर वह संज्ञास्त्री जब सूर्य्यके तेजको न सहतीभई तब उसने अपने शरीरसे छायानाम बड़ी उत्तमस्त्रीको उत्पन्न किया ३। ५ वह छायानामस्त्री संज्ञाके आगे खड़ी होकरबोली कि मैं क्याकरूं तब संज्ञानेकहा कि हे वरानने तू इसमेरेपति सूर्य्यकोही भज और मेरीसन्तानको माताके समान अपना स्नेहकरके पालनकर फिर तथास्तु अर्थात् ऐसाही करूंगी इसप्रकारसे अंगकिारकर वहछाया सूर्य्यको प्राप्तहुई ६।७ तब सूर्य्यभी उसको संज्ञाकेही समान जानकर बड़े आदरभावसे उसके संग भोग करनेलगे उस में दूसरा मनुनामपुत्र हुआ यह मनु पूर्वके मनुका सवर्णीहोकर सावर्णिनाम मनु विख्यातहुआ-फिर उसीछायामें सूर्य्यसे शनैश्चर तपती-और विष्टि यहसन्तान उत्पन्नहुई ८। ९ इसके अनन्तर वहछाया अपने पुत्र सावर्णिनाम मनुमें अधिक स्नेह करनेलगी इसबातको प्रथम मनुने तो सहलिया परन्तु

दक्षिणम् ११ शशापचयमंछाया सक्षतःकृमिसंयुतः । पादोऽयमेकोभविता पूयशोणित
विस्रवः १२ निवेदयामासपितुर्धर्म्मःशापादमर्षितः । निष्कारणमहंशप्तो मात्रादेव ! स
कोपया १३ बालभावान्मयाकिञ्चिदुद्यतश्चरणःसकृत् । मनुनावार्यमाणापि ममशाप
मदाद्विभो ! १४ प्रायोनमातासास्माकं शापेनाहंयतोहतः । देवोऽप्याहयमंभूयः किङ्करो
मिमहामते ! १५ मौर्ख्यात्कस्यनदुःखंस्यादथवाकर्म्मसन्ततेः । अनिवार्य्योभवस्यापि
काकथान्येषुजन्तुषु १६ कृकवाकुर्म्मयादत्तो यःकृमीन्भक्षयिष्यति । क्लेदञ्चरुधिरञ्चै
व वत्सायमपनेष्यति १७ एवमुक्तस्तपस्तेपे यमस्तीव्रंमहायशाः । गोकर्णतीर्थेवैराग्या
त् फलपत्रानिलाशनः १८ आराधयन्महादेवं यावद्वर्षायुतायुतम् । वरंप्रादान्महादेवः
सन्तुष्टःशूलभृत्तदा १९ वव्रेसलोकपालत्वं पितृलोकेनृपालयम् । धर्म्माधर्म्मात्मकस्या
पि जगतस्तुपरीक्षणम् २० एवंसलोकपालत्वमगमच्छूलपाणिनः । पितॄणाञ्चाधिप
त्यञ्च धर्म्माधर्म्मस्यचानघ ! २१ विवस्वानथतज्ज्ञात्वा संज्ञायाःकर्म्मचेष्टितम् ।त्वष्टुः
समीपमगमदाचचक्षेचरोषवान् २२ तमुवाचततस्त्वष्टा सान्त्वपूर्वंद्विजोत्तमाः । तवास
हन्तीभगवन् ! महस्तीव्रंतमोनुदम् २३ वडवारूपमास्थाय मत्सकाशमिहागता । नि
वारितामयासातु त्वयाचैवदिवाकर ! २४ यस्मादविज्ञाततया मत्सकाशमिहागता । त

यम न सहसके और महाक्रोधितहोकर यमने उसछायाके पुत्र मनुको दाहिन पैरसे ताडन किया ११
तब छायाने यमको यह शापदियाकि यहतेरा पैर पीपयुक्त कीटोंसे भरे घाववाला होकर राधसेभिरे
१२ फिर यम इसशापको न सहकर अपने पिताके पास जाकर यह बोलेकि हेदेव माताने मुझे निरपराध
शापित करदियाहै मैंने बालकपनेसे जरापैरको उठादियाथा उससमय मनुने उसकोनिषेधभी
कियाथा परन्तु उसने शापदेहीदिया १३।१४ हेविभो जोकिं उसने हमको शापसे हतकरदियाहै इस
हेतुसे वह विशेषकरके हमारीमाता नहीं है तब सूर्य्यने कहाकि हेमहामते मैंक्याकरूं १५ मूर्खतासे
अथवा कर्मके प्रभावसे कहो किसको दुःखनहींहोताहै शिवजीसेभी कर्मकी रेखा दूरनहींहोतीहै तो
अन्यजनोंकी क्याबातहै १६ हेपुत्र मैंतुझे मुरगादूंगावह तेरेकृमियोंको भक्षण करके राधरुधिरकोभी
खाकर दूरकरदेगा १७ पिताके इस वचनको सुनकर यम दारुण तपस्या करने लगे अर्थात् गोकर्ण
तीर्थपर जाके सब बस्तुओंको त्याग फल मूल पत्र और वायु इनका आहार करने लगे १८ वहाँदश
किरोड वर्षोंतक यमने महादेवजीका तपकिया तबशूलधारी शिवजी उसपर प्रसन्नहोकर बोले किवर
मांग तबयमने संसारकेकियेहुए पापपुण्योंको जानलेनाही वरमांगा १९।२० इसप्रकारकरके वह यम
शिवजीके प्रभावसे लोकपालहोजाताभया फिर अधर्मोंकाभी जानने वालाहोकर सब पितरोंकापति
होताभया २१ इसकेपीछे सूर्य्यदेवता प्रथमकियेहुए संज्ञाके कर्मको जानकर उसके पितात्वष्टाकेपास
गये औरक्रोधहोकर उससे बोले २२ कि तुम्हारी पुत्रीने मेरी विनाआज्ञा ऐसाकर्मकिया यह सुनकर
हेऋषियो उस त्वष्टाने सूर्य्यको समझाकरकहाकि हे भगवन् यह मेरीपुत्री आपके तेजको न सहकर
घोडीकारूप धारण करके मेरे समीप आईथी सो हेसूर्य्यदेव मैंने उससे यहकहकर उसको लौटादिया
कि सूर्य्यकी आज्ञालिये विना जो तू मेरे घरआई है इस हेतुसे तू मेरे घरमें प्रवेश करनेको योग्य

स्मान्मदीयंभवनं प्रवेष्टुंनत्वमर्हसि २५ एवमुक्ताजगामाथ मरुदेशमनिन्दिता। वडवा रूपमास्थाय भूतलेसम्प्रतिष्ठिता २६ तस्मात्प्रसादंकुरुमे यद्यनुग्रहभागहम्। अपनेष्यामितेतेजो यन्त्रेकृत्वादिवाकर! २७ रूपंतवकरिष्यामि लोकानन्दकरम्प्रभो!। तथेत्युक्तःसरविणा भ्रमौकृत्वादिवाकरम् २८ पृथक्चकारतत्तेजश्चक्रंविष्णोरकल्पयत्। त्रिशूलञ्चापिरुद्रस्य वज्रमिन्द्रस्यचाधिकम् २९ दैत्यदानवसंहर्तुः सहस्रकिरणात्मकम्। रूपञ्चाप्रतिमञ्चक्रे त्वष्टापद्भ्यामृतेमहत् ३० नशशाकाथतद्द्रष्टुं पादरूपंरवेःपुनः। अर्चास्वपिततःपादौ नकश्चित्कारयेत्क्वचित् ३१ यःकरोतिसपापिष्ठां गतिमाप्नोतिनिन्दिताम्। कुष्ठरोगमवाप्नोति लोकेस्मिन्दुःखसंयुतः ३२ तस्माच्चधर्म्मकामार्थी चित्रेष्वायतनेषुच। नक्वचित्कारयेत्पादौ देवदेवस्यधीमतः ३३ ततःसभगवान्गत्वा भूर्लोकममराधिपः। कामयामासकामार्तो मुखएवदिवाकरः ३४ अश्वरूपेणमहता तेजसाच समावृतः। संज्ञाचमनसाक्षोभमगमद्भयविह्वला ३५ नासापुटाभ्यामुत्सृष्टं परोऽयमिति शङ्कया। तद्रेतसस्ततोजातावश्विनावितिनिश्चितम् ३६ दस्रौसुतत्वात्संजातौ नासत्यौनासिकाग्रतः ३७ ज्ञात्वाचिराच्चतंदेवं सन्तोषमगमत्परम्। विमानेनागमत्स्वर्गं पत्या सहमुदान्विता ३८ सावर्णोऽपिमनुर्मेरावद्याप्यास्तेतपोधनः। शनिस्तपोबलादाप ग्रह

नहींहै २३।२५ इसमेरेवचनको सुनकर वह मरुस्थलदेशमें जाकरघोड़ीके रूपको धारणकरकेपृथ्वी में विचरती है इसहेतुसे आप प्रसन्नहोकर मेरे ऊपर दयाकरो हे दिवाकरजी मैं आपके तेजको यन्त्रमें करके पृथक् करदूंगा और आपके रूपको मनुष्योंका आनन्द करनेवाला भी करदूंगा तब सूर्य्यनेकहा ऐसाहीकरो तब उस त्वष्टाने सूर्य्यके तेजको यन्त्रमें करके सूर्य्य से पृथक् करदिया फिर उसी पृथक् कियेहुए सूर्य्यके तेजसे विष्णुकाचक्र शिवजीका त्रिशूल इन्द्रकावज्र और अन्य२ देवताओंके अनेक शस्त्रोंकोबनाया २६।२९ इसके अनन्तर दैत्यदानवोंके नाशकर्त्ता सम्पूर्णमूर्तिसे रहित सूर्य को सहस्र किरणवाले विनापैरके सुन्दरमुखमात्रहीरूपको त्वष्टाने ऐसाबनाया कि फिर उससूर्य्यके पैरों के रूप देखनेकोभी त्वष्टासमर्थ न हुआ तभीसे सूर्य्यकी प्रतिमामें कोईउनके पैरोंकी मूर्त्तिको नहींबनवाताहै और जो कोई हठसे वा मूर्खतासे उनके पैरोंकी मूर्त्ति बनवाताहै वह पापियोंकी महानिन्दितगतिको प्राप्तहोकर इस संसारके कठिनदुःखोंको भोगताहुआ कुष्टरोगको प्राप्तहोताहै ३०।३२ इसहेतुसे धर्म कामादिकी इच्छाकरनेवाला मनुष्य किसी मन्दिर वा स्थानमें किसी स्थानपरभी सूर्य्यकीमूर्त्तिमें पैर न बनवावे ३३ इसके उपरान्त सूर्य्य देवता उसी मुखकेही रूपसे कामदेव से पीड़ित होकर पृथ्वीलोकमें जाकर उस संज्ञाकी इच्छा करतेभये ३४ और बड़े तेजवाले घोड़ेका रूप बनाकर उसघोड़ी रूप संज्ञाकेपास पहुंचे तबसंज्ञामनसे क्षोभको प्राप्तहोकर भयसे बिह्वलहोतीभई और उससूर्य्यसेही धारण कियेहुये वीर्य्यको पर पुरुषकी शंकाकरके अपनी नासिकाके दोनोंछिद्रों के द्वाराबाहर त्यागतीभई उसीवीर्य्यसे अश्विनीकुमारउत्पन्न होतेभये ३५।३६ अश्वसे उत्पन्न होनेसेउनको "दस्रौ" कहते हैं और नासिकाके द्वाराहोनेसे "नासत्यौ" ऐसाभीकहतेहैं ३७ फिरवहसंज्ञा बहुतकालमें सूर्य्यको जानकर परमसंतोप युक्तहोके अपनेपतिके साथ विमानोंमें बैठकर विचरती भई ३८ और सावर्णिमनु

साम्यंततःपुनः ३९ यमुनातपतीचैव पुनर्नद्यौबभूवतुः । विष्टिर्घोरात्मिकातद्वत्कालत्वे
नव्यवस्थिता ४० मनोर्वैवस्वतस्यासन् दशपुत्रा महाबलाः।इलस्तुप्रथमस्तेषां पुत्रेष्ट्यां
समजायत ४१ इक्ष्वाकुःकुशनाभश्च अरिष्टोधृष्णएवच । नरिष्यन्तःकरूषश्च शर्य्या
तिश्चमहाबलः ४२पृषध्रश्चाथनाभागःसर्वेतेदिव्यमानुषाः ४३ अभिषिच्यमनुःपुत्रमि
लंज्येष्ठंसधार्मिकः । जगामतपसेभूयः समहेन्द्रवनालयम् ४४ अथदिग्जयसिध्यर्थं मि
लःप्रायान्महीमिमाम् । भ्रमन्द्वीपानिसर्वाणि क्ष्माभृतःसम्प्रधर्षयन् ४५ जगामोपिव
नंशम्भोरश्वाकृष्टःप्रतापवान् । कल्पद्रुमलताकीर्णं नाम्नाशरवणंमहत् ४६ रमतेयत्रदेवे
शः शम्भुःसोमार्द्धशेखरः । उमयासमयस्तत्र पुराशरवणेकृतः ४७ पुन्नामसत्त्वंयत्किंचि
दागमिष्यतितेवने । स्त्रीत्वमेष्यतितत्सर्वं दशयोजनमण्डले ४८ अज्ञातसमयोराजा इ
लःशरवणेपुरा । स्त्रीत्वमापविशन्नेव वडवात्वंहयस्तदा ४९ पुरुषत्वंहृतंसर्वं स्त्रीरूपेवि
स्मितोनृपः । इलेतिसाभवन्नारी पीनोन्नतघनस्तनी ५० उन्नतश्रोणिजघना पद्मपत्रायते
क्षणा । पूर्णेन्दुवदनातन्वी विलासोल्लासितेक्षणा ५१ मूलोन्नतायतभुजा नीलकुंचित
मूर्धजा । तनुलोमासुदशना मृदुगंभीरभाषिणी ५२ शुभगौरेणवर्णेन हंसवारणगामि
नी । कार्मुकभ्रूयुगोपेता तनुताम्रनखांकुरा ५३ भ्रमन्तीचवनेतस्मिन् चिन्तयामासभामि
नी । कोमेपिताथवाभ्राता कामेमाताभवेदिह ५४ कस्यभर्तुरहंदत्ताकियद्वत्स्यामिभूत

भी तप करताहुआ सुमेरुपर्व्वतपर विचरताहै और तपकेही प्रभावसे सूर्य्यकेपुत्र शनैश्चर भी ग्रह
भावको प्राप्तहुए ३९ यमुना और तापती यहदोनोंनदियां होगईं और विष्टि घोररूप कालकी व्यवस्थामें
स्थितहै उसीको भद्राभी कहतेहैं ४० वैवस्वतमनुके बड़ेबलवीर्य्य वाले दशपुत्रहुए उनसबमें
पुत्रेष्टि यज्ञमेंहोनेवाला प्रथम इलनामपुत्रहै वहीसबसे बड़ाहै ४१ और इक्ष्वाकु-कुश-नाभ-अरिष्ट-
धृष्ण-नरिष्यन्त-करूष-शर्य्याति-पृषध्र और नाभाग यह उसके नौछोटेभाई हैं इनसबको दिव्यमानुष
कहतेहैं ४२ । ४३ फिर वह धार्मिकमनु अपने प्रथम औरबड़े इलनामपुत्रको अपनेराज्यका अभिषेक
करकेमहेन्द्रवनमें तपस्याके निमित्त जाताभया ४४ तबइसइलने दिग्विजय करके पृथ्वीके सबराजाओं
को अपने आधीन करलिया ४५ एक समय वह इल अपनेघोड़ेके वेगसे कल्पद्रुमोंकीलता आदिकों
से आकीर्ण उस शरवण नामवाले शिवजीके उपवनमें प्राप्त होताभया ४६ जहां कि देवेश शिवजी
महाराज पार्वतीसमेत वासकरते हैं उसवनमें जो कोई पुरुषजाताथा वह स्त्री होजाताथा वह वन
चालीसकोसकाथा ४७ । ४८ वह विनाजाननेवाला राजा इल उसवनमें पहुंचतेही स्त्री बनगए
और उसकाघोड़ाभी घोड़ीहोगया जब इनदोनोंका पुरुषपनाजातारहा तब स्त्रीरूप होजाने से राज
इलको बड़ा आश्चर्य्यहुआ और वह इलसे इलानाम उन्नतकुचोंवाली स्त्री होगई ४९ । ५० अर्थात्
उन्नत नितम्ब श्रेष्ठ जंघा कमलपत्रके समान नेत्र पूर्णचन्द्रमाके समान मुख और कोमल अंगरूप
वाली स्त्री होगई ५१ लंबीभुजा अतिश्यामकेश कोमल रोमावलि-सुन्दरदंतावली-मृदु और गंभीर
बोलन ५२ सुन्दर गौरबर्ण हंस और हस्तिनी के समान गमन करनेवाली धनुषके समान सुन्दर
भृकुटियों से युक्त और ताम्रनखी ५३ ऐसीस्त्री होकर उसवनमें भ्रमण करनेलगी और विचारनेलगी

ले । इतिचिन्तयतीदृष्टासोमपुत्रेणसांगना ५५ इलारूपसमाक्षिप्तमनसावरवर्णिनीम् । बुधस्तदाप्तयेयत्न मकरोत्कामपीड़ितः ५६ विशिष्टाकारवान्दण्डी सकमण्डलुपुस्तकः । वेणुदण्डकृतानेक पवित्रकगणित्रकः ५७ द्विजरूपःशिखीब्रह्म निगदन्कर्णकुण्डलः । वटुभिश्चान्वितोयुक्तैः समित्पुष्पकुशोदकैः ५८ किलान्विषन्वनेतस्मिन्नाजुहावसतामिलाम् । बाहिर्वनस्यान्तरितः किलपादपमण्डले ५९ ससम्भ्रममकस्मात्तां सोपालम्भमिवावदत् । त्यक्त्वाग्निहोत्रशुश्रूषां क्वगतामन्दिरान्मम ६० इयंविहारवेलाते ह्यतिक्रामतिसाम्प्रतम् । एह्येहिपृथुसुश्रोणि ! सम्भ्रान्ताकेनहेतुना ६१ इयंसायंतनीवेला विहारस्येहवर्तते । कृत्वोपलेपनंपुष्पै रलंकुरुगृहंमम ६२ सात्वब्रवीद्विस्मृताहं सर्वमेतत्तपोधन ! । आत्मानंत्वाञ्चभर्तारं कुलञ्चवदमेनघ ६३ बुधःप्रोवाचतांतन्वी मिलात्वंवरवर्णिनि ! । अहञ्चकामुकोनाम बहुविद्योबुधःस्मृतः ६४ तेजस्विनःकुलेजातः पितामेब्राह्मणाधिपः । इतिसातस्यवचनात् प्रविष्टाबुधमन्दिरम् ६५ रत्नस्तम्भसमायुक्तं दिव्यमायाविनिर्मितम् । इलाकृतार्थमात्मानं मेनेतद्भवनास्थिता ६६ अहोवृत्तमहोरूप महोधनमहोकुलम् । ममचास्यचमेभर्तुरहोलावण्यमुत्तमम् ६७ रेमेचसातेनसममति कालमिलाततः । सर्वभोगमयेगेहे यथेन्द्रभवनेतथा ६८ ॥

इति श्रीमत्स्यपुराणे एकादशोऽध्यायः ११ ॥

कि कौनमेरापिता कौन भ्राता कौन माता और कौनमेरा भर्त्ता है ५४ मैं पृथ्वीपर कहांबसूंगी इस प्रकार चिन्तवन करतीहुई उस इलास्त्रीको चन्द्रमाके पुत्र बुधने देखा ५५ और उसको देखतेही कामसे पीड़ितहो उसमें अपनेमनको लगा उसकी प्राप्तिके लिये अपनी इच्छाकरी ५६ और दण्ड कमण्डलु पुस्तकधारण किये वेणु दण्ड आदि अनेकपवित्र वस्तुओंसे युक्त कानों में कुण्डलोंको पहरे हुए वेदका उच्चारण करता समिध् पुष्प-कुशाजल इत्यादि यज्ञ सामग्रियोंसे और मायारूपी केशोंसे ढकाहुआहोकर उस वनके एकान्त वृक्षों में उस इलास्त्री को बुलावताभया ५७ । ५९ और अकस्मात् भ्रमको प्राप्तहोकर झड़कनेके प्रकारसे बोला कि तू अग्निहोत्रकी सेवाको त्यागके मेरेमन्दिर से कहाँ चलीगई है अब यह विहारके समयकी क्रीड़ा व्यतीतहुई जाती है हेसुन्दर कटिवाली तू किसकारणसे भयभीत होरही है ६० । ६१ अब सायंकालका समयहै तुझको यहाँ आकर क्रीड़ाकरना योग्यहै इनचन्दनपुष्पादिसे मेरेघरको शोभितकर यह सुनकर वह बोली हे तपोधन मैं विस्मृतसी होरहीहूं इससे आपमुझको और मेरे कुलको बताइये ६२ । ६३ तब बुधबोले कि हे उत्तम वर्णवाली तेरा इलानामहै और मैं बहुतसी विद्याओंसे युक्त बुधनामसे विख्यातहूं ६४ मैं तेजस्वी कुलमें होकर चन्द्रमाकापुत्रहूं इसप्रकारके उसके वचनोंको सुनकर वह इला बुधकेघरमें प्रवेश करगई ६५ दिव्यमायासे रचेहुए रत्नमयस्तंभोंसेयुक्त ऐसे उत्तमगृहमें प्रवेशितहोकर वह इला अपनेको कृतार्थ मानती भई यह बोली कि मेरे वृत्त-रूप पतिको धन-कुल और दोनों की लावण्यताको भी धन्यहै ६६ । ६७ ऐसे प्रसन्नहोकर वह इला सम्पूर्ण भोगों से युक्त इन्द्रभवनके समान बुधके गृह में बहुत कालतक बुधसे रमण करतीभई ६८ ॥ इति श्रीमत्स्यपुराणभाषाटीकायामेकादशोऽध्यायः ११ ॥

(सूतउवाच) अथान्विषन्तोराजानंभ्रातरस्तस्यमानवाः । इक्ष्वाकुप्रमुखाजग्मुस्त
दाशरवणान्तिकम् १ ततस्तेददृशुःसर्वे वडवामग्रतःस्थिताम् । रत्नपर्य्याणकिरण दीप्त
कायामनुत्तमाम् २ पर्य्याणप्रत्यभिज्ञानात् सर्वेविस्मयमागताः । अयंचन्द्रप्रभोनाम वा
जीतस्यमहात्मनः ३ अगमद्वडवारूपमुत्तमंकेनहेतुना । ततस्तुमैत्रावरुणिं पप्रच्छु
स्तेपुरोधसम् ४ किमित्येतदभूच्चित्रंवदयोगविदांवर ! । वसिष्ठश्चाब्रवीत्सर्वंदृष्ट्वातद्ध्या
नचक्षुषा ५ समयःशम्भुदयिता कृतःशरवणेपुरा । यःपुमान्प्रविशेदत्र सनारीत्वमवा
प्स्यति ६ अयमश्वोऽपिनारीत्व मगाद्राज्ञासहैवतु । पुनः पुरुषतामेति यथासौधनदो
पमः ७ तथैवयत्नःकर्तव्यश्चाराध्यैवपिनाकिनम् । ततस्तेमानवाजग्मुर्यत्रदेवोमहेश्व
रः ८ तुष्टुवुर्विविधैस्तोत्रैः पार्वतीपरमेश्वरौ । तावूचतुरलंघ्योऽयं समयःकिन्तुसाम्प्र
तम् ९ इक्ष्वाकोरश्वमेधेन यत्फलंस्यात्तदावयोः । दत्त्वाकिम्पुरुषोवीरः सभविष्यत्यसं
शयम् १० तथेत्युक्तास्ततस्तेस्तु जग्मुर्वैवस्वतात्मजाः । इक्ष्वाकोश्चाश्वमेधेन चेलः
किम्पुरुषोऽभवत् ११ मासमेकम्पुमान्वीरः स्त्रीचमासमभूत्पुनः । बुधस्यभवनेतिष्ठन्नि
लोगर्भधरोऽभवत् १२ अजीजनत्पुत्रमेकमनेकगुणसंयुतम् । बुधश्चोत्पाद्यतंपुत्रं स्व
र्लोकमगमत्ततः १३ इलस्यनाम्नातद्वर्ष मिलावृतमभूत्तदा । सोमार्कवंशयोरादाविलोऽ
भून्मनुनन्दनः १४ एवंपुरूरवाःपुंसोरभवद्वंशवर्द्धनः । इक्ष्वाकुरर्कवंशस्य तथैवोक्तस्त

सूतजीबोले-हे ऋषिलोगो इसके अनन्तर उस इलराजाको इक्ष्वाकु आदिक इलके छोटेभाई
शरवणनाम वनके समीपमें आकर ढूंढनेलगे १ तब सूर्य्यकी किरणों के समान आगे खड़ीहुई उस
घोड़ीको देखतेभये २ और ऐसे उत्तम रूपवाली उस घोड़ीको देखकर वह सब आश्चर्य्यको प्राप्तहुए
और परस्परमें कहनेलगे कि यह चन्द्रप्रभानामघोड़ा राजाइलकाहै ३ यह घोड़ीके रूपको किसकार-
णसे प्राप्तहोगया तब वसिष्ठनाम अपने पुरोहितसे पूछनेलगे ४ कि हे योगियोंमें श्रेष्ठ यहक्या आ-
श्चर्य्य है इसको आप विचारपूर्वक कहिये तब वसिष्ठजी ने अपने ज्ञानसे सब वृत्तान्तको जानकर
यह वचनकहा ५ कि किसीसमय पार्वतीजीने यह कहाथा कि जो इसवनमें पुरुषआवेगा वह स्त्री
होजायगा ६ इसहेतुसे वह राजाइल और घोड़ादोनों स्त्रीरूप होगये हैं अब यह इला जिसरीतिक-
रके कुबेरके समान पुरुषहोजाय वही यत्नकरो अर्थात् शिवजीको प्रसन्नकरो यह सुनकर मनुके पुत्र
जहाँ शिवजी महाराज विराजमानथे वहाँगये ७ । ८ और अनेकप्रकारके स्तोत्रोंसे पार्वती समेत
शिवजीको प्रसन्नकरतेभये तब शिवजीने कहा कि इससमय तुम कोईभी इसवनमें मतआओ यह
इक्ष्वाकु अपने अश्वमेध यज्ञका फलहमको जब देगा तब यह राजा इल किम्पुरुषरूपहोके यज्ञमें उ-
त्पन्नहोकर निस्सन्देह जन्मलेगा ९ । ११ इस शिवजीके वचनोंको मानकर वह सबमनुके पुत्रवहाँ
से लौटआये फिर इक्ष्वाकुने अश्वमेध यज्ञ करके जब शिवके अर्पण किया उस समय यज्ञमें चेल
नाम किन्नर उत्पन्नहुआ वह एकमहीने तक पुरुषरहा और एकमहीने तक स्त्री होके बुधके घरमें
स्थितरहा और गर्भ को धारण करता भया १२ फिर उस स्त्री में अनेक गुणरूप से युक्त पुत्र को
उत्पन्नकरके बुध देवता स्वर्गको जातेभये १३ इसीहेतुसे वहइलावर्त्त नाम द्वीपकहाता है इसप्र-

पोधनाः १५ इलःकिम्पुरुषत्वेच सुद्युम्नइतिचोच्यते । पुनःपुत्रत्रयमभूत् सुद्युम्नस्याप
राजितम् १६ उत्कलोवैगयस्तद्वद्धरिताश्वश्चवीर्य्यवान्। उत्कलस्योत्कलानाम गयस्य
तुगयामता १७ हरिताश्वस्यदिक्पूर्वा विश्रुताकुरुभिःसह । प्रतिष्ठानेभिषिच्याथ सपु
रूरवसं सुतम्१८ जगामेलावृतंभोक्तुं वर्षंदिव्यफलाशनम्। इक्ष्वाकोर्ज्येष्ठदायादो मध्य
देशमवाप्तवान् १९ नरिष्यन्तस्यपुत्रोऽभूच्छुचोनाममहाबलः। नाभगस्याम्बरीषस्तु धृ
ष्टस्यचसुतत्रयम् २० धृतकेतुश्चित्रनाथो रणधृष्टश्चवीर्य्यवान्। आनर्तोनामशर्यातेः
सुकन्याचैवदारिका २१ आनर्तस्याभवत्पुत्रो रोचमानःप्रतापवान्। आनर्तोनामदेशोऽ
भून्नगरीचकुशस्थली २२ रोचमानस्यपुत्रोऽभूद्रेवो रैवतएवच। ककुद्मीचापरान्नाम ज्ये
ष्ठःपुत्रशतस्यच २३ रेवतीतस्यसाकन्या भार्यारामस्यविश्रुता । करूषस्यतुकारूषा ब
हवःप्रथिताभुवि २४ पृषध्रोगोबधाच्छूद्रो गुरुशापादजायत । इक्ष्वाकुवंशंवक्ष्यामि शृ
णुध्वमृषिसत्तमाः २५ इक्ष्वाकोःपुत्रतामाप विकुक्षिर्नामदेवराट्। ज्येष्ठःपुत्रशतस्यासी
द्दशपञ्चचतत्सुताः २६ मेरोरुत्तरतस्तेतु जाताःपार्थिवसत्तमाः। चतुर्दशोत्तरञ्चान्य
च्छुतमस्यतथाभवत् २७ मेरोर्दक्षिणतोयेवै राजानःसम्प्रकीर्त्तिताः । ज्येष्ठःककुत्स्थो
नाम्नाऽभूत्तत्सुतस्तुसुयोधनः २८ तस्यपुत्रःपृथुर्नाम विश्वगश्चपृथोःसुतः । इन्दुस्त

कार सूर्य्यवंश और चन्द्रवंशकी आदिमें मनुकापुत्र इलहोताभया १४ इसरीतिसे चन्द्रवंशमें तो पु-
रूरवानाम वंश विस्तृत होताभया और सूर्य्यवंशमें इक्ष्वाकुराजाका वंशविस्तृतहोताभया १५ वहइल
किंपुरुष योनिमें सुद्युम्ननामसे प्रसिद्धहुआ उससुद्युम्नके महापराक्रमी उत्कल गय औरहरिताश्व यह
तीनपुत्र उत्पन्नहुए इनमेंसे उत्कलका उत्कलदेश और गयका गयनाम देश विख्यातहुआ और राजा
हरिताश्व पूर्वदिशामें कुरुवंशी राजाओंकेसाथ रहताभया इसके अनन्तर सुद्युम्न अपने पुरूरवा पुत्र
को राज्याभिषेक करके इलावृतखण्डके भोगनेकेलिये चलागया और इक्ष्वाकुका बड़ापुत्र मध्यदेश
में राज्य करताभया १६ । १९ नरिष्यन्तके महाबलवान् शुचनाम पुत्रहुआ नाभग के अम्बरीष
नाम पुत्रहुआ और धृष्टके धृतकेतु चित्रनाथ और रणधृष्ट यह तीनपुत्र उत्पन्नहुए-राजा शर्य्यातिके
एकतो आनर्तनाम पुत्र दूसरी शर्य्यातिनाम एकपुत्री होतीभई २० । २१ आनर्त्तके रोचमान नाम
बड़ा तेजस्वी पुत्रहुआ उसकादेश आनर्त्तनामसे प्रसिद्धहै और मैथिलापुरीभी प्रसिद्धहै—रोचमानके
रेवत और ककुद्मीनाम दोपुत्रहुए और सौ १०० इनके छोटेभाईहुए और रेवतकी पुत्री रेवती नाम
से प्रसिद्ध होकर बलदेवजीकी स्त्री हुई करूषके बहुत कारूपनाम देश प्रसिद्ध हैं २२ । २४ पृष-
ध्रनाम राजा गुरुकेशाप और गोबध करनेसे शूद्रजातिको प्राप्तहोगया यह तो पुरूरवाका वंशहुआ
अब इक्ष्वाकुके बंशको कहताहूं हे ऋषिसत्तम लोगो तुम मनलगाकर सुनो २५ इक्ष्वाकुकापुत्र वि-
कुक्षिनाम देवराजहुआ उसदेवराजके सौ छोटेभाईहुए और १५ पुत्रहुए २६ वह सब १४ पुत्र सुमेरु
से उत्तरकी ओर बड़े प्रसिद्धराजा होतेभये वह उत्तरदिशामें प्रसिद्धहैं और जो सुमेरुसे दक्षिणकी
ओर राजा विख्यातहैं वह केवल उस अकेले पन्द्रहवेंकीही सन्तानहैं इनसबमें बड़ाभाई ककुत्स्थ
नामसे प्रसिद्धहुआ उसकापुत्र सुयोधनहुआ सुयोधनके पृथुनाम पुत्रहुआ पृथुके विश्वगनाम पुत्र

स्यचपुत्रोऽभूद्युवनाश्वस्ततोऽभवत् २९ श्रावस्तश्चमहातेजा वत्सकस्तत्सुतोऽभवत् । निर्मितायेनश्रावस्तीगौडदेशेद्विजोत्तमाः ३० श्रावस्ताद्बृहदश्वोऽभूत्कुवलाश्वस्ततोऽभवत् । धुन्धुमारत्वमगमद्धुन्धुंनाम्नाहतःपुरा ३१ तस्यपुत्रास्त्रयोजाता दृढाश्वोदण्ड एवच । कपिलाश्वश्चविख्यातो धौन्धुमारिःप्रतापवान् ३२ दृढाश्वस्यप्रमोदश्च हर्यश्वस्तस्यचात्मजः । हर्यश्वस्यनिकुम्भोभूत् संहताश्वस्ततोभवत् ३३ अकृताश्वोरणाश्वश्च संहताश्वसुतावुभौ । युवनाश्वोरणाश्वस्य मान्धाताचततोऽभवत् ३४ मान्धातुः पुरुकुत्सोऽभूद्धर्मसेनश्चपार्थिवः । मुचुकुन्दश्चविख्यातः शत्रुजिच्चप्रतापवान् ३५ पुरुकुत्सस्यपुत्रोऽभूद्वसुदोनर्म्मदापतिः । सम्भूतिस्तस्यपुत्रोऽभूत्त्रिधन्वाचततोऽभवत् ३६ त्रिधन्वनःसुतोजातस्त्रय्यारुणइतिस्मृतः । तस्मात्सत्यव्रतोनाम तस्मात्सत्यरथःस्मृतः ३७ तस्यपुत्रोहरिश्चन्द्रो हरिश्चन्द्राच्चरोहितः । रोहिताच्चवृकोजातो वृकाद्बाहुरजायत ३८ सगरस्तस्यपुत्रोऽभूद्राजापरमधार्म्मिकः । द्वेभार्य्येसगरस्यापि प्रभाभानुमतीतथा ३९ ताभ्यामाराधितःपूर्वमौर्वोग्निःपुत्रकाम्यया । और्वस्तुष्टस्तयोःप्रादाद्यथेष्टंवरमुत्तमम् ४० एका षष्टिसहस्राणि सुतमेकंतथापरा । गृह्णातुवंशकर्तारं प्रभागृह्णाद्बहूंस्तदा ४१ एकंभानुमतीपुत्रमगृह्णादसमञ्जसम् । ततःषष्टिसहस्राणि सुषुवेयादवीप्रभा ४२ खनन्तःपृथिवींदग्धा विष्णुनायेऽश्वमार्गणे । असमञ्जसस्तुतनयो योंशु

हुआ विश्वगका पुत्र इन्दु इन्दुका युवनाश्व २७ । २९ युवनाश्वका पुत्र श्रावस्त उसका पुत्र वत्सकहुआ इसी वत्सकने गौड़देशमें श्रावस्तिपुरी बनाई है ३० श्रावस्तसे बृहदश्व उत्पन्नहुआ उसके कुवलाश्वहुआ इसी कुवलाश्वने प्रथम धुन्धुनाम दैत्यकोमाराथा इसीसे इसको धुन्धुमारभी कहते हैं ३१ उस धुन्धुमार के दृढाश्व दंडे और धौंधुमारिनामसे विख्यात कपिलाश्वनामे यहतीन पुत्र उत्पन्नहुए ३२ दृढाश्वके प्रमोदहुआ प्रमोदके हर्य्यश्व–हर्य्यश्वके निकुम्भ–निकुम्भके संहताश्व संहताश्वके अकृताश्व और रणाश्व यह दोपुत्रहुए रणाश्व के युवनाश्व-युवनाश्व के मांधाता और मांधाताके पुरुकुत्से धर्मसेने और शत्रुओंका विजय करनेवाला मुचुकुन्द हुआं ३३ । ३५ और पुरुकुत्सके नर्मदानदीके देशोंकापाति वसुद हुआ वसुदके संभूतिहुआ उसके त्रिधन्वा ३६. त्रिधन्वाके त्रय्यारुण त्रय्यारुणके सत्यव्रत उसके सत्यरथ सत्यरथके हरिश्चन्द्र हरिश्चन्द्रके रोहितहुआ उसी को लोकमें रोहितास कहते हैं रोहितासकेवृक-वृकके बाहुनाम पुत्रहुआ ३७। ३८ इसबाहुके सगर नाम परमधार्मिक राजाहुआ इस सगरकी प्रभा और भानुमती नाम दोरानी होतीभईं ३९ उन्होंने पुत्रकीइच्छासे और्व संज्ञक अग्निका आराधनकिया तब अग्निने प्रसन्नहोकर उनके इसवाञ्छितवर को दिया ४० कि एकरानी तो ६०००० पुत्रोंको उत्पन्न करेगी और दूसरी एकही पुत्रको प्राप्तकरेगी परन्तु उस एकहीका वंशचलेगा और इन ६०००० हजारकावंश नहींचलेगा तबप्रभाके ६०००० हुए और भानुमतीके एकहीपुत्र वंशचलानेवाला हुआ प्रभाके सबपुत्र किसी समय अश्वके ढूंढने कोगयेथे वहाँ पृथ्वीको खोदाथा वहाँ विष्णुके कोपसे भस्महोगये परन्तु भानुमतीके वंशकाबढ़ानेवा

मान्नामविश्रुतः ४३ तस्यपुत्रोदिलीपस्तु दिलीपात्तुभगीरथः । येनभागीरथीगङ्गा तपः
कृत्वावतारिता ४४ भगीरथस्यतनयो नाभागइतिविश्रुतः । नाभागस्यांवरीषोऽभूत्सि
न्धुद्वीपस्ततोऽभवत् ४५ तस्यायुतायुःपुत्रोऽभूदृतुपर्णस्ततोऽभवत् । तस्यकल्माषपाद
स्तु सर्वकर्माततःस्मृतः ४६ तस्यानरण्यःपुत्रोऽभून्निघ्नस्तस्यसुतोभवत् । निघ्नपुत्रावु
भौजातौ अनमित्ररघूनृपौ ४७ अनमित्रोवनमगाद्भवितासकृतेनृपः । रघोरभूद्दिलीप
स्तु दिलीपादजकस्तथा ४८ दीर्घबाहुरजाज्जातश्चाजपालस्ततोनृपः । तस्माद्दशर
थोजातस्तस्यपुत्रचतुष्टयम् ४९ नारायणात्मकाःसर्वेरामस्तेष्वग्रजोऽभवत् । रावणान्त
करस्तद्वद्रघूणांवंशवर्धनः ५० वाल्मीकिस्तस्यचरितं चक्रेभार्गवसत्तमः तस्यपुत्रौकु
शलवाविक्ष्वाकुकुलवर्धनौ ५१ अतिथिस्तुकुशाज्जज्ञे निषधस्तस्यचात्मजः । नलस्तु
नैषधस्तस्मान्नभास्तस्मादजायत५२नभसःपुण्डरीकोऽभूत् क्षेमधन्वाततःस्मृतः । तस्य
पुत्रोऽभवद्वीरोदेवानीकःप्रतापवान्५३ अहीनगुस्तस्यसुतः सहस्राश्वस्ततःपरः । तत
श्चंद्रावलोकस्तुतारापीडस्ततोऽभवत्५४तस्यात्मजश्चंद्रगिरिर्भानुश्चंद्रस्ततोऽभवत् ।
श्रुतायुरभवत्तस्माद्भारतेयोनिपातितः ५५ नलौद्वावेवविख्यातौ वंशेकश्यपसम्भवे। वीर
सेनसुतस्तद्वन्नैषधश्चनराधिपः५६ एतेवैवस्वतेवंशे राजानोभूरिदक्षिणाः । इक्ष्वाकुवंश
प्रभवाःप्राधान्येनप्रकीर्त्तिताः५७॥ श्रीमत्स्यपुराणेसूर्यवंशानुकीर्त्तनोनामद्वादशोऽध्यायः॥

ला अंशुमान्ही शेषरहगया ४१ । ४३ उसी अंशुमान्के दिलीप उत्पन्नहुआ दिलीपके भगीरथहुआ
जिसने कि तपकरके भागीरथी नाम गंगाको पृथ्वीपर लाकर जारीकरदिया ४४ भगीरथके नाभाग
पुत्रहुआ उसकापुत्र अम्बरीष हुआ उसका सिन्धुद्वीपहुआ उसका अयुतायुनाम पुत्रहुआ-उसकापुत्र
ऋतुपर्णहुआ ऋतुपर्णके कल्माषपाद पुत्रहुआ कल्माषके सर्वकर्माहुआ उसकापुत्र अनरण्य हुआ
अनरण्यका पुत्र निघ्नहुआ—निघ्न के अनमित्र और रघु यह दो पुत्रहुए ४५ । ४७ अनमित्र
सतयुगमें हुआ और वनको चलागया रघुके दिलीप—दिलीपके अज--अजकेदीर्घबाहु-दीर्घबाहुके अजपाल
४८ अजपालके दशरथ [यहाँ पुराणों में अस्त व्यस्तहै] यह दशरथ अजकेहुआ है दशरथके
चारपुत्र ४९ नारायणकी कलाथे इनचारोंमें सबसे बड़े रामचन्द्रजीथे जिन्होंने रावणकानाश किया
और रघुकावंश चलाया ५० इनका चरित्र वाल्मीकिजीने वर्णन किया है इन रामचन्द्रजीके लव
और कुश यह दोपुत्र इक्ष्वाकु वंशके बढ़ानेवालेहुए ५१ कुशसे अतिथि उत्पन्नहुआ उसके निषधनामपुत्रहुआ
उसके नल और नलके नभा--नभाके पुंडरीक--उसके क्षेमधन्वा--क्षेमधन्वाके अत्यन्त प्रतापवान्
शूरवीर देवानीकनाम पुत्रहुआ ५२ । ५३ उसके अहीनगु--अहीनगुके सहस्राश्व--उसके
चन्द्राव लोक-चन्द्रावलोकके तारापीड़नाम पुत्रहुआ५४उसके चन्द्रागिरि--चन्द्रागिरिके भानुचन्द्र-भानुचन्द्रके
श्रुतायु-जो महाभारतमें मारागयाहै ५५ और कश्यपसे चलनेवाले वंशमें दोनलनाम राजाहुए
हैं एक तो बीरसेनकापुत्र और दूसरा निषधका पुत्रहुआहै ५६ बहुतसे यज्ञादिक करनेवाले सूर्य्यवंश
में उत्पन्न होनेवालोंमें से इक्ष्वाकुवंशमें उत्पन्न होनेवालोंको यहाँ प्रधानतासे वर्णन कियाहै ५७ ॥

इति श्रीमत्स्यपुराणभाषाटीकायां सूर्य्यवंशानुकीर्त्तनं नाम द्वादशोऽध्यायः १२ ॥

(मनुरुवाच) भगवन्! श्रोतुमिच्छामि पितॄणांवंशमुत्तमम्। रवेश्चश्राद्धदेवत्वं सोमस्यचविशेषतः १ (मत्स्य उवाच) हन्ततेकथयिष्यामि पितॄणांवंशमुत्तमम्। स्वर्गे पितृगणाःसप्त त्रयस्तेषाममूर्त्तयः २ मूर्तिमन्तोऽथचत्वारः सर्वेषाममितौजसः। अमूर्त्तयःपितृगणा वैराजस्यप्रजापतेः ३ यजन्तियान्देवगणा वैराजाइतिविश्रुताः। दिविते योगविभ्रष्टाः प्राप्यलोकान्सनातनान् ४ पुनर्ब्रह्मविदान्तेतु जायन्तेब्रह्मवादिनः। संप्राप्यतांस्मृतिम्भूयो योगंसांख्यमनुत्तमम् ५ सिद्धिंप्रयान्तियोगेन पुनरावृत्तिदुर्लभाम्। योगिनामेवदेयानितस्माच्छ्राद्धानिदातृभिः ६ एतेषांमानसीकन्यापत्नीहिमवतोमता। मैनाकस्तस्यदायादः क्रौञ्चस्तस्याग्रजोऽभवत् ७ क्रौञ्चद्वीपःस्मृतोयेन चतुर्थोघृतसंवृतः। मेनाचसुषुवेतिस्रः कन्यायोगवतीस्ततः ८ उमैकपर्णापर्णाच तीव्रव्रतपरायणाः। रुद्रस्यैकासितस्यैका जैगीषव्यस्यचापरा ९ दत्ताहिमवताबालाःसर्वालोकेतपोऽधिकाः। (ऋषय ऊचुः) कस्माद्दाक्षायणीपूर्वं ददाहात्मानमात्मना १० हिमवद्दुहितातद्वत् कथंजातामहीतले। संहरन्तीकिमुक्तासौ सुतावाब्रह्मसूनुना ११ दक्षेणलोकजननी सूत! विस्तरतोवद। (सूत उवाच) दक्षस्ययज्ञेविततेप्रभूतवरदक्षिणे १२ समाहूतेषुदेवेषु प्रोवाचपितरंसती। किमर्थंतात! भर्तामे यज्ञेऽस्मिन्नाभिमन्त्रितः १३ अयोग्यइतिता

मनुजीबोले-हे भगवन् पितरों के उत्तमवंशको तथा चन्द्रवंश और सूर्य्यवंश के श्राद्धदेवोंको भी मैं सुनना चाहताहूं १ मत्स्यजी बोले-हेमनु प्रथम मैं पितरोंके श्रेष्ठवंशको तुम्हसे कहूंगा उन पितरों के स्वर्गमें सातगणहैं उनमेंभीतीनतो मूर्तिरहित हैं २ और चार मूर्तिवालेहैं इन सबमें मूर्तिसे रहित अमितपराक्रमवाले पितृगण वैराज प्रजापतिकेहैं ३ उनको देवगणपूजतेहैं और वैराजनामसे प्रसिद्ध हैं औरजो लोगकि स्वर्गसे योगभ्रष्टहोकर सनातनलोकोंसे गिरतेहैं वह ब्रह्मवेत्ताओंकेकुलमें ब्रह्मवादी होकर उत्पन्नहोतेहैं और पूर्वकीही सांख्ययोगरूपीस्मृतिको प्राप्तहोके योगाभ्यासकेद्वारा आवागमनसे रहित दुर्लभसिद्धिको अर्थात् मोक्षको प्राप्तहोजातेहैं इसहेतुसे श्राद्धकर्त्तापुरुषोंने श्राद्धमें योगाभ्यासी पुरुषोंकोही दान देना उत्तम कहाहै और इन पितरोंकी मानसी नामवाली पुत्री हिमवान् पर्व्वतकी स्त्री मैनानाम कहीहै उसी मैनाके मैनाकपुत्र उत्पन्न हुआ और मैनाकका बड़ा भाई वह क्रौंच हुआ ४। ७ जोकि घृतका चौथाद्वीप क्रौंचनामसे प्रसिद्ध है और मैनानाम इस हिमवान्कीस्त्री तीनकन्याओंकोभी जनती भई अर्थात् उमा-एकपर्णा-और पर्णा इनतीनों उत्तम व्रत वाली कन्याओंको उत्पन्न करती भई इनमें पहली उमातो शिवजीको दी दूसरी एकपर्णा शुक्रजीको और तीसरी पर्णानाम नाम कन्या जैगीषव्य ऋषिको ब्याहदी इस प्रकारसे हिमवान्ने अपनी इनतीनों कन्याओंको उक्त महात्माओंको अर्पण करीं--ऋषियोंने पूछा--हे सूतजी प्रथम पार्व्वती जीने अपने शरीरको किसहेतुसे भस्मकिया और फिर इस पृथ्वीतलमें हिमवान् के घरमें कैसे जन्मलिया और इस संहार करनेवालीसे ब्रह्माके पुत्र दक्षने क्या कहाथा इनसबवृत्तान्तोंको आप विस्तारपूर्व्वक वर्णन करिये--सूतजी बोले--कि अत्यन्त दक्षिणा आदिद्रव्यों से युक्त बड़े विस्तृत हुए दक्षके यज्ञमें ८।१२ सब देवता बुलाये गये और शिवजीको नहीं बुलाया तब सती शरीरसे पार्वतीजी ने यज्ञमें जाकर अपने पितासे कहा

माह दक्षोयज्ञेषुशूलभृत् । उपसंहारकृद्रुद्रस्तेनामङ्गलभागयम् १४ चुकोपाथसतीदेहं
त्यक्ष्यामीतित्वदुद्भवम् । दशानान्त्वञ्चभविता पितॄणामेकपुत्रकः १५ क्षत्रियत्वेऽश्वमे
धेच रुद्रात्वंनाशमेष्यसि । इत्युक्त्वायोगमास्थाय स्वदेहोद्भवतेजसा १६ निर्दहन्तीतदा
त्मानं सदेवासुरकिन्नरैः । किंकिमेतदितिप्रोक्ता गन्धर्वगणगुह्यकैः १७ उपगम्याब्रवी
द्दक्षः प्रणिपत्याथदुःखितः । त्वमस्यजगतोमाता जगत्सौभाग्यदेवता १८ दुहितृत्वङ्ग
तादेवि ममानुग्रहकाम्यया । नत्वयारहितंकिञ्चित् ब्रह्माण्डेसचराचरम् १९ प्रसादं
कुरुधर्मज्ञे नमान्त्यक्तुमिहार्हसि । प्राहदेवीयदारब्धं तत्कार्यंमेनसंशयः २० किन्त्ववश्यं
त्वयामर्त्ये हतयज्ञेनशूलिना । प्रसादेलोकसृष्ट्यर्थं तपःकार्यंममान्तिके २१ प्रजापति
स्त्वंभविताद्शानामङ्गजोप्यलम् । मदंशेनाङ्गनाषष्टिर्भविष्यन्त्यंगजास्तव २२ मत्सन्नि
धौतपःकुर्वन् प्राप्स्यसेयोगमुत्तमम् । एवमुक्तोऽब्रवीद्दक्षः केषुकेषुमयानघे २३ तीर्थेषुच
त्वंद्रष्टव्यास्तोतव्याकैश्चनामभिः।(देव्युवाच) सर्वदासर्वभूतेषु द्रष्टव्यासर्वतोभुवि २४
सर्वलोकेषुयत्किञ्चिद्रहितंनमयाविना । तथापियेषुस्थानेषु द्रष्टव्यासिद्धिमीप्सुभिः २५
स्मर्तव्याभूतिकामैर्वा तानिवक्ष्यामितत्त्वतः । वाराणस्यांविशालाक्षी नैमिषेलिंगधारि

कि हेपिता तुमने इस अपने यज्ञमें मेरे भर्त्ताको क्यों नहीं निमन्त्रणादिया १३ तब दक्षने कहा कि
शिवजी यज्ञके योग्य नहीं हैं क्योंकि संहार करने वालेहैं और रुद्र अर्थात् भयानक भी हैं इन हेतुओं
से यह अमंगलकारी हैं १४ इतनी बातके सुनतेही सतीजी क्रोधयुक्त होकर यह वचन बोलीं तुझ
से उत्पन्नहोनेवाले इस अपने शरीर को मैं त्यागती हूं और तू दशपिताओं के एक पुत्र होवेगा १५
फिर क्षत्रियवंशमें अश्वमेध यज्ञकेबीच शिवजीसेही नाशको प्राप्तहोवेगा ऐसा कहकर योगमें प्राप्तहो
अपने शरीरसे तेजको उत्पन्न करके अपने शरीरको भस्मकरदेतीभई तब देवता राक्षस किन्नर गुह्यक
आदि सबने क्याहुआ क्याहुआ ऐसाकहकर बड़ा हाहाकार किया उसके भस्म होनेके समय परही
यह सब उसकेपांस आये और दक्षभी उन सतीजी के पास आया और महादुःखितहो नम्रतापूर्वक
यहकहनेलगा कि हे सती तू इस जगत्की माताहै सौभाग्यकी देने वाली है हे देवि तुही संसार की
देवताहै तू केवलमुझपर अनुग्रह करनेकेलिये मेरीपुत्री हुईथी सोतुझसे रहित इस चराचरब्रह्माण्ड
में कुछभीनहीं है १६।१९ तू मुझपर प्रसन्नहोकर मुझे त्यागनेकोयोग्य नहीं है-तब पार्वतीजी अर्थात्
सतजी बोलीं कि जो मैंने कार्य्य प्रारम्भ कियाहै अर्थात् जो प्रण कियाहै वह निस्सन्देह अवश्यही
होगा २० परन्तु शिवजी से विध्वंस होनेवाले इस यज्ञके कर्त्ता तुझको इस मर्त्यलोकमें शिवजीकी
प्रसन्नताके लिये और लोककी रचनाके हेतुसे यहां मेरे समीपमें तपकरनाचाहिये २१ तू दशपुरुषों
के शरीर सम्बन्धसे प्रजापति होगा और मेरे अंशकरके तेरे साठपुत्री उत्पन्नहोंगी तू मेरेसमीपमें तप
करताहुआ उत्तम योगको प्राप्तहोवेगा यह वचन सुनकर दक्षबोला कि हे अनघे मुझे कौन २ से तीर्थ
में तेरा देखना योग्यहै और कौन २ से नामोंकरके तेरी स्तुति करनायोग्यहै यह सुनकर पार्वतीजी ने
कहा कि मैं पृथ्वीके सब प्राणियों में देखनेके योग्यहूं २२ । २४ जो कुछ कि इससंसारमें वर्त्तमान है
वह मुझसे भिन्न नहीं है परन्तु तौभी सिद्धि की इच्छा करनेवाले जनोंको जिन २ स्थानों में मेरा

णी २६ प्रयागेललितादेवीकामाक्षीगन्धमादने। मानसेकुमुदानामाविश्वकायातथाम्बरे २७
गोमन्तेगोमतीनाम मन्दरेकामचारिणी । मदोत्कटाचैत्ररथे जयन्तीहास्तिनापुरे २८ का
न्यकुब्जेतथागौरी रम्भामलयपर्वते । एकाम्भकेकीर्तिमती विश्वांविश्वेश्वरेविदुः २९
पुष्करेपुरुहूतेति केदारेमार्गदायिनी । नन्दाहिमवतःपृष्ठे गोकर्णेभद्रकर्णिका ३० स्था
नेश्वरेभवानीतु विल्वकेविल्वपत्रिका । श्रीशैलेमाधवीनाम भद्राभद्रेश्वरेतथा ३१ जया
वराहशैलेतु कामलाकमलालये । रुद्रकोष्ट्याञ्चरुद्राणी कालीकालञ्जरेगिरौ ३२ म
हालिङ्गेतुकपिला मर्कोटेमुकुटेश्वरी । शालिग्रामेमहादेवी शिवलिङ्गेजलप्रिया ३३ मा
यापुर्यांकुमारीतु सन्तानेललितातथा । उत्पलाक्षीसहस्राक्षे कमलाक्षेमहोत्पला ३४ ग
ङ्गायांमङ्गलानाम विमलापुरुषोत्तमे । विपाशायाममोघाक्षी पाटलापुण्ड्रवर्द्धने ३५ ना
रायणीसुपार्श्वेतु त्रिकूटेभद्रसुन्दरी । विपुलेविपुलानाम कल्याणीमलयाचले ३६ कोट
वीकोटितीर्थेतु सुगन्धामाधवेवने । कुब्जाग्रकेत्रिसन्ध्यातु गङ्गाद्वारेरतिप्रिया ३७ शिव
कुण्डेसुनन्दातु नन्दिनीदेविकातटे । रुक्मिणीद्वारवत्यान्तु राधावृन्दावनेवने ३८ देव
कीमथुरायान्तु पातालेपरमेश्वरी । चित्रकूटेतथासीताविन्ध्येविन्ध्यनिवासिनी ३९ सह्या

स्मरण करनायोग्यहै उन२ स्थानोंको मैं निश्चय करके कहतीहूं काशीजी में विशालाक्षी नामवाली नैमिषारण्य में लिंगधारिणी--प्रयाग में ललितादेवी- गन्धमादन पर्व्वत में कामाक्षी--मानसक्षेत्र में कुमुदा नामवाली--और आकाशमें विश्वकाया नामवाली मैं जाननी योग्यहूं २५ । २७ गोमंतक्षेत्र में गोमतीनाम-मन्दराचलमें कामचारिणी-चैत्ररथमें मदोत्कटा-और हस्तिनापुरमें जयंतीनामवाली मुझको जाननायोग्य है २८ कान्यकुब्ज देश में गौरी-मलयाचल पर्व्वत में रंभा-एकाम्भक क्षेत्रमें कीर्तिमती और विश्वेश्वरक्षेत्रमें विश्वाजाननी योग्यहूं २९ पुष्करमें पुरुहूता--केदारमें मार्गदायिनी--हिमवान् पर्व्वत परनन्दा--और गोकर्ण तीर्थ पर भद्रकर्णिका जाननी योग्यहूं ३० स्थानेश्वर क्षेत्रमें भवानी-और विल्वक तीर्थ पर विल्वपत्रिका जाननी योग्य हूं-श्रीशैलपर माधवीनाम-और भद्रेश्वर परमुझे भद्रानाम जाने ३१ वराह शैलपर जयानाम-कमलालयक्षेत्रपर-कामलानाम-रुद्रकोष्टीनाम पर रुद्राणी-और कालंजर तीर्थ में कालीनाम जानना योग्य है ३२ महालिंग तीर्थ में कपिला-मर्कोटमें मुकुटेश्वरी-शालिग्राम तीर्थ में महादेवी-और शिवालिंग क्षेत्र में जलप्रियानाम वाली मुझको जानना योग्य है ३३ मायापुरी में कुमारी-संतानतीर्थ में ललिता-सहस्राक्षमें उत्पलाक्षी-और कमलाक्षतीर्थ में मुझको महोत्पलानामसे जानना योग्य है ३४ गंगामें मंगलानाम वाली-पुरुषोत्तम तीर्थपै विमलानामवाली-विपाशा नदीपै अमोघाक्षी-औरपुंड्रवर्धन तीर्थपर पाटलानामवाली मुझे जानना योग्य है ३५ सुपार्श्व तीर्थ पै नारायणी नाम-त्रिकूटतीर्थपै भद्रसुन्दरी-विपुलमें विपुलानाम-और मलयाचलपै कल्याणी नामवाली मुझको जानो ३६ कोटीतीर्थपै कोटवी-माधव वनमें सुगन्धा कुब्जाग्रकतीर्थपै त्रिसंध्या-और गंगाद्वारतीर्थपै रतिप्रियानाम वालीजानो ३७ शिवकुंडपै सुनन्दा-देविकातटपै नन्दिनी- द्वारकापुरी में रुक्मिणी- वृन्दावनमें राधा-मथुरामें देवकी-पातालमें परमेश्वरी-चित्रकूट पर्व्वतपै सीता-और विंध्याचल पर्व्वतपै मुझे विन्ध्यनिवासिनी जानो-सह्याद्रि पर्व्वतपै

ह्रावेकवीरातु हर्मचन्द्रेतिचन्द्रिका । रमणारामतीर्थेतु यमुनायांमृगावती ४० करवीरेमहालक्ष्मीरुमादेवीविनायके । अरोगावैद्यनाथेतु महाकालेमहेश्वरी ४१ अभयेत्युष्णतीर्थेषु चामृताविन्ध्यकन्दरे । माण्डव्येमाण्डवीनाम स्वाहामाहेश्वरेपुरे ४२ छागलण्डेप्रचण्डातु चण्डिकामकरन्दके । सोमेश्वरेवरारोहा प्रभासेपुष्करावती ४३ देवमाता सरस्वत्यां पारापारातटेमता । महालयेमहाभागा पयोष्ण्यांपिङ्गलेश्वरी ४४ सिंहिकाकृतशौचेतु कार्तिकेयेयशस्करी । उत्पलावर्त्तकेलोला सुभद्राशोणसंगमे ४५ मातासिद्धपुरेलक्ष्मीरङ्गनाभरताश्रमे । जालन्धरेविश्वमुखी ताराकिष्किन्धपर्वते ४६ देवदारुवने पुष्टिर्मेधाकाश्मीरमण्डले । भीमादेवीहिमाद्रौतु पुष्टिर्विश्वेश्वरेतथा ४७ कपालमोचने शुद्धिर्माताकायावरोहणे । शंखोद्धारेधरानाम धृतिःपिण्डारकेतथा ४८ कालातुचन्द्रभागाया मच्छोदेशिवकारिणी । वेणायाममृतानाम वदर्यामुर्वशीतथा ४९ औषधीचोत्तरकुरौकुशद्वीपेकुशोदका । मन्मथाहेमकूटेतु मुकुटेसत्यवादिनी ५० अश्वत्थेवन्दनीयातु निधिर्वैश्रवणालये । गायत्रीवेदवदने पार्वतीशिवसन्निधौ ५१ देवलोकेतथेन्द्राणी ब्रह्मास्येषुसरस्वती । सूर्य्यविम्बेप्रभानाम मातृणांवैष्णवीमता ५२ अरुन्धतीसतीनान्तु रामासुचतिलोत्तमा । चित्तेब्रह्मकलानाम शक्तिःसर्वशरीरिणाम् ५३ एतदुद्देशतःप्रोक्तं नामाष्टशतमुत्तमम् । अष्टोत्तरञ्चतीर्थानां शतमेतदुदाहृतम् ५४ यःस्मरेच्छृणुयाद्वापि

एकवीरा-हर्म्यचन्द्रमें अतिचन्द्रिका-रामतीर्थमें रमणा-और यमुनातीर्थपै मुझे मृगावती नामजानो-३८।४० करवीर क्षेत्रपै महालक्ष्मी-विनायक क्षेत्रमें उमादेवी-वैद्यनाथ तीर्थपै अरोगा-औरमहाकाल तीर्थ में मुझे महेश्वरी जानो ४१ उष्णतीर्थ पै अभया-विंध्याचलकी गुफाओं में अमृता-मांडव्य में मांडवीनाम औरमाहेश्वर पुरमें स्वाहानामजानो ४२ छागलंडतीर्थपै प्रचंडा-मकरन्दतीर्थपै चंडिका-सोमेश्वर तीर्थपै वरारोहा-प्रभासक्षेत्रपै पुष्करावती ४३ सरस्वतीनदीपै देवमाता पारातट तीर्थपैपारा महालय क्षेत्रपै महाभागा और पयोष्णी नदीपै मैं पिंगलेश्वरी कहीजातीहूं ४४कृतशौच तीर्थमें सिंहिका-कार्त्तिकेयक्षेत्र पै यशस्करी-उत्पलावर्त्तकपै लोलानाम और शोणसंगमतीर्थ में सुभद्रा जानो ४५ सिद्धपुर क्षेत्रमें माता-भर्त्ताश्रमक्षेत्रपै लक्ष्मी-जालन्धरमें विश्वमुखी-और किष्किन्धापर्व्वतपर मुझे ताराजानो ४६ देवदारुवनमें पुष्टी-काश्मीरमंडल में मेधा-हिमाद्रिपर्व्वतपै भीमादेवी-औरविश्वेश्वर तीर्थपैभी पुष्टीजानो ४७ कपालमोचनपै शुद्धि-कायावरोहण तीर्थपै माता शंखोद्धार तीर्थपै धरानाम-और पिंडारक तीर्थपैमुझको धृतिनामवालीजानो ४८ चन्द्रभागानदी पै काला-मच्छोद तीर्थपै शिवकारिणीवेणानदीपर अमृतानाम और बदरीक्षेत्रपैमुझे उर्व्वशी नामजानो ४९ उत्तर कुरुदेशमें औषधी कुशद्वीपपै कुशोदका-हेमकूटतीर्थ परमन्मथा-और मुकुटतीर्थ पै सत्यवादिनीजानो५० अश्वत्थतीर्थ में वन्दनीयाजानो और कुबेर के स्थानमें निधिरूपा अर्थात् खजानारूपजानो वेदके मुखमें गायत्री-शिवजीके संगपार्वती-देवलोकमें इन्द्राणी-ब्रह्माके मुखों में सरस्वती-सूर्य्यके विम्व में प्रभानामवाली और षोडश मातृकाओं में वैष्णवी कहीजातीहूं ५१ । ५२ सतियों में अरुन्धती-अप्सराओं में तिलोत्तमा कहातीहूं-चित्तमें ब्रह्मकलाहूं-और सब शरिरधारियों में शक्ति रूपहूं ५३ इस उपदेश करके

सर्वपापैःप्रमुच्यते । एषुतीर्थेषुयःकृत्वा स्नानंपश्यतिमांनरः५५सर्वपापविनिर्मुक्तः कल्पं शिवपुरेवसेत् । यस्तुमत्परमंकालं करोत्येतेषुमानवः ५६ सभित्त्वाब्रह्मसदनं पदमभ्येति शाङ्करम् । नाम्नामष्टशतंयस्तु श्रावयेच्छिवसन्निधौ ५७ तृतीयायामथाष्टम्यां बहुपुत्रो भवेन्नरः । गोदानेश्राद्धदानेवा अहन्यहनिवाबुधः ५८देवार्चनविधौविद्वान् पठन्ब्रह्माधिगच्छति । एवंवदन्तीसातत्र ददाहात्मानमात्मना ५९ स्वायम्भुवोऽपिकालेन दक्षःप्राचेतसोऽभवत् । पार्वतीसाभवद्देवी शिवदेहार्द्धधारिणी६० मेनागर्भसमुत्पन्ना भक्तिमुक्तिफलप्रदा । अरुन्धतीजपन्त्येतत् प्रापयोगमनुत्तमम् ६१ पुरूरवाश्चराजर्षिर्लोकेऽव्यजयतामगात् । ययातिःपुत्रलाभञ्च धनलाभञ्चभार्गवः ६२ तथान्येदेवदैत्याश्च ब्राह्मणाःक्षत्रियास्तथा। वैश्याःशूद्राश्च बहवः सिद्धिमीयुर्यथेप्सिताम्६३ यत्रैतल्लिखितं तिष्ठेत् पूज्यतेदेवसन्निधौ । नतत्रशोकोदौर्गत्यं कदाचिदपिजायते ६४ ॥

इति श्रीमत्स्यपुराणेपितृवंशान्वयेगौरीनामाष्टोत्तरशतकथनंनामत्रयोदशोऽध्यायः १३॥

(सूत उवाच) लोकाःसोमपथा नाम यत्रमारीचनन्दनाः । वर्तन्तेदेवपितरो देवायान्भावयन्त्यलम् १ अग्निष्वात्ता इतिख्याता यज्वानोयत्रसंस्थिताः । अच्छोदानाम

एकसौ १०८ उत्तम नामों समेत एकसौही १०८ तीर्थकहेहैं ५४जो पुरुष इननामों समेत इनतीर्थों का स्मरण करेगा वा श्रवण करेगा वह सबपापों से छुटजायगा-जो पुरुष इनकहेहुए तीर्थोंमें स्नान करके मेरे दर्शन करेगा वह सबपापोंसे छुटकर एक कल्पपर्य्यन्त शिवजीके पुरमें बासकरेगा और जो पुरुष इनकहेहुए तीर्थोंमें मेराही स्मरण करताहुआ कालको व्यतीतकरेगा ५५।५६ वह ब्रह्मरन्ध्रको छेदन करके शिवजीके परमपदको जायगा जो इन १०८ नामोंको शिवजीके समीपमें तृतीयाको वा अष्टमीको शिवजीको सुनावेगा वहमनुष्य बहुतसेपुत्रोंको प्राप्तहोगा और प्रतिदिन इननामोंका सुननेवाला गोदान और श्राद्धदान के पुण्यफलको पाताहै विद्वान् पुरुष देवताकी पूजनकी विधिमें इस स्तोत्रको पढताहुआ ब्रह्मको प्राप्तहोताहै ऐसे कहतीहुई वह सतीरूप पार्वती अपनेतेजसे अपनेसब शरीरको भस्मकरतीभई इसरीतिसे स्वायंभुव वंशमेंहोनेवाला दक्षभी प्राचेतसदक्ष होताभया और वह सतीदेवीभी पार्वती नामसे शिवजीकी अर्द्धांगी स्त्री होतीभई मैनाकेगर्भसे उत्पन्न होनेवाली भक्तिमुक्तिकी दाता यह पार्वती हैं इनके इसी स्तोत्रको जपतीहुई अरुन्धती उत्तम योगको प्राप्त होती भई और पुरूरवा राजानेभी इसीके प्रभावसे विजयपाई ययातिको पुत्रका लाभहुआ और भार्गवको धनका लाभहुआ ५७। ६२और इनके विशेष अन्यदेवता दैत्य ब्राह्मण क्षत्रिय वैश्य और शूद्रादिक अनेकजनोंकोभी मनोवाञ्छित सिद्धिप्राप्त हुई ६३ जहाँ यह लिखाहुआ स्तोत्र वर्त्तमानहै और देवता के समीप इसका पूजनहोताहै वहाँ शोक और दुर्गति कभीनहीं होते हैं ६४ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांपितृवंशान्वयेगौरीनामाष्टोत्तरशतकथनंनामत्रयोदशोऽध्यायः १३ ॥

सूतजी बोले-कि जहाँ सोमपथ नामवाले लोक हैं वहाँ मरीचि ऋषिके पुत्रदेवपितर वर्त्तमान रहते हैं उनको श्रेष्ठरीति से देवतालोग पूजनकरके उनकी भावना किया करते हैं और अग्निष्वात्ता

तेषान्तु मानसीकन्यकानदी २ अच्छोदन्नामचसरः पितृभिर्निर्मितंपुरा । अच्छोदातुतपश्चक्रे दिव्यंवर्षसहस्रकम् ३ आजग्मुःपितरस्तुष्टाः किलदातुञ्चतांवरम् । दिव्यरूपधराःसर्वे दिव्यमाल्यानुलेपनाः ४ सर्वेयुवानोबलिनः कुसुमायुधसान्निभाः । तन्मध्येऽमावसुन्नाम पितरंवीक्ष्यसांऽगना ५ वव्रेवरार्थिनीसङ्गं कुसुमायुधपीड़िता । योगाद्भ्रष्टातुसातेन व्यभिचारेणभामिनी ६ धरान्तुनास्पृशत्पूर्वं पपाताथभुवस्तले । तिथावमावसुर्यस्यामिच्छां चक्रेन तांप्रति ७ धैर्येणतस्यसालोकैरमावास्येतिविश्रुता । पितृणांवल्लभातस्मा त्तस्यामक्षयकारकम् ८ अच्छोदाधोमुखीदीना लज्जितातपसःक्षयात् । सापितृन्प्रार्थयामास पुरेचात्मप्रसिद्धये ९ विलप्यमानापितृभिरिदमुक्तातपस्विनी । भविष्यमर्थमालोक्य देवकार्यञ्चतेतदा १० इदमूचुर्महाभागाः प्रसादशुभया गिरा । दिविदिव्यशरीरेण यत्किञ्चित्क्रियतेबुधैः ११ तेनैवतत्कर्म्मफलं भुज्यतेवरवर्णिनि ! । सद्यःफलन्तिकर्माणि देवत्वेप्रेत्यमानुषे १२ तस्मात्त्वंपुत्रि ! तपसः प्राप्स्यसेप्रेत्यतत्फलम् । अष्टाविंशेभवित्रीत्वं द्वापरेमत्स्ययोनिजा १३ व्यतिक्रमात्पितृणान्त्वं कष्टंकुलमवाप्स्यसि । तस्माद्राज्ञोवसोःकन्या त्वमवश्यंभविष्यसि १४ कन्याभूत्वाचलोकान् स्वान्पुनराप्स्यसिदुर्लभान् । पराशरस्यवीर्येण पुत्रमेकमवाप्स्यसि १५ द्वीपेतुवदरीप्राये वा

नामसे प्रसिद्धहोकर स्वर्गमें देवताओंको यज्ञादिक कर्म कराते हैं उनकी मानसीकन्या अच्छोदानाम नदीरूप होतीभई १ । २ प्रथम पितरोंने अच्छोदनामवाला एकसरोवररचाथा वहाँ उस अच्छोदाने देवताओंके दिव्य हजारों वर्षोंतक तप कियाथा तब पितर प्रसंन्नहोकर उसको वरदान देने को आये वह सबपितर दिव्यरूपधारी दिव्यमाला चन्दनादिसे अलंकृत कामदेवके समान कान्तिवाले थे उनमें अमावसुनाम वाले पितर को देखकर वह अच्छोदा कन्या कामदेव से पीड़ित होके संगकरने के लिये उस्से वरनेकी इच्छाकरती भई उस समय वह उसकेसंग व्यभिचारकरने के दोषसे अपने योगसे भ्रष्टहोगई और स्वर्ग से इस रीतिपर गिरीकि पृथ्वीके स्पर्श से रहित भुवलोकमें आनपड़ी सो जिसतिथिमें वह अमावसुपितर उसअच्छोदाकी इच्छानहीं करताभया ३।७ उसतिथिको उसके धैर्य करने से लोगोंने अमावस्यानामसे विख्यातकियाहै इसीसे वह तिथि पितरोंको प्यारी है इसीहेतुसे उस तिथिमें किया हुआ पुण्य अक्षयफलको देता है फिर वह अच्छोदा तपके नाशहोजाने से दीन होकर महालज्जित होती भई और अपनी प्रसिद्धिके लिये उस अपने पुरमेंही पितरोंकी प्रार्थना करती भई ८ । ९ फिर उस लज्जासे भरी हुई अच्छोदा तपस्विनीसे अगाड़ी होने वाले देवताओं के कार्य्यको जानके वहभागवाले पितर अपनी सुन्दरवाणी से यह वचन बोले-कि स्वर्ग के बीच देवतालोग अपने दिव्यशरीरोंसे जो कुछकर्मकरते हैं हे वरवर्णिनि उस कर्मके फलको वहअपने उसी शरीरसे भोग लेतेहैं क्योंकि देवताकी योनिमें कर्मोंका भोगतत्कालही होजाताहै औरमनुष्य जन्ममें कर्मोंका भोग दूसरेजन्ममें प्राप्तहोताहै इस हेतुसे हे पुत्रि तेरे तपकाफल अन्यजन्ममें होवेगा तू अष्टाविंशति नामवाले युगमें मच्छीकी योनि में जन्मलेगी १० । १३ अपने विपरीत भाव करने से तू पितरों के कुलमें बड़ेकष्टसे प्राप्त होगी तू राजाकी निश्चयकरके कन्याहोगी फिर कन्याहोके अपने

द्रायणमच्युतम् । सवेदमेकंबहुधा विभाजिष्यत्तितेसुतः १६ पौरवस्यात्मजौद्वौतु समु
द्रांशस्यशन्तनोः । विचित्रवीर्य्यस्तनय स्तथाचित्राङ्गदोनृपः १७ इमावुत्पाद्यतनयौ
क्षेत्रजावस्यधीमतः । प्रौष्ठपद्यष्टकारूपा पितृलोकेभविष्यसि १८ नाम्नासत्यवतीलोके
पितृलोके तथाष्टका । आयुरारोग्यदानित्यं सर्वकामफलप्रदा १९ भविष्यसिपरेकाले
नदीत्वञ्चगमिष्यसि । पुण्यतोयासरिच्छ्रेष्ठा लोकेह्यच्छोदनामिका २० इत्युक्त्वासगण
स्तेषां तत्रैवान्तरधीयत । साप्यवापचतत्सर्वं फलंयदुदितम्पुरा २१ ॥

इति श्रीमत्स्यपुराणे पितृवंशानुकीर्त्तनो नाम चतुर्दशोऽध्यायः १४ ॥

(सूत उवाच) विभ्राजानामचान्येतु दिविसंतिसुवर्चसः । लोकाबर्हिषदोयत्रपितरः
संतिसुव्रताः १ यत्रबर्हिणयुक्तानि विमानानिसहस्रशः । सङ्कल्प्यबर्हिषोयत्र तिष्ठन्ति
फलदायिनः २ यत्राभ्युदयशालासु मोदन्तेश्राद्धदायिनः । यांश्चदेवासुरगणा गन्धर्वा
प्सरसांगणाः ३ यक्षरक्षोगणाश्चैव यजन्तिदिविदेवताः । पुलस्त्यपुत्राःशतशस्तपोयो-
गसमन्विताः ४ महात्मानोमहाभागा भक्तानामभयप्रदाः । एतेषांपीवरीकन्या मानसी
दिविविश्रुता ५ योगिनीयोगमाताच तपश्चक्रेसुदारुणम् । प्रसन्नोभगवांस्तस्या वरं

दुर्लभलोकोंको प्राप्त होजावेगी और पराशर ऋषिकेवीर्य्यसे तेरा एक उत्तमपुत्रभी उत्पन्न होगा वह
पुत्र जो कि बहुतसे वेरीके वृक्षोंवाले द्वीपमें उत्पन्नहोगा इसीसे उसपुत्रका नामबादरायण भी वि-
ख्यात होगा वही तेरापुत्र एकवेदके चार विभागकरेगा १४ । १६ और पौरवके दो पुत्रहोंगे उनमें से
समुद्रके अंशवाले शंतनुराजाके विचित्रवीर्य और चित्राङ्गद यह दो पुत्रहोंगे सो इन वेदव्यासजी के
सम्बन्धसे तू इन क्षेत्रजदोनों पुत्रोंको उत्पन्नकरके प्रौष्ठपदी और अष्टकारूपाहोके पितरोंके लोकमें
प्राप्तहोवेगी १७ । १८ इससंसारमें तू सत्यवती नामसे प्रसिद्धहोगी और पितरोंके लोकमें अष्टका
नामसे विख्यातहोगी तू सदैव आयु आरोग्यादि सबकामनाओंके फलकी देनेवाली होगी इसके अन-
न्तर किसीसमयमें तू नदीभावको प्राप्तहोजायगी तब भी तेराजल पवित्ररहैगा औरसंसारमें अच्छो-
दानामवाली उत्तमनदी प्रसिद्धहोगी ऐसी२ बातें कहकर वह सबपितरोंके गणवहीं अन्तर्द्धान होगये
वह अच्छोदाभी उनके कहेहुए सबफलोंको प्राप्तहोजाती भई १९ । २१ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायां पितृवंशानुकीर्त्तनंनामचतुर्दशोऽध्यायः १४ ॥

सूतजी बोले—स्वर्गमें विभ्राजनाम सुन्दर तेजवाले लोकहैं वहाँ सुन्दर व्रतवाले बर्हिषद्नाम पि-
तरहैं जहाँ बर्हिणनाम अर्थात् कुशाओंसे युक्त हजारों विमानहैं उन विमानों में वह कुशा संकल्पित-
होके मनुष्योंके फलदेनेवाले हैं १ । २ वहाँ कल्याण करनेवाले और श्राद्धों के दान करनेवाले पुरुष
आनन्द करते हैं उन पितरों को देवता दैत्य गन्धर्व और अप्सराओं के गणपूजते हैं ३ और यक्ष
राक्षसोंके भी गण उनका पूजन करते हैं यह हजारोंगण तप योगसे युक्त पुलस्त्यजी के पुत्र
हैं ४ यह सब महात्मा महाभाग अपने भक्तोंको अभयदान देनेवाले हैं इनगणोंकी मानसी उत्पन्न
होनेवाली पीवरी नाम कन्या विख्यातहै ५ वह योगिनी और योगमाता दारुण तपकरतीभई जब
भगवान् प्रसन्नहोकर उसको वरदेनेको गये तब उसने हरि से यह वचन कहा कि जो आप मुझपर

वत्रेतुसाहरेः ६ योगवन्तंसुरूपञ्च भर्त्तारंविजितेन्द्रियम्। देहिदेव ! प्रसन्नस्त्वं पतिं
मेवदतांवरम् ७ उवाचदेवोभवित्रिता व्यासपुत्रोयदाशुकः । भवितातस्यभार्यात्वं योगा
चार्य्यस्यसुव्रते ! ८ भविष्यतिचतेकन्या कृत्वीनामचयोगिनी । पाञ्चालाधिपतेर्देया
मानुष्यस्यत्वयातदा ९ जननीब्रह्मदत्तस्य योगसिद्धाचगौःस्मृता । कृष्णो गौरःप्रभुःश
म्भुर्भविष्यन्तिचतेसुताः १० सहात्मानोमहाभागा गमिष्यन्तिपरम्पदम्। तानुत्पाद्यपु
नर्योगात्सवरामोक्षमेष्यसि ११ सुमूर्त्तिमन्तःपितरो वसिष्ठस्यसुताःस्मृताः । नाम्नातु
मानसाःसर्वे सर्वेतेधर्म्ममूर्त्तयः १२ ज्योतिर्भासिषुलोकेषु येवसन्तिदिवः परम्। विराज
मानाःक्रीड़न्ति यत्रतेश्राद्धदायिनः १३ सर्वकामसमृद्धेषु विमानेष्वपिपादजाः। किंपुनः
श्राद्धदाविप्रा भक्तिमन्तःक्रियान्विताः १४गौर्नामकन्यायेषान्तु मानसीदिविराजते। शुक्र
स्यदयितापत्नी साध्यानांकीर्त्तिवर्द्धिनी १५ मरीचिगर्भानाम्नातु लोकामार्तण्डमण्डले।
पितरोयत्रतिष्ठन्ति हविष्यन्तोऽङ्गिरःसुताः १६ तीर्थश्राद्धप्रदायान्ति येचक्षत्रियसत्तमाः।
राज्ञान्तुपितरस्तेवै स्वर्गमोक्षफलप्रदाः १७ एतेषांमानसीकन्या यशोदालोकविश्रुता।
पत्नीह्यंशुमतःश्रेष्ठा स्नुषापञ्चजनस्यच १८ जनन्यथदिलीपस्य भगीरथपितामही ।
लोकाःकामदुघानाम कामभोगफलप्रदाः १९ सुस्वधानामपितरो यत्रतिष्ठन्तिसुव्रताः।
आज्यपानामलोकेषु कर्दमस्यप्रजापतेः२०पुलहाङ्गजदायादा वैश्यास्तान्भावयन्तिच।

प्रसन्नहुए हैं तो मेरे इसवरको दीजिये कि सुन्दररूप यौवनवाला मेरा भर्त्ताहोय ६।७ भगवान् बोले
कि व्यासजीका पुत्र शुकदेवहोगा हे सुव्रते तू उस योगाचार्य्यकी भार्य्याहोगी ८ और उनसे कृत्वी
नामवाली योगिनी तेरेकन्याहोगी उस कन्याको तुझे पांचालदेशके मनुष्य राजाकेलिये देनीहोगी९
वह कन्या ब्रह्मदत्तनाम पुत्रको उत्पन्न करेगी फिर योगसे प्रसिद्धहोके गौरूप होजायगी और कृष्ण
गौर प्रभु शम्भु यह तेरे पुत्रहोवेंगे १० और अपनेशरीरसमेत परमपदको प्राप्तहोंगे और उनपुत्रों को
तू फिर अपने योगाभ्याससे उत्पन्नकरके वरको पाकर मोक्षको प्राप्त होजावेगी ११ और जो सुन्दर
मूर्त्तिवाले पितरकहे हैं वह सब मानसनामवाले हैं और धर्मकी मूर्त्तिकहाते हैं १२ वह स्वर्गसे ऊपर
के ज्योतिष्मन्तनाम लोकोंमें बसतेहैं इनके निमित्त श्राद्धकरनेवाले मनुष्यभी वहाँही विराजमान
होकर क्रीड़ाकरते हैं शूद्रभी सम्पूर्ण समृद्धिवाले बिमानोंमें जाके प्राप्तहोते हैं और क्रिया कर्म से
संयुक्त भक्तिमान् पुरुष जो भक्तिसे श्राद्ध दानकरते हैं उनका तो क्याही कहनाहै १३ । १४ और
गौनामवाली इनपितरोंकी मानसीकन्या जो स्वर्गमें विराजमानहै वह शुक्रकी प्रियपत्नीहै और साध्योंकी
कीर्त्ति बढ़ानेवालीहै १५ मरीची गर्भानामवाले लोक सूर्य्यके मण्डलमें हैं वहाँ अंगिरसऋषिकेपुत्र
हविष्यन्तनामवाले पितर स्थितहैं उनके निमित्त तीर्थ श्राद्धकरनेवाले उत्तम क्षत्रियलोग
उन्हींके लोकोंमें प्राप्तहोते हैं वह राजालोगोंके पितरहोकर स्वर्ग मोक्षके फलदेनेवाले हैं १६ । १७
इनकी कन्या मानसी यशोदानाम विख्यातहै वह अंशुमान् ऋषिकी उत्तम भार्य्या है और पञ्चजन
राजाकी पुत्रबधू कहलाती है दिलीपकी माताहै औरभगीरथकी पितामही है और कामभोगके फलोंके
देनेवाले कामदुघा नामवाले लोकहैं वहाँ सुन्दरव्रतवाले सुस्वधानामवाले पितरस्थितहैं वह लोकों

यत्रश्राद्धकृतःसर्वे पश्यन्तियुगपद्गताः २१ मातृभ्रातृपितृष्वसृ सखिसम्बन्धिबान्धवान्।
अपिजन्मायुतैर्दृष्टा ननुभूतान्सहस्रशः २२ एतेषांमानसीकन्या विरजानामविश्रुता ।
यापत्नीनहुषस्यासीद्ययातेर्जननीतथा २३ एकाष्टकाऽभवत्पश्चाद् ब्रह्मलोकेगतासती।
त्रय एतेगणाःप्रोक्ताश्चतुर्थन्तुवदाम्यतः २४ लोकास्तुमानसानाम ब्रह्माण्डोपरिसंस्थि
ताः।येषान्तुमानसीकन्यानर्मदानामविश्रुता २५सोमपानामपितरोयत्रातिष्ठन्तिशाश्वताः।
कृत्वासृष्ट्यादिकंसर्वं मानसेसाम्प्रतंस्थिताः २६ नर्मदानामतेषान्तु कन्यातोयवहास
रित्। भूतानियापावयति दक्षिणापथगामिनी २७ तेभ्यःसर्वेतुमनवः प्रजासर्गेषुनिर्मि
ताः। ज्ञात्वाश्राद्धानिकुर्वन्ति धर्माभावेऽपिसर्वदा २८ तेभ्यएवपुनःप्राप्तुं प्रसादाद्योगस
न्ततिम्। पितृणामादिसर्गेतु श्राद्धमेवविनिर्मितम् २९ सर्वेषांराजतंपात्र मथवारजता
न्वितम्। दत्तंस्वधापुरोधाय पितॄन्प्रीणातिसर्वदा ३० अग्नीषोमयमानान्तु कार्य्यमा
का चरित्र पुण्यदायी पवित्र और आयुका बढ़ानेवाला है ३ अर्थात् शतानीकने कहा कि हे शौनक हमारा बड़ा ययाति जो दशमाहै उसका विवाह शुक्रजीकी परम दुर्लभाकन्यासे कैसेहोताभया ४ हे तपोधन यह मैं सुननेकी इच्छाकरताहूं और इसके विशेष मैं पूरुवंशके राजाओंके वंशका आनुपूर्विक वृत्तान्तभी सुनना चाहताहूं आप विस्तारपूर्वक वर्णन कीजिये ५ शौनकने कहा—राजाययाति इन्द्र के समान कान्तिवालाहुआ उसको पूर्वमें शुक्र और वृषपर्वा इन दोनोंने वरदियाथा ६ उसकोमुझसे सुनो—और नहुषके पुत्रययातिके और देवयानीके संयोगकोभी कहताहूं ७ एकसमय इसत्रिलोकी के ऐश्वर्य निमित्त देवता और दैत्योंमें परस्पर विरोध होताभया ८ तब जीतनेकी इच्छाकरके देवतालोग बृहस्पतिजीको यज्ञमें पुरोहित बनातेभये और दैत्यलोग शुक्रजीको पुरोहित करतेहुए ९ इनदोनों ऋषियोंमें परस्पर बहुतसी ईर्षाहोतीभई फिर युद्धमें प्राप्तहोनेवाले दैत्योंको देवता मारतेभये उनको शुक्रजी अपनी विद्याके बल से जिलादेतेभये तब वह उठउठकर देवताओंसे फिर युद्धकरनेलगे १० ११ और जिन देवताओंको दैत्यमारडालतेथे उनको बृहस्पतिजी नहीं जिवासक्तेथे क्योंकि जिस संजीविनी विद्याको शुक्रजी जानतेथे उसको बृहस्पतिजी नहीं जानतेथे इसहेतुसे देवता परमदुखी हुए १२।१३ तब देवता भयसे व्याकुलहोकर बृहस्पतिजीके बड़ेपुत्र कचनामवालेसे आकरबोले १४ कि हम तुम्हारी शरणहैं तुम हमारी रक्षाकरो आपसे यह प्रार्थनाहै कि अतुल तेजवाले शुक्रजीकेपास जो संजीविनी विद्याहै उस विद्याको उनकेपाससे किसीरीतिकरके हरलाओ फिर तुम हमारे भागके ग्रहण करनेवाले होजाओगे यहशुक्र आपको वृषपर्वाके समीप देखनायोग्यहै १५।१६ जो कि यह वृषपर्वा दानवोंकी रक्षाकरताहै और देवताओंकी नहीं करता है उसकी आराधना करनेको आपके सिवाय दूसराकोई समर्थ नहीं है १७ और जिसमहात्मा शुक्रकी देवयानी पुत्री है उसके आराधन

या द्विजः १६ रक्षतेदानवांस्तत्र नसरक्षत्यदानवान्। तमाराधयितुंशक्तो नान्यःकश्चि
दृतेत्वया १७ देवयानीचदयिता सुतातस्यमहात्मनः। तामाराधयितुंशक्तो नान्यःक
श्चनविद्यते १८ शीलदाक्षिण्यमाधुर्यैराचारेणदमेनच। देवयान्यान्तुतुष्टायां विद्यान्तांप्रा
प्स्यसिध्रुवम् १९ तदाहिप्रेषितोदेवैः समीपेवृषपर्वणः। तथेत्युक्त्वातुसप्रायाद्बृहस्पति
सुतःकचः २० सगत्वात्वरितोराजन्! देवैःसंपूजितःकचः। असुरेन्द्रपुरेशुक्रं प्रणम्येद
मुवाचह २१ ऋषेरङ्गिरसःपौत्रंपुत्रं साक्षाद्बृहस्पतेः। नाम्नाकचेतिविख्यातं शिष्यंगृ
ह्णातुमांभवान् २२ ब्रह्मचर्य्यंचरिष्यामि त्वय्यहंपरमंगुरो! अनुमन्यस्वमांब्रह्मन्! स
हस्रपरिवत्सरान् २३ (शुक्र उवाच) कच! सुस्वागतन्तेऽस्तु प्रतिगृह्णामितेवचः।
अर्चयिष्येऽहमर्च्यंत्वामर्चितोऽस्तुबृहस्पतिः २४ (शौनक उवाच) कचस्तुतंतथेत्युक्त्वा
प्रतिजग्राहतद्व्रतम्। आदिष्टङ्कविपुत्रेण शुक्रेणोशनसास्वयम् २५ व्रतञ्चव्रतकाल
ञ्च यथोक्तंप्रत्यगृह्णत। आराधयन्नुपाध्यायं देवयानीञ्चभारत! २६ संशीलयन्देव
यानीं कन्यांसम्प्राप्तयौवनाम्। पुष्पैःफलैःप्रेषणैश्च तोषयामासभार्गवीम् २७ देवया
न्यपितंविप्रं नियमव्रतचारिणम्। अनुयायन्तीललना रहःपर्य्यचरत्तदा २८ पञ्चव
र्षशतान्येवं कचस्यचरतोभृशम्। ततस्तीव्रंव्रतंबुध्वा दानवास्तंततःकचम् २९ गार
क्षन्तंवनेदृष्ट्वा रहस्येनममार्षिताः। जघ्नुर्बृहस्पतेर्द्वेषान्निजरक्षार्थमेवच ३० हत्वाशा
लावृकेभ्यश्च प्रायच्छंस्तिलशःकृतम्। ततोगावोनिवृत्तास्ता अगोपाःस्वनिवेशन

करनेमें भी कोई समर्थनहीं है १८ शीलता, चतुरता, मधुरता और दमन इत्यादि बातोंसे देवयानी
को प्रसन्न करनेसे आप उसविद्याको प्राप्तहोगे १९ इसप्रकार की बातें कहकर देवताओं ने कचको
वृषपर्वा के पास भेजा उस समय देवताओं ने कचका पूजन किया और वह उनसे पूजित होकर
शीघ्रही शुक्रजी के समीपमें पहुंचा और शुक्रजीको प्रणामकरके यह वचन बोला २०।२१ कि हे
आचार्य्यजी अंगिरसके पौत्र बृहस्पतिजी के पुत्र मुझ कचनाम विख्यातको आपअपने शिष्यभावमें
करने के निमित्त ग्रहणकीजिये २२ हे गुरो मैं तुम्हारे विषयमें परमब्रह्मचर्य्य का आचरण करूंगा
हे ब्रह्मन् हजारोंबर्षोंतक मुझको आप अपनाशिष्यरक्खो २३ शुक्रजीनेकहा हे कच तेरा आना उत्तम
है हम तेरे वचनको ग्रहण करेंगे और बृहस्पतिजीका पूजनकरके तेरा भी पूजनकरेंगे--शौनकनेकहा
कि फिर वहकच शुक्रजीके सबकहेहुए वृत्तान्तको अंगीकार करके २४।२५ व्रत और व्रतके कालको
यथोक्त विधिसे ग्रहणकर शुक्रका और देवयानीका आराधन करताभया २६ शुक्रकी कन्या देवयानीको
फल पुष्पादिकोंसे सेवाकरके प्रसन्नकरता हुआ अपने शीलस्वभावमें रहा २७ तब देवयानी भी
उसनियम व्रतमें रहनेवाले ब्राह्मणकी सेवापरिचर्य्या में रहतीभई २८ इसप्रकार पांचसौवर्षतक कच
ने बहुतसा तपका आचरण किया तब दैत्यलोग कचके उस तीव्रव्रतकोजानके वनमें गौचरातेहुए
उसकचको क्रोधकरके बृहस्पतिजीके बैरसे अपनी रक्षाकेअर्थ एकान्तमें लेजाकर मारडालतेभये २९
३० और उसके शरीरके खंड २ करके भेड़िये और शृगालोंको खिलादेतेभये तब अपने पालकसे

म् ३१ तादृष्ट्वारहितागास्तु कचेनाभ्यागतावनात्। उवाचवचनंकाले देवयान्यथ
भार्गवम् ३२ हुतञ्चैवाग्निहोत्रन्ते सूर्यश्चास्तङ्गतःप्रभो !। अगोपाश्चागतागावः
कचस्तात! नदृश्यते ३३ व्यक्तंहतोधृतोवापिकचस्तात! भविष्यति। तंविनानैवजीवा
मिवचःसत्यंब्रवीम्यहम् ३४ (शुक्र उवाच) अथैह्येहीतिशब्देन मृतंसञ्जीवयाम्यहम्।
ततःसञ्जीवनींविद्यां प्रयुक्ताकचमाह्वयत ३५ आहूतःप्राद्रवद्दूरात् कचःशुक्रंननामसः।
ततोऽहमितिचाचख्यौ राक्षसैर्धिषणात्मजः ३६ सपुनर्देवयान्युक्तः पुष्पाहारेयदृच्छया।
वनंययौकचोविप्रः पठन्ब्रह्मचशाश्वतम् ३७ वनेपुष्पाणिचिन्वन्तं ददृशुर्दानवाश्च
तम्। ततोद्वितीयेतंहत्वापुनः कृत्वाचचूर्णवत्। प्रायच्छन्ब्राह्मणायैव सुरायामसुरास्त
दा ३८ देवयान्यथभूयोऽपि पितरंवाक्यमब्रवीत्। पुष्पाहारप्रेषणकृत्कचस्तात ! नदृ
श्यते ३९ व्यक्तंहतोमृतोवापिकचस्तात ! भविष्यति। तंविनानैवजीवामि वचःसत्यंब्र
वीमिते ४० (शुक्र उवाच) बृहस्पतेःसुतःपुत्रि ! कचःप्रेतगतिंगतः। विद्ययाजीवितोऽ
प्येवं हन्यतेकरवाणिकिम् ४१ मैनंशुचोमारुददेवयानि! नत्वादृशीमर्त्यमनुप्रशोचेत्।
यस्यास्तवब्रह्मचब्राह्मणाश्च सेन्द्रादेवावसवोऽश्विनौच ४२ सुरद्विषश्चैवजगच्चसर्वमुप
स्थितंमत्तपसःप्रभावात्। अशक्योऽयंजीवयितुंद्विजातिःसञ्जीवितोयोवध्यतेचैवभूयः ४३

रहित होकर वह गौएंभी अपने घरको आतीभईं ३१ तबकचसे रहित बनसे आईहुईं उनगौओंको देखकर देवयानी शुक्रजीसे यह वचनबोली ३२ हेप्रभो आपने अग्निहोत्र कर्म किया और सूर्य्यअस्त होचुका यह गौएं अपने पालकसे रहितहैं और आज कच नहीं दीखताहै ३३ आज अवश्यही एकान्त में कच मारागयाहे और यह सत्यहै तो मैं उसके बिना नहीं जीऊंगी ३४ शुक्रजीबोले कि अभी मैं एहि एहि ऐसा शब्दकरके उस मरेहुए कचको जिलाताहूं इसकेपीछे संजीविनी विद्याको युक्तकरके वह शुक्रजी उसकचको बुलातेभये ३५ तब वह बुलायाहुआ कच दूरसेही भगाहुआ आकर शुक्रजी को नमस्कार करताभया और जिसप्रकारसे राक्षसोंने माराथा वह सब वृत्तान्त गुरूजीसे निवेदन किया ३६ फिर एकसमय पुष्पलाने के निमित्त देवयानीका भेजाहुआ वह कच ब्राह्मण अपने वेद को पढ़ताहुआ वनमेंगया ३७ तब वनमें पुष्पोंको लेतेहुए कचको दैत्योंनेदेखा और देखतेही उसको पूर्व्वकेही समान मारचूर्णकर मदिरा में मिलाकर अपने गुरू शुक्राचार्य्यकोही पिलादिया ३८ फिर देवयानी उसको न देखकर दूसरीबार अपने पितासे बोली कि हेतात मैंने पुष्पोंके निमित्त कच को भेजाथा वह अबनहीं दीखताहै ३९ अबभी कच एकान्तमें अवश्यमारागयाहै सो उसके विना मैंनहीं जीऊंगी यह मैं सत्यहीसत्य वचनकहती हूं ४० शुक्रजी बोले हे देवयानी वह बृहस्पतिका पुत्र कच प्रेतयोनि को प्राप्तहोगया हमने संजीविनी विद्यासे जिलाभी दियाथा परन्तु अब वह फिर मारागया हम क्याकरें ४१ हे देवयानी शोचमतकर तू रोनेको योग्यनहीं है इस लोकमें तुझसरीके लोगों को शोचकरना योग्यनहीं है जिस तुझको ब्रह्मा ऋषि अश्विनीकुमार इन्द्रादिकदेवता दैत्य और संपूर्ण जगत् यह सब मेरे तपके प्रभावसे प्राप्तहोरहे हैं तो इसकाशोच करना वृथाहै क्योंकि जो यहब्राह्मण एकबार जियाहुआभी फिर मारागयाहै इसीसे इसके जिवानेको अब मेरी सामर्थ्य नहीं है ४२। ४३

(देवयान्युवाच)यस्याङ्गिरावृद्धतमःपितामहो बृहस्पतिश्चापिपितातपोनिधिः । ऋषेःसु
पुत्रन्तमथापिपौत्रंकथं नशोचेयमहन्नरुद्याम् ४४ सब्रह्मचारीचतपोधनश्चसदोत्थितः
कर्म्मसुचैवदक्षः । कचस्यमार्गंप्रतिपत्स्येनभोक्ष्येप्रियोहिमेतात ! कचोभिरूपः ४५
(शौनक उवाच) सत्वेवमुक्तोदेवयान्यामहर्षिः संरभेणाव्याजहाराथकाव्यः । असंशयं
मामसुराद्विषन्तियेमे शिष्यानागतान्सूदयन्ति ४६ अब्राह्मणंकर्तुमिच्छन्तिरौद्रा एभि
र्व्यर्थंप्रस्तुतोदानवैर्हि । तत्कर्म्मणाप्यस्यभवेदिहान्तः कंब्रह्महत्यानदहेदपीन्द्रम् ४७
सतेनापृष्टोविद्ययाचोपहूतोशनैर्वाचंजठरेव्याजहार । तमब्रवीत्केनचेहोपनीतो ममोदरे
तिष्ठसिब्रूहिवत्स ! ४८ (कच उवाच) भवत्प्रसादान्नजहातिमांस्मृतिः सर्वंस्मरेयंयच्च
यथाचवृत्तम् ।नत्वेवंस्यात्तपसःक्षयोमेततः क्लेशंघोरतरंस्मरामि ४९ असुरैःसुरायांभवतो
ऽस्मिदत्तोहत्वादग्धाचूर्णयित्वाचकाव्य!ब्राह्मींमायान्त्वासुरीत्वत्रमाया त्वयिस्थितेकथमे
वाभिबाधते ५०(शुक्र उवाच) किंतेप्रियंकरवाण्यद्यवत्से ! विनैवमेजीवितंस्यात्कचस्य ।
नान्यत्रकुक्षेर्ममभेदनाच्चदृश्येत् कचोमद्गतोदेवयानि ! ५१ (देवयान्युवाच) द्वौमांशोकाव
ग्निकल्पौदहेतांकचस्यनाशस्तवचैवोपघातः । कचस्यनाशेममनास्तिशर्मतवोपघातेजी
वितुंनास्मिशक्ता५२ (शुक्र उवाच) संसिद्धरूपोऽसिबृहस्पतेःसुत! यत्त्वांभक्तंभजतेदेवया
नी । विद्यामिमांप्राप्नुहिजीवनीन्त्वं नचेदिन्द्रःकचरूपीत्वमद्य ५३ ननिवर्तेतपुनर्जीवन्

देवयानी बोली–जिसका वृद्धपितामह अंगिरामुनिहैं और जिसका पिता तपोनिधि बृहस्पति है
ऐसे उत्तमऋषियों के पुत्र पौत्रका मैं कैसे शोचनहीं करूं और कैसे नहीं रोऊं यह कचकर्म्मों में श्रेष्ठ
चतुर और तपोधनब्रह्मचारी है मुझको अत्यन्तप्याराहैं हेतात इसहेतुसे मैं कचके मार्गमें ढूंढ़ने को
प्राप्तहूंगी और उसके विना भोजन भी नहीं करूंगी ४४ । ४६ शौनककहते हैं कि देवयानी से ऐसे
वचन सुनकर वह महर्षिशुक्र ऐसा विचार करते भये कि दैत्य अवश्य मेरे साथ शत्रुता रखते हैं
क्योंकि जो आयेहुए मेरे शिष्योंको मार देतेहैं ४७ यह दुष्टजन लोग इस पृथ्वीपर ब्राह्मणोंका बीज-
नाश किया चाहते हैं इस हेतुसे मैं इन सबका वृथागुरू होकर स्तुत कियाजाताहूं यह ब्रह्माग्नि जब
कि इन्द्रकोभी भस्म करदेती है तो ऐसाघोरकर्म किसको नहींभस्मकरसक्ताहै ऐसाविचारकर शुक्रजी
ने फिर अपनी संजीविनी विद्यासे कचको बुलाया तब धीरे २ शुक्रजीके पेटमेंसेबोला तब शुक्रजीने
पूछा कि मेरेउदरमें तू कैसे प्राप्त होगयाहै ४८ । ४९ कच बोला कि आपके प्रतापसे मुझको सम्पूर्ण
वृत्तान्त स्मरणहै इसप्रकारसे मेरा तपतो क्षीण नहीं होताहै परन्तु अत्यन्त क्लेशको प्राप्तहोरहाहूं हे
भृगुजी दैत्योंने मुझकोमार चूर्णकर मदिरामें मिलाकर आपको पिलादिया है परन्तु आपके शरीरमें
स्थितहुआ मैं आपकी ब्राह्मीमायाकेप्रभावसे असुरोंकीमायाकरके वाधाकोनहींप्राप्तहुआहूं तबशुक्रजी
अपनी देवयानी पुत्रीसे कहनेलगे कि हे देवयानी मैं तेरा क्या प्रियकरूं मेरे जीवतेहुए इसकचका
जीवनाकठिनहै क्योंकि मेरीकुक्षकेविनाफाड़ेहुए यहकच मेरेउदरसेबाहरकैसेनिकले देवयानीबोली–
कि अग्निके समान यह दोनों दुःख मुझको भस्मकरेडालतेहैं अर्थात् एक तो कचकानाश और दूसरा
आपका मरना कचकेनाशसे तो मेरासुखनहीं और आपके मरनेसे मेरा जीवन नहीं है--तब शुक्रजी

कश्चिदन्योममोदरात् । ब्राह्मणंवर्जयित्वैकं तस्माद्विद्यामवाप्नुहि ५४ पुत्रोभूत्वानिष्क्रमस्वोदरान्मे भित्त्वाकुक्षिञ्जीवयमांचतात ! अवेक्ष्येथोधर्म्मवतीमवेक्षांगुरोः सकाशात्प्राप्यविद्यांसविद्यः ५५ (शौनक उवाच) गुरोःसकाशात्समवाप्यविद्यां भित्त्वाकुक्षिन्निर्विचक्रामविप्रः । प्रालेयाद्रेःशुक्लमुद्भिद्यशृङ्गं रात्र्यागमेपौर्णमास्यामिवेन्दुः५६दृष्ट्वाचतं पतितंवेदराशिमुत्थापयामासततःकचोऽपि । विद्यांसिद्धान्तामवाप्याभिवाद्यस्ततःकचस्तंगुरुमित्युवाचं ५७ निधिंनिधीनांवरदंवराणां येनाद्रियन्तेगुरुमर्चनीयम् । प्रालेयाद्रिप्रोज्ज्वलभालसंस्थं पापाँल्लोकांस्तेव्रजन्त्यप्रतिष्ठाः ५८ (शौनक उवाच) सुरापानाद्वञ्चनात्प्रापयित्वा संज्ञानाशञ्चेतसश्चापिघोरम् । दृष्ट्वाकचञ्चापितथाभिरूपं पीतंतथासुरयामोहितेन ५९ समन्युरुत्थायमहानुभावस्तदोशनाविप्रहितंचिकीर्षुः । काव्यःस्वयंवाक्यमिदञ्जगाद सुरापानंप्रत्यसौजातशङ्कः ६० (शुक्र उवाच) योब्राह्मणोऽद्यप्रभृतीह कश्चिन्मोहात्सुरांपास्यतिमन्दबुद्धिः । अपेतधर्माब्रह्महाचैवसस्यादस्मिँल्लोकेगर्हितःस्यात्परेच६१ मयाचेमांविप्रधर्मोक्तसीमांमर्यादांवैस्थापितांसर्वलोके।सन्तो विप्राःशुश्रुवांसोगुरूणांदेवादैत्याश्चोपशृण्वन्तुसर्वे ६२ (शौनक उवाच) इतीदमुक्त्वा समहाप्रभावस्तपोनिधीनांनिधिरप्रमेयः । तान्दानवांश्चैवनिगूढबुद्धीनिदंसमाहूयवचोऽभ्युवाच ६३ (शुक्र उवाच) आचक्षाणोदानवावालिशास्थशिष्यःकचोवत्स्यातिमत्स

बोले हे बृहस्पतिकेपुत्र जिसतुझभक्तको देवयानी भजती है इससे तू सिद्धहो और इसमेरी संजीविनी विद्याको प्राप्तहोजा मेरे उदरमें प्राप्तहोकर ब्राह्मणके सिवाय दूसरा कोईभी जीवनेको समर्थ नहीं है इसहेतुसे तू इसमेरी विद्याको प्राप्तहोजा ५०।५४ मेरापुत्रहोकर तू मेरी कोषसे बाहर निकल अर्थात् मेरीकोखको फाड़कर जबबाहर होजाय तब तू मुझको जिलादीजो अब तू इसधर्मवतीविद्याको मेरे सकाशसे प्राप्तहोजा ५५ शौनकजीबोले–तब वह ब्राह्मणगुरूसे विद्याको प्राप्तहोकर उनकी कोखको विदीर्ण करके पूर्णमासी के चन्द्रमाके उदयके समान उदरको फाड़कर बाहर निकला ५६ फिर पड़ेहुए अपने गुरूको वह कचदेखके जिवाताभया और उस सिद्धविद्याको प्राप्तहोकर अपनेगुरू शुक्राचार्य्यजीसे यह वचनबोला–आप सम्पूर्ण निधिरूपहो वरदेनेवालोंमें श्रेष्ठ वरदहो ऐसे आपका जो गुरुभावसे आदरनहीं करतेहैं वह पापीपुरुष नरकगामी होकर भ्रष्टलोकोंको प्राप्तहोते हैं ५७।५८ शौनकजीबोले--कि सुरापानसे ठगेहुए शुक्रजी कचको प्राप्तकरके और कचके तपरूपी प्रभाव और रूपको देखके और मदिरा पानके मोहसे प्राप्तहुए क्रोधको जानके ५९ ब्राह्मणके हितकी इच्छाकरनेवाले शुक्रजी बड़ेक्रोध पूर्वक मदिराको उठाकर और मदिरामें बड़ी शंका करके यह वचनबोले ६० अर्थात् शुक्रजीने कहा कि अबसेलेकर जो कोई मन्दबुद्धी ब्राह्मण अज्ञानसेभी मदिरापीवेगा वहधर्मसे रहितहोकर ब्रह्महत्यावालाहोके इसलोक और परलोक दोनोंलोकोंमें निन्दितहोगा ६१ मैंने सम्पूर्ण लोकमें ब्राह्मणोंकेधर्मकी यह मर्य्यादा स्थापितकरदीहै इसगुरुओंकी आज्ञाको सन्त ब्राह्मणलोगजानें और देवताओंसमेत दैत्यभी इसवचनकोसुनें ६२ शौनकजीकहते हैं कि तपकरनेवालोंमें उत्तमअतुल तेजवाले शुक्रजी ऐसे अपने इसवचनको कहकर उन मूढबुद्धिवाले दैत्योंको बुलाके यह वचन बोले

मीपे। सञ्जीवनींप्राप्यविद्यांममायंतुल्यप्रभावोब्राह्मणोब्रह्मभूतः ६४ (शौनक उवाच) गुरोरुष्यसकाशेच दशवर्षशतानिसः। अनुज्ञातःकचोगन्तुमियेषत्रिदशालयम् ६५॥

इति श्रीमत्स्यपुराणे कचचरित्रे पञ्चविंशोध्यायः २५॥

(शौनक उवाच)समापितव्रतंतन्तु विसृष्टंगुरुणातदा। प्रस्थितंत्रिदशावासंदेवयानी दमब्रवीत् १ (देवयान्युवाच) ऋषेराङ्गिरसःपौत्र! वृत्तेनाभिजनेनच। भ्राजसेविद्यया चैव तपसाचदमेनच २ ऋषिर्यथाङ्गिरामान्यः पितुर्मममहायशाः।तथामान्यश्चपूज्यश्च ममभूयोबृहस्पतिः ३ एवंज्ञात्वाविजानीहि यद्ब्रवीमितपोधन!। व्रतस्थेनियमोपेते यथावर्त्ताम्यहंत्वयि ४ ससमापितविद्यो मांभक्तान्नत्यक्तुमर्हसि। गृहाणपाणिंविधिवन् मममन्त्रपुरस्कृतम् ५ (कच उवाच) पूज्योमानश्चभगवान् यथाममपितातव। तथा त्वमनवद्याङ्गि!पूजनीयतमामता ६ आत्मप्राणैःप्रियतमाभार्गवस्यमहात्मनः।त्वंभद्रे!धर्मतःपूज्या गुरुपुत्रसिदामम ७यथाममगुरुर्नित्यं मान्यःशुक्रःपितातव। देवयानि!तथैवत्वंनैवंमांवक्तुमर्हसि८ (देवयान्युवाच) गुरुपुत्रस्यपुत्रोमेनतुत्वमासिमेपितुः।तस्मान्मान्यश्चपूज्यश्च ममापित्वंद्विजोत्तम!९ असुरैर्हन्यमानेतु कचेत्वयिपुनःपुनः। तदाप्रभृतियाप्रीतिस्तां त्वमेवस्मरस्वमे १० सौहार्द्येचानुरागेच वेत्थमेभक्तिमुत्तमाम्। नमा

कि हे मूर्ख दैत्यो तुम सब सुनों मेरे समीप में यह मेरा शिष्य कच बसता है सो यह मुझसे संजीविनी विद्याको प्राप्तहोकर मेरेही समान तुल्य प्रभाववाला ब्राह्मण होगया है ६३। ६४ शौनकजी कहते हैं कि वह कच उन अपने गुरूके समीप सौ १०० वर्षतक निवास करके गुरूसे आज्ञा मांग स्वर्ग में आनेकी इच्छा करताभया ६५॥

इति श्रीमत्स्यपुराणभाषाटीकायां पंचविंशतितमोऽध्यायः २५॥

शौनकजी कहते हैं कि गुरूसे व्रतसमाप्त करके और आज्ञापाकर जबकच स्वर्गको जानेलगा तब देवयानी कचसे यह वचन बोली १ कि हे अंगिराऋषि के पौत्र आपके वृत्त कुल कान्ति विद्या तप और दम इत्यादिकों करके २ आपके पिता बृहस्पतिजी और उत्तम यशवाले पितामह अंगिराऋषि यह दोनों महायशवाले हैं मुझकोभी यह दोनों अपने पिताकेही समान मानने योग्य हैं हे तपोधन यह जानके मैं ऐसाविचार करतीहूं कि तेरेही साथमें मैं सदैव नियम व्रतमें स्थितरहूं ३। ४ आपसरीके विद्वान् समाप्तविद्यावाले होकर मुझको त्यागने के योग्य नहीं हो सोमन्त्र विधानकरके आप मेरे पाणिग्रहण अर्थात् मुझसे बिवाहकरने को योग्यहो ५ कचबोला कि तेरा पिता मेरे पिताके समान होकर गुरुरूपसे मुझको पूज्य और मान्यहै और हेउत्तमांगी उसीप्रकार तूभी मुझकोमाननीय होकर पूजनीय है हे भद्रेतू महात्मा भृगुजीको प्राणोंसेभी प्यारी है गुरुकी पुत्री है इसीसे धर्मकरके पूज्यहै ६। ७ तेरापिता महात्माभृगु मेरा पूज्यगुरुहै इस हेतुसे तू मुझसे ऐसा कहनेको योग्यनहीं है ८ देवयानीबोली–तुम बृहस्पतिजी के पुत्रहो मेरे पिताके पुत्रनहीं हो इसहेतुसे तुम मेरेभी मान्य और पूज्यहो ९ जब तुम दैत्योंसे मारेगयेथे तबसे लेकर अबतक जो आपमें मेरीप्रीतिहुईथी उसको आप स्मरण कीजिये १० प्यारमें और अनुराग में मेरी उत्तम भक्तिको आपजानों मुझ निरपराध

मर्हसिधर्मज्ञ ! त्यक्तुंभक्तामनागसम् ११ (कच उवाच) अनियोज्येनियोगेमां नियुनक्षिशुभव्रते ! । प्रसीदसुभ्रु ! मह्यन्त्वं गुरोर्गुरुतराशुभे ! १२ यत्रोषितंविशालाक्षि ! त्वया चन्द्रनिभानने । तत्राहमुषितोभद्रे ! कुक्षौकाव्यस्यभामिनि ! १३ भगिनीधर्म्मतोमे त्वं मैवंवोचःशुभानने ! । सुखेनाध्युषितोभद्रे ! नमन्युर्विद्यतेमम १४ आपृच्छेत्वांगमिष्यामि शिवमस्त्वथमेपथि । अविरोधेनधर्मस्य स्मर्तव्योऽस्मिकथान्तरे १५ अप्रमत्तोद्यतानित्य माराधयगुरुंमम। (देवयान्युवाच) दैत्यैर्हतस्त्वंयद्भर्तृबुद्ध्यात्वंरक्षितोमया १६ यदिमांधर्म्मकामार्थां प्रत्याख्यास्यसिधर्म्मतः । ततःकच ! नतेविद्या सिद्धिरेषागमिष्यति १७ (कच उवाच) । गुरुपुत्रीतिकृत्वाहं प्रत्याख्यास्येनदोषतः । गुरुणाचाभ्यनुज्ञातः काममेवंशपस्वमाम् १८ आर्षधर्मंब्रुवाणोऽहं देवयानि ! यथात्वया । शप्तुंनार्होऽस्मि कल्याणि ! कामतोऽद्यचधर्म्मतः १९ तस्माद्भवत्यायःकामो नतथासंभविष्यति । ऋषिपुत्रोनतेकश्चित् जातुपाणिंग्रहीष्यति २० फलिष्यतिनमेविद्या त्वद्वचश्चेतितत्तथा अध्यापयिष्यामिचयं तस्यविद्याफलिष्यति २१ (शौनक उवाच) एवमुक्त्वानृपश्रेष्ठ ।! देवयानींकचस्तदा । त्रिदशेशालयंशीघ्रं जगामद्विजसत्तमः २२ तमागतमभिप्रेक्ष्य देवाःसेन्द्रपुरोगमाः । बृहस्पतिंसभाज्येदं कचमाहुर्मुदान्विताः २३ (देवा ऊचुः) त्वंकचास्मद्धितंकर्म्म कृतवान्महदद्भुतम् । नतेयशःप्रणशिता भागभाक्चभविष्यसि २४ ॥

इति श्रीमत्स्यपुराणेकचस्वर्गागमनवर्णनोनामषड्विंशोऽध्यायः २६ ॥

भक्तिकरनेवाली को आप त्यागने को योग्यनहीं हो ११ कचबोला—हे सुव्रते विना युक्त करनेवाले नियोगमें मुझको तू नियुक्तकरती है हे शुभे तू गुरूसे गुरुतरा है इसहेतुसे प्रसन्नहो १२ हे चन्द्रकान्तिवाली भामिनी जहाँतैंने बासकियाथा वहाँही अर्थात् शुक्रजी के उदरमें मैंनेभी बासकरलियाहै १३ हे शुभानने इसहेतुसे तू मेरी धर्मसे बहिनहै मैंने सुखपूर्व्वक यहाँ बासकियाहै कुछ मेराअपराधभी नहीं है १४ अबमैं तुझसे आज्ञालेकर गमन करताहूं मेरे मार्गमें सुखरहे धर्मके विरोधसे रहित किसी प्रयोजन में मेरा स्मरण करना तुझको योग्यहै १५ मदसे रहित सदैव उद्योगमें तत्परहोके तुझको प्रीतिपूर्व्वक मेरे गुरूका आराधन करनायोग्य है देवयानीबोली—जब तुमको दैत्योंने माराथा तबमैंने अपने भर्त्ताकीही बुद्धिसे तुम्हारी रक्षाकीथी १६ अब जो तुम धर्म कामके निमित्त वृथा त्यागकरतेहो इसीसे यह विद्या तुमको सफलन होवेगी १७ कचबोला तुझको गुरुकी पुत्रीजानकर मैंने तेरात्याग कियाहै कुछ दोपसे नहीं कियाहै मैं गुरूसे आज्ञालेकर जाताहूं मुझको क्यों शापदेती है १८ हेदेवयानी मुझ आर्प धर्मके कहनेवाले को कामसे और धर्मसे तू शापदेनेको योग्यनहीं है और जो कि तैंने मुझे शापदिया है इसहेतुसे तैंने जो यह कामना विचारी है सो संपूर्ण न होगी ऋपिका पुत्र होकर कोई भी तुझको ग्रहण नकरेगा १९।२० और मेरी विद्या तेरे वचनसे नहीं फलेगी परन्तु जिसको मैं पढ़ाऊंगा उसको यह विद्या अवश्य फल देवेगी २१ शौनक जी कहते हैं—हे राजन् वह कच देवयानी से ऐसा कहकर शीघ्रही स्वर्ग्ग में जाताभया तब इन्द्रादिक सब देवता उस आयेहुए कचको देखकर बड़े प्रसन्नहोकर उससे बोले २२।२३ देवताओं ने कहा हे कच तुमने हमारे हितकं

(शौनक उवाच)। कृतविद्ये कचेप्राप्ते हृष्टरूपादिवौकसः । कचादवेत्यतांविद्यां कृतार्थाभरतर्षभ ! १ सर्वएवसमागम्य शतक्रतुमथाब्रवन् । कालस्त्वद्विक्रमस्याद्य जहिशत्रून्पुरन्दर ! २ एवमुक्तस्तुसहितैस्त्रिदशैर्मघवांस्तदा । तथेत्युक्त्वोपचक्राम सोपश्यद्विपिनेस्त्रियः ३ क्रीडन्तीनान्तुकन्यानां वनेचैत्ररथोपमे । वायुर्भूतःसवस्त्राणि सर्वाण्येव व्यमिश्रयत् ४ ततोजलात्समुत्तीर्य्य ताःकन्याःसहितास्तदा । वस्त्राणिजगृहुस्तानि यथासंस्थान्यनेकशः ५ तत्रवासोदेवयान्याः शर्मिष्ठाजगृहेतदा । व्यतिक्रममजानन्ती दुहितावृषपर्वणः ६ ततस्तयोर्मिथस्तत्र विरोधःसमजायत । देवयान्याश्चराजेन्द्र ! शर्मिष्ठायाश्चतत्कृते ७ (देवयान्युवाच) कस्माद्गृह्णासिमेवस्त्रं शिष्याभूत्वाममासुरि ! । समुदाचारहीनाया नतेश्रेयोभविष्यति ८ (शर्मिष्ठोवाच) आसीनञ्चशयानञ्च पिता तेपितरंमम । स्तौतिपृच्छतिचाभीक्ष्णं नीचस्थःसुविनीतवत् ९ याचतस्त्वञ्चदुहिता स्तुवतःप्रतिगृह्णतः । सुताहंस्तूयमानस्य ददतोनतुगृह्णतः १० अनायुधासायुधायाः किन्त्वंकुप्यसिभिक्षुकि ! । लप्स्यसेप्रतियोद्धारं नचत्वांगणयाम्यहम् ११ (शौनक उवाच) साविस्मयंदेवयानीं गतांसक्ताञ्चवासासि । शर्मिष्ठाप्राक्षिपत्कूपे ततःस्वपुरमाविशत् १२ हतेयमितिविज्ञाय शर्मिष्ठापापनिश्चया । अनवेक्ष्यययौतस्मात् क्रोधवे

निमित्त बड़ा अद्भुतकर्म कियाहै इसीसे तुम्हारायश कभी नष्ट न होगा तुम्हारायश अत्यन्त उत्तमता से प्राप्तहोकर फैलेगा २४ ॥ इति श्रीमत्स्यपुराणभाषाटीकायांषड्विंशतितमोऽध्यायः २६ ॥

शौनकजीबोले–हे भरतर्षभ फिर विद्या प्राप्तकरके आयेहुए कचको देखकर देवता लोग बड़ीप्रसन्नतासे उससेमिले और उसविद्याको कचसे ग्रहणकरके अत्यन्त कृतार्थ होतेभये १ और फिर सब मिलके इन्द्रसे बोलतेभये कि हे इन्द्र इसकालमें अबतू शत्रुओंकोमार देवताओंके इसवचनको सुनतेही इन्द्रने उसी समय यात्राकरी वहाँसे चलकर इन्द्र गह्वरवनमें स्त्रियोंको देखताभया और कुबेरकेवनमें क्रीड़ाकरतीहुईं के समान बहुतसी कन्याओंकोभी देखताभया उसके देखनेकेही समय वायुने अपनेवेगसे उनके सबवस्त्रोंको मिलादिया २।४ तबवह कन्या एकबारही जलसेनिकसकर जैसेकेतैसेही धरेहुए अपने वस्त्रोंको धारण करतीभईं तब देवयानीके वस्त्रोंको वृषपर्वाकी पुत्री शर्मिष्ठा विना जाने लेलेतीभई तब उस शर्मिष्ठा और देवयानीका परस्पर बड़ाविरोध होताभया ५।७ देवयानीकहने लगी कि हे आसुरी तू मेरी दासीहोके मेरेवस्त्रोंको कैसे ग्रहण करती है हे आचारसे हीन होनेवाली तेरा कल्याण नहीं होवेगा तब शर्मिष्ठा बोली कि तेरापिता बैठे वा सोते सबदशा में मेरे पिताकोही नीतिसे बारम्बार स्तुति करताहै ८।९ सो उस मांगनेवाले स्तुति करनेवाले और ग्रहण करनेवाले ऐसे अपने पिताकी तू पुत्री है और स्तुति करने के योग्य दानदेनेवाले और मैं किसी से किसी वस्तु की याचना न करनेवाले अपनेपिताकी पुत्री हूं १० तू अनायुधा होकर मुझ शस्त्र बाण रखनेवाली से क्या क्रोध करती है हे भिक्षुकी मैं तुझको कुछभी नहीं गिनतीहूं ११ शौनकजी कहते हैं कि ऐसा कहकर वह शर्मिष्ठा बड़े आश्चर्य और क्रोधमें युक्त वस्त्रोंको ग्रहण करतीहुई देवयानीको एक कूपमें गिराकर अपने पुरमें आतीभई १२ अर्थात् पापमें निश्चय करनेवाली शर्मिष्ठा ने अपने चित्तमें यह वि-

गपरायणा १३ अथतंदेशमभ्यगाद्ययातिर्नहुषात्मजः । श्रान्तयुग्मःश्रान्तरूपो मृगलि
प्सुःपिपासितः १४ नाहुषिःप्रेक्ष्यमाणोहि सनिपानेगतोदके। ददर्शकन्यांतांतत्र दीप्ताम
ग्निशिखामिव १५ तामपृच्छत्सदृष्ट्वैव कन्याममरवर्णिनीम् । सान्त्वयित्वानृपश्रेष्ठः सा
म्नापरमवल्गुना १६ कात्वञ्चारुमुखीश्यामा सुमृष्टमणिकुण्डला । दीर्घंध्यायसिचात्यर्थं
कस्माच्छ्वसिषिचातुरा १७ कथञ्चपतिताह्यस्मिन् कूपेवीरुत्तृणावृते। दुहिताचैवकस्यत्वं
वदसर्वंसुमध्यमे! १८ (देवयान्युवाच) योऽसौदेवैर्हतान् दैत्यानुत्थापयातिविद्यया । त
स्यशुक्रस्यकन्याहन्त्वंमांनूनंनबुध्यसे १९ एषमेदक्षिणोराजन्!पाणिस्ताम्रनखाङ्गुलिः ।
समुद्धरगृहीत्वामांकुलीनस्त्वंहिमेमतः २०जानामित्वाञ्चसंशान्तंवीर्य्यवन्तंयशस्विनम्।
तस्मान्मांपतितांकूपादस्मादुद्धर्तुमर्हसि २१ (शौनक उवाच) तामथब्राह्मणींस्त्रींच वि
ज्ञायनहुषात्मजः। गृहीत्वादक्षिणेपाणावुज्जहारततोबलात् २२ उद्धृत्यचैनान्तरसा त
स्मात्कूपान्नराधिपः । आमन्त्रयित्वासुश्रोणीं ययातिःस्वपुरंययौ २३ (देवयान्युवाच) त्व
रितंघूर्णिकेगच्छसर्वमाचक्ष्वमेपितुः । नेदानींतुप्रवेक्ष्यामि नगरंवृषपर्वणः २४ (शौनक
उवाच) सातुवैत्वरितंगत्वा घूर्णिकासुरमन्दिरम् । दृष्ट्वाकाव्यमुवाचेदं कम्पमाना
विचेतना २५ आचख्यौचमहाभागा देवयानीवनेहता । शर्मिष्ठयामहाप्राज्ञ ! दुहित्रा
वृषपर्वणः २६ श्रुत्वादुहितरंकाव्यस्तदा शर्मिष्ठयाहताम् । त्वरयानिर्ययौदुःखात् मा

चारलिया कि देवयानी मरगई ऐसा विचार क्रोधमें तत्परहो वहांसे अपने पुरको आतीभई १३ इस
के पीछे उसकुएपर नहुषकापुत्र ययाति जलपीने के निमित्त आताभया तब वहराजा कुएमें झाँकने
लगा तो उस कुएमें अग्निके समान कान्तिवाली कन्याको देखताभया १४।१५ और उसे देखतेही
उसको उसीजगह धीरज दिलाके यह परमप्रिय बाणीबोला १६ कि हे सुन्दर मुखवाली उत्तम मणि-
मय कुण्डलादि भूषणधारी और षोड़शबार्षिकी ऐसी तू होकर इस कूपमें किसहेतुसे कष्टको प्राप्त
होरही है और तृण घास आदिसे आवृतहुए कूपमें तू कैसे गिरगई है और हे सुमध्यमे तू किसकी पुत्री
है यह सब वृत्तान्त अपना मुझसे कह तब देवयानी बोली जो अपनी विद्या करके दैत्योंको जीव-
दान देते हैं उन शुक्रजीकी मैं पुत्रीहूं तुम मुझको अच्छीरीतिसे नहीं जानतेहो १७। १९ हे राजन्
तुम मेरे इस दक्षिणहाथको अँगुलियों समेत ग्रहणकरके बाहर निकासके ग्रहणकरो और तुम उत्तम
कुलवाले होकर मेरे योग्यहो २० हे सुन्दरयश बल वीर्य्य शान्तस्वरूप तुमको मैं जानतीहूं इसहेतु
से आप मुझ कूपमें गिरीहुईका उद्धारकरनेको योग्यहो २१ शौनकजी कहतेहैं कि वह राजाययाति उस
स्त्रीको ब्राह्मणकी पुत्री जानके उसका दाहिनाहाथ पकड़कर अपने बलसे उसको उस कूपसे बाहर
निकालताभया २२ उसको निकालकर उससे बहुतसी सलाहकरके राजाययाति अपने पुरमें आता
भया २३ फिर देवयानी अपनी एक घूर्णिका सखीसे कहनेलगी कि हे सखि घूर्णिके तू शीघ्रहीजाकर
मेरे पितासे यह सब वृत्तान्त कहदे अब मैं वृषपर्वा राजाके नगरमें कभी न जाऊंगी २४ शौनकजी
कहते हैं कि वह घूर्णिका शीघ्रही शुक्रजीके मन्दिरमें जाकर कांपतीहुई शुक्रजीसे यह बचनबोली २५
हे महाप्राज्ञवृषपर्व्वाराजाकी पुत्री शर्मिष्ठाने देवयानीको हतकरदिया २६ तब शुक्रजी शर्मिष्ठाकरके

र्गमाणःसुतांवने २७ दृष्ट्वादुहितरंकाव्यो देवयानींतपोवने। बाहुभ्यांसंपरिष्वज्य दुःखि
तोवाक्यमब्रवीत् २८ आत्मदोषैर्नियच्छन्ति सर्वेदुःखसुखेजनाः । मन्येदुश्चरितंतास्मि
न् तस्येयंनिष्कृतिःकृता २९ (देवयान्युवाच) निष्कृतिर्वास्तुवामास्तुशृणुष्वावहि
तोमम । शर्मिष्ठयायदुक्तास्मि दुहित्राद्वृषपर्वणः ३० सत्यंकिलैतत्साप्राह दैत्यानामस्मि
गायनाएवंहिमेकथयतिशर्मिष्ठावार्षपर्वणी ३१ वचनन्तीक्ष्णपरुषं क्रोधरक्तेक्षणाभृशम् ।
स्तुवतोदुहितासित्वंयाचतःप्रतिगृह्णतः ३२ सुताहंस्तूयमानस्यददतोऽप्रतिगृह्णतः ।
इतिमामाहशर्मिष्ठा दुहितावृषपर्वणः। क्रोधसंरक्तनयना दर्पपूर्णाननाततः ३३ यद्यहं
स्तुवतस्तातदुहिताप्रतिगृह्णतः । प्रसादयिष्येशर्मिष्ठामित्युक्ताहिसखीमया ३४ (शुक्र
उवाच) स्तुवतोदुहितानत्वंभद्रे ! नप्रतिगृह्णतः । अतस्त्वंस्तूयमानस्य दुहितादेव
यान्यसि ३५ वृषपर्वैवतद्वेद शक्रोराजाचनाहुषः । अचिन्त्यंब्रह्मनिर्द्वन्द्वमैश्वरंहि
बलंमम ३६ ॥ इति श्रीमत्स्यपुराणे शुक्रात्मजोपाख्याने सप्तविंशोऽध्यायः २७॥
(शुक्रउवाच) यःपरेषांनरोनित्यमतिवादांस्तितिक्षते । देवयानि ! विजानीहितेनसर्व
मिदञ्जितम् १ यःसमुत्पतितंक्रोधं निगृह्णातिहयंयथा। संयंतेत्युच्यतेसद्भिर्नयोरश्मिषु
लम्बते २ यःसमुत्पतितंक्रोधमक्रोधेननियच्छति । देवयानि!विजानीहितेनसर्वमिदञ्जि

हतहुई अपनी पुत्री को सुनकर शीघ्रही दुःख से युक्तहोके वनमें अपनी पुत्री के ढूंढ़ने को आतेभये
२७ फिर उस तपोवनमें शुक्रजी अपनी पुत्री देवयानी को देखकर अपनी भुजाओं से मिल बड़े दु-
खितहोके यह वचनबोले कि संपूर्णजन अपनेही दोषों करके सुख दुःखादि को प्राप्तहोते हैं इसहेतु
से इसदुष्टाचरणकोभी मैं उन्हीं दोषों में जानताहूं और उसशर्मिष्ठा ने यह तेरे अपराधका प्राय-
श्चित्त किया है २८ । २९ देवयानी ने कहा पापकाप्रायश्चित्त होय वा नहो परन्तु वृषपर्वाकी पुत्री
ने जो मुझसे कहा है सो सुनो ३० जो उसने कहाहै सो सत्यही कहा है क्योंकि मैं दैत्यों के घर
में गानकरनेवालीहूं यही उसने कहाहै ३१ और यहभी उसने कहा है कि मैं दान देनेवाले स्तुति
के योग्य ऐसेराजाकी पुत्रीहूं यहहास्यसे नहीं कहा किन्तु वृषपर्वा की पुत्री ने बड़े क्रोधसे लाल
नेत्रकर बड़े अभिमानभरे पूर्णमुख से कहाहै —हेतात तब मैंने शर्मिष्ठासे यह वचन कहा है कि जो
मैं स्तुतिकरनेवाले की पुत्रीहूंगी तो तुझकोभी मैं स्तुतिकरके प्रसन्नकरूंगी ३२ । ३४ शुक्राचार्य्य
ने कहा हेभद्रे तू स्तुतिकरनेवाले और प्रतिग्रहलेनेवाले की पुत्री नहीं है किन्तु स्तुतिकरने के
योग्य की पुत्री है ३५ इसबातको वृषपर्वा राजा और ययातिराजा यहदोनों जानते हैं कि अ-
चिन्त्य निर्द्वन्द्व ब्रह्मऐश्वर्य्य मेराबलहै ३६ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांसप्तविंशतितमोऽध्यायः २७ ॥

शुक्रजीबोले हे देवयानी जोमनुष्य अन्यलोगोंके विवाद वचनोंको सहताहै उसने मानों यहसब
जगत् जीतलियाहै ऐसाजानो १ जो मनुष्य उत्पन्नहुए क्रोधको लगामसे घोड़ेके समानरोकलेताहै
ऐसेमनुष्यको श्रेष्ठलोगोंने क्रोधकासंयन्ता वर्णन कियाहै २ जो मनुष्य प्राप्तहुए क्रोधको क्षमाकरके
शान्तकरताहै उसनेभी इसजगत्को जीताहै ऐसे निश्चयजानो जैसे कि सर्प अपनी कांचलीकोत्या-

तम् ३ यःसमुत्पतितंकोपं क्षमयैवनिरस्यति।यथोरगस्त्वचंजीर्णां सवैपुरुषउच्यते४यस्तु
भावयतेधर्मं योतिमात्रन्तितिक्षति । यश्चतप्तोनतपति भृशंसोऽर्थस्यभाजनम् ५ योय
जेदश्वमेधेन मासिमासिशतंसमाः । यस्तुकुप्येन्नसर्वस्य तयोरक्रोधनोवरः ६ येकुमाराः
कुमार्यश्च वैरंकुर्युरचेतसः । नैतत्प्राज्ञस्तुकुर्वीत विदुस्तेनबलाबलम् ७ (देवयान्युवाच)
वेदाहन्तात ! बालापि कार्याणान्तुगतागतम् । क्रोधेचैवातिवादेवा कार्यस्याऽपिबलाब
ले ८ शिष्यस्याशिष्यवृत्तंहिनक्षन्तव्यंबुभूषुणा । असत्संकीर्णवृत्तेषु वासोममनरोचते ९
पुंसोयेनाभिनन्दन्ति वृत्तेनाभिजनेनच । नतेषुनिवसेत्प्राज्ञः श्रेयोऽर्थीपापबुद्धिषु १० ये
नैनमभिजानन्तु वृत्तेनाभिजनेनच । तेषुसाधुषुवस्तव्यं सवासःश्रेष्ठउच्यते ११ तन्मे
मथ्नातिहृदयमग्निकल्पमिवारणिम् । वाग्दुरुक्तंमहाघोरं दुहितुर्वृषपर्वणः १२ नह्यतो
दुष्करंमन्ये तातलोकेष्वपित्रिषु । यःसपत्नश्रियंदीप्तां हीनश्रीःपर्युपासते १३ ॥

इति श्रीमत्स्यपुराणे भृगुतनयोपाख्यानेऽष्टाविंशतितमोऽध्यायः २८ ॥

(शौनक उवाच) ततःकाव्योभृगुश्रेष्ठः समन्युरुपगम्यह । वृषपर्वाणमासीनमित्यु
वाचाविचारयन् १ नाधर्मश्चरितोराजन् ! सद्यःफलतिगौरिव । शनैरावर्त्यमानस्तु मू
लान्यपिनिकृन्तति २ यदिनात्मनिपुत्रेषु नचेत्पश्यतिनप्तृषु । पापमाचरितंकर्म त्रिवर्गं

गकरताहै उसीप्रकार जो क्षमाकरके अपने क्रोधको त्यागताहै वह महाउत्तम पुरुषकहाताहै ३ । ४
जो धर्मकी भावना करताहै वह सबप्राणीमात्रोंकी सहताहै—जो बहुतसा दुखितहोकर भी किसी
दूसरेको दुःखनहीं देताहै वह उत्तम अर्थकापात्र कहाताहै ५ जो प्रतिमास सैकड़ोंवर्ष पर्य्यन्त अश्वमेधयज्ञकरताहै
और दूसरा जो कोई पुरुष किसी पर क्रोध नहीं करताहै इनदोनोंमें यहीक्रोधनकरनेवालाही
श्रेष्ठहै ६ जैसे बालकअवस्थामें लड़का या लड़की अपनी मूर्खतासे शत्रुताकरते हैं वैसे
बुद्धिमान्जन बलाबल विचारकर वैरभाव नहीं करते ७ देवयानीबोली—हे तात मैंबालकभी होकर
क्रोध और अतिवादमें कार्य्यके बलाबलमें यथार्थ बातको जानतीहूं ८ उत्तम पुरुषको शिष्यके अयोग्याशिष्यके
समानकियेहुए वृत्तान्तको न सहना चाहिये इसहेतुसे दुष्टवृत्तान्तोंसे भरेहुए अन्तःकरण
वालोंमें मेरी वसनेकी इच्छा नहीं है उत्तम कुल और श्रेष्ठ आचरणवाले पुरुष जिस पुरुषकी प्रशंसा
नहीं करतेहैं ऐसेपापबुद्धिवाले बहुतसे पुरुषोंमें कल्याणकी इच्छा करनेवाला पुरुष नहीं वासकरे
९ । १० और जिनको उत्तम कुल और आचरणोंसे श्रेष्ठलोग उत्तमजानते हैं उनउत्तम पुरुषोंमें वासकरना
कहाहै ११ इसहेतुसे वृषपर्वाकी पुत्रीके कहेहुए घोर वचन मेरे हृदयको ऐसे मथन करतेहैं
जैसे अरणी नामतंत्र काष्ठमें अग्निको उत्पन्न करताहै १२ हे तात जो लक्ष्मीसेहीन पुरुष अग्नि के
समानप्रकाश मान शत्रुकी लक्ष्मीकी उपासना करताहै इस्से बढ़कर मेरी बुद्धिसे इससंसारमें दूसरा
बुराकर्मनहीं है॥ १३ इति श्रीमत्स्यपुराणभाषाटीकायामष्टाविंशतितमोऽध्यायः २८ ॥

शौनकजी कहते हैं कि देवयानीकी इन बातोंको सुनकर शुक्रजी क्रोधयुक्तहो सिंहासनपर बैठे हुए
राजा वृषपर्वा से यह वचन बोले १ हेराजन् अधर्मका आचरण करनेवाला पुरुष तत्कालनहीं दण्डरूप
भोगकोपाता है वह ऐसे मूलसमेत नाशहोता है जैसे कि गौका अपराध करनेवाला जड़ मूल

मतिवर्तते ३ फलत्येवंध्रुवंपापं गुरुभुक्तमिवोदरे । यदाघातयसेविप्रं कचमाङ्गिरसन्तदा ४ अपापशीलंधर्म्मज्ञं शुश्रूषुंमद्गृहेरतम् । बधादनर्हतस्तस्य बधाच्चदुहितुर्मम ५ वृषपर्वन्निबोधत्वं त्यक्ष्यामित्वांसबान्धवम् । स्थातुंत्वद्विषयेराजन् ! नशक्नोमित्वयासह ६ अद्यैवमभिजानामि दैत्यंमिथ्याप्रलापिनम् । यतस्त्वमात्मनोदीर्णां दुहितांकिमुपेक्षसे ७ (वृषपर्वोवाच) नावद्यंनमृषावादं त्वयिजानामिभार्गव ! । त्वयिसत्यञ्चधर्म्मश्च तत्प्रसीदतुमांभवान् ८ अद्यास्मानपहायत्वमितोयास्यसिभार्गव ! । समुद्रंसम्प्रवेक्ष्यामि नान्यदस्तिपरायणम् ९ (शुक्र उवाच) समुद्रंप्रविशध्वंवा दिशोवाव्रजतासुराः ! दुहितुर्नाप्रियंसोढुं शक्तोऽहंदयिताहिमे १० प्रसाद्यतांदेवयानी जीवितंयत्रमेस्थितम् । योगक्षेमकरस्तेऽहामिन्द्रस्येवबृहस्पतिः ११ (वृषपर्वोवाच) यत्किञ्चिदसुरेन्द्राणां विद्यतेवसुभार्गव ! । भुविहस्तिरथाश्वंवा तस्यत्वंममचेश्वरः १२ (शुक्र उवाच) यत्किञ्चिदस्तिद्रविणं दैत्येन्द्राणांमहासुर!।तस्येश्वरोऽस्मियद्येतद्देवयानि!प्रसाद्यताम् १३ ॥ (शौनक उवाच) ततस्तुत्वरितःशुक्रस्तेनराज्ञासमंययौ । उवाचचैनांसुभगे ! प्रतिघन्नवचस्तव १४ (देवयान्युवाच) यदित्वमीश्वरस्तात ! राज्ञोवित्तस्यभार्गव ! । नाभिजानामितत्तेऽहं राजावदतुमांस्वयम् १५ (वृषपर्वोवाच) यंकाममभिजानासि देवया

समेत नष्टहोजाता है २ जो राजा अपने पुत्र पौत्र और पुत्री आदिके अपराधोंको नहीं देखताहै उसके त्रिवर्ग अर्थात् अर्थ धर्म और काम यह तीनों नष्टहोजाते हैं ३ जब तुमने अंगिरसके पौत्र बृहस्पति के पुत्रको मारा और फिर दूसरीवार उसको चूर्णकरके गुरूके उदरमें प्राप्तकरादिया वह पाप अपना फल अवश्यकरेगा हे राजा निष्पाप महाधर्मज्ञ मेरे घरमें शुश्रूषा करनेवाले ऐसे अबध्य मेरे शिष्यके बधके योगसे और मेरीपुत्री के भी बधकेयोगसे मैं तुझको बांधवों समेत त्यागताहूं तेरे संग इसराज्यमें ठहरनेके योग्य नहींहूं ४।६ जो कि तू अपनी दुष्ट पुत्रीको नहीं जानता इसी से तुझ मिथ्या बोलनेवाले दैत्यको मैंभी नीचजानताहूं-वृषपर्वाबोला-हे भार्गवजी आपका कहनामें असत्य और अयोग्य नहीं मानताहूं आपके सत्य धर्मको मैं अच्छीरीतिसे जानताहूं इस हेतुसे आप मुझपर प्रसन्न हूजिये जो आपही मुझको त्यागकर जाओगे तोमैं समुद्रमें डूबजाऊंगा आपके सिवाय मेराकोई रक्षक नहीं है ७.।९ शुक्रजीने कहा-किचाहै तुम समुद्रमें डूबो अथवा दिशाओंको जाओ परन्तुमुझको अपनी पुत्री बड़ी प्यारीहै उसका अप्रिय मैं नहीं सहसका १० तुम देवयानी को प्रसन्नकरो जहाँ वहरहैगी वहीं मेरीभी स्थितिरहैगी जो उसकी प्रसन्नता करोगे तो जैसे बृहस्पतिजी इन्द्रादिक देवताओंकी कुशल रखते हैं उसी प्रकार मैंभी तुम्हारी रक्षाकरूंगा वृषपर्वाने कहा हेभार्गवजी दैत्योंका जो गज रथ और अश्वादिक सबद्रव्यहै अथवा जो मेराद्रव्य है उस सबके आप मालिक हैं-शुक्रजी ने कहा-हेमहाअसुर जो आप देवयानीको प्रसन्नकरोगे तो हम दैत्योंके द्रव्यके आधिपति रहेंगे ११।१३ शौनकजी कहते हैं-यह बात सुनतेही वृषपर्व्वा शुक्रजी समेत देवयानी के प्रसन्न करने के लिये यह वचन बोला हे देवयानी शुक्रजी सब दैत्यों समेत मेरे सब द्रव्योंके स्वामी हैं तुम प्रसन्न होजाओ-देवयानी ने अपने पितासे कहा कि हेतात आप राजाकेद्रव्यके मालिकहो इसबातको मैं

नि ! शुचिस्मिते ! । तत्तेऽहंसम्प्रदास्यामियद्यपिस्यात्सुदुर्लभम् १६ (देवयान्युवाच) दासींकन्यासहस्रेण शर्मिष्ठामभिकामये । अनुयास्यतिमांतत्र यत्रदास्यतिमेपिता १७ (वृषपर्वोवाच) उत्तिष्ठधात्रि ! गच्छत्वं शर्मिष्ठांशीघ्रमानय । यञ्चकामयतेकामं देवयानीकरोतुतम् १८ (शौनक उवाच) ततोधात्रीतत्रगत्वा शर्मिष्ठामिदमब्रवीत् । उत्तिष्ठभद्रे ! शर्मिष्ठे ! ज्ञातीनांसुखमावह १९ त्यजतिब्राह्मणःशिष्यान् देवयान्याप्रचोदितः । यंसाकामयतेकामं सकार्योऽद्यत्वयानघे ! । दासीत्वमभिजातासि देवयान्याःसुशोभने ! २० (शर्मिष्ठोवाच) यंचकामयतेकामं करवाण्यहमद्यतम् । मागान्मन्युवशंशुक्रो देवयानीचमत्कृते २१ (शौनकउवाच) ततःकन्यासहस्रेण वृताशिविकयातदा । पितुर्निदेशात्त्वरिता निश्चक्रामपुरोत्तमात् २२ (शर्मिष्ठोवाच) अहंकन्यासहस्रेण दासीतेपरिचारिका । ध्रुवंत्वांतत्रयास्यामि यत्रदास्यतितेपिता २३ (देवयान्युवाच) स्तुवतोदुहिताचाहंयाचतःप्रतिगृह्णतः । स्तूयमानस्यदुहिता कथंदासीभविष्यसि २४ (शर्मिष्ठोवाच) येनकेनचिदार्तानांज्ञातीनांसुखमावहेत् । अनुयास्याम्यहन्तत्र यत्रदास्यतितेपिता २५ (शौनक उवाच) प्रतिश्रुतेदासभावे दुहित्रावृषपर्वणः । देवयानीनृपश्रेष्ठ पितरंवाक्यमब्रवीत् २६ प्रविशामिपुरन्तात तुष्टास्मिद्विजसत्तम ! । अमोघंतवविज्ञान

नहीं जानती मुझको आप राजा कहो यहसुनकर वृषपर्व्वाने कहा हे देवयानी जिस कामनाको तू चाहती है वह चाहै कैसाभी दुर्लभहोय मैं तुझको अवश्य दूंगा देवयानीने कहा कि जो तुम दुर्लभ भी देनेको कहतेहो तो हज़ार कन्याओं समेत शर्मिष्ठा मेरी दासीरहै और मेरा पिताजिसको मुझेदे वहां यह सबदासियों समेत मेरी दासीहोकर संगजाय १४।१७ वृषपर्वा बोला-हेधात्रि तू शीघ्रही शर्मिष्ठाको लेआ यह देवयानी जिस कामनाको चाहती है वही मैं करूंगा-शौनकजी कहतेहैं कि राजाकी आज्ञा पातेही वह धात्री शर्मिष्ठाके पास जाकर यह वचनबोली कि हेशर्मिष्ठे उठकर ज्ञातिबांधवोंको प्रसन्नकर १८।१९ क्योंकि देवयानी से प्रेरित कियेहुए शुक्राचार्य्यजी अपने शिष्योंको त्यागते हैं और देवयानी जिसबातको चाहती है वह तेरेही करके हैं तू देवयानीकी दासी होगई है २० शर्मिष्ठाबोली जो काम वह चाहती है सो मैंकरूंगी शुक्राचार्य्य और देवयानीक्रोधयुक्त न होंय २१ शौनकजी कहते हैं कि तब पिताकी आज्ञासे शर्मिष्ठा हज़ारों कन्याओं से युक्तहो डोली में बैठ देवयानी के पास आई २२ और वहाँ आकर बोली कि हे देवयानी मैं हज़ारकन्याओंसमेत तेरी सेवाकरनेवालीदासी हूं और जहाँ तेरापिता तुझको देगा वहाँ मैंचलूंगी २३ देवयानी बोली—स्तुति करनेवाले मांगनेवाले और प्रतिग्रह लेनेवाले ऐसे भिक्षुककी मैं पुत्रीहूं और तू स्तुतिमान् राजाकी पुत्री होकर कैसे दासी होगी २४ शर्मिष्ठा बोली--जिस किसी उपायसे हमारे पीड़ितहुये बांधव सुखको प्राप्तहोयँ सोई मुझको कर्त्तव्यहै इसी से मैं तेरे पीछे चलूंगी और जहां तेरापिता तुझेदेगा वहाँभी साथमें चलूंगी २५ शौनक बोले कि वृषपर्वा राजाकी पुत्रीने जब दासीहोनेकी प्रतिज्ञा करली तब देवयानी अपनेपिता से यहवचनबोली २६ हेतात मैं प्रसन्न होगईहूं तेरा विज्ञान बड़ा अमोघ है और विद्याका बल भी

मस्तिविद्याबलंचते २७ एवमुक्तोद्विजश्रेष्ठो दुहित्रासुमहायशाः । प्रविवेशपुरंहृष्टः पूजि
तःसर्वदानवैः २८ ॥ इति श्रीमत्स्यपुराणे एकोनत्रिंशोऽध्यायः २९ ॥

(शौनक उवाच) अथदीर्घेणकालेन देवयानीनृपोत्तम ! । वनंतदेवनिर्याता क्रीडा
र्थंवरवर्णिनी १ तेनदासीसहस्रेण सार्धंशर्मिष्ठयातदा । तमेवदेशंसम्प्राप्ता यथाकामंच
चारसा २ ताभिःसखीभिःसहिताः सर्वाभिर्मुदिताभृशम् । क्रीडन्त्योऽभिरताःसर्व्वाः
पिबन्त्योमधुमाधवम् ३ खादन्त्योविविधान्भक्ष्यान् फलानिविविधानिच । पुनश्चना
हुषोराजा मृगलिप्सुर्यदृच्छया ४ तमेवदेशंसंप्राप्तो जललिप्सुःप्रतर्षितः । ददर्शदेव
यानीञ्च शर्मिष्ठान्ताश्चयोषितः ५ पिबन्त्योललनास्ताश्च दिव्याभरणभूषिताः उप
विष्टाञ्चददृशे देवयानींशुचिस्मिताम् ६ रूपेणाप्रतिमांतासां स्त्रीणांमध्येवराङ्गनाम् ।
शर्मिष्ठयासेव्यमानां पादसम्बाहनादिभिः ७ (ययातिरुवाच) द्वाभ्यांकन्यासहस्राभ्यां
द्वेकन्येपरिवारिते । गोत्रेचनामनीचैव द्वयोःपृच्छाम्यतोह्यहम् ८ (देवयान्युवाच)
आख्यास्याम्यहमादत्स्व वचनंमेनराधिप! ।शुक्रोनामासुरगुरुःसुतांजानीहितस्यमाम् ९
इयंचमेसखीदासी यत्राहंतत्रगामिनी । दुहितादानवेन्द्रस्य शर्मिष्ठावृषपर्वणः १०
(ययातिरुवाच) कथंतुतेसखीदासी कन्येयंवरवर्णिनी । असुरेन्द्रसुतासुभ्रु ! परं

सफलहै अब मैं पुरमें प्रवेशकरूंगी २७ पुत्री के इसप्रकारके वचनोंको सुनकर शुक्राचार्य्यजी सब
दानवों से पूजितहो बड़ी प्रसन्नतासे पुरमें प्रवेश करतेभये २८ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायामेकोनत्रिंशोऽध्यायः २९ ॥

शौनकजी बोले—हे राजन् इसके पीछे बहुतकालमें वह देवयानी उसी वनमें फिर क्रीड़ाके निमित्त
जातीभई और शर्मिष्ठा समेत हज़ारों दासियों समेत उसबनमें इच्छापूर्व्वक विचरतीभई १।२
अर्थात् उन सबसखियोंसे युक्त अन्य बहुतसी स्त्रियोंके साथ क्रीड़ाके निमित्त वसन्तके पुष्पोंको ग्रह-
ण करतीभई और अनेक प्रकारके भक्षणकरने के फलादिक पदार्थोंको खातीभई फ़िर वहाँही इच्छा-
पूर्वक आखेट करनेकी इच्छासे राजा ययातिभी आताभया और फिर जलकी तृषासे वहाँ आकर
देवयानी और शर्मिष्ठादिक सबस्त्रियोंको देखताभया ३।५ उनमें सब आभूषणोंको धारणकिये सखियों
समेत बैठीहुई उत्तमरूपवाली शर्मिष्ठादिक दासियोंसे सेवित देवयानीकोदेखा ६।७ तबराजाययाति
पूछनेलगा कि दोहज़ार कन्याओंसे युक्त दोरूपगुणवाली कन्याहो मैं तुम्हारा गोत्रऔर नामपूछताहूं
देवयानी बोली हे राजन् मैं जो कहतीहूं उसको आप सुनिये मैंतोशुक्राचार्य्यकीपुत्रीहूं औरयहसखी
दानवेन्द्र वृषपर्वाकी पुत्री शर्मिष्ठा नामवाली मेरी दासी है जहां मैं जातीहूं तहांही यह जाती है इस
बातको सुनकर ययातिने कहा कि हेसुन्दरि यह राजाकी पुत्री होकर तेरी दासी कैसे होगई यह मुझे
बड़ा आश्चर्य्य है--देवयानी बोली हेराजन् यह सम्पूर्ण विधान ब्रह्माका कियाहुआहै इसमें आश्चर्य्य
मतकरो तुम राजाके समान उत्तमरूप वेषवाले होकर श्रेष्ठ मधुर वाणीको धारण करतेहो तुम्हारा
नाम क्याहै और आप किसके पुत्रहो यह सब हमसे भी कहो तब ययातिने कहा कि मैंने ब्रह्मचर्य्य
धारण करके सम्पूर्ण वेद पढ़ेहैं और नहुष राजाकापुत्र ययातिनाम राजाहूं—देवयानी बोली—हेराजन

कौतूहलंहिमे ११ (देवयान्युवाच) सर्वमेवनरव्याघ्र ! विधानमनुवर्तते । विधिनाविहितंज्ञात्वा माविचित्रंमनःकृथाः १२ राजवद्रूपवेषौते ब्राह्मींवाचंविभर्षिच । किंनामात्वंकुतश्चासि कस्यपुत्रश्चशंसमे १३ (ययातिरुवाच) ब्रह्मचर्येणवेदोमे कृत्स्नः श्रुतिपथंगतः । राजाहंराजपुत्रश्च ययातिरितिविश्रुतः १४ (देवयान्युवाच) केन चार्थेननृपते ! ह्येनंदेशंसमागतः । जिघृक्षुर्व्वारियत्किञ्चिदथवामृगलिप्सया १५ (ययातिरुवाच) मृगलिप्सुरहंभद्रे ! पानीयार्थमिहागतः । बहुधाप्यनुयुक्तोऽस्मि त्वमनुज्ञातुमर्हसि १६ (देवयान्युवाच) द्वाभ्यांकन्यासहस्राभ्यांदास्याशर्मिष्ठयासह । त्वदधीनास्मिभद्रंतेसखे ! भर्त्ताचमेभव १७ (ययातिरुवाच) विध्यौशनसिभद्रंते नत्वदर्होऽस्मिभामिनि !। अविवाह्याःस्मराजानोदेवयानि ! पितुस्तव १८ (देवयान्युवाच) संसृष्टंब्रह्मणाक्षत्रं क्षत्रंब्रह्माणिसंश्रितम् । ऋषिश्चऋषिपुत्रश्च नाहुषाद्यभजस्वमाम् १९ (ययातिरुवाच) एकदेहोद्भवावर्णाश्चत्वारोऽपिवरानने !। पृथक्धर्माःपृथक्शोचास्तेषांवैब्राह्मणोवरः २० (देवयान्युवाच) पाणिग्रहोनाहुषायं नपुंभिःसेवितःपुरा। त्वमेनमग्रहीदग्रे वृणोमित्वामहंततः २१ कथंतुमेमनस्विन्याः पाणिमन्यःपुमान्स्पृशेत् । गृहीतमृषिपुत्रेण स्वयंवाप्यृषिणात्वया २२ (ययातिरुवाच) क्रुद्धादाशीविषात्सर्पाज्ज्वलनात्सर्वतोमुखात् । दुराधर्षतरोविप्रः पुरुषेणविजानता २३ (देवयान्युवाच) कथमाशीविषात्सर्पाज्ज्वलनात्सर्वतोमुखात् । दुराधर्षतरोविप्र इत्यात्थपुरुषर्षभ २४ (ययातिरुवाच) दशेदाशीविषस्त्वेकं शस्त्रेणैकश्चवध्यते । हन्तिविप्रःसराष्ट्राणि पुराण्यपिहि

तुम किसप्रयोजनसे यहां आयेहो जलपीनेको आयेहो वा शिकारखेलनेको पधारेहो ८ । १५ ययाति बोला-हेभद्रे मैं शिकारखेलताहुआ यहां जलपीनेके निमित्त आयाहूं बहुतप्रकारसे तुझको प्राप्तहूं सो तुमआज्ञाकरनेको योग्यहो-देवयानीबोली हेसखे दोहज़ार कन्या और शर्मिष्ठादासीसे युक्त मैंआपके आधीनहूं आपमेरे भर्त्ताहूजिये ययातिबोला हेभामिनी तू शुक्राचार्य्यकी पुत्री है इससे हमारे योग्य नहींहै अर्थात् ब्राह्मणकी कन्याहोनेसे राजाओंके विवाहनेके योग्य नहीं है १६।१८ देवयानीबोली हे राजाब्रह्माजीने जो क्षत्त्रियरचेहैं वह सबब्राह्मणोंहीमें मिलेहुएहैं हे नहुषके पुत्र तुमऋषिके समानहो आप निस्सन्देह मुझकोवरो १९ ययातिबोला-हेवराननेचारोंवर्ण एकहीईश्वरके शरीरसेउत्पन्नहुएहैं परन्तु चारोंवर्णों के धर्म और आचरण जुदे२ हैं उन चारों में ब्राह्मण श्रेष्ठहैं २० देवयानी बोली हे नहुषनन्दन यह मेराहाथ अन्य पुरुषसे नहीं सेवित किया गयाहै और तुम इसहाथको पहले एक समय ग्रहण करचुकेहो इसीहेतुसे मैंतुमको वरतीहूं मुझ उत्तममनवालीके हाथको दूसरा कौनपकड़ सक्ताहै आप ऋषिकेही पुत्रहैं इसीसे आपने मेरा हाथ ग्रहण कियाथा २१ । २२ ययाति बोला-क्रोधयुक्त विषवाला सर्प और अग्नि-इन दोनोंके भी मुखसे अतिदुस्तर ब्राह्मण है यह ज्ञानवान् महात्मा पुरुषोंका कथनहै २३ देवयानी बोली-हे उत्तमपुरुष क्रोधयुक्त विषभरे सर्प और अग्नि इनके मुखसे अत्यन्त उग्र तुम ब्राह्मणको कैसे बतलातेहो २४ ययाति बोले-कि उग्र विषवाले सर्प के काटनेसे तथाशास्त्रके मारनेसे तो एकहीका विनाशहोताहै और क्रोधहुए ब्राह्मणसे तो राज्यसमेत

कोपितः २५ दुराधर्षतरोविप्रस्तस्माद्भीरु ! मतोमम । अतोदत्ताञ्चपित्रात्वां भद्रे !
नविवहाम्यहम् २६ (देवयान्युवाच) दत्तांवहस्वपित्रामां त्वंहिराजन्! वृतोमया। अया
चतोभयंनास्ति दत्ताञ्चप्रत्तिगृह्णतः २७ (शौनक उवाच) त्वरितंदेवयान्याथ प्रेषिता
पितुरात्मनः । सर्वंनिवेदयामास धात्रीतस्मैयथातथम् २८ श्रुत्वैवचसराजानं दर्शयामा
सभार्गवः । दृष्ट्वैवमागतंविप्रं ययातिःपृथिवीपतिः २९ ववन्देब्राह्मणंकाव्यं प्राञ्जलिः
प्रणतःस्थितः । तंचाप्यभ्यवदत्काव्यः साम्नापरमवल्गुना३० (देवयान्युवाच) राजायं
नाहुषस्तात दुर्गमेपाणिमग्रहीत् । नमस्तेदेहिमामस्मै लोकेनान्यंपतिंवृणे ३१ (शुक्र
उवाच) वृतोऽनयापतिर्वीर ! सुतयात्वंममेष्टया । गृहाणेमाम्मयादत्तां महिषींनहुषात्म
ज! ३२ (ययातिरुवाच) अधर्मोमांस्पृशेदेवं पापमस्याश्चभार्गव! वर्णसंकरतोब्रह्म
न्! इतित्वाम्प्रवृणोम्यहम् ३३ (शुक्र उवाच) अधर्मात्त्वाम्विमुञ्चामि वरंवरयचेप्सि
तम्। अस्मिन्विवाहेत्वंश्लाघ्यो रहोपापन्नुदामिते ३४ वहस्वभार्य्यान्धर्मेण देवयानीं
शुचिस्मिताम् । अनयासहसम्प्रीति मतुलांसमवाप्नुहि ३५ इयंचापिकुमारीति शर्मिष्ठा
वार्षपर्वणी । सम्पूज्यसन्ततंराजन् ! नचैनांशयनेह्वयः ३६ (शौनक उवाच) एवमुक्तो
ययातिस्तु शुक्रंकृत्वाप्रदक्षिणम् । जगामस्वपुरंहृष्टःसोऽनुज्ञातोमहात्मना ३७ ॥

इति श्रीमत्स्यपुराणेदेवयान्युद्वाहवर्णनोनामत्रिंशोऽध्यायः ३० ॥

देशभर नष्टहोजाताहै हेभीरु इसहेतुसे मैंने ब्राह्मणको दुराधर्षकहाहै सोतेरे पिताके दियेविंना मैं
तुझको नहीं विवाहसक्ता–देवयानीबोली–हेराजाजबमेरा पिताही मुझेतेरे अर्थदेगा तब. तोतुममुझ
से बिवाहकरोगे और तुमविनायाचना करनेवालेहो इससे प्रतिग्रहकाभी भयनहीं है मैंने तुमको वर
लियाहै २७ शौनकजी कहतेहैं कि इसके पीछे देवयानीकी भेजीहुई धात्रीनाम दूती शुक्राचार्य्य के
पासजाकर इस सबवृत्तान्तको कहतीभई २८ तब शुक्राचार्य्यजी इससबवृत्तान्तको सुनकर उसरा-
जाके पासआये और उसको देखकर प्रसन्नहुए और राजाभी उनके दर्शनकरके प्रसन्नहोता भया २९
और अंजलीबाँध खड़ाहोकर शुक्राचार्य्य को प्रणाम किया तबशुक्राचार्य्यजी भी बड़ी नम्रतापूर्वक
मधुरवाणीसे बोलते भये ३० तब देवयानी ने कहा कि हे तात इस राजाययाति ने प्रथम मेरा हाथ
ग्रहण करालियाहै इस हेतुसे इसराजाके अर्थही मुझे देदो मैं इसके सिवाय दूसरेको नहीं वरूंगी ३१
तब शुक्राचार्य्यजी बोले– हेनहुषके पुत्र राजा तुम मेरीपुत्रीसे पूर्व वरेहुयेहो इसीसे अब मेरेदेनेसे
तुम इसको ग्रहणकरो ३२ ययाति बोला–हे भार्गवजी इसप्रकार के कार्य्य करनेसे मुझको पापरूप
अधर्म होगा सो वर्णसंकर होजानेके दोषकी निवृत्तिकेअर्थ मैं आपकोही वरणकरताहूं ३३ शुक्रजीने
कहाकि मैं तुझकोअधर्मसेछुटादूंगा तेरेपापको एकांतमेंदूरकरदूंगा इसविवाहमें तूप्रशंसनीयहोगा ३४
अबतू इससुन्दरहास्यवाली देवयानीको भार्य्याकर इसकेसाथ तू अत्यन्तप्रीतिपूर्वक भोगोंकोभोगेगा
हेराजन् यह वृषपर्वाकीपुत्री शर्मिष्ठा तेरीसेवामेंरहैगी इसको तुम अपनीशय्यापरमत बुलाना ३५।३६
शौनकजीबोले कि शुक्राचार्यके इसवचनकोसुनके वहराजाययाति उनकीप्रदक्षिणाकर उनकीआज्ञासे
बड़ीप्रसन्नतासे अपनेपुरमेंआताभया ३७॥ इति श्रीमत्स्यपुराणभाषाटीकायांत्रिंशोऽध्यायः ३०॥

(शौनक उवाच) ययातिःस्वपुरंप्राप्य महेन्द्रपुरसन्निभम् । प्रविश्यान्तःपुरंतत्र
देवयानींन्यवेशयत् १ देवयान्याश्चानुमते सुतांतांवृषपर्वणः। अशोकवनिकाभ्यासे गृहं
कृत्वान्यवेशयत् २ वृतांदासीसहस्रेण शर्मिष्ठामासुरायणीम् । वासोभिरन्नपानैश्च संवि
भज्यसुसंवृताम् ३ देवयान्यातुसहितः सनृपोनहुषात्मजः । विजहारबहूनब्दान् देववन्
मुदितोभृशम् ४ ऋतुकालेतुसंप्राप्ते देवयानीवराङ्गना । लेभेगर्भंप्रथमतः कुमारश्चव्य
जायत ५ गतेवर्षसहस्रेतु शर्मिष्ठावार्षपर्वणी । ददर्शयौवनंप्राप्ता ऋतुंसाकमलेक्षणा ६
चिन्तयामासधर्म्मज्ञा ऋतुप्राप्तौचभामिनी। ऋतुकालश्चसंप्राप्तो नकश्चिन्मेपतिर्वृतः
७ किंप्राप्तंकिञ्चकर्तव्यं कथंकृत्वासुखंभवेत् । देवयानीप्रसूतासौ वृथाहंप्राप्तयौवना ८
यथातयावृतोभर्ता तथैवाहंवृणोमितम् । राज्ञापुत्रफलंदेय मितिमेनिश्चितामतिः ९ अ
पीदानींसधर्मात्मा रहोमेदर्शनंव्रजेत् १० (शौनक उवाच) अथनिष्क्रम्यराजासौ
तस्मिन्कालेयदृच्छया । अशोकवनिकाभ्यासे शर्मिष्ठांप्रत्यधिष्ठितः ११ तमेकंरहसि
दृष्ट्वा शर्मिष्ठाचारुहासिनी । प्रत्युद्गम्याञ्जलिंकृत्वा राजानंवाक्यमब्रवीत् १२ (श
र्मिष्ठोवाच) सोमश्चेन्द्रश्चवायुश्च यमश्चवरुणश्चवा । तववानाहुषगृहे कःस्त्रियंद्र
ष्टुमर्हति १३ रूपाभिजनशीलैर्हि त्वंराजन् ! वेत्थमांसदा । सात्वांयाचेप्रसाद्येऽह रन्तु
मेहिनराधिप ! १४ (ययातिरुवाच) वेद्मित्वांशीलसम्पन्नां दैत्यकन्यामनिन्दिताम् ।
रूपन्तुतेनपश्यामि सूच्यग्रमपिनिन्दितम् १५ मामब्रवीत्तदाशुक्रो देवयानींयदावहम् ।

शौनकजी बोले–कि वह राजा ययाति इन्द्रपुरी के समान अपने पुरमें जाकर देवयानीको अपने
जनाने महलोंमें प्राप्त करताभया और वृषपर्व्वाकी पुत्री शर्मिष्ठाको देवयानी के कहनेसे अशोकवन
के पृथक् मकानमें रखताभया १।२ हज़ार दासियों समेत शर्मिष्ठाको वस्त्र अन्नपान और अलंकारादि
से युक्त करके जुदीकर देताभया ३ फिर वह राजा देवयानी को संगलिये देवताओं के समान बहुत
वर्षोंतक क्रीड़ा करताभया ४ ऋतुकाल प्राप्तहोकर देवयानी ने गर्भको धारण किया और दशमास
व्यतीत होनेपर एकपुत्रको जनतीभई ५ फिर हज़ार वर्ष व्यतीत होजानेपर वृषपर्वाकी पुत्री शर्मिष्ठा
यौबनको प्राप्तहोके ऋतुकालमें चिन्तवन करतीभई कि मेरा कोई पति नहीं है ६।७ मुझको क्या
करना योग्य है मुझे कैसे सुखहोय देवयानीके तो पुत्र होगया मेरा यौबन वृथाहुआ जाताहै जैसे कि
उसने राजाको भर्त्ता बनाया है वैसेही मैं भी उसी राजाको बरूंगी मैं राजासे कहूंगी कि आप मुझ
को भी पुत्ररूपी फल दीजिये ऐसा बिचार करके एकान्त में राजाके दर्शनको चाहती भई ८।९
शौनकजी बोले–कि इसके अनन्तर वह राजा इच्छापूर्व्वक अपने अशोक वनमें शर्मिष्ठा को प्राप्त
होताभया १० तब एकान्तमें प्राप्तहुए उसराजासे शर्मिष्ठा अंजली बाँधकर यह बचन बोली ११ कि
हे राजन् सोम इन्द्र वायु और वरुण इनमेंसे भी कोई तेरे घरमें स्त्रियोंके देखने को समर्थनहीं है १२
हेराजन् रूप कुल और शीलमें आपमुझको उत्तमजानो मैं आपसे याचनाकरतीहूं कि आप मेरेसंग
रमणकरो १३ ययातिने कहा शील युक्त निन्दासे रहित और उत्तम दैत्यकी कन्या तू है तेरे सबगुणों
को मैं जानताहूं परन्तुमैं तेरे रूपको सूचीके अग्रभागकी समानभी नहीं देखसक्ताहूं १४।१५क्योंकि देव

नेयमाह्वयितव्याते शयनेवार्षपर्वणी १६ (शर्मिष्ठोवाच ।) ननर्मयुक्तंवचनंहिनस्ति
नस्त्रीषुराजन्नविवाहकाले । प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि १७
पृष्टास्तुसाक्ष्येप्रवदन्तिचान्यथा भवन्तिमिथ्यावचनानरेन्द्रते । एकार्थतायान्तुसमाहि
तायां मिथ्यावदन्तंह्यनृतंहिनस्ति १८ (ययातिरुवाच) राजाप्रमाणंभूतानां सविन
श्येन्मृषावदन् । अर्थकृच्छ्रमपिप्राप्य न मिथ्याकर्तुमुत्सहे १९ (शर्मिष्ठोवाच) समा
वेतौमतौराजन् ! पतिःसख्याश्चयःपतिः । समंविवाहइत्याहुः सख्यामेऽसिपतिर्यतः २०
(ययातिरुवाच) दातव्यंयाचमानस्य हीतिमेव्रतमाहितम् । त्वञ्चयाचसिकामंमां ब्रू
हिकिङ्करवाणितत् २१ (शर्मिष्ठोवाच) अधर्मात्त्राहिमांराजन् ! धर्मञ्चप्रतिपादय ।
त्वत्तोऽपत्यवतीलोके चरेयंधर्ममुत्तमम् २२ त्रयएवाधनाराजन् ! भार्यादासस्तथासुतः।
यत्तेसमधिगच्छन्ति यस्यतेतस्यतद्धनम् २३ देवयान्याभुजिष्यास्मि वश्याचतवभा
र्गवी । साचाहंचत्वयाराजन् ! भरणीयाभजस्वमाम् २४ (शौनक उवाच) एवमुक्तस्त
याराजा तथ्यमित्यभिजज्ञिवान् । पूजयामासशर्मिष्ठां धर्मंचप्रतिपादयत् २५ ससमाग
म्यशर्मिष्ठां यथाकाममवाप्यच । अन्योन्यंचाभिसंपूज्य जग्मतुस्तौयथागतम् २६ त
स्मिन्समागमेसुभ्रुः शर्मिष्ठावार्षपर्वणी । लेभेगर्भंप्रथमतः तस्मान्नृपतिसत्तमात् २७
प्रजज्ञेचततःकाले राज्ञीराजीवलोचना । कुमारंदेवगर्भाभ मादित्यसमतेजसम् २८ ॥

इति श्रीमत्स्यपुराणेशर्मिष्ठापुत्रोत्पादनन्नामैकत्रिंशोऽध्यायः ३१ ॥

यानीके विवाहके समय शुक्राचार्य्य ने कहदियाहै कि शर्मिष्ठाको शय्यापर न बुलाना १६ शर्मिष्ठा
बोली हेराजन् क्रीड़ा समयमें बिवाह कालमें प्राणोंके नाश समयमें सम्पूर्ण धनके जानेके समयमें
और स्त्रियोंके विषयमें इनपांचोंस्थानों में असत्यबोलनेका कुछ पाप नहीं होता १७ औरकिसकी गवा-
हीमें वा समाहित कियेहुये प्रयोजनमें जो कोई मिथ्या बोलताहै उनका मिथ्याबोलना नाशकारी
होताहै १८ ययाति बोला--कि सब प्राणियोंका प्रमाण राजाहै वह मिथ्या बोलने से नष्ट होजाताहै
इसहेतुसे आपत्तिकालमें भी राजाको मिथ्या बोलना न चाहिये १९ शर्मिष्ठा बोली—हेराजा अपना
पति और सखीका पति यह दोनों समानहैं सो तुम मेरीसखी के पतिहो इसहेतुसे मेरा भी विवाह
तुम्हारेही साथ हुआ जानो २० ययातिबोला मांगनेवाले को यथाशक्ति देनाचाहिये और तेरेसंग मै-
थुन न करनेका मेराव्रतहै यह दोनों बातें प्राप्तहुई हैं सो तूही बता मैं इनदोनों बातों में से कौनसी
बातकरूं २१ शर्मिष्ठाबोली—हे राजन् तुमअधर्म से मेरीरक्षाकरो और धर्मकाप्रतिपालनकरो अर्थात्
मैं तुमसे संतानको प्राप्तहोकर उत्तमधर्मका आचरणकरूंगी २२ हेराजा स्त्री दास और पुत्र यहतीनों
निर्धनकहे हैं जो यह किसी द्रव्यका संचयकरते हैं वह सबद्रव्य इनके मालिकका है २३ और मैंभी
देवयानी के साथ भोजन करती हुई उसीके वशमें रहनेवाली दासी हूं इस हेतुसे मुझ पोषण करने
के योग्यको आपभजिये २४ शौनकजी कहतेहैं उसके ऐसे२ वचनोंको सुनकर राजाययाति शर्मिष्ठा
को सराहकर उसकेधर्मका प्रतिपालन करताभया फिर शर्मिष्ठाकेसंग इच्छापूर्वक संभोगक्रियाउस
समय वहदोनों परमानन्दकोप्राप्तहोतेभये २५।२६ उससम्भोगकरके वह वृषपर्वाकीपुत्री शर्मिष्ठा गर्भ

(शौनक उवाच) श्रुत्वाकुमारञ्जातंसा देवयानीशुचिस्मिता। चिन्तयाविष्टदुःखार्ता शर्मिष्ठांप्रत्यभाषत १ ततोऽभिगम्यशर्मिष्ठां देवयान्यब्रवीदिदम्। किमर्थंवृजिनं सुभ्रु! कृतन्तेकामलुब्धया २ (शर्मिष्ठोवाच) ऋषिरभ्यागतःकश्चिद्धर्मात्मावेदपारगः। समयातुवरःकामं याचितोधर्म्मसंहतम् ३ नाहमन्यायतःकाम माचरामिशुचिस्मिते!। तस्माद्दषेर्ममापत्य मितिसत्यंब्रवीमिते ४ (देवयान्युवाच) यद्येतदेवंशर्मिष्ठे नमन्युर्विद्यतेमम। अपत्यंयदितेलब्धं ज्येष्ठाच्छ्रेष्ठाच्चवैद्विजात् ५ शोभनंभीरु! सत्यंचेत् कथं सज्ञायतेद्विजः। गोत्रनामाभिजनतः श्रोतुमिच्छामितंद्विजम् ६ (शर्मिष्ठोवाच) ओजसातेजसाचैव दीप्यमानंरविंयथा। तंदृष्ट्वाममसंप्रष्टुं शक्तिर्नासीच्छुचिस्मिते! ७ (शौनकउवाच) अन्योन्यमेवमुक्त्वाच संप्रहस्यचतेमिथः। जगामभार्गवीवेश्म तथ्यमित्यभिजानती ८ ययातिर्देवयान्यासु पुत्रावजनयन्नृपः। यदुञ्चतुर्वसुञ्चैव शक्रविष्णूइवापरौ ९ तस्मादेवतुराजर्षेःशर्मिष्ठावार्षपर्वणी। द्रुह्युंचानुञ्चपूरुञ्चत्रीन्कुमारानजीजनत् १० ततःकालेचकस्मिंश्चित् देवयानीशुचिस्मिता। ययातिसहिताराजन्! जगामहरितंवनम् ११ ददर्शचतदातत्र कुमारान्देवरूपिणः। क्रीडमानान्सुविश्रब्धान् विस्मिताचेदमब्रवीत् १२ कस्यैतेदारकाराजन्! देवपुत्रोपमाःशुभाः। वर्चसारूपतश्चैव दृश्यन्ते सदृशास्तव १३ एवं पृष्ट्वातुराजानं कुमारान्पर्यपृच्छत। किंनामधेयगोत्रेवः पुत्रका

को धारण करतीभई २७ फिर समय आनेपर सूर्य्य के समान कान्तिवाले पुत्रको जनती भई २८॥

इति श्रीमत्स्यपुराणभाषाटीकायामेकत्रिंशोऽध्यायः ३१॥

शौनकजी बोले–उसके पुत्र जन्मने के समाचारको देवयानी सुनकर चिन्ता से महादुखी होके पासजाकर शर्मिष्ठासे पूछनेलगी १ कि कामदेवके बशहोकर तैंने ऐसा पाप क्यों किया २ शर्मिष्ठाने कहा कि वेदके जाननेवाले एक धर्मात्मा ऋषि आयेथे उनको मैंने बररूपकरके याचना से प्रसन्नकियाथा उन्हींके संयोगसे यह पुत्रहुआहै ३ हेशुचिस्मिते मैंनेअन्यायसे कामका आचरण नहीं कियाहै यह ऋषिका पुत्रहै इसको सत्यही सत्यजान ४ देवयानीने कहा कि हे शर्मिष्ठे जो यहीबात सत्य सत्य है तो मुझको क्रोधनहीं है तैंने जो किसी उत्तम ब्राह्मणसे संतान प्राप्तकी है वह ब्राह्मण किसप्रकारसे जानाजाय उसका गोत्रनाम और कुलमैं सुननाचाहतीहूं ५। ६ शर्मिष्ठाबोली हेवरानने उसके पराक्रम और सूर्य्यके समान तेजस्वी होनेसे उसकेतेजसे दबीहुई मैं उससे किसी बातके पूछनेको समर्थ न होतीभई ७ शौनकजी कहते हैं इसप्रकार वहपरस्पर कहकर और हँसकर इसवचन को सत्यमानके देवयानी अपने स्थानको आतीभई ८ फिर राजा ययाति उस देवयानी में इन्द्र और विष्णुके समान कान्तिवाले यदु और तुर्वसु इन दोपुत्रोंको उत्पन्न करताभया ९ और शर्मिष्ठाने उस ययातिके संयोग से द्रुह्यु–अनु और पूरु इन तीनपुत्रों को उत्पन्न किया १० इसके अनन्तर किसी कालमें वह देवयानी राजा ययाति के साथ हरित संज्ञक वनमें जातीभई ११ वहां देवस्वरूप सनत्कुमारोंके समान रूपवाले क्रीडा करतेहुए उन बालकोंको देखतीभई और आश्चर्य्ययुक्त होकर यह बचनबोली १२ हे राजन् यह देवताओंके पुत्रोंके समान कान्तिवाले स्वरूपवान जो बालक दीख

ब्राह्मणःपिता १४ विब्रूतमेयथातथ्यं श्रोतुकामास्म्यतोह्यहम्। तेदर्शयन्प्रदेशिन्या तमेव
नृपसत्तमम् १५ शर्मिष्ठांमातरञ्चैव तस्याऊचुःकुमारकाः। (शौनक उवाच) इत्युक्त्वा
सहितास्तेन राजानमुपचक्रमुः १६ नाभ्यनन्दततान्राजा देवयान्यास्तदान्तिके। रुद
न्तस्तेऽथशर्मिष्ठा मभ्ययुर्बालकास्तदा १७ दृष्ट्वातेषान्तुबालानां प्रणयंपार्थिवंप्रति। बु
द्ध्वाचतत्त्वतोदेवी शर्मिष्ठामिदमब्रवीत् १८ (देवयान्युवाच) मदधीनासतीकस्मादका
र्षीर्विप्रियंमम। तमेवासुरधर्मत्व मास्थितानबिभेषिकिम् १९ (शर्मिष्ठोवाच) यदुक्तमृ
षिरित्येव तत्सत्यञ्चारुहासिनि !। न्यायतोधर्म्मतश्चैव चरन्तीनबिभेमिते २० यदा
त्वयावृतोराजा वृतएवतदामया। सखिभर्ताहिधर्मेण भर्ताभवतिशोभने ! २१ पूज्यासि
मममान्याच श्रेष्ठाज्येष्ठाचब्राह्मणी। त्वत्तोहिमेपूज्यतरो राजर्षिःकिन्नवेत्सितत् २२ (शौ
नक उवाच) श्रुत्वातस्यास्ततोवाक्यं देवयान्यब्रवीदिदम्। राजन्नाद्येहवत्स्यामि विप्रियं
मेत्वयाकृतम् २३ सहसोत्पतितांश्यामां दृष्ट्वातांसाश्रुलोचनाम्। तूर्णंसकाशंकाव्यस्य
प्रस्थितांव्यथितस्तदा २४ अनुवव्राजसम्भ्रान्तः पृष्ठतःसान्त्वयन्नृपः। न्यवर्तततन
जज्ञेऽस्यमृगकेतनः॰२२ काश्यासुपार्श्वतनया साम्बाल्लेभेतरास्विनः । सत्यप्रकृतयोदेवाः पञ्चवीराःप्रकीर्तिताः २३ तिस्रःकोटयःप्रवीराणां यादवानांमहात्मनाम् । षष्टिःशतसहस्राणिवीर्यवन्तोमहाबलाः।देवांशाःसर्वएवेह उत्पन्नास्तेमहौजसः २४ देवासुरेहता येच असुरायेमहाबलाः । इहोत्पन्नामनुष्येषु बाधन्तेसर्वमानवान् २५ तेषामुत्सादनार्थाय उत्पन्नोयादवेकुले । कुलानांशतमेकञ्च यादवानांमहात्मनाम् २६सर्वमेतत्कुलंयावद्वर्ततेवैष्णवेकुले । विष्णुस्तेषांप्रणेताच प्रभुत्वेचव्यवस्थितः । निदेशस्थायिनस्तस्य कथ्यन्तेसर्वयादवाः २७ (ऋषय ऊचुः) सप्तर्षयःकुबेरश्च यक्षोमाणिचरस्तथा । शाल्किर्नारदश्चैव सिद्धोधन्वन्तरिस्तथा २८ आदिदेवस्तथाविष्णुरेभिस्तुसहदैवतैः । किमर्थंसंघशोभूताः स्मृताःसम्भूतयःकति २९ भविष्याःकतिचैवान्ये प्रादुर्भावामहात्मनः । ब्रह्मक्षत्रेषुशान्तेषु किमर्थमिहजायते ३० यदर्थमिहसम्भूतो विष्णुर्वृष्ण्यन्धकोत्तमः । पुनःपुनर्मनुष्येषु तन्नःप्रब्रूहिपृच्छताम् ३१ (सूतउवाच) त्यज्यादिव्यान्तनुंविष्णुर्मानुषेष्विहजायते । युगेत्वथपरावृत्ते कालेप्रशिथिलेप्रभुः ३२ देवासुरविमर्देषुजायतेहरिरश्विरः ।हिरण्यकशिपौदैत्ये त्रैलोक्यंप्राक्प्रशासति ३३ बलिनाधिष्ठितेचैवपुरालोकत्रयेक्रमात् । सख्यमासीत्परमकं देवानामसुरैःसह ३४ युगाख्यासुरसम्पूर्णं ह्यासीदत्याकुलंजगत् । निदेशस्थायिनश्चापि तयोर्देवासुराःसमम् ३५ मृधोबलिविमर्दायसंप्रवृद्धः

अनिरुद्धहुआ--इसकापुत्र मृगकेतन हुआ २२ सांबके सुपार्श्व राजाकी पुत्री काश्यानाम स्त्री में बड़े बलवान् सत्यवादी पांच ५ पुत्रउत्पन्न होतेभये २३ कहाँतक कहें कि इन महाबली यादवोंकी तीन करोड़ संख्याहोतीभई इनमें ६०००० यादव तो बड़े पराक्रमी शूरवीर देवताओंके अंशसे इसपृथ्वीपर जन्मलेतेभये २४ देवता और असुरोंके युद्धमें जो महाबलवन्त दैत्यमारेगयेथे वह इसपृथ्वीपर लेकर मनुष्योंको बाधाकररहेथे इसीहितुसे उनके नाशकरनेको यादवकुलमें भगवान्ने जन्मलिया इनमहात्मा यादवोंके सौ १०० कुलहुए इनसबके पालन पोषण करनेवाले विष्णु भगवान् प्रभुथे इसीसे यह वैष्णव यादवकुल प्रतिदिन बढ़तागया सब यादवलोग श्रीकृष्णजीकेही समीपवर्त्ती हुए २५।२७ऋषियोंने पूछा हे सूतजी सप्तऋषि--कुबेर--यक्ष--माणिचरऋषि--शाल्किमुनि--नारद--सिद्ध और धन्वन्तरि इत्यादिकों समेत आदिदेव विष्णु भगवान् किसहेतुसे इसपृथ्वीपर इकट्ठे होकर प्राप्त होतेभये विष्णुकी विभूति कितनी है और आगे कितनी विभूतिहोवेंगी और ब्राह्मण क्षत्रिय और वैश्य इन्हींमें भगवान् किस हेतुसे जन्म लेते हैं २८।३० हे सूतजी जिस २ हेतुसे यह उत्तम विष्णु भगवान् वृष्णि--अन्धक आदिकुलमें जन्मलेते हैं और वारंवार मनुष्योंहीमें जिसहेतुसे जन्मलेते हैं यह सब वृत्तान्त हमको आपसुनाइये ३१ सूतजीबोले--कि युगके अन्तमें धर्मकेनष्ट होजानेपर विष्णु भगवान् अपने दिव्य शरीरको त्यागकर मनुष्य शरीरको धारण करतेहैं ३२ और जब देवतालोग असुरोंसे पीड़ित होते हैं तब प्रकटहोतेहैं--पूर्व समयमें हिरण्यकशिपुनाम दैत्य सम्पूर्ण पृथ्वीपर राज्य करताथा ३३ और बलिने जब तीनोंलोक जीतलियेथे उससमय देवता और दैत्य लोगोंकी परम मित्रता होतीभई ३४ फिर उन युगों में असुरों से पूरितहुआ जगत् अत्यन्त व्याकुल होजाताभया

सुदारुणः । देवानामसुराणांच घोरःक्षयकरोमहान् ३६ कर्तुंधर्म्मव्यवस्थानं जायतेमा
नुषेष्विह । भृगोःशापनिमित्तन्तुदेवासुरकृतेतदा ३७ (मुनयऊचुः) कथंदेवासुरकृते
व्यापारंप्राप्तवान्स्वतः । देवासुरंयथावृत्तन्तन्नः प्रब्रूहिपृच्छताम् ३८ (सूत उवाच) ते
षांदायनिमित्तंते संग्रामास्तुसुदारुणाः । वराहाद्याद्दशद्वौच शण्डामर्कान्तरेस्मृताः ३९
नामतस्तुसमासेन शृणुतेषांविवक्षतः । प्रथमोनारसिंहस्तु द्वितीयश्चापिवामनः ४० तृ
तीयस्तुवराहश्चचतुर्थोऽमृतमन्थनः । संग्रामःपञ्चमश्चैव सञ्जातस्तारकामयः ४१ ष
ष्ठोह्याडीवकाख्यस्तु सप्तमस्त्रैपुरस्तथा । अन्धकाख्योऽष्टमस्तेषां नवमोवृत्रघातकः ४२
धात्रश्चदशमश्चैव ततोहालाहलःस्मृतः।प्रथितोद्वादशस्तेषां घोरःकोलाहलस्तथा४३
हिरण्यकशिपुर्दैत्यो नारसिंहेनपातितः । वामनेनबलिर्बद्धस्त्रैलोक्याक्रमणेपुरा ४४ हि
रण्याक्षोहतोद्वन्द्वे प्रतिघातेतुदैवतैः । दंष्ट्रयातुवराहेण समुद्रस्तुद्विधाकृतः ४५ प्रह्ला
दोनिर्जितोयुद्धे इन्द्रेणामृतमन्थने । विरोचनस्तुप्राह्लादिर्नित्यमिंद्रवधोद्यतः ४६ इन्द्रेणै
वतुविक्रम्य निहतस्तारकामये । अशक्नुवन्सदेवानां सर्वंसोढुंसदैवतम् ४७ निहतादा
नवाःसर्वे त्रैलोक्येत्र्यम्बकेणतु । असुराश्चपिशाचाश्च दानवाश्चान्धकाहते ४८ हता
देवमनुष्यैस्वे पितृभिश्चैवसर्वशः । संपृक्तोदानवैर्वृत्रोघोरोहालाहलेहतः ४९ तदावि

और हिरण्यकशिपु और बलि इन दोनोंके समीप रहनेवाले दैत्य और देवतालोग सब समानथे ३५
अर्थात् इन दोनों के राज्यमें दैत्य देवता दोनों समान होकर कोई किसीसे अधिक न था उसीसमय
राजा बलिके पीड़ा देनेके निमित्त दैत्योंका और देवताओंका महादारुण युद्धहुआ उससमय विष्णु
भगवान् देवता और असुरोंके कार्य्यके लिये शुक्राचार्य्य के शापके कारणसे धर्मकी व्यवस्थाके अर्थ
उससमय मनुष्यों में जन्मे हैं ३६ । ३७ ऋषियों ने पूछा कि हे सूतजी देवासुरों के युद्धमें विष्णुभग-
वान् आपही इस व्यापारमें कैसे प्राप्तहुए और देवता असुरोंका क्या वृत्तान्तथा यह सबहमारे आगे
वर्णन कीजिये ३८ सूतजी बोले—कि देवता और असुरोंके विभागके निमित्त उनके बारह बड़े २
दारुण युद्धहुए और दो युद्ध शंडामर्क संज्ञक कल्पान्तरों में हुएहैं और प्रतियुद्ध अवतारभी हुए प्रथम
नृसिंह—दूसरा बामन—तीसरावराह—चौथा अमृतमंथन पांचवां तारकामय युद्धहुआ—छठाआडीवक—
सातवाँ त्रैपुर युद्ध—आठवाँ अन्धक--नवाँ वृत्रासुर नाशक ३९।४२ दशवाँ धात्रयुद्ध--ग्यारहवाँ हाला—
हलयुद्ध ४३ नृसिंह अवतारने हिरण्यकशिपु दैत्यको मारा—बामनने बलिदैत्यको बाँधा और त्रिलो-
की मापली ४४ वराह अवतारमें अपनी दंष्ट्रासे हिरण्याक्ष दैत्यकोमारा और समुद्रके दोखंड कर
दिये ४५ और अमृतमथन अवतारमें इन्द्रने प्रह्लादको जीता फिर प्रह्लादका पुत्र विरोचन सदैव
इन्द्रके वधकी इच्छा करतारहा तब तारकामय युद्धमें उसको इन्द्रने अपने पराक्रमसे मारा यह
दैत्य देवताओं के कर्मको कभीनहीं सहताथा ४६ । ४७ फिर जब आडीवकनाम युद्धहुआ तब त्रैपुर
युद्धहुआ उससमय शिवजीने त्रिपुरासुरदैत्यको मारा और अन्य सब दानवोंको भी मारा इनके
सिवाय अन्धक युद्धमेंभी शिवजीने असुर और पिशाचादिक सब मारे हैं ४८ और वृत्रनाशक युद्धमें
देवता मनुष्य पितर और दानव इनसबों में संयुक्तहुए वृत्रासुर को विष्णुकी सहायतासे इन्द्रनेही

प्राचीततस्यतनयो मनस्युश्चतथाभवत् । राजापीतायुधोनाम मनस्योरभवत्सुतः २
दायादस्तस्यचाप्यासीद् धुन्धुर्नाममहीपतिः । धुन्धोर्बहुविधःपुत्रः सम्पातिस्तस्यचा
त्मजः ३ सम्पातेस्तुरहंवर्चा भद्राश्वस्तस्यचात्मजः । भद्राश्वस्यघृतायांतु दशाप्सरसि
सूनवः ४ औचेयुश्चहृषेयुश्च कक्षेयुश्चसनेयुकः । घृतेयुश्चविनेयुश्च स्थलेयुश्चैवसत्त
मः ५ धर्मेयुःसन्नतेयुश्च पुण्येयुश्चेतितेदश। औचेयोर्ज्वलनानामभार्य्यावैतक्षकात्मजा ६
तस्यांसजनयामास अन्तिनारंमहीपतिम्। अन्तिनारोमनस्विन्यां पुत्रान्जज्ञेपरान्शुभा
न् ७ अमूर्तरयसंवीरंत्रिवनञ्चैवधार्मिकम् । गौरीकन्यातृतीयाच मान्धातुर्जननीशुभा ८
इलिनातुयमस्यासीत्कन्यायाजनयत्सुतान् ।ब्रह्मवादपराक्रांतांश्शुंभदात्विलिनाह्यभूत् ९
उपदानवीसुतान्लेभे चतुरस्त्विलिनात्मजात्।ऋष्यन्तमथदुष्यन्तं प्रवीरमनघंतथा १०
चक्रवर्त्तीततोजज्ञेदुष्यन्तात्समितिञ्जयः।शकुन्तलायांभरतोयस्यनाम्नाचभारताः ११
दौष्यन्तिंप्रतिराजानं वागूचेचाशरीरिणी । माताभस्त्रापितुःपुत्रो येनजातःसएवसः १२
भरस्वपुत्रंदुष्यन्त ! मावमंस्थाःशकुन्तलाम् । रेतोधांनयतेपुत्रः परेतंयमसादनात् ।
त्वंचास्यधातागर्भस्य सत्यमाहशकुन्तला १३ भरतस्यविनष्टेषु तनयेषुपुराकिल । पु
त्राणांमातृकात्कोपात् सुमहान्संक्षयःकृतः १४ ततोमरुद्भिरानीय पुत्रःसतुबृहस्पतेः ।
संक्रामितोभरद्वाजो मरुद्भिर्भरतस्यतु १५ (ऋषय ऊचुः) भरतस्यभरद्वाजः पुत्रार्थं

करताभया १ प्राचीततके मनस्युनाम पुत्रहोताभया मनस्युके पीतायुधनाम राजाहोताभया २ पीतायुधके
धुंधुनाम राजा होताभया धुंधुके बहुविध नाम पुत्रहुआ उसका पुत्र संपातिनाम हुआ ३ संपातिके
अहंवर्चा पुत्रहुआ उसके भद्राश्व पुत्रहुआ भद्राश्वके घृता अप्सरामें ४ औचेयु १ हृषेयु २ कक्षेयु
३ सनेयुक ४ घृतेयु ५ विनेयु ६ स्थलेयु ७ धर्मेयु ८ । ५ सन्नतेयु ९ और 'पुण्येयु यहदश पुत्रहुए
औचेयुके तक्षककी पुत्री ज्वलनानाम भार्य्याहोती भई ६ तिस में औचेयुसे अन्तिनारराजा उत्पन्न
हुआ अन्तिनारके मनस्विनी स्त्रीसे वीर अमूर्तरय १ और धार्मिक त्रिवन २ यह दोपुत्रउत्पन्नहुए तीसरी
गौरीनाम एककन्याभी हुई वह मान्धाताकी माताहोतीभई ७ । ८ इलिना जो यमकी पुत्री है सो
ब्रह्मबादके जाननेवाले पुत्रोंको उत्पन्नकरतीभई और इलिनाशुभदा होतीभई ९ इलिनाकेपुत्रसे उपदानवी
स्त्री ऋष्यन्त १ दुष्यन्त २ प्रवीर ३ और अनघ इनचारों पुत्रोंको जन्मती भई १० दुष्यन्तके
चक्रवर्त्ती समितिञ्जय पुत्रहुआ उसी दुष्यन्तका पुत्र शकुन्तला स्त्री में भरतहुआ इसीके नामसे
इस देशकानाम भारतहुआ ११ दुष्यन्तके पुत्र समितिंजय राजाको यह आकाश वाणी होतीभई
कि माता तो चर्मरूपहै और पुत्र पिताकाही होताहै और जिसका जो पुत्रहै वह उसीका आत्माहै १२
इस हेतुसे हेदुष्यन्त तू अपने पुत्रकापालनकर शकुन्तलाका तिरस्कार मतकर पुत्रमरेहुए पिताको
धर्मराजके स्थानसे लेआताहै और इस गर्भका धारण करानेवाला तू है अर्थात् इस शकुन्तलाके उदरमें
तेराही गर्भ है शकुन्तला सत्यकहती है १३ इसके भरतहुए और भरतके जब सबपुत्रोंका माताके
कोपसे क्षयहोगया तब यज्ञमें मरुत् देवताओं ने बृहस्पति के पुत्र भरद्वाजको लाके राजा भरतको
दिया १४ । १५ ऋषियों ने पूछा हेसूतजी मरुत् देवताओंने महातेजवाला भरद्वाज भरतको कैसे

मारुतैःकथम्। संक्रामितोमहातेजास्तन्नोब्रूहियथातथम् १६ (सूत उवाच) पत्न्या
मापन्नसत्वायामुशिजःसंस्थितोभुवि। भ्रातुर्भार्य्यांसदृष्ट्वातु बृहस्पतिरुवाचह १७
उपतिष्ठस्वलंकृत्य मैथुनायचमांशुभे!। एवमुक्ताऽब्रवीदेनं स्वयमेवबृहस्पतिम् १८ ग
र्भःपरिणतश्चायं ब्रह्मव्याहरतेगिरा। अमोघरेतास्त्वञ्चापि धर्मंचैवंविगर्हितम् १९
एवमुक्तोऽब्रवीदेनां स्वयमेवबृहस्पतिः। नोपदेष्टव्योविनयस्त्वयामेवरवर्णिनि! २० ध
र्षमाणःप्रसह्यैनां मैथुनायोपचक्रमे। ततोबृहस्पतिंगर्भो धर्षमाणमुवाचह २१ सन्निवि
ष्टोह्यहंपूर्वमिहनामबृहस्पते!। अमोघरेताश्चभवान् नावकाशइहद्वयोः २२ एवमुक्तः
सगर्भेण कुपितःप्रत्युवाचह। यस्मात्त्वमीदृशेकाले सर्वभूतेप्सितेसति। अभिषेधसि
तस्मात्त्वं तमोदीर्घंप्रवेक्ष्यसि २३ ततःकामंसन्निवर्त्य तस्यानन्दाद् बृहस्पतेः। तद्रेतस्त्व
पतद्भूमौ निवृत्तंशिशुकोऽभवत् २४ सद्योजातंकुमारन्तु दृष्ट्वातंममताब्रवीत्। गमिष्या
मिगृहंस्वंवै भरस्वैनंबृहस्पते! २५ एवमुक्तागतासातु गतायांसोऽपितन्त्यजत्। मातापितृ
भ्यांत्यक्तन्तु दृष्ट्वातंमारुतःशिशुम्। जगृहुस्तंभरद्वाजं मरुतःकृपयास्थिताः २६ तस्मि
न्कालेतुभरतो बहुभिःक्रतुभिर्विभुः। पुत्रनैमित्तिकैर्यज्ञैरयजत्पुत्रलिप्सया २७ यदासय
जमानस्तु पुत्रंनासादयत्प्रभुः। ततःक्रतुंमरुत्सोमं पुत्रार्थेसमुपाहरत् २८ तेनतेमरुतस्त
स्य मरुत्सोमेनतुष्टुवुः। उपनिन्युर्भरद्वाजं पुत्रार्थंभरतायवै २९ दायादोऽङ्गिरसःसूनोरौर

प्राप्तकरदिया इसको आप यथार्थतासे वर्णन कीजिये १६ सूतजीने कहा कि जो बृहस्पतिजी ने अपने
भाईकी स्त्रीको देखकर यह वचन कहाथा कि १७ हेशुभे तू शृंगार करके मेरे मैथुनके निमित्त मुझे
प्राप्तहो इसको सुनकर उसने बृहस्पतिजी से कहाथा १८ कि यह आपके भाईका पूर्व्व गर्भहै और
आपभी वाणीसे वेदके वक्ताहो इसीसे तुम अमोघ वीर्य्यहो यह निन्दित कर्म आपको अयोग्य है १९
यह सुनकर बृहस्पतिने कहा कि हेशुभे मेरी आज्ञा तुझको भंगकरना योग्यनहीं है २० ऐसा कहकर
कामसे पीड़ितहुए बृहस्पति हठ करके उससे मैथुनकरतेभये तब वीर्य्य पतनहोनेके समय उस गर्भ
स्थित बालकने बृहस्पतिसे कहा कि २१ हे बृहस्पतिजी यहाँ पूर्व्व मैं स्थितहोचुकाहूं और तुम अमोघ
वीर्यहो इस हेतुसे दोगर्भोंका यहाँ अवकाशनहीं है २२ जब इसप्रकार उसगर्भने कहा तब बृहस्पति
जी उसपर कोपयुक्त होकर यह कहतेभये कि जो तू सर्वजीवों के सुखकारी और वाञ्छित कालमें मुझ
को निषेध करताहै इससे तू दीर्घतमको प्राप्तहोगा २३ पीछे उस आनन्ददायक कामके रोकने से
बृहस्पतिका वीर्य्य पृथ्वीमें गिरताभया उसीसे एक बालक होताभया २४ इस तत्काल होनेवाले
बालकको देखकर उसकी माता यह वचन कहतीभई कि हेबृहस्पतिजी मैं अपने घरजातीहूं तुम इस
बालकका पोषणकरो २५ ऐसा कहकर यह तो चलीगई और बृहस्पतिभी इसको त्यागकर देतेभये
फिर माता पितासे त्यागेहुए इस बालकको देखकर कृपाकरके मरुत् आये और भरद्वाज नामवाले
उस बालकको ग्रहणकरतेभये २६ और उसीकालमें समर्थ राजाभरत बहुतसी क्रतुओं में पुत्रकी
वाञ्छाकरके यज्ञों को करता भया २७ फिर इस समर्थ यजमान राजाको उनयज्ञों से भी पुत्रकी
प्राप्तिनहीं हुई तब पुत्रके निमित्त इसने मरुत्सोम यज्ञको किया २८ उस मरुत्सोम यज्ञके करने से

सस्तुबृहस्पतेः। संक्रामितोभरद्वाजो मरुद्भिर्भरतंप्रति ३० भरतस्तुभरद्वाजं पुत्रम्प्राप्य विभुर्ब्रवीत्। आदावात्महितायत्वं कृतार्थोऽहंत्वयाविभो!३१ पूर्वन्तुवितथेतस्मिन् कृतेवै पुत्रजन्मनि। ततस्तुवितथोनाम भरद्वाजोनृपोऽभवत्३२तस्मादपिभरद्वाजाद् ब्राह्मणाः क्षत्रियाभुवि। द्व्यामुष्यायणकौलीनाः स्मृतास्तेद्विविधेनच३३ततोजातेहिवितथे भरतश्चदिवंययौ। भरद्वाजोदिवंयातो ह्यभिषिच्यसुतंऋषिः ३४ दायादोवितथस्यासीद्भुवमन्युर्महायशाः। महाभूतोपमाःपुत्रा श्चत्वारोभुवमन्यवः ३५ वृहत्क्षेत्रोमहावीर्यः नरोगर्गश्चवीर्यवान्। नरस्यसंकृतिःपुत्रस्तस्य पुत्रोमहायशाः३६गुरुधीरन्तिदेवश्च सत्कृत्यान्तावुभौस्मृतौ। गर्गस्यचैवदायादःशिविर्विद्वानजायत ३७ स्मृताःशैव्यास्ततोगर्गाः क्षत्रोपेताद्विजातयः। आहार्यतनयश्चैव धीमानासीदुरुक्षवः३८तस्यभार्याविशालातु सुषुवेपुत्रकत्रयम्। त्र्यूषणंपुष्करिंचैव कविंचैवमहायशाः ३९ उरुक्षवाःस्मृताह्येते सर्वेब्राह्मणताङ्गताः। काव्यानान्तुवराह्येते त्रयःप्रोक्तामहर्षयः ४० गर्गाःसंकृतयःकाव्याःक्षत्रोपेताद्विजातयः। संभृताङ्गिरसोदक्षाः वृहत्क्षत्रस्यचक्षितिः ४१ वृहत्क्षत्रस्यदायादो हस्तिनामाबभूवह। तेनेदंनिर्मितंपूर्वं पुरन्तुगजसाह्वयम् ४२ हस्तिनश्चैवदायादास्त्रयःपरमकीर्त्तयः। अजमीढोद्विमीढश्च पुरुमीढस्तथैवच ४३ अजमीढस्यपत्न्यस्तुतिस्रःकुरुकुलोद्वहाः। नीलिनीधूमिनीचैव केशिनीचैवविश्रुताः ४४ सतासुजनयामास पुत्रान्वैदेववर्चसः। तपसोऽन्तेमहातेजा जातावृद्धस्यधार्मिकाः ४५ भारद्वाजप्रसादेन विस्तरंतेषुमे

मरुत् देवता भरतकी स्तुति पूर्वक प्रशंसा करके उसको वह भरद्वाज नाम पुत्र देतेभये २९ इसप्रकारसे अंगिराके पुत्र वृहस्पतिका औरसपुत्र भरद्वाज मरुतोंने भरतको देदिया ३० फिर भरत उस समर्थ भरद्वाज पुत्रको प्राप्तहोकर यह वचन कहताभया कि हेविभो मैं अपने हितके निमित्त तुमको प्राप्तहोकर कृतार्थहुआ ३१ और प्रथम पुत्र जन्ममें वितथ अर्थात् मिथ्यामनोरथ होताभया इसहेतुसे भरद्वाजका वितथ नामहुआ ३२ उस भरद्वाजसे पृथ्वीपर जो ब्राह्मण और क्षत्री होतेभये वहद्वयामुष्यायण और कौलीन इननामोंसे दोप्रकारकेहुए जब यह वितथहोगया तब भरतजी स्वर्गको जाते भये और ऋषि भरद्वाज भी पुत्रका अभिषेककरके स्वर्गमेंगये ३३।३४ वितथके महायशवाला भुवमन्यु नाम पुत्रहुआ भुवमन्युके महाभूतोंके सदृश ३५ बृहत्क्षेत्र१ महावीर्य्य २ नर और गर्ग यह चार पुत्र हुए नरके संकृति पुत्रहुआ उसके महायशाहुआ ३६ और गर्गके बहुत बुद्धिवाला विद्वान् शिविहोता भया ३७ शिविके क्षत्र संज्ञक पुत्र क्षत्र करके ब्राह्मणहुए महाबीरका पुत्र बुद्धिमान् उरुक्षवहुआ ३८ उसके विशालानाम स्त्रीमें त्र्यूषण १ पुष्करि २ औरबड़े यशवालाकवि ३९ यह तीनपुत्रहुए यह सब उरुक्षवके सम्बन्धसे ब्राह्मणशरीरको प्राप्तहुएहैं औरइनतीनोंको काव्योंके श्रेष्ठमहर्षि कहते हैं ४०।४१ और गर्ग संकृति-काव्य और क्षत्रयुक्त यह ब्राह्मण हुए हैं और बड़े चतुरभी हुए हैं बृहत्क्षत्रका पुत्र क्षिति और हस्तिनामसे प्रसिद्धहै इसने प्रथम गजसाह्वयनाम पुर अर्थात् हस्तिनापुर रचाहै ४२ और हस्तीके सुन्दरकीर्तिमान् अजमीढ़ १ द्विमीढ़ २ और पुरुमीढ़ यह तीन पुत्र हुए ४३ अजमीढ़के कुरुकुलकी बढ़ानेवाली नीलिनी १ धूमिनी२ और केशिनी यहतीन स्त्रियां विख्यातहैं ४४ उन

शृणु। अजमीढस्यकेशिन्यां कण्वःसमभवत्किल ४६ मेधातिथिःसुतस्तस्य तस्मात्काण्वायनाद्द्विजाः। अजमीढस्यभूमिन्यां जज्ञेबृहदनुर्नृपः ४७ बृहदनोर्बृहन्तोऽथबृहन्तस्यबृहन्मनाः। बृहन्मनःसुतश्चापि बृहद्धनुरितिश्रुतः ४८ बृहद्धनोर्बृहदिषुः पुत्रस्तस्य जयद्रथः। अश्वजित्तनयस्तस्य सेनजित्तस्यचात्मजः ४९ अथसेनाजितःपुत्राश्चत्वारो लोकविश्रुताः। रुचिराश्वश्चकाव्यश्च राजादृढरथस्तथा ५० वत्सश्चावर्तकोराजा यस्यैतेपरिवत्सकाः। रुचिराश्वस्यदायादः पृथुसेनोमहायशाः ५१ पृथुसेनस्यपौरस्तु पौरान्नीपोऽथजज्ञिवान्। नीपस्यैकशतन्त्वासीत् पुत्राणाममितौजसाम् ५२ नीपाइति समाख्याता राजानःसर्वएवते। तेषांवंशकरःश्रीमान् नीपानांकीर्त्तिवर्द्धनः ५३ काव्याच्च समरोनाम सदेष्टसमरोऽभवत्। समरस्यपारसम्पारौ सदश्वइतितेत्रयः ५४ पुत्राःसर्वगुणोपेता जातावैविश्रुताभुवि। पारपुत्रःपृथुर्जातः पृथोस्तुसुकृतोऽभवत् ५५ जज्ञे सर्वगुणोपेतो विभ्राजस्तस्यचात्मजा। विभ्राजस्यतुदायादस्त्वणुहोनामवीर्य्यवान् ५६ बभूवशुक्रजामाता कृत्वीभर्तामहायशाः। अणुहस्यतुदायादो ब्रह्मदत्तोमहीपतिः ५७ युगदत्तःसुतस्तस्य विष्वक्सेनोमहायशाः। विभ्राजःपुनराजातो सुकृतेनेहकर्म्मणा ५८ विष्वक्सेनस्यपुत्रस्तु उदक्सेनोबभूवह। भल्लाटस्तस्यपुत्रस्तु तस्यासीज्जनमेजयः। उग्रायुधेनतस्यार्थे सर्वेनीपाःप्रणाशिताः ५९ (ऋषय ऊचुः) उग्रायुधःकस्यसुतःकस्य

तीनों स्त्रियोंमें अजमीढ देवताओंकेसे तेजवाले पुत्रोंको उत्पन्नकरता भया यह पुत्र तपके अन्तमें वृद्धिमान् और परम धार्मिक हुए हैं ४५ और भरद्वाजकी कृपासेहुए हैं उनकोविस्तार समेत सुनो अजमीढके केशिनी स्त्रीमें कण्वहोताभया ४६ उसकापुत्र मेधातिथिहुआ उससि काण्वब्राह्मण हुए औरअजमीढकी धूमिनीस्त्रीमें राजाबृहदनु उत्पन्नहुआ ४७ बृहदनुके बृहन्त हुआ बृहन्तके बृहन्मना हुआ और बृहन्मनाका पुत्र बृहद्धनु हुआ ४८ बृहद्धनुका पुत्र बृहदिषुहुआ उसकापुत्र जयद्रथहुआ उसका पुत्र अश्वजित् उसका पुत्र सेनाजित् हुआ ४९ इससेनाजित्के रुचिराश्व १ काव्य २ राजा दृढरथ यहतीन हुए और चौथा चक्रवर्ती वत्सराजहुआ ५० और चक्रवर्ती वत्सराजके परिवत्सक हुए और रुचिराश्वकापुत्र बड़ायशवाला पृथुसेनहुआ ५१ पृथुसेनकेपौरहुआ पौरके नीपहुआ नीपके बड़ेपराक्रमी सौ१००पुत्र उत्पन्नहुए ५२ और सबनीपसे विख्यातहुए और राजाहुए उनमें श्रीमान् वंशकाकर्त्ता और कीर्त्तिका बढ़ानेवाला हुआ ५३ अब काव्यकावंश कहते हैं–काव्यके समर नाम पुत्रहुआ उसको युद्धही प्रियथा इससमरके पार–संपार और सदश्व यह तीन पुत्रहोते भये ५४ यह तीनों पुत्र सबगुणों से युक्त पृथ्वीपर विख्यातहुए इनमें से पारकापुत्र पृथुनामहुआ पृथुकेसुकृत हुआ ५५ सुकृतका सर्वगुण संपन्न विभ्राजपुत्रहुआ विभ्राजके बड़े पराक्रमवाला अणुहनामपुत्रहुआ यह महायशी अणुह शुक्रकाजामाता और कृत्वीकाभर्त्ताहुआ अणुहकापुत्र राजाब्रह्मदत्तहुआ ५६।५७ ब्रह्मदत्तके युगदत्तहुआ उसके महायशी विष्वक्सेनहुआ यह सुकृतकर्मोंसे राजाहुआ ५८ बिष्वक्सेन के उदक्सेनहुआ उसके भल्लाटहुआ उसके जनमेजयहुआ फिर उग्रायुधने संपूर्ण नीपसंज्ञक राजा नष्टकरदिये ५९ यहसुनकर ऋषियोंने पूछा कि हेसूतजी उग्रायुध किसकापुत्रहुआ और किसके वंश

वंशेसकथ्यते। किमर्थंतेनतेनीपास्सर्वेचैवप्रणाशिताः ६० (सूत उवाच) उग्रायुधःसूर्य्यं
वंश्यस्तपस्तेपेवराश्रमे। स्थाणुभूतोऽष्टसाहस्रन्तंभेजेजनमेजयः ६१ तस्यराज्यंप्रतिश्रु
त्यनीपानाजघ्निवान्प्रभुः। उवाचसांत्वंविविधंजघ्नुस्तेवैह्युभावपि ६२ हन्यमानागतान्
चेयस्माद्धेतोर्नमेवचः। शरणागतरक्षार्थंतस्माद्वंशपामिवः ६३ यदिमेऽस्तितपस्तप्तंसर्वा
न्नयतुवोयमः। ततस्तान्कृष्यमाणांस्तुयमेनपुरतःसतु ६४ कृपयापरयाविष्टोजनमेजयमू
चिवान्। गतानेतानिमान्वीरांस्त्वंमेरक्षितुमर्हसि ६५ (जनमेजयउवाच) अरेपापा! दुरा
चारा! भवितारोऽस्यकिंकराः। तथेत्युक्तस्ततोराजायमेनयुयुधेचिरम् ६६ व्याधिभिर्नारकै
र्घोरैर्यमेनसहतान्बलात्। विजित्यमुनयेप्रादात्तदद्भुतमिवाभवत् ६७ यमस्तुष्टस्ततस्तस्मै
मुक्तिज्ञानंददौपरम्। सर्वेयथोचितंकृत्वाजग्मुस्तेकृष्णमव्ययम् ६८ येषान्तुचरितंगृह्यह
न्यन्तेनापमृत्युभिः। इहलोकपरेचैवसुखमक्षय्यमश्नुते ६९ अजमीढस्यधूमिन्यांविद्वान्
जज्ञेयवीनरः। धृतिमांस्तस्यपुत्रस्तु तस्यसत्यधृतिःस्मृतः। अथसत्यधृतेःपुत्रो दृढनेमिः
प्रतापवान् ७० दृढनेमिसुतश्चापिसुधर्मानामपार्थिवः। आसीत्सुधर्मतनयःसार्वभौमःप्रता
पवान् ७१ सार्वभौमेतिविख्यातःपृथिव्यामेकराड्बभौ। तस्यान्ववायेमहति महापौरवन
न्दनः ७२ महापौरवपुत्रस्तु राजारुक्मरथःस्मृतः। अथरुक्मरथस्यासीत् सुपार्श्वोनाम
पार्थिवः ७३ सुपार्श्वतनयश्चापिसुमतिर्नामधार्मिकः। सुमतेरपिधर्मात्माराजासन्नतिमान

में हुआ और इसने किसहेतुसे संपूर्णनीपराजाओं को नष्टकिया इसको विस्तारपूर्व्वक कहिये ६०
सूतजीने कहा कि हेऋषियो उग्रायुधसूर्य्यवंश में हुआ और श्रेष्ठआश्रम में लक्कड़साहोकर अठारह
हज़ार वर्षतक तपकरतारहा और राज्यके निमित्त इसको जनमेजय भजताभया ६१ यह जनमेजय
को राज्यकी आज्ञादेकर नीपोंको मारताभया फिर उग्रायुधने शान्ति के वचनभी कहे तो भी नीपों
ने इन दोनोंको मारा ६२ फिर उग्रायुध कहनेलगा कि जो तुमने शरणागतकी रक्षाके निमित्तमेरा
वचन नहीं माना इसहेतुसे मैं तुमको शापदेताहूं ६३ कि जोमैंने कुछ तपकियाहै तो तुमसबलोगों को
यमदेवताले जांय फिर इसवचन के कहतेही यमराज इनसबको खेंचताभया ६४ फिर कृपाकरके
उग्रायुध जनमेजय से यह वचन कहनेलगा कि हेजनमेजय तू इनवीरोंकी रक्षाकरनेको योग्यहै ६५
यह सुनकर उनसबसे कहनेलगा रेपापी दुराचारियो तुम उग्रायुधके किंकरहोजाओ ऐसे कहकर
जनमेजय यमसे युद्धकरनेलगा ६६ फिर व्याधियों समेत घोरनरक और यम सहित नीपोंकोजीत
कर वह जनमेजय मुनिउग्रायुध को देताभया यह बड़ाआश्चर्य्यसा हुआ ६७ पीछे यम प्रसन्नहोकर
जनमेजयको मुक्तिज्ञान देताभया फिर वह सबनीपभी यथोचित कर्म करके अव्यय अविनाशीकृष्णको
प्राप्तहुए ६८ जो कोई इनके चरित्रोंको सुनताहै वह अपमृत्यु से नहींमरता और इसलोक वा पर-
लोक दोनों में अक्षय सुखकोप्राप्तहोता है यह अजमीढ़की एकरानीका वंशहुआ ६९ और अजमीढ़
की धूमिनी नामरानी में विद्वान् यवीनर उत्पन्नहुआ उसके धृतिमान् पुत्रहुआ उसके सत्यधृतिहुआ
सत्यधृति के प्रतापी दृढनेमिहुआ ७० दृढनेमिकापुत्र सुधर्मानाम राजाहुआ सुधर्माकापुत्र प्रताप-
वान् सार्वभौमहुआ ७१ यह सब पृथ्वीका चक्रवर्तीहुआ इसके उत्तमवंशमें महापौरवहुआ ७२ महा-

पि७४तस्यासीत्सन्नतिमतः कृतोनामसुतोमहान्।हिरण्यनाभिनःशिष्यः कौशल्यस्यमहा
त्मनः७५चतुर्विंशतिधायेन प्रोक्तावैसामसंहिताः ।स्मृतास्तेप्राच्यसामानःकार्तानामेहसा
मगाः ७६कार्तिरुग्रायुधःसोवै महापौरववर्द्धनः।बभूवयेनविक्रम्यपृथुकस्यपिताहतः ७७
नीलोनाममहाराजःपञ्चालाधिपतिर्वशी । उग्रायुधस्यदायादःक्षेमोनाममहायशाः ७८
क्षेमात्सुनीथःसंजज्ञे सुनीथस्यनृपञ्जयः । नृपञ्जयाच्चविरथ इत्येतेपौरवाःस्मृताः७९॥

इतिश्रीमत्स्यपुराणेपौरववंशवर्णनोनामैकोनपञ्चाशत्तमोध्यायः ४९ ॥

(सूत उवाच)अजमीढस्यनीलिन्यां नीलःसमभवन्नृपः ।नीलस्यतपसोग्रेणसुशान्ति
रुपपंद्यत१पुरुजानुःसुशान्तेस्तु पृथुस्तुपुरुजानुतः । भद्राश्वःपृथुदायादोभद्राश्वतनया
न्शृणु २मुद्गलश्चजयश्चैव राजाबृहदिषुस्तथा। जवीनरश्चविक्रान्तः कपिलश्चैवपञ्च
मः३पञ्चानाञ्चैवपञ्चालानेतान् जनपदान्विदुः ।पञ्चालंरक्षिणोह्येते देशानामितिनः
श्रुतम् ४ मुद्गलस्यापिमौद्गल्याः क्षत्रोपेताद्विजातयः । एतेह्याङ्गिरसःपक्षं संश्रिताःकाण्व
मुद्गलाः ५ मुद्गलस्यसुतोजज्ञे ब्रह्मिष्ठःसुमहायशाः । इन्द्रसेनःसुतस्तस्य विन्ध्याश्वस्त
स्यचात्मजः ६ विन्ध्याश्वान्मिथुनंजज्ञे मेनकायामितिश्रुतिः । दिवोदासश्चराजर्षिरह
ल्याचचयशस्विनी ७ शरद्वतस्तुदायादमहल्यासम्प्रसूयत । शतानन्दमृषिश्रेष्ठं तस्या
पिसुमहातपाः ८ सुतःसत्यधृतिर्नाम धनुर्वेदस्यपारगः । आसीत्सत्यधृतेःशुक्रममोघं

पौरवका पुत्र राजा रुक्मरथहुआ रुक्मरथ के सुपार्श्वनाम राजा होताभया ७३ सुपार्श्वकापुत्रबड़ा
धर्मिष्ठ सुमतिनामहुआ सुमति के महात्मा सन्नतिमानहुआ ७४ सन्नतिमान् के कृतनाम पुत्रहुआ
वह हिरण्यनाभि कौशल्यमहात्मा का शिष्यहुआ ७५ इसकृतने चौबीसप्रकार की सामसंहिताकही
है उस सामके गानेवालों का नाम कार्त्तसंज्ञक सामगहुआ है ७६ कृतकापुत्र उग्रायुध जोहुआ वह
महापौरववंश का बढ़ानेवाला हुआ उसीने अपने पराक्रम से पृथुक के पिताको मारा ७७ वह
पृथुकका पिता नीलनाम से विख्यात पंजाबकाराजाथा और उग्रायुधका पुत्र महायशवाला क्षेम
हुआ ७८ क्षेम के सुनीथहुआ सुनीथ के नृपंजयंहुआ और नृपंजय के विरथ हुआ इस प्रकारसे यह
पौरव राजा हुए हैं ७९ ॥ इतिश्रीमत्स्यपुराणभाषाटीकायामेकोनपञ्चाशत्तमोऽध्यायः ४९ ॥

सूतजीबोले कि हे ऋषियो अजमीढ़के नीलिनीनाम रानीमें नीलनाम पुत्रहुआ नीलके उग्रतप
करके सुशान्तिनाम पुत्रहुआ १ सुशान्तिके पुरुजानु हुआ पुरुजानुके पृथुहुआ पृथुका पुत्र भद्राश्व
हुआ हे ऋषिलोगो अब भद्राश्वके पुत्रोंको सुनो २ मुद्गल—जय-वृहदिषु-जवीनर और कपिल यह
पांचपुत्र हुए ३ यह पांचों पंजाबके पांचोंदेशोंके राजाहुए और धर्म से पंजावकी रक्षाकरतेभये सूत-
जी कहतेहैं कि हमने यहसुनाहै४ कि इनमेंसे मुद्गलके मौद्गल जो विख्यातहुए वह क्षत्रधर्म युक्त
ब्राह्मणहुए यह मौद्गल और पूर्वकहेहुए काण्व दोनों अंगिराके पक्षके आश्रयहोते भये ५ मुद्गल
के महायशी ब्रह्मिष्ठनाम पुत्रहुआ उसकापुत्र इन्द्रसेनहुआ उसकापुत्र विंध्याश्व हुआ ६ विंध्याश्व
के मेनका नामरानीमें राजर्षि दिवोदास और एक महायशवाली अहल्यानाम पुत्रीहुई ७ अहल्या
के शरद्वान् से ऋषियों में श्रेष्ठ महातपवाले शतानन्द हुए ८ शतानन्द के सत्यधृति पुत्रहुआ यह

धार्मिकस्यतु ९ स्कन्नंरेतःसत्यधृतेर्दृष्ट्वा चाप्सरसंजले । मिथुनंतत्रसम्भूतं तस्मिन्स
रसिसम्भृतम् १० ततःसरसितस्मिंस्तु क्रममाणंमहीपतिः । दृष्ट्वाजग्राहकृपया शन्त
नुर्मृगयांगतः ११ एतेशरद्वतःपुत्राआख्यातागौतमावराः । अतऊर्ध्वंप्रवक्ष्यामि दिवो
दासस्यवैप्रजाः १२ दिवोदासस्यदायादो धर्मिष्ठोमित्रयुर्नृपः । मैत्रायणावरःसोऽथ मैत्रे
यस्तुततःस्मृतः १३ एतेवंश्यायतेःपक्षाः क्षत्रोपेतास्तुभार्गवाः । राजाचैद्यवरोनाम मैत्र
यस्यसुतःस्मृतः १४ अथचैद्यवरात्विद्वान्सुदासस्तस्यचात्मजः । अजमीढःपुनर्जातः
क्षीणेवंशेतुसोमकः १५ सोमकस्यसुतोजन्तुर्हतेतस्मिन् शतं बभौ । पुत्राणामजमीढ़स्य
सोमकस्यमहात्मनः १६ महिषीत्वजमीढ़स्य धूमिनीपुत्रवर्द्धिनी । पुत्राभावेतपस्तेपे श
तंवर्षाणिदुश्चरम् १७ हुत्वाग्निंविधिवत्सम्यक् पवित्रीकृतभोजना । अग्निहोत्रक्रमेणै
व सासुष्वापमहाव्रता १८ तस्यांवैधूमवर्णायामजमीढ़ःसमीयिवान् । ऋक्षंसाजनया
मास धूमवर्णंशताग्रजम् १९ ऋक्षात्संवरणोजज्ञे कुरुःसंवरणात्ततः । यःप्रयागमति
क्रम्य कुरुक्षेत्रमकल्पयत् २० कृष्यतस्तुमहाराजो वर्षाणिसुबहून्यथ । कृष्यमाणस्ततः
शक्रो भयात्तस्मैवरन्ददौ २१ पुण्यञ्चरमणीयञ्च कुरुक्षेत्रन्तुतत्स्मृतम् । तस्यान्ववा
यःसुमहान् यस्यनाम्नातुकौरवाः २२ कुरोस्तुदयिताःपुत्राः सुधन्वाजह्नुरेवच । परीक्षि
च्चमहातेजाः प्रजनश्चारिमर्दनः २३ सुधन्वनस्तुदायादः पुत्रोमतिमतांवरः । च्यवन

धनुर्विद्याका बड़ाज्ञाताहुआ इस धार्मिक सत्यधृतिका अमोघवीर्य्य होताभया ९ इससत्यधृतिका
वीर्य्य अप्सराको देखकर जलमें गिरा उसजलगतवीर्य्यसे सरोवरमें एकपुत्र और पुत्री यह दोउत्पन्न
हुए १० फिर उसीसमयमें राजा शन्तनुशिकारको गया वहाँ सरोवरमें उस पुत्र पुत्रीके जोड़ेको देख
कृपाकरके ले आताभया ११ यह सब शरद्वान्के पुत्र गौतमवर विख्यातहुए अब इसकेपीछे सूतजी
दिवोदासकी संतानकावर्णन करतेभये १२ दिवोदासका पुत्र बड़ा धार्मिष्ठ मित्रयुहुआ और मित्रयुके
मैत्रेय पुत्र हुआ १३ यह सब क्षत्र जातियुक्त भार्गवहुए मैत्रेयकापुत्र राजा चैद्यवर नाम होताभया
१४ चैद्यवरका पुत्र विद्वान् सुदासहुआ सुदासके दूसरा अजमीढ़ हुआ अजमीढ़ के सोमकहुआ १५
सोमक के जन्तुनाम पुत्र हुआ और अजमीढ़के पुत्रोंके मध्यमें महात्मा सोमकहुआ १६ जब सोमक
मारागया तब अजमीढ़कीरानी धूमिनी पुत्रके बढ़ानेवाले पुत्रके अभावसे महादुष्कर तप करतीभई
१७ वह धूमिनी विधिवत् अग्निमें अग्निहोत्रादि कर्मसे और पवित्र भोजनादिकोकर महाव्रतमें संयुक्त होकर सोतीभई १८ और उस धूम्रवर्णासे अजमीढ़ विषय करताभया तब वह धूम्रवर्ण ऋक्ष
को जन्मती भई यह ऋक्ष बड़ा पराक्रमी हुआ १९ ऋक्षसे संवरण हुआ संवरणसे कुरुहुआ जो कुरु
कि प्रयागको उल्लंघन करके कुरुक्षेत्रको रचताभया २० यह महाराज बहुत बर्षतक इन्द्रके आवाहन
के लिये तपकरताभया तब भयसे इन्द्र उसकेपास आकर उसकोवर देताभया २१ इसीसे कुरुक्षेत्र
महापवित्र और रमणीय कहाहै उस कुरुकेवंशकी वृद्धि हुई जिसकेनामसे कौरव कहाते हैं २२ कुरु
के प्रियपुत्र सुधन्वा--जह्नु--परीक्षित्--प्रजन और अरिमर्द्दन यह पांचों महातेजस्वी और धर्मात्मा
हुएहैं २३ इनमें सुधन्वाका पुत्र बुद्धिमानोंमें श्रेष्ठ च्यवनहुआ च्यवनकापुत्र धर्म अर्थका जाननेवाला

स्तस्यपुत्रस्तु राजाधर्मार्थतत्त्ववित् २४ च्यवनस्यकृमिःपुत्र ऋक्षाज्जज्ञेमहातपाः । कृ
मेःपुत्रोमहावीर्यः ख्यातइन्द्रसमोविभुः २५ चैद्योपरिचरोवीरो वसुर्नामान्तरिक्षगः । चै
द्योपरिचराज्जज्ञे गिरिकासप्तवैसुतान् २६ महारथोमगधराट् विश्रुतोयोबृहद्रथः । प्र
त्यश्रवाःकुशश्चैव चतुर्थोहरिवाहनः २७ पञ्चमश्चयजुश्चैव मत्स्यःकालीचसप्तमी ।
बृहद्रथस्यदायादः कुशाग्रोनामविश्रुतः २८ कुशाग्रस्यात्मजश्चैव वृषभोनामवीर्यवान् ।
वृषभस्यतुदायादः पुण्यवान्नामपार्थिवः २९ पुण्यःपुण्यवतश्चैव राजासत्यधृतिस्ततः ।
दायादस्तस्यधनुषस्तस्मात् सर्वश्चजज्ञिवान् ३० सर्वस्यसम्भवःपुत्रस्तस्माद्राजाबृह
द्रथः । द्वेतस्यशकलेजातेजरयासन्धितश्चसः ३१ जरयासान्धितोयस्माज्जरासन्धस्ततः
स्मृतः । जेतासर्वस्यक्षत्रस्यजरासन्धोमहाबलः ३२ जरासन्धस्यपुत्रस्तुसहदेवःप्रतापवान्
सहदेवात्मजःश्रीमान्सोमवित्समहातपाः ३३ श्रुतश्रवास्तुसोमादेर्मागधाःपरिकीर्तिताः ।
जह्नुस्त्वजनयत्पुत्रंसुरथंनामभूमिपम् ३४ सुरथस्यतुदायादो वीरोराजाविदूरथः । विदू
रथसुतश्चापिसार्वभौमइतिस्मृतः ३५ सार्वभौमाज्जयत्सेनोरुचिरस्तस्यचात्मजः । रुचि
रात्तुततोभौमस्त्वरितायुस्ततोऽभवत् ३६ अक्रोधनस्त्वायुसुतस्तस्माद्देवातिथिःस्मृतः ।
देवातिथेस्तुदायादो दक्षएवबभूवह ३७ भीमसेनस्ततोदक्षात् दिलीपस्तस्यचात्मजः ।
दिलीपस्यप्रतीपस्तु तस्यपुत्रास्त्रयःस्मृताः ३८ देवापिःशन्तनुश्चैव बाह्लीकश्चैवतेत्र
यः । बाह्लीकस्यतुदायादाः सप्तबाह्लीश्वरानृप! । देवापिस्तुह्यपध्यातः प्रजाभिरभवन्
मुनिः ३९ (मुनयऊचुः) प्रजाभिस्तुकिमर्थंवै अपध्यातोजनेश्वरः । कोदोषोराजपुत्रस्य

ऋक्षहुआ ऋक्षका पुत्र बड़ातपस्वी कृमिनामपुत्रहुआ कृमिके इन्द्रके समान प्रसिद्धशूरबीरमहावीर्य अन्तरिक्षमें चलनेवाला चैद्योपरिचरनामपुत्रहुआ जिसका दूसरानाम वसुकहतेहैं उसचैद्योपरिचरसे गिरिकानाम रानी सातपुत्रोंको उत्पन्न करतीभई उनकेनाम महारथ मगधका राजाबृहद्रथ १ प्रत्यश्रवा २ कुश ३ हरिवाहन ४ यजु ५ मत्स्य ६ और सातवीं कालीनाम कन्याहुई इनमें वृहद्रथकापुत्र कुशाग्रनामहुआ २४।२८कुशाग्रकापुत्र वीर्य्यमान् वृषभनामहुआ वृषभका पुत्र राजापुण्यवान्हुआ २९ पुण्यवान्के पुण्यनाम राजाहुआ उसकापुत्र सत्यधृति सत्यधृतिके धनुषनाम और धनुषनामके सर्वनाम वाला पुत्रहुआ ३० सर्वका संभव नाम पुत्रहुआ उसका पुत्रराजा वृहद्रथहुआ राजावृहद्रथ केपुत्रके दोखण्डहुए उनदोनोंखण्डोंको जरा नाम राक्षसीने जोड़दिया ३१ तबजराके जोड़देनेसे उसका नामजरासन्ध हुआ वहसब क्षत्रियोंका जीतनेवाला औरमहापराक्रमीहुआ ३२ जरासन्धका पुत्र प्रतापवान् सहदेव हुआ सहदेवके पुत्रश्रीमान् और बड़ा तपस्वी सोमवित् हुआ ३३ श्रुतश्रवा और सोमादिसे मागधराजा कहेगये हैं और राजा जह्नुकापुत्र सुरथनाम राजाहुआ ३४सुरथका पुत्रराजा विदूरथहुआ बिदूरथकापुत्र सार्वभौमनामराजा हुआ ३५ सार्वभौम के जयत्सेन हुआ उसका पुत्र रुचिरनामहुआ रुचिरके भौमहुआ उसकापुत्र त्वरितायुनामहुआ ३६ उसके अक्रोधन अक्रोधनके देवातिथि और देवातिथिका पुत्र दक्षहोताभया ३७ दक्षसेभीमसेन उसकापुत्र दिलीपहुआ दिलिपकापुत्र प्रतीपहुआ ३८उसकेदेवापि शन्तनु और वाह्लीक यहतीनपुत्रहुए हेराजा इनमें वाह्लीक के

विषायमारुतायैव तुभ्यंदेवात्मनेनमः १५७ अग्नीषोमविधिज्ञाय पशुमन्त्रौषधायच। स्व
यम्भुवेह्यजायैव अपूर्वप्रथमायच। प्रजानांपतयेचैव तुभ्यंब्रह्मात्मनेनमः १५८ आत्मे
शायात्मवश्याय सर्वेशातिशयायच। सर्वभूतांगभूताय तुभ्यंभूतात्मनेनमः १५९ निर्गु
णायगुणज्ञाय व्याकृतायामृतायच। निरुपाख्यायामित्राय तुभ्यंसांख्यात्मनेनमः १६०
पृथिव्यैचान्तरिक्षाय दिव्यायचमहायच। जनस्तपायसत्याय तुभ्यंलोकात्मनेनमः १६१
अव्यक्तायचमहते भूतादेरिन्द्रियायच। आत्मज्ञायविशेषाय तुभ्यंसर्वात्मनेनमः १६२
नित्यायचात्मलिंगाय सूक्ष्मायैवेतरायच। बुद्ध्यायविभवेचैव तुभ्यंमोक्षात्मनेनमः १६३
नमस्तेत्रिषुलोकेषु नमस्तपरतस्त्रिषु। सत्यान्तेषुमहाद्येषु चतुर्षुचनमोऽस्तुते १६४ नम
स्तोत्रेमयाह्यस्मिन् यदिनव्याहृतंभवेत्। मद्भक्तइतिब्रह्मण्य तत्सर्वंक्षन्तुमर्हसि १६५
(सूत उवाच) एवमाभाष्यदेवेश मीड्वरंनीललोहितम्। प्रह्वोऽभिप्रणतस्तस्मै प्राञ्ज
लिर्वाग्यतोऽभवत् १६६ काव्यस्यगात्रंसंस्पृश्य हस्तेनप्रीतिमान्भवः। निकामंदर्शनंद
त्त्वा तत्रैवान्तरधीयत १६७ ततःसोऽन्तर्हितेतस्मिन् देवेशेऽनुचरीन्तदा। तिष्ठन्तींपा
र्श्वतोदृष्ट्वा जयन्तीमिदमब्रवीत् १६८ कस्यत्वंसुभगे! कावा दुःखितेमयिदुःखिता। म
हतातपसायुक्ता किमर्थंमांनिषेवसे १६९ अनयासंस्तुतोभक्त्या प्रश्रयेणदमेनच। स्ने
हेनचैवसुश्रोणि! प्रीतोऽस्मिवरवर्णिनि! १७० किमिच्छसिवरारोहे! कस्तेकामःसमृ

त्वष्टा,धाता,कर्त्ता,चक्षु,श्रोत्रमय,भूतभव्यभवेश,कर्मकी आत्मा ऐसे रूपवाले तुमको० १५६ वसु
साध्य,रुद्र,आदित्य,सुर,विष,मारुत , देवात्मा इनरूपोंवाले तुमको० १५७ अग्नीषोम यज्ञविधि के
जाननेवाले,पशु,मंत्र,औषध,स्वयंभू,अज,अपूर्व,प्रथम,प्रजाकेपति , ब्रह्मात्मा ऐसे तुम्हारे अर्थ न०
१५८ आत्मेश,आत्मवश्य,सर्वेश,अतिशय,सर्वभूतांगभूत, भूतात्मा इन रूपोंवाले तुम्हारे अर्थ न०
१५९ निर्गुण,गुणज्ञ, व्याकृत,अमृत,निरुपाख्य,मित्र,सांख्यात्मा इनरूपोंवाले तुमको न० १६०
पृथिवी,अंतरिक्ष,दिव्य,महान्स्वरूप , जन,तप,सत्य इनलोकों के आत्मा ऐसे स्वरूपोंवाले तुम्हारे
अर्थ नमस्कार है १६१ अव्यक्त,महत्, भूतादि, इन्द्रिय, आत्मज्ञ, विशेष,सर्वात्मा, ऐसे तुम्हारे अर्थ
नमस्कार है १६२ नित्य, आत्मालिंग, सूक्ष्म, इतर, बुध्य, विभु, मोक्षात्मा ऐसे तुम्हारे अर्थ नमस्कार है १६३ तीनोंलोकों में रहनेवाले, तथा तीनोंलोकोंसे भी परे, सत्य आदि चार महालोकों
में रहनेवाले ऐसे तुम्हारे अर्थ नम० १६४ और हे शिवजी इसस्तोत्रमें जो मुझसे कछु आपका
स्वरूप वर्णननहीं कियागयाहो उसको आप अपना भक्तजानके सबक्षमाकरो आपब्रह्मण्यहो १६५
सूतजीबोले इस प्रकार नीललोहित देवेश महादेव को प्रणामकर अंजली बाँधकर मौन होकर
स्थित होताभया १६६ तब शिवजी प्रसन्न होकर अपने हाथसे शुक्रजी के अंगको स्पर्शकर और उत्तम
दर्शन देकरके वहीं अन्तर्द्धान होगये १६७ इसके अनन्तर जब कि शिवजी अन्तर्द्धान होगये तबसमीप
में खड़ीहुई उस जयन्ती अनुचरी से शुक्रजी यह वचन कहतेभये १६८ हे सुभगे तू किसकी कौनहै
जो तू मेरे दुखितहोने में दुखितहोरहीहै तू इस महातपसेयुक्त होकर मुझको किस हेतुसे सेवती है
१६९ हे सुश्रोणि उत्तम वर्णवाली तेरी इस भक्ति विनय दमन और स्नेहसे मैं प्रसन्न होगयाहूं १७०

ह्यताम्। तत्तेसंपादयाम्यद्य यद्यपिस्यात्सुदुष्करः १७१ एवमुक्ताब्रवीदेनं तपसाज्ञा
तुमर्हसि। चिकीर्षितंहिमेब्रह्मन्! त्वंहिवेत्थ यथातथम् १७२ एवमुक्तोऽब्रवीदेनां दृष्ट्वा
दिव्येनचक्षुषा। मयासहत्वंसुश्रोणि! दशवर्षाणिभामिनि! १७३ देवि! चेन्दीवरश्या
मे! वरार्हे! वामलोचने!। एवंवृणोषिकामंत्वं मत्तोवैवल्गुभाषिणि! १७४ एवंभवतुग
च्छामो गृहान्नोमत्तकाशिनि!। ततःस्वगृहमागत्य जयन्त्याःपाणिमुद्वहन् १७५ तयास
हावसद्देव्या दशवर्षाणिभार्गवः। अदृश्यःसर्वभूतानां माययासंवृतःप्रभुः १७६ कृतार्थ
मागतंदृष्ट्वा काव्यंसर्वेदितेःसुताः। अभिजग्मुर्गृहंतस्य मुदितास्तेदिदृक्षवः १७७ य
दागतानपश्यन्ति माययासंवृतंगुरुम्। लक्षणंतस्यतद्बुद्ध्वा प्रतिजग्मुर्यथागतम् १७८
बृहस्पतिस्तुसंरुद्धं काव्यंज्ञात्वावरेणतु। तुष्ट्यर्थंदशवर्षाणि जयन्त्याहितकाम्यया १७९
बुद्ध्वातदन्तरंसोपि दैत्यानामिन्द्रनोदितः। काव्यस्यरूपमास्थाय असुरान्समुपाह्वयत्
१८० ततस्तानागतान्दृष्ट्वा बृहस्पतिरुवाच ह। स्वागतंममयाज्यानांप्राप्तोऽहंवोहिता
यच १८१ अहंवोऽध्यापयिष्यामिविद्याःप्राप्तास्तु या मया। ततस्तेहृष्टमनसोविद्यार्थमुप
पेदिरे १८२ पूर्णेकाव्यस्तदातस्मिन् समयेदशवार्षिके। समयान्तेदेवयानीतदोत्पन्नाइति

हे बरारोहे तू क्या इच्छा करती है क्या तेरे कामबढ़रहा है चाहे जैसा दुष्करभी जो तेराकाम होगा
उसको भी मैं अवश्य करूंगा १७१ ऐसे वचन सुनकर वह जयन्ती बोली हेब्रह्मन् आप अपने तप
केही प्रभावसे मेरे मनोरथ को जानलीजिये १७२ जयन्ती के इस वचनको सुनकर शुक्रजी दिव्य
दृष्टिसे देखकर इससे बोले कि हे भामिनि तू दशवर्षतक मेरे साथ रमणकर हेइन्दीवरश्यामे बाम
लोचने हे सुन्दर बोलनेवाली तैंने यहीकाम मुझसे वराहै १७३। १७४ अर्थात् यहकामना मुझसे
मांगी है सो इसीप्रकारसे होगा हमारे घरकोचलो फिर अपने घरमें लाकर शुक्रजी ने अपना विवाह
जयन्तीकेसाथ किया १७५ फिर शुक्राचार्य्यजी उस देवीके साथ दशबर्षतक रमण करने के निमित्त
अपनी माया से ऐसे आच्छादित होगये कि किसीको नहीं दीखे १७६ तदनन्तर अपने प्रयोजनको
सिद्धकरके शुक्राचार्य्यको आयाहुआ जानकर सब दैत्य प्रसन्न होकर शुक्राचार्य्य के स्थानपर उनके
दर्शन करनेको जातेभये १७७ फिर वहाँ जाकर मायासे आच्छादितहुए अपनेगुरू शुक्राचार्य्य को
नहींदेखा उससमय उसके लक्षण न जानकर उलटेही चलेआये १७८ फिर इसप्रकार से रुकेहुए
शुक्राचार्य्यको बृहस्पतिजी जानगये कि शुक्राचार्य्य जयन्तीके हितके निमित्त दशबर्षतक इसीप्रकार
से आच्छादित रहैंगे फिर सब देवताभी बृहस्पतिजीके द्वारा जानकर विचार करनेलगे और दैत्योंके
उस छिद्रको जानकर बृहस्पतिजी से कहनेलगे कि अब आप हमारा कुछकार्य्य कीजिये तबदेवता
ओंसे प्रेरितहोकर बृहस्पतिजी शुक्राचार्य्यकारूप धरके दैत्योंको बुलातेभये १७९।१८० फिरसमीप
में आयेहुए दैत्योंसे बृहस्पतिजी ने उसी शुक्रकेरूपके द्वारा कहा कि हे मेरे यजमान लोगो तुम्हारा
आना श्रेष्ठहै मैंभी तुम्हारेही हितके निमित्त यहाँ आयाहूं १८१ जो मैंने शिवजीसे विद्यापढ़ीहै वहमैं
तुमको पढ़ाऊंगा तब वह दैत्य प्रसन्नहोकर विद्यापढ़नेका प्रारम्भ करतेभये १८२ फिर दशबर्ष व्य-
तीतहोनेपर शुक्राचार्य्यभी जयन्तीकेभोगोंसे निवृत्तहोगये और सुनाजाताहै कि उसी जयन्ती में देव-

श्रुतिः । बुद्धिंचक्रेततःसोऽथ याज्यानांप्रत्यवेक्षणे१८३देवि! गच्छाम्यहंद्रष्टुं ममयाज्यान्
शुचिस्मिते ! । विभ्रान्तवीक्षिते ! साध्वि ! त्रिवर्णायतलोचने १८४ एवमुक्ताब्रवीदेनं
भजभक्तान् महाव्रत ! । एषधर्म्मःसतांब्रह्मन् ! नधर्मलोपयामिते १८५ ततोगत्वासुरान्
दृष्ट्वा देवाचार्येणधीमता । वञ्चितान्काव्यरूपेण ततःकाव्योऽब्रवीत्तुतान् १८६ काव्यंमां
वोविजानीध्वन्तोषितोगिरिशोविभुः । वञ्चितावतयूयंवैसर्वेंश्रृणुतदानवाः! १८७ श्रुत्वात
थाब्रुवाणन्तंसंभ्रांतास्तेतदाऽभवन् । प्रेक्षन्तस्तावुभौतत्रस्थितासीनौसुविस्मिताः १८८ स
म्प्रमूढास्ततःसर्वें नप्राबुध्यन्तकिञ्चन । अब्रवीत्सम्प्रमूढेषु काव्यस्तानसुरांस्तदा १८९
आचार्योवोह्यहंकाव्यो देवाचार्योऽयमङ्गिराः । अनुगच्छतमांदैत्यास्त्यजतैनंबृहस्पतिम्
१९० इत्युक्ताह्यसुरास्तेन तावुभौसमवेक्ष्यच । यदासुराविशेषन्तु नजानन्त्युभयोस्त
योः १९१ बृहस्पतिरुवाचैनान संभ्रान्तस्तपोधनः । काव्योवोऽहंगुरुर्दैत्या ! मद्रूपोऽयंबृ
हस्पतिः १९२ संमोहयतिरूपेण मामकेनैषवोऽसुराः ! । श्रुत्वातस्यततस्तेवै समेत्यतु
ततोऽब्रुवन् १९३ अयंनोदशवर्षाणि सततंशास्तिवैप्रभुः । एषवैगुरुरस्माकमन्तरेस्फु
रयन्द्विजः १९४ ततस्तेदानवाःसर्वे प्रणिपत्याभिनन्द्यच । वचनञ्जगृहुस्तस्य चिराभ्या
सेनमोहिताः १९५ ऊचुस्तमसुराःसर्वे क्रोधसंरक्तलोचनाः । अयंगुरुर्हितोऽस्माकं ग

यानी कन्या उत्पन्नहुई फिर शुक्राचार्य्यजी अपने यजमान दैत्यलोगोंके ढूँढनेमें बुद्धिकरतेभये १८३
और जयन्तीसे कहा हे देविसुन्दरहास्यवाली कटाक्षसे देखनेवाली साध्वी और विस्तृत नेत्रोंवाली
मैं अपने यजमान दैत्योंके देखनेको जाताहूं १८४ ऐसा उनका वचन सुनकर जयन्तीने कहा कि हे
महाव्रतवाले आप अपने भक्तोंके ढूँढनेको जाइये हे ब्रह्मन् श्रेष्ठ पुरुषोंका यही धर्म है मैं आपके ब्रतका
लोप नहीं करसक्ती १८५ तब शुक्राचार्य्यने बृहस्पतिसे ठगेहुए अपने दैत्योंको जानके उनदैत्यों
से यह वचनकहा १८६ कि हे दानवलोगो मुझको तुम शुक्राचार्य्य जानो मैंनेही शिवजीको प्रसन्न
कियाहै तुम सबको बृहस्पतिने ठगलिया है १८७ इसप्रकारसे कहतेहुए शुक्रके वचनोंको सुनकर
वह सबदैत्य भ्रांतचित्तसे आश्चर्य्यित होके उनदोनों बैठेहुओंको देखतेभये १८८ उससमय अज्ञान
को प्राप्तहोकर वह दैत्य कुछभी न कहसके और निश्चयभी नहीं करसके तब उन मूर्खदैत्योंसे शुक्राचार्य्यनेकहा
१८९ हे दैत्यो मैं शुक्र तुम्हारा आचार्य्यहूं और यह देवताओंका आचार्य्य बृहस्पति है
तुम इस बृहस्पतिको त्यागकरमेरे साथचलो १९० यह सुनकर वह सबदैत्य उनदोनोंको देखतेभये
परन्तुदोनोंमें कुछभी भेदनहीं जाना १९१ उससमय वह तपोधन बृहस्पतिजी शीघ्रही उनदैत्योंसे
बोले कि हे दैत्यो तुम्हारा गुरूशुक्राचार्य्य मैंहूं यह तो मेरारूप बनाकर बृहस्पति आयाहै १९२ हे
दैत्यो यह बृहस्पति मेरा रूपधरके तुमको छलताहै ऐसे उन बृहस्पतिजीके वचनको सुनकर वहसब
दैत्य परस्पर संयुक्त होकर बतरानेलगे १९३ कि यह प्रभु हमलोगोंको दशबर्षसे पढ़ारहाहै हमारे
अन्तष्करणसे यही द्विज हमारा गुरूमालूम होताहै १९४ फिर वह सबदैत्य उस बृहस्पतिको प्रणामकर
उनकेही कहेहुए वचनको ग्रहणकरके प्रमाण करतेभये क्योंकि बहुत दिनोंके अभ्याससे मोहित
होरहेथे १९५ इसके पीछे वह सब दैत्य उनशुक्रजीसे बड़े क्रोधपूर्वक लालनेत्र करके बोले कि

च्छत्वंनासिनोगुरुः १९६ भार्गवोवांगिरावापि भगवानेषनोगुरुः। स्थितावयंनिदेशेऽस्य
साधुत्वंगच्छमाचिरम् १९७ एवमुक्त्वासुराःसर्वे प्रापद्यन्तबृहस्पतिम्। यदानप्रतिपद्य
न्तकाव्येनोक्तंमहद्धितम् १९८ चुकोपभार्गवस्तेषामवलेपेनतेनतु। बोधिताहिमया
यस्मान्नमांभजथदानवाः! १९९ तस्मात्प्रनष्टसंज्ञावै पराभवमवाप्स्यथ। इतिव्याहृत्य
तान्काव्यो जगामाथयथागतम् २०० शप्तांस्तानसुरान्ज्ञात्वा काव्येनसबृहस्पतिः।
कृतार्थःसतदाहृष्टः स्वरूपंप्रत्यपद्यत २०१ बुध्याऽसुरान्हतान्ज्ञात्वा कृतार्थोऽन्तरधीय
त। ततःप्रणष्टेतस्मिंस्तु विभ्रान्तादानवाभवन् २०२ अहोविवञ्चिताःस्मेति परस्पर
मथाब्रुवन्। पृष्ठतोऽभिमुखाश्चैव ताडिताङ्गिरसेनतु २०३ वञ्चिताःसोपधानन स्वेस्वे
वस्तुनिमायया। ततस्त्वपरितुष्टास्ते तमेवत्वरिताययुः। प्रह्लादमग्रतःकृत्वा काव्यस्या
नुपदम्पुनः २०४ ततःकाव्यंसमासाद्य उपतस्थुरवाङ्मुखाः। समागतान्पुनर्दृष्ट्वा का
व्योयाज्यानुवाचह २०५ मयासम्बोधिताःसर्वे यस्मान्मानाभिनन्दथ। ततस्तनावमाने
न गतायूयंपराभवम् २०६ एवंब्रुवाणंशुक्रन्तु वाष्पसन्दिग्धयागिरा। प्रह्लादस्तन्तदो
वाच मानत्वन्त्यजभार्गव! २०७ स्वाश्रयान्भजमानांश्च भक्तान्स्त्वम्भजभार्गव!।
त्वय्यदृष्टेवयंतेन देवाचार्य्येणमोहितान्। भक्तानर्हसिवैज्ञातुं तपोदीर्घेणचक्षुषा २०८

यही हमारा हितकारी गुरू है तूहमारा गुरूनहीं है इसीसे चलाजा १९६ यह चाहै शुक्रहै वा बृह-
स्पति है परन्तु यही हमारा गुरू है हमतो अच्छे प्रकारसे इसीके समीप स्थित हैं और सदैव रहैंगे
तू यहाँसे शीघ्रही चलाजा देरन कर १९७ ऐसे कहके वह सब दैत्य बृहस्पतिजीकोही प्राप्त होते
भये जब कि शुक्रसे कहेहुए अपने हितको वह दैत्य नहीं प्राप्तहुए तब शुक्राचार्य्यने क्रोध करके उन
को यह शाप दिया कि हे दानवो जो कि मेरे बोधकरानेपर भी तुम सब अभिमान करके मेरे पास
नहीं आये इस हेतुसे तुम्हारा ज्ञान नष्ट होजायगा और देवताओंसे तुम्हारी हारहोवेगी ऐसा शाप
असुरोंको देके शुक्राचार्य्य जैसे आयेथे वैसेही चलेगये १९८।२०० तब बृहस्पतिजी शुक्रसे शापित
हुए दैत्योंको जानकर बड़े कृतार्थ हुए और अपने प्रयोजनको सिद्धकरके फिर अपने निजस्वरूपको
प्राप्तहोगये अर्थात् अपनावही बृहस्पतिका रूप बनालिया २०१ और बुद्धिसे दैत्योंको हतजान
कृतार्थहो अन्तर्द्धान होगये और उस शुक्रके रूपको दूर करदिया इसके नष्टहोजाने के पीछे दानवों
को भ्रमहोगया २०२ तब परस्परमें कहनेलगे कि बड़े आश्चर्य्यकी बातहै कि हमको बृहस्पति ने
ठगलिया और शापित करदिया २०३ यह जानकर बड़े अप्रसन्न होके शीघ्रता पूर्वक प्रह्लादको
आगेकरके सबदैत्य शुक्रजीके समीपगये २०४ फिर उन शुक्रजीको प्राप्तहो नीचे मुखकर उनकी स्तुति
करनेलगे तब आयेहुए शिष्योंको देखकर शुक्रजीकहनेलगे २०५ कि हे असुरदैत्यो मेरे शिष्यहोकर जो
तुमनेमुझे निन्दितकिया इसीअपराधसे तुमसब तिरस्कारको प्राप्तहुए २०६ शुक्रजीके इसवचनको
सुनकर आंसुओं से भरे नेत्र और रुकीहुई गद्गद वाणीसे प्रह्लादने कहा कि हे भार्गवजी आप सब
दैत्योंसमेत मुझको मत त्यागो २०७ और आपके आश्रयमें आपकेही भजनेवाले हमभक्तोंको आप
शरणदें और आपके नहीं देखनेसे उस बृहस्पति से मोहितहुए हमलोगोंको हेदीर्घचक्षुवे आपजानने

यदिनस्त्वंनकुरुषे प्रसादम्भृगुनन्दन!।अपध्यातास्त्वयाह्यद्य प्रविशामोरसातलम्२०९
ज्ञात्वाकाव्योयथातत्त्वं कारुण्यादनुकम्पया । एवम्प्रत्यनुनीतोवै ततःकोपंनियम्यसः ।
उवाचैतान्नभेतव्यं नगंतव्यंरसातलम्२१० अवश्यंभाविनोह्यर्थाः प्राप्तव्यामयिजाग्रति।
नशक्यमन्यथाकर्तुं दिष्टंहिबलवत्तरम् २११संज्ञाप्रणष्टायावोऽद्यतामेतांप्रतिपत्स्यथ। दे
वान्जित्वासकृच्चापि पातालम्प्रतिपत्स्यथ २१२ प्राप्तेपर्यायकालेच हीतिब्रह्माभ्यभाष
त । मत्प्रसादाच्चत्रैलोक्यं भुक्तंयुष्माभिरूर्जितम् २१३ युगाख्यादशसम्पूर्णा देवानाक्र
म्यमूर्द्धनि । एतावन्तञ्चकालंवै ब्रह्माराज्यमभाषत २१४ राज्यंसावर्णिकेतुभ्यं पुनःकि
लभविष्यति । लोकानामीश्वरोभाव्यस्तवपौत्रःपुनर्बलिः २१५ एवंकिलमिथःप्रोक्तः
पौत्रस्तेविष्णुनास्वयम् । वाचाहृतेषुलोकेषु तास्तास्तस्याभवन्किल २१६ यस्मात्प्रवृ
त्तयश्चास्य सकाशादभिसन्धिताः । तस्माद्वृत्तेनप्रीतेन तुभ्यंदत्तंस्वयम्भुवा २१७
देवराज्येबलिर्भाव्य इतिमामीश्वरोऽब्रवीत् । तस्माददृश्योभूतानां कालापेक्षःसतिष्ठति
२१८ प्रीतेनचापरोदत्तो वरस्तुभ्यंस्वयम्भुवा । तस्मान्निरुत्सुकस्त्वंवै पर्यायंसहितो
ऽसुरैः २१९ नहिशक्यंमयातुभ्यं पुरस्ताद्विप्रभाषितुम् । ब्रह्मणाप्रतिषिद्धोऽहं भविष्य
ज्जानताविभो ! २२० इमौचशिष्यौद्वौमह्यं समावेतौबृहस्पतेः । दैवतैःसहसंसृष्टान् स
र्वान्बोधारयिष्यतः २२१ इत्युक्ताह्यसुराःसर्वे काव्येनाक्लिष्टकर्मणा । हृष्टास्तेनययुःसार्द्धं

को योग्यहो २०८ और हेभृगुनन्दनजी जो आप हमलोगोंपर प्रसन्न न होगे तो आपसे तिरस्कारहुए
हम सब पातालमें प्रवेशकरजांयगे २०९ फिर उनके दीन वचनों से दयालुहो शुक्रजी यथावत् तत्त्व
को जानकर अपने प्रज्वलित क्रोधको रोकके यह वचनबोले कि तुमको भय न करनाचाहिये और
पातालमें भी जाना योग्यनहीं है २१० और मेरे चैतन्य होनेवाले अर्थ अवश्य प्राप्तहोने योग्य हैं
और मेरे बलवाले भाग्यको कोई अन्यथा करनेको समर्थ नहीं है २११ और जो तुम्हारी संज्ञा और
बुद्धिनष्टहोगई है उसकोभी तुम प्राप्तहोगे और एकबार देवताओंको जीतकर पातालमें चलेजाओ-
गे २१२ जब वैसाही काल प्राप्तहुआ तब ब्रह्माने प्रह्लादसे कहा कि मेरे प्रसादसे तुमने पूरेदशयुगों
पर्य्यन्त देवताओंको दबाकर ऐसे बढ़ेहुए त्रैलोक्यके भोगोंको भोगाहै तुमको इतनेही समय पर्य्यन्त
मैंनेराज्य करनाकहाथा २१३।२१४ और सावर्णि मन्वन्तरमें फिर तेराराज्यहोगा इसके पीछे तेरे
पोतेराजाबलिको लोकोंके ऐश्वर्य्य समेत राज्यहोगा वहसबलोकोंका राजाहोगा.इसकेपीछेजबविष्णु
भगवान् राजाबलिसे सबलोकोंको हरलेंगे तब सब प्रजा उनकी होजायगी इसहेतुसे तूउनके द्वारा
प्रीति और संधिकर इसवृत्तान्तसे प्रसन्नहोकर ब्रह्मातुझको राज्यदेगा और देवताओंके राज्य पर
बलि होनेवालाहै ऐसामुझसे सब जगत् के ईश्वर शिवजी ने कहा है इसीलिये विष्णुभूतों से
अदृश्यकालकी अपेक्षा करताहुआ स्थितहै २१५।२१८ और हे प्रह्लादप्रसन्नहोकर ब्रह्माने तुझको
देवताओं करके अनुत्साह जानकर २१९ और भी वरदियाहै हे दैत्येश उसवरकोमैं तुझसे कहने को
समर्थ नहींहूं क्योंकि भविष्यत् कालके ज्ञाताब्रह्माने मुझे रोकदियाहै २२० और यहभी कहाहै कि
दोनों शिष्यहमारे समानहैं तुमदेवताओं समेत बृहस्पतिकी सम्पूर्ण विद्याओंको धारण करोगे २२१

प्रह्लादेनमहात्मना २२२ अवश्यम्भाव्यमर्थन्तु श्रुत्वाशुक्रेणभाषितम् । सकृदाशंसमा
नास्तु जयंशुक्रेणभाषितम्।दंशिताःसायुधाःसर्वे ततोदेवान्समाह्वयन् २२३ देवास्तदा
सुरान्दृष्ट्वा संग्रामेसमुपस्थितान् । सर्वेसंभृतसम्भारा देवास्तान्समयोधयन् २२४
देवासुरेतदातास्मिन् वर्तमानेशतंसमाः । अजयन्नसुरादेवांस्ततोदेवाह्यमन्त्रयन् २२५
यज्ञेनोपाह्वयामस्तीततोजेष्यामहेसुरान्।तदोपामन्त्रयन्देवाःशण्डामर्कौतुतावुभौ २२६
यज्ञेचाहूयतौप्रोक्तौत्यजेतामसुरान्द्विजौ। वयंयुवांभजिष्यामःसहजित्वातुदानवान् २२७
एवंकृताभिसन्धीतौशण्डामर्कौसुरास्तथा । ततोदेवाजयंप्रापुर्दानवाश्चपराजिताः २२८
शण्डामर्कपरित्यक्ता दानवाह्यबलास्तथा।एवंदैत्याःपुराकाव्यशापेनाभिहतास्तदा २२९
काव्यंशापाभिभूतास्ते निराधाराश्चसर्वशः । निरस्यमानादेवैश्च विविशुस्तेरसातलम्
२३०एवंनिरुद्यमादेवैःकृताःकृच्छ्रेणदानवाः।ततःप्रभृतिशापेनभृगोर्नैमित्तिकेनतु २३१
जज्ञेपुनःपुनर्विष्णुर्द्धर्मेप्रशिथिलेप्रभुः । कुर्वन्धर्मव्यवस्थानमसुराणाम्प्रणाशनम् २३२
प्रह्लादस्यनिदेशेतु नस्थास्यन्त्यसुराश्चये।मनुष्यबध्यास्तेसर्वे ब्रह्मेतिव्याहरत्प्रभुः २३३
धर्मान्नारायणस्यांशः सम्भूतश्चाक्षुषेऽन्तरे । यज्ञंवैवर्तयामासुर्देवावैवस्वतेऽन्तरे २३४
प्रादुर्भावेततस्तस्य ब्रह्माह्यासीत्पुरोहितः । युगाख्यायाञ्चतुर्थ्यान्तुआपन्नेषुसुरेषुवै २३५

बड़े क्लिष्टकर्मी शुक्रजी के ऐसे वचनों को सुनकर बड़े प्रसन्न होके प्रह्लाद समेत सब दैत्यचले
जाते भये २२२ और उन्हीं आचार्य्यजी से अवश्य होनेवाले अपने प्रयोजनको अर्थात् एकबार
अपनीजयको शुक्रजीसे सुनके उनके वचनोंकी सराहना करके सब दैत्य अपने २ कवच धारण
करके देवताओंकोयुद्धके लिये बुलावते भये २२३ तबतो सब देवता युद्धमें खड़ेहुए असुरोंको देखकर
सब युद्धकी सामग्री लेकर असुरोंसे युद्धकरनेलगे २२४ इन असुर और देवताओंका युद्धसौबर्ष
तकहुआ इसमें असुरोंसे देवताहारे उस समयदेवताओंने परस्पर यह सलाहकरी कि यज्ञमें प्रथम
शंडामर्कौंको बुलावें फिरजब युद्धकरेंगे तो असुरोंको जीतेंगे यह बिचार करके देवताओंने दोनों
शंडामर्कों को यज्ञमें बुलाकर यह वचन कहाकि हे द्विजो तुम असुरोंको त्यागदो हम तुम्हारे साथ
असुरोंको जीतकर फिरतुम्हींको भजेंगे २२५।२२७ इस प्रकार शंडामर्कों से देवताओंने सन्धि करके
उनको साथमें लेकर युद्धकिया तब देवताओंकी विजयहुई और असुरोंकी पराजयहुई २२८ जैसे
कि शंडामर्कों से त्यागेहुए देवता निर्बलहोगयेथे उसी प्रकार शुक्रजीके शापसे दैत्यलोगभी हारगये
२२९ इस प्रकार शुक्रके शापसे तिरस्कृत और सबओरसे निराधार होके देवताओं से निकालेहुए
दैत्य पातालमें घुसतेभये २३० तब देवताओंने कष्टित और उद्यमों से रहितभी उसी शुक्रके शापके
हेतुसे असुरोंको करदिया २३१ फिरजब धर्मकी न्यूनता हुई तबविष्णुने अवतारलेकर असुरोंको
नाशकिया और धर्मको स्थापनाकिया २३२ और ब्रह्माजीकी आज्ञाहुई किजो असुरप्रह्लाद की
आज्ञासे बाहर होंगे वह मनुष्योंसे बध्यहोंगे २३३ इसी आज्ञाके अनुसार चाक्षुषमन्वन्तरमें नारायण
का अंश उत्पन्न हुआ और वैवस्वत मन्वन्तरमें देवताओंने यज्ञकिया उसमें ब्रह्मापुरोहित हुआ तब
भगवान् उत्पन्नभये और जब देवता विपत्तियुक्त हुए तब युगाख्याचतुर्थीको २३४ समुद्रके तटपर

सम्भूतस्तुसमुद्रान्तेहिरण्यकशिपोर्वधे।द्वितीयेनरसिंहाख्ये रुद्रोह्यासीत्पुरोहितः २३६
बलिसंस्थेषुलोकेषु त्रेतायांसप्तमम्प्रति । तृतीयेवामनस्यार्थे धर्मेणतुपुरोधसा २३७
एतास्तिस्रःस्मृतास्तस्य दिव्याःसम्भूतयोद्विजाः । मानुषाःसप्तयान्यास्तु शापजास्ता
निबोधत २३८ त्रेतायुगेतुप्रथमे दत्तात्रेयोबभूवह । नष्टेधर्मेचतुर्थांशे मार्कण्डेयपुरःसरः
२३९ पञ्चमःपञ्चदश्याञ्च त्रेतायांसम्बभूवह । मान्धाताचक्रवर्त्तीतु तदोत्तङ्कपुरःसरे
२४० एकोनविंश्यांत्रेतायां सर्वक्षत्रान्तकृद्विभुः । जामदग्न्यस्तथाषष्ठो विश्वामित्रपुरः
सरः २४१ चतुर्विंशेयुगेरामो वसिष्ठेनपुरोधसा । सप्तमोरावणस्यार्थे जज्ञेदशरथात्मजः
२४२ अष्टमेद्वापरेविष्णुरष्टाविंशेपराशरात्।वेदव्यासस्तथाजज्ञेजातूकर्ण्यपुरःसरः २४३
कर्त्तुन्धर्म्मव्यवस्थानमसुराणाम्प्रणाशनम् । बुद्धोनवमकोजज्ञे तपसापुष्करेक्षणः । देव
सुन्दररूपेण द्वैपायनपुरःसरः २४४ तस्मिन्नेवयुगेक्षीणे सन्ध्याशिष्टेभविष्यति । क
ल्कीतुविष्णुयशसः पाराशर्य्यपुरःसरः । दशमोभाव्यसम्भूतो याज्ञवल्क्यपुरःसरः २४५
सर्वांश्चभूतांस्तिमितान् पाषण्डांश्चैवसर्वशः।प्रगृहीतायुधैर्विप्रैर्वृतःशतसहस्रशः २४६
निःशेषान्शूद्रराज्ञस्तु तदासतुकरिष्यति । ब्रह्मद्विषःसपत्नांस्तु संहत्यैवचतद्वपुः २४७
अष्टाविंशेस्थितःकल्किश्चरितार्थःससैनिकः । शूद्रान्संशोधयित्वातु समुद्रान्तञ्चवैस्व
यम् २४८ प्रवृत्तचक्रोबलवान् संहारन्तुकरिष्यति । उत्सादयित्वावृषलान् प्रायशस्ता

विष्णुका जन्महुआ वही विष्णु फिर हिरण्यकशिपुके बधके निमित्त जब नरसिंह हुए तब रुद्रपुरोहित
हुए २३५। २३६ और सातवें मन्वन्तरके त्रेता युगमें जब राजा बलिहुआ तब धर्म पुरोहित समेत
तीसरे वामनजी हुए २३७ हे द्विजलोगो यह तीनतोभगवत्की दिव्य विभूति वर्णनकी हैं और सात
शापके हेतुसे मानुषी विभूति हुई हैं ऐसा तुम जानो २३८ जब धर्मका चौथाभाग नष्टहुआ तबत्रेता
युगमें प्रथम मार्कण्डेयजी समेत दत्तात्रेयहुए २३९ पांचवें त्रेतामें पूर्णमासीकेदिन चक्रवर्त्ती मांधाता
राजा हुआ और उसका पुरोहित उत्तंगहुआ २४० उन्नीसवें त्रेतामें सम्पूर्ण क्षत्रियोंका नाश करने
वाला बड़ा समर्थ छठापरशुरामजीका अवतार हुआ उससमय विश्वामित्र पुरोहित हुआ २४१
चौबीसवें युगकें त्रेतामें बसिष्ठ पुरोहित समेत सातवाँ अवतार दशरथके पुत्र श्रीरामचन्द्रजीकाहुआ
यह अवतार रावणके बधके निमित्त हुआ २४२ विष्णुभगवान्का वेदव्यासरूपसे आठवां अवतार
अट्ठाईसवें द्वापरमें हुआहै तब ज़ातूकर्ण्य ऋषि इनका पुरोहित हुआहै २४३ और धर्मकी स्थिति
और असुरोंके नाश करने के अर्थ तपकरके कमल सदृशनेत्र वाला नवांअवतार देवताके समान
सुन्दर रूपवाला बुद्धकाहुआ और उनके पुरोहित द्वैपायन अर्थात् वेदव्यासजी होतेभये २४४
और जब यह कलियुग क्षीणहोजायगा तब संध्यांशमें विष्णुयश वाले ब्राह्मणके यहाँ कल्की अवतार
होंगे और पाराशर्य्य वेदव्यास पुरोहित होंगे यह दशवाँ अवतार होगा और इसके आगेही
याज्ञबल्क्यभीहोगा २४५ यह अवतार सम्पूर्ण दुष्टप्राणी पाषण्डी शस्त्रधारी हजारों ब्राह्मणोंसमेत
२४६ शूद्रराजाओंको और पाषण्ड मात्रको नष्ट करदेगा और यही शरीर ब्राह्मणों के शत्रु और अन्य
शत्रुओंका संहार करके २४७ अट्ठाईसवें युगमें सेना समेत विचरताहुआ शूद्रोंको मार अपने आप

नधार्म्मिकान् २४९ ततस्तदासवैकल्किश्चरितार्थःससैनिकः। प्रजास्तंसाधयित्वातु सम्प्र
ह्वास्तेनवैस्वयम् २५० अकस्मात्कोपितान्योन्यं भविष्यन्तीहमोहिताः। क्षपयित्वातु
तेऽन्योन्यं भाविनार्थेनचोदिताः २५१ ततःकालेव्यतीतेतु सदेवोऽन्तरधीयत। नृपेष्व
थप्रनष्टेषु प्रजानांसंग्रहात्तदा २५२ रक्षणेविनिवृत्तेतु हत्वाचान्योन्यमाहवे। परस्परंनि
हत्वातु निराक्रन्दाःसुदुःखिताः २५३ पुराणिहित्वाग्रामांश्च तुल्यत्वेनिष्परिग्रहाः। प्रन
ष्टाश्रमधर्म्माश्च नष्टवर्णाश्रमास्तथा २५४ अट्टशूलाजानपदाः शिवशूलाश्चतुष्पथाः।
प्रमदाःकेशशूलाश्च भविष्यन्तियुगक्षये २५५ ह्रस्वदेहायुषश्चैव भविष्यन्तिवनौकसः।
सरित्पर्वतवासिन्यो मूलपत्रफलाशनाः २५६ चीरचर्माजिनधराः संकरंघोरमाश्रिताः।
उत्पातदुःखाःस्वल्पार्थाः बहुबाधाश्चताःप्रजाः २५७ एवंकष्टमनुप्राप्ताः कालेसन्ध्यंश
केतदा। ततःक्षयंगमिष्यन्ति सार्द्धंकलियुगेनतु २५८ क्षीणेकलियुगेतस्मिंस्ततःकृत
मवर्त्तत। इत्येतत्कीर्त्तितंसम्यक् देवासुरविचेष्टितम् २५९ यदुवंशप्रसंगेन समासाद्वै
ष्णवंयशः। तुर्वसोस्तुप्रवक्ष्यामि पूरोर्द्रुह्योस्तथाह्यनोः २६० ॥

इति श्रीमत्स्यपुराणे सप्तचत्वारिंशोध्यायः ४७ ॥

(सूतउवाच) तुर्वसोस्तुसुतोगर्भो गोभानुस्तस्यचात्मजः। गोभानोस्तुसुतोवीर

समुद्रकेअन्तमें २४८ सेनाको लेकर संहार करेगा वहाँ विशेष करके पापी शूद्रोंको मारकर सेना
समेत अपनेको कृतकृत्य मानकर यह कल्की प्रजाको शोधन करके आपबढ़ावेगा २४९।२५० तद·
नन्तर अपने आपप्रजाकुपित होकर मोहितहोजायगी औरभावीके वशीभूतोंको परस्परमें नष्टकरदेगी
२५१ फिर कालव्यतीतहोजानेपर यह कल्की जब अन्तर्द्धान होजायगा फिर प्रजाओंके नाशसे
राजानष्टबुद्धीहोके २५२ अपना कोई रक्षक न देख राजाओं समेत सबजन परस्पर युद्ध करके
और एक एकको मारकर महादुखितहोजावेंगे २५३ फिरग्राम नगरादिकोंका मरणहोकर कुछ न
रहैगा और वर्ण आश्रम धर्म नष्ट होजावेंगे २५४ उस कलियुगके अन्तमें राजाअन्न बेचने वाले
ब्राह्मण वेदबेचने वाले और स्त्रियां भग बेचनेवाली यह सबबातें होजांयगी २५५ और छोटा शरीर
थोड़ी आयु और बनमें स्थान ऐसेपुरुष होजांयगे और नदी पर्व्वत पर बसने वाली होजांयगी सब
मनुष्य कन्द मूलफलादिके भोजन करनेवाले होकर २५६ फटेवस्त्र मृगचर्मादिक धारण करेंगे
सबज्ञाति परस्परमें मिलजांयगी और उत्पातोंसे क्लेशित अल्प धनवाली और बहुतसी पीड़ा वाली
ऐसी सब प्रजाहोजावेंगी २५७ फिर ऐसे कष्टोंसे महाकष्टित होकर प्रजा कलियुगकरके सहित
संध्यंशकालमें नाशको प्राप्तहोजावेंगी २५८ फिर कलियुगकेक्षीण होतेही सत्युग प्रवर्त्त होगा-सूत
जीनेकहा कियह मैंने तुम्हारे आगे देवता और असुरोंका किया हुआ कर्म अच्छे प्रकारसे वर्णनकिया.
२५९ अब यदुवंशके प्रसंग करिके साधारण रीतिसे तुर्वसु—पूरु—द्रुह्यु—और अनुइनसब समेतविष्णु
का यशवर्णन करूंगा २६० ॥ इतिश्रीमत्स्यपुराणभाषाटीकायांसप्तचत्वारिंशोऽध्यायः ४७ ॥

सूतजीबोले कि तुर्वसुके गर्भनाम पुत्रहुआ गर्भकापुत्र गोभानु और गोभानुका बड़ा शूरवीर सर्व

त्रिसारिरपराजितः १ करन्धमस्तुत्रैसारिर्भरतस्तस्यचात्मजः।दुष्यन्तःपौरवस्यापि तस्य पुत्रोह्यकल्मषः २ एवंययातिशापेन जरासंक्रमणेपुरा । तुर्वसोःपौरववंशं प्रविवेशपुरा किल ३ दुष्यन्तस्यतुदायादो वरूथोनामपार्थिवः । वरूथात्तुतथाण्डीरः सन्धानस्तस्य चात्मजः ४ पाण्ड्यश्चकेरलश्चैव चोलःकर्णस्तथैवच। तेषांजनपदास्फीताः पाण्ड्याश्चोलाःसकेरलाः ५ द्रुह्यस्यतनयौशूरौ सेतुःकेतुस्तथैवच । सेतुपुत्रःशरद्वांस्तु गन्धारस्तस्यचात्मजः ६ ख्यायतेयस्यनाम्नासौ गन्धारविषयोमहान् । आरट्टदेशजास्तस्य तुरगावाजिनांवराः ७ गन्धारपुत्रोधर्म्मस्तु धृतस्तस्यात्मजोऽभवत् । धृताच्चविदुषो जज्ञेप्रचेतास्तस्यचात्मजः ८ प्रचेतसःपुत्रशतंराजानःसर्वएवते। म्लेच्छराष्ट्राधिपाःसर्वे उदीचीन्दिशमाश्रिताः ९ अनोश्चैवसुतावीरास्त्रयःपरमधार्मिकाः। सभानरश्चाक्षुषश्च परमेषुस्तथैवच १० सभानरस्यपुत्रस्तु विद्वान्कोलाहलोनृपः । कोलाहलस्यधर्म्मात्मा संजयोनामविश्रुतः ११ सञ्जयस्याभवत्पुत्रो वीरोनामपुरञ्जयः।जन्मेजयोमहाराज ! पुरञ्जयसुतोऽभवत् १२ जन्मेजयस्यराजर्षेर्महाशालोऽभवत्सुतः। आसीदिन्द्रसमोराजा प्रतिष्ठितयशाभवत् १३ महामनाःसुतस्तस्य महाशालस्यधार्मिकः।सप्तद्वीपेश्वरोजज्ञे चक्रवर्तीमहामनाः १४ महामनास्तुद्वौपुत्रौ जनयामासविश्रुतौ । उशीनरञ्चधर्म्मज्ञं तितिक्षुंचैवतावुभौ १५ उशीनरस्यपत्न्यस्तु पञ्चराजर्षिसम्भवाः। भृशाकृशानवादर्शा याचदेवीदृषद्वती १६ उशीनरस्यपुत्रास्तु तासुजाताःकुलोद्वहाः। तपसातेतुमहता जा

विजयी त्रिसारिनाम पुत्रहुआ १ त्रिसारिके करन्धम पुत्रहुआ और करन्धमके वंशका बढ़ानेवाला भरतही हुआ क्योंकि पूरुराजाके वंशमें दुष्यन्तराजा उत्पन्नहुआथा उसीके भरत जन्माथा और जो वृद्धावस्था लेकर तरुणावस्था नहींदी इसहेतुसे राजा ययातिके शापसे तुर्वसुका वंश प्रसिद्धनहींरहा किन्तुपूरुकेही वंशमें लीनहोगयाथा २।३ दुष्यन्तके वरूथनाम एकपुत्रहुआ उसकापुत्र डीरहुआडीर के सन्धानहुआ ४ और पांड्य--केरल--चोल और कर्ण यहभी उत्पन्नहुए इनके देशभी बहुत वृद्धि युक्त पाण्ड्य--केरल चोल इत्यादि नामोंसेही प्रसिद्धहैं ५ और द्रुह्यराजा के शूर--सेतु और केतु इन नामोंवाले पुत्रहुए सेतुकापुत्र शरद्वान् हुआ उसका गन्धार पुत्रहुआ ६ इसीके नामसे बड़ा भारी गन्धारदेश प्रसिद्धहै इसराजाके यहाँ आरट्टदेशके पैदाहोनेवाले बहुत उत्तम घोड़े वर्त्तमानथे ७ गंधार के धर्मनाम पुत्रहुआ उसके धृतहुआ--धृतके विदुषहुआ--विदुषके प्रचेताहुआ ८ प्रचेताके सौ १०० पुत्रहुए वहसब उत्तरदिशामें म्लेच्छदेशके राजाहोतेभये ९ और राजाअणुके बड़ेधर्मवाले शूरवीर सभानर--चाक्षुप और परमेषु यह तीनपुत्रहोतेभये १० सभानरके बड़ाविद्वान् कोलाहल नामपुत्र राजा होताभया कोलाहलके धर्मात्मा सञ्जयनाम पुत्र प्रसिद्धहुआ ११ सञ्जयकापुत्र शूरवीर पुरञ्जयहुआ पुरञ्जयके जनमेजयहुआ जनमेजयके महाशालहुआ महाशालकापुत्र धर्मात्मा सातोंद्वीपोंकापति चक्रवर्त्ती महामनानाम प्रसिद्धहोताभया महामनाकेउशीनरऔरतितिक्षुयहदोपुत्र उत्पन्नहुए १२।१५ उशीनर के भृशा[1]--कृशा[2]--नवा[3]--दर्शा[4] और दृषद्वती[5] इन नामोंवाली पांच पटरानी हुईं १६ फिर उन्हीं

ता वृद्धब्रस्यधार्म्मिकाः १७ भृशायास्तुनृगःपुत्रो नवायानवएवच । कृशायास्तुकृशोजज्ञे
दर्शायाःसुव्रतोऽभवत् । दृषद्वत्याःसुतश्चापिशिविरौशीनरोनृपः १८ शिवेस्तुशिवयःपु
त्राश्चत्वारोलोकविश्रुताः।पृथुदर्भःसुवीरश्चकेकयोभद्रकस्तथा १९ तेषांजनपदास्फीताः
केकयाभद्रकास्तथा । सौवीराश्चैवपौराश्च नृगस्यकेकयास्तथा २० सुव्रतस्यतथाम्ब
ष्ठा कृशस्यवृषलापुरी । नवस्यनवराष्ट्रन्तु तितिक्षोस्तुप्रजांशृणु २१ तितिक्षुरभवद्राजा
पूर्वस्यान्दिशिविश्रुतः । वृषद्रथःसुतस्तस्य तस्यसेनोऽभवत्सुतः २२ सेनस्यसुतपाजज्ञे
सुतपस्तनयोबलिः । जातोऽमानुषयोन्यान्तु क्षीणेवंशेप्रजेच्छया २३ महायोगीतुसबलि
र्बद्धोबन्धैर्महात्मना । पुत्रानुत्पादयामास क्षेत्रजान्पञ्चपार्थिवान् २४ अङ्गंसजनयामास
वङ्गंसुह्मंतथैवच । पुण्ड्रङ्कलिङ्गञ्चतथा बालेयंक्षेत्रमुच्यते । बालेयाब्राह्मणाश्चैव तस्य
वंशकराःप्रभोः २५ बलेश्चब्रह्मणादत्तो वरःप्रीतेनधीमतः ।महायोगित्वमायुश्च कल्पस्य
परिमाणकम् २६ संग्रामेचाप्यजेयत्वं धर्मेचैवोत्तमामतिः । त्रैकाल्यदर्शनंचैव प्राधान्यं
प्रसवेतथा २७ जयञ्चाप्रतिमंयुद्धे धर्मेतत्त्वार्थदर्शनम् । चतुरोनियतान्वर्णान् सर्वैस्थाप
यिताप्रभुः २८ तेषाञ्चपञ्चदायादावङ्गाङ्गाःसुह्मकास्तथा । पुण्ड्राःकलिङ्गाश्चतथा अङ्ग
स्यतुनिबोधत २९ (मुनयऊचुः) कथंबलेःसुताजाताः पञ्चतस्यमहात्मनः । किंनाम्नीम
हिषीतस्य जनिताकतमोऋषिः ३० कथंचोत्पादितास्तेन तन्नःप्रब्रूहिपृच्छताम् ।माहात्म्यं

पटरानियोंमें उशीनरके तपके प्रभावसे बड़े तेजस्वी धार्मिक कुलीन और उत्तमपुत्र इसक्रमसे हुए
१७ कि भृशाके नृगपुत्रहुआ नवाके नवहुआ कृशाके कृशहुआ दर्शाके सुव्रत--दृषद्वतीके शिवि और
औशीनर यह दोपुत्र उत्पन्न हुए शिविके लोक में प्रसिद्ध पृथुदर्भ--सुवीर--केकय--और भद्रक यह
चारपुत्र होतेभये १८ । १९ इनके देश बड़े वृद्धियुक्त केकय--भद्रक--सौवीर--और पौरइन नामों
से प्रसिद्धहुए और राजानृगके भी देश केकय नामही से प्रसिद्धहुए २० सुव्रतराजा की अंबष्ठ नाम
नगरी हुई कृशकीपुरी वृषलापुरी और नवका नवनाम देशहुआ अब तितिक्षुकी प्रजाको कहते हैं
२१ यह तितिक्षुराजा पूर्व दिशामें प्रसिद्ध होताभया उसकापुत्र वृषद्रथ उसकापुत्र सेननामहुआ
२२सेनके सुतपाहुआ सुतपाके बलिनाम पुत्रहुआ यह महायोगी राजा बलिक्षीण वंशहुआ तब
प्रजाकी इच्छाकरनेसे २३ इसमहात्माको विष्णुने बन्धनों से बाँधा फिर यह बन्धनोंसे बँधाहुआही
अपनी धर्मपत्नी में ब्राह्मणकेद्वारा क्षेत्रजअंग--बंग--सुस्न--पुंड्र और कलिंग इनपांचपुत्रों को उत्पन्न
करताभया--अब बलिका और क्षेत्रकहते हैं अर्थात् इससमर्थ बलि के वंशको करनेवाले ब्राह्मणहो-
तेभये २४।२५ इस बुद्धिमान् बलिको प्रसन्नहोकर ब्रह्माजीने यह वरदियाथा कि तू महायोगी और
कल्पके प्रमाण आयुवाला होकर २६ युद्धमें सबसे अजित धर्ममें उत्तम बुद्धि त्रिकालज्ञ और ज्ञाति
में प्रधानहोगा २७ इसके सिवाय युद्धमें उत्तम जयवाला धर्ममें तत्त्वार्थका देखनेवाला नियतचारों
वर्णोंका स्थापन करनेवाला समर्थहो २८ इसबलिके जो अंग--बंग--सुस्न पुंड्र और कलिंग यह पांच
पुत्रहुए इनमेंसे अंगकावंश वर्णन करते हैं २९ मुनियों ने कहा हेसूतजी उस महात्मा बलिके पांच
पुत्र कैसेहुए और जिसरानीसे हुए उसकानाम क्याहै कौनसेऋषि उत्पन्न करतेभये ३० और किस

चप्रभावञ्चनिखिलेनवदस्वतत्३१(सूत उवाच)अथोशिजइतिख्यातआसीद्विद्वानृषिः
पुरा। पत्नीवैममतानामबभूवास्यमहात्मनः ३२ उशिजस्ययवीयान्वैभ्रातृपत्नीमकामयत्।
बृहस्पतिर्म्महातेजाममतामेत्यकामतः ३३ उवाचममतातन्तुदेवरंवरवर्णिनी। अंतर्वत्न्य
स्मितेभ्रातुर्ज्येष्ठस्यतुविरम्यताम् ३४ अयंतुमेमहाभाग! गर्भःकुप्येद्बृहस्पते! । औशिजो
भ्रातृजन्यस्तेसोपांगंवेदमुद्गिरम् ३५ अमोघरेतास्त्वञ्चापिनमांभजितुमर्हसि। अस्मिन्ने
वगतेकालेयथावामन्यसेप्रभो! ३६ एवमुक्तस्तथासम्यक्बृहत्तेजाबृहस्पतिः। कामात्मास
महात्मापि नमनःसोऽभ्यवारयत् ३७ सम्बभूवैवधर्मात्मा तयासार्द्धमकामया। उत्सृजन्त
न्तुतद्रेतो वाचंगर्भोऽभ्यभाषत ३८ भोतात! वाचामधिप! द्वयोर्नास्तीहसंस्थितिः।
अमोघरेतास्त्वञ्चापि पूर्वंचाहमिहागतः ३९ सोऽशपत्तंततःक्रुद्धएवमुक्तोबृहस्पतिः।
पुत्रंज्येष्ठस्यवैभ्रातुर्गर्भस्थंभगवानृषिः ४० यस्मात्त्वमीदृशेकाले गर्भस्थोऽपिनिषेधसि।
मामेवमुक्तवांस्तस्मात्तमोदीर्घंप्रवेक्ष्यसि ४१ ततोदीर्घतमानामशापादृषिरजायत । अ
तोंऽशजोबृहत्कीर्तिर्बृहस्पतिरिवौजसा ४२ ऊर्ध्वरेतास्ततःतोऽसौ वैवसतेभ्रातुराश्रमे।
सधर्म्मान्सौरभेयांस्तुवृषभाच्छ्रुतवांस्ततः ४३ तस्यभ्रातापितृव्योयश्चकारभरणंतदा।
तस्मिन्निवसतस्तस्य यदृच्छैवागतोवृषः ४४ यज्ञार्थमाहृतान्दर्भां श्चषादसुरभीसुतः।

रीतिसे उसने उत्पन्नकिये यह सबआप हमसे वर्णनकीजिये औरउसऋषिका माहात्म्य और प्रभाव भी सम्पूर्णकहौ ३१ यह सुनकर सूतजी कहनेलगे कि हेऋषिलोगो प्रथमएक उशिजनामसे विख्यातबड़ा विद्वान्ऋषि होताभया और इस महात्माकी स्त्री ममतानामवाली होतीभई ३२ उशिजका छोटाभाई बृहस्पति भाईकीस्त्रीमें कामकी इच्छा करताभया ३३ तब यह महासुन्दरी ममता अपने देवरसे कहनेलगी किमैं तेरे बड़ेभाईसे गर्भधारण करेहुएहूं तू मुझसे भोगमतकर ३४ और हे महाभाग बृहस्पति यह तेरे बड़े भाईका गर्भ जो मेरे उदरमें है यह कुपित होजायगा और तू अंगसहित वेदको कहताहुआ अमोघ वीर्य्यवालाहै इसहेतुसे तुममुझको सेवनकरने को योग्यनहींहो इसगर्भ कालके व्यतीत होनेपर जो आपकहेंगे वह मैं मानलूंगी ३५। ३६ ऐसे अच्छे प्रकारसे समझानेपर भी यह बड़े तेजवाला बृहस्पति महात्माभीथा परन्तु ऐसाहोनेपरभी यह कामसे मनको नहींनिवारणकरसका और अनिच्छावाली धर्मात्मा स्त्रीसे भोगकरताभया जब इसने वीर्य्यको छोड़नाचाहा तव प्रथम गर्भबोला ३७।३८ हेतात हेवाणियोंके स्वामी यहाँ दोगर्भोंकी स्थिति नहीं है क्योंकि तुमभी अमोघवीर्य्यहो और प्रथम मैं यहाँ आगयाहूं यह वचनसुनकर यह समर्थ बृहस्पति क्रोधयुक्तहोकर उस बड़ेभाईके गर्भवाले पुत्रको यह शापदेताभया कि जो तूगर्भमें स्थितहो ऐसेकालमें भी मुझको रोकता है इस हेतुसे तू दीर्घतम अर्थात् अन्धेपनको प्राप्तहोगा ३९।४१ इसके पीछे शाप के कारणसे वह गर्भ दीर्घतमा नामसे उत्पन्न होकर बृहस्पतिकेही समान कीर्त्ति और पराक्रमसे युक्त होताभया और यह ऊर्ध्वरेताहोके भ्राताके आश्रम में बसताहुआ वृषसे गौओंके धर्मोंको सुनताभया और इसका पोषण इसका भ्राता और चचा दोनों करतेभये अर्थात् उस अंधतमाको पालते भये इसप्रकार उसके बसतेहुए केकुछ काल पीछे अपनी इच्छासे एक वृष आताभया ४२।४४ और यज्ञके निमित्त

जग्राहतंदीर्घतमाःशृङ्गयोस्तुचतुष्पदम् ४५ तेनासौनिगृहीतश्च नचचालपदात्पदम् । ततोऽब्रवीद्वृषस्तंवै मुञ्चमाम्बलिनांवर ! ४६ नमयासादितस्तात ! बलवांस्त्वत्समःक्कचित् । ममचान्यःसमोवापि नाहिमेबलसंख्यया । मुंचतातेतिचपुनः प्रीतस्तेऽहंवरं वृणु ४७ मुंचतातेतिचपुनःप्रीतस्तेऽहंवरंवृणु । एवमुक्तोऽब्रवीदेनं जीवन्मेत्वंक्कयास्यसि । एषत्वांनविमोक्ष्यामि परस्वादंचतुष्पदम्४८ (वृषभउवाच) नास्माकंविद्यतेतात!पातकं स्तेयमेवच । भक्ष्याभक्ष्यंतथाचैव पेयापेयंतथैवच ४९ द्विपदांबहवोह्येते धर्मएषगवां स्मृतः । कार्याकार्येनवागम्यागमनञ्चतथैवच ५० (सूतउवाच) गवांधर्म्मन्तुवैश्रुत्वा सम्भ्रान्तस्तुविसृज्यतम् । शक्त्यान्नपानदानात्तु गोपतिंसम्प्रसादयन् ५१ प्रसादितेगतेतास्मिन्गोधर्मंभक्तितस्तुसः । मनसैवसमादध्यौ तन्निष्ठस्तत्परोहिसः५२ततोयवीयसः पत्नीं गौतमस्याभ्यपद्यत । कृतावलेपान्तांमत्वासोऽनड्वानिवनक्षमे ५३ गोधर्म्मन्तुपरं मत्वा स्नुषान्तामभ्यपद्यत । निर्भर्त्स्यचैनंरुद्धाचबाहुभ्यांसम्प्रगृह्यच ५४ भाव्यमर्थन्तुतं ज्ञात्वा माहात्म्यात्तमुवाचसा । विपर्ययन्तुत्वंलब्ध्वा अनड्वानिववर्त्तसे ५५ गम्यागम्यंनजानीषे गोधर्मात्प्रार्थयन्सुताम् । दुर्वृत्तंत्वान्त्यजाम्यद्य गच्छत्वंस्वेनकर्मणा ५६ काष्ठेसमुद्रेप्रक्षिप्य गङ्गाम्भसिसमुत्सृजत् । यस्मात्त्वमन्धोवृद्धश्च भर्त्तव्योदुराधिष्ठितः ५७ तमुह्यमानंवेगेन स्रोतसोऽभ्यासमागतः । जग्राहतंसधर्मात्मा बलिर्वैरोचनि

लाईहुई कुशाओंको वह सुरभीका पुत्र खाताभया उस वृषको यह दीर्घतमा सींगोंसे पकड़ताभया ४५ उस करके पकड़ाहुआ वह बैल एक चरणभी नहीं चलसका तब बैलबोला कि हे बलियों में श्रेष्ठ तू मुझको छोड़ दे ४६ मैंने तुझसरीखा बलवान् कोई नहींदेखा और मेरे समान भी दूसराबलवान् नथा हे तात तू मुझे छोड़दे मैं तुझपर प्रसन्नहुआहूं तू जोचाहै सो मुझसे वरमांग ४७ इसवचनको सुनकर दीर्घतमा ने कहा कि मेरे जीतेजी तू कहाँजायगा मैं आज तुझपराई वस्तुके आस्वादन करनेवालेको नहींछोडूंगा ४८ बैल कहनेलगा कि हेतात नतो हमारे पातकहै न चोरीहै और न कोई ऐसा नियमहै कि अमुक वस्तुखाना न खाना पीना न पीना अर्थात् यह नियम नहीं है कि अमुकवस्तु खाना चाहिये अमुक न खानाचाहिये ४९ यह बहुतसे धर्म मनुष्योंकेहैं गौओंके नहीं हैं और कार्य्य में जाना अकार्य्यमें न जाना इसका नियम हमारे नहीं है ५० सूतजी बोले कि ऐसे गौओंके धर्मोंको सुनकर उसका भ्रम दूरहोगया तब उसको छोड़कर बड़ी प्रसन्नता और श्रद्धासे उसको यथाशक्ति अन्नपानादि करवाके गौओंकी बुद्धिको स्वीकार करताभया ५१ जब प्रसन्न होकर वह वृषभ चलागया तब भक्तिपूर्वक गौओंके धर्मको मनसेही विचारता उसमें नैष्ठिकहोकर तत्पर होताभया फिर यह अपने छोटेभाई गौतमकी स्त्रीको प्राप्तहोताभया और उसको गर्भवतीभी जानकर बैलके समान नहीं सहसका अर्थात् गोधर्मको उत्तममानके उसस्त्रीको झटकेसे पकड़ भुजाओंसे रोकयथेच्छ भोगकरताभया ५२।५४ और भाविअर्थको जानकर उसके माहात्म्यको कहनेलगा तब उस स्त्रीनेकहा कि तू विपर्य्यय कालको प्राप्तहोकर बैलके समान वर्त्तताहै और तैंने मुझपुत्री के समान को मेरी इतनी प्रार्थना करनेपरभी गम्यागम्यको नहीं जानतेहुएके समान कर्म किया इसहेतुसे मैं

स्तदा ५८ अन्तःपुरेजुगोप्यैनं भक्ष्यभोज्यैश्चतर्पयन्। प्रीतश्चैवंवरेणैवच्छन्दयामास
वैबलिम् ५९ तस्माञ्चसवरंवव्रे पुत्रार्थेदानवर्षभः। सन्तानार्थंमहाभाग ! भार्यायांममा
नद ! । पुत्रान्धर्मार्थतत्त्वज्ञानुत्पादयितुमर्हसि ६० एवमुक्तोऽथदेवर्षिस्तथास्त्वित्युक्त
वान्प्रभुः। सतस्यराजास्वाम्भार्य्यां सुदेष्णान्नामप्राहिणोत् । अन्धंवृद्धञ्चतंज्ञात्वा न
सादेवीजगामह ६१ शूद्रान्धात्रेयिकांतस्मै अन्धायप्राहिणोत्तदा । तस्यांकाक्षीवदादीं
श्च शूद्रयोनावृषिर्वशी ६२ जनयामासधर्मात्मा शूद्रानित्येवमादिकम्। उवाचतंबली
राजा दृष्ट्वाकाक्षीवदादिकान् ६३ (राजोवाच) प्रवीणानृषिधर्म्मस्य चेश्वरान्ब्रह्मवा
दिनः। विद्वान्प्रत्यक्षधर्माणां बुद्धिमान्वृत्तिमान्शुचीन् ६४ ममैवचेतिहोवाच तंदीर्घत
मसम्बलिः। नेत्युवाचमुनिस्तंवै ममैवमितिचाब्रवीत् ६५ उत्पन्नाःशूद्रयोनौतु भवच्छ
न्देसुरोत्तम !। अन्धंवृद्धंचमांज्ञात्वा सुदेष्णामहिषीतव । प्राहिणोदवमानान्मे शूद्रांधा
त्रेयिकांनृप ! ६६ ततःप्रसादयामास बलिस्तमृषिसत्तमंम्। बलिःसुदेष्णान्ताम्भार्य्यां
भर्त्सयामासदानवः ६७ पुनश्चैनामलंकृत्य ऋषयेप्रत्यपादयत्। तांसदीर्घतमादेवीं त
थाकृतवतींतदा ६८ दध्नालवणमिश्रेण स्वसक्तम्मधुकेनतु। लिहमामजुगुप्सन्ती आ
पादतलमस्तकम्। ततस्त्वंप्राप्स्यसेदेवि ! पुत्रान्वैमनसेप्सितान् ६९ तस्यसातद्वचोदे

खोटे वृत्तान्तवालेको त्यागतीहूं तू अपनेकर्मोंकरकेजा ५५।५६ ऐसाकह उसको सन्दूकमेंबन्दकर गंगाजीमें गेरदेतीभई और कहतीहुई कि तू अन्धाहोकर मुझकोप्राप्तहुआहै इसीसे मैं तुझेत्यागतीहूं ५७ फिर वह बहता बहता किनारेआलगा तबविरोचनकापुत्र महात्माबलि इसको ग्रहणकरताभया और रणवासमें इसकीरक्षाकरके इसको भक्ष्यभोज्यादि पदार्थोंसे तृप्तकिया तब यहऋषिकापुत्र राजाबलि को वरसे लुभाताभया ५८।५९ तब इसदानवोंके राजाबलिने इससे पुत्रका वरमांगा और कहा कि हे महाभाग मानके देनेवाले तुममेरीस्त्रीमें सन्तान उत्पन्नकरो ६० यहसुनकर उस समर्थऋषिनेकहा कि तथास्तु अर्थात् ऐसाहीहोगा यहसुनकर राजाबलिभी अपनी सुदेष्णानामरानी को उसकेपास भेजताभया परंतु वहरानी उसको अन्धा और वृद्धजानके नहींप्राप्तहोतीभई ६१ और अपनीशूद्राधायको इसरानीने उसके पास भेजा उसदासी में उसऋषि के योगसे काक्षीवत् इत्यादि नामवाले पुत्रों की शूद्र योनिमें उत्पत्ति होती भई ६२ तब राजाबलिं काक्षीवदादि शूद्रों को देखकर यहवंचन कहता भया ६३ अर्थात् उस बुद्धिमान् राजाने उनपुत्रों को ऋषिधर्ममें प्रवीण समर्थ ब्रह्मवादी और महापवित्र देखकर दीर्घतमासे कहा कि यह मेरे पुत्रहैं मुनिनेकहा कि तेरे नहीं यह मेरे पुत्रहैं ६४।६५ क्योंकि शूद्रयोनिमें हुए हैं और हे राजा तेरी रानी सुदेष्णाने मुझको अंधा और वृद्ध जानके अपमान करके मेरे पास शूद्राधाय को भेजा ६६ इसके पीछे वह राजा बलि उस ऋषि सत्तमको प्रसन्न करता भया और सुदेष्णारानी को ललकारता भया ६७ फिर इसरानी को शृंगार करके उसके पास भेजा तब दीर्घतमा ऋषि उस रानी से कहता भया ६८ कि मेरे शरीर को दधि लवण और शहद को लगाकर लज्जाको त्यागके पैरों से लेकर मस्तक पर्य्यन्त जिह्वा से चाट हे देवि इसके करने से तू अपने वांछित पुत्रों को पावेगी ६९ रानी ने ऋषिके वचन को सुनकर वैसाही किया परन्तु जब

वी सर्वंकृतवतीतदा । तस्यसापानमासाद्य देवीपरिहरत्तदा ७० तामुवाचततःसोऽथ यत्तेपरिहृतंशुभे !। विनापानंकुमारन्तु जनयिष्यसिपूर्वजम् ७१ (सुदेष्णोवाच) नार्हसित्वम्महाभाग ! पुत्रम्मेदातुमीदृशम्। तोषितश्चयथाशक्त्या प्रसादंकुरुमेप्रभो ! ७२(दीर्घतमोवाच)तवापचाराद्देव्येष नान्यथाभविताशुभे !। नैवदास्यतिपुत्रस्ते पौत्रोवैदास्यते फलम्७३ तस्यापानंविनाचैव योग्यभावोभविष्यति । तस्माद्दीर्घतमांगेषु कुक्षौस्पृष्ट्वेदमब्रवीत्७४प्राशितंयद्यदग्रेषु नसोपस्थंशुचिस्मिते!। तेनतिष्ठन्तितेगर्भे पौर्णमास्यामिवोडुराट् ७५ भविष्यन्तिकुमारास्ते पञ्चदेवसुतोपमाः। तेजस्विनःसुवृत्ताश्च यज्वानो धार्मिकाश्चते७६ (सूत उवाच)तदंशस्तुसुदेष्णाया ज्येष्ठःपुत्रोऽभ्यजायत। अङ्गस्तथाकलिङ्गश्चपुण्ड्रः सुह्मस्तथैवच ७७ वङ्गराजस्तुपञ्चैते बलेःपुत्राश्चक्षेत्रजाः । इत्येतेदीर्घतमसाबलेर्दत्ताःसुतास्तथा७८प्रतिष्ठामागतानांहि ब्राह्मण्यंकारयंस्ततः। ततोमानुषयोन्यांसजनयामासवैप्रजाः७९ततस्तंदीर्घतमसं सुरभिर्वाक्यमब्रवीत् ।विचार्ययस्माद्गोधर्मप्रमाणन्तेकृतंविभो! ८० भक्त्याचानन्ययास्मासु तेनप्रीतास्मितेऽनघ !। तस्मात्तुभ्यन्तमोदीर्घमाघ्रायापनुदामिवै ८१बार्हस्पत्यस्तथैवैषपाप्मावैतिष्ठतित्वयि। जरांमृत्युंतमश्चैव आघ्रायापनुदामिते ८२ सद्यःसघ्रातमात्रस्तु असितोमुनिसत्तम !। आयुष्मांश्चवपुष्मांश्च चक्षुष्मांश्चततोऽभवत् ८३ गोभ्याहृतेतमसिवै गौतमस्तुततोऽभवत् । काक्षी

सब अंगचाटती हुई गुदा के पास आई तब गुदाको चाटने से छोड़ दिया ७० तब ऋषिने कहा कि हे शुभे जो तैं ने गुदा को त्याग दियाहै इस हेतुसे तेरा बड़ा पुत्र गुदासे रहित होगा ७१ यह सुनकर रानी ने कहा कि हे महाभाग ऐसा पुत्र आप देनेको योग्य नहीं हो हे प्रभो आप यथा शक्ति मेरे प्रसन्न करने से मुझपर कृपा कीजिये ७२ दीर्घतमा कहने लगा हे देवि हे शुभे तेरे अपराधसे यह तो ऐसाही होगा और पुत्र तुझको कुछ फल नहीं देगा तेरा पोता तुझे फलदेगा ७३ और उसके बिना गुदाकेही योग्य भावहो जायगा फिर दीर्घतमा ऋषि रानी के अंगोंमें से कुक्षिको स्पर्शकरके यह वचन कहने लगा ७४ कि हे सुन्दरहास्य वाली तैंने उपस्थ लिंग चाटा इस हेतुसे तेरे ऐसा गर्भ होवेगा जैसा कि पूर्णमासी का चन्द्रमा होता है ७५ और देव पुत्रों के समान तेरे पांच कुमार होवें गे वह अच्छे तेजस्वी सुन्दर वृत्तान्त वाले और यज्ञकरनेवाले धर्मात्मा होवें गे ७६ सूतजी कहने लगे कि हे ऋषीश्वरो सुदेष्णाके दीर्घतमा के अंशसे बड़ापुत्र अंगहुआ पीछे कलिंग-पुंड्र-सुह्म और वंगराज यह पांच बलि के क्षेत्रज पुत्रउत्पन्न हुए इस रीतिसे यह सब पुत्र दीर्घतमा ऋषिने राजा बलिको दिये७७।७८ फिर उनसब उत्पन्नहुए पुत्रोंकी प्रतिष्ठा और ब्रह्मत्वादिक रीति कराता भया इस रीतिसे मानुषयोनि में प्रजाओं को उत्पन्न कराता भया ७९ फिरउस दीर्घतमासे सुरभी यह वचन कहती भई कि हे विभो जोकि तैंने गोधर्मको उत्तम विचारके बड़ी भक्तिसे उसकोप्रमाण करके ग्रहण किया इस हेतुसे हे अनघ मैं तुझपर प्रसन्नहूं और प्रसन्न होकर तुझको सूंघकर तेरे दीर्घतम को दूर करती हूं ८०—८१ और बृहस्पति का पापतुझमें वर्त्तमान है इसलिये तेरीवृद्धावस्था को मृत्युको और तमको सूंघकर दूरकरूंहूं ८२ हे मुनिसत्तमहो दीर्घतमा ऋषि तिस वृषसे सूंघा

वांस्तुततोगत्वा सहपित्रागिरिव्रजम् ८४ दृष्ट्वास्पृष्ट्वापितुःसोवै ह्युपविष्टश्चिरन्तपः ।
ततःकालेनमहता तपसाभावितस्तुसः ८५ विधूयमातृजंकायं ब्राह्मण्यंप्राप्तवान्विभुः ।
ततोऽब्रवीत्पितातंवै पुत्रवानस्म्यहंत्वया ८६ सत्पुत्रेणतुधर्मज्ञ ! कृतार्थोऽहंयशस्विना ।
मक्वात्मानंततोऽसौवै प्राप्तवान् ब्रह्मणःक्षयम् ८७ ब्राह्मण्यंप्राप्यकाक्षीवान् सहस्रमसृजत्सुतान् । कौष्माण्डागौतमाश्चैवस्मृताःकाक्षीवतःसुताः ८८ इत्येषदीर्घतमसोबलेर्वैरोचनस्यच । समागमोवःकथितः सन्ततिश्चोभयोस्तथा ८९ बलिस्तानभिनन्द्याहपञ्च
पुत्रानकल्मषान् । कृतार्थःसोऽपिधर्मात्मा योगमायावृतःस्वयम् ९० अदृश्यःसर्वभूतानां
कालापेक्षःसर्वैप्रभुः । तत्राङ्गस्यतुदायादो राजासीद्दधिवाहनः ९१ दधिवाहनपुत्रस्तुराजा
दिविरथःस्मृतः । आसीद्दिविरथापत्यं विद्वान्धर्मरथोनृपः ९२ सहिधर्मरथःश्रीमांस्तेन
विष्णुपदेगिरौ । सोमःशुक्रेणवैराज्ञासहपीतोमहात्मना ९३ अथधर्मरथस्याभूत्पुत्रश्चित्ररथःकिल । तस्यसत्यरथःपुत्रस्तस्माद्दशरथःकिल ९४ लोमपादइतिख्यातस्तस्य शान्तासुताभवत् । अथदाशरथिर्वीरश्चतुरङ्गो महायशाः ९५ ऋष्यशृङ्गप्रसादेन जज्ञेस्वकुलवर्धनः । चतुरङ्गस्यपुत्रस्तु पृथुलाक्षइतिस्मृतः ९६ पृथुलाक्षसुतश्चापि चम्पनामा
बभूवह । चम्पस्यतुपुरीचम्पापूर्वं यामालिनोऽभवत् ९७ पूर्णभद्रप्रसादेन हर्यङ्गोऽस्यसुतो

हुआ होकर तत्कालही उत्तम आयु-शरीर और नेत्रों वाला होजाताभया ८३ जब कि गौने उसके
तमको हरलिया इस कारण से उसका नाम गौतम होताभया फिर शूद्राधायकापुत्र काक्षीवान्
पिता समेतागिरिव्रजमें जाकर ८४ अपने उसदीर्घतमा पिताको देखके औरस्पर्शकरके बहुत कालतक
तपस्या करता भया फिर बहुत काल के तपसे शुद्धहुए इस समर्थ मातासे उपजे शरीर को त्यागकर
ब्राह्मण शरीरको प्राप्तहोताभया तब उसका पिता उस्से कहने लगा कि हे पुत्रतुझकरकेही मैं पुत्रवानहूं ८५।८६ और हे धर्मज्ञ यशवाले तुझसत्पुत्रके होनेसे मैं कृतार्थहुआ फिर यह भी अपने आत्मा
कोत्यागकर ब्रह्मको प्राप्तहोताभया ८७ यह काक्षीवान् ब्राह्मण शरीरको प्राप्तहोकर हज़ार पुत्रोंको
उत्पन्नकरताभया वह काक्षीवान् के उत्पन्न हुए पुत्र कौष्माण्ड और गौतम कहाते हैं ८८ इसप्रकार
करके दीर्घतमा और विरोचन के पुत्र बलिका जैसे समागमहुआ वह सब तुझसे कहा और दानवों
की सन्ततिभी कही ८९ इनमें पापरहित जो पांच पुत्रथे उनकी प्रशंसाकरके राजाबलि उनसे यह
वचन कहता भया कि मैं तुमकरके कृतार्थहोकर धर्मात्माहूं ९० उसीबिंशमें अंगकापुत्र अतिसमर्थ
संपूर्णजीवोंका कालापेक्ष राजा दधिवाहन नाम उत्पन्नहुआ ९१ दधिवाहनका पुत्र राजा दिविरथ
हुआ दिविरथ का पुत्र विद्वान्राजा धर्मरथ हुआ ९२ वह श्रीमान् धर्मरथ महात्मा राजा विष्णुपद
पर्व्वतमें शुक्रके साथ अमृत पीताभया ९३ इस के पीछे धर्मरथके चित्ररथपुत्रहुआ चित्ररथके सत्यरथ तिसका दशरथनाम पुत्रहुआ ९४ जिसको कि लोमपाद भी कहते हैं उसकी शान्तानाम पुत्री
होती भई दशरथकापुत्र शूरवीर महायशा चतुरंगहुआ ९५ यह राजा ऋष्यशृंग के प्रसाद से अपने
कुलका बढ़ानेवाला हुआ चतुरंग का पुत्र पृथुलाक्षहुआ ९६ पृथुलाक्षके चंपनाम पुत्रहुआ उसी चंपकी चंपापुरी प्रसिद्ध है वह पुरी प्रथम मालिकी थी ९७ चंपके पूर्ण भद्रके प्रसाद से हर्यंगनाम

ऽभवत् ।जज्ञेविभाण्डकाच्चास्य वारणःशत्रुवारणः९८ अवतारयामासमहीं मन्त्रैर्वाहनमु
त्तमम्।हर्यङ्गस्यतुदायादो जातोभद्ररथःकिल ९९ अथभद्ररथस्यासीत् बृहत्कर्माजने
श्वरः।बृहद्भानुःसुतस्तस्य तस्माज्जज्ञेमहात्मवान् १०० बृहद्भानुस्तुराजेन्द्रो जनयामास
वैसुतम्।नाम्नाजयद्रथंनाम तस्माद्बृहद्रथोनृपः १०१ आसीद्बृहद्रथाच्चैव विश्वजिज्जन
मेजयः। दायादस्तस्यचाङ्गोवै तस्मात्कर्णोऽभवन्नृपः १०२ कर्णस्यवृषसेनस्तु पृथुसे
नस्तथात्मजः। एतेऽङ्गस्यात्मजाःसर्वे राजानःकीर्तितामया । विस्तरेणानुपूर्व्याच्च पूरो
स्तुश्रृणुतद्विजाः! १०३ (ऋषय ऊचुः) कथंसूतात्मजःकर्णः कथमङ्गस्यचात्मजः। ए
तदिच्छामहेश्रोतुमत्यन्तकुशलोह्यसि १०४ (सूत उवाच) बृहद्भानुसुतोजज्ञे राजा
नाम्नाबृहन्मनाः। तस्यपत्नीद्वयंह्यासीच्छैव्यस्यतनयेह्युभे। यशोदेवीचसत्याच तयोर्वंश
ञ्चमेश्रृणु १०५ जयद्रथन्तुराजानं यशोदेवीह्यजीजनत् ।साबृहन्मनसःसत्या विजयंना
मविश्रुतम् १०६ विजयस्यबृहत्पुत्रस्तस्यपुत्रोबृहद्रथः । बृहद्रथस्यपुत्रस्तु सत्यक
र्मामहामनाः १०७ सत्यकर्मणोऽधिरथः सूतश्चाधिरथःस्मृतः । यःकर्णंप्रतिजग्राह ते
नकर्णस्तुसूतजः। तच्चेदंसर्वमाख्यातं कर्णंप्रतियथोदितम् १०८ ॥

इति श्रीमत्स्यपुराणेअष्टचत्वारिंशोऽध्यायः ४८ ॥

पूरोःपुत्रोमहातेजा राजासजनमेजयः। प्राचीततःसुतस्तस्ययःप्राचीमकरोद्दिशम् १

पुत्रहुआ इसके विभांड पुत्रहुआ विभांड के शत्रुओंका रोकने वाला वारणनामपुत्रहुआ ९८ यह
मन्त्रों करके उत्तमवाहनोंको पृथ्वीमें उतारताभया और हर्यंगके भद्ररथ पुत्रहुआ ९९ भद्ररथका पुत्र
बृहत्कर्मा राजाहुआ उसका पुत्रमहाबृहद्भानु उत्पन्नहुआ१००हे राजेन्द्र बृहद्भानुकापुत्र जयद्रथ नाम
हुआ जयद्रथके राजा बृहद्रथहोता भया १०१ बृहद्रथका पुत्रदिग्विजयकरने वालाजनमेजय होता
भया उसका पुत्र अंगहुआ अंगका पुत्रराजा कर्णहुआ१०२ कर्णका पुत्रवृकसेन उसका पुत्र पृथुसेन
हुआ हे ऋषियो यह सब अंगके बंशके आनुपूर्वी राजाओंका विस्तार वर्णन किया अबपूरुके वंशको
कहताहूं १०३ यह सुनकर ऋषियों ने कहा हे सूतजी कर्ण कैसेहुआ और यह अंगकापुत्रकैसे होगया
यह हमसुनाचाहते हैं क्योंकि आप सर्वज्ञहो १०४ यह सुनकर सूतजी बोले कि हे ऋषियो बृहद्भानु
का पुत्रराजा बृहन्मनाहोता भया उसकी शैव्यराजा की पुत्री दोरानियां हुईं एक का नाम यशोदेवी
दूसरी सत्या उन दोनोंके वंशको सुनो १०५ जयद्रथ राजा को तो यशोदेवी उत्पन्न करती भई और
बृहन्मनाकी सत्यानाम रानी विजयनामपुत्रको जन्मतीभई १०६ उस विजयका पुत्र बृहत्नामहुआ
उसका पुत्रबृहद्रथ हुआ बृहद्रथका पुत्र महामना सत्यकर्मा हुआ १०७ सत्यकर्माका पुत्र अधिरथ
हुआ यह अधिरथ सारथी हुआ सो इसने कर्णको ग्रहणकर लिया था इसी से कर्णको सूतज कहते
हैं यह सब कर्णकी कथा मैं ने सम्पूर्ण तुझसेकही १०८ ॥

इति श्रीमत्स्यपुराणभाषाटीकायामष्टचत्वारिंशोऽध्यायः ४८ ॥

पूरुका पुत्र महातेजस्वी राजाजनमेजय हुआ उसके प्राचीततनाम पुत्रहुआ वह पूर्वदिशाका राज्य

प्राचीततस्यतनयो मनस्युश्चतथाभवत्। राजापीतायुधोनाम मनस्योरभवत्सुतः २
दायादस्तस्यचाप्यासीद् धुन्धुर्नाममहीपतिः। धुन्धोर्बहुविधःपुत्रः सम्पातिस्तस्यचा
त्मजः ३ सम्पातेस्तुरहंवर्चा भद्राश्वस्तस्यचात्मजः। भद्राश्वस्यधृतायांतु दशाप्सरसि
सूनवः ४ औचेयुश्चहृषेयुश्च कक्षेयुश्चसनेयुकः। घृतेयुश्चविनेयुश्च स्थलेयुश्चैवसत्त
मः५ धर्मेयुःसन्नतेयुश्च पुण्येयुश्चेतितेदश। औचेयोर्ज्वलनानामभार्य्यावैतक्षकात्मजा६
तस्यांसजनयामास अन्तिनारंमहीपतिम्। अन्तिनारोमनास्विन्यां पुत्रान्जज्ञेपरान्शुभा
न् ७ अमूर्तरयसंवीरंत्रिवनञ्चैवधार्मिकम्। गौरीकन्यातृतीयाच मान्धातुर्जननीशुभा ८
इलिनातुयमस्यासीत्कन्यायाजनयत्सुतान्। ब्रह्मवादपराक्रांतांश्छुंभदात्विलिनाह्यभूत् ९
उपदानवीसुतान्लेभे चतुरस्त्विलिनात्मजात्। ऋष्यन्तमथदुष्यन्तं प्रवीरमनघंतथा १०
चक्रवर्त्तीततोजज्ञेदुष्यन्तात्समितिञ्जयः। शकुन्तलायांभरतोयस्यनाम्नाचभारताः ११
दौष्यन्तिंप्रतिराजानं वागूचेचाशरीरिणी। माताभस्त्रापितुःपुत्रो येनजातःसएवसः १२
भरस्वपुत्रंदुष्यन्त ! मावमंस्थाःशकुन्तलाम्। रेतोधांनयतेपुत्रः परेतंयमसादनात्।
त्वंचास्यधातागर्भस्य सत्यमाहशकुन्तला १३ भरतस्यविनष्टेषु तनयेषुपुराकिल। पु
त्राणांमातृकात्कोपात् सुमहान्संक्षयःकृतः १४ ततोमरुद्भिरानीय पुत्रःसतुबृहस्पतेः।
संक्रामितोभरद्वाजो मरुद्भिर्भरतस्यतु १५ (ऋषय ऊचुः) भरतस्यभरद्वाजः पुत्रार्थं

करताभया १ प्राचीततके मनस्युनाम पुत्रहोताभया मनस्युके पीतायुधनाम राजाहोताभया २ पीता
युधके धुंधुनाम राजा होताभया धुंधुके बहुविध नाम पुत्रहुआ उसका पुत्र संपातिनाम हुआ ३ संपातिके
अहंवर्च्चा पुत्रहुआ उसके भद्राश्व पुत्रहुआ भद्राश्वके धृता अप्सरामें ४ औचेयु१ हृषेयु २ कक्षेयु
३ सनेयुक ४ घृतेयु ५ विनेयु ६ स्थलेयु ७ धर्मेयु ८। ५ सन्नतेयु ९ और 'पुण्येयु यहदश पुत्रहुए
औचेयुके तक्षककी पुत्री ज्वलनानाम भार्य्याहोती भई ६ तिस में औचेयुसे अन्तिनारराजा उत्पन्न
हुआ अन्तिनारके मनास्विनी स्त्रीसे वीर अमूर्तरय१ और धार्मिक त्रिवन २ यह दोपुत्रउत्पन्नहुए तीसरी
गौरीनाम एककन्याभी हुई वह मान्धाताकी माताहोतीभई ७। ८ इलिना जो यमकी पुत्री है सो
ब्रह्मवादके जाननेवाले पुत्रोंको उत्पन्नकरतीभई और इलिनाशुभदा होतीभई ९ इलिनाकेपुत्रसे उपदानवी
स्त्री ऋष्यन्त १ दुष्यन्त २ प्रवीर ३ और अनघ इनचारों पुत्रोंको जन्मती भई १० दुष्यन्त
के चक्रवर्त्ती समितिञ्जय पुत्रहुआ उसी दुष्यन्तका पुत्र शकुन्तला स्त्री में भरतहुआ इसीके नामसे
इस देशकानाम भारतहुआ ११ दुष्यन्तके पुत्र समितिंजय राजाको यह आकाश वाणी होतीभई
कि माता तो चर्मरूपहै और पुत्र पिताकाही होताहै और जिसका जो पुत्रहै वह उसीका आत्माहै १२
इस हेतुसे हेदुष्यन्त तू अपने पुत्रकापालनकर शकुन्तलाका तिरस्कार मतकर पुत्रमरेहुए पिताको
धर्मराजके स्थानसे लेआताहै और इस गर्भका धारण करानेवाला तू है अर्थात् इस शकुन्तलाके उद-
रमें तेराही गर्भ है शकुन्तला सत्यकहती है १३ इसके भरतहुए और भरतके जब सबपुत्रोंका माता
के कोपसे क्षयहोगया तब यज्ञमें मरुत् देवताओं ने बृहस्पति के पुत्र भरद्वाजको लाके राजा भरतको
दिया १४। १५ ऋषियों ने पूछा हेसूतजी मरुत् देवताओंने महातेजवाला भरद्वाज भरतको कैसे

मारुतैःकथम्। संक्रामितोमहातेजास्तन्नोब्रूहियथातथम् १६ (सूत उवाच) पत्न्या
मापन्नसत्वायामुशिजःसंस्थितोभुवि । भ्रातुर्भार्य्यांसदृष्ट्वातु बृहस्पतिरुवाचह १७
उपतिष्ठस्वलंकृत्य मैथुनायचमांशुभे !। एवमुक्ताऽब्रवीदेनं स्वयमेवबृहस्पतिम् १८ ग
र्भःपरिणतश्चायं ब्रह्मन्व्याहरतेगिरा। अमोघरेतास्त्वञ्चापि धर्मंचैवंविगर्हितम् १९
एवमुक्तोऽब्रवीदेनां स्वयमेवबृहस्पतिः। नोपदेष्टव्योविनयस्त्वयामेवरवर्णिनि ! २० ध
र्षमाणःप्रसह्यैनां मैथुनायोपचक्रमे। ततोबृहस्पतिंगर्भो धर्षमाणमुवाचह २१ सन्निवि
ष्टोह्यहंपूर्वमिहनामबृहस्पते !। अमोघरेताश्चभवान् नावकाशइहद्वयोः २२ एवमुक्तः
सगर्भेण कुपितःप्रत्युवाचह। यस्मात्त्वमीदृशेकाले सर्वभूतेप्सितेसति । अभिषेधसि
तस्मात्त्वं तमोदीर्घंप्रवेक्ष्यसि २३ ततःकामंसन्निवर्त्य तस्यानन्दाद्बृहस्पतेः। तद्रेतस्त्व
पतद्भूमौ निवृत्तंशिशुकोऽभवत् २४ सद्योजातंकुमारन्तु दृष्ट्वातंममताब्रवीत्। गमिष्या
मिगृहंस्वंवै भरस्वैनंबृहस्पते! २५ एवमुक्तागतासातु गतायांसोऽपितन्त्यजत्। मातापितृ
भ्यांत्यक्तन्तु दृष्ट्वातंमारुतःशिशुम्। जगृहुस्तंभरद्वाजं मरुतःकृपयास्थिताः २६ तस्मि
न्कालेतुभरतो बहुभिःक्रतुभिर्विभुः। पुत्रनैमित्तिकैर्यज्ञैरयजत्पुत्रलिप्सया २७ यदासय
जमानस्तु पुत्रंनासादयत्प्रभुः। ततःक्रतुंमरुत्सोमं पुत्रार्थेसमुपाहरत् २८ तेनतेमरुतस्त
स्य मरुत्सोमेनतुष्टुबुः। उपानिन्युर्भरद्वाजं पुत्रार्थंभरतायवै २९ दायादोऽङ्गिरसःसूनोरौर

प्राप्तकरदिया इसको आप यथार्थतासे वर्णन कीजिये १६ सूतजीने कहा कि जो बृहस्पतिजी ने अपने
भाईकी स्त्रीको देखकर यह वचन कहाथा कि १७ हेशुभे तू शृंगार करके मेरे मैथुनके निमित्त मुझे
प्राप्तहो इसको सुनकर उसने बृहस्पतिजी से कहाथा १८ कि यह आपके भाईका पूर्व्व गर्भ है और
आपभी वाणीसे वेदके वक्ताहो इसीसे तुम अमोघ वीर्य्यहो यह निन्दित कर्म आपको अयोग्य है १९
यह सुनकर बृहस्पतिने कहा कि हेशुभे मेरी आज्ञा तुझको भंगकरना योग्यनहीं है २० ऐसा कहकर
कामसे पीड़ितहुए बृहस्पति हठ करके उससे मैथुनकरतेभये तब वीर्य्य पतनहोनेके समय उस गर्भ
स्थित बालकने बृहस्पतिसे कहा कि २१ हे बृहस्पतिजी यहाँ पूर्व्व मैं स्थितहोचुकाहूं और तुम अमोघ
वीर्यहो इस हेतुसे दोगर्भोंका यहाँ अवकाशनहीं है २२ जब इसप्रकार उसगर्भने कहा तब बृहस्पति
जी उसपर कोपयुक्त होकर यह कहतेभये कि जो तू सर्वजीवों के सुखकारी और वाञ्छित कालमें मुझ-
को निषेध करताहै इससे तू दीर्घतमको प्राप्तहोगा २३ पीछे उस आनन्ददायक कामके रोकने से
बृहस्पतिका वीर्य्य पृथ्वीमें गिरताभया उसीसे एक बालक होताभया २४ इस तत्काल होनेवाले
बालकको देखकर उसकी माता यह वचन कहतीभई कि हेबृहस्पतिजी मैं अपने घरजातीहूं तुम इस
बालकका पोषणकरो २५ ऐसा कहकर यह तो चलीगई और बृहस्पतिभी इसको त्यागकर देतेभये
फिर माता पितासे त्यागेहुए इस बालकको देखकर कृपाकरके मरुत् आये और भरद्वाज नामवाले
उस बालकको ग्रहणकरतेभये २६ और उसीकालमें समर्थ राजाभरत बहुतसी ऋतुओं में पुत्रकी
वाञ्छाकरके यज्ञों को करता भया २७ फिर इस समर्थ यजमान राजाको उनयज्ञों से भी पुत्रकी
प्राप्तिनहीं हुई तब पुत्रके निमित्त इसने मरुत्सोम यज्ञको किया २८ उस मरुत्सोम यज्ञके करने से

सस्तुर्बृहस्पतेः । संक्रामितोभरद्वाजो मरुद्भिर्भरतंप्रति ३० भरतस्तुभरद्वाजं पुत्रम्प्राप्य
विभुर्ब्रवीत् । आदावात्महितायत्वं कृतार्थोऽहंत्वयाविभो! ३१ पूर्वन्तुवितथेतस्मिन् कृतेवै
पुत्रजन्मनि । ततस्तुवितथोनाम भरद्वाजोनृपोऽभवत् ३२ तस्मादपिभरद्वाजाद् ब्राह्मणाः
क्षत्रियाभुवि । द्व्यामुष्यायणकौलीनाः स्मृतास्तेद्विविधेनच ३३ ततोजातेहिवितथे भरत
श्चदिवंययौ । भरद्वाजोदिवंयातो ह्यभिषिच्यसुतंऋषिः ३४ दायादोवितथस्यासीद्भुव
मन्युर्महायशाः । महाभूतोपमाःपुत्रा श्चत्वारोभुवमन्यवः ३५ बृहत्क्षेत्रोमहावीर्यः नरोग
र्गश्चवीर्यवान् । नरस्यसंकृतिःपुत्रस्तस्य पुत्रोमहायशाः ३६ गुरुधीरन्तिदेवश्च सत्कृत्या
न्तावुभौस्मृतौ । गर्गस्यचैवदायादःशिविर्विद्वानजायत ३७ स्मृताःशैव्यास्ततोगर्गाः क्ष
त्रोपेताद्विजातयः । आहार्यतनयश्चैव धीमानासीदुरुक्षवः ३८ तस्यभार्याविशालातु सुषु
वेपुत्रकत्रयम् । त्र्यूषणंपुष्करिंचैव कविंचैवमहायशाः ३९ उरुक्षवाःस्मृताह्येते सर्वेब्राह्म
णताङ्गताः । काव्यानान्तुवराह्येते त्रयःप्रोक्तामहर्षयः ४० गर्गाःसंकृतयःकाव्याःक्षत्रोपे
ताद्विजातयः । संभृताङ्गिरसोदक्षाः बृहत्क्षत्रस्यचक्षितिः ४१ बृहत्क्षत्रस्यदायादो हस्ति
नामाबभूवह । तेनेदंनिर्मितंपूर्वं पुरन्तुगजसाह्वयम् ४२ हस्तिनश्चैवदायादास्त्रयःपरम
कीर्त्तयः । अजमीढोद्विमीढश्च पुरुमीढस्तथैवच ४३ अजमीढस्यपत्न्यस्तुतिस्रःकुरु
कुलोद्वहाः । नीलिनीधूमिनीचैव केशिनीचैवविश्रुताः ४४ सतासुजनयामास पुत्रान्वैदेव
वर्चसः । तपसोऽन्तेमहातेजा जातावृद्धस्यधार्मिकाः ४५ भारद्वाजप्रसादेन विस्तरंतेषुमे

मरुत् देवता भरतकी स्तुति पूर्वक प्रशंसा करके उसको वह भरद्वाज नाम पुत्र देतेभये २९ इसप्रकारसे अंगिराके पुत्र बृहस्पतिका औरसपुत्र भरद्वाज मरुतोंने भरतको देदिया ३० फिर भरत उस समर्थ भरद्वाज पुत्रको प्राप्तहोकर यह वचन कहताभया कि हेविभो मैं अपने हितके निमित्त तुमको प्राप्तहोकर कृतार्थहुआ ३१ और प्रथम पुत्र जन्ममें वितथ अर्थात् मिथ्यामनोरथ होताभया इसहेतुसे भरद्वाजका वितथ नामहुआ ३२ उस भरद्वाजसे पृथ्वीपर जो ब्राह्मण और क्षत्री होतेभये वहद्व्यामुष्यायण और कौलीन इननामोंसे दोप्रकारकेहुए जन यह वितथहोगया तब भरतजी स्वर्गको जाते भये और ऋषि भरद्वाज भी पुत्रका अभिषेककरके स्वर्गमेंगये ३३।३४ वितथके महायशवाला भुवमन्यु नाम पुत्रहुआ भुवमन्युके महाभूतोंके सदृश ३५ बृहत्क्षेत्र १ महावीर्य्य २ नर और गर्ग यह चार पुत्र हुए नरके संकृति पुत्रहुआ उसके महायशाहुआ ३६ और गर्गके बहुत बुद्धिवाला विद्वान् शिविहोता भया ३७ शिविके क्षत्र संज्ञक पुत्र क्षत्र करके ब्राह्मणहुए महाबीरका पुत्र बुद्धिमान् उरुक्षवहुआ ३८ उसके विशालानाम स्त्रीमें त्र्यूषण १ पुष्करि २ औरबड़े यशवालाकवि ३९ यह तीनपुत्रहुए यह सब उरुक्षवके सम्बन्धसे ब्राह्मणशरीरको प्राप्तहुएहैं औरइनतीनोंको काव्योंके श्रेष्ठमहर्षि कहते हैं ४०।४१ और गर्ग संकृति–काव्य और क्षत्रयुक्त यह ब्राह्मण हुए हैं और बड़े चतुरभी हुए हैं बृहत्क्षत्रका पुत्र क्षिति और हस्तिनामसे प्रसिद्धहै इसने प्रथम गजसाह्वयनाम पुर अर्थात् हस्तिंनापुर रचाहै ४२ और हस्तीके सुन्दरकीर्तिमान् अजमीढ १ द्विमीढ २ और पुरुमीढ यह तीन पुत्र हुए ४३ अजमीढके कुरुकुलकी बढ़ानेवाली नीलिनी १ धूमिनी २ और केशिनी यहतीन स्त्रियां विख्यातहैं ४४ उन

शृणु । अजमीढस्यकेशिन्यां कण्वःसमभवत्किल ४६ मेधातिथिःसुतस्तस्य तस्मात्का
ण्वायनाद्विजाः । अजमीढस्यभूमिन्यां जज्ञेबृहदनुर्नृपः ४७ बृहदनोर्बृहन्तोऽथबृहन्त
स्यबृहन्मनाः । बृहन्मनःसुतश्चापि बृहद्धनुरितिश्रुतः ४८ बृहद्धनोर्बृहदिषुः पुत्रस्तस्य
जयद्रथः । अश्वजित्तनयस्तस्य सेनजित्तस्यचात्मजः ४९ अथसेनाजितःपुत्राश्चत्वारो
लोकविश्रुताः । रुचिराश्वश्चकाव्यश्च राजादृढरथस्तथा ५० वत्सश्चावर्तकोराजा य
स्यैतेपरिवत्सकाः । रुचिराश्वस्यदायादः पृथुसेनोमहायशाः ५१ पृथुसेनस्यपौरस्तु पौ
राणीपोऽथजज्ञिवान् । नीपस्यैकशतन्त्वासीत् पुत्राणाममितौजसाम् ५२ नीपाइति स
माख्याता राजानःसर्वएवते । तेषांवंशकरःश्रीमान् नीपानांकीर्त्तिवर्द्धनः ५३ काव्याच्च
समरोनाम सदेष्टसमरोऽभवत् । समरस्यपारसम्पारौ सदश्वइतितेत्रयः ५४ पुत्राःसर्वे
गुणोपेता जातावैविश्रुताभुवि । पारपुत्रःपृथुर्जातः पृथोस्तुसुकृतोऽभवत् ५५ जज्ञे
सर्वगुणोपेतो विभ्राजस्तस्यचात्मजा । विभ्राजस्यतुदायादस्त्वणुहोनामवीर्य्यवान् ५६
बभूवशुकजामाता कृत्वीभर्तामहायशाः । अणुहस्यतुदायादो ब्रह्मदत्तोमहीपतिः ५७
युगदत्तःसुतस्तस्य विष्वक्सेनोमहायशाः । विभ्राजःपुनराजातो सुकृतेनेहकर्म्मणा ५८
विष्वक्सेनस्यपुत्रस्तु उदक्सेनोबभूवह । भल्लाटस्तस्यपुत्रस्तु तस्यासीज्जनमेजयः ।
उग्रायुधेनतस्यार्थे सर्वेनीपाःप्रणाशिताः ५९ (ऋषय ऊचुः) उग्रायुधःकस्यसुतःकस्य

तीनों स्त्रियोंमें अजमीढ देवताओंकेसे तेजवाले पुत्रोंको उत्पन्नकरता भया यह पुत्र तपके अन्तमें
वृद्धिमान् और परम धार्मिक हुए हैं ४५ और भरद्वाजकी कृपासेहुए हैं उनकोविस्तार समेत सुनो
अजमीढके केशिनी स्त्रीमें कण्वहोताभया ४६ उसकापुत्र मेधातिथिहुआ उसीसे काण्वब्राह्मण हुए
औरअजमीढकी धूमिनीस्त्रीमें राजाबृहदनु उत्पन्नहुआ ४७ बृहदनुके बृहन्त हुआ बृहन्तके बृहन्मना
हुआ और बृहन्मनाका पुत्र बृहद्धनु हुआ ४८ बृहद्धनुका पुत्र बृहदिषुहुआ उसकापुत्र जयद्रथहुआ
उसका पुत्र अश्वजित् उसका पुत्र सेनाजित् हुआ ४९ इससेनाजित्के रुचिराश्व १ काव्य २ राजा
दृढरथ यहतीन हुए और चौथा चक्रवर्ती वत्सराजहुआ ५० और चक्रवर्ती वत्सराजके परिवत्सक
हुए और रुचिराश्वकापुत्र बड़ायशवाला पृथुसेनहुआ ५१ पृथुसेनकेपौरहुआ पौरके नीपहुआ नीपके
बड़ेपराक्रमी सौ१००पुत्र उत्पन्नहुए ५२ और सबनीपसे विख्यातहुए और राजाहुए उनमें श्रीमान्
वंशकाकर्त्ता और कीर्त्तिका बढ़ानेवाला हुआ ५३ अब काव्यकावंश कहते हैं–काव्यके समर नाम
पुत्रहुआ उसको युद्धही प्रियथा इससमरके पार–संपार और सदश्व यह तीन पुत्रहोते भये ५४
यह तीनों पुत्र सबगुणों से युक्त पृथ्वीपर विख्यातहुए इनमें से पारकापुत्र पृथुनामहुआ पृथुकेसुकृत
हुआ ५५ सुकृतका सर्वगुण संपन्न विभ्राजपुत्रहुआ विभ्राजके बड़े पराक्रमवाला अणुहनामपुत्रहुआ
यह महायशी अणुह शुक्रकाजामाता और कृत्वीकाभर्त्ताहुआ अणुहकापुत्र राजाब्रह्मदत्तहुआ ५६।५७
ब्रह्मदत्तके युगदत्तहुआ उसके महायशी विष्वक्सेनहुआ यह सुकृतकर्मोंसे राजाहुआ ५८ बिष्वक्सेन
के उदक्सेनहुआ उसके भल्लाटहुआ उसके जनमेजयहुआ फिर उग्रायुधने संपूर्ण नीपसंज्ञक राजा
नष्टकरदिये ५९ यहसुनकर ऋषियोंने पूछा कि हेसूतजी उग्रायुध किसकापुत्रहुआ और किसके वंश

वंशेसकथ्यते। किमर्थंतेनतेनीपास्सर्वेचैवप्रणाशिताः ६० (सूत उवाच) उग्रायुधःसूर्य्यवंश्यस्तपस्तेपेवराश्रमे। स्थाणुभूतोऽष्टसाहस्रन्तंभेजेजनमेजयः ६१ तस्यराज्यंप्रतिश्रुत्यनीपानाजघ्निवान्प्रभुः। उवाचसांत्वंविविधंजघ्नुस्तेवैह्युभावपि ६२ हन्यमानागतान्चेयस्माद्धेतोर्नमेवचः। शरणागतरक्षार्थंतस्माद्वंशपामिवः ६३ यदिमेऽस्तितपस्तप्तंसर्वान्नयतुवोयमः। ततस्तान्कृष्यमाणांस्तुयमेनपुरतःसतु ६४ कृपयापरयाविष्टोजनमेजयमूचिवान्। गतानेतानिमान्वीरांस्त्वंमेरक्षितुमर्हसि ६५ (जनमेजयउवाच) अरेपापा! दुराचारा! भवितारोऽस्यकिंकराः। तथेत्युक्तस्ततोराजायमेनयुयुधेचिरम् ६६ व्याधिभिर्नारकैर्घोरैर्यमेनसहतान्बलात्। विजित्यमुनयेप्रादात्तदद्भुतमिवाभवत् ६७ यमस्तुष्टस्ततस्तस्मैमुक्तिज्ञानंददौपरम्। सर्वेयथोचितंकृत्वाजग्मुस्तेकृष्णमव्ययम् ६८ येषान्तुचरितंगृह्यहन्यन्तेनापमृत्युभिः। इहलोकेपरेचैवसुखमक्षय्यमश्नुते ६९ अजमीढस्यधूमिन्यांविद्वान्जज्ञेयवीनरः। धृतिमांस्तस्यपुत्रस्तु तस्यसत्यधृतिःस्मृतः। अथसत्यधृतेःपुत्रो दृढनेमिःप्रतापवान् ७० दृढनेमिसुतश्चापिसुधर्मानामपार्थिवः। आसीत्सुधर्मतनयःसार्वभौमःप्रतापवान् ७१ सार्वभौमेतिविख्यातःपृथिव्यामेकराट्बभौ। तस्यान्ववायेमहति महापौरवनन्दनः ७२ महापौरवपुत्रस्तु राजारुक्मरथःस्मृतः। अथरुक्मरथस्यासीत् सुपार्श्वोनामपार्थिवः ७३ सुपार्श्वतनयश्चापिसुमतिर्नामधार्मिकः। सुमतेरपिधर्मात्माराजासन्नतिमान

में हुआ और इसने किसहेतुसे संपूर्णनीपराजाओं को नष्टकिया इसको विस्तारपूर्व्वक कहिये ६० सूतजीने कहा कि हेऋषियो उग्रायुधसूर्य्यवंश में हुआ और श्रेष्ठआश्रम में लक्कड़साहोकर अठारह हज़ार वर्षतक तपकरतारहा और राज्यके निमित्त इसको जनमेजय भजताभया ६१ यह जनमेजय को राज्यकी आज्ञादेकर नीपोंको मारताभया फिर उग्रायुधने शान्ति के वचनभी कहे तो भी नीपों ने इन दोनोंको मारा ६२ फिर उग्रायुध कहनेलगा कि जो तुमने शरणागतकी रक्षाके निमित्तमेरा वचन नहीं माना इसहेतुसे मैं तुमको शापदेताहूं ६३ कि जोमैंने कुछ तपकियाहै तो तुमसबलोगों को यमदेवतालेजांय फिर इसवचन के कहतेही यमराज इनसबको खेंचताभया ६४ फिर कृपाकरके उग्रायुध जनमेजय से यह वचन कहनेलगा कि हेजनमेजय तू इनवीरोंकी रक्षाकरनेको योग्यहै ६५ यह सुनकर उनसबसे कहनेलगा रेपापी दुराचारियो तुम उग्रायुधके किंकरहोजाओ ऐसे कहकर जनमेजय यमसे युद्धकरनेलगा ६६ फिर व्याधियों समेत घोरनरक और यम सहित नीपोंकोजीत कर वह जनमेजय मुनिउग्रायुध को देताभया यह बड़ाआश्चर्य्यसा हुआ ६७ पीछे यम प्रसन्नहोकर जनमेजयको मुक्तिज्ञान देताभया फिर वह सबनीपभी यथोचित कर्म करके अव्यय अविनाशीकृष्णको प्राप्तहुए ६८ जो कोई इनके चरित्रोंको सुनताहै वह अपमृत्यु से नहींमरता और इसलोक वा परलोक दोनों में अक्षय सुखकोप्राप्तहोता है यह अजमीढ़की एकरानीका वंशहुआ ६९ और अजमीढ़ की धूमिनी नामरानी में विद्वान् यवीनर उत्पन्नहुआ उसके धृतिमान् पुत्रहुआ उसके सत्यधृतिहुआ सत्यधृति के प्रतापी दृढनेमिहुआ ७० दृढनेमिकापुत्र सुधर्मानाम राजाहुआ सुधर्माकापुत्र प्रतापवान् सार्वभौमहुआ ७१ यह सब पृथ्वीका चक्रवर्तीहुआ इसके उत्तमवंशमें महापौरवहुआ ७२ महा-

पि७४तस्यासीत्सन्नतिमतः कृतोनामसुतोमहान्।हिरण्यनाभिनःशिष्यः कौशल्यस्यमहा
त्मनः७५चतुर्विंशतिधायेन प्रोक्तावैसामसंहिताः।स्मृतास्तेप्राच्यसामानःकार्तानामेहसा
मगाः ७६कार्तिरुग्रायुधःसोवै महापौरववर्द्धनः।बभूवयेनविक्रम्यपृथुकस्यपिताहतः ७७
नीलोनाममहाराजःपञ्चालाधिपतिर्वशी। उग्रायुधस्यदायादःक्षेमोनाममहायशाः ७८
क्षेमात्सुनीथःसंजज्ञे सुनीथस्यनृपञ्जयः। नृपञ्जयाच्चविरथ इत्येतेपौरवाःस्मृताः७९॥

इतिश्रीमत्स्यपुराणेपौरववंशवर्णनोनामैकोनपञ्चाशत्तमोध्यायः ४९॥

(सूत उवाच)अजमीढस्यनीलिन्यां नीलःसमभवन्नृपः।नीलस्यतपसोग्रेणसुशान्ति
रुपपद्यत१पुरुजानुःसुशान्तेस्तु पृथुस्तुपुरुजानुतः। भद्राश्वःपृथुदायादोभद्राश्वतनया
न्शृणु २मुद्गलश्चजयश्चैव राजाबृहदिषुस्तथा। जवीनरश्चविक्रान्तःकपिलश्चैवपञ्च
मः३पञ्चानाञ्चैवपञ्चालानेतान् जनपदान्विदुः।पञ्चालंरक्षिणोह्येते देशानामितिनः
श्रुतम् ४ मुद्गलस्यापिमौद्गल्याः क्षत्रोपेताद्विजातयः। एतेह्याङ्गिरसःपक्षं संश्रिताःकाण्व
मुद्गलाः ५ मुद्गलस्यसुतोजज्ञे ब्रह्मिष्ठःसुमहायशाः। इन्द्रसेनःसुतस्तस्य विन्ध्याश्वस्त
स्यचात्मजः ६ विन्ध्याश्वान्मिथुनंजज्ञे मेनकायामितिश्रुतिः। दिवोदासश्चराजर्षिरह
ल्याचचयशस्विनी ७ शरद्वतस्तुदायादमहल्यासम्प्रसूयत। शतानन्दमृषिश्रेष्ठं तस्या
पिसुमहातपाः ८ सुतःसत्यधृतिर्नाम धनुर्वेदस्यपारगः। आसीत्सत्यधृतेःशुक्रममोघं

पौरवका पुत्र राजा रुक्मरथहुआ रुक्मरथ के सुपार्श्वनाम राजा होताभया ७३ सुपार्श्वकापुत्रबड़ा
धर्मिष्ठ सुमतिनामहुआ सुमति के महात्मा सन्नतिमानहुआ ७४ सन्नतिमान् के कृतनाम पुत्रहुआ
वह हिरण्यनाभि कौशल्यमहात्मा का शिष्यहुआ ७५ इसकृतने चौबीसप्रकार की सामसंहिताकही
है उस सामके गानेवालों का नाम कार्त्तसंज्ञक सामगहुआ है ७६ कृतकापुत्र उग्रायुध जोहुआ वह
महापौरववंश का बढ़ानेवाला हुआ उसीने अपने पराक्रम से पृथुक के पिताको मारा ७७ वह
पृथुकका पिता नीलनाम से विख्यात पंजाबकाराजाथा और उग्रायुधका पुत्र महायशवाला क्षेम
हुआ ७८ क्षेम के सुनीथहुआ सुनीथ के नृपंजयहुआ और नृपंजय के विरथ हुआ इस प्रकारसे यह
पौरव राजा हुए हैं ७९॥ इतिश्रीमत्स्यपुराणभाषाटीकायामेकोनपञ्चाशत्तमोऽध्यायः ४९॥

सूतजीबोले कि हे ऋषियो अजमीढ़के नीलिनीनाम रानीमें नीलनाम पुत्रहुआ नीलके उग्रतप
करके सुशान्तिनाम पुत्रहुआ १ सुशान्तिके पुरुजानु हुआ पुरुजानुके पृथुहुआ पृथुका पुत्र भद्राश्व
हुआ हे ऋषिलोगो अब भद्राश्वके पुत्रोंको सुनो २ मुद्गल—जय-बृहदिषु-जवीनर और कपिल यह
पांचपुत्र हुए ३ यह पांचों पंजाबके पांचोंदेशोंके राजाहुए और धर्म से पंजाबकी रक्षाकरतेभये सूत-
जी कहतेहैं कि हमने यहसुनाहै ४ कि इनमेंसे मुद्गलके मौद्गल जो विख्यातहुए वह क्षत्रधर्म युक्त
ब्राह्मणहुए यह मौद्गल और पूर्वकहेहुए काण्व दोनों अंगिराके पक्षके आश्रयहोते भये ५ मुद्गल
के महायशी ब्रह्मिष्ठनाम पुत्रहुआ उसकापुत्र इन्द्रसेनहुआ उसकापुत्र विंध्याश्व हुआ ६ विंध्याश्व
के मेनका नामरानीमें राजर्षि दिवोदास और एक महायशवाली अहल्यानाम पुत्रीहुई ७ अहल्या
के शरद्वान् से ऋषियों में श्रेष्ठ महातपवाले शतानन्द हुए ८ शतानन्द के सत्यधृति पुत्रहुआ यह

धार्मिकस्यतु ९ स्कन्नंरेतःसत्यधृतेर्दृष्ट्वा चाप्सरसंजले । मिथुनंतत्रसम्भूतं तस्मिन्स
रसिसम्भृतम् १० ततःसरसितस्मिंस्तु क्रममाणंमहीपतिः । दृष्ट्वाजग्राहकृपया शन्त
नुर्मृगयांगतः ११ एतेशरद्वतःपुत्राआख्यातागौतमावराः । अतऊर्ध्वंप्रवक्ष्यामि दिवो
दासस्यवैप्रजाः १२ दिवोदासस्यदायादो धर्मिष्ठोमित्रयुर्नृपः । मैत्रायणावरःसोऽथ मैत्रे
यस्तुततःस्मृतः १३ एतेवंश्यायतेःपक्षाः क्षत्रोपेतास्तुभार्गवाः । राजाचैद्यवरोनाम मैत्र
यस्यसुतःस्मृतः १४ अथचैद्यवरात्विद्वान्सुदासस्तस्यचात्मजः । अजमीढःपुनर्जातः
क्षीणेवंशेतुसोमकः १५ सोमकस्यसुतोजन्तुर्हतेतस्मिन् शतं बभौ । पुत्राणामजमीढ़स्य
सोमकस्यमहात्मनः १६ महिषीत्वजमीढ़स्य धूमिनीपुत्रवर्द्धिनी । पुत्राभावेतपस्तेपे श
तंवर्षाणिदुश्चरम् १७ हुत्वाग्निंविधिवत्सम्यक् पवित्रीकृतभोजना । अग्निहोत्रक्रमेणै
व सासुष्वापमहाव्रता १८ तस्यांवैधूमवर्णायामजमीढ़ःसमीयिवान् । ऋक्षंसाजनया
मास धूमवर्णंशताग्रजम् १९ ऋक्षात्संवरणोजज्ञे कुरुःसंवरणात्ततः । यःप्रयागमति
क्रम्य कुरुक्षेत्रमकल्पयत् २० कृष्यतस्तुमहाराजो वर्षाणिसुबहून्यथ । कृष्यमाणस्ततः
शक्रो भयात्तस्मैवरन्ददौ २१ पुण्यञ्चरमणीयञ्च कुरुक्षेत्रन्तुतत्स्मृतम् । तस्यान्ववा
यःसुमहान् यस्यनाम्नातुकौरवाः २२ कुरोस्तुदायिताःपुत्राः सुधन्वाजह्नुरेवच । परीक्षि
च्चमहातेजाः प्रजनश्चारिमर्दनः २३ सुधन्वनस्तुदायादः पुत्रोमतिमतांवरः । च्यवन

धनुर्विद्याका बड़ाज्ञाताहुआ इस धार्मिक सत्यधृतिका अमोघवीर्य्य होताभया ९ इससत्यधृतिका
वीर्य्य अप्सराको देखकर जलमें गिरा उसजलगतवीर्य्यसे सरोवरमें एकपुत्र और पुत्री यह दोउत्पन्न
हुए १० फिर उसीसमयमें राजा शन्तनुशिकारको गया वहाँ सरोवरमें उस पुत्र पुत्रीके जोड़ेको देख
रूपाकरके ले आताभया ११ यह सब शरद्वान्के पुत्र गौतमवर विख्यातहुए अब इसकेपीछे सूतजी
दिवोदासकी संतानकावर्णन करतेभये १२ दिवोदासका पुत्र बड़ा धर्मिष्ठ मित्रयुहुआ और मित्रयुके
मैत्रेय पुत्र हुआ १३ यह सब क्षत्र जातियुक्त भार्गवहुए मैत्रेयकापुत्र राजा चैद्यवर नाम होताभया
१४ चैद्यवरका पुत्र विद्वान् सुदासहुआ सुदासके दूसरा अजमीढ़ हुआ अजमीढ़ के सोमकहुआ १५
सोमक के जन्तुनाम पुत्र हुआ और अजमीढ़के पुत्रोंके मध्यमें महात्मा सोमकहुआ १६ जब सोमक
मारागया तब अजमीढ़कीरानी धूमिनी पुत्रके बढ़ानेवाले पुत्रके अभावसे महादुष्कर तप करतीभई
१७ वह धूमिनी विधिवत् अग्निमें अग्निहोत्रादि कर्मसे और पवित्र भोजनादिकोकर महाव्रतमें सं-
युक्त होकर सोतीभई १८ और उस धूम्रवर्णासे अजमीढ़ विषय करताभया तब वह धूम्रवर्ण ऋक्ष
को जन्मती भई यह ऋक्ष बड़ा पराक्रमी हुआ १९ ऋक्षसे संवरण हुआ संवरणसे कुरुहुआ जो कुरु
कि प्रयागको उल्लंघन करके कुरुक्षेत्रको रचताभया २० यह महाराज बहुत बर्षतक इन्द्रके आवाहन
के लिये तपकरताभया तब भयसे इन्द्र उसकेपास आकर उसकोवर देताभया २१ इसीसे कुरुक्षेत्र
महापवित्र और रमणीय कहाहै उस कुरुकेवंशकी वृद्धि हुई जिसकेनामसे कौरव कहाते हैं २२ कुरु
के प्रियपुत्र सुधन्वा--जह्नु--परीक्षित्–प्रजन और अरिमर्द्दन यह पांचों महातेजस्वी और धर्मात्मा
हुएहैं २३ इनमें सुधन्वाका पुत्र बुद्धिमानोंमें श्रेष्ठ च्यवनहुआ च्यवनकापुत्र धर्म अर्थका जाननेवाला

स्तस्यपुत्रस्तु राजाधर्मार्थतत्त्ववित् २४ च्यवनस्यकृमिःपुत्र ऋक्षाज्जज्ञेमहातपाः । कृमेःपुत्रोमहावीर्यः ख्यातइन्द्रसमोविभुः २५ चैद्योपरिचरोवीरो वसुर्नामान्तरिक्षगः । चैद्योपरिचराज्जज्ञे गिरिकासप्तवैसुतान् २६ महारथोमगधराट् विश्रुतोयोबृहद्रथः । प्रत्यश्रवाःकुशश्चैव चतुर्थोहरिवाहनः २७ पञ्चमश्चयजुश्चैव मत्स्यःकालीचसप्तमी । बृहद्रथस्यदायादः कुशाग्रोनामविश्रुतः २८ कुशाग्रस्यात्मजश्चैव वृषभोनामवीर्यवान् । वृषभस्यतुदायादः पुण्यवान्नामपार्थिवः २९ पुण्यःपुण्यवतश्चैव राजासत्यधृतिस्ततः । दायादस्तस्यधनुषस्तस्मात् सर्वश्चजज्ञिवान् ३० सर्वस्यसम्भवःपुत्रस्तस्माद्राजाबृहद्रथः । द्वेतस्यशकलेजातेजरयासन्धितश्चसः ३१ जरयासन्धितोयस्माज्जरासन्धस्ततःस्मृतः । जेतासर्वस्यक्षत्रस्यजरासन्धोमहाबलः ३२ जरासन्धस्यपुत्रस्तुसहदेवःप्रतापवान् सहदेवात्मजःश्रीमान्सोमवित्समहातपाः ३३ श्रुतश्रवास्तुसोमादेर्मागधाःपरिकीर्तिताः । जह्नुस्त्वजनयत्पुत्रंसुरथंनामभूमिपम् ३४ सुरथस्यतुदायादो वीरोराजाविदूरथः । विदूरथसुतश्चापिसार्वभौमइतिस्मृतः ३५ सार्वभौमाज्जयत्सेनोरुचिरस्तस्यचात्मजः । रुचिरात्तुततोभौमस्त्वरितायुस्ततोऽभवत् ३६ अक्रोधनस्त्वायुसुतस्तस्माद्देवातिथिःस्मृतः । देवातिथेस्तुदायादो दक्षएवबभूवह ३७ भीमसेनस्ततोदक्षात् दिलीपस्तस्यचात्मजः । दिलीपस्यप्रतीपस्तु तस्यपुत्रास्त्रयःस्मृताः ३८ देवापिःशन्तनुश्चैव बाह्लीकश्चैवतेत्रयः । बाह्लीकस्यतुदायादाः सप्तबाह्लीश्वरान्नृप! । देवापिस्तुह्यपध्यातः प्रजाभिरभवन्मुनिः ३९ (मुनयऊचुः) प्रजाभिस्तुकिमर्थंवै अपध्यातोजनेश्वरः । कोदोषोराजपुत्रस्य

ऋक्षहुआ ऋक्षका पुत्र बड़ातपस्वी कृमिनामपुत्रहुआ कृमिके इन्द्रके समान प्रसिद्धशूरवीरमहावीर्य अन्तरिक्षमें चलनेवाला चैद्योपरिचरनामपुत्रहुआ जिसका दूसरानाम वसुकहतेहैं उसचैद्योपरिचरसे गिरिकानाम रानी सातपुत्रोंको उत्पन्न करतीभई उनकेनाम महारथ मगधका राजाबृहद्रथ १ प्रत्यश्रवा २ कुश ३ हरिवाहन ४ यजु ५ मत्स्य ६ और सातवीं कालीनाम कन्याहुई इनमें बृहद्रथकापुत्र कुशाग्रनामहुआ २४।२८कुशाग्रकापुत्र वीर्य्यमान् वृषभनामहुआ वृषभका पुत्र राजापुण्यवान्हुआ २९ पुण्यवान्के पुण्यनाम राजाहुआ उसकापुत्र सत्यधृति सत्यधृतिके धनुषनाम और धनुषनामके सर्वनाम वाला पुत्रहुआ ३० सर्वका संभव नाम पुत्रहुआ उसका पुत्रराजा बृहद्रथहुआ राजाबृहद्रथकेपुत्रके दोखण्डहुए उनदोनोंखण्डोंको जरा नाम राक्षसीने जोड़दिया ३१ तबजराके जोड़देनेसे उसका नामजरासन्ध हुआ वहसब क्षत्रियोंका जीतनेवाला औरमहापराक्रमीहुआ ३२ जरासन्धका पुत्र प्रतापवान् सहदेव हुआ सहदेवके पुत्रश्रीमान् और बड़ा तपस्वी सोमवित् हुआ ३३ श्रुतश्रवा और सोमादिसे मागधराजा कहेगयेहैं और राजा जह्नुकापुत्र सुरथनाम राजाहुआ ३४सुरथका पुत्रराजा विदूरथहुआ बिदूरथकापुत्र सार्वभौमनामराजा हुआ ३५ सार्वभौम के जयत्सेन हुआ उसका पुत्र रुचिरनामहुआ रुचिरके भौमहुआ उसकापुत्र त्वरितायुनामहुआ ३६ उसके अक्रोधन अक्रोधनके देवातिथि और देवातिथिका पुत्र दक्षहोताभया ३७ दक्षसेभीमसेन उसकापुत्र दिलीपहुआ दिलीपकापुत्र प्रतीपहुआ ३८उसकेदेवापि शन्तनु और वाह्लीक यहतीनपुत्रहुए हेराजा इनमें वाह्लीक के

प्रजाभिःसमुदाहृतः ४० (सूतउवाच) किल्लासीद्राजपुत्रस्तु कुष्ठितंनाभ्यपूजयन् । भवि
ष्यंकीर्त्तयिष्यामि शन्तनोस्तुनिबोधत ४१ शन्तनुस्त्वभवद्राजा विद्वान्सोवैमहाभिष
क् । इदंचोदाहरन्त्यत्र श्लोकंप्रतिमहाभिषक् ४२ यंयंकराभ्यांस्पृशति जीर्णंरोगिणमे
व च । पुनर्युवाचभवति तस्मात्तंशन्तनुंविदुः ४३ तत्तस्यशन्तनुत्वंहि प्रजाभिरिहकी
र्त्यते । ततोवृणुतभार्य्यार्थं शन्तनुर्जाह्नवींनृप ! ४४ तस्यांदेवव्रतंनाम कुमारंजनयद्
विभुः । कालीविचित्रवीर्य्यन्तु दाशेय्यजनयत्सुतम् ४५ शन्तनोर्दयितंपुत्रं शान्ता
त्मानमकल्मषम् । कृष्णद्वैपायनोनाम क्षेत्रेवैचित्रवीर्य्यके ४६ धृतराष्ट्रञ्चपाण्डुञ्च
विदुरंचाप्यजीजनत् । धृतराष्ट्रस्तुगान्धार्य्यां पुत्रानजनयच्छतम् ४७ तेषांदुर्य्योधनः
श्रेष्ठः सर्व्वक्षत्रस्यवैप्रभुः । माद्रीकुन्तीतथाचैव पाण्डोर्भार्य्येबभूवतुः ४८ देवदत्ताःसुताः
पञ्च पाण्डोरर्थेऽभिजज्ञिरे । धर्माद्युधिष्ठिरोजज्ञे मारुताच्चवृकोदरः ४९ इन्द्राद्धनञ्जय
श्चैव इन्द्रतुल्यपराक्रमः । नकुलंसहदेवञ्च माद्र्यश्विभ्यामजीजनत् ५० पञ्चै
तेपाण्डवेभ्यस्तु द्रौपद्यांजज्ञिरेसुताः । द्रौपद्यजनयच्छ्रेष्ठं प्रतिविन्ध्यंयुधिष्ठिरात् ५१
श्रुतसेनंभीमसेनाच्छ्रुतकीर्त्तिंधनञ्जयात् । चतुर्थंश्रुतकर्माणं सहदेवादजायत ५२ न

वाह्लीश्वर सातपुत्रहुए और देवापि प्रजाओं करके त्यागाहुआ मुनिहोताभया ३९ मुनिलोग बोले
किहेसूतजी उसदेवापिको राजाओंने और प्रजालोगोंने किस हेतुसे त्यागा ऐसाउसराजपुत्रका क्या
दोषथा जिससे किसीप्रजानेभी उसको अंगीकार नहीं किया ४० सूतजीने कहा हे ऋषियो यहराज
पुत्रकुष्ठी होगया था इस हेतुसे सबने त्याग दिया हे मुनिलोगो अब मैं भविष्य शन्तनु के वंशको
कहताहूं उसको मनलगाकर सुनो ४१ यह शन्तनु बड़ा वैद्य और विद्वान् राजा होताभया वैद्यक में
इसका ऐसायश वर्णन करते हैं ४२ कि जिस जीर्णरोगी का यह स्पर्श करताथा वह असाध्यरोगी भी
रोगसे रहित होकर तरुण होजाताथा इसी हेतुसे इसको शन्तनु अर्थात् कल्याण करनेवाला कहा
है सब प्रजाओं ने इसके शन्तनु भावको वर्णन किया है हे राजा यह शन्तनु श्रीजाह्नवी गंगाजीको
अपनी भार्य्या बनावता भया ४३।४४ उसी जाह्नवी से यह समर्थ देवव्रत भीष्मजी उत्पन्नहुए और
शन्तनुकी कालीनाम भार्य्यासे विचित्रवीर्य्य उत्पन्न होताभया और शन्तनु के प्रियपुत्र शान्तात्मा
पापरहित वेदव्यासजी विचित्रवीर्य्य के क्षेत्रमें ४५।४६ धृतराष्ट्र पाण्डु और विदुर इनतीन पुत्रों को
उत्पन्न करतेभये इनमें धृतराष्ट्रके गान्धारीस्त्रीमें सौपुत्र हुए ४७ इन सौपुत्रोंमें सबसे बड़ा दुर्योधन
सम्पूर्ण क्षत्रियोंमें श्रेष्ठ और समर्थहुआ और दूसरे धृतराष्ट्रके छोटेभाई पाण्डुकी कुन्ती और माद्री
यहदोरानी होतीभईं ४८ फिर पाण्डुके देवताओं के दियेहुए पांच पुत्रहुए प्रथम धर्मराजसे बड़ापुत्र
युधिष्ठिरहुआ दूसरा पवनसे भीमसेनहुआ ४९ और तीसराइन्द्रसे इन्द्रकेही समान अर्जुन हुआ
और पाण्डुकी दूसरी माद्री स्त्रीमें अश्विनी कुमारोंके सम्बन्धसे नकुल और सहदेव यह दोपुत्र होते
भये ५० इन पाण्डुराजाके पांचों पुत्रोंकी एकरानी द्रौपदी हुई इसमें पांचों भर्त्ताओंके पांच पुत्रहुए
युधिष्ठिरसे द्रौपदीमें प्रतिविन्ध्यहुआ ५१ भीमसेनसे श्रुतसेनहुआ—अर्जुनसे श्रुतकीर्तिहुआ सहदेव
से चौथाश्रुतकर्मा हुआ ५२ और नकुलसे पांचवाँ शतानीक उत्पन्न होताभया इसरीतिसे द्रौपदीके

कुलाच्चशतानीकं द्रौपदेयाःप्रकीर्त्तिताः । तेभ्योऽपरेपाण्डवेया षडेवान्येमहारथाः ५३ हैडम्बोभीमसेनात्तु पुत्रोजज्ञेघटोत्कचः । काशीबलधरात्भीमात् जज्ञेवैसर्वगंसुतम् ५४ सुहोत्रंतनयंमाद्री सहदेवादसूयत । करेणुमत्यांचैद्यायां निरमित्रस्तुनाकुलिः ५५ सुभद्रायांरथीपार्थादभिमन्युरजायत । यौधेयंदेवकीचैव पुत्रंजज्ञेयुधिष्ठिरात् ५६ अभिमन्योःपरीक्षित्तु पुत्रःपरपुरञ्जयः । जनमेजयःपरीक्षितः पुत्रःपरमधार्मिकः ५७ ब्रह्माणंकल्पयामास सवैवाजसनेयकम् । सवैशम्पायनेनैव शप्तःकिलमहर्षिणा ५८ नस्थास्यतीहदुर्बुद्धे! तवैतद्वचनंभुवि । यावत्स्थास्यसित्वंलोके तावदेवप्रपत्स्यति ५९ क्षत्रस्यविजयंज्ञात्वा ततःप्रभृतिसर्वशः । अभिगम्यस्थिताश्चैव नृपञ्चजनमेजयम् ६० ततःप्रभृतिशापेन क्षत्रियस्यतुयाजिनः । उत्सन्नायाजिनोजज्ञे ततःप्रभृतिसर्वशः ६१ क्षत्रस्ययाजिनःकेचित् शापात्तस्यमहात्मनः । पौर्णमासेनहविषा इष्ट्वातस्मिन्प्रजापतिम् । सवैशम्पायनेनैव प्रविशन्वारितस्ततः ६२ परीक्षितःसुतःसोवै पौरवोजनमेजयः । द्विरश्वमेधमाहृत्य महावाजसनेयकः ६३ प्रवर्तयित्वातंसर्व मृषिंवाजसनेयकम् । विवादेब्राह्मणैस्सार्धमभिशप्तोवनंययौ ६४ जनमेजयाच्छतानीकस्तस्माज्जज्ञेसवीर्यवान् । जनमेजयःशतानीकं पुत्रंराज्येऽभिषिक्तवान् ६५ अथाश्वमेधेनततः शतानीकस्यवीर्यवान् । जज्ञेऽधिसोमकृष्णाख्यः साम्प्रतंयोमहायशाः ६६ तस्मिन्शासतिराष्ट्रेतु युष्माभिरिदमाहृतम् । दुरापंदीर्घसत्रंवै त्रीणिवर्षाणिपुष्करे । वर्षद्वयंकुरुक्षेत्रे दृषद्वत्यांद्विजोत्तमाः! ६७ (मुनय ऊ

पांचोंसे पांचपुत्रहुए उनपाण्डवों से इनके पांचों भाई के सिवाय और छः पुत्र होतेभये ५३ भीमसेनसे हिड़म्बाराक्षसीमें घटोत्कच और इसी काशीबलधारी भीमसेनसे सर्वगनाम पुत्रहुआ ५४ सहदेवसे सुहोत्र पुत्रहुआ और नकुलसे करेणुमती स्त्रीमें निरामित्र पुत्रहुआ ५५ सुभद्रास्त्रीमें अर्जुनसे अभिमन्युनाम रथीपुत्रहुआ औरयुधिष्ठिरसे देवकी स्त्री सौधेय पुत्रको जनतीभई ५६ अभिमन्युसे परपुरकाजीतनेवाला परीक्षितहुआ परीक्षितसे परमधार्मिक जनमेजय नामपुत्रहुआ ५७ वहजनमेजय जबब्रह्माको वाजसनेयक रचताभया तबवैशम्पायनमहर्षिने यहशापदेदिया ५८ किहेदुर्बुद्धे तेरायहवचन पृथ्वीपर नहींठहरेगा औरजबतक तू इसलोकमेंठहरेगा तबतक तेराराज्य क्षत्र बिजयको प्राप्तहोगा ५९ इसप्रकार सम्पूर्णराजा लोग क्षत्रविजयको जानकर जनमेजय राजाके पास आकर वर्त्तमानहुए ६० उसदिनके शापसे क्षत्रियोंका यज्ञकरानेवाला यज्ञमें अतिदुःखयुक्तरहताभया ६१ औरबहुतसे क्षत्रियोंके यज्ञकराने वाले क्षत्रयाजी उसमहात्माके शाप से पूर्णमास यज्ञसे प्रजापतिका पूजनकरके अग्नि में प्रवेशकरनेलगे तबउनको वैशम्पायनने निवारण किया फिर वह परीक्षितकापुत्र जनमेजय दोमहावाजसनेयक यज्ञोंकोकरके ६२।६३ और उसवाजसनेयक सर्वऋषिको प्रवृत्तकरके ब्राह्मणोंकेसाथ विवादके करने से शापित होकर बनको चलागया ६४ जनमेजयकापुत्र शतानीक बड़ापराक्रमी होताभया औरजनमेजय शतानीकको राज्यतिलक देताभया ६५ फिर शतानीक अश्वमेध यज्ञ करके बड़े यशी और महापराक्रमी अधिसोम कृष्णनाम पुत्रको उत्पन्न करताभया ६६ सूतजीनेकहा हेऋषियोवही अब राज्यकररहाहै और इसीके राज्यमें तुमनें पुष्कर तीर्थमें तीन वर्षतक अतिविस्तृतयज्ञ रचकर

भविष्यंश्रोतुमिच्छामः प्रजानांलोमहर्षणे । पुराकिलयदेतद्वै व्यतीतंकीर्तितंत्वया
चुः) ६८ येषुवैस्थास्यतंक्षत्रं उत्पत्स्यन्तेनृपाश्चये । तेषामायुःप्रमाणंच नामतश्चैवतान्नृपान्
६९ कृतयुगप्रमाणञ्च त्रेताद्वापरयोस्तथा । कलियुगप्रमाणंच युगदोषयुगक्षयम् ७०
सुखदुःखप्रमाणञ्च प्रजादोषंयुगस्यतु । एतत्सर्वंप्रसंख्याय पृच्छतांब्रूहिनःप्रभो ! ७१
सूतउवाच)यथामेकीर्तितंपूर्वं व्यासेनाक्लिष्टकर्म्मणा । भाव्यंकलियुगञ्चैव तथामन्वन्त
राणिच ७२ अनागतानिसर्वाणि ब्रुवतोमेनिबोधत । अतऊर्ध्वंप्रवक्ष्यामि भविष्यायेनृपा
स्तथा ७३ ऐडेक्ष्वाकान्वयेचैव पौरवेचान्वयेतथा । येषुसंस्थास्यतेतच्च ऐडेक्ष्वाकुकुलंशुभ
म् । तान्सर्वान्कीर्त्तयिष्यामि भविष्येकथितान्नृपान् ७४ तेभ्योऽपरेऽपियेत्वन्ये ह्युत्पत्स्य
न्तेनृपाःपुनः । क्षत्राःपारशवाःशूद्रास्तथान्येयेमहीश्वराः ७५ अन्धाःशकाःपुलिन्दाश्च
चूलिकायवनास्तथा । कैवर्त्ताभीरशवरा येचान्येम्लेच्छसम्भवाः । पर्य्यायतःप्रवक्ष्यामि
नामतश्चैवतान्नृपान् ७६ अधिसोमकृष्णश्चैतेषां प्रथमंवर्त्ततेनृपः । तस्यान्वयायेवक्ष्या
मि भविष्येकथितान्नृपान् ७७ अधिसोमकृष्णपुत्रस्तु विवक्षुर्भवितानृपः । गंगयातुहृते
तस्मिन् नगरेनागसाह्वये ७८ त्यक्त्वाविवक्षुर्नगरं कौशाम्ब्यान्तुनिवत्स्यति । भविष्या
ष्टौसुतास्तस्य महाबलपराक्रमाः ७९ भूरिर्ज्येष्ठःसुतस्तस्य तस्याचित्ररथःस्मृतः । शुचिद्र
वश्चित्ररथात् वृष्णिमांश्चशुचिद्रवात् ८० वृष्णिमतःसुषेणश्च भविष्यतिशुचिर्नृपः ।
तस्मात्सुषेणात्भविता सुनीथोनामपार्थिवः ८१ नृपात्सुनीथाद्भविता नृचक्षुःसुमहायशाः

दोबर्ष कुरुक्षेत्रमें और एकबर्षदृषद्वतीके तीरपर यज्ञकिया है ६७ इससब वृत्तान्तको सुनकर ऋषियों
ने कहाकि हेसूतजी यहतो तुमने व्यतीतकथा वर्णनकरी अबहम आपसे आगे होनेवाली भविष्य
प्रजाओंकी कथाओंको सुनना चाहते हैं ६८ जिन प्रजाओंमें क्षत्रिय स्थितहोंगे और उत्पन्नहोंगेउन
राजाओंकी आयुका प्रमाण और नामव्यौरे समेत कहिये ६९ इनसबवृत्तान्तोंके सिवाय सत्ययुग १
त्रेता-द्वापर और कलियुग इनचारोंका प्रमाणभी कहिये और युगदोष वा युगक्षयकोभी संख्यापूर्वक
वर्णन कीजिये ७०।७१ यहसुनकर सूतजीबोले हेऋषिलोगो जैसे कि व्यासजीने होनेवालेकलियुग
और मन्वन्तर मेरे आगे कहे हैं ७२ उनआगे होनेवाले सम्पूर्ण युगादिकों और उनयुगोंमें होनेवाले
राजाओं को मुझसेसुनो ७३ ऐडइक्ष्वाकुकेवंशमें पूरुवंशमें और पूरुके जिन वंशों में ऐडइक्ष्वाकुकुल
बहुत शुभहै उन भविष्यकालमें होनेवाले सम्पूर्ण राजाओंको ७४ और उन राजाओंसे उत्पन्नहोनेवाले
अन्यराजाओंको ब्राह्मण क्षत्रियशूद्रोंको अंधवंशके राजाओंको-अंध-शक-पुलिन्द-चूलिक—यवन—
कैवर्त्त-आभीर-शवर और म्लेच्छ राजाओंको पृथक् २ नामसहित वर्णन करताहूं ७५। ७६ इनसबमें
पहला अधिसोम कृष्णराजाहोताभया उसके वंशके भविष्य राजाओंको प्रथम वर्णनकरताहूं ७७ अ-
धिसोम कृष्णकापुत्र विवक्षुहोगा इसके हस्तिनापुर नगरको जबगंगाबहालेजायगी तबयहराजा उस
नगरको त्यागकर कौशवीमें बसेगा औरविवक्षुके महाबलपराक्रमवाले आठपुत्रहोंगे ७८।७९ उनसबमें
बड़ाभूरिहोगा उसके चित्ररथहोगा चित्ररथके शुचिद्रव शुचिद्रवके वृष्णिमानहोगा ८० वृष्णिमान्के
राजासुषेणहोगा सुषेणके सुनीथनाम राजाहोगा ८१ सुनीथसे महायशवाला नृचक्षुहोगा नृचक्षुकापुत्र

नृचक्षुषस्तुदायादो भवितावैसुखीबलः ८२ सुखीबलसुतश्चापि भावीराजापरिष्णवः।
परिष्णवसुतश्चापि भवितासुतपानृपः ८३ मेधावीतस्यदायादो भविष्यतिनसंशयः।
मेधाविनःसुतश्चापि भविष्यतिपुरञ्जयः८४उर्वोभाव्यःसुतस्तस्य तिग्मात्मातस्यचात्म
जः। तिग्मात्बृहद्रथोभाव्यो वसुदामाबृहद्रथात् ८५ वसुदाम्नःशतानीको भाविष्योद
यनस्ततः। भविष्यतेचदयनात् वीरोराजावहीनरः ८६ वहीनरात्मजश्चैव दण्डपाणि
र्भविष्यति। दण्डपाणेर्निरामित्रो निरामित्रात्तुक्षेमकः ८७ अत्रानुवंशश्लोकोऽयंगीतो
विप्रैःपुरातनैः।ब्रह्मक्षत्रस्ययोयोनिर्वंशोदेवर्षिसत्कृतः। क्षेमकंप्राप्यराजानं संस्थास्यतिक
लौयुगे ८८ इत्येषपौरवोवंशो यथावदिहकीर्तितः। धीमतःपाण्डुपुत्रस्य अर्जुनस्यमहा
त्मनः ८९ ॥ इतिश्रीमत्स्यपुराणेपंचाशत्तमोऽध्यायः ५० ॥

(ऋषयऊचुः) येपूज्यास्युर्द्विजातीनामग्नयःसूत! सर्वदा। तानिदानींसमाचक्ष्व
तद्वंशंचानुपूर्वशः १ (सूतउवाच) योऽसावग्निरभीमानी स्मृतःस्वायम्भुवेऽन्तरे। ब्र
ह्मणोमानसःपुत्रस्तस्मात् स्वाहाव्यजीजनत् २ पावकंपवमानञ्च शुचिरग्निश्चयःस्मृ
तः। निर्मथ्यःपवमानोऽग्निर्वैद्युतःपावकात्मजः ३ शुचिरग्निःस्मृतःशौरः स्थावराश्चैवते
स्मृताः। पवमानात्मजोह्यग्निर्हव्यवाहःसउच्यते ४ पावकिःसहरक्षस्तु हव्यवाहमुखश्शु
चिः। देवानांहव्यवाहोग्निः प्रथमोब्रह्मणःसुतः ५ सहरक्षोऽसुराणान्तु त्रयाणान्तेत्रयो
ग्नयः। एतेषांपुत्रपौत्राश्च चत्वारिंशत्तथैवच ६ प्रवक्ष्येनामतस्तान्वै प्रतिभागेनतान्

सुखीबलहोगा ८२ सुखीबलके परिष्णवहोगा परिष्णवके सुतपाराजाहोगा ८३ सुतपाके मेधावी
होगा मेधावीकापुत्र पुरञ्जय होगा ८४ उसके उर्व पुत्रहोगा उर्वका पुत्रतिग्मात्मा होगा तिग्मात्मा
से बृहद्रथहोगा बृहद्रथ से वसुदामाहोगा ८५ वसुदामाके शतानीक पुत्रहोगा तिसके दयननामपुत्र
होगा दयनके शूरवीर राजा वहीनरहोगा ८६ वहीनरके दंडपाणि दंडपाणिके निरामित्र और निरा-
मित्रके क्षेमक नामपुत्रहोगा ८७ यह क्षेमके वंशमें पुरातन ब्राह्मणोंने श्रेष्ठ वर्णनकिया है यह
ब्राह्मण क्षत्रियोंका वंश देवर्षियोंने सत्कार किया है और कलियुगमें क्षेमकको प्राप्तहोकर यह वंश
नष्टहोजायगा ८८ सूतजीने कहा हेऋषियो पाण्डुकेपुत्र अर्जुन महात्माका यह पौरवंश मैंने तुमसे
यथावत्हीकहा है ८९ ॥ इतिश्रीमत्स्यपुराणभाषाटीकायांपंचाशत्तमोऽध्यायः ५० ॥

यहसुनकर ऋषियोंने कहा कि हेसूतजी ब्राह्मणों के मध्यमें जो संपूर्ण कालोंसे अग्निपूजक हैं
उनको और उनके वंशोंको आप क्रमपूर्वक वर्णनकीजिये १ यह सुनकर सूतजी कहने लगे कि हे
ऋषियो जो स्वायंभुव मन्वन्तरमें अग्नि अभिमानी अधिष्ठाताकहा है वह ब्रह्माके मनसे उत्पन्नहोता
भया उसकापुत्र स्वाहा होताभया २ पावक और पवमान रूपसे अग्निहोताभया एक शुचि अग्नि
कहाहै उनमें से पवमान तो मथनसे हुआ और पावक से वैद्युतहुआहै ३ शुचि सूर्य्य से हुआहै वह
स्थावर अग्निकहा है और पवनका पुत्र हव्यबाहन कहाहै ४ पावकका पुत्र सहरक्ष अग्निहुआ हव्य
वाहनका मुख पवित्रहै क्योंकि देवताओंका हव्यवाह अग्निहै यह ब्रह्माका प्रथमपुत्र कहाहै ५ सह-
रक्ष अग्नि असुरोंकाहै यह तीनोंकेतीन अग्नि हैं इनके पुत्र पौत्रादिक चालीसवर्णन किये हैं ६ अब

पृथक् । पावनोलौकिको ह्यग्निःप्रथमोब्रह्मणश्चयः ७ ब्रह्मौदनाग्निस्ततपुत्रो भरतोना
मविश्रुतः । वैश्वानरोहव्यवाहोवहन्हव्यंममारसः ८ सम्तृतोऽथर्वणःपुत्रो मथितःपुष्करो
दधिः । योऽथर्वालौकिको ह्यग्निर्दक्षिणाग्निःसउच्यते ९ भृगोःप्रजायताथर्वा ह्यङ्गिराथ
र्वणःस्मृतः । तस्यह्यलौकिकोह्यग्निर्दक्षिणाग्निःसवैस्मृतः १० अथयःपवमानस्तु निर्म
थ्योऽग्निःसउच्यते । सचवैगार्हपत्योऽग्निः प्रथमोब्रह्मणःस्मृतः ११ ततःसभ्यावसथ्यौ
च संशत्यास्तौसुतावुभौ । ततःषोडशनद्यस्तु चकमेहव्यवाहनः । यःखल्वाहवनीयोग्नि
रभिमानीद्विजैःस्मृतः १२ कावेरींकृष्णवेणीञ्चनर्मदांयमुनांतथा । गोदावरींवितस्ता
ञ्चचन्द्रभागामिरावतीम् १३ विपाशांकौशिकीञ्चैव शतद्रूंसरयूंतथा । सीतांमनस्वि
नीञ्चैव ह्रादिनींपावनांतथा १४ तासुषोडशधात्मानं प्रविभज्यपृथक्पृथक् । तदातुविह
रंस्तासु धिष्णेच्छःसबभूवह १५ स्वाभिधानस्थिताधिष्ण्यास्तासूत्पन्नाश्चधिष्णवः
धिष्ण्येषुजज्ञिरेयस्मात् ततस्तेधिष्णवःस्मृताः १६ इत्येतेवैनदीपुत्रा धिष्ण्येषुप्रतिपे
दिरे । तेषांविहरणीयाये उपस्थेयाश्चतांञ्छृणु । विभुःप्रवाहणोऽग्नीध्रस्तत्रस्थाधिष्ण
वोऽपरे १७ विहरन्तियथास्थानं पुण्याहेसमुपक्रमे । अनिर्देश्यानिवार्याणामग्नीनांश्रृ
णुतक्रमम् १८ वासवोऽग्निःकृशानुर्योद्वितीयोत्तरवेदिकः । सम्राडग्निसुतोह्यष्टावुपति
ष्ठन्तितान्द्विजाः १९ पर्जन्यःपावमानस्तु द्वितीयःसोऽनुदृश्यते । पावकोष्णःसमुह्यस्तु
वोत्तरेसोऽग्निरुच्यते २० हव्यसूदोह्यसंमृज्यः शामित्रःसविभाव्यते । शतधामासुधा

उनके पृथक् २ विभागपूर्वक नामों को कहता हूं प्रथम ब्रह्माजी से लौकिक पावन अग्निहुआ ७
उसकापुत्र ब्रह्मौदनहुआ उसका पुत्र भरतहुआ और वैश्वानर अग्नि हव्यको प्राप्तकरके मरा ८ वही
अथर्वकामराहुआ पुत्र जब मथागया तब पुष्करोदधि हुआ और जो लौकिक अथर्वाग्निहै वही दक्षि-
णाग्नि कहाहै ९ भृगुसे अथर्वाहुआ अथर्वसे अंगिराहुआ उसके अलौकिक दक्षिणाग्निहुआ १० और
पवमान निर्मथ्य अग्निकहाहै वहीब्रह्मासे प्रथम गार्हपत्य अग्निकहा है ११ तिस्से संशतिमें सभ्य
और आवसथ्यहुआ है फिर हव्यवाहन सोलह नदियों को रचताभया जो आहवनीय अग्निहै उस
को ब्राह्मणोंने अभिमानीकहाहै १२ वह १६ नदियां यहहैं कावेरी १ कृष्णवेणी २ नर्मदा ३ यमुना ४
गोदावरी ५ वितस्ता ६ चन्द्रभागा ७ इरावती ८ विपाशा ९ कौशिकी १० शतद्रू ११ सरयू १२
सीता १३ मनस्विनी १४ ह्रदिनी १५ और पावना १६ इननदियों में पृथक् २ सोलह प्रकार से
आत्माको विभागकरके विहार करताहुआ धिष्णेच्छ होताहुआ १३।१५ अपनेनाममें स्थित जो धिष्णहै
उस्सेधिष्णुहुए और धिष्णोंके मध्यमें जन्मलेनेसे धिष्णुकहाताहै १६ यह सबनदियों के पुत्र धिष्णों
में उत्पन्न होतेभये इनमें जो विहरणीय और उपस्थेय हैं उनको सुनो प्रवाहणनाम जो अग्नि है
और जो धिष्णु वर्त्तमान हैं १७ वह पुण्यदिवस के आनेपर यथास्थान विहारकरते हैं–अनिर्देश्य
और निवार्य्य अग्नियोंकेनाम क्रमसे सुनो १८ वासव अग्नि और कृशानु यह दोनों द्वितीयउत्तर
की वेदी हैं अग्निकापुत्र सम्राट्हुआ और आठअग्नियों को ब्राह्मण सेवनकरते हैं १९ पर्जन्य और
पावमान यह दोभी अग्निहैं पावकोष्ण और समुह्य यह दोनों उत्तरमें अग्निकहे हैं २० हव्यसूद और

ज्योती रौद्रैश्वर्यःसउच्यते २१ ब्रह्मज्योतिर्वसुधामा ब्रह्मस्थानीयउच्यते। अजैकपादुपस्थेयः सवैशालामुखोयतः २२ अनिर्देश्योह्यहिर्बुध्नो बहिरन्तेतुदक्षिणौ। पुत्राह्येतेतुसर्वस्य उपस्थेयाद्विजैःस्मृताः २३ ततोविहरणीयांस्तुवक्ष्याम्यष्टौतुतान्सुतान्। हौत्रियस्यसुतोह्यग्निर्बर्हिषोहव्यवाहनः २४ प्रशंस्योऽग्निः प्रचेतास्तु द्वितीयःसंसहायकः। सुतोह्यग्नेर्विश्ववेदा ब्राह्मणाच्छंसिरुच्यते २५ अपांयोनिःस्मृतःस्वाम्भः सेतुर्नामविभाव्यते। धिष्ण्यआहरणाह्येते सोमेनेज्यन्तवैद्विजैः२६ ततोयःपावकोनाम्नायःसद्भिर्योगउच्यते। अग्निःसोऽवभृथेज्ञेयोवरुणेनसहेज्यते २७ हृदयस्यसुतोह्यग्नेर्जठरेऽसौनृणांपचन्। मन्युमान्जाठरश्चाग्नि र्विद्धाग्निःसततंस्मृतः २८ परस्परोत्थितोह्यग्निर्भूतानीह विभुर्दहन्। अग्नेर्म्मन्युमतःपुत्रो घोरःसंवर्त्तकःस्मृतः २९ पिबन्नग्निःसवसति समुद्रेवडवामुखे। समुद्रवासिनःपुत्रः सहरक्षोविभाव्यते ३० सहरक्षस्तुवैकामान् गृहेसवसतेनृणाम्। क्रव्यादग्निःसुतस्तस्य पुरुषान्योऽत्तिवैमृतान् ३१ इत्येतेपावकस्याग्नेर्द्विजैः पुत्राःप्रकीर्त्तिताः। ततःसुतास्तुसौवीर्य्याद्गन्धर्वैरसुरैर्हृताः ३२ मथितोयस्त्वरण्यान्तु सोऽग्निरापसमिन्धनम्। आयुर्नाम्नातुभगवान् पशौयस्तुप्रणीयते ३३ आयुषोमहिमान् पुत्रो दहनस्तुततःसुतः। पाकयज्ञेष्वभीमानी हुतंहव्यंभुनक्तियः ३४ सर्वस्माद्देवलोकाच्च हव्यंकव्यंभुनक्तियः। पुत्रोऽस्यसहितोह्यग्निरद्भुतःसमहायशाः ३५ प्रायश्चित्तेष्व

असंमृज्य यह दोनोंशामित्र कहाते हैं-शतधामा और सुधाज्योती अग्नियोंको रौद्रैश्वर्य्य वर्णनकिया है ब्रह्मज्योति और वसुधामा इनको ब्रह्मस्थानीय कहाहै अजैकपाद से जो उपस्थेय अग्निहुआ है वह शालामुख वर्णनकियाहै २१।२२अनिर्देश्य और अहिर्बुध्न दक्षिणाग्नि कहे हैं यहसबब्राह्मणलोगोंने उपस्थके पुत्रकहे हैं२३अब विहरणीय आठपुत्रोंको कहताहूं होत्रियकापुत्र अग्नि हव्यवाहनहुआ२४ प्रचेता अग्नि सुन्दरकहा है दूसरा संसहायक अग्निकहा है अग्निका विश्ववेदा पुत्र ब्राह्मणाच्छंसि कहाताहै २५ जलोंकी योनिको स्वाम्भअग्नि वर्णनाकियाहै उसकानाम सेतुहै यह धिष्ण्य और आहरण अग्नि ब्राह्मणोंने सोमयज्ञसे यजनाकियेहैं २६ इनमें पावक अग्निको श्रेष्ठलोगोंने योगकहा है वह अग्नि अवभृथ स्नानमें वरुणकेसाथ पूजनकीजातीहै २७ हृदयकापुत्र अग्नि जो उदरमें अन्नादिकको पकाताहै उसको मन्युमान--जाठराग्नि और विद्धाग्नि कहते हैं २८ आपसे आप उठाहुआ अग्नि जो जीवोंको दग्धकरताहै सो मन्युमान् अग्निकापुत्र घोर संवर्त्तक कहाताहै २९ और जो अग्नि समुद्रमें वसताहै वह समुद्रवासिकापुत्र सहरक्ष कहाताहै ३० सहरक्ष अग्नि मनुष्योंके घरों में वासकरताहुआ कामनाओंको पूरणकरताहै सहरक्षकापुत्र क्रव्याद अग्नि मरेपुरुषों को भक्षणकरता है ३१ हे ऋषीश्वरो यहसब अग्नि ब्राह्मणलोगोंने पावक अग्निकेपुत्र कहे हैं और सौविरनाम अग्नि के पुत्रोंको गन्धर्व और असुरोंने हरलियाहै ३२ अरणीमें मथितहुई जो अग्निहै सो समिंधन अर्थात् पलाशियोंको प्राप्तहुआहै वह भगवान् आयुनामसे पशुओंमें कहाहै ३३ आयुके महिमान् पुत्रहुआ उसकापुत्र दहनहुआ और जो पावक कि यज्ञोंमें हवन कियेहुए हव्योंको भोजन करताहै ३४ और सम्पूर्ण देवलोकसेभी हव्यकव्योंको भोजन करताहै उसकापुत्र महायशा अद्भुत वर्णन कियागया है

भीमानी हुतंहव्यंभुनक्तियः। अद्भुतस्यसुतोवीरो देवांशस्तुमहान्स्मृतः ३६ विविधाग्नि
स्ततस्तस्य तस्यपुत्रोमहाकविः । विविधाग्निसुतादर्कादग्नयोऽष्टौसुताःस्मृताः ३७
काम्यास्विष्टिष्वभीमानी रक्षोहायतिकृच्चयः। सुरभिर्वसुमान्नादो हर्य्यश्वःसोऽभवत्पु
रा ३८ प्रवर्ग्यःक्षेमवांश्चैव इत्यष्टौचप्रकीर्त्तिताः। शुच्यग्नेस्तुप्रजाह्येषा अग्नयश्च च
तुर्दश ३९ इत्येतेह्यग्नयःप्रोक्ताः प्रणीतायेहिचाध्वरे। समतीतेतुसर्गेये यामैःसहसुरो
त्तमैः ४० स्वायम्भुवेन्तरेपूर्व मग्नयस्तेऽभिमानिनः। एतेविहरणीयेषु चेतनाचेतनेष्वि
ह ४१ स्थानाभिमानिनोऽग्निध्राः प्रागासन्हव्यवाहनाः । काम्यनैमित्तिकाद्येषु येतेक
र्म्मस्ववस्थिताः ४२ पूर्वैमन्वन्तरेऽतीते शुक्रैर्यामैश्चतैःसह। एतेदेवगणैःसार्द्धं प्रथम
स्यान्तरेमनोः ४३ इत्येतायोनयोह्युक्ताःस्थानाख्याजातवेदसाम्। स्वारोचिषादिषुज्ञेयाः
सवर्णान्तेषुसप्तसु ४४ तैरेवन्तुप्रसंख्यातं साम्प्रतानागतेष्विह। मन्वन्तरेषुसर्वेषु लक्ष
णंजातवेदसाम् ४५ मन्वन्तरेषुसर्वेषु नानारूपप्रयोजनैः। वर्त्तन्तेवर्त्तमानैश्च यामैर्देवैः
सहाग्नयः ४६ अनागतैःसुरैःसार्द्धं वत्स्यन्तोनागतास्त्वथ। इत्येषप्रचयोऽग्नीनां मया
प्रोक्तोयथाक्रमम्। विस्तरेणानुपूर्व्याच किमन्यच्छ्रोतुमिच्छथ ४७॥

इति श्रीमत्स्यपुराणे एकपञ्चाशत्तमोऽध्यायः ५१॥

(ऋषय ऊचुः) इदानीम्प्राहयद्विष्णुः पृष्टःपरममुत्तमम्। तमिदानींसमाचक्ष्व

३५ यह प्रायश्चित्तोंका अभिमानी हुत और हव्यको भोजन करता है अद्भुतकेवीरनाम पुत्रहुआ
उसको देवताओंका अंश वर्णन कियाहै ३६ उससे विविधाग्नि हुआ उसकापुत्र महाकविहुआ और
विविधाग्निके दूसरे अर्कनाम पुत्रसे आठ पुत्रहुए हैं ३७ यह आठों काम्य यज्ञोंमें अभिमानी हैं वह
आठोंयहहैं रक्षोहा--यतिकृत्--सुरभि--वसुमान्--नाद-- हर्य्यश्व ३८ प्रवर्ग्य--और क्षेमवान् यह आठों
अग्नि कहे हैं और शुचिअग्निकी सन्तान यह चौदह अग्निकहे हैं ३९ जिन२ यज्ञोंमें जो २ विधान
किये हैं वह यहहैं अतीतरचनामें याम संज्ञक देवताओं समेत ४० स्वायम्भुवमनुमें यह अग्निअभि-
मानी कहे हैं यह सम्पूर्ण विहरणीय चेतन और अचेतनोंमें कहेहैं ४१ यह स्थानाभिमानी अग्निध्र
प्रथम हव्यवाहन होतेभये और यही सम्पूर्ण काम्य और नैमित्तिक कर्मोंमें अवस्थित हैं ४२ प्रथम
व्यतीतहुए मन्वन्तर में शुक्र और याम देवगणों करके सहित होतेभये इनको अग्नियोंकी स्थानाख्य
योनिकहाहै यह स्वारोचिषादि सावर्णि पर्य्यन्त सात मन्वन्तरोंमें जानना ४३। ४४ हे ऋषियो यह
सब तो मैंने व्यतीत मन्वन्तरोंके अग्नि वर्णनकिये अब आनेवालोंको कहते हैं इनमें सम्पूर्ण मन्व-
न्तरोंके अग्नियोंके लक्षणकहे हैं ४५ सम्पूर्णमन्वन्तरोंमें अनेकरूप और प्रयोजनों करके वर्त्तमान जो
यामदेव हैं इनसबों समेत अग्निवर्त्ते हैं ४६ आनेवाले देवताओंके साथ आनेवाले अग्नि वसते हैं
इसरीतिसे यह अग्नियोंके प्रचयके व्यवहार मैंने तुमसे क्रमपूर्व्वक वर्णनकिये हे ऋषियो अब और
क्या विस्तारपूर्व्वक सुनना चाहतेहो ४७॥

इति श्रीमत्स्यपुराणभाषाटीकायामेकाधिकपंचाशत्तमोऽध्यायः ५१॥

ऋषियोंने पूछा कि हे सूतजी मनुके पूछनेसे जो धर्माधर्म का परमउत्तम विस्तार विष्णुभगवान

धर्म्माधर्म्मस्यविस्तरम् १ (सूत उवाच) एवमेकार्णवेतास्मिन् मत्स्यरूपीजनार्दनः । विस्तारमादिसर्ग्गस्य प्रतिसर्ग्गस्यचाखिलम् २ कथयामासविश्वात्मा मनवेसूर्य्यसूनवे । कर्म्मयोगञ्चसांख्यञ्च यथावद्विस्तरान्वितम् ३ (ऋषय ऊचुः) श्रोतुमिच्छामहेसूत ! कर्म्मयोगस्यलक्षणम् । यस्मादविदितंलोके नकिञ्चित्तवसुव्रत ! ४ (सूतउवाच) कर्म्मयोगंचवक्ष्यामि यथाविष्णुविभाषितम् । ज्ञानयोगसहस्राद्धि कर्म्मयोगः प्रशस्यते ५ कर्म्मयोगोद्भवंज्ञानं तस्मात्तत्परमम्पदम् । कर्म्मज्ञानोद्भवंब्रह्म नचज्ञानमकर्म्मणः ६ तस्मात्कर्म्मणियुक्तात्मा तत्त्वमाप्नोतिशाश्वतम् । वेदोऽखिलोधनंमूलमाचारश्चैवतद्धितम् ७ अष्टावात्मगुणास्तस्मिन् प्रधानत्वेनसंस्थिताः। दयासर्वेषुभूतेषु क्षान्तीरक्षातुरस्यतु ८ अनसूयातथालोके शौचमन्तर्बहिर्द्विजाः । अनायासेषुकार्येषु माङ्गल्याचारसेवनम् ९ नचद्रव्येषुकार्पण्यमार्तेषूपार्जितेषुच। तथास्पृहापरद्रव्ये परस्त्रीषुचसर्वदा १० अष्टावात्मगुणाःप्रोक्ताः पुराणस्यतुकोविदैः । अयमेवक्रियायोगो ज्ञान योगस्यसाधकः ११ कर्मयोगंविनाज्ञानं कस्यचिन्नेहदृश्यते । श्रुतिस्मृत्युदितंधर्ममुपतिष्ठेत्प्रयत्नतः १२ देवतानांपितॄणांच मनुष्याणांचसर्वदा । कुर्यादहरहर्यज्ञैर्भूतर्षिगणतर्पणम् १३ स्वाध्यायैरर्चयेच्चर्षीन् होमैर्विद्वान्यथाविधि । पितॄन्श्राद्धैरन्नदानैर्भूतानि बलिकर्म्मभिः १४पञ्चैतेविहितायज्ञाः पंचसूनापनुत्तये।कण्डनीपेषणीचूल्ली जलकुम्भी

ने वर्णन कियाहै उसको आप हमें सुनाइये १ सूतजी ने कहा हेऋषियो इसीप्रकार प्रलयमें मत्स्यरूपी भगवान्ने सर्ग और प्रतिसर्गके सब विस्तारको विश्वात्मा भगवान् सूर्य्यके पुत्र मनुजीके अर्थ कर्म योग और सांख्यको बड़े विस्तारपूर्व्वक यथावत् कहा है २ । ३ यह सुनकर फिर ऋषियों ने कहा कि हे सूतजी हमभी कर्मयोगके सुननेकी बड़ी इच्छा करते हैं क्योंकि हे सुव्रत सूतजी आपसे इसलोकमें कोई वस्तुगुप्त नहीं है आपसर्वज्ञ हैं ४ सूतजी बोले हे ऋषिसत्तमहो जैसा कि विष्णुजी ने कहा है उस कर्म योगको मैं कहताहूं हज़ार ज्ञानयोगों से भी कर्मयोग श्रेष्ठहै क्योंकि कर्मयोगसे उत्पन्न हुए ज्ञानके द्वारा परमपद मिलताहै कर्मज्ञानसे ब्रह्म उत्पन्न होताहै अकर्मज्ञानसे नहीं होता ५ । ६ इसहेतुसे कर्मसे युक्त जो आत्माहै वही निरन्तर तपको प्राप्त होताहै सम्पूर्ण वेद मूलधनरूप हैं आचारही उसकाहितकारी है ७ उस कर्ममें आठगुण प्रधानतासे रहते हैं प्रथम सम्पूर्ण भूतोंपर दया१शान्ति२रोगीकी रक्षा ३–८लोकमें किसीकी बुराई न करना ४ बाहर भीतरसे पवित्ररहना५ अकस्मात् होनेवाले कार्यों में मंगलाचारपूर्व्वक वर्त्तना ६–९ अपने पैदा कियेहुए धनमें दुखियाके निमित्त कृपणता न करना ७ दूसरे की द्रव्यमें और पराई स्त्री में कभी इच्छा न करना ८–१० यह आत्माके आठोंगुण पुराण के जाननेवाले पण्डित वर्णन करते हैं यही क्रियायोग ज्ञानयोगके साधकहैं ११ कर्मयोग के विना इससंसारमें किसीको ज्ञान नहींहोता इसहेतुसे श्रुति स्मृतियों के कहे हुए धर्मोंको प्रयत्न पूर्व्वक करना योग्यहै १२ सदैव प्रतिदिन देवता ऋषि पितर मनुष्य और भूत गण इनसबको यज्ञ और तर्पणादिसे पूजनकरे १३ इनमें देवताओंको यज्ञोंसे ऋषियोंको स्वाध्याय हवन और तर्पणसे विद्वान् लोग विधिपूर्व्वक पूजनकरें पितरोंको श्राद्ध और अन्नदानसे भूतगणोंको

प्रमार्जनी १५ पञ्चसूनागृहस्थस्य तेनस्वर्गेनगच्छति । तत्पापनाशनायामी पंचय
ज्ञाःप्रकीर्तिताः १६ द्वाविंशतितथाष्टौच येसंस्काराःप्रकीर्तिताः । तद्युक्तोऽपिनमोक्षाय
यस्त्वात्मगुणवर्जितः १७ तस्मादात्मगुणोपेतः श्रुतिकर्म्मसमाचरेत् । गोब्राह्मणानांवि
त्तेन सर्वदाभद्रमाचरेत् १८ गोभूहिरण्यवासोभिर्गन्धमाल्योदकेनच । पूजयेद् ब्रह्मविष्णु
र्क रुद्रवस्वात्मकंशिवम् १९ व्रतोपवासैर्विधिवत् श्रद्धयाचविमत्सरः । योऽसावतीन्द्रि
यःशान्तःसूक्ष्मोऽव्यक्तःसनातनः । वासुदेवोजगन्मूर्तिस्तस्यसम्भूतयोह्यमी २० ब्रह्मा
विष्णुश्चभगवान् मार्त्तण्डोवृषवाहनः । अष्टौचवसवस्तद्व देकादशगणाधिपाः । लोक
पालाधिपाश्चैव पितरोमातरस्तथा २१ इमाविभूतयःप्रोक्ताश्चराचरसमन्विताः । ब्रह्मा
द्याश्चतुरोमूल मव्यक्ताधिपतिःस्मृतः २२ ब्रह्मणाचाथसूर्येण विष्णुनाथशिवेनवा । अ
भेदात्पूजितेनस्यात्पूजितंसचराचरम् २३ ब्रह्मादीनांपरन्धाम त्रयाणामपिसंस्थितिः ।
वेदमूर्तावतःपूषा पूजनीयःप्रयत्नतः २४ तस्मादग्निद्विजमुखान् कृत्वासंपूजयेदिमान् ।
दानैर्व्रतोपवासैश्च जपहोमादिना नरः २५ इतिक्रियायोगपरायणस्य वेदान्तशास्त्रस्मृ
तिवत्सलस्य । विकर्म्मभीतस्यसदानकिंचित् प्राप्तव्यमस्तीहपरेचलोके २६ ॥

इतिश्रीमत्स्यपुराणे द्विपञ्चाशत्तमोऽध्यायः ५२ ॥

बलिकर्मादिकसे पूजनकरे १४ पंचसूना अर्थात् पांचहत्याओंके दूरकरनेकेलिये यह पांचों यज्ञ कहे
गयेहैं अर्थात् ओखली--सिल--चूल्हा--पलहड़ी--और बुहारी १५ इनपांचों कर्मोंसे गृहस्थीको पांच
हत्या होतीहैं इनकोही पंचसूना कहते हैं इनहत्याओं के विनादूरकिये गृहस्थी स्वर्गमें नहीं जासक्ता
है इन्हीं पांचोंपापोंके नाशके अर्थयह पांचोंयज्ञ लिखेहैं १६ बाईस तथा आठजो संस्कार लिखे हैं
यहसब मिलकर भी आत्माके गुणोंसे रहितहोनेवालेको मोक्षनहीं दे सक्तेहैं १७ इससे आत्मगुण
युक्तहोकर वेदोक्त कर्मोंकोकरे धनकरके गौ और ब्राह्मणोंका कल्याणकरे १८ गौ भूमि सुवर्ण वस्त्र
गन्धमाला और जलके द्वारा ब्रह्मा विष्णु रुद्र और वसुआत्मक शिवका पूजनकरे १९ अथवा श्रद्धा-
युक्त मत्सरतासे रहित विधिपूर्वक व्रतादिकोंसे उस अतीन्द्रिय सूक्ष्म अव्यक्त सनातन जगन्मूर्त्ति
वासुदेवको पूजनकरे जिसकी कि ब्रह्मा विष्णु सूर्य्य शिव अष्टवसु एकादशगणाधिप लोकपालों के
अधिपति पितर और मातृगण यह सब चराचर संयुक्त विभूति वर्णन की हैं २० । २१ यह चराचर
संयुक्त सम्पूर्ण विभूति उसीभगवत्की हैं जो कि इन ब्रह्मा विष्णु शिव और सूर्य्य इनचारोंका मूल
ईश्वरहै २२ जिसने इनचारोंका भेदसे रहित पूजन कियाहै उसने सब चराचर जगत्का पूजन किया
है २३ यह सूर्य्य देवता ब्रह्मादिक तीनोंका परमधामहै अर्थात् ब्रह्मा विष्णु और शिव इनतीनों की
स्थिति इसीमें रहती है इसहेतुसे इसवेदमूर्तिकापूजन अनेकयत्नोंसे करनायोग्यहै २४ यहब्रह्मादिक
तीनों देवता अग्नि और द्विजमुखवाले हैं इसहेतुसे जप होम दान और व्रतउपवासादिकोंसे इनका
अर्चनकरे २५ जो पुरुष ऐसेक्रियायोगमें तत्पररहते हैं वह वेदान्तशास्त्र स्मृतियोंकेप्रेमसे माननेवालेहैं
ऐसेक्रियावान् पुरुषोंको इसलोक और परलोक दोनोंलोकोंमें ऐसीकोईवस्तुनहीं है जोउन्हेंनप्राप्तहो
अर्थात्उनकोसबवस्तुप्राप्तहोतीहैं २६॥ इतिश्रीमत्स्यपुराणभाषाटीकायांद्विपंचाशत्तमोऽध्यायः ५२ ॥

(मुनय ऊचुः) पुराणसांख्यमाचक्ष्व सूत ! विस्तरशःक्रमात् । दानधर्म्ममशेषन्तु यथावदनुपूर्वशः १ (सूत उवाच) इदमेवपुराणेषु पुराणपुरुषस्तदा । यदुक्तवान्सविश्वात्मा मनवेतान्निबोधत २ (मत्स्यउवाच) पुराणंसर्वशास्त्राणां प्रथमंब्रह्मणास्मृतम् । अनन्तरञ्चवक्त्रेभ्यो वेदास्तस्यविनिर्गताः ३ पुराणमेकमेवासीत् तदाकल्पान्तरेऽनघ ! । त्रिवर्गसाधनंपुण्यं शतकोटिप्रविस्तरम् ४ निर्दग्धेषुचलोकेषु वाजिरूपेणवैमया । अङ्गानिचतुरोवेदाः पुराणंन्यायविस्तरम् ५ मीमांसांधर्म्मशास्त्रञ्च परिगृह्यमयाकृतम् । मत्स्यरूपेणचपुनः कल्पादावुदकार्णवे ६ अशेषमेतत्कथितमुदकान्तर्गतेनच । श्रुत्वा जगादचमुनीन् प्रतिदेवांश्चतुर्मुखः ७ प्रवृत्तिःसर्वशास्त्राणां पुराणस्याभवत्ततः । कालेनाग्रहणंदृष्ट्वा पुराणस्यततोनृप ! ८ व्यासरूपमहंकृत्वा संहरामियुगेयुगे । चतुर्लक्षप्रमाणेन द्वापरेद्वापरेसदा ९ तथाष्टादशधाकृत्वा भूलोकेऽस्मिन्प्रकाश्यते । अद्यापिदेवलोकेऽस्मिन् शतकोटिप्रविस्तरम् १० तदर्थोऽत्रचतुर्लक्षं संक्षेपेणविशेषितम् । पुराणानिदशाष्टौच साम्प्रतंतदिहोच्यते ११ नामतस्तानिवक्ष्यामि शृणुध्वंमुनिसत्तमाः! ।ब्रह्मणाभिहितंपूर्वं यावन्मात्रंमरीचये १२ ब्राह्मचंत्रिदशसाहस्रं पुराणंपरिकीर्त्यते । लिखित्वातच्चयोदद्यात् जलधेनुसमन्वितम् । वैशाखपूर्णिमायाञ्च ब्रह्मलोकेमहीयते १३ एतदेवयदापद्ममभूद्धैरण्मयंजगत् । तद्वृत्तान्ताश्रयंतद्वत् पाद्ममित्युच्यतेबुधैः । पाद्मंतत्पञ्चपंचाशत्सहस्राणीहकथ्यते १४ तत्पुराणंचयोदद्यात् सुवर्णकमलान्वितम् ।

यह सुनकर मुनियों ने कहा कि हे सूतजी अब आप कृपाकरके सब पुराणोंकी संख्या औरसम्पूर्ण दान धर्म यथावत् आनुपूर्वी विस्तारपूर्वक वर्णनकीजिये १ सूतजीबोले हेऋषि लोगो जो विश्वात्मा मत्स्यभगवान् ने प्राचीन मनुसे वर्णन किया है वही मैं तुमसे कहताहूं २ मत्स्यभगवान् ने कहा कि हे मनु पुराण धर्मशास्त्रादिकों से प्रथमब्रह्मा हुआ है फिर उसके चार मुखसे चारोंवेद प्रकटहुए ३ हे अनघ उस कल्पान्तरमें एकही पुराण होता भया और सौकिरोड़ विस्तारवाला पुण्य धर्म अर्थ और कामकासाधनहुआ ४ फिर जब सब लोक भस्महोगये तब घोड़े का रूपधरके मैंनेवेद के सब अंगों समेत चारवेद पुराण न्याय ५ मीमांसा और धर्मशास्त्र यह सबरचे फिर मत्स्यरूप करके कल्पकी आदिमें प्रलय के जलों में ६ जलमेंही प्रवेशितहोकर मैंने ब्रह्मासे कहा और ब्रह्माने फिर इन सब वेद शास्त्रादिकों को देवता और मुनियों से कहा इस के पीछे सम्पूर्ण शास्त्रोंकी और पुराणोंकी प्रवृत्ति होती भई फिर कालके योगसे पुराणोंका अग्रहण देखकर ७।८ मैं व्यासरूपसे अवतार धारण करके युग युग में इन सबको विस्तार करताहूं और द्वापर द्वापरमें चारलाख प्रमाणसे रचताहूं ९ और अठारह पुराणों करके मैं पृथ्वी के लोकों में प्रकाशकरताहूं अबभी यह पुराण देवलोकमें सौ कोटि के विस्तार से है १० यहां संक्षेप करके चारलाखही है इसीमें अठारहपुराण कहे हैं ११ सूतजी कहते हैं कि हे मुनियो उनके नाम जो ब्रह्माने मरीचिसे कहेहैं वह मैं भी कहताहूं तुमसुनो १२ ब्राह्मपुराण तेरह हज़ारहै इसको लिखकर जल और गौ समेत वैशाखकी पूर्णमासीको दानकरे तो ब्रह्मलोक में आनन्दभोगे १३ और इसी प्रकार जब हिरण्मय अर्थात् सुवर्णमय कमल हुआ और सब

ज्येष्ठेमासितिलैर्युक्तमश्वमेधफलंलभेत् १५ वाराहकल्पवृत्तान्तमधिकृत्यपराशरः ।
यत्राहधर्मानखिलान् तद्युक्तंवैष्णवंविदुः १६ तदाषाढेचयोदद्यात् घृतधेनुसमन्वितम् ।
पौर्णमास्यांविपूतात्मा सपदंयातिवारुणम्।त्रयोविंशतिसाहस्रं तत्प्रमाणंविदुर्बुधाः १७
श्वेतकल्पप्रसङ्गेन धर्मान्वायुरिहाब्रवीत् । यत्रतद्वायवीयंस्यात् रुद्रमाहात्म्यसंयुतम् ।
चतुर्विंशत्सहस्राणि पुराणंतदिहोच्यते १८ श्रावण्यांश्रावणेमासि गुड़धेनुसमन्वितम् ।
योदद्याद्वृषसंयुक्तं ब्राह्मणायकुटुम्बिने । शिवलोकेसपूतात्मा कल्पमेकंवसेन्नरः १९
यत्राधिकृत्यगायत्रीं वर्ण्यतेधर्म्मविस्तरः । वृत्रासुरबधोपेतं तद्भागवतमुच्यते २०
सारस्वतस्यकल्पस्य मध्येयेस्युर्नरोत्तमाः । तद्वृत्तान्तोद्भवंलोके तद्भागवतमुच्यते २१
लिखित्वातच्चयोदद्याद्धेमसिंहसमन्वितम् । पौर्णमास्यांप्रौष्ठपद्यां सयातिपरमांगतिम् ।
अष्टादशसहस्राणि पुराणंतत्प्रचक्षते २२ यत्राहनारदोधर्मान् बृहत्कल्पाश्रयाणिच ।
पंचविंशत्सहस्राणि नारदीयंतदुच्यते २३ तदिदंपंचदश्यान्तु दद्याद्धेनुसमन्वितम् । प
रमांसिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् २४ यत्राधिकृत्यशकुनीन् धर्माधर्मविचारणा ।
व्याख्यातावैमुनिप्रश्ने मुनिभिर्धर्मचारिभिः २५ मार्कण्डेयेनकथितं तत्सर्वंविस्तरेणतु।
पुराणंनवसाहस्रं मार्कण्डेयमिहोच्यते २६ प्रतिलिख्यचयोदद्यात् सौवर्णकरिसंयुतम्।
कार्त्तिक्यांपुण्डरीकस्य यज्ञस्यफलभाग्भवेत् २७ यत्तदीशानकंकल्पं वृत्तान्तमधिकृत्य

जगत् उसके आश्रयहुआ तवपाद्मपुराणहुआ वह पचपन हज़ारकहाहै १४ उसपाद्मपुराणको सुवर्णके कमलसेयुक्त ज्येष्ठमास में तिलोंसमेत दान करे तो अश्वमेधयज्ञके फलको प्राप्तहोवे १५ इसीप्रकार वाराहकल्पको अधिकारकरके जो पराशरजी संपूर्णधर्मोंको कहतेभये वहवाराहपुराण विष्णुकाहै १६ इसपुराणको पंडित तेईस हज़ारकहतेहैं इसउत्तमपुराणको आषाढ़कीपूर्णिमाकेदिन घृत और गौसमेत जो विधिपूर्व्वक दानकरताहै वह वरुण लोकमें जाकर आनन्दकरताहै १७ और श्वेतकल्पके प्रसंगकर के जिनधर्मोंको वायुने कहाहै वह रुद्रजीके माहात्म्य समेत वायवीय पुराणहै इसकी संख्या चौबीस हज़ार है १८ इसको श्रावणमासमें सलूनोंके दिवस गुड़धेनु और बैलसंयुक्त कुटुम्बी ब्राह्मणके अर्थजो दानदे वह पुरुष पवित्र होकर एककल्प पर्य्यन्त शिवलोकमें वासकरताहै १९ जिसमें कि गायत्रीको अधिकारकरके वृत्रासुरके बधयुक्त धर्मका विस्तारपूर्व्वक वर्णनहै २० और सारस्वतकल्पके उत्तमनरों के वृत्तान्तसे संयुक्तहै वह भागवतहै २१ उस भागवतको लिखाकर सुवर्णके सिंहासन समेत जो भाद्रपदकी पूर्णमासीको दानकरताहै वह परमगतिको प्राप्तहोताहै उस भागवतकी संख्या अठारहहज़ार है २२ जिसमें कि बृहत्कल्पके आश्रयसे नारदजीने धर्मोंको कहाहै वह नारदीय पुराण पच्चीसहज़ार है २३ इसपुराणको गौसमेत कोईसीभी पूर्णमासीको जो दानकरताहै वह परमसिद्धिको प्राप्तहोता है और पुनर्जन्मकोभी नहींपाताहै २४ जिसमें कि शकुनियों अर्थात् पक्षियोंको आश्रयकरके धर्माधर्मका विचारकहाहै और जिसको कि मुनियोंके प्रश्नसे मार्कण्डेय ऋषिने विस्तारपूर्व्वक कहाहै और संख्यामें नवहज़ारहै वह मार्कण्डेय पुराणहै २५ । २६ इसमार्कण्डेय पुराणको लिखकर जो सुवर्णकेहाथी समेत कार्त्तिककी पूर्णमासीको दानकरताहै वह पुण्डरीक यज्ञके फलको प्राप्त होता है

च । वशिष्ठायाग्निनाप्रोक्तमाग्नेयंतत्प्रचक्षते २८ लिखित्वातच्चयोदद्याद्धेमपद्मसमन्वितम् । मार्गशीर्ष्यांविधानेन तिलधेनुसमन्वितम् । तच्चषोडशसाहस्रं सर्वक्रतुफलप्रदम् २९ यत्राधिकृत्यमाहात्म्यमादित्यस्यचतुर्मुखः । अघोरकल्पवृत्तान्त प्रसंगेनजगत्स्थितिम् । मनवेकथयामास भूतग्रामस्यलक्षणम् ३० चतुर्दशसहस्राणि तथापंचशतानिच । भविष्यचरितप्रायं भविष्यन्तदिहोच्यते ३१ तत्पौषेमासियोदद्यात् पौर्णमास्यांविमत्सरः । गुड़कुम्भसमायुक्तमग्निष्टोमफलंभवेत् ३२ रथन्तरस्यकल्पस्य वृत्तान्तमधिकृत्यच । सावर्णिनानारदाय कृष्णमाहात्म्यमुत्तमम् ३३ यत्रब्रह्मवराहस्य चोदन्तंवर्णितंमुहुः । तदष्टादशसाहस्रं ब्रह्मवैवर्त्तमुच्यते ३४ पुराणंब्रह्मवैवर्त्तं योदद्यान्माघमासिच । पौर्णमास्यांशुभदिने ब्रह्मलोकेमहीयते ३५ यत्राग्निलिंगमध्यस्थः प्राहदेवोमहेश्वरः । धर्मार्थकाममोक्षार्थमाग्नेयमधिकृत्यच ३६ कल्पान्तेलैंगमित्युक्तं पुराणंब्रह्मणास्वयम् । तदेकादशसाहस्रं फाल्गुन्यांयःप्रयच्छति । तिलधेनुसमायुक्तं सयातिशिवसाम्यताम्३७महावराहस्यपुनर्माहात्म्यमधिकृत्यच। विष्णुनाभिहितंक्षोण्यै तद्वाराहमिहोच्यते ३८ मानवस्यप्रसङ्गेन कल्पस्यमुनिसत्तमाः । चतुर्विंशत्सहस्राणि तत्पुराणमिहोच्यते ३९ कांचनंगरुडंकृत्वा तिलधेनुसमन्वितम् । पौर्णमास्यांमधौदद्यात् ब्राह्मणायकुटुम्बिने । वराहस्यप्रसादेन पदमाप्नोतिवैष्णवम् ४० यत्रमाहेश्वरान्धर्मानधिकृत्य

२७ जिसमें कि ईशानकल्पके वृत्तान्तको अधिकार करके जो अग्निने वशिष्ठजीके अर्थधर्म वर्णनकियाहै वह आग्नेयपुराणहै उसकी संख्या सोलहहजार है २८ इसपुराणको जो सुवर्णके कमलसमेत लिखकर तिलगौसमेत मार्गशिरकी पूर्णमासीको दानकरताहै वह सम्पूर्ण यज्ञोंके फलको प्राप्तहोता है २९ जिसमें कि अघोरकल्पके वृत्तान्तकरके सूर्यके माहात्म्यको और जगत्की स्थितिसमेत भूतग्रामके लक्षणोंको ब्रह्माजीने मनुकेअर्थ कहाहै ३० वह भविष्यचारित्रवाला चौदहहज़ार पांचसौसंख्यावाला भविष्योत्तर पुराणकहाहै ३१ इस भविष्योत्तरपुराणको जो मनुष्य पौषकी पूर्णिमाके दिन मत्सरता और कुटिलतासे रहितहोकर गुड़केकुम्भ समेत दानकरताहै वह अग्निष्टोमयज्ञके फलको प्राप्तहोताहै ३२ जिसमें रथन्तरकल्पके वृत्तान्तके अधिकारकरके कृष्णके उत्तम माहात्म्यको मनुने नारदमुनिसे कहाहै ३३ और ब्रह्मवाराहकाभी जिसमें वृत्तान्त वारंवार वर्णनकियाहै वह अठारहहज़ार संख्यावाला ब्रह्मवैवर्त्त पुराणकहाहै ३४ जो इसपुराणको माघकी पूर्णिमाके शुभदिन और अच्छे मुहूर्त्तमें ब्राह्मणको दानकरताहै वह ब्रह्मलोकमें आनन्द करताहै ३५ जिसमें कि अग्निलिंगमेंस्थित होकर महादेवजीने अग्निके धर्म अर्थ काम मोक्षोंको कहाहै ३६ उसको ब्रह्माजीने कल्पके अन्तमें लिंगपुराण कहाहै वह संख्यामें ग्यारहहज़ार है इस लिंगपुराणको जो पुरुष फाल्गुनकी पूर्णमासीकेदिन गौ समेत दानकरताहै वह शिवकी रूपताको प्राप्तहोताहै ३७ जिसमें कि महावराह अवतार को अधिकार करके विष्णुने पृथ्वीके अर्थ धर्मका वर्णनकियाहै ३८ हे ऋषिलोगो वह मानव कल्पके प्रसंगसे चौबीसहज़ार संख्यावाला वाराहपुराण कहाहै ३९ इसपुराणको जो पुरुष सुवर्णके गरुड़ और तिलधेनुके साथ चैत्रकी पूर्णिमाकेदिन कुटुम्बी ब्राह्मणको देताहै वह वराहजीकी प्रसन्नतासे

चषण्मुखः।कल्पेतत्पुरुषंवृत्तंचरितैरुपबृंहितम् ४१ स्कन्दंनामपुराणंचह्येकाशीतिनिगद्यते।सहस्राणिशतंचैकमितिमर्त्येषुगद्यते ४२ परिलिख्यचयोदद्याद्धेमशूलसमन्वितम्। शैवम्पदमवाप्नोति मीनेचोपागतेरवौ ४३ त्रिविक्रमस्यमाहात्म्यमधिकृत्यचतुर्मुखः। त्रिवर्गमभ्यधात्तच्च वामनंपरिकीर्त्तितम् ४४ पुराणंदशसाहस्रं कूर्मकल्पानुगंशिवम्। यःशरद्विषुवेदद्याद् वैष्णवंयात्यसौपदम् ४५ यत्रधर्मार्थकामानां मोक्षस्यचरसातले। माहात्म्यङ्कथयामास कूर्मरूपीजनार्दनः ४६ इन्द्रद्युम्नप्रसङ्गेन ऋषिभ्यःशक्रसन्निधौ। अष्टादशसहस्राणि लक्ष्मीकल्पानुषाङ्गिकम् ४७ योदद्यादयनेकूर्मं हेमकूर्मसमन्वितम्। गोसहस्रप्रदानस्य फलंसम्प्राप्नुयान्नरः ४८ श्रुतीनांयत्रकल्पादौ प्रवृत्त्यर्थंजनार्दनः। मत्स्यरूपेणमनवे नरसिंहोपवर्णनम् ४९ अधिकृत्याऽब्रवीत्सप्त कल्पवृत्तंमुनीश्वराः। तन्मात्स्यमितिजानीध्वं सहस्राणिचतुर्दश ५० विषुवेहेममत्स्येन धेन्वाचैवसमन्वितम्। योदद्यात्पृथिवीतेन दत्ताभवतिचाखिला ५१ यदाचगारुडेकल्पे विश्वाण्डाद्गरुडोद्भवम्। अधिकृत्याऽब्रवीत्कृष्णो गारुडन्तदिहोच्यते ५२ तदष्टादशकंचैव सहस्राणीहपठ्यते। सौवर्णंहंससंयुक्तं योददातिपुमानिह। ससिद्धिंलभतेमुख्यां शिवलोकेचसंस्थितिम् ५३ ब्रह्माब्रह्माण्डमाहात्म्यमधिकृत्याब्रवीत्पुनः। तच्चद्वादशसाहस्रं ब्रह्माण्डंद्विशताधिकम् ५४ भविष्याणांचकल्पानां श्रूयतेयत्रविस्तरः। तद्ब्रह्माण्डपुराणंच ब्रह्मणा

वैष्णवपदको प्राप्तहोताहै ४० जिसमें कि महादेवजीके धर्मोंको अधिकार करके स्वामिकार्त्तिकजीने उत्तम पुरुषोंसे धर्मोंका वर्णन कियाहै उस स्कन्दपुराणकी इक्यासी हजार एकसौ संख्याहै ४१।४२ जो पुरुष इस स्कन्दपुराणको सुवर्णके त्रिशूलसमेत लिखकर मीनकेसूर्य्यमें ब्राह्मणको दानकरताहै वह शिवजीके धामको प्राप्तहोताहै ४३ और जिसमें वामनजीके माहात्म्यको अधिकार करके ब्रह्माजीने देवतादिकोंसे धर्मअर्थ और कामका वर्णनकियाहै वहवामनपुराण संख्यामेंदशहजारहै इसपुराणको जो सुन्दर लिखवाकर दक्षिणासमेत शरदऋतुमें दानकरताहै वह विष्णुपदको प्राप्तहोताहै ४४।४५ और जिसमें कच्छपरूप धारण करके इन्द्रकेपास इन्द्रद्युम्नके प्रसंगकरके विष्णु भगवान् ने पाताल में ऋषियोंकेपास अर्थ धर्म काम और मोक्षके माहात्म्यका वर्णन किया है यह लक्ष्मी कल्पमें होने वाला और संख्यामें अठारहहजार कूर्मपुराणहै ४६। ४७ जो पुरुष इसपुराणको सुवर्णके कच्छप समेत उत्तरायणमें दानकरताहै वह हजारगौओंके दानके फलको प्राप्तहोताहै ४८ जिसमें कि कल्प की आदिमें श्रुतियोंकी प्रवृत्ति के निमित्त जनार्दन भगवान् ने मत्स्यरूपसे नरसिंहकी कथा मनुको सुनाई है ४९ और सातकल्पोंका वृत्तान्तभी कहाहै उसको मात्स्यपुराण कहतेहैं वह संख्यामें चौदहहजारहै ५० इसपुराणको जो पुरुष सुवर्णके मत्स्य और गौ समेत उत्तरायणसूर्य्य में दानदे तो सम्पूर्ण पृथ्वीके दानदेनेके समान फलको प्राप्तहोय ५१ जहाँ गरुड़कल्पमें गरुड़को अधिकार करके धर्मोंको कृष्णने कहाहै वह गरुड़पुराण अठारहहजार है ५२ इसपुराणको सुवर्णके हंस समेत जो पुरुषदान करताहै वहशिवलोकमें मुख्य सिद्धियों समेत निवासको पाताहै ५३ और जिसमें ब्रह्माण्ड माहात्म्यको अधिकारकरके भविष्यकल्पोंका विस्तार देवताओंसे ब्रह्माने कहाहै वह ब्रह्माण्ड पुराण

समुदाहृतम् ५५ योदद्यात्तद्व्यतीपाते पीतोर्णायुगसंयुतम् । राजसूयसहस्रस्य फल
माप्नोतिमानवः । हेमधेन्वायुतंतच्च ब्रह्मलोकफलप्रदम् ५६ चतुर्लक्षमिदंप्रोक्तं व्यासेना
द्भुतकर्म्मणा । मत्पितुर्ममपित्राच मयातुभ्यंनिवेदितम् ५७ इहलोकहितार्थाय संक्षिप्तंपर
मर्षिणा । इदमद्यापिदेवेषु शतकोटिप्रविस्तरम् ५८ उपभेदान्प्रवक्ष्यामिलोकेयेसम्प्रतिष्ठ
ताः । पाद्मेपुराणेतत्रोक्तं नरसिंहोपवर्णनम् । तच्चाष्टादशसाहस्रं नारसिंहमिहोच्यते ५९
नन्दायायत्रमाहात्म्यं कार्तिकेयेनवर्ण्यते । नन्दीपुराणंतल्लोकैराख्यातमितिकीर्त्यते ६०
यत्रसाम्बंपुरस्कृत्य भविष्येऽपिकथानकम् । प्रोच्यतेतत्पुनर्लोकेसाम्बमेतन्मुनिव्रताः ६१
पुरातनस्यकल्पस्य पुराणानिविदुर्बुधाः । धन्यंयशस्यमायुष्यं पुराणानामनुक्रमम् । एव
मादित्यसंज्ञाच तत्रैवपरिगद्यते ६२ अष्टादशभ्यस्तुपृथक् पुराणंयत्प्रदिश्यते । विजानी
ध्वंद्विजश्रेष्ठा ! स्तदेतेभ्योविनिर्गतम् ६३ पंचाङ्गानिपुराणेषु आख्यानकमितिस्मृतम् ।
सर्गश्चप्रतिसर्गश्च वंशोमन्वन्तराणिच । वंशानुचरितंचैव पुराणंपञ्चलक्षणम् ६४
ब्रह्मविष्ण्वर्करुद्राणां माहात्म्यंभुवनस्यच । ससंहारप्रदानाञ्च पुराणेपञ्चवर्णके ६५
धर्म्मश्चार्थश्चकामश्च मोक्षश्चैवात्रकीर्त्यते । सर्वेष्वपिपुराणेषु तद्विरुद्धञ्चयत्फल
म् ६६ सात्विकेषुपुराणेषुमाहात्म्यमधिकंहरेः । राजसेषुचमाहात्म्यमधिकंब्रह्मणोविदुः ६७
तद्वदग्नेश्चमाहात्म्यं तामसेषुशिवस्यच । संकीर्णेषुसरस्वत्याः पितृणाञ्चनिगद्यते ६८

संख्यामें बारहहजार दोसौहै ५४ । ५५ इसपुराणको जो पुरुष पीताम्बर समेत व्यतीपातमें देताहै
वहहजार राजसूय यज्ञके फलको प्राप्तहोताहै और जो इसको सुवर्णकी गौसमेत दानदेताहै वह ब्रह्मलोकको
प्राप्तहोताहै ५६ सूतजी कहतेहैं कि अद्भुत कर्म्मीव्यासजीने यह चारलाख संख्या सबपुराणों
की मेरे पितासे वर्णन की है मेरे पिताने मुझसे कहा और हे ऋषियो मैंने तुमसे कहाहै ५७ यहां
लोकके हितकेलिये परमपूज्य ऋषिने बड़ी संक्षेपतासे वर्णन कियाहै नहीं तो यह पुराण अबभी सौ
कोटि संख्यासे वर्त्ततेहैं ५८ जो लोकमें स्थितपुराणहैं उनके उपभेदोंको कहताहूं पद्मपुराणमें नरसिंहका
वर्णनहै वह अठारहहजार नारसिंह पुराणकहाहै ५९ और स्वामिकार्त्तिकने जहां नन्दाका माहात्म्यकहाहै
उसको लोग नन्दीपुराणकहते हैं ६० और जहां शिवजीने गौरीको आगेकरके भविष्य
कथावर्णन की है उसको लोकमें मुनिलोग सांब पुराणकहते हैं ६१ पुरातन कल्पके पुराणोंको और
पुराणोंके अनुक्रमको जो पंडितलोग कहतेहैं सो धन आयु और यशको प्राप्तहोतेहैं इसीप्रकार आदित्योंकेभी
नामकहेहैं ६२ अठारह पुराणोंसे जो पृथक् पुराणकहे हैं वह ऋषियोंने इन्हीं पुराणोंमें से
निकालेहैं ६३ पुराणोंके विषयमें पांचअंगवर्णन किये हैं सर्ग–प्रतिसर्ग–वंश–मन्वन्तर और वंशके
चरित यही पांचपुराणके लक्षणहैं ६४ इनपांचोंलक्षणोंवाले पुराणोंमें ब्रह्मा–विष्णु–सूर्य्य रुद्र और
भुवन इन सबका माहात्म्य कहाहै और यही पांच संहारादिक करनेवालेभी कहेहैं ६५ इनसबपुराणोंमें
धर्म अर्थ काम और मोक्ष कहाहै और इनका फलभी वर्णन कियाहै ६६ सात्विक पुराणोंमें अधिककरके
हरिकामाहात्म्य कहाहै राजस पुराणोंमें ब्रह्माका अधिकमाहात्म्य कहाहै ६७ और तामसपुराणोंमें
शिव और अग्निके माहात्म्यकहे हैं तीनों गुणवाले पुराणों में सरस्वती और पितरोंका

अष्टादशपुराणानि कृत्वासत्यवतीसुतः । भारताख्यानमखिलं चक्रेतदुपबृंहितम् । लक्षे
णैकेनयत्प्रोक्तं वेदार्थपरिबृंहितम् ६९ वाल्मीकिनातुयत्प्रोक्तं रामोपाख्यानमुत्तमम् । ब्र
ह्मणाभिहितंयच्च शतकोटिप्रविस्तरम् ७० आहृत्यनारदायैव तेनवाल्मीकयेपुनः । वा
ल्मीकिनाचलोकेषु धर्म्मकामार्थसाधनम् । एवंसपादाःपंचैते लक्षामर्त्यैप्रकीर्त्तिताः ७१
पुरातनस्यकल्पस्य पुराणानिविदुर्बुधाः । धन्यंयशस्यमायुष्यं पुराणानामनुक्रमम् । यः
पठेच्छृणुयाद्वापि सयातिपरमाङ्गतिम् ७२ इदंपवित्रंयशसोनिधानं इदंपितृणामतिवल्ल
भञ्च । इदञ्चदेवेष्वमृतायितंच नित्यंत्विदंपापहरञ्चपुंसाम् ७३ ॥

इति श्रीमत्स्यपुराणेत्रिपञ्चाशत्तमोऽध्यायः ५३ ॥

(सूत उवाच) अतःपरंप्रवक्ष्यामि दानधर्मानशेषतः । व्रतोपवाससंयुक्तान् यथाम
त्स्योदितानिह १ महादेवस्यसंवादे नारदस्यचधीमतः । यथावृत्तंप्रवक्ष्यामि धर्म्मका
मार्थसाधकम् २ कैलासशिखरासीनमपृच्छन्नारदःपुरा । त्रिनयनमनङ्गारिमनङ्गाङ्गहरं
हरम् ३ (नारद उवाच) भगवन् ! देव ! देवेश ! ब्रह्मविष्ण्विन्द्रनायक ! । श्रीमदारो
ग्यरूपायुर्भाग्यसौभाग्यसम्पदा । संयुक्तस्तवविष्णोर्वा पुमान्भक्तःकथंभवेत् ४ नारीवा
विधवासर्वं गुणसौभाग्यसंयुता । क्रमान्मुक्तिप्रदन्देव ! किञ्चिद्व्रतमिहोच्यताम् ५
(ईश्वर उवाच) सम्यक्पृष्टंत्वयाब्रह्मन् ! सर्वलोकहितावहम् । श्रुतमप्यत्रयच्छान्त्यैत

माहात्म्य कहाहै ६८ व्यासजी अठारहपुराणोंको रचकर फिर इनकी वृद्धिके अर्थ भारतको वर्णन
करतेभये वह भारतवेदके अर्थों समेत एकलक्षकहाहै ६९ और बाल्मीकि ऋषिने जो उत्तम रामचन्द्रजीका
उपाख्यानकहाहै और ब्रह्माजीने भी कहाहै वह सौ कोटि संख्यावाला कहाहै ७० यहरामायण
ब्रह्माने नारदसे कहीहै नारदने बाल्मीकिजीसे और बाल्मीकिने लोकोंमें कही है इसप्रकार
सवापांचलाख रामायण मनुष्योंमें वर्त्तमानहै ७१ पुरातन कल्पको पण्डितलोग पुराण कहते हैं जो
इनकी संख्याकरताहै वा सुनताहै वह धन यश और आयुको प्राप्तहोताहै और जो पढ़तासुनता और
पूजनकरताहै वह परमगतिको पाताहै ७२ इनसबपुराणोंमें यह मत्स्यपुराण बड़ा पवित्र यशकामूल
पितरोंका प्रिय देवताओंके अमृततुल्य और पुरुषोंके पापोंका हरनेवालाहै ७३ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांत्रिपंचाशत्तमोऽध्यायः ५३ ॥

सूतजीनेकहा हे ऋषिवर्य्यो अब इसकेआगे मत्स्यावतारके कहेहुए सम्पूर्ण दान धर्म व्रत नियम
और उपवासोंका वर्णन १ जिसमें कि श्री महादेवजी और नारदमुनिका सम्बाद और धर्म अर्थ काम
का साधकहै वर्णन करताहूं २ कैलास पर्व्वतके शिखरपर विराजमान त्रिनेत्र कामारि और कामके
शरीरके दहन करनेवाले महादेवजीसे प्रथम नारदजीने पूछा ३ कि हे देवदेव भगवन् देवेश ब्रह्मा
और विष्णुमें मुख्य शिवजी आपका और विष्णुकाभक्त लक्ष्मी आयु आरोग्य रूप भाग्य सौभाग्य
और सम्पति इनसबको कैसे प्राप्तहोताहै ४ और विधवानारीको गुण सौभाग्यसंयुक्त मुक्तिका देने
वाला कौनसाव्रत करनायोग्यहै इनसबको आपवर्णन कीजिये ५ नारदके इसवचनको सुनकर
महादेवजीने कहा कि हे नारदजी आपने सब लोकोंका हितकारी अच्छा प्रश्न किया है हे नारदजी

द्व्रतंश्रृणुनारद ! ६ नक्षत्रपुरुषंनाम व्रतंनारायणात्मकम् । पादादिकुर्याद्विधिवत् विष्णुनामानुकीर्त्तनम् ७ प्रतिमांवासुदेवस्य मूलर्क्षादिषुचार्चयेत् । चैत्रमासंसमासाद्यकृत्वाब्राह्मणवाचनम् ८ मूलेनमोविश्वधरायपादौ गुल्फावनन्तायचरोहिणीषु । जंघेऽभिपूज्येवरदायचैवद्वेजानुनीवाश्विकुमारऋक्षे ९ पूर्वोत्तराषाढयुगेतथोरू नमःशिवायेत्यभिपूजनीयौ । पूर्वोत्तराफल्गुनियुग्मकेचमेढ्रंनमः पञ्चशरायपूज्यम् १०कटिंनमःशार्ङ्गधरायविष्णोःसंपूजयेन्नारद!कृत्तिकासु।यथार्चयेत्भाद्रपदाद्वयेचपार्श्वेनमःकेशिनिषूदनाय ११ कुक्षिद्वयंनारद!रेवतीषु दामोदरायेत्यभिपूजनीयम् । ऋक्षेऽनुराधासुचमाधवाय नमस्तथोरस्थलमेवपूज्यम् १२ पृष्ठंधनिष्ठासुचपूजनीयमघौघविध्वंसकरायतच्च । श्रीशंखचक्रसिगदाधराय नमोविशाखासुभुजाश्चपूज्याः १३ हस्तेतुहस्तामधुसूदनायनमोऽभिपूज्या इतिकैटभारेः । पुनर्वसावङ्गुलिपूर्वभागाः साम्नामधीशायनमेऽभिपूज्याः १४भुजङ्गनक्षत्रदिनेनखानि संपूजयेन्मत्स्यशरीरभाजः । कूर्मस्यपादौशरणंव्रजामि ज्येष्ठासुकण्ठेहरिरर्चनीयः १५ श्रोत्रेवराहायनमोऽभिपूज्या जनार्दनस्यश्रवणेनसम्यक् । पुष्येमुखंदानवसूदनाय नमोनृसिंहायचपूजनीयम् १६ नमोनमःकारणवामनाय स्वातीषुदन्ताग्रमथार्चनीयम् । आस्यंहरेर्भार्गवनन्दनाय सम्पूजनीयंद्विजवारणेतु १७ नमोऽस्तुरामायमघासुनासासंपूजनीयारघुनन्दनस्य।मृगोत्तमाङ्गेनयनेऽभिपूज्ये नमोऽस्तुतेरामविघूर्णिताक्ष! १८बुद्धायशान्तायनमोललाटं चित्रासुसम्पूज्यतमंमुरारेः। शिरोऽभिपूज्यंभरणीषुविष्णोर्नमोऽस्तुविश्वेश्वर ! कल्किरूपिणे १९ आर्द्रासुकेशाःपुरुषोत्तमस्य सम्पूजनीयाहरये

विधवाके शान्ति कल्याणके अर्थ व्रतको सुनों ६ एकनक्षत्र पुरुष नामव्रत है वह नारायणका अंग है विष्णुके नामसे युक्त उसपादादि व्रतको करे ७ ब्राह्मण के वचनसे भगवान्की मूर्त्ति बनाकर चैत्रमाससे लेकर मूलनक्षत्रादिकों में पूजनकरे ८ महाराजके चरणों में तो मूलनक्षत्रयुक्त विश्वधरका पूजनकरे टकनों में रोहिणीयुक्त अनन्तजीका--पिंडिलियोंमें वरदकापूजनकरे दोनों घुटनोंमें अश्विनी कुमारोंका ९ पूर्व्वाषाढ और उत्तराषाढमें जंघाओंका शिवयुक्त पूजनकरे--पूर्वा और उत्तराफाल्गुनी नक्षत्रमें लिंगस्थानमें कामसहित पूजनकरे १० विष्णुकी कटिमें शार्ङ्गधरसहित कृत्तिकाका पूजनकरे केशिनिपूदनसमेत-पसलियोंमें पूर्व्वा और उत्तराभाद्रपदकापूजनकरे ११ हे नारद दोनोंकोखोंमें रेवतीयुक्त दामोदरका--हृदयमें अनुराधायुक्त माधवका पूजनकरे १२ पीठमें धनिष्ठायुक्त पापहारी विष्णुकापूजनकरे और भुजाओंमें विशाखायुक्त शंख चक्रादिधारी विष्णुका पूजनकरे १३ हस्तनक्षत्रयुक्त हाथोंमें मधुसूदनका और कैटभारिका पूजनकरे और पुनर्वसुसहित अंगुलियोंके पूर्व्वभागमें सामवेदके अधीश्वरका पूजनकरे १४ नखोंमें मत्स्यावतारयुक्त श्लेषाका पूजनकरे ज्येष्ठायुक्त कण्ठमें हरिकापूजनकरे १५ श्रवणयुक्त जनार्द्दनका कानोंमें पूजनकरे पुष्ययुक्त नृसिंहजीका मूर्त्तिकेमुखमें पूजनकरे १६ दांतोंके अग्रभागमें स्वातीयुक्त बामनजीका पूजनकरे फिर हरिके मुखमें परशुरामजीका पूजनकरे १७ मूर्त्तिकी नासिकामें मघायुक्त रामचन्द्रका पूजनकरे और मृगशिरयुक्त रामचन्द्रजीका मस्तक और नेत्रोंमें पूजनकरे १८ बुद्ध अवतार सहित मूर्त्तिके माथेमें

उपोषितेनर्क्षदिनेषुभक्त्या सम्पूजनीयाद्विजपुङ्गवाःस्युः २० पूर्णेव्रतेसर्वगुणा
नमस्ते । उपोषितेनर्क्षंदिनेषुभक्त्या सम्पूजनीयाद्विजपुङ्गवाःस्युः २० पूर्णेंव्रतेसर्वगुणा
न्विताय वाग्रूपशीलायचसामगाय । हैमींविशालायतबाहुदण्डां मुक्ताफलेन्दूपलव
ज्रयुक्ताम् २१ जलस्यपूर्णेकलशेनिविष्टा मर्चांहरेर्वस्त्रगवासहैव । शय्यांतथोपस्करभा
जनादि युक्तांप्रदद्याद्द्विजपुंगवाय २२ यद्यास्तियत्किंचिदिहास्तिदेयं दद्याद्द्विजा
यात्महितायसर्वम् । मनोरथंनःसफलीकुरुष्व हिरण्यगर्भाच्युत ! रुद्ररूपिन् ! २३ स
लक्ष्मीकंसभार्याय काञ्चनंपुरुषोत्तमम् । शय्यांचदद्यान्मन्त्रेण ग्रन्थिभेदविवर्जितम् २४
यथानविष्णुभक्तानां वृजिनंजायतेक्वचित् । तथास्वरूपतारोग्यं केशवेभक्तिमुत्तमाम् २५
यथानलक्ष्म्याशयनं तवशून्यंजनार्दन ! । शय्याममाप्यशून्यास्तु कृष्ण ! जन्मनिजन्म
नि २६ एवंनिवेद्यतत्सर्वं वस्त्रमाल्यानुलेपनम् । नक्षत्रपुरुषज्ञाय विप्रायाथविसर्जयेत् २७
भुञ्जीतातैललवणंसर्वर्क्षेष्वप्युपोषितः । भोजनञ्चयथाशक्त्यावित्तशाठ्यंविवर्जयेत् २८
इतिनक्षत्रपुरुषं उपास्यविधिवत्स्वयम् । सर्वान्कामानवाप्नोति विष्णुलोकेमहीयते २९
ब्रह्महत्यादिकंकिंचिदिहवामुत्रवाकृतम् । आत्मनावाथपितृभि स्तत्सर्वंक्षयमाप्नुयात् ३०
इतिपठतिशृणोतियश्चभक्त्या पुरुषवरोव्रतमंगनाथकुर्यात् । कलिकलुषविदारणंमुरारेः
सकलविभूतिफलप्रदञ्चपुंसाम् ३१ ॥इति श्रीमत्स्यपुराणेचतुःपंचाशत्तमोऽध्यायः ५४॥

चित्राकापूजनकरे भरणीसहित मूर्त्तिके शिरमें कल्कीका पूजनकरे १९ मूर्त्तिके बालोंमें आर्द्रासहित
हरिका पूजनकरे और व्रतकेदिन श्रेष्ठब्राह्मणोंका पूजनकरे २० जबव्रतपूर्णहोजाय तब सर्वगुणयुक्त
बाणी रूप शीलयुक्त सामवेद के जाननेवाले ब्राह्मणको सुबर्णकी सुन्दरमूर्त्ति बनाकर सुबर्णका दंड
मोतीहीरे आदिरत्नों से युक्त करके २१ उसमूर्त्तिको जलका कलश स्थापनकर बस्त्रगौ शय्याइत्यादि
उपस्करों समेत श्रेष्ठकुलीन ब्राह्मणको दानदेवे २२ और अपने हितकारी बस्तुओंमें से जो बस्तु
ब्राह्मणके देनेके योग्यसमझे वह सबब्राह्मणको देदे इसकेपीछे ऐसेप्रार्थनाकरे कि हेअच्युत हेहिरण्य
गर्भ हेरुद्ररूपिन् हमारा मनोरथ सफलकरो २३ लक्ष्मीसहित भगवान्‌की सुबर्णकीमूर्त्ति और शय्या
अपने सरलचित्तसे सस्त्रीक ब्राह्मणकोदेवे २४ और बिष्णुभक्तोंको जिसरीतिसे कोई दुःखनहींहोवे
उसीरीतिके द्वारा उत्तमभक्तिकरे २५ और यह प्रार्थनाकरे कि हेजनार्दन जैसे तुम्हारीशय्यालक्ष्मी
के बिनाशून्यनहींरहती उसीप्रकार मेरीभी शय्याजन्म २ में शून्यनरहै २६ नक्षत्रपुरुष और ब्राह्मण
के अर्थ इसप्रकारसे बस्त्रमाला और गन्धादि निवेदन करके बिसर्जन करदेवे २७ और सबनक्षत्रोंमें
तेल नोन भोजन न करे यथाशक्ति भोजन करावे और आपभीकरे धनमें शठता न करे २८ इस
प्रकार नक्षत्रपुरुषकी विधिवत् उपासना करके सम्पूर्ण कामनाओंको प्राप्तहोकर बिष्णुलोकमें आनंद
भोगते हैं ऐसे व्रतकरनेसे इसलोक और परलोक दोनोंलोकोंमें कियेहुए ब्रह्महत्यादि पापअपने और
अपने पितरोंकेभी नष्टहोजातेहैं २९ । ३० जो स्त्री अथवा पुरुष इस व्रतकी कथाको भक्ति पूर्व्वक
पढ़ेगा वा सुनेगा अथवा व्रतको भक्तिपूर्व्वक करेगा उसके सम्पूर्णपाप इस व्रतके करने सुनने और
पढ़नेसे नाशको प्राप्तहोजांयगे यह व्रतपुरुषोंको सम्पूर्ण बिभूतियोंसमेत अनेक फलोंको देताहै ३१ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांचतुःपंचाशत्तमोऽध्यायः ५४ ॥

(नारद उवाच) उपवासेष्वशक्तस्य तदेवफलमिच्छतः। अनभ्यासेनरोगाद्वाकिमिष्टं
व्रतमुत्तमम् १ (ईश्वर उवाच) उपवासेप्यशक्तानां नक्तम्भोजनमिष्यते। यस्मिन्व्रतेतद
प्यत्र श्रूयतामक्षयम्महत् २ आदित्यशयनन्नाम यथावच्छङ्करार्चनम्। येषुनक्षत्रेयोगेषु
पुराणज्ञाःप्रचक्षते३ यदाहस्तेनसप्तम्यां आदित्यस्यदिनंभवेत्। सूर्यस्यचाथसंक्रांतिस्ति
थिःसासार्वकामिकी ४ उमामहेश्वरस्यार्चामर्चयेत्सूर्यनामभिः। सूर्यार्चांशिवलिंगेच प्रकु
र्वन्पूजयेद्यतः ५ उमापतेरवेर्वापि नभेदोदृश्यतेक्वचित्। यस्मात्तस्मान्मुनिश्रेष्ठ! गृहेशं
भुंसमर्चयेत् ६ हस्तेचसूर्यायनमोस्तुपादावर्कायचित्रासुचगुल्फदेशम्। स्वातीषुजंघेपुरु
षोत्तमाय धात्रेविशाखासुचजानुदेशम् ७ तथानुराधासुनमोऽभिपूज्यमूरुद्वयञ्चैवसहस्र
भानोः। ज्येष्ठास्वनंगायनमोऽस्तुगुह्यमिन्द्रायसोमायकटीचमूले ८ पूर्वोत्तराषाढयुगेच
नाभिन्त्वष्ट्रेनमःसप्ततुरंगमाय। तीक्ष्णांशवेचश्रवणेचकुक्षौ पृष्ठंधनिष्ठासुविकर्तनाय ९
चक्षुस्थलंध्वान्तविनाशनाय जलाधिपर्क्षेपरिपूजनीयम्। पूर्वोत्तराभाद्रपदाद्वयेचबाहूनम
श्चण्डकरायपूज्यौ १० साम्नामधीशायकरद्वयञ्च संपूजनीयंद्विज! रेवतीषु। नखानि
पूज्यानितथाश्विनीषु नमोऽस्तुसप्ताश्वधुरन्धराय ११ कठोरधाम्नेभरणीषुकण्ठं दिवा
करायेत्यभिपूजनीया। ग्रीवाग्निऋक्षेधरमम्बुजेशे संपूजयेन्नारद! रोहिणीषु १२ मृगो
त्तमाङ्गंदशनामुरारेः सम्पूजनीयाहरयेनमस्ते। नमःसवित्रेरसनांशङ्करेच नासाभिपू
ज्याचपुनर्वसौच १३ ललाटमम्भोरुहवल्लभाय पुष्येलकावेदशरीरधारिणे। सार्प्पे

यहसुनकर नारदजीने कहाकि हेईश्वर जोइसव्रतकरनेमें रोगसे अथवा अन्यकिसी कारण से वह
करनेमें असमर्थ होतो उसको कौनसा उत्तमव्रत करनाश्रेष्ठहै १ ईश्वरने कहा जो व्रत करनेमें समर्थ
नहो वहभी रात्रिमें भोजनकरे उसकाभी बड़ा अक्षयफल कहाहै २ और पुराणोंके जानने वाले जिन
नक्षत्रोंमें आदित्य शयन शंकरार्चन व्रतको वर्णनकरते हैं वहसुनो ३ जिसदिनसप्तमी तिथिको हस्त
नक्षत्रहोय वहसूर्य्यकादिनहै अथवा संक्रान्तिकादिनहै यहसम्पूर्ण कामनाओंके देनेवाले हैं ४ इनदिनों
में उमा महेश्वरकी मूर्त्तियोंको सूर्य्यके नामोंसे पूजे औरसूर्य्यकी मूर्त्तिको शिवलिंगमें पूजनकरे ५ हे
मुनियोंमें श्रेष्ठ नारद सूर्य्यमें और शिवमें कुछभेदनहीं है इसहेतुसेघरमें जबमहादेवका पूजनकरे ६
तबहस्तयुक्त सूर्य्यकी मूर्त्तिके चरणोंमें नमस्कारकरे और चित्रायुक्त सूर्य्यको टकनोंमें स्वातीयुक्त सूर्य्य
को पिंडिलियोंमें पुरुषोत्तम नामसे नमस्कारकरे विशाखायुक्त धाताको घोटुओंमें ७ अनुराधायुक्त सूर्य्य
को दोनों जंघाओंमें ज्येष्ठायुक्त कामदेवको गुह्यमें मूलयुक्त इन्द्रवा चन्द्रमाको कटिमें ८ पूर्वापाढ़युक्त
त्वष्टाको नाभिमें और श्रवणयुक्त तीक्ष्णांशु सूर्य्यको कुक्षिमें—धनिष्ठायुक्त विकर्त्तन नामसूर्य्यको पीठमें
नमस्कारकरे ९ शतभिषायुक्त ध्वान्त विनाशसूर्य्यकोनेत्रोंमें पूजनकरे औरपूर्वाभाद्रपद औरउत्तराभाद्र
युक्तचंडकरनाम सूर्य्यको भुजाओंमें पूजनकरे १० हेद्विजवर्य्य नारदरेवतीयुक्त सामोंको अधीश्वरसूर्य्य
को दोनों हाथोंमें पूजे अश्विनी नक्षत्रमें सातघोड़ों वाले सूर्य्यका नखोंमें पूजन करे ११ भरणीमें
कठोरधामा सूर्य्यका कंठमें पूजनकरे हेनारद कृत्तिकामें अम्बुजेश सूर्य्यका ग्रीवामें पूजनकरे—रोहि-
णीमें दिवाकर सूर्य्यका कन्धोंमें पूजन करे १२ मृगशिरमें मस्तकके बीच मुरारिका पूजनकरे-आर्द्रा

ऽथमौलिंविबुधप्रियाय मघासुकर्णावितिगोगणेशे १४ पूर्व्वासुगोब्राह्मणवन्दनाय नेत्राणिसम्पूज्यतमानिशम्भोः। अथोत्तराफल्गुनिभेभ्रुवौच विश्वेश्वरायेतिचपूजनीये १५ नमोऽस्तुपाशांकुशशूलपद्मकपालसर्पेन्दुधनुर्धराय। गजासुरानंगपुरान्धकादि विनाशमूलायनमःशिवाय १६ इत्यादिचास्त्राणिचपूज्यानित्यं विश्वेश्वरायेतिशिराभिपूज्य। भोक्तव्यमत्रैवमतैलशाकममांसमक्षारमभुक्तशेषम् १७ इत्येवंद्विज! नक्तानिकृत्वादद्यात्पुनर्वंशी। शालेयतण्डुलप्रस्थमौदुम्बरमयेघृतम् १८ संस्थाप्यपात्रेविप्राय सहिरण्यंनिवेदयेत्। सप्तमेवस्त्रयुग्मञ्चपारणेत्वधिकंभवेत् १९ चतुर्दशेतुसंप्राप्तेपारणेनारदाब्दिके। ब्राह्मणान्भोजयेद्भक्त्यागुड़क्षीरघृतादिभिः २० कृत्वातुकाञ्चनंपद्ममष्टपत्रंसकर्णिकम्। शुद्धमष्टांगुलंतद्वपद्मरागदलान्वितम् २१ शय्यांविलक्षणांकृत्वा विरुद्धग्रन्थिवर्जिताम्। सोपधानकविश्रामस्वास्तरव्यजनानिच २२ भाजनोपानहच्छत्र चामरासनदर्प्पणैः। भूषणैरपिसंयुक्तां फलवस्त्रानुलेपनैः २३ तस्यांविधायतत्पद्ममलंकृत्यगुणान्वितम्। कपिलांवस्त्रसंयुक्तां सुशीलाञ्चपयस्विनीम् २४ रौप्यखुरींहैमशृङ्गीं सवत्सांकांस्यदोहनाम्। दद्यान्मन्त्रेणपूर्व्वाह्णे नचैनामभिलंघयेत् २५ यथैवादित्यशयनमशून्यंतवसर्व्वदा। कान्त्याधृत्याश्रियारत्या तथामेसन्तुसिद्धयः २६ यथानदेवाःश्रेयांसंत्वदन्यमन

में सवितायुक्त जिह्वाका पूजन करे—पुनर्वसुमें सूर्य्यकी नासिका का पूजनकरे १३ पुष्यमें कमल वल्लभ सूर्य्यका मस्तकमें पूजनकरे—श्लेषामें देवप्रिय सूर्य्यका मुकुटमें पूजनकरे—मघामें गोगणेश सूर्य्यका कानोंमें पूजनकरे १४ पूर्वाफाल्गुनी में ब्राह्मण मुखसूर्य्यका नेत्रों में पूजनकरे उत्तरा फाल्गुनीमें शम्भु और विश्वेश्वरका भृकुटियोंमें पूजनकरे १५ पीछे शिवजीकी इसप्रकार प्रार्थना करे कि हे पाश—अंकुश—शूल—पद्म--कपाल—सर्प और चन्द्रमाके धारण करने वाले ईश्वर आप जैसे हैं वैसेको नमस्कारहै और गज—असुर—अनंग और पुरान्धक इनसबके नाशकरनेवाले आपको नमस्कारहै १६ इनके उक्त सब अस्त्रोंका पूजन करके और विश्वेश्वर महादेवको शिरसे प्रणाम करके प्रतिदिन तेल—मांस—शाक—और लवण इनचारोंसे रहित भोजनकरे १७ हेनारद इसप्रकार रात्रियोंमें भोजन करके फिर गूलरकी लकड़ीके पात्रमें सांठीके चावल और घृत स्थापन करे १८ और उसमें कुछ सुवर्ण रखकर ब्राह्मणको देवे फिर व्रतके सातवें दिन दो वस्त्रदेवे १९ और वर्षके मध्यवर्ती चौदहवें पारणमें गुड़ क्षीर और घृतसे ब्राह्मणोंको भोजनकरावे २० तदनन्तर आठअंगुल लम्बा सुवर्णका शुद्धपुखराजके आठपत्तों वाला कमल पंखड़ी समेत बनवावे उसके साथ तोशक तकिया सौडचांदनीतकिया २१। २२ पात्र जूते छत्र—चमर—आसन—दर्पण—भूषण—फल वस्त्र और चन्दनादि सुगन्धित वस्तुओं समेत शय्यास्थापन कर उसकमलको वस्त्रोंसे शृंगारकरके चाँदीकेखुर सुवर्णके शृंगवाली सवत्सा गौ समेत पूर्व्वाह्णकालमें इनसबवस्तुओंका दान ब्राह्मणको करे दान कभी गौसेरहित न करे २३। २५ फिरसूर्य्यसे यहप्रार्थनाकरे कि हेसूर्य्य जैसेआपकी शय्या शून्यनहीं और कान्ति—धृति—श्री और रति इन सबसे युक्तहै वैसीही मुझेभी सिद्धिहोय २६ हेसूर्य्यदेवता आपके सिवाय और कौन कल्याणका करने वालाहै इसहेतुसे आपही मुझको इसदुःखरूपी संसार

घंविदुः । तथामामुद्धराशेष दुःखसंसारसागरात् २७ ततःप्रदक्षिणीकृत्य प्राणिपत्यविसर्जयेत् । शय्यागवादितत्सर्वं द्विजस्यभवनन्नयेत् २८ नैतद्विशीलायनदाम्भिकायकुतर्कदुष्टायविनिन्दकाय । प्रकाशनीयंव्रतमिन्दुमौलेर्यश्चापिनिन्दामधिकांविधत्ते २९ भक्तायदान्तायचगुह्यमेतदाख्येयमानन्दकरंशिवस्य । इदंमहापातकभिर्न्नराणामप्यक्षरंवेदविदोवदन्ति ३० नबन्धुपुत्रेणबलैर्वियुक्तः पत्नीभिरानन्दकरःसुराणाम् । नाभ्येतिरोगंनचशोकदुःखं यावाथनारीकुरुतेऽतिभक्त्या ३१ इदंवासिष्ठेनपुरार्जुनेन कृतंकुवेरेणपुरन्दरेण । यत्कीर्तनेनाप्यखिलानिनाशमायान्तिपापानिनसंशयोऽस्ति ३२ इतिपठति शृणोतिवायइत्थं रविशयनंपुरुहुतवल्लभःस्यात् । अपिनरकंगतान्पितॄनशेषानपिदिवमानयतीहयःकरोति ३३ ॥ इति श्रीमत्स्यपुराणेपञ्चपञ्चाशत्तमोऽध्यायः ५५ ॥

(श्रीभगवानुवाच) कृष्णाष्टमीमथोवक्ष्ये सर्वपापप्रणाशिनीम् । शान्तिर्मुक्तिश्चभवति जयःपुंसांविशेषतः १ शंकरंमार्गशिरसि शम्भुम्पौषेऽभिपूजयेत् । माघेमहेश्वरंदेवंमहादेवञ्चफाल्गुने २ स्थाणुंचैत्रेशिवंतद्वद्वैशाखेत्वर्चयेन्नरः । ज्येष्ठेपशुपतिंचार्चेदाषाढ़ेउग्रमर्चयेत् ३ पूजयेत्श्रावणेशर्वं नभस्येत्र्यम्वकन्तथा । हरमाश्वयुजेमासि तथेशानञ्चकार्तिके ४ कृष्णाष्टमीषुसर्वासु शक्तःसम्पूजयेद्द्विजान् । गोभूहिरण्यवासोभिःशिवभक्तानुपोषितः ५ गोमूत्रघृतगोक्षीर तिलान्यवकुशोदकम् । गोशृङ्गोदशिरीषार्क

सागर से उद्धार करो २७ ऐसेकह परिक्रमाकर प्रणाम नमस्कार करके विसर्जन करे और शय्या गौ आदिक सम्पूर्ण दानकी वस्तुब्राह्मणके घरभेजदे अपने स्थानमें न रक्खे २८ यह महादेवजीका व्रत शील रहित दम्भी–कुतर्की–दुष्ट–निन्दक आदि कुत्सित पुरुषोंके आगे प्रकाश करना न चाहिये क्योंकि वह अधिक निन्दाकरेगा तो महापापहोगा २९ इस आनन्ददायक गुप्त शिवजीके व्रतको भक्तजन–दान्त और जितेन्द्री पुरुषको देना योग्यहै वेदज्ञपुरुष इस व्रतको महापातकोंका नष्टकरनेवाला और अक्षय फलका देनेवाला वर्णन करते हैं ३० जो स्त्री अथवा पुरुष इस व्रतको भक्तिसे करता है उसके बंधु और पुत्रोंका वियोग नहीं होता और स्त्रियोंसमेत देवताओं के आनन्दको प्राप्त होताहै रोग शोक और दुःखकोकभी नहीं प्राप्तहोता है ३१ इस व्रतको प्रथम वशिष्ठ–अर्जुन–कुवेर और इन्द्र इन सबने कियाहै इसव्रतके कीर्त्तनहीसे निस्सन्देह सबपापनाशको प्राप्तहोजाते हैं ३२ इस रविशयन व्रतको जो पढ़ताहै वा सुनताहै वह इन्द्रको प्रियहोता है और नरकमें भी गयेहुए पितरोंको स्वर्गमें प्राप्तकरता है ३३ ॥ इतिश्रीमत्स्यपुराणभाषाटीकायांपंचपंचाशत्तमोऽध्यायः ५५ ॥

श्रीभगवान् कहते हैं कि अब संपूर्ण पापोंकी नाशकरनेवाली जो कृष्णाष्टमी है उसके फलको बर्णन करते हैं विशेष करके इस व्रतसे पुरुषोंकी जय शान्ति और मुक्तिहोती है १ शंकरका तो मार्गशिरमें पूजनकरे–पौषमें शंभुका–माघमें महेश्वरका–फाल्गुनमें महादेवजी का-२ चैत्रमें स्थाणुका–वैशाखमें शिवका ज्येष्ठमें पशुपतिका और आषाढ़में उग्रका पूजनकरे३ श्रावणमें शर्वका–भाद्रपदमें त्र्यम्बकका–आश्विनमें हरका–कार्त्तिकमें ईशानका पूजनकरे ४ और संपूर्ण कृष्णपक्षकी अष्टमियों में ब्राह्मणोंका पूजनकरे और गौ भूमि सुवर्ण वस्त्र इन सबका दानदेकर शिवका व्रतकरे ५ पंचगव्य

विल्वपत्रदधीनिच । पञ्चगव्यञ्चसम्प्राश्य शंकरंपूजयेन्निशि ६ अश्वत्थञ्चवटञ्चैवो
दुम्बरंप्लक्षमेवच । पलाशंजम्बुवृक्षञ्च विदुषञ्चमहर्षयः ७ मार्गशीर्षाढमासाभ्यां द्वा
भ्यान्द्वाभ्यामितिक्रमात् । एकैकंदन्तपवनं वृक्षेष्वेतेषुभक्षयेत् ८ देवायदद्यादर्घ्यंच कृष्णां
गांकृष्णवाससम् । दद्यात्समाप्तेदध्यन्नं वितानध्वजचामरम् ९ द्विजानामुदकुम्भांश्च प
ञ्चरत्नसमन्वितान् । गावःकृष्णाःसुवर्णंच वासांसिविविधानिच । अशक्तस्तुपुनर्दद्या द्गा
मेकामपिशक्तितः १० नवित्तशाठ्यंकुर्वीत कुर्वन्दोषमवाप्नुयात् । कृष्णाष्टमीमुपोष्यैव
सप्तकल्पशतत्रयम् । पुमान्सम्पूजितोदेवैः शिवलोकेमहीयते ११ ॥

इति श्रीमत्स्यपुराणे षट्पञ्चाशत्तमोऽध्यायः ५६ ॥

(नारद उवाच) दीर्घायुरारोग्यकुलाभिवृद्धियुक्तःपुमान्भूपकुलायुतः स्यात् । मुहु
र्मुहुर्जन्मनियेनसम्यक्व्रतंसमाचक्ष्वतदिन्दुमौले ! १ श्रीभगवानुवाच । त्वयापृष्टमिदं
सम्यक्उक्तंचाक्षय्यकारकम् । रहस्यंतववक्ष्यामि यत्पुराणविदोविदुः २ रोहिणीचन्द्रश
यनं नामव्रतमिहोत्तमम् । तस्मिन्नारायणस्यार्च्या मर्चयेदिन्दुनामभिः ३ यदासोमदिने
शुक्ला भवेत्पञ्चदशीक्वचित् । अथवाब्रह्मनक्षत्रं पौर्णमास्यांप्रजायते ४ तदास्नानन्नरः
कुर्यात् पंचगव्येनसर्षपैः । आप्यायस्वेतितुजपेद्विद्वानष्टशतंपुनः ५ शूद्रोऽपिपरयाभ
क्त्या पाषण्डालापवर्जितः । सोमायवरदायाथ विष्णवेचनमोनमः ६ कृतजप्यःस्वभव

लेकर गोमूत्र–घृत–गौकादूध–तिल–जव–कुश–जल–गौकेसींगके धोवनका जल–सिरसका पत्ता–
आककापत्ता–बेलपत्र और दधि इन सबसे रात्रिको शिवका पूजनकरे ६ पीपल–बड़–गूलर–पिल·
खन–ढाक–जामन–इन वृक्षोंके नीचे विद्वान् और महर्षियोंको मार्गशिरसे आदिलेकर दोदो महीनों
में ब्राह्मणोंका भोजनकराना योग्यहै ७। ८ देवताको अर्घदानकरे कालेवस्त्रदे और व्रतकी समाप्तिमें
दधि–अन्न–वितान–ध्वजा–चामरआदिक दानकरे ९ ब्राह्मणोंको पांचरत्नोंसे युक्त जलके कलश
दानदे और काली गौ सुवर्ण और अनेक प्रकारके वस्त्र यहभी देवे जो सबदानोंकी सामर्थ्य न होय
तो एक गौदे १० दानमें वित्तकी शठतानकरे जो वित्तशाठ्य करता है उसको दोष प्राप्तहोताहै–इस
प्रकार कृष्णपक्षकी अष्टमीका व्रतकरके इक्कीस कल्प पर्य्यन्त देवताओंसे पूजित होकर शिवलोकमें
आनन्द करताहै ११ ॥ इतिश्रीमत्स्यपुराणभाषाटीकायांषट्पंचाशत्तमोऽध्यायः ५६ ॥

यह सबकथा सुनकर नारदमुनिने कहा हे महादेवजी जिस व्रतके करनेसे दीर्घआयु–आरोग्य–
कुलकी वृद्धि–राज्य कुलसेयुक्त इत्यादिक फल वारंवार जन्मोंमें प्राप्तहोतेहैं उसव्रतको आप श्रेष्ठता
से वर्णन कीजिये १ यह सुनकर भगवान् बोले कि हेनारद तेरे पूछेहुए अक्षय फलवाले व्रतको मैंने
तुझसे अच्छे प्रकारसे कहा अब उसरहस्यकोभी कहताहूं जिसको पुराणके जाननेवाले वर्णन करते
हैं २हेनारद रोहिणी चन्द्र शयनव्रत महाउत्तम है उसव्रतमें नारायणकी मूर्त्तिको चन्द्रमाके नामोंकर
के पूजनकरे ३ जब कभी सोमवारके दिन शुक्लपक्षकी पूर्णिमाहोय अथवा पूर्णिमाको रोहिणी नक्षत्र
होय ४तबविद्वान् पंचगव्य और सिरसोंसे स्नानकरे पीछे (आप्यायस्व) इस मंत्रका एकसौ आठ
संख्याजप करे५ औरशूद्रभी परमभक्तिसे पाखंडआदिसे वर्जितहोकर वरदायकसोमको और विष्णुको

नादागत्यमधुसूदनम् । पूजयेत्फलपुष्पैश्च सोमनामानिकीर्तयन् ७ सोमायशान्तायनमोऽस्तु पादावनन्तधाम्नेतिचजानुजंघे । ऊरुद्वयंचापिजलोदराय सम्पूजयेन्मेढ्रमनन्तवाहवे ८ नमोनमःकामसुखप्रदाय कटिःशशांकस्यसदार्चनीया । तथोदरंचाप्यमृतोदराय नाभिःशशांकायनमोऽभिपूज्या ९ नमोऽस्तुचन्द्रायमुखंचपूज्यं दन्ताद्विजानामधिपायपूज्याः । हास्यंनमश्चन्द्रमसेऽभिपूज्य मोष्ठौकुमुद्वन्तवनप्रियाय १० नासाचनाथायवनौषधीना मानन्दभूतायपुनर्भ्रुवौच । नेत्रद्वयंपद्मनिभन्तथेन्दो रिन्दीवरश्यामकरायशौरेः ११ नमःसमस्ताध्वरवन्दिताय कर्णद्वयंदैत्यनिषूदनाय । ललाटमिन्दोरुदधिप्रियाय केशाःसुषुम्नाधिपतेःप्रपूज्याः १२ शिरःशशांकायनमोमुरारे र्विश्वेश्वरायेतिनमःकिरीटिने। पद्मप्रियेरोहिणिनामलक्ष्मीः सौभाग्यसौख्यामृतचारुकाये १३ देवींचसम्पूज्यसुगन्धपुष्पै नैवेद्यपुष्पादिभिरिन्दुपत्नीम् । सुप्त्वाथभूमौपुनरुत्थितेन स्नात्वाचविप्रायहविष्ययुक्तः १४ देयःप्रभातेसहिरण्यवारि कुम्भोनमःपापविनाशनाय । सम्प्राश्यगोमूत्रममांसमन्न मक्षारमष्टावथविंशतिंच । ग्रासान्पयःसर्पियुतानुपोष्य भुक्तेतिहासंश्रृणुयान्मुहूर्त्तम् १५ कदम्बनीलोत्पलकेतकानि जातीसरोजंशतपत्रिका च । अम्लानकुब्जान्यथसिन्दुवारं पुष्पम्पुनर्नारद ! मल्लिकायाः । शुभ्रंचविष्णोःकरवीरपुष्पं श्रीचम्पकंचन्द्रमसःप्रदेयम् १६ श्रावणादिषुमासेषु क्रमादेतानिसर्वदा । यस्मिन्मासेव्रतादिःस्यात्तत्पुष्पैरर्चयेद्धरिम् १७ एवंसंवत्सरंयावदुपास्यविधिवन्नरः । व्रतान्तेशयनन्दद्यात् दर्पणोपस्क

नमस्कारकरे ६ भगवत्के मन्दिरमें जपकरके फिर फलपुष्पादिकोंसे नारायणकापूजनकरे और चन्द्रमाके नामोंका कीर्त्तनकरे ७ भगवत्की मूर्त्तिमें चन्द्रमाका पूजन और नमस्कारकर चरणोंमें शान्तरूप सोमको नमस्कारकरे और पूजनकरे घोंटू और पिंडियोंमें अनन्तधामाका पूजनकरे जंघाओंमें जलोदरका लिंगमें अनन्तबाहुका पूजनकरे ८ कटिमेंकाम सुखप्रदका पेटमें अमृतोदरका नाभिमें शशांकका ९ मुखमें चन्द्रमाका--दांतोंमें द्विजाधिपका हास्य में चन्द्रमाका होठोंमें कुमुदवन प्रियका पूजनकरे १० नासिकामें वनौषधि नाथका--भृकुटियोंमें आनन्दभूतका--कमलरूपी दोनों नेत्रोंमें इन्दीवरके समान श्यामकरका पूजनकरे ११ दोनोंकानोंमें सर्वअध्वरवन्दित और दैत्यनिपूदनका और ललाटमें इन्दुका और सुपुम्नाधिपतिका पूजनकरके केशोंमें उदधिप्रियका पूजनकरे १२ शिरमें शशांकका और भगवत्के मुकुटमें विश्वेश्वरका पूजनकरे और रोहिणी का इसरीतिसे पूजनकरे कि पद्मप्रिये हेरोहिणी नामलक्ष्मी--हे सौभाग्यसौख्यामृतचारुकाये १३ ऐसाकहकर सुगन्धितपुष्प और नैवेद्यादिकों करके देवीरोहिणी का पूजनकरके रात्रिको पृथ्वीमें शयनकर प्रातःकाल उठकर प्रातःकालहीं पापनाशके निमित्त सुवर्ण और हविष्यान्नयुक्त ब्राह्मणके अर्थ जलकेकुम्भ का दानकरे फिर गोमूत्र पीकर मांस लवण रहित अट्ठाईस ग्रास घृतयुक्त भोजनकरके दो मुहूर्त्ततक इतिहास श्रवणकरे १४।१५ फिर कदंब--नीलाकमल--केतकी--जुही—कमल--सेवती--कुब्जवृक्ष--संभालू--चमेली—सफ़ेद कनेर और चंपा इनसबप्रकारके पुष्पोंसे विष्णुका और चन्द्रमाका पूजनकरे १६ श्रावणके महीनेसे आदि लेकर सम्पूर्ण कालमें जैसे पुष्पहोंय उनसे हरिका पूजनकरे १७ इसप्रकार मनुष्य संवत्सरप-

शान्वितम् १८ रोहिणीचन्द्रमिथुनं कारयित्वाथकांचनम्। चन्द्रःषडंगुलःकार्यो रोहिणी
चतुरंगुला १९ मुक्ताफलाष्टकयुतं सितनेत्रपटावृतम्। क्षीरकुम्भोपरिपुनः कांस्यपात्रा
क्षतान्वितम्। दद्यान्मन्त्रेणपूर्वाह्णे शालीक्षुफलसंयुतम् २० श्वेतामथसुवर्णास्यां खुरै
रौप्यैःसमन्वितताम्। सवस्त्रभाजनान्धेनुं तथाशंखंचशोभनम् २१ भूषणैर्द्विजदाम्पत्य
मलंकृत्यगुणान्वितम्। चन्द्रोऽयंद्विजरूपेण सभार्य्यइतिकल्पयेत् २२ यथानरोहिणी
कृष्ण शय्यांसन्त्यज्यगच्छति। सोमरूपस्यतेतद्वन् ममाभेदोऽस्तुभूतिभिः २३ यथा
त्वमेवसर्वेषां परमानन्दमुक्तिदः। भुक्तिर्मुक्तिस्तथाभक्ति स्त्वयिचन्द्रास्तुमेसदा २४ इति
संसारभीतस्य मुक्तिकामस्यचानघ !। रूपारोग्यायुषामेत द्विधायकमनुत्तमम् २५
इदमेवपितृणांच सर्वदा वल्लभंमुने !। त्रैलोक्याधिपतिर्भूत्वा सप्तकल्पशतत्रयम्। च
न्द्रलोकमवाप्नोति विद्युद्भूत्वातुमुच्यते २६ नारीवारोहिणीचन्द्र शयनंयासमाचरेत्।
साऽपितत्फलमाप्नोति पुनरावृत्तिदुर्लभम् २७ इति पठति शृणोतिवायइत्थं मधुमथना
र्चनमिन्दुकीर्तनेननित्यम्। मतिमपिचददाति सोऽपिशौरेर्भवनगतःपरिपूज्यतेऽमरौ
घैः २८॥ इतिश्रीमत्स्यपुराणे सप्तपञ्चाशत्तमोऽध्यायः ५७॥

(सूत उवाच) जलाशयगतं विष्णुमुवाच रविनन्दनः। तडागारामकूपानां वापीषु
नलिनीषुच १ विधिंपृच्छामिदेवेश ! देवतायतनेषुच। केतत्रचर्त्विजोनाथ ! वेदीवा

र्यंत विधिपूर्व्वक पूजनकरके व्रतकेअन्तमें दर्पण और सबसामग्री सहित शय्यादान देवे १८ फिररो-
हिणी और चन्द्रमाकी सुवर्णमयी मूर्त्तिबनावे इनमेंचन्द्रकी छः अंगुलकी रोहिणीकी चारअंगुलकीबना
कर १९ आठमोती सफ़ेदवस्त्र--दूधकाकलश--कांसीकापात्र-अक्षत और गुड इनसबकादान पूर्व्वाह्ण
कालमें ब्राह्मणकोदेवे २० तिसपीछे सफ़ेदगौ--सोनेकेसींग और चांदीकेखुर वस्त्र--पात्रोंसमेत दान
करे और शंखकाभी दानकरे २१ स्त्रीसमेत ब्राह्मणको वस्त्रादिकों से शोभित करके यह कल्पनाकरे
कि यह रोहिणी युक्त चन्द्रमाहै २२ ऐसाअनुभव करके यह प्रार्थनाकरे कि हेकृष्णचन्द्र तेरी रूपेकी
उत्तम शय्याको जैसे रोहिणी नहीं त्यागती है वैसीही मेरीविभूति से युक्त मेरीशय्यारहै २३ और हे
चन्द्रजैसे कि तुमसबको परमानन्द और मुक्तिके देनेवालेहो इसीप्रकार मेरीभीभुक्ति और मुक्तिहोय
और सबकालमें तुझहीमें मेरीभक्तिरहै २४ हेपापरहितचन्द्र मुक्तिकी वांछाकरनेवाला इससंसारमें
भयभीत जो मैं हूं मुझको उत्तमरूप और आरोग्यदो २५ ईश्वर कहते हैं कि हे नारद यहव्रत
सर्व काममें पितरोंको अतिप्रिय है इसव्रतका करनेवाला इक्कीस कल्पतक त्रैलोक्यका अधिपति
होकर चन्द्रलोकको प्राप्तहोताहै फिर उसकी मुक्ति होजाती है २६ अथवा जो स्त्रीभी इसव्रतको करे
तो वहभी इसीफलको प्राप्तहोतीहै और फिर उसकाजन्मनहींहोता २७ इस भगवत्के पूजनको जो
चन्द्रमा समेत पढ़ता वा सुनताहै उसको ईश्वर शुद्धबुद्धि देताहै और वैकुंठमें जाकर देवताओं से
पूजित होताहै २८॥ इति श्रीमत्स्यपुराणभाषाटीकायांसप्तपञ्चाशत्तमोऽध्यायः ५७॥

सूतजीबोले हे ऋषियो जलाशयमें प्राप्तहुए मत्स्यभगवान् से मनुजी कहनेलगे कि हे भगवन्
सरोवर-बाग़-कूप-तड़ाग १ और देवताका मन्दिर इनको बनाकर इनकी प्रतिष्ठाके निमित्त कैसः।

कीदृशीभवेत् २ दक्षिणावलयःकालः स्थानमाचार्य्यएवच। द्रव्याणिकानिशस्तानि सर्वमाचक्ष्वतत्त्वतः ३ (मत्स्य उवाच) शृणुराजन्महाबाहो ! तडागादिषुयोविधिः। पुराणेष्वितिहासोयं पठ्यतेवेदवादिभिः ४ प्राप्यपक्षंशुभंशुक्लमतीतेचोत्तरायणे । पुण्येऽह्निविप्रकथितेकृत्वाब्राह्मणवाचनम् ५ प्रागुदक्प्रवणेदेशेतड़ागस्यसमीपतः।चतुर्हस्तांशुभांवेदीं चतुरस्रांचतुर्मुखाम् ६ तथाषोडशहस्तःस्यान्मण्डपश्चचतुर्मुखः। वेद्याश्चपरितोगर्तारत्निमात्रास्तिमेखलाः ७ नवसप्ताथवापञ्च नातिरिक्तान्नृपात्मज ! । वितस्तिमात्रायोनिः स्यात्षट्सप्तांगुलिविस्तृता ८ गर्ताश्चतस्रःशस्ताः स्युस्त्रिपर्वोच्छ्रितमेखलाः। सर्वतस्तुसवर्णाःस्युःपताकाध्वजसंयुताः ९ अश्वत्थोदुम्बरप्लक्षवटशाखाकृतानितु। मण्डपस्यप्रतिदिशं द्वाराण्येतानिकारयेत् १० शुभास्तत्राष्टहोतारो द्वारपालास्तथाष्टवै। अष्टौतुजापकाःकार्य्याः ब्राह्मणावेदपारगाः ११ सर्व्वलक्षणसम्पूर्णो मन्त्रविद्विजितेन्द्रियः। कुलशीलसमायुक्तः पुरोधाःस्याद्द्विजोत्तमः १२ प्रतिगर्तेषुकलशायज्ञोपकरणानिच। व्यजनञ्चामरेशुभ्रे ताम्रपात्रेसुविस्तृते १३ ततस्त्वनेकवर्णाःस्युश्चरवः प्रतिदैवतम्। आचार्य्यःप्रक्षिपेद्भूमा वनुमन्त्र्यविचक्षणः १४ त्र्यरत्निमात्रोयूपःस्यात् क्षीरवृक्षविनिर्म्मितः। यजमानप्रमाणोवा संस्थाप्योभूतिमिच्छता १५ हेमालङ्कारिणः कार्य्याः पञ्चविंशतिऋत्विजः । कुण्डलानिचहैमानि केयूरकटकानिच १६ तथांगुलयःपवित्राणि वासांसिविविधानिच। पूजयेत्तुसमंसर्वान् आचार्य्योद्विगुणंपुनः। दद्या

ऋत्विज और किसप्रकारकी वेदीका बनाना इत्यादि विधिका आपवर्णन कीजिये २ वहां दक्षिणावलय–काल–स्थान–आचार्य्य और द्रव्यादिक कौन२ सी श्रेष्ठ हैं यहसब आप विचार पूर्व्वककहिये ३ यह सुनकर मत्स्य भगवान्बोले हे लम्बी भुजावालेराजा मनुतुमसुनो पुराणों में वेदके कहनेवालोंने यह इतिहास कहाहै ४ कि जब उत्तरायण व्यतीतहोजाय तब शुक्लपक्ष में ब्राह्मण से शुभदिन पूछकर उसमें स्वस्ति वाचन करावे ५ फिर तडागादिकके पास पूर्व औरउत्तरके मध्यमें चारहाथकी चौखूंटी चारमुखवाली सुन्दर वेदीबनावे ६ और सोलह हाथका चारमुखवाला मंडपबनावे और वेदीके चारोंओर उसी गर्त्तके प्रमाण मेखलाबनावे ७ वह मेखला संख्यामें नव–सांत--अथवा पांचबनावे और एकबिलस्तलंबी चौदहअंगुल चौड़ीयोनिबनावे ८ और चारगर्त्तबनावे और चारोंओर से पताका ध्वजाओं से युक्तकरे ९ मंडपकी चारों दिशाओं में पीपल--गूलर--पिलखन औ बड़--इन वृक्षोंकी डालियों का द्वार बनावे १० फिर वेदज्ञ आठ ब्राह्मणोंको होता बनावे आठद्वारपाल और आठही ज़ापक ब्राह्मण बनावे ११ और सर्वगुणसम्पन्न मन्त्रज्ञ जितेन्द्रिय कुलशीलयुक्त ऐसे उत्तम ब्राह्मणको पुरोहित बनावे १२ चारोंगर्त्तों में कलश और यज्ञके उपकरण स्थापनकरे फिर बड़े ताम्रपात्रमें सफ़ेदपंखा और चमर स्थापनकरे १३ पश्चात् अनेकप्रकार का चरु पृथक् २ देवताओं का बुद्धिमान् आचार्य्य मंत्रपढ़कर पृथ्वीमें फेंके १४ और तीनअरत्नी अर्थात् मूठीबनाकर कनिष्ठिका सहित तीनहाथलम्बा थूहरके वृक्षका यूपबनावे अथवा यजमानके प्रमाण बनवानाभी शुभहै १५ फिर सुवर्णके आभूषणवाले पचीस ऋत्विक् बनावे और सुवर्णके कुण्डल बाजूबन्द कड़ूले १६ अंगूठी

च्छयनसंयुक्त मात्मनश्चापियत्प्रियम् १७ सौवर्णकूर्म्ममकरौ राजतौमत्स्यदुन्दुभौ ।
ताम्रौकुलीरमण्डूका वायसःशिशुमारकः । एवमासाद्यतत्सर्व्व मादावेवविशाम्पते ! १८
शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः । सर्वौषध्युदकैस्तत्र स्नापितोवेदपारगैः १९
यजमानःसपत्नीकः पुत्रपौत्रसमन्वितः । पश्चिमंद्वारमासाद्य प्रविशेद्यागमण्डपम् २०
ततोमंगलशब्देन भेरीणांनिस्वनेनच । अञ्जसामण्डलंकुर्य्यात् पञ्चवर्णेनतत्त्ववित् २१
षोडशारन्ततश्चक्रं पद्मगर्भंचतुर्मुखम् । चतुरस्रञ्चपरितो वृत्तंमध्येसुशोभनम् २२ वे
द्याश्चोपरितत्कृत्वा ग्रहान्लोकपतींस्ततः । सन्यसेन्मन्त्रतःसर्वान् प्रतिदिक्षुविचक्षणः
२३ कूर्मादिस्थापयेन्मध्ये वारुण्यांमन्त्रमाश्रितः । ब्रह्माणंचशिवंविष्णुं तत्रैवस्थापयेद्बु
धः२४ विनायकंचविन्यस्य कमलामम्बिकांतथा । शान्त्यर्थंसर्वलोकानां भूतग्रामंन्यसेत्त
तः २५ पुष्पभक्ष्यफलैर्युक्त मेवंकृत्वाधिवासनम् । कुम्भान्सजलगर्भांस्तान् वासोभिः
परिवेष्टयेत् २६ पुष्पगन्धैरलंकृत्य द्वारपालान्समन्ततः । पठध्वमितितान्ब्रूया दाचार्य
स्त्वभिपूजयेत् २७ बह्वृचौपूर्वतःस्थाप्यौ दक्षिणेनयजुर्विदौ । सामगौपश्चिमेतद्वदुत्तरे
णत्वथर्वणौ २८ उदङ्मुखोदक्षिणतो यजमानउपाविशेत् । यजध्वमितितान्ब्रूयाद् हौ
त्रिकान्पुनरेवतु २९ उत्कृष्टान्मन्त्रजापेन तिष्ठध्वमितिजापकान् । एवमादिश्यतान्सर्वा
न् पर्युक्ष्याग्निंसमन्त्रवित् ३० जुहुयाद्वारुणैर्मन्त्रै राज्यंचसमिधस्तथा । ऋत्विग्भि

और अनेकप्रकारके वस्त्र इनसब वस्तुओं से सम्पूर्ण ऋत्विजोंका पूजनकरे आचार्य्यको द्विगुण आ-
भूषणों से पूजनकरे इसकेपीछे जो अपने को प्रिय वस्तुहैं उनवस्तुओंकादान शय्यासमेतकरे १७ हे
राजा सुवर्णके कछुए मकर चांदीकीमछली तांबेकेकुलीर मेढकबनावे और लोहेका शिशुमार मत्स्य
इनसबको आदिमें बनाकर १८ दुन्दुभी बनावे फिर श्वेतमाला वस्त्र और श्वेतचन्दन धारण करके
वेदज्ञोंकेद्वारा सर्वौषधि के जलसे स्नानकरायाहुआ १९ यजमान अपनी स्त्री समेत पुत्र पौत्रादि से
युक्तहो के पश्चिम के द्वारमें होकर यज्ञमंडप में प्रवेशकरे २० फिर तत्त्वज्ञ पंडित मंगल रूपभेरी
आदिक शब्दों को करके पांच वर्णोंका सुन्दर मंडप बनवावे २१ सोलह आरोंका चक्रबनावे उसके
बीच में चारमुखका सुन्दरगोल कमल बनावे २२ तबवेदी के ऊपर ग्रहलोकपालादि कों को
दिशाओं में मंत्रोंकरके पंडित स्थापनकरे २३ फिर उनकछुए आदिजलजीवों को मध्यमें वरुणके
मंत्रोंसे स्थापन करके ब्रह्मा शिव और विष्णु इनतीनों को पंडित स्थापनकरे २४ फिर गणेशजी
का स्थापन करके लक्ष्मी और अम्बिका को स्थापितकर सम्पूर्ण लोकोंकी शांतिके अर्थ भूत
समूहों को स्थापन करे २५ फिर पुष्प और भक्ष्यफल आदिसे सुगन्धितकर जलके भरे कलशों
को वस्त्रों से लपेटै २६ फिर गन्ध पुष्पादिसे द्वारपालोंको भूषित करके आचार्य्य उनसे यह कहैकि
आपवेद पढ़ो २७ पूर्वमेंतो बह्वृचोंको स्थापन करे दक्षिणमें यजुर्विदोंको पश्चिममें सामगोंको और
उत्तरमें अथर्वणियों को २८ स्थापन करे और दक्षिणकी ओर उत्तरको मुख करके यजमान बैठे
फिर यजमान होत्रिकोंसे यह वचन कहे कि महाराज आययजन कीजिये २९ और खड़ेहु एजापक
लोगोंसे यहकहै कि आप वैठ जाओ इसप्रकार इनसवोंको आज्ञा करके मन्त्रका जानने वाला

श्चाथहोतव्यं वारुणैरेवसर्वतः ३१ ग्रहेभ्योविधिवद्धुत्वा तथेन्द्रायेश्वरायच । मरुद्
भ्योलोकपालेभ्यो विधिवद्विश्वकर्मणे३२रात्रिसूक्तंचरौद्रञ्च पावमानंसुमंगलम् । जपेयुः
पौरुषंसूक्तं पूर्वतोबह्वृचाःपृथक् ३३ शाक्रंरौद्रञ्चसौम्यंच कूष्माण्डंजातवेदसम् । सौर
सूक्तंजपेन्मन्त्रं दक्षिणेनयजुर्विदः ३४ वैराज्यंपौरुषंसूक्तं सौवर्णंरुद्रसंहिताम् । शैशवं
पञ्चनिधनं गायत्रंज्येष्ठसामच ३५ वामदेव्यंबृहत्साम रौरवंसरथन्तरम् । गवांव्रतंचका
ण्वञ्च रक्षोघ्नंवयसस्तथा । गायेयुःसामगाराजन्! पश्चिमंद्वारमाश्रिताः ३६ अथर्वण
श्चोत्तरतः शान्तिकंपौष्टिकंतथा । जपेयुर्मनसादेव माश्रित्यवरुणंप्रभुम् ३७ पूर्वेद्युरभि
तोरात्रा वेवंकृत्वाधिवासनम् ।गजाश्वरथ्यावल्मीकात् सङ्गमाद्ध्रदगोकुलात् । मृदमादाय
कुम्भेषु प्रक्षिपेच्चत्वरात्तथा३८रोचनांचससिद्धार्थां गन्धंगुग्गुलमेवच।स्नपनंतस्यकर्तव्यं
पंचभंगसमन्वितम्३९प्रत्येकन्तुमहामन्त्रै रेवंकृत्वाविधानतः । एवंक्षपातिबाह्याथ विधि
युक्तेनकर्मणा४०ततःप्रभातेविमले संजातेऽथशतंगवाम् । ब्राह्मणेभ्यःप्रदातव्य मष्टषष्टि
श्चवापुनः । पञ्चाशद्वाथषट्त्रिंशत् पञ्चविंशतिरप्यथ ४१ ततःसांवत्सरप्रोक्ते शुभे
लग्नेसुशोभने । वेदशब्दैश्चगान्धर्वैर्वाद्यैश्चविविधैःपुनः ४२ कनकालंकृतांकृत्वा जले
गामवतारयेत् । सामगायचसादेया ब्राह्मणायविशाम्पते ! ४३ पात्रीमादायसौवर्णीं
पञ्चरत्नसमन्विताम् । ततोनिक्षिप्यमकरमत्स्यादींश्चैवसर्वशः । धृतांचतुर्विधैर्विप्रैर्वेदवे

अग्निका पर्युक्षणकरे ३० और वरुणके मन्त्रोंकरके घृत और समिध होमे और चारों ओरसे वरुण
केभी मन्त्रोंकरके ऋत्विजोंसे होमकरावे ३१ फिर विधिपूर्व्वक ग्रहोंके अर्थ हवनकरके इन्द्र और ईश्वर
के अर्थ हवनकरे फिर मरुत् लोकपाल औरविश्वकर्मा इनतीनोंका विधि पूर्व्वक हवनकरे ३२ पीछे
रात्रिसूक्त-रुद्र-पवमान सुमंगल-पौरुषसूक्त और पूर्व दिशामें बह्वृच इनसबका पृथक् २ जप करे ३३
और दक्षिण में यजुर्वेद वाले इन्द्र–रुद्र–सोम–कूष्माण्ड–अग्नि और सूर्य्य–इनसबका सूक्त और
मन्त्रपढ़े ३४ पश्चिम द्वारमें स्थित सामग जाननेवाले वैराज्य– पौरुष सौवर्ण–रुद्रसंहिता–शैशव
पंचनिधन गायत्र सूक्त–ज्येष्ठसाम ३५ वामदेव्य–वृहत्साम–रौरव–रथंतर–गवोंकाव्रत–काण्व–
रक्षोघ्न और वयस–इनसबकोगावें ३६ पश्चात् अथर्वके जाननेवाले उत्तरमें मनसेप्रभु वरुण देवके
आश्रयहोके शान्तिक और पौष्टिकोंको जपैं३७प्रथम दिन ऐसेकर्मकरके रात्रिको अधिवासन (गन्ध
माल्य और धूप आदिसे जो संस्कार वस्त्र ताम्बूल आदिका सुगन्धिके बढ़ानेके लिये किया जाता
उसे अधिवासन कहते हैं) करे फिर गजशाला–अश्वशाला–बाँबी–गली–कुंड–गोशाला और
चौराहा इनसब स्थानोंसे मृत्तिका लेकर कलशोंमें गेरे ३८ फिर गोरोचन–सरसों–गन्ध–गूगल–
और पंचभंग इनसब औषधियोंसे यजमानका स्नानकरावे ३९ महा मन्त्रोंसे सविधिकर्म करकेएक
एक कलशके प्रति ऐसी विधि करके ४० जब प्रातःकालहो तबगौओंकादान ब्राह्मणोंको करे अर्थात्
अड़सठ गौओंका दानकरे फिर पचासगौओंका–फिर पच्चीसका इसरीति से गौओंका दानकरे ४१
पीछे एक वर्षमें शुभ दिन लग्नादि मुहूर्त्तमें वेदकेशब्दोंसे और गान्धर्व अनेक प्रकारके बाजोंसे ४२
एकगौ सुवर्णसे भूषित करके हे राजा सामवेदके जानने वाले ब्राह्मणको दानकरे ४३ इसके अन-

दांगपारगैः ४४ महानदीजलोपेतां दध्यक्षतसमन्विताम् । उत्तराभिमुखींधेनुं जलमध्ये तुकारयेत् ४५ आथर्वणेनसंस्नातां पुनर्मामेत्यथेतिच । आपोहिष्टेतिमन्त्रेण क्षिप्त्वागत्यचमण्डलम् ४६ पूजयित्वासरस्तत्र बलिंदद्यात्समन्ततः । पुनर्दिनानिहोतव्यं चत्वारिमुनिसत्तमाः ! ४७ चतुर्थीकर्मकर्तव्यं देयातत्रापिशक्तितः । दक्षिणाराजशार्दूल ! वरुणक्ष्मापनंततः ४८ कृत्वातुयज्ञपात्राणि यज्ञोपकरणानिच । ऋत्विग्भ्यस्तुसमंदत्त्वा मण्डपंविभजेत्पुनः । हेमपात्रीञ्चशय्याञ्च स्थापकायनिवेदयेत् ४९ ततःसहस्रंविप्राणामथवाष्टशतंतथा । भोजनीयंयथाशक्ति पञ्चाशद्वाथविंशतिः । एवमेषुपुराणेषुतड़ागविधिरुच्यते ५० कूपवापीषुसर्वासु तथापुष्करिणीषुच । एषएवविधिर्दृष्टःप्रतिष्ठासुतथैवच ५१ मन्त्रतस्तुविशेषःस्यात् प्रसादोद्यानभूमिषु । अयन्त्वशक्तावर्द्धेन विधिर्दृष्टःस्वयम्भुवा । अल्पेष्वकाग्निवत्कृत्वा वित्तशाठ्याद्दतेनृणाम् ५२ प्रावृट्कालेस्थितेतोये ह्यग्निष्टोमफलंस्मृतम् ! शरत्कालेस्थितंयत्स्यात्तदुक्तफलदायकम् । वाजपेयातिरात्राभ्यां हेमन्तेशिशिरेस्थितम् ५३ अश्वमेधसमंप्राह वसन्तसमयेस्थितम् । ग्रीष्मेऽपितत्स्थितन्तोयं राजसूयाद्विशिष्यते५४एतान्महाराज ! विशेषधर्मान्करोतियोऽप्यागमशुद्धबुद्धिः। सयातिरुद्रालयमाशुपूतःकल्पाननेकान्दिविमोदतेच ५५ अनेकलोकान्समहत्तमादीन्भुक्तापरार्द्धद्वयमंगनाभिः । सहैवविष्णोःपरमम्पदंयत्प्राप्नोतितद्यागफलेनभूयः ५६ ॥

इति श्रीमत्स्यपुराणेअष्टपञ्चाशत्तमोऽध्यायः ५८॥

न्तर सुवर्णकेपात्रको लेकर उसमें पांच प्रकारके पांच रत्न गेरकर दानकरे और मकर मत्स्यादिकोंको तड़ागमें छोड़े फिर चारों वेदके ज्ञाता ब्राह्मणोंसे पकड़ी हुई गौका गंगा जलसे और दधि अक्षतोंसे पूजन करके उसको उत्तरकी ओर करते हुए जलमें पैरावे ४४।४५ फिर अथर्व वेदके मन्त्रों करके गौका स्नान करावे और'आपोहिष्टेत्यादि, मन्त्रों करके मंडलकामार्जन करे ४६ फिर उस सरोवर का पूजन करके उसके चारोओर बलिदेवे—सूतजी कहते हैं कि हे ऋषियो फिर चार दिनतक हवन करे ४७ इसके पीछे चतुर्थी कर्मकरे और उसमें अपनी सामर्थ्यसे दक्षिणादेवे और वरुणकी प्रार्थना करे ४८ फिर यज्ञके पात्र और यज्ञकी सामग्री और मण्डप ऋत्विजों को बराबर बाँटकर देदे और सुवर्णके पात्रोंवाली शय्या स्थापकको देदे ४९ फिर हज़ार--आठसौ--पचास--अथवा बीसही ब्राह्मणोंको अपनी शक्ति के अनुसार जिमावै यह पुराणों में तड़ाग विधि वर्णनकी है ५० और कूपनदी आदिककीभी प्रतिष्ठामें यही विधि कहीहै ५१ और बाग भूमिमें तड़ागकी विधिसे मंत्रोंकरके विशेष है यह विधि ब्रह्माकी देखी है थोड़े काममें अग्निमें हवनकरावे मनुष्योंको धनकी शठता वर्जितहै ५२ वर्षा कालमें सरोवरकी प्रतिष्ठामें अग्निष्टोम यज्ञकाफल होताहै-हेमन्त शिशिर में बाजपेय और अतियज्ञोंका फलहोताहै ५३ बसन्तऋतुमें अश्वमेध यज्ञका फल होताहै—ग्रीष्ममें राजसूय यज्ञका फल कहाहै ५४ भगवान् कहते हैं कि हेराजा शुद्धि बुद्धिवाला मनुष्य जो इनसब कर्मोंको करता है वह पवित्र होकर रुद्रलोकमें जाताहै और अनेक कल्पोंतक स्वर्गमें आनन्दकरता

(ऋषय ऊचुः) पादपानांविधिंसूत ! यथावद्विस्तराद्वद । विधिनाकेनकर्तव्यं पाद
पोद्यापनम्बुधैः । येचलोकाःस्मृतास्तेषान्तानिदानींवदस्वनः १ (सूत उवाच) पाद
पानांविधिंवक्ष्ये तथैवोद्यानभूमिषु । तडागविधिवत्सर्वं मासाद्यजगदीश्वर ! २ ऋत्वि
ङ्मण्डपसम्भार श्चाचार्यश्चैवतद्विधः । पूजयेद्ब्राह्मणांस्तद्व द्धेमवस्त्रानुलेपनैः ३ सर्वौ
षध्युदकैःसिक्तान् पिष्टातकविभूषितान् । वृक्षान्माल्यैरलंकृत्य वासोभिरभिवेष्टयेत् ४
सूच्यासौवर्णयाकार्यं सर्वेषांकर्णबेधनम् । अंजनंचापिदातव्यं तद्वद्धेमशलाकया ५ फला
निसप्तचाष्टौवा कालधौतानिकारयेत् । प्रत्येकंसर्ववृक्षाणां वेद्यान्तान्यधिवासयेत् ६ धूपो
ऽत्रगुग्गुलःश्रेष्ठः ताम्रपात्रैरधिष्ठितान् । सर्वान्धान्यस्थितान्कृत्वा वस्त्रगन्धानुलेपनैः ७
कुम्भान्सर्वेषुवृक्षेषु स्थापयित्वानरेश्वर!।सहिरण्यानशेषांस्तान् कृत्वाबलिनिवेदनम् ८
यथास्वंलोकपालानामिन्द्रादीनांविशेषतः ।वनस्पतेश्चविद्वद्भिर्होमः कार्योद्विजातिभिः ९
ततःशुक्लाम्बरधरां सौवर्णकृतभूषणाम् । सकांस्यदोहांसौवर्णश्रृंगाभ्यामतिशालिनीम् ।
पयस्विनींवृक्षमध्यादुत्सृजेत्गामुदङ्मुखीम् १० ततोऽभिषेकमन्त्रेण वाद्यमंगलगीत
कैः । ऋग्यजुःसाममन्त्रैश्च वारुणैरभितस्तथा । तैरेवकुम्भैःस्नपनं कुर्याद्ब्राह्मणपुंग
वः ११ स्नातःशुक्लाम्बरस्तद्वद्यजमानोऽभिपूजयेत् । गोभिर्विभवतःसर्वान् ऋत्विजस्ता
न्समाहितः १२ हेमसूत्रैःसकटकै रंगुलीयपवित्रकैः । वासोभिःशयनीयैश्च तथोपस्कर

है ५५ पीछे वह मनुष्य अंगनाओं समेत दो परार्द्ध महत्तमादि लोकोंको भोगकर उस यज्ञके फलसे
फिर विष्णुके परमपदको प्राप्त होता है ५६ ॥

इति श्रीमत्स्यपुराणभाषाटीकायामष्टपंचाशत्तमोऽध्यायः ५८ ॥

ऋषिबोले कि हेसूतजी वृक्षोंकी विधि यथावत् विस्तार पूर्वक कहो पंडितोंको किस विधिसेवृक्षों
का उद्यापन करनायोग्यहै और उद्यापन करनेवाले कौनसे लोकोंकोजातेहैं यहआप बर्णनकीजिये १
सूतजीबोले हे ऋषियो बाग भूमियोंमें वृक्षोंकीभी विधिकहताहूं इनवृक्षोंकी विधिमें तड़ागकीविधि
के समान सबविधि करके वृक्षारोपणकरे २ ऋत्विज–मंडप और आचार्य्य यह सब वैसेही बनावे और
सुवर्ण वस्त्र चन्दनादि करके ब्राह्मणोंका पूजनकरे ३ पीछे सर्वौषधिके जलसे सींचे और मालाओंसे
वृक्षोंको भूषितकरके वस्त्रोंसे लपेटे ४ फिर सुवर्णकी सूईबनाकर संपूर्ण वृक्षोंका कर्णबेधनकरे और
उसी प्रकार सुवर्ण शलाकासे नेत्रोंमें अंजनलगावै ५ संपूर्ण वृक्षोंके ऋतुके पकेहुए फल सात वा
आठ धारण करावे ६ इस स्थानमें धूप गूगलकी उत्तम होती है तांबेके पात्रोंमें संपूर्ण कलशोंको स्थापनकरके उन्हींके समीप संपूर्ण धान्य स्थापनकरे फिर वस्त्र गन्धादिसे पूजनकरे ७ फिर सुवर्णादिसे
युक्त उन कलशोंको वृक्षोंमें स्थापनकरे और वलि निवेदनकरे इसकेपीछे विधिपूर्वक इन्द्रादि लोकपालोंका और वनस्पतियों का हवनकरना योग्यहै ८।९ फिर श्वेत वस्त्र उढ़ाकर स्वर्णसे भूषितकर
कांस्य पात्र युक्त सुवर्ण श्रृंगी दूधवाली गौ उत्तरको मुखकरके वृक्षोंके नीचे छोड़े १० फिर मंगली
गीत वाद्ययुक्त अभिषेक के मंत्रोंकरके ऋक्यजु और सामकेमन्त्रों से और वरुणके मंत्रोंसे उनकलशोंके जलोंसे वृक्षोंका स्नानकरावे ११ फिर यजमान स्नानकर श्वेतवस्त्र पहर सावधान होकर सब

पादुकैः । क्षीरेणभोजनंदद्याद्यावद्दिनचतुष्टयम् १३ होमश्चसर्षपैःकार्य्यो यवैःकृष्ण
तिलैस्तथा । पलाशसमिधःशस्ताश्चतुर्थेऽह्नितथोत्सवः । दक्षिणाचपुनस्तद्वद्देयातत्रा
पिशक्तितः १४ यद्यदिष्टतमंकिञ्चित् तत्तद्दद्यादमत्सरी । आचार्य्येद्विगुणंदद्यात्प्रणिप
त्यविसर्जयेत् १५ अनेनविधिनायस्तु कुर्य्याद्वृक्षोत्सवंबुधः । सर्व्वान्कामानवाप्नोति
फलञ्चानन्त्यमश्नुते १६ यश्चैकमपिराजेन्द्र ! वृक्षंसंस्थापयेन्नरः । सोऽपिस्वर्ग्गेवसे
द्राजन् ! यावदिन्द्रायुतत्रयम् १७ भूतान्भव्यांश्चमनुजांस्तारयेद्द्रुमसम्मितान्। परमां
सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् १८ यइदंशृणुयान्नित्यं श्रावयेद्वापिमानवः । सोऽपि
सम्पूजितो देवैर्ब्रह्मलोकेमहीयते १९ ॥

इति श्रीमत्स्यपुराणे एकोनषष्टितमोऽध्यायः ५९ ॥

(मत्स्य उवाच) तथैवान्यत्प्रवक्ष्यामि सर्व्वकामफलप्रदम् । सौभाग्यशयनंनाम
यत्पुराणविदोविदुः १ पुरादग्धेषुलोकेषु भूर्भुवःस्वर्महादिषु । सौभाग्यंसर्वभूतानामेक
स्थमभवत्तदा। वैकुण्ठंस्वर्ग्गमासाद्य विष्णोर्वक्षस्थलास्थितम् २ ततःकालेनमहता पुनः
सर्गविधौनृप ! । अहङ्कारावृतेलोके प्रधानपुरुषान्विते ३ स्पर्धायाञ्चप्रवृत्तायां कमला
सनकृष्णयोः । लिङ्गाकारासमुद्भूता वह्नेर्ज्वालातिभीषणा । तयाभितप्तस्यहरेर्वक्षसस्त

ऋत्विज लोगोंका गौओं के दान और द्रव्यों के दानों से पूजन करे १२ और सुवर्ण के यज्ञोपवीत
कंकण अंगूठी वस्त्र शय्या और अन्य सामग्री और खड़ाउओं से पूजन करे और चारदिन तक दूधका
भोजन करावे १३ सरसों जौ कालेतिल और ढाककी श्रेष्ठसमिध इन सबसे हवन करावे फिरचौथे
दिन उत्सव करके शक्तिके अनुसार दक्षिणा देवे १४ और जो बस्तु अपने को प्रिय होय उसीका दान
सरल चित्तसे करे और आचार्य्यको द्विगुण दानदे नमस्कार कर विसर्जन करे १५ जो बुद्धिमान
इस विधिसे वृक्षका उत्सव करताहै वह संपूर्ण कामनाओं समेत बड़े उत्तम फलोंको पाताहै १६ हे
राजा जो विधिसे एकवृक्षभी लगाताहै वह तीसहजार इन्द्रोंके समयतक स्वर्ग में बसताहै १७ और
जितने वृक्ष लगावे उतनेही व्यतीत और आगे होने वाले पितरोंको उद्धार करताहै और परमसिद्धि
को भी प्राप्त होताहै उसका जन्म भी फिर इस पृथ्वी पर नहीं होता १८ जो मनुष्य इस बिधिको
सुनताहै वा दूसरे को सुनाताहै वहभी देवताओंसे पूजित होकर ब्रह्मलोकमें आनन्द करताहै १९ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायामेकोनषष्टितमोऽध्यायः ५९ ॥

मत्स्यजी बोले–कि अब सब कामनाओं के देने वाले उस सौभाग्य शयन नाम व्रतको कहते हैं
जिसको पुराणके जाननेवाले जानतेहैं १ प्रथम भूः भुवः स्वर् और मह इत्यादिक लोक जब भस्म
होगये तब सब प्राणियोंका सौभाग्य एक स्थानमें स्थित होकर बैकुण्ठमें भगवान्के हृदयमें जाकर
विराजमान होजाताभया २ हे राजा फिर बहुत कालपीछे अन्य सर्गकी रचनाकी विधिमें प्रधान पुरुष
अर्थात् मायासहित ब्रह्म सब जगत् समेत अहंकारयुक्त होगया ३ तब ब्रह्मा और विष्णुकी परस्पर
ईर्षा होतीभई उससमय लिंगके आकार वाली अति भयानक अग्निकी ज्वाला उठतीभई फिर

द्विनिःसृतम् ४ वक्षस्थलंसमाश्रित्य विष्णोःसौभाग्यमास्थितम्। रसरूपन्ततोयावत्
प्राप्नोत्तिवसुधातलम् ५ उत्क्षिप्तमन्तरिक्षेतद् ब्रह्मपुत्रेणधीमता। दक्षेणपीतमात्रन्तद्रूप
लावण्यकारकम् ६ बलंतेजोमहज्जातं दक्षस्यपरमेष्ठिनः। शेषंयदपतद् भूमावष्टधासम
जायत ७ ततोजनानांसञ्जाता अष्टसौभाग्यदायकाः। इक्षवोरसराजाश्च निष्पावा
जाजिधान्यकम् ८ विकारवच्चगोक्षीरं कुसुम्भंकुंकुमन्तथा। लवणंचाष्टमन्तद्वत् सौभा
ग्याष्टकमुच्यते ९ पीतंयद् ब्रह्मपुत्रेण योगज्ञानविदापुनः। दुहितासाभवत्तस्य यासती
त्यभिधीयते १० लोकानतीत्यलालित्यात् ललितातेनचोच्यते। त्रैलोक्यसुन्दरीमेना
मुपयेमेपिनाकधृक् ११ यादेवीसौभाग्यमयी भुक्तिमुक्तिफलप्रदा। तामाराध्यपुमान्भ
क्त्या नारीवाकिन्नविन्दाति १२ (मनुरुवाच) कथमाराधनंतस्या जगद्धात्र्याजनार्द
न! तद्विधानंजगन्नाथ! तत्सर्व्वञ्चवदस्वमे १३ (मत्स्यउवाच) वसन्तमासमासाद्य
तृतीयायांजनप्रिय!। शुक्लपक्षस्यपूर्वाह्णे तिलैःस्नानंसमाचरेत् १४ तस्मिन्नहनिसादे
वी किलविश्वात्मनासती। पाणिग्रहणकैर्मन्त्रैरवसद्वरवर्णिनी १५ तयासहैवदेवेशंतृती-
यायामथार्चयेत्। फलैर्नानाविधैर्धूपैर्दीपनैवेद्यसंयुतैः १६ प्रतिमांपञ्चगव्येन तथाग
न्धोदकेनतु। स्नापयित्वार्चयेद्गौरीमिन्दुशेखरसंयुताम् १७ नमोऽस्तुपाटलायैतु पादौ

उस ज्वाला से तप्त हुई विष्णुकी छाती से वह हृदयमें घुसाहुआ सौभाग्य ऊष्मा पाकर बाहर नि-
कला ४ और विष्णुकी छातीसे निकलकर वह सौभाग्य जब तक पृथ्वीतलमें आकर रसरूप होकर
प्राप्त हुआ तबतकही ब्रह्मा के पुत्र बुद्धिमान् दक्षने उस तेजको आकाश में फेंक दिया और फेंकने
के पीछे उस रूपकी सुन्दरता करने वाले तेजको आपही पान करलिया तब दक्ष सौभाग्य
पानकर्त्ता होगया ५। ६ उस समय दक्षके बड़ाबल और तेज होजाताभया फिर बाकीका तेज जो
पृथ्वीमें गिरता भया उसके आठ विभाग होतेभये ७ इसके पीछे ईखका गांडा १ शुद्ध जीरा २ धनियां
३ गौका दूध ४ दही ५ कुसुंभ ६ केशर ७ और आठवां नमक यह आठों वस्तु मनुष्योंको सौभाग्य-
दायक कहाती हैं ८। ९ जो प्रथमही योगके जाननेवाले दक्षने यह तेजरूपी रस पियाथा इसीहेतु
से सती नाम पार्वती उसकी पुत्री होतीभई १० वह सबलोगोंको सुन्दरपने से उल्लंघन करनेवाली
हुई इसीकारणसे उसको ललिता कहते हैं फिर इस त्रैलोक्य सुन्दरीको शिवजीने विवाहा वह सती
रूपा पार्वती भुक्ति मुक्तिकी देनेवाली सौभाग्यमयी देवी कहाती है उसको जो पुरुष वा स्त्री भक्तिसे
पूजन करते हैं वे सब फलोंको प्राप्त होतेहैं ११।१२ मनुने पूछा कि हे जनार्दन जगन्नाथ उस जगद्धात्री
का पूजन और आराधन कैसे करना चाहिये इसको कृपा करके कहिये १३ मत्स्यजी बोले—कि हे
मनुष्योंके प्रिय मनुजी बसन्त ऋतुके चैत्रमासमें शुक्लपक्षकी तृतीयाको मध्याह्नसे पूर्व तिलोंसे
स्नानकरे क्योंकि उस दिन वह देवी वैवाहिक मंत्रों करके शिवजीके साथ बास करतीहुई और सदैव
पास रहती है १४। १५ सो इस तृतीयाको पार्वती समेत शिवजीको जो अनेक प्रकारके फल फूल
धूप और नैवेद्यादिकसे पूजन करताहै १६ और मूर्त्तिको पंचगव्यसे अथवा सुगन्धित जलोंसे स्नान

देव्याःशिवस्यतु । शिवायेतिचसंकीर्त्य जयायैगुल्फयोर्द्वयोः १८ त्रिगुणायेतिरुद्राय भ
वान्यैजंघयोर्युगम् । शिवांरुद्रेश्वरायैच विजयायेतिजानुनी। संकीर्त्यहरिकेशाय तथोरू
वरदेनमः १९ ईशायैचकटिन्देव्याः शंकरायेतिशंकरम् । कुक्षिद्वयञ्चकोटव्यै शूलिनेशू
लपाणये २० मङ्गलायैनमस्तुभ्यमुदरञ्चाभिपूजयेत् । सर्वात्मनेनमोरुद्रमीशान्यैच
कुचद्वयम् २१ शिवंवेदात्मनेतद्वद्रुद्राण्यैकण्ठमर्चयेत् । त्रिपुरघ्नायविश्वेशमनन्तायै
करद्वयम् २२ त्रिलोचनायचहरं बाहुकालानलप्रिये । सौभाग्यभवनायेति भूषणानिस
दार्चयेत् । स्वाहास्वधायैचमुखमीश्वरायेतिशूलिनम् २३ अशोकमधुवासिन्यै पूज्यावो
ष्ठौचभूतिदौ । स्थाणवेतुहरन्तद्वद्धास्यञ्चन्द्रमुखप्रिये २४ नमोऽर्द्धनारीशहरम सितांगी
तिनासिकाम् । नमउग्रायलोकेशं ललितेतिपुनर्भ्रुवौ २५ शर्वायपुरहन्तारं वासव्यैतुत
थालकान् । नमःश्रीकण्ठनाथायै शिवकेशांस्ततोऽर्चयेत् । भीमोग्रसमरूपिण्यै शिरः
सर्व्वात्मनेनमः २६ शिवमभ्यर्च्यविधिवत्सौभाग्याष्टकमग्रतः । स्थापयेद्दाधानिष्पावकु

कराके गौरी और शंकरको इसप्रकारसे पूजे १७ कि पाटलायै नमः इस मंत्रसे पार्वती और शिव
जीके चरणोंका पूजन करे शिवायनमः जयायैनमः इन दोनों मंत्रोंसे दोनोंकी पिंडलियों के नीचे
एड़ीके ऊपरके स्थानको पूजे त्रिगुणात्मक रुद्र और भवानी को नमस्कार ऐसे कह दोनों की पिंडलियोंको
पूजे–शिवाको और रुद्रेश्वर विजयको नमस्कार यह कहकर दोनोंके घुटनोंको पूजे–हरिकेशशिवको
और वरदा देवीको नमस्कार करके जंघाओंको पूजे १८ । १९ ईशायैनमः ऐसे देवीकी
कटिको और शंकरको नमस्कार ऐसे कह शिवजीकी कटिको पूजे–कोटवी को नमस्कार शूलपाणि
शिवको नमस्कारहै ऐसे कह दोनोंकी संयुक्त कोखियोंको पूजे २० मंगला तुमको नमस्कार ऐसेउदरको
पूजे–सर्वात्मा शिवको नमस्कार ऐसे कह शिवजीके उदरको पूजे–ईशानीको नमस्कार ऐसे
कह पार्वतीके स्तनोंको पूजे २१ वेदात्मने नमः यह कहकर शिवके कण्ठको–रुद्राण्यै नमः इसमंत्र
से पार्वतीके कण्ठको पूजे–त्रिपुरघ्नाय नमः अनन्तायै नमः यह कह दोनोंके हाथोंको पूजे २२ त्रिलोचनाय
नमः कालानल प्रियायै नमः इस मंत्रसे शिव और पार्वतीकी भुजाओंको और सौभाग्यभवनाय
नमः यह कहके भूषणोंको पूजे–स्वाहायै स्वधायै नमः ईश्वराय नमः इन मंत्रोंसे इनके
मुखोंको पूजे २३ अशोक मधुवासिन्यै नमः इस मंत्रसे ऐश्वर्य्योंके देनेवाले पार्वतीके ओष्ठोंको पूजे–
और स्थाणुको नमस्कार यह कहके शिवके हास्यको पूजे २४ अर्द्धनारीके ईश्वर हर श्वेतवर्णवाली
पार्वती ऐसे शिव पार्वतीको नमस्कार यह कहकर नासिकाको पूजे उग्र शिवको और ललिता देवी
को नमस्कार यह कहके देवीकी भृकुटियोंको पूजे २५ शर्वनाम और पुर हंता शिवको नमस्कार कर
शिवजीकी भृकुटियोंको पूजे वासवीको नमस्कार यह कहकर पार्वती जीकी अलकोंको पूजे और श्री
कण्ठनाथा पार्वतीको प्रणामकर शिवके बालोंका पूजनकरे–भीमोग्रसमरूपिणी को अथवा सर्वात्मा
शिवको नमस्कार कर शिरके स्थानमें पूजन करे २६ इस विधिसे शिवजीका पूजनकर फिर उनके
आगे सौभाग्य अष्टक दही १ पछोड़ाहुआ शुद्ध कुसुंभ २ दूध ३ जीरा ४ ईखकागांड़ा ५ घृत ६ लवण
७ धनियां ८ इन आठ वस्तुओंको स्थापितकरे यह आठों सौभाग्यदायी हैं इसी हेतुसे यह सबमिली

सुम्भक्षीरजीरकान् २७ रसराजाज्यलवणं कुस्तुम्बरुमथाष्टकम् । दत्तंसौभाग्यमित्यस्मा
त्सौभाग्याष्टकमित्यतः २८ एवंनिवेद्यतत्सर्वमग्रतःशिवयोःपुनः । रात्रौश्रृंगोदकंप्राश्य
तद्वद् भूमावरिन्दम ! २९ पुनःप्रभातेतुतथा कृतस्नानजपःशुचिः । सम्पूज्यद्विजदाम्प
त्यं वस्त्रमाल्यविभूषणैः ३० सौभाग्याष्टकसंयुक्तं सुवर्णचरणद्वयम् । प्रीयतामत्रललिता
ब्राह्मणायनिवेदयेत् ३१ एवंसंवत्सरंयावत्तृतीयायांसदामनो ! । कर्त्तव्यंविधिवद्भ
क्त्या सर्वसौभाग्यमीप्सुभिः ३२ प्राशनेदानमन्त्रेच विशेषोऽयन्निबोधमे । श्रृंगोदकञ्चै
त्रमासे वैशाखेगोमयम्पुनः ३३ ज्येष्ठेमन्दारकुसुमं विल्वपत्रंशुचौस्मृतम् । श्रावणेदधि
सम्प्राश्यं नभस्येचकुशोदकम् ३४ क्षीरमाश्वयुजेमासि कात्तिकेपृषदाज्यकम् । मार्गेमा
सेतुगोमूत्रं पौषेसम्प्राशयेद् घृतम् ३५ माघेकृष्णतिलंतद्वत्पञ्चगव्यञ्चफाल्गुने । ल
लिताविजयाभद्रा भवानीकुमुदाशिवा ३६ वासुदेवीतथागौरी मंगलाकमलासती । उमा
चदानकालेतु प्रीयतामितिकीर्त्तयेत् ३७ मल्लिकाशोककमलं कदम्बोत्पलमालती: ।
कुब्जकंकरवीरञ्च वाणमम्लानकुंकुमम् ३८ सिन्दुवारञ्चसर्वेषु मासेषुक्रमशःस्मृतम् ।
जपाकुसुम्भकुसुमम्मालतीशतपत्रिका ३९ यथालाभंप्रशस्तानि करवीरञ्चसर्वदा ।
एवंसंवत्सरंयावदुपोष्यविधिवन्नरः ४० स्त्रीभक्तावाकुमारीवा शिवमभ्यर्च्यभक्तितः ।

हुई सौभाग्याष्टक नामसे विख्यातहैं २७ । २८ शिवजी और पार्वतीजीके अर्थ इन सब वस्तुओंको
निवेदन करके रात्रिमें गौओंके सींगोंको धो उस जलको पिये और पृथ्वीमें शयन करे २९ फिर प्रातः
काल स्नानसे शुद्ध होकर जपकरे और वस्त्र माला और आभूषणादिकों से ब्राह्मण ब्राह्मणीके युग्म
को पूजे ३० इस सौभाग्य अष्टकके साथ सुवर्णके दो चरण बनवाकर ब्राह्मणको देदे और यह वचन
कहे इस पूजन दानादिकसे ललिता देवी प्रसन्नहो ३१ इसीप्रकार वर्ष दिनतक हर तृतीयाको प्रसन्नमन
से भक्तिपूर्व्वक सौभाग्यकी इच्छावालोंको पूजन करना चाहिये ३२ प्राशन करनेमें और दानमंत्र
में यह विशेषहै उसको भी सुनो—चैत्रमें गौके सींगका जल—बैशाखमें गोबर ३३ ज्येष्ठमें कल्पवृक्ष
का पुष्प—आषाढ़में बेलपत्र—श्रावणमें दही—भाद्रपदमें कुशाका जल ३४ आश्विनमें दूध—कार्त्तिक
में घृतकी बूंद—मार्गशीर्ष में गोमूत्र—पौषमें घृतका प्राशन अर्थात् किंचित् भोजन करे ३५ माघमें
काले तिलोंका भोजन करे—फाल्गुनमें पंचगव्यका भोजन करे—और ललिता—विजया—भद्रा—भवा-
नी—कुमुदा—शिवा ३६ वासुदेवी—गौरी—मंगला—कमला—सती—और उमा यह सब प्रसन्न होयँ
ऐसादान कालमें कीर्त्तन करे अर्थात् चैत्र आदि महीनोंमें क्रमपूर्व्वक एक एकका लेकर दानकरे ३७
मल्लिका—अशोक—कमल—कदंब—कुमोदिनी—मालती—कुब्जकवृक्ष—कनेर—शेवती-इनके पुष्प-केशर
संभालूके·पुष्प--इनको सब महीनोंमें क्रमसे चढ़ावे अथवा जुही--कुसुंभ--मालती--और कमल इन
के पुष्पोंको चढ़ावे ३८ । ३९ अथवा इनमेंसे जितने मिलजायँ उतनेही चढ़ावने योग्यहैं--और क-
नेरके पुष्प सदैव चढ़ावे इस विधिसे वर्ष दिनतक सब तृतीयाओंका व्रतकरे ४० भक्ति करनेवाली
स्त्री अथवा कुमारी कन्या भक्तिपूर्व्वक शिवका पूजनकर व्रतके अन्तमें सबवस्तुओंसे युक्तहुई शय्या

व्रतान्तेशयनंदद्यात्सर्वोपस्करसंयुतम् ४१ उमामहेश्वरंहैमं वृषभञ्चगवासह । स्थापयित्वाथशयने ब्राह्मणायनिवेदयेत् ४२ अन्यान्यपियथाशक्त्या मिथुनान्यम्बरादिभिः । धान्यालङ्कारगोदानैरभ्यर्चैद्धनसञ्चयैः । वित्तशाठ्येनरहितःपूजयेद्गतविस्मयः ४३ एवं करोतियःसम्यक्सौभाग्यशयनव्रतम् । सर्वान्कामानवाप्नोति पदमत्यन्तमश्नुते । फलस्यैकस्यत्यागेन व्रतमेतत्समाचरेत् ४४ यइच्छन्कीर्त्तिमाप्नोति प्रतिमासन्नराधिपः । सौभाग्यारोगरूपायुर्वस्त्रालंकारभूषणैः । नवियुक्तोभवेद्राजन् ! नवार्बुदशतत्रयम् ४५ यस्तु द्वादशवर्षाणि सौभाग्यशयनव्रतम् । करोतिसप्तचाष्टौवा श्रीकण्ठभवनेऽमरैः । पूज्यमानोवसेत्सम्यक्यावत्कल्पायुतत्रयम् ४६ नारीवाकुरुतेवापि कुमारीवानरेश्वर ! । सापितत्फलमाप्नोति देव्यनुग्रहलालिता ४७ शृणुयादपियश्चैव प्रदद्यादथवामतिम् । सोऽपिविद्याधरोभूत्वा स्वर्गलोकेचिरंवसेत् ४८ इदमिहमदनेनपूर्वमिष्टं शतधनुषाकृतवीर्यसूनुनाच । कृतमथवरुणेननन्दिनावा किमुजननाथततोयदुद्भवःस्यात् ४९ ॥

इति श्रीमत्स्यपुराणे षष्टितमोऽध्यायः ६० ॥

(नारद उवाच) भूलोकोऽथभुवर्लोकःस्वर्लोकोऽथमहर्जनः । तपःसत्यञ्चसप्तैतेदेवलोकाःप्रकीर्तिताः १ पर्यायेणतुसर्वेषामाधिपत्यंकथंभवेत् । इहलोकेशुभंरूपमायुःसौभाग्यमे

का दान करे ४१ सुवर्ण के महादेव पार्व्वती और गौ सहित बैलकी मूर्त्ति बनवाके शय्यापर स्थापितकर ब्राह्मणको दानकरे ४२ और शक्तिके अनुसार अन्य ब्राह्मण ब्राह्मणियोंके जोड़ोंकोभी वस्त्र धान्य अलंकार--गोदान इत्यादिकोंके धन समुदायसे पूजनकरे द्रव्यका संकोच न करे आश्चर्य्य से रहित होकर पूजनकरे ४३ इस विधिसे जो अच्छेप्रकार करके इस सौभाग्य शयन व्रतको करता है उसके सम्पूर्ण मनोरथ सिद्ध होते हैं और परम पदको प्राप्त होताहै इस व्रतको फलमात्रकी इच्छा विना करना योग्यहै ४४ जो मनुष्य इच्छासे प्रतिमास इस व्रतको करताहै उसके सौभाग्य आरोग्य रूप आयु वस्त्र अलंकार और आभूषण यह सब पदार्थ नौ अरब तीन सौ ९००००००३०० वर्षोंतक बने रहते हैं और जो इस व्रतको बारह वर्षतक नियमसेकरताहै अथवासात७ वा आठ८वर्षतक करताहै वह शिवलोकमें देवताओंसे पूजित होकर तीन कल्पोंतक वास करताहै ४५ । ४६ नारी अथवा कुमारी कन्या जो इस व्रतको करती हैं वहभी देवीके प्रभावसे इसी फलको प्राप्त होजाती हैं ४७ जो इस व्रतको सुनताहै वा इसके सुननेकी मति देताहै वह विद्याधर होके बहुत कालतक स्वर्ग में वासकरताहै ४८ इस व्रतको प्रथम कामदेवने किया फिर कृत वीर्य्यके पुत्र सहस्राबाहुने किया वरुणने और नन्दिकेश्वरने किया इस हेतुसे इस लोकमें यह व्रत उत्तम कहाहै ४९ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांषष्टितमोऽध्यायः ६० ॥

नारदजी बोले कि हे शिवजी भू १ भुव २ स्वर्लोक ३ महः ४ जन ५ तप ६ और सत्य ७ यह सात आपने देवलोक कहे हैं १ इन लोकों के बदले जब दूसरे नामसे लोक बदलते हैं तब इनके अधिपति कैसे होते हैं और लोकोंके शुभ फल रूप आयु सौभाग्य और अत्यन्त लक्ष्मी इन सब की

वच । लक्ष्मीश्चविपुलानाथ ! कथंस्यात्पुरसूदन ! २ (शिवउवाच) पुराहुताशनःसा
र्द्धं मारुतेनमहीतले । आदिष्टःपुरुहूतेन विनाशायसुरद्विषाम् ३ निर्दग्धेषुततस्तेन दा
नवेषुसहस्रशः । तारकःकमलाक्षश्च कालदंष्ट्रःपरावसुः । विरोचनश्चसंग्रामादपला
यंस्तपोधन ! ४ अम्भःसामुद्रमाविश्य सन्निवेशमकुर्वत । अशक्याइतितेऽप्यग्निमारु
ताभ्यामुपेक्षिताः ५ ततःप्रभृतितेदेवान् मनुष्यान्सहजंगमान् । सम्पीड्यचमुनीन्सर्वा
न्प्रविशन्तिपुनर्जलम् ६ एवंवर्षसहस्राणि वीराःपञ्चचसप्तच । जलदुर्गबलाद्ब्रह्मन् !
पीडयन्तिजगत्त्रयम् ७ ततःपरमथोवह्निमारुतावमराधिपः । आदिदेशाचिरादम्बुनि
धिरेषविशोष्यताम् ८ यस्माद्स्मद्द्विषामेष शरणंवरुणालयः । तस्माद्भवद्भ्यामद्यैव
क्षयमेषप्रणीयताम् ९ तावूचतुस्ततःशक्रमुभौशम्बरसूदनम् । अधर्म्मएषदेवेन्द्र ! सा
गरस्यविनाशनम् १० यस्माज्जीवनिकायस्य महतःसंक्षयोभवेत् । तस्मान्नपापमद्यावा
ङ्करवावःपुरन्दर ! ११ अस्ययोजनमात्रेऽपि जीवकोटिशतानिच । निवसन्तिसुरश्रेष्ठ !
सकथन्नाशमर्हति १२ एवमुक्तःसुरेंद्रस्तु कोपात्संरक्तलोचनः । उवाचेदंवचोरोषान्निर्दह
न्निवपावकम् १३ नधर्म्माधर्म्मसंयोगम्प्राप्नुवन्त्यमराःक्वचित् । भवतस्तुविशेषेण माहा
त्म्यंचाधितिष्ठति १४ यदाज्ञालंघनंयस्मान्मारुतेनसमन्त्वया । मुनिव्रतमहिंसादि परि
गृह्यत्वयाकृतम् । धर्मार्थशास्त्ररहितं शत्रुम्प्रतिविभावसो ! १५ तस्मादेकेनवपुषा मुनि

प्राप्ति कैसे होती है २ शिवजीने कहा–कि प्रथम पृथ्वीतलमें वायु सहित अग्नि अत्यन्त प्रचंड होती
भई वायुने दैत्योंके नाशकरने के अर्थ अग्निको प्रेराथा ३ उस अग्निने हज़ारों दैत्य दानव भस्म
करडाले उस समय तारकासुर–कमलाक्ष–कालदंष्ट्र–परावसु और विरोचन यह दैत्य देवताओं के
युद्धसे भाजतेभये ४ समुद्रके जलमें प्रवेशकरके छुपजातेभये वहाँ उनको अग्निभी भस्मकरने को
समर्थ न रहा ५ इसकेपीछे वह दैत्य देव मनुष्यादिकोंसमेत मुनि और सब जंगम जीव इनसबलोगों
को पीड़ादेकर फिर समुद्रमें प्रवेश करजानेलगे ६ इसीप्रकार हज़ारवर्षतक वह दैत्य शूरवीर वनेरहे
और पांचसातहज़ारवर्षतक जलके आश्रयहोकर त्रिलोकीको बाधाकरतेभये ७ पीछे अग्नि और वायुको
इंद्रने आज्ञादी कि तुमदोनों मिलकर इससमुद्रकेजलको सुखादो ८ क्योंकि यहसमुद्र हमारेशत्रुओं
की रक्षाकरताहै इसहेतुसे अभी इसकानाशकरदेनाचाहिये ९ इसके इसवचनको सुनकर अग्नि और
वायु दोनों इन्द्रसे बोले कि हे देव समुद्रका नाशकरना महा अधर्म्म है १० क्योंकि इसमें अनेक
जीव हैं उनके स्थानोंका नाशहोताहै हे इन्द्र इस कारणसे हम इस समुद्रकानाश नहीं करसक्के ११
इसके एक एक योजन में लाखों जीव रहतेहैं इसका नष्ट करना हमको योग्य नहीं है १२ यह सु-
नतेहीं इन्द्र ऐसा क्रोधित हुआ मानोंअग्नि और वायु इन दोनोंको भस्म करदेगा और रक्तनेत्र कर
क्रोधसे यह वचन बोला १३ कि देवताओं के विशेष करके धर्माधर्म का संयोग नहीं कहाहै और
तुम्हारा माहात्म्य तो और भी अधिक सुनाजाता है हे अग्नि वायु तुम दोनों ने जो मेरी आज्ञाभंग
करी है और अहिंसा आदि मुनियों का व्रत धारण करलिया है शत्रुके प्रति तुमने धर्म अर्थ रहित

रूपेणमानुषे। मारुतेनसमंलोके तवजन्मभविष्यति १६ यदाचमानुषत्वेऽपि त्वयाग
स्त्येनशोषितः। भविष्यत्युदधिर्वह्ने! तदादेवत्वमाप्स्यसि १७ इतीन्द्रशापात्पतितौ त
त्क्षणात्तौमहीतले। अवाप्तावेकदेहेन कुम्भाज्जन्मतपोधन! १८ मित्रावरुणयोर्व्वीर्या
द्वसिष्ठस्यानुजोऽभवत्। अगस्त्यइत्युग्रतपाः सम्बभूवपुनर्मुनिः १९ (नारद उवाच)
सम्भूतःसकथंभ्राता वसिष्ठस्याभवन्मुनिः। कथञ्चमित्रावरुणौ पितरावस्यतौस्मृतौ।
जन्मकुम्भादगस्त्यस्य कथंस्यात्पुरसूदन! २० (ईश्वर उवाच) पुरापुराणपुरुषः कदा
चिद्गन्धमादने। भूत्वाधर्मसुतोविष्णुश्चचारविपुलन्तपः २१ तपसातस्यभीतेन वि
घ्नार्थंप्रेषितावुभौ। शक्रेणमाधवानंगावप्सरोगणसंयुतौ २२ तदातद्गीतवाद्येन नांगरा
गादिनांहरिः। नकाममाधवाभ्यांच विषयान्प्रतिचुक्षुभे २३ तदाकाममधुस्त्रीणां विषाद
मगमद्गणः। संक्षोभायततस्तेषां स्वोरुदेशान्नराग्रजः। नारीमुत्पादयामास त्रैलोक्य
जनमोहिनीम् २४ संक्षुब्धास्तुतयादेवास्तौतुदेववरावुभौ। अप्सरोभिःसमक्षंहि देवाना
मब्रवीद्धरिः २५ अप्सराइतिसामान्या देवानामब्रवीद्धरिः। उर्वशीतिचनाम्नेयं लोके
ख्यातिंगमिष्यति २६ ततःकामयमानेन मित्रेणाहूयसोर्वशी। उक्तामांरमयस्वेति बाढ़
मित्यब्रवीत्तुसा २७ गच्छन्तीचाम्बरन्तद्वत्स्तोकामिन्दीवरेक्षणा। वरुणेनधृतापश्चात्व

शास्त्रका मत धारण किया है इस कारण तुम एक रूपसे मुनिरूप मनुष्य योनि होकर दोनों मृत्यु
लोकमें उत्पन्नहोगे १४। १६ फिर मनुष्य शरीर में भी तुम अगस्त्य मुनि होकर समुद्रको शोषण
करोगे इसके पीछे फिर अपनी देवयोनि को प्राप्तहोगे १७ ऐसे इन्द्र के शाप होने से उसी क्षण वह
दोनों पृथ्वी पर गिरते भये और हे तपोधन नारद यहां आकर वह दोनों एकही शरीर से वह कुंभ
अर्थात् घड़ेसे उत्पन्न होते भये यह मित्रावरुणी के वीर्य्य से उत्पन्न हुये और वसिष्ठजीके छोटे भाई
हुए और बड़े उग्रतपस्वी अगस्त्य नाम मुनि विख्यात हुए १८। १९ नारद मुनि ने पूछा कि हे
शिवजी यह अगस्त्य जी वसिष्ठ जी के भ्राता कैसे हुए और उनके पिता मित्रावरुणी कैसे हुए और
इनका जन्म कलशसे कैसे हुआ २० शिवजीने कहा कि प्रथम किसीसमय गन्धमादनपर्वतपै पुराण
पुरुष विष्णुभगवान् धर्मके पुत्रहोकर दुश्चर तपकरतेभये २१ तबउनके तपके भयसे इन्द्रने वसन्तऋतु
समेत कामदेवको अप्सरा गणोंसे युक्त करके उन विष्णुजी के पास उनकी तपस्या भंग करनेकेलिये
भेजा २२ तब इन सबके गीत रागादिकोंसे हरि नारायण विषय भोगादिकोंसे चलायमान नहीं हुए
२३ उस समय वसन्त ऋतु कामदेव और अप्सरादिकोंके चरित्रोंसे जब विष्णु भगवान् रागसे मो-
हित नहीं हुए तब यह सब भयसे कंपायमान हुए उस समय नारायणजीने अपनी जंघासे त्रिलोकी
को मोहनेवाली एक उत्तम स्त्री उत्पन्नकी २४ उसको देखकर सब देवता चलायमानहोगये उस स-
मय वह नर नारायण देव सब देवताओंसे यह वचन बोले २५ कि हे देवताओ यह उर्व्वशी नाम
अप्सरा है यह भी हमने तुम्हारी अप्सराओं में विख्यात होनेवाली उत्पन्नकी है तब उस उर्वशी की
इच्छाकरनेवाला मित्र देवता उसको बुलाकर कहनेलगा कि तू मेरे संग रमणकर उस समय उर्वशी

रुणन्नाभ्यमन्दत २८ मित्रेणाहंवृतापूर्वमद्यभार्यानतेविभो ! । उवाचवरुणश्चित्तंमयिसन्न्यस्यगम्यताम् २९ गतायांवाढमित्युक्त्वा मित्रःशापमदात्तदा । तस्यैमानुषलोकेत्वं गच्छसोमसुतात्मजम् ३० भजस्वेतियतोवेश्या धर्म्मएषत्वयाकृतः । जलकुम्भेततोवीर्यं मित्रेणवरुणेनच । प्रक्षिप्तमथसञ्जातौ द्वावेवमुनिसत्तमौ ३१ निमिर्नामसहस्त्रीभिः पुराद्यूतमदीव्यत । तत्रान्तरेभ्याजगाम वसिष्ठोब्रह्मसम्भवः ३२ तस्यपूजामकुर्वन्तं शशापसमुनिर्नृपम् । विदेहस्त्वंभवस्वेति ततस्तेनाप्यसौमुनिः ३३ अन्योन्यशापाच्चतयोर्विगतेइवचेतसी । जग्मतुःशापमानाय ब्रह्माणञ्जगतःपतिम् ३४ अथब्रह्मणआदेशाल्लोचनेष्ववसन्निमिः । निमेषाःस्युश्चलोकानांतद्विश्रामायनारद ! ३५ वसिष्ठोऽप्यभवत्तस्मिन् जलकुम्भेचपूर्ववत् । ततःश्वेतश्चतुर्बाहुः साक्षसूत्रकमण्डलुः । अगस्त्यइति शान्तात्मा बभूवऋषिसत्तमः ३६ मलयस्यैकदेशेतु वैखानसविधानतः । सभार्यःसंवृतो विप्रैस्तपश्चक्रेसुदुश्चरम् ३७ ततःकालेनमहता तारकादतिपीडितम् । जगद्वीक्ष्यस कोपेन पीतवान्वरुणालयम् ३८ ततोऽस्यवरदाःसर्वे बभूवुःशंकरादयः । ब्रह्माविष्णुश्च

ने भी उनके वचनको अंगीकारकरलिया २६ । २७ फिर कमलके समान प्रफुल्लित नेत्रोंवाली उर्वशी आकाशमें जातीभई और वरुणने उसको ग्रहणकरलिया तब उर्वशी बोली कि तुमने यह अच्छा नहीं किया २८ क्योंकि मुझको प्रथम मित्रने ग्रहणकरलियाथा अब मैं तुम्हारी भार्य्या नहीं होसक्ती वरुणने कहा कि तू मुझमें चित्तलगाकर फिर दूसरी जगह जइयो २९ तब वह वरुणमें चित्त लगाकर चलीगई तब मित्रने उसको शाप देदिया कि तू मनुष्य लोकमें जा वहाँ बुधके पुत्रको ग्रहणकर क्योंकि तैंने यह वेश्याका धर्म आचरण करलियाहै ऐसा कहकर मित्रने और वरुण दोनोंने अपना वीर्य्य जलके घटमें स्थापित करदिया उसमें दो उत्तम मुनि उत्पन्नहुए ३०।३१ उनका वर्णन सुनो—कि एक समय राजा निमि अपनी स्त्रियोंके साथ क्रीडा कररहाथा वहाँ ब्रह्माजीके पुत्र वसिष्ठजी आगये उस समय राजा निमिने उनका पूजन नहीं किया इस हेतुसे वसिष्ठजीने क्रोध करके राजाको शापदेदिया तू विदेह अर्थात् देहरहित होजा तब राजा निमिने भी कहा कि आप भी देहरहित होजाओ ३२ । ३३ इस प्रकार वह दोनों परस्परमें शापोंको ग्रहण करके शरीर चित्तसे रहित होकर जगत्के पति ब्रह्माजीके पास जातेभये ३४ फिर ब्रह्माजीकी आज्ञा पाके निमितो मनुष्यों के नेत्रों में प्रवेश करगया हे नारद उसके हितके लिये लोकों के नेत्रोंका खोलना मूंदना होगया और वसिष्ठ मुनि प्रथम के समान उस जलके कलशमें प्रवेशकरके उत्पन्न होतेभये एक तो यह मुनि हुए इनके पीछे श्वेतरूप चारभुजा अक्षमाला यज्ञोपवीत और कमंडलु इन सबको धारण किये हुए अगस्त्य नाम शान्तात्मा उत्तम ऋषि उत्पन्नहुए ३५–३६ फिर यह अगस्त्य ऋषि मलयाचल पर्व्वत पर एकान्त स्थानमें जाकर स्त्री सहित अनेक ऋषियोंसे व्याप्तहोकर दारुण तपस्या करनेलगे ३७ जब बहुत काल व्यतीतहोगया तब किसी समय तारकासुरसे पीड़ितहुए सब जगत्को देखकर यह ऋषि क्रोध करके सब समुद्रको पान करतेभये ३८ उस समय ब्रह्मा विष्णु और शिवजी इसको वर

भगवान् वरदानायजग्मतुः । वरंवृणीष्वभद्रन्ते यदभीष्टञ्चवैमुने ! ३९ (अगस्त्य उ
वाच) यावद्ब्रह्मसहस्राणां पञ्चविंशतिकोटयः । वैमानिकोभविष्यामि दक्षिणाचलव
र्त्मनि ४० मद्विमानोदयेकुर्याद्यःकश्चित्पूजनम्मम । ससप्तलोकाधिपतिःपर्यायेणभविष्य
ति ४१ (ईश्वर उवाच) एवमस्त्वितितेऽप्युक्ता जग्मुर्देवायथागतम् । तस्मादर्घःप्रदा
तव्यो ह्यगस्त्यस्यसदाबुधैः ४२ (नारद उवाच) कथमर्घप्रदानन्तु कर्तव्यन्तस्यवैवि
भो !। विधानंयदगस्त्यस्य पूजनेतद्वदस्वमे ४३ (ईश्वर उवाच) प्रत्यूषसमयेविद्वान्कु
र्यादस्योदयेनिशि । स्नानंशुक्लतिलैस्तद्वच्छुक्लमाल्याम्बरोगृही ४४ स्थापयेदव्रणंकुम्भं
माल्यवस्त्रविभूषितम् । पञ्चरत्नसमायुक्तं घृतपात्रसमन्वितम् ४५ अंगुष्ठमात्रम्पुरुषन्त
थैवसौवर्णमेवायतबाहुदण्डम् ।चतुर्मुखंकुम्भमुखेनिधायधान्यानिसप्ताम्बरसंयुतानि४६
सकांस्यपात्राक्षतशुक्तियुक्तम्मन्त्रेणदद्याद्द्विजपुंगवाय । उत्क्षिप्यलम्बोदरदीर्घबाहु मन
न्यचेतायमदिङ्मुखःसन् ४७श्वेताञ्चदद्याद्यदिशक्तिरस्ति रौप्यैःखुरैर्हैममुखींसवत्साम् ।
धेनुन्नरःक्षीरवतींप्रणम्य सवत्सघण्टाभरणांद्विजाय ४८ आसप्तरात्रोदयमेतदस्य दात
व्यमेतत्सकलन्नरेण । यावत्समाःसप्तदशाथवास्युरथोर्ध्वमप्यत्रवदन्तिकेचित् ४९ काश
पुष्पप्रतीकाश ! अग्निमारुतसम्भव !। मित्रावरुणयोःपुत्र ! कुम्भयोने ! नमोऽस्तुते ।

देनेके लिये आते भये और इनसे यह वचन बोले कि हे मुने जो आपको अभीष्टहोय वह वरमांगो
३९ अगस्त्यजीने कहा कि जबतक हजार ब्रह्माओंकी पच्चीस किरोड़ बारियां व्यतीतहोंय तबतक मैं
दक्षिणाचल पर्व्वतपर रहनेवाले विमानोंपर बैठनेवाला रहूं ४० मेरे विमानके उदयहोनेके समय
जो पुरुष मेरा पूजनकरै वह सप्तलोक पतियोंके बदलनेतक सातलोकों का पति होय ४१ शिवजी
कहनेलगे कि ऐसाही होगा फिर सब देवता अपने २ स्थानोंको जातेभये इस हेतुसे अगस्त्यजी के
निमित्त बुद्धिमान् लोगोंको सदैव अर्घ दानदेना योग्य है ४२ नारदमुनिने कहा हे विभो अगस्त्यजी
को अर्घदान कैसेकरै अगस्त्यजीके पूजनका जो विधानहै वह मेरे आगे वर्णन कीजिये ४३ शिवजी
बोले कि इनके उदयहोनेके समय प्रातःकालही विद्वान् गृहस्थी पुरुष श्वेत तिलोंसे स्नानकरे श्वेत
पुष्पोंकीमाला और श्वेतही वस्त्रोंको भी धारणकरे ४४ और एक सुन्दर छिद्रादिसे रहित कलश
स्थापितकरे उस कलशको पुष्प वस्त्रादिसे विभूषित पंचरत्नोंसे पूरित और घृतके पात्रसे युक्तकरै ४५
और एक लंबी चौड़ी भुजावाला अंगुष्ठ प्रमाण सुवर्णका पुरुष चारमुख वाला बनवाकर उसके मुख
पर स्थापितकरे इसके पीछे उस कलशको सप्त धान्य और वस्त्रादिसे युक्त करके ४६ कांसीके पात्र
अक्षत औरसीपी इन सब समेत संकल्प करके ब्राह्मणके अर्थ दे दे फिर उस लंबी चौड़ी उदरवाली
मूर्त्तिको उठाके दक्षिणकी ओर मुख करके दानकरे ४७ जो अधिक शक्तिहोय तो चाँदीके खुर सुवर्ण
के शृंग सवत्सा घंटा आदिक भूषणों समेत दूधवाली गौको ब्राह्मणके अर्थ दानकरै ४८ यह विधि
अगस्त्यजी के उदय से सात दिनतक मनुष्यको करनी योग्यहै कोई २ ऐसा भी कहते हैं कि यह
विधि सत्रह १७ वर्षतक हरसाल करनी उचितहै ४९ श्वेत पुष्पके समान कान्तिवाले अग्नि और

प्रत्यब्दन्तुफलैर्योग मेवंकुर्वन्नसीदति ५० होमंकृत्वाततःपश्चाद्वर्जयेन्मानवःफलम् । अनेनविधिनायस्तु पुमानर्घ्यंनिवेदयेत् ५१ इमंलोकंसचाप्नोति रूपारोग्यसमन्वितः । द्वितीयेनभुवर्लोकं स्वर्लोकञ्चततःपरम् ५२ सप्तैवलोकानाप्नोति सप्तार्घ्यान्यःप्रयच्छति । यावदायुश्चयःकुर्यात्परम्ब्रह्माधिगच्छति ५३ इहपठतिशृणोतिवायएतद्युगलमुनिप्रभवार्घ्यसम्प्रदानम् । मतिमपिचददातिसोऽपिविष्णोर्भवनगतःपरिपूज्यतेऽमरौघैः ५४ ॥

इति श्रीमत्स्यपुराणे अगस्त्यार्घप्रदानन्नामैकाधिकषष्टितमोऽध्यायः ६१ ॥

(मनुरुवाच) सौभाग्यारोग्यफलदममुत्राक्षय्यकारकम् । भक्तिमुक्तिप्रदन्देव ! तन्मेब्रूहिजनार्दन ! १ (मत्स्य उवाच) यदुमायाःपुरादेव ! उवाचपुरसूदनः । कैलासशिखरासीनो देव्यापृष्टस्तदाकिल २ कथासुसम्प्रवृत्तासु धर्म्यासुललितासुच । तदिदानीं प्रवक्ष्यामि भुक्तिमुक्तिफलप्रदम् ३ (ईश्वर उवाच) शृणुष्वावहितादेवि ! तथैवानन्तपुण्यकृत् । नराणामथनारीणा माराधनमनुत्तमम् ४ नभस्येवाथवैशाखे पुण्यमार्गशिरस्यच । शुक्लपक्षेतृतीयायां सुस्नातोगौरसर्षपैः ५ गोरोचनंसगोमूत्र मुष्णंगोशकृतन्तथा । दधिचन्दनसम्मिश्रं ललाटेतिलकंन्यसेत् । सौभाग्यारोग्यदंयस्मात्सदाचललिता

वायुके अंशसे उत्पन्नहोने वाले मित्र और वरुणके पुत्र कलशसे उत्पन्न जो आपहैं उनके अर्थ नमस्कारहै इस विधिसे वर्ष २ के प्राति फल पुष्पादिकों से पूजन करता हुआ पुरुष कभी किसी प्रकार से दुखित नहीं रहताहै ५० फिर हवनकरै और फलकी इच्छाको त्यागदे इस विधिसे पुरुषको अर्घ दान करना योग्यहै ५१ पहलीबार इस बिधिसे अर्घदान करनेवाला पुरुष इस लोकमें रूप आरोग्य युक्त होकर सुखी होताहै और दूसरीबार करनेवाला भुवर्लोकको और तीसरीबार वाला स्वर्गलोक को प्राप्तहोताहै इस विधिसे सातबार अर्घदान करनेवाला पुरुष क्रमसे सातों लोकों में प्राप्तहोताहै और जो जीवनपर्य्यन्त अगस्त्यजीके निमित्त यहअर्घदानदेताहै वहपरब्रह्ममेंलीनहोजाताहै ५२।५३ इस अगस्त्यमुनिके अर्घदानको जो पुरुष इससंसारमें पढ़ताहै वा सुनताहै अथवा दूसरेको उपदेश करताहै वह विष्णु लोकमें प्राप्त होकर देवताओंसे पूजित होताहै ५४ ॥

इति श्रीमत्स्यपुराणभाषाटीकायामेकाधिकषष्टितमोऽध्यायः ६१ ॥

मनुजी कहते हैं कि हे भगवन जो सौभाग्यारोग्य का देनेवाला और परलोकमें अक्षय फल देनेवाला तथा भुक्ति मुक्ति का देनेवाला धर्म होय उसको आप वर्णन कीजिये १ मत्स्य भगवान् बोले कि सुन्दर कैलास पर्व्वत में पार्वती से पूछे हुए शिवजी जो पार्वती जी से कहते भये उसको मैं तुम्हें सुनाता हूं २ धर्म संबन्धी सुन्दर ललित कथाओंकी प्रवृत्तिमें अब उत्तम भुक्ति मुक्ति के देने वाले धर्म को कहता हूं ३ शिवजी बोले हे देवि पार्वती तू अनन्त पुण्य दायक स्त्री पुरुषों के आराधन करनेके योग्य धर्मकोसुन ४ श्रावण वा वैशाखमासमें वा मार्गशिरमासके शुक्लपक्षकी तृतीयाको अच्छे प्रकार से स्नानकर श्वेतसरसों गोरोचन गरम २ गोमूत्र गोवर दही और चन्दन इन सब को मिला मस्तक पर लेप करे अर्थात् तिलककरे क्योंकि यह तिलक सौभाग्य आरोग्यका देनेवालाहै और ल-

प्रियम् ६ प्रतिपक्षंतृतीयासु पुमानापीतवाससी । धारयेदथरक्तानि नारीचेदथसंयता ७
विधवाधातुरक्तानि कुमारीशुक्लवाससी । देवींतुपञ्चगव्येन ततःक्षीरेणकेवलम् । स्नाप
येन्मधुनातद्वत्पुष्पगन्धोदकेनच ८ पूजयेच्छुक्लपुष्पैश्च फलैर्नानाविधैरपि । धान्यकाजा
जिलवणैर्गुड़क्षीरघृतान्वितैः ९ शुक्लाक्षततिलैरर्च्यांततोदेवींसदार्चयेत् । पादाद्यभ्यर्च
नंकुर्य्यात्प्रतिपक्षंवरानने ! १० वरदायैनमःपादौ तथागुल्फौनमःश्रियै । अशोकायैनमो
जंघे पार्वत्यैजानुनीतथा ११ ऊरूमंगलकारिण्यै वामदेव्यैतथाकटिम् । पद्मोदरायैजठ
रमुरःकामाश्रियैनमः १२ करौसौभाग्यदायिन्यैबाहूदरमुखंश्रियै । मुखंदर्पणवासिन्यै स्म
रदायैस्मितन्नमः १३ गौर्यैनमस्तथानासा मुत्पलायैचलोचने । तुष्ट्यैललाटमलकान्
कात्यायन्यैशिरस्तथा १४ नमोगौर्यैनमोधिष्ण्यै नमःकान्त्यैनमःश्रियै । रम्भायैललिता
यैच वासुदेव्यैनमोनमः १५ एवंसम्पूज्यविधिव दग्रतःपद्ममालिखेत् । पत्रैर्द्वादशभिर्यु
क्तं कुंकुमेनसकर्णिकम् १६ पूर्वेणविन्यसेद्गौरी मपर्णाञ्चततःपरम् । भवानींदक्षिणेतद्व
द्रुद्राणीञ्चततःपरम् १७ विन्यसेत्पश्चिमेसौम्यां सदामदनवासिनीम् । वायव्येपाटला
मुग्रा मन्तरेणततोऽप्युमाम् १८ मध्येयथास्वंमासांगां मंगलांकुमुदांसतीम् । रुद्रञ्च

लिता देवी को परम प्रिय है ५--६ और पक्ष पक्षकी तृतीया के दिन पुरुषतो पीले वस्त्र धारण
करे और स्त्री लाल वस्त्र पहरे ७ विधवा स्त्री गेरू के रंगे हुए वस्त्रों को पहरे और कुमारी कन्या
श्वेत वस्त्र धारण करे फिर पंचगव्य से अथवा दूधसे देवी को स्नानकरावे फिर शहद से स्नानकर
कर पुष्पगन्ध और जलसे स्नान करावे फिर श्वेतपुष्प अनेक प्रकार के फल धनियां जीरा नमक
गुड़ दूध और घृत इत्यादिकों से और श्वेत अक्षत और तिल इन वस्तुओं से देवीका पूजनकरै हे
वरानने पक्ष २ की तृतीया के दिन पाद्य अर्घ आदिकों से पूजै ८।१० वरदायैनमः इस मंत्र से पैरों
को पूजै लक्ष्म्यैनमः इसमंत्र करके टकनों को अशोकादेव्यै नमः इस मंत्रसे पिंडिलियोंको और
पार्वत्यैनमः इस मंत्रसे घोटओं को पूजै ११ मंगलकारिएयैनमः इससे जंघाओं को वामदेव्यैनमः
इस मंत्रसे कटिको पद्मोदरायैनमः इस मंत्रसे उदरको कामाश्रियैनमः इस मंत्र से छाती को १२
सौ भाग्य दायिन्यैनमः इस मंत्रसे हाथोंको--श्रियैनमः यह कह कर भुजा--उदर और मुखका पूजन
करै दर्पणवासिन्यैनमः मुखको स्मरदायैनमः ऐसाकहकर दांतों को पूजै १३ गौर्य्यैनमः इससे ना-
सिकाको उत्पलायैनमः मंत्र से नेत्रोंको तुष्ट्यैनमः इस मंत्रसे मस्तकके बालों को और कात्यायन्यै
नमः इसमंत्रसे शिरको पूजै १४ गौरीके अर्थ नमस्कार ऐसाकहकर धिष्णी बुद्धिरूपादेव्यैनमः इस
मंत्रसे कान्तिको श्रीरंभायैनमः ललितादेव्यैनमः वासुदेव्यैनमः १५ इन सब मंत्रोंसे विधिपूर्व्वक
देवीजी की मूर्त्तिका पूजनकर अपने अग्रभागमें बारह पत्तों से युक्तनाली समेत एक कमल केसरसे
लिखे १६ पूर्व्वके पत्रपै गौरीको स्थापित करै अग्नि कोणमें अपर्णाको दक्षिण में भवानी को नैर्ऋत
में रुद्राणीको १७ पश्चिम में सौम्यरूपवाली को मदनवासिनी देवीको वायव्य में उग्रापाटला
देवीको उत्तरमें उमाको १८ और ईशान कोणमें उत्तम अंगवाली कुमुदा देवीको स्थापित करे और

मध्येसंस्थाप्य ललितांकर्णिकोपरि। कुसुमैरक्षतैर्वाभिर्नमस्कारेणविन्यसेत् १९ गीतमंगलनिर्घोषान्कारयित्वासुवासिनीः। पूजयेद्रक्तवासोभी रक्तमाल्यानुलेपनैः। सिन्दूरंस्नानवर्णञ्च तासांशिरसिपातयेत् २० सिन्दूरकुंकुमस्नान मतीवेष्टतमंयतः। तथोपदेष्टारमपि पूजयेद्यत्नतोगुरुम्। नपूज्यतेगुरुर्यत्र सर्वास्तत्राफलाःक्रियाः २१ नभस्येपूजयेद्गौरी मुत्पलैरसितैःसदा। बन्धुजीवैराश्वयुजे कार्त्तिकेशतपत्रकैः २२ जातीपुष्पैर्मार्गशीर्षे पौषेपीतैःकुरण्टकैः। कुन्दकुंकुमपुष्पैस्तु देवींमाघेतुपूजयेत्। सिन्दुवारेणजात्यावा फाल्गुनेऽप्यर्चयेदुमाम् २३ चैत्रेतुमल्लिकाशोकै वैशाखेगन्धपाटलैः। ज्येष्ठेकमलमन्दारैराषाढेचनवाम्बुजैः। कदम्बैरथमालत्या श्रावणेपूजयेत्सदा २४ गोमूत्रंगोमयंक्षीरं दधि सर्पिःकुशोदकम्। विल्वपत्रार्कपुष्पञ्च यवान्गोशृंगवारिच २५ पञ्चगव्यञ्चविल्वञ्च प्राशयेत्क्रमशस्तदा। एतद्भाद्रपदाद्यन्तु प्राशनंसमुदाहृतम् २६ प्रतिपक्षञ्चमिथुनं तृतीयायांवरानने। ! पूजयित्वार्चयेद्भक्त्या वस्त्रमाल्यानुलेपनैः। पुंसःपीताम्बरेदद्यात्स्त्रियै कौसुम्भवाससी २७ निष्पावाजाजिलवणामिक्षुदण्डगुडान्वितम्। तस्यैदद्यात्फलंपुष्पं सुवर्णोत्पलसंयुतम् २८ यथानदेवि ! देवेशस्त्वाम्परित्यज्यगच्छति। तथा मामुद्धरा

इन सबोंके मध्यमें रुद्रजीको स्थापित करे कमलकी डंडी पर ललितादेवीको स्थापित करे इनसब देवियोंको पुष्प अक्षत और जलसे स्थापित करे १९ फिर मंगला चरण के गीतोंको गावै उत्तम शब्द करै सुन्दर वस्त्रों वाली देवीको लालवस्त्र लालपुष्प और लालचन्दन इनसब से पूजै और उन देवियोंको स्नानकराकर उनके शिरोंपर सिंदूरचढ़ावै २० सिंदूररोली चढ़ाना और स्नानकराना यह अत्यन्त योग्य है इस हेतु से इस पूजाके उपदेश देनेवाले गुरूकी भी यत्नपूर्वक सिंदूरही से पूजा करे क्योंकि जहां गुरूकी पूजा नहीं कीजाती है वहां सब क्रिया निष्फल होती हैं २१ भाद्रपद के महीने में सदैव नीले कमलोंके पुष्पोंसे गौरीको पूजै आश्विन में बन्धुजीव अर्थात् लाल रंग दुपहरियाके पुष्पोंसे कार्त्तिकमें शतपत्रक श्वेत कमल के पुष्पों से पूजै २२ मार्ग शिर में चमेली के पुष्पोंसे पौषमें कुरंटक के पीले पुष्पों से माघमें कुंदके पुष्पोंसे अथवा केशर के पुष्पोंसे देवीको पूजै फाल्गुनमें उमादेवीको संभालूके पुष्पोंसे अथवा चमेलीके पुष्पोंसे पूजै २३ चैत्रमें चंपा और अशोक वृक्ष इन दोनोंके पुष्पोंसे पूजै—वैशाखमें सुगन्धित पाटल वृक्षके पुष्पोंसे ज्येष्ठमें उत्तम खिले हुए कमलके पुष्पोंसे—आषाढ़में नवीन कमलोंसे—और श्रावणमें कदंबके और मालतीके पुष्पोंसे भगवतीको पूजै २४ और गोमूत्र—गोबर—गौका दूध—दही—घृत—कुशाकाजल—बेलपत्र—आकके पुष्प—जव-गौके सींगोंके धोवनका जल—पंचगव्य और बेलगिरी—इन सबको भाद्रपदके महीनेसे क्रम पूर्वक भोजनकरे जैसे कि भाद्रपदकी तृतीया ३ को गोमूत्र—आश्विनकी ३ को गोबर २५। २६ इसी प्रकार हे वरानने हर पक्षकी तृतीयाके दिन ब्राह्मण और ब्राह्मणीके जोड़ेको भक्ति पूर्वक पूजकर वस्त्र माला—पुष्प और चन्दन इत्यादिसे पूजै ब्राह्मणको पीले वस्त्र पहरावे स्त्रीको दोनों लाल वस्त्र पहरावै २७ और साफ कियाहुआ शुद्ध जीरा १ नमक—ईखका गांडा—गुड़—फल पुष्प और सुवर्णका बनायाहुआ कमलका पुष्प यह सब वस्तु उस ब्राह्मणीके अर्थ दे दे २८ और यह वचन कहै कि हे

शेष दुःखसंसारसागरात् २९ कुमुदाबिमलानन्ता भवानीचसुधाशिवा। ललिताकमला गौरी सतीरम्भाथपार्वती ३० नभस्यादिषुमासेषु प्रीयतामित्युदीरयेत् । व्रतान्तेशयनं दद्यात्सुवर्णकमलान्वितम् ३१ मिथुनानिचतुर्विंशद्दशद्वौचसमर्चयेत् । अष्टौषड्वाप्यथ पुनश्चानुमासंसमर्चयेत् ३२ पूर्वन्दत्त्वातुगुरवे शेषानप्यर्चयेद्बुधः। उक्तानन्ततृतीयैषा सदानन्तफलप्रदा ३३ सर्वपापहरान्देवि ! सौभाग्यारोग्यवर्धिनीम् । नचैनांवित्त शाठ्येन कदाचिदपिलंघयेत् । नरोवायदिवानारी वित्तशाठ्यात्पतत्यधः ३४ गर्भिणी सूतिकानारी कुमारीवाथरोगिणी । यद्यऽशुद्धातदान्येन कारयेत्प्रयतास्वयम् ३५ इमामनन्तफलदां यस्तृतीयांसमाचरेत् । कल्पकोटिशतंसाग्रं शिवलोकेमहीयते ३६ वित्तहीनोऽपिकुरुते वर्षत्रयमुपोषणैः। पुष्पमन्त्रविधानेन सोऽपितत्फलमाप्नुयात् ३७ नारीवाकुरुतेयातु कुमारीविधवाथवा । सापितत्फलमाप्नोति गौर्यनुग्रहलालिता ३८ इतिपठतिशृणोतिवायइत्थं गिरितनयाव्रतमिन्द्रवाससंस्थः। मतिमपिचददातिसोऽपि देवैरमरवधूजनकिन्नरैश्चपूज्यः ३९ ॥ इति श्रीमत्स्यपुराणेद्विषष्टितमोऽध्यायः ६२ ॥

अथान्यामपिवक्ष्यामि तृतीयांपापनाशिनीम् । रसकल्याणिनीमेताम्पुराकल्पविदो

के समान रूपवाले द्वारकावासियों का और अपने पुत्रभ्राता आदिक सुहृदों का स्मरण करतीहुई
दाल्भ्यमुनि के समीप सन्मुख खड़ीहोके यह प्रश्न करेंगी कि १५। १६ हे भगवन् हमसबको चोर
धाड़ियोंने बलकर छीनलिया और घरोंपर लेजाकर भोग किया अब हम अपने धर्मसे हीन होगई
हैं सो आपकी शरणहैं १७ हे महात्मन् प्रथम श्रीकृष्णजीके दियेहुए शापसे हम वेश्या भावको प्राप्त

कस्मादीशेनसंयोगम्प्राप्यवेश्यात्वमागताः १८ वेश्यानामपियोधर्म्मस्तन्नोब्रूहितपोधन!। कथयिष्यत्यतस्तासां सदाल्भ्यश्चैकितायनः १९ (दाल्भ्य उवाच) जलक्रीडाविहारेषु पुरासरसिमानसे। भवतीनाञ्चसर्वासां नारदोऽभ्यासमागतः २० हुताशनसुताःसर्व्वा भवन्त्योऽप्सरसःपुरा। अप्रणम्यावलेपेन परिपृष्टःसयोगवित्। कथन्नारायणोस्माकं भर्तास्यादित्युपादिश २१ तस्माद्वरप्रदानंवः शापश्चायमभूत्पुरा। शय्याद्वयप्रदानेन मधुमाधवमासयोः २२ सुवर्णोपस्करोत्सर्गा द्वादश्यांशुक्लपक्षतः। भर्तानारायणोनूनं भविष्यत्यन्यजन्मनि २३ यदकृत्वाप्रणामम्मे रूपसौभाग्यमत्सरात्। परिपृष्टोऽस्मितेनाशु वियोगोवाभविष्यति। चौरैरपहृताःसर्वा वेश्यात्वंसमवाप्स्यथ २४ एवंनारदशापेन केशवस्यचधीमतः। वेश्यात्वमागताःसर्वा भवन्त्यःकाममोहिताः। इदानीमपियद्वक्ष्ये तच्छृणुध्वंवराङ्गनाः! २५ (दाल्भ्य उवाच) पुरादेवासुरेयुद्धे हतेषुशतशःसुरैः। दानवासुरदैत्येषु राक्षसेषुततस्ततः २६ तेषांव्रातसहस्राणि शतान्यपिचयोषिताम्। परिणीतानियानिस्युर्बलाद्भुक्तानियानिवै। तानिसर्वापिदेवेशः प्रोवाचवदतांवरः २७ (इन्द्र उवाच) वेश्याधर्म्मेणवर्तध्वमधुनानृपमन्दिरे। भक्तिमत्योवरारोहास्तथादेवकुलेषुच २८ राजानःस्वामिनस्तुल्याः सूतावापिचतत्समाः। भविष्यतिचसौभा

होगई हैं हमारे उपदेशकर्त्ता आपही नियत कियेगये हैं १८ हे तपोधन आप कृपाकरके वेश्याओंका धर्म वर्णनकीजिये–इस प्रकारसे पूछेहुए दाल्भ्यऋषि उन स्त्रियों से वेश्याओं के धर्म कहेंगे १९ कि हे स्त्रियो पूर्व्वकालमें तुम सब किसी समय मानसरोवर में क्रीड़ाकर रहीथीं उस समय तुम्हारे समीप नारद मुनि आय गयेथे २० उसकालमें तुम अग्निकी पुत्री अप्सरा रूपथीं उस समय तुमने नारदजीको प्रणामनहीं कियाथा और विना प्रणाम कियेही तुमने उस योगी से यह प्रश्नकियाथा कि हे मुने हमको जगन्नाथ श्रीकृष्ण भर्त्ता कैसे प्राप्तहोयं उसको कहिये २१ उस समय तुमको नारदमुनिने श्रीकृष्णजीके मिलनेका वरदियाथा और प्रणाम नहीं करनेसे शाप भी दियाथा अर्थात् यह कहाथा कि चैत्र वैशाख इन दोनों महीनों की शुक्लपक्षकी द्वादशी के दिन दो शय्या दान और सुवर्णका दानकरनेसे दूसरे जन्ममें तुम्हारा निश्चय करके नारायण पति होगा २२।२३ और जो कि तुमने अपने रूप और सौभाग्यके अभिमान से मुझको प्रणाम विना कियेही प्रथम प्रश्नकियाहै इस हेतुसे तुम्हारा इस प्रकारसे वियोग भी होगा कि तुम चोरोंसे हरी जाओगी और वेश्याभावको प्राप्तहोजाओगी २४ इसीसे तुम सब नारदजीके और श्रीकृष्णजीके शापसे कामसे मोहित होकर वेश्यापनेको प्राप्तहोगई हो–हे स्त्रियो अब जो मैं कहताहूं उसको तुम चित्तसे सुनो २५ दाल्भ्यने कहा कि प्रथम देवता और दैत्योंके युद्धमें जहाँ तहाँ के हज़ारों राक्षस मरगये तब उन राक्षसोंकी हज़ारों स्त्रियोंको देवताओंने अपने बलसे छीनकर ग्रहण करके उनके साथमें भोगकिया उस समय उन सब स्त्रियोंसे इन्द्रने कहाथा कि तुम सब वेश्याओंके धर्ममें रहो और राजाओंके मन्दिरोंमें और देवताओंमें प्रीति रक्खो २६। २८ तुमको राजा–अपनास्वामी–सूत और शूद्रादिक यह सब समानवर्त्तने चाहियें

ग्यंसर्वासामपिशक्तितः २९ यःकश्चिच्छुल्कमादाय गृहमेष्यतिवःसदा। निधनेनोपचार्य्योवः सतदान्यत्रदाम्भिकात् ३० देवतानांपितृणाञ्च पुण्याहे समुपस्थिते। गोभूहिरण्यधान्यानिप्रदेयानिस्वशक्तितः। ब्राह्मणानांवरारोहाः कार्याणिवचनानिच ३१ यच्चाप्यन्यद्व्रतंसम्यगुपदेक्ष्याम्यहन्ततः। अविचारेणसर्वाभिरनुष्ठेयञ्चतत्पुनः ३२ संसारोत्तारणायालमेतद्वेदविदोविदुः। यदासूर्यदिनेहस्तःपुष्योवाथपुनर्वसुः ३३ भवेत्सर्वौषधीस्नानसम्यङ्नारीसमाचरेत्। तदापञ्चशरस्यापि सन्निधात्त्वमेष्यति। अर्चयेत्पुण्डरीकाक्षमनङ्गस्यानुकीर्तनैः ३४ कामायपादौसम्पूज्य जंघेवैमोहकारिणे। मेढ्रङ्कन्दर्पनिधये कटिम्प्रीतिमतेनमः ३५ नाभिंसौख्यसमुद्राय रामायचतथोदरम्। हृदयंहृदयेशायस्तनावाह्लादकारिणे ३६ उत्कंठायेतिवैकंठमास्यमानन्दकारिणे। वामाङ्गम्पुष्पचापायपुष्पबाणायदक्षिणम् ३७ मानसायेतिवैमौलिंविलोलायेतिमूर्द्धजम्। सर्वात्मनेचसर्वांगंदेवदेवस्यपूजयेत् ३८ नमःशिवायशांतायपाशांकुशधरायच। गदिनेपीतवस्त्रायशङ्खचक्रधरायच ३९ नमोनारायणायेति कामदेवात्मनेनमः। सर्वशान्त्यैनमःप्रीत्यै नमोरत्यैनमःश्रियै ४० नमः पुष्ट्यैनमस्तुष्ट्यै नमःसर्वार्थसम्पदे। एवंसंपूज्यदेवेशमनंगात्मकमीश्वरम्। गन्धैर्माल्यै

तुम सबको शक्तिके अनुसार सौभाग्य प्राप्तहोगा २९ जो कोई पुरुष तुमको तुम्हारे समानमूल्य देकर तुम्हारे घरपर आवेगा उसके साथतुम छलछिद्र कभी न करना ३० और जब कोई देवता औरपितर आदिके उत्सवका दिन आजाय उसदिन गौ-पृथ्वी-सुवर्ण और धान्य इन सबकादानशक्तिके अनुसार तुमको करना चाहिये हेसुन्दर स्त्रियो तुमकोसदैव ब्राह्मणोंका वचन करना योग्यहै ३१ इसकेविशेष जो तुम्हारे योग्य व्रतहै उसकोभी मैं कहताहूं वहव्रत तुमको निस्सन्देह करना योग्य है ३२ इस व्रतको वेदज्ञ पुरुषोंने संसारके उद्धारके निमित्त उत्तमकहा है—जब कभी रविवारके दिन हस्त—पुष्य—अथवा पुनर्वसु इन तीनों में से कोई नक्षत्र आजाय उस दिवस स्त्रियोंको सर्वौषधी के जलसे स्नान करना योग्य है उस समय कामदेवभी इन स्त्रियों के समीप आजाता है इस हेतु से कामदेवके नामों का उच्चारण करके विष्णुभगवान् का पूजनकरै ३३।३४ फिर कामदेवको नमस्कारकरके विष्णुकेचरणों को पूजै उसके पीछे मोहकारी को नमस्कारकर पिंडिलियों को पूजै—कन्दर्पनिधिको नमस्कार कर लिंगको पूजै—प्रीतिमान् को नमस्कारकर कटिको पूजै—३५ सौख्य समुद्रको नमस्कारकर नाभिको पूजै—रामको नमस्कारकर उदरकोपूजै—हृदयेशको नमस्कारकर हृदयको पूजै—आह्लादकारी को नमस्कारकर विष्णुके स्तनों को पूजै—३६ उत्कण्ठायनमः यह कहकर कण्ठको पूजै—आनन्दकारिणेनमः यह कहकर मुखको पूजै--पुष्पधन्विनेनमः कहकर वामअंगको पूजै--पुष्पेषवेनमः यहकहकर दक्षिणअंगको पूजै ३७ मानसायनमः यह कहके मस्तकको पूजै--विलोलायनमः यह कहकर केशोंको पूजै--सर्वात्मनेनमः यह कहके सर्वांगों को पूजै--३८ शिवशान्तस्वरूप पाशअंकुशधारिणेनमः और गदाधराय शंखचक्रधारिणे पीताम्बर विष्णवेनमः ३९ नारायणाय कामदेवात्मरूपाय सर्वशान्तायनमः प्रीतयेनमः रतयेनमः श्रियैनमः ४० पुष्ट्यैनमः तुष्ट्यैनमः सर्वार्थसंपदेनमः इन सब म-

स्तथाधूपैर्नैवेद्येनचकामिनी ४१ ततआहूयधर्म्मज्ञं ब्राह्मणंवेदपारगम् । अव्यङ्गावयवं
पूज्य गन्धपुष्पार्चनादिभिः ४२ शालेयतण्डुलप्रस्थं घृतपात्रेणसंयुतम् । तस्मैविप्राय
सादद्यान्माधवःप्रीयतामिति ४३ यथेष्टाहारयुक्तंवै तमेवद्विजसत्तमम् । रत्यर्थंकामदेवो
यमितिचित्तेऽवधार्य्यतम् ४४ यद्यदिच्छतिविप्रेन्द्रस्तत्तत्कुर्य्याद्विलासिनी । सर्व्वभावे
नचात्मान मर्पयेत्स्मितभाषिणी ४५ एवमादित्यवारेण सर्वमेतत्समाचरेत् । तण्डुल
प्रस्थदानञ्च यावन्मासास्त्रयोदश ४६ ततस्त्रयोदशेमासि संप्राप्तेतस्यभामिनी । वि
प्रस्योपस्करैर्युक्तां शय्यांदद्याद्विलक्षणाम् ४७ सोपधानकविश्रामां सास्तरावरणांशु
भाम् । प्रदीपोपानहच्छत्र पादुकासनसंयुताम् ४८ सपत्नीकमलंकृत्य हेमसूत्रांगुलीय
कैः । सूक्ष्मवस्त्रैःसकटकैर्धूपमाल्यानुलेपनैः ४९ कामदेवंसपत्नीकं गुडकुम्भोपरिस्थि
तम् । ताम्रपात्रासनगतं हैमनेत्रपटावृतम् ५० सकांस्यभाजनोपेतमिक्षुदण्डसमन्वि
तम् । दद्यादेतेनमन्त्रेण तथैकांगांपयस्विनीम् ५१ यथान्तरंनपश्यामि कामकेशवयोः
सदा । तथैवसर्वकामाप्तिरस्तुविष्णो ! सदामम ५२ यथानकमलादेहात् प्रयातितवके
शव !। तथाममापिदेवेश ! शरीरेस्वेकुरुप्रभो ५३ तथाचकाञ्चनंदेवं प्रतिगृह्णन्द्विजो

न्त्रों से कामदेवस्वरूपी विष्णु भगवान्‌को गन्ध पुष्प धूप दीप नैवेद्यादिक वस्तुओंसे स्त्रीको पूजन
करना चाहिये ४१ इसके पीछे वेदके पारके जाननेवाले धर्मज्ञ व्यंग अंगरहित ब्राह्मणको बुलवाकर
गन्ध पुष्प धूप दीप और नैवेद्यादि पदार्थोंसे स्त्री पूजै ४२ और उसी ब्राह्मणके अर्थ घृत पात्र संयुक्त
एकसेर चावलोंके भरेपात्रको माधव भगवान् प्रसन्नहो यह कहकर दानकरे ४३ और उसी उत्तम
ब्राह्मणको अपने चित्तसे कामदेवके समान मानकर इच्छापूर्व्वक भोजनकरवावे ४४ और जिसजिस
वस्तुकी वह ब्राह्मण इच्छाकरे वह सब उस सुन्दर हास्यवाली स्त्रीको आत्मभावसे उसकी तृप्ति
पर्य्यन्त देना चाहिये ४५ इस रीतिसे हर रविवारके दिन सुन्दर आचरण करतीहुई तेरह महीनेतक
प्रत्येक रविवारको एकसेर चावलोंका दान करतीरहै जब तेरहवाँ महीना आवे तब उसी ब्राह्मण के
निमित्त सर्व सामग्री समेत शय्या दानकरै अर्थात् शय्यापर उत्तम तकिया बिछौना दीपक जूतीका
जोड़ा–छत्री–खड़ाऊं–धोतीका जोड़ा--आसन इन सब बस्तुओंसे शोभितकीहुई शय्याको स्त्री समेत
होकर सपत्नीक ब्राह्मणको दे दे इसके सिवाय उत्तम रेशमी वस्त्र सुवर्ण के भूषण बाजूबन्द देकर
धूप दीप पुष्प और चन्दनादिक से कामदेव का पूजन करे ४६ । ४९ स्त्री सहित कामदेवकी मूर्त्ति
बनवाके गुडसे भरेहुए पात्रपर स्थापितकर उसके आसनकी जगह ताँबे के पत्र लगाकर सुवर्ण
के नेत्र युक्त वस्त्र पहराय कांसीके पात्र समेत ईख संयुक्तकर आगे लिखेहुए मंत्रसे उसका दानकरै
और एक उत्तम दूधवाली गौकाभी दानकरै ५० । ५१ मंत्र--जैसे कि मैं विष्णुमें और कामदेवमें कुछ
अन्तरका भाव भेद नहीं रखतीहूं इसीप्रकार सदैव विष्णु भगवान् मेरे मनोरथोंको सिद्धकरो ५२ हे
केशव भगवान् जैसे कि लक्ष्मीजी तुम्हारे शरीरसे कभी पृथक् नहीं रहती हैं उसी प्रकार मुझेभी
आप अपने शरीरमें लीनकरो ५३ इसके पीछे सुवर्णकी मूर्त्तिको ग्रहण करताहुआ ब्राह्मण कहै

त्तमः। कइदकस्मादादिति वैदिकंमन्त्रमीरयेत् ५४ ततःप्रदक्षिणीकृत्य विसर्ज्यौद्विजपुंगवम्। शय्यासनादिकंसर्वं ब्राह्मणस्यगृहंनयेत् ५५ ततःप्रभृतियोविप्रो रत्यर्थंगृहमागतः। समान्यःसूर्यवारेच समन्तव्योभवेत्तदा ५६ एवंत्रयोदशंयावन्मासमेवंद्विजोत्तमान्। तर्पयेतयथाकामं प्रोषितेऽन्यंसमाचरेत् ५७ तदनुज्ञयारूपवान्यो यावदभ्यागतो भवेत्। आत्मनोऽपियथाविघ्नं गर्भभूतिकरम्प्रियम् ५८ दैवंवामानुषंवास्यादनुरागेणवाततः। साचारानष्टपञ्चाशद्यथाशक्त्यासमाचरेत् ५९ एतद्धिकथितंसम्यक् भवतीनांविशेषतः। अधर्मोऽयंततोनस्याद्वेश्यानामिहसर्वदा ६० पुरुहूतेनयत्प्रोक्तं दानवीषु पुरामया। तदिदंसाम्प्रतंसर्व्वं भवतीष्वपियुज्यते ६१ सर्व्वपापप्रशमनमनन्तफलदायकम्। कल्याणीनांप्रकथितं तत्कुरुध्वंवराननाः ६२ करोतियाशेषमखण्डमेतत्कल्याणिनीमाधवलोकसंस्था। सापूजितादेवगणैरशेषैरानन्दकृत्स्थानमुपैतिविष्णोः ६३. (श्रीभगवानुवाच) तपोधनःसोऽप्यभिधायचैवं तदाचतासांव्रतमंगनानाम्। स्वस्थानमेष्यन्तिसमस्तामित्थं व्रतंकरिष्यन्तिचदेवयोने! ६४॥

इति श्रीमत्स्यपुराणे नवषष्टितमोऽध्यायः ६९॥

(ब्रह्मोवाच) भगवन्! पुरुषस्येहस्त्रियाश्चविरहादिकम्। शोकव्याधिभयन्दुःखं नाभवेद्येनतद्वद १ (श्रीभगवानुवाच) श्रावणस्यद्वितीयायांकृष्णायाम्मधुसूदनः। क्षीरा

कस्मादादिति ऐसे वेदके मन्त्रको उच्चारणकरै ५४ फिर प्रदक्षिणा करके ब्राह्मणका विसर्जनकरदे ५५ इसके अनन्तर जो ब्राह्मण रमणकरनेके निमित्त रविवारके दिन इन स्त्रियोंके घरपर आजाय तो उसका मानकरके उसका प्रसन्नतापूर्वक पूजनकरना योग्य है ५६ इस रीति से तेरह महीनों तक उत्तम ब्राह्मणों को इच्छापूर्व्वक तृप्तकरतीरहै औरवह ब्राह्मण कदाचित् कहींपरदेशमें चलाजाय तो इसी प्रकार दूसरे अन्य ब्राह्मण को भी पूजै ५७ उसी ब्राह्मणसे आज्ञालेकर विघ्नरहित अपनेको प्रिय जो ब्राह्मण रूपवान्हो और अभ्यागतहो उसको पूजै ५८ इसके पीछे श्रेष्ठकुलीनअड़तालीस ४८ ब्राह्मणों को शक्तिके अनुसार भोजन करवावै ५९ यहधर्म विशेष करके तुम्हीं वेश्याओंका कहा है ऐसे करने से तुमको अधर्म नहीं लगेगा ६० पूर्व्व समयमें जो धर्म इन्द्रने दानवों की स्त्रियों से कहा है वही धर्म अब मैंने तुमसे भी वर्णन किया है ६१ हे श्रेष्ठमुखवाली स्त्रीलोगो यह सबपापों का शान्तकरने वाला अनन्त फल वालाव्रत मैंने तुमसे कहाहै ६२ जो वेश्यास्त्री इस व्रतकोकरती है वह विष्णुके लोकको प्राप्तहोकरसब देवताओं से पूजित होती है ६३ श्रीभगवान् कहते हैं कि वह दाल्भ्य ऋषि इस प्रकार से उन स्त्रियोंको उपदेश करताभया हे राजा जो इसीप्रकारसे इस व्रतको अन्य स्त्रियां भी करेंगी वह भी स्वर्गमें प्राप्तहोकर देवताओं के उत्तम विमानोंमें स्थित होकर विहार करेंगी ६४॥ इति श्रीमत्स्यपुराणभाषाटीकायामेकोनसप्ततितमोऽध्यायः ६९॥

ब्रह्माजी बोले कि हेभगवन् इसलोकमें जिसव्रतकरके स्त्री और पुरुषका वियोगनहो और शोक व्याधि

र्णवेसपत्नीकः सदावसतिकेशवः २ तस्यांसम्पूज्यगोविन्दं सर्वान्कामान्समश्नुते । गोभू
हिरण्यदानादि सप्तकल्पशतानुगम् ३ अशून्यशयनन्नाम द्वितीयासम्प्रकीर्त्तिता । त
स्यांसम्पूजयेद्विष्णुमेभिर्म्मन्त्रैर्विधानतः ४ श्रीवत्सधारिन् ! श्रीकान्त ! श्रीधामन् !
श्रीपतेऽव्यय !। गार्हस्थंमाप्रणाशम्मे यातुधर्म्मार्थकामदम् ५ अग्नयोमाप्रणश्यन्तु दे
वताःपुरुषोत्तम !। पितरोमाप्रणश्यन्तु मास्तुदाम्पत्यभेदनम् ६ लक्ष्म्याविंयुज्यतेदेव!
नकदाचिद्यथाभवान् । तथाकलत्रसम्बन्धोदेव ! मामेवियुज्यताम् ७ लक्ष्म्यानशून्योवर
द ! शय्यांत्वंशयनंगतः । शय्याममाप्यशून्यास्तु तथैवमधुसूदन ! ८ गीतवादित्रनि
र्घोषं देवदेवस्यकीर्त्तयेत् । घण्टाभवेदशक्तस्य सर्ववाद्यमयीयतः ९ एवंसम्पूज्यगोविन्द
मश्नीयात्तैलवर्जितम् । नक्तमक्षारलवणं यावत्तस्याश्चतुष्टयम् १० ततःप्रभातेसञ्जाते
लक्ष्मीपतिसमन्विताम् । दीपान्नभाजनैर्युक्तां शय्यांदद्याद्विलक्षणाम् ११ पादुकोपान
हच्छत्र चामरासनसंयुताम् । अभीष्टोपस्करैर्युक्तां शुक्लपुष्पाम्बरावृताम् १२ सोपधान
कविश्रामां फलैर्नानाविधैर्युताम् । तथाभरणधान्यैश्चयथाशक्त्यासमन्विताम् १३ अव्यं
गांगायविप्रायवैष्णवायकुटुम्बिने । दातव्यावेदविदुषेभावेनापतितायच १४ तत्रोपविश्य
दाम्पत्यमलंकृत्यविधानतः । पत्न्यास्तुभाजनंदद्याद्भक्ष्यभोज्यसमन्वितम् १५ ब्राह्मण

और दुःखनहो उसको आप वर्णनकीजिये १ श्रीभगवान्बोले कि श्रावणमासके कृष्णपक्षकी द्वितीयाका सदैव केशव भगवान्क्षीरसागरमें लक्ष्मीजीसमेत शयनकरतेहैं २ उसतिथिको गोविन्द भगवान् का पूजन करने से सबकामना सिद्धहोजाती हैं उसदिन गौ पृथ्वी सुवर्ण इनसबका दानकरनेसे सातसौकल्प तक विष्णुलोकमें वासरहताहै ३ यह अशून्यशयना नामवाली द्वितीया कहाती है इस द्वितीयाके दिन इस आगे वर्णनहोनेवाली विधिसे और मंत्रोंके विधानसे विष्णु भगवान् का पूजनकरै ४ कि हे श्रीवत्सधारी श्रीकान्त हे श्रीधामन् हे श्रीपति अविनाशी यह धर्म अर्थ कामका देनेवाला मेरा गृहस्थपना कभी नष्ट न होय ५ हे पुरुषोत्तम मेरे अग्निदेवता और पितर इन सबका नाश न हो और स्त्री पुरुषका भी वियोग न हो ६ हे देव जैसे कि आप अपनी लक्ष्मीजीसे कभी वियोग नहीं करते हैं इसीप्रकार मेरा भी कभी स्त्रीसे वियोग न हो हे मधुसूदनजी जैसे कि आप लक्ष्मीजीसे शून्य शय्यापर कभी शयन नहीं करतेहो उसीप्रकार मेरी भी शय्या अशून्यरहै ७।८ ऐसा कहनेके पीछे विष्णुके गीतगावे और सबप्रकारके बाजेबजावे सब न होसकें तो केवल घंटाही बजावे ९ इसप्रकारसे गोविन्दका पूजनकर तैलरहित पदार्थोंका भोजनकरे और खारी आदि पांचों नोन न खाय·१० जब प्रभातहोजाय तब लक्ष्मीपति विष्णुकी मूर्त्ति समेत दीपक अन्न और वस्त्र पात्रादिसे युक्तहुई शय्याका दान करै ११ पादुका--जूतीका जोड़ा--छत्री--चमर--आसन इन सब वस्तुओंसे युक्त तथा अपनी बांछित वस्तुओं समेत श्वेत वस्त्र संयुक्त शय्याका दानकरै १२ तकिया बिछौना--अनेक प्रकारके फल आभूषण यह सब शक्तिके अनुसार तैयारकर शय्यासमेत कुटिलतारहित वेदज्ञ वैष्णव कुटुम्बी ब्राह्मण को उत्तमभावसे अर्पणकरै १३।१४ यहांदानकरनेकेसमय उसशय्यापर ब्राह्मण ब्राह्मणीको वैठाकर

स्यापिसौवर्णीमुपस्करसमान्विताम् । प्रतिमांदेवदेवस्यसोदकुंभांनिवेदयेत् १६ एवंयस्तुपु
मान्कुर्यादशून्यशयनंहरेः । वित्तशाठ्यनरहितोनारायणपरायणः १७ नारीवाविधवाब्रह्म
न् ! यावच्चन्द्रार्कतारकम् । नविरूपौनशोकार्त्तौदम्पतीभवतःक्वचित् १८ नपुत्रपशुरत्नानि
क्षयंयांतिपितामह ! । सप्तकल्पसहस्राणिसप्तकल्पशतानिच । कुर्वन्नशून्यशयनंविष्णुलोके
महीयते १९ ॥ इति श्रीमत्स्यपुराणे सप्ततितमोऽध्यायः ७० ॥

(ईश्वर उवाच) शृणुचान्यद्भविष्यं यद्रूपसम्पद्विधायकम् । भविष्यतियुगेतस्मिन्द्वा
परान्तेपितामह ! । पिप्पलादस्यसंवादो युधिष्ठिरपुरःसरैः १ वसन्तन्नैमिषारण्ये पिप्प
लादंमहामुनिम् । अधिगम्यतदाचैनम्प्रश्नमेकङ्करिष्यति । युधिष्ठिरोधर्म्मपुत्रो धर्म्मयुक्त
स्तपोधनम् २ (युधिष्ठिर उवाच) कथमारोग्यमैश्वर्य्यम्मतिर्धर्मेगतिस्तथा । अव्यङ्ग
ताशिवेभक्तिर्वैष्णवोवाभवेत्कथम् ३ (ईश्वर उवाच) तस्योत्तरमिदम्ब्रह्मन् ! पिप्पला
दस्यधीमतः । शृणुष्वयद्वक्ष्यतिवै धर्म्मपुत्रायधार्म्मिकः ४ (पिप्पलाद उवाच) साधुपृष्टं
त्वयाभद्र ! इदानींकथयामिते । अङ्गारव्रतमित्येतत्सवक्ष्यातिमहीपतेः ५ अत्राप्युदाहर
न्तीममितिहासम्पुरातनम् । विरोचनस्यसंवादं भार्गवस्यचधीमतः ६ प्रह्लादस्यसुत
न्दृष्ट्वा द्विरष्टपरिवत्सरम् । रूपेणाप्रतिमङ्कान्त्या सोऽहसद्भृगुनन्दनः ७ साधुसाधुम

विधिसे अलंकार पहरावै और ब्राह्मणीको भक्ष्य भोज्य पदार्थसे भराहुआ पात्र दे दे १५ और ब्राह्मण
के अर्थ विष्णु भगवान्की मूर्त्ति जलके कलशपर स्थापितकर सब वस्तुओं समेत दानकरै १६ इस
रीतिसे जो पुरुष अशून्य शयन नामवाले इस व्रतको करताहै और द्रव्य शाठ्य नहीं करताहै वह
स्वर्गमें वासकरता है और सौभाग्यवती स्त्री अथवा विधवा स्त्री कैसीहीहो वह सब जबतक सूर्य्य
चन्द्रमा और तारागण रहैं तबतक शोकसे रहित अपने पुरुष समेत रहती हैं और उनका वियोग भी
कभी नहीं होता १७–१८ हे पितामह उसके पुत्र पशु और रत्न इन सबका नाश भी नहीं होता–
इस अशून्य शयन व्रतको करताहुआ पुरुष सातहज़ार सातसौ ७७०० कल्पोंतक विष्णुलोकमें प्राप्त
रहताहै १९ ॥ इतिश्रीमत्स्यपुराणभाषाटीकायांसप्ततितमोऽध्यायः ७० ॥

शिवजी बोले–हे ब्रह्माजी अब द्वापर युगके अन्तमें होनेवाले रूप सम्पत्ति विधायक उस अन्य
व्रतको तुम सुनों जिसमें कि युधिष्ठिरादिकोंके साथ पिप्पलादिक ऋषियोंका संवादहै १ नैमिषार-
ण्यक्षेत्रमें वसतेहुए पिप्पलादादिक महामुनियोंके पास जाकर धर्मका पुत्र युधिष्ठिर एकप्रश्नकरैगा २
अर्थात् युधिष्ठिरने पूंछा कि हे महामुने आरोग्य–ऐश्वर्य्य और धर्ममें बुद्धि यह सब कैसे बनेरहैं और
शिवजीमें तथा विष्णुमें कुटिलता रहित भक्ति कैसे होय ३ शिवजी कहते हैं कि हे ब्रह्मन् उन पि-
प्पलादादिक मुनियोंसे जैसे जो २ प्रश्न युधिष्ठिरादिनेकिये उनको मैं तुमसेकहताहूं ४ पिप्पलादादि
कहतेभये कि हे महीपते तैंने यह बहुत अच्छा प्रश्नकिया अब मैं इस प्रश्नको तुझसे कहताहूं ५
इस इतिहासमें विरोचनका और भार्गवका पुरातन संवादहै–६ किसी समय सोलहवर्षकी आयुवाले
उत्तम कान्तियुक्त स्वरूपवान् प्रह्लादके पुत्र विरोचनको देखकर शुक्राचार्य्यजी हंसतेहुए यह कहने

हाबाहो विरोचन ! शिवन्तव । तत्तथाहसितन्तस्य पप्रच्छसुरसूदनः ८ ब्रह्मन् किमर्थंमे
तत्ते हास्यमाकस्मिकंकृतम् । साधुसाध्वितिमामेव मुक्तवांस्त्वंवदस्वमे ९ तमेवंवादिनं
शुक्र उवाच वदतांवरः । विस्मयाद्व्रतमाहात्म्याद्धास्यमेतत्कृतम्मया १० पुरादक्षविनाशा
य कुपितस्यतुशूलिनः । अथतद्भीमवक्त्रस्य स्वेदविन्दुर्ललाटजः ११ भित्त्वाससप्तपाता
लानदहत्सप्तसागरान् । अनेकवक्त्रनयनो ज्वलज्ज्वलनभीषणः १२ वीरभद्रइतिख्या
तः करपादायुतैर्युतः । कृत्वासौयज्ञमथनम्पुनर्भूतलसम्भवः । त्रिजगन्निर्दहन्भूयः शिवेन
विनिवारितः १३ कृतन्त्वयावीरभद्र ! दक्षयज्ञविनाशनम् । इदानीमलमेतेन लोकदाहेन
कर्म्मणा १४ शान्तिप्रदातासर्व्वेषां ग्रहाणाम्प्रथमोभव । प्रेक्षिष्यन्तेजनाःपूजां करिष्य
न्तिवरान्मम १५ अङ्गारकइतिख्यातिङ्गमिष्यासिधरात्मज ! । देवलोकेद्वितीयञ्च तवरू
पम्भविष्यति १६ येचत्वाम्पूजयिष्यन्ति चतुर्थ्यान्त्वद्दिनेनराः । रूपमारोग्यमैश्वर्यन्ते
ष्वनन्तम्भविष्यति १७ एवमुक्तस्तदाशान्तिमगमत्कामरूपधृक् । सञ्जातस्तत्क्षणा
द्राजन् ! ग्रहत्वमगमत्पुनः १८ सकदाचिद्भवांस्तस्य पूजार्घादिकमुत्तमम् । दृष्टवा
न्क्रियमाणञ्च शूद्रेणचव्यवस्थितः ! १९ तेनत्वंरूपवाञ्जातः सुरशत्रुकुलोद्वह ! । वि
विधाचरुचिर्ज्जातायस्मात्तवविदूरगा २० विरोचनइतिप्राहुर्य्यस्मात्त्वान्देवदानवाः ।

लगे कि हे महाबाहु विरोचन साधु साधु अर्थात् आनन्द कुशलहै इस प्रकार हास्यपूर्वक कुशल पूछनेके पीछे वह दैत्यराज पूछने लगा ७।८ कि हे ब्रह्मन् आप सत्य २ कहिये कि आपने मुझसे साधु साधु कहके किस निमित्त हास्यकियाहै ९ विरोचनके इसवचनको सुनकर शुक्राचार्य्य बोले कि मैंने तेरे व्रतके माहात्म्यके आश्चर्य्यसे यह हास्य कियाहै १० अब व्रतके माहात्म्यको कहते हैं—पहले दक्षके शापके नाशके निमित्त शिवजीने जो क्रोधाकिया तब शिवजीके मस्तकसे पसीनेकी बूंद गिरी ११ वह बूंद सात पातालोंको भेदकर सातों समुद्रोंको भस्मकरडालती भई फिर वही बूंद अनेक मुखोंकी ज्वालाओंसे जलतेहुए नेत्रवाला महाभयंकर हाथ पैरों से युक्त होकर वीरभद्रनाम से उत्पन्न होताभया वही दक्षके यज्ञको विध्वंसकरके पृथ्वी में उत्पन्नहोकर जब त्रिलोकीको भस्म करनेलगा तब शिवजीने निवारणकरदिया १२ । १३ अर्थात् शिवजीने कहा कि हे वीरभद्र तैंने दक्षका यज्ञ विध्वंसकरदिया अब त्रिलोकीको भस्म मतकर तू शान्तिकरनेवाला ग्रहोंमें मुख्य और प्रथम होगा मेरे बरसे सब लोग तेरी पूजाकरेंगे १४ । १५ तू अंगारक नाम पृथ्वीका पुत्र भौम कहलावेगा देवलोकमें तेरा दूसरा रूप होगा १६ चतुर्थी मंगलवारके दिन जो मनुष्य तेरा पूजन करेंगे उनके रूप आरोग्य और ऐश्वर्य्य यह सब अनन्त फलदायक होंगे १७ शिवजी के ऐसे वचन सुनतेही वह पृथ्वीका पुत्र उसीसमय शान्तहोगया फिर इसके पीछे वह ग्रहहोताभया १८ उसग्रहकी पूजा कोई शूद्र कररहाथा उससमय उसपूजनको तू देखताभया इसीसे तू ऐसा रूपवान् हुआहै और दूर पहुंचनेवाली तेरी उत्तम कान्ति होगई है इस हेतुसे तुझको देवता दानव आदिक सब विरोचन कहते हैं शूद्रके करतेहुए व्रतके देखने से तेरी रूपकी सम्पत्ति होगई इस बातको देखके मैं

शूद्रेणक्रियमाणस्यव्रतस्यतवदर्शनात् २१ ईदृशींरूपसम्पत्तिंदृष्ट्वाविस्मितवानहम्। साधुसाध्वितितेनोक्तं महीमाहात्म्यमुत्तमम् । पश्यतोऽपिभवेद्रूपमैश्वर्यंकिमुकुर्वतः २२ यस्माच्चभक्त्याधरणीसुतस्य विनिन्द्यमानेनगवादिदानम्। आलोकितन्तेनसुरारिगर्भेसम्भूतिरेषातवदैत्य ! जाता २३ (ईश्वर उवाच) अथतद्वचनंश्रुत्वा भार्गवस्यमहात्मनः। प्रह्लादनन्दनोवीरः पुनःपप्रच्छविस्मितः २४ (विरोचन उवाच) भगवंस्तद्व्रतंसम्यक् श्रोतुमिच्छामितत्त्वतः। दीयमानन्तुयद्दानं मयादृष्टंभवान्तरे २५ माहात्म्यञ्चविधिंतस्य यथावद्वक्तुमर्हसि। इतितद्वचनंश्रुत्वा पुनःप्रोवाचविस्तरात् २६ (शुक्र उवाच) चतुर्थ्यङ्गारकदिने यदाभवतिदानव !। मृदास्नानंतदाकुर्यात् पद्मरागविभूषितः २७ अग्निर्मूर्द्धादिवोमन्त्रं जपन्नास्तेउदङ्मुखः। शूद्रस्तूष्णींस्मरन्भौममास्तेभोगविवर्जितः २८ तथास्तमितआदित्ये गोमयेनानुलेपयेत् । प्राङ्गणंपुष्पमालाभिरक्षताभिःसमन्ततः २९ अभ्यर्च्याभिलिखेत्पद्मं कुंकुमेनाष्टपत्रकम्। कुंकुमस्याप्यभावेतु रक्तचन्दनमिष्यते ३० चत्वारःकरकाःकार्या भक्ष्यभोज्यसमन्विताः। तण्डुलैरक्तशालीयैःपद्मरागैश्चसंयुताः ३१ चतुःकोणेषुतान्कृत्वा फलानिविविधानिच। गन्धमाल्यादिकंसर्वं तथैवविनिवेदयेत् ३२ सुवर्णशृङ्गींकपिलामथार्च्य रौप्यैःखुरैःकांस्यदोहांसवत्साम्। धुरन्धरंरक्तमतीवसौम्यं धान्यानिसप्ताम्बरसंयुतानि ३३ अंगुष्ठमात्रंपुरुषंतथैव सौवर्णमत्यायतबाहुदण्डम्। चतुर्भुजंहेम

आश्चर्य्य से हंसताथा और साधु साधु ऐसा वचन कहाथा कि अहो इस व्रतके देखनेका भी ऐसे माहात्म्य हुआ और जो कदाचित् इस भौम के व्रतको करे तो न जानिये उसको क्या फल होय १९। २२ हे दैत्यराज तैंने भौमके व्रत में निन्दा से रहितहोकर भक्तिपूर्व्वक गौ आदिका दान देखाथा इसीसे दैत्य कुलमें भी तेरा ऐसा उत्तम रूप होगयाहै २३ शिवजी कहते हैं कि इसके पीछे वह विरोचन शुक्राचार्य्यके वचनों को सुनकर आश्चर्य्य से फिर पूछनेलगा २४ कि हे भगवन् उस व्रतको और पूर्व्वजन्ममें दियेहुए दानको मैं अच्छी रीतिसे विस्तारपूर्व्वक सुनना चाहताहूं २५ आप उस व्रतके माहात्म्य और विधिको यथार्थ रीतिसे वर्णन कीजिये इस प्रकार उसके वचनको सुनकर शुक्राचार्य्यजी विस्तारसे कहनेलगे २६ शुक्रजीने कहा--हे दानव मंगलवारी चतुर्थीके दिन मृत्तिकासे स्नानकर पुखराज रत्नसे शरीरको भूषितकरै २७ अग्निर्मूर्द्धादिव--इस मंत्रको उत्तराभिमुखहोकर जपै और जो शूद्रजाति होय तो मौनहोकर भौमका ध्यानकरै उस दिन स्त्री से भोग न करै २८ सायंकालके समय अपने आंगनको गोबरसे लीपकर चारोंओर पुष्पोंकी माला और अक्षतोंको स्थापितकरै २९ वहाँ मंगलका पूजन करके केशरका अष्टदल कमल लिखे केशर न होय तो लालचन्दन से लिखना श्रेष्ठहै ३० उस स्थानमें भक्ष्य भोज्य पदार्थोंसे युक्त कियेहुए चार कलशोंको स्थापितकरै उनमें सांठीके चांवल और पुखराजको डाले ३१ यह सब करके उनको चारों कोनों में स्थापित करदे और उनपर अनेक प्रकारके फल पुष्प और गन्धादिक भी स्थापितकरै ३२ फिर सूवर्णके श्रृंग चाँदीके खुर और कांस्य दोहिनी इनसबसेयुक्त सवत्सा कपिला गौ और धुरन्धर बैलका

मयेनिविष्टंपात्रेगुडस्योपरिसर्पिर्युक्तम् ३४ समस्तयज्ञायजितेन्द्रियायपात्रायशीलान्वयसंयुताय। दातव्यमेतत्सकलंद्विजायकुटुम्बिनेनैवतुदाम्भिकाय। समर्पयेद्द्विप्रवरायभक्त्या कृताञ्जलिःपूर्वमुदीर्यमन्त्रम् ३५ भूमिपुत्र! महाभाग! स्वेदोद्भव! पिनाकिनः। रूपार्थी त्वाम्प्रपन्नोहं गृहाणार्घ्यंनमोऽस्तुते ३६ मन्त्रेणानेनदत्त्वार्घ्यं रक्तचन्दनवारिणा। ततोऽर्चयेद्द्विप्रवरं रक्तमाल्याम्बरादिभिः ३७ दद्यात्तेनैवमन्त्रेणभौमङ्गोमिथुनान्वितम्। शय्याञ्चशक्तितोदद्यात्सर्वोपस्करसंयुताम् ३८ यद्यदिष्टतमंलोके यच्चास्यदयितंगृहे। तत्तद्गुणवतेदेयन्तदेवाक्षयमिच्छता ३९ प्रदक्षिणंततःकृत्वांविसर्ज्यद्विजपुङ्गवम्। नक्तमक्षारलवणमश्नीयाद्घृतसंयुतम् ४० भक्त्यायस्तुपुनःकुर्यादेवमङ्गारकाष्टकम्। चतुरोवाथवातस्य यत्पुण्यन्तद्वदामिते ४१ रूपसौभाग्यसम्पन्नः पुनर्जन्मनिजन्मनि। विष्णौवाथशिवे भक्तः सप्तद्वीपाधिपोभवेत् ४२ सप्तकल्पसहस्राणि रुद्रलोकेमहीयते। तस्मात्त्वमपिदैत्येन्द्र! व्रतमेतत्समाचर ४३ (पिप्पलाद उवाच) इत्येवमुक्त्वाभृगुनन्दनोऽपि जगामदैत्यश्चचकारसर्वम्। त्वंचापिराजन्! कुरुसर्वमेत द्यतोऽक्षयंवेदविदोवदन्ति ४४ (ई

ब्राह्मणको दानकरै उस गौ और वृषभके साथ सप्तधान्योंकाभी सात वस्त्रोंमें बांधकर दानकरै ३३ अंगुष्ठ प्रमाण सुवर्णका पुरुष बनवावै परन्तु उसकी भुजा लंबी बनवावै उस चार भुजावाली मूर्त्तिको सुवर्णकेही पात्रमें स्थापितकरै और उस मूर्त्ति समेत पात्रको घृत युक्त गुड़पर स्थापितकरै ३४ फिर संपूर्ण यज्ञकरनेवाला जितेन्द्रिय पुरुष सत्पात्र शील गुण युक्त कुटुम्बी ब्राह्मणको वह सब दानकरदे पाखण्डीको कभी न दे उत्तम ब्राह्मणके अर्थ दानदेकर अंजली बाँध खड़ाहोकर इस आगे कहे हुए मंत्रका उच्चारणकरै ३५ मन्त्र--हे भूमि पुत्र हे महाभाग तुम शिवजीके पसीनेसे उत्पन्नहुए हो मैं रूपके निमित्त तुम्हारी शरणहुआहूं आप प्रसन्न हूजिये आपके अर्थ नमस्कारहै मेरे अर्घको ग्रहण करो ३६ इस मन्त्र करके रक्तचन्दनसे मिश्रित जलका अर्घदानकरै फिर लालचन्दन पुष्प और वस्त्रादिकोंसे उत्तम ब्राह्मणका पूजनकरै ३७ और इसी मन्त्रसे भौमके निमित्त गो मिथन अर्थात् एक गौ और बैलका दानकरै फिर शक्तिके अनुसार संपूर्ण वस्तुओंसे संयुक्तकीहुई सुन्दर शय्याका दानकरै ३८ संसारमें जो२ उत्तम वस्तुहैं अथवा व्रतकरनेवालेको जो२ प्रिय वस्तुहोय वह सब अक्षय गुणों की इच्छाकरनेवाला पुरुष ब्राह्मणके अर्थ दानकरै ३९ इसके अनन्तर ब्राह्मणकी प्रदक्षिणाकरके विसर्जन करदेवे फिर रात्रिमें घृत संयुक्त अलौना अन्न भोजनकरै ४० जो पुरुष इस मंगलके आठ वा चार व्रतोंको भक्तिपूर्वक उक्तरीति से करता है उसको जो पुण्य फल होताहै उसको मैं कहताहूं ४१ कि व्रतकरनेवाला रूप सौभाग्य से सम्पन्न जन्म जन्ममें विष्णु और शिवजीकी भक्तिका करनेवाला होकर सातोंद्वीपों का राजाहोता है ४२ मरनेकेपीछे सातहज़ार कल्पोंतक शिवलोकमें निवासकरता है हे दैत्येन्द्र इस हेतु से तुमभी इस व्रतको करो ४३ पिप्पलाद मुनिकहते हैं कि इस प्रकारसे इस व्रतको कहकर वह शुक्राचार्य्य जी चलेजातेभये और वह दैत्य उसीप्रकार से इस व्रतको विधिपूर्वक करताभया हे राजन् इस अक्षय व्रतको तुमभी भक्तिसेकरो ४४ इसप्रकार पिप्प-

श्वर उवाच) तथेतिसंपूज्यसपिप्पलादं वाक्यञ्चकाराद्भुतवीर्यकर्मा । शृणोतियश्चैन
मनन्यचेतास्तस्यापिसिद्धिंभगवान्विधत्ते ४५ ॥

इति श्रीमत्स्यपुराणे एकसप्ततितमोऽध्यायः ७१ ॥

(पिप्पलाद उवाच) अथातःशृणुभूपाल ! प्रतिशुक्रंप्रशान्तये। यत्रारम्भेऽवसानेच
तथाशुक्रोदयेत्विह १ राजतेवाथसौवर्णे कांस्यपात्रेऽथवापुनः । शुक्लपुष्पाम्बरयुते सित
तण्डुलपूरिते २ विधायराजतंशुक्रं शुचिमुक्ताफलान्वितम् । मन्त्रेणानेनतत्सर्वं सामगा
यनिवेदयेत् ३ नमस्तेसर्वलोकेश ! नमस्तेभृगुनन्दन !। कवे ! सर्वार्थसिद्ध्यर्थं गृह्यार्घ्या
र्घ्यंनमोऽस्तुते ४ एवमस्योदयेकुर्वन् यात्रादिषुचभारत !। सर्वान्कामानवाप्नोति विष्णु
लोकेमहीयते ५ यावच्छुक्रस्यनहृता पूजासामाल्यकैःशुभैः । बटकैःपूरिकाभिश्च गोधूमै
श्चणकैरपि । तावदन्नंनचाश्नीयात् त्रिभिःकामार्थसिद्धये ६ तद्वद्वाचस्पतेःपूजां प्रवक्ष्या
मियुधिष्ठिर ! । सुवर्णपात्रेसौवर्णममरेशपुरोहितम् ७ पीतपुष्पाम्बरयुतं कृत्वास्नात्वाथ
सर्षपैः । पलाशाश्वत्थयोगेन पञ्चगव्यजलेनच ८ पीताङ्गरागवसनो घृतहोमन्तुकारये
त् । प्रणम्यचगवासार्द्धं ब्राह्मणायनिवेदयेत् ९ नमस्तेऽङ्गिरसान्नाथ ! वाक्पते ! चबृह
स्पते !। क्रूरग्रहैःपीडितानाममृतायनमोनमः १० संक्रान्तावस्यकौन्तेय ! यात्रास्वभ्युद
येषुच । कुर्वन्बृहस्पतेःपूजां सर्वान्कामान्समश्नुते ११ ॥

इति श्रीमत्स्यपुराणे द्विसप्ततितमोऽध्यायः ७२ ॥

लाद मुनिके वचनों को सुनकर अद्भुत पराक्रमवाले राजायुधिष्ठिर भी इसव्रतको करतेभये जो पुरुष
इस व्रतको एकाग्र चित्तसे सुनेगा उसकी भी सिद्धिहोगी ४५ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायामेकसप्ततितमोऽध्यायः ७१ ॥

पिप्पलाद बोले—हे राजन् अब शुक्रदोषकी प्रशान्तिको सुनो शुक्रके उदय होनेमें तथा अस्तहोने
में चांदी वा सुवर्ण अथवा कांसीका पात्र बनवाकर उसको श्वेत पुष्प वस्त्र और चावलों से पूरित
करके १ । २ चांदीकाही शुक्रबनवा मोतियों से आभूषितकर उस पात्र परस्थापित करके आगे लि
खेहुए वचनोंकोकहकर सामवेदज्ञ ब्राह्मणके अर्थ दानकरै ३ मन्त्रवाक्य--हे सर्वलोकेश हे भृगुनन्दन
हे कवे आपको नमस्कार है इसप्रकार शुक्रके उदय होने के समय इनवस्तुओंका दानकरनेवाला पु
रुष यात्रादिकों में सब कामनादिकों को प्राप्तहोकर विष्णुलोकमें प्राप्तहोता है और जब तक श्वेत
पुष्प बड़े पूरी और गेहूं चने आदिके बनेहुए पक्वान्नसे शुक्रकी पूजानहीं करले तब तक आपभोजन
नहींकरै ऐसे नियमकरनेवाले पुरुषके अर्थ धर्म और काम यह तीनों पूरेहोतेहैं अर्थात् सिद्धहोतेहैं ४।६
हे युधिष्ठिर इसीप्रकार से बृहस्पतिका भी पूजन कहते हैं उसको भी सुनो बृहस्पतिकी सुवर्णमयी
मूर्त्ति बनवाकर उसको भी सुवर्ण पात्रमेंही स्थापितकर पीतवस्त्रपहनावै और आप सरसोंसे संयुक्त
जल वा ढाक और पीपल इनके योगका जल और पंचगव्य इन सबसे स्नानकरै ७ । ८ और पीले
वस्त्र पहन पीलाही चन्दन लगाकर घृतसे हवनकरै फिर बृहस्पतिको प्रणामकर गोदान समेत नम

(ब्रह्मोवाच) भगवन् ! भव संसार सागरोत्तारकारक ! । किञ्चिद्व्रतंसमाचक्ष्व स्वर्गारोग्यसुखप्रदम् १ (ईश्वर उवाच) सौरंधर्मंप्रवक्ष्यामि नाम्नाकल्याणसप्तमीम् । विशोकसप्तमींतद्वत् फलाढ्यांपापनाशिनीम् २ शर्करासप्तमींपुण्यां तथाकमलसप्तमीम् । मन्दारसप्तमींतद्वच्छुभदांशुभसप्तमीम् ३ सर्वानन्तफलाःप्रोक्ताः सर्वादेवर्षिपूजिताः । विधानमासांवक्ष्यामि यथावदनुपूर्वशः ४ यदातुशुक्लसप्तम्यामादित्यस्यदिनंभवेत् । सातुकल्याणिनीनाम विजयाचनिगद्यते ५ प्रातर्गव्येनपयसा स्नानमस्यांसमाचरेत् । ततःशुक्लाम्बरःपद्ममक्षताभिःप्रकल्पयेत् ६ प्राङ्मुखोऽष्टदलंमध्ये तद्वद्वृत्ताञ्चकर्णिकाम् । पुष्पाक्षताभिर्देवेशं विन्यसेत्सर्व्वतःक्रमात् ७ पूर्व्वेणतपनायेति मार्त्तण्डायेतिचानले । याम्येदिवाकरायेति विधात्रइतिनैर्ऋते ८ पश्चिमेवरुणायेति भास्करायेतिचानिले । सौम्येवैकर्तनायेति रवयेचाष्टमेदले ९ आदावन्तेचमध्येच नमोऽस्तुपरमात्मने । मन्त्रैरेभिःसमभ्यर्च्य नमस्कारान्तदीपितैः १० शुक्लवस्त्रैःफलैर्भक्ष्यैर्धूपमाल्यानुलेपनैः । स्थण्डिले पूजयेद्भक्त्या गुडेनलवणेनच ११ ततोव्याहृतिमन्त्रेण विसर्जेद्द्विजपुङ्गवान् । शक्तितः

गुरुमूर्त्तिका दानकरै ९ और यह कहै कि हे बृहस्पति जी आपक्रूरग्रहोंसे पीड़ित हुए पुरुषोंको कुशल देने वाले हो आपके अर्थ नमस्कार है १० जब बृहस्पति राशिपर गमनकरैं अथवा यात्राकरनेके दिन जो पुरुष इस रीतिसे बृहस्पतिकी पूजाकरता है वह सब कामनाओंको प्राप्तहोता है ११ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांद्विसप्ततितमोऽध्यायः ७२ ॥

ब्रह्माजी बोले–हेभगवन् शिवजी आप संसारसागरसे पारउतारनेवाले हैं इसीसे संसारसे उद्धार होनेका कोई व्रत ऐसा कहिये जो स्वर्गका और आरोग्यकाभी देनेवालाहोय १ शिवजीबोले–हेब्रह्माजी मैं उस सूर्य्य के व्रतको कहताहूं जिसका नाम कल्याणसप्तमी और विशोकसप्तमी विख्यातहै यह दोनों नामवाली सप्तमीपापोंकी नाशकरनेवाली और उत्तम फलोंकी देनेवाली हैं २ इसीप्रकार शर्करासप्तमी-पवित्रकमलसप्तमी–मन्दारसप्तमी–और शुभसप्तमी--यह सब सप्तमी अनन्त फलकी देनेवालीवर्णन करीहैं यह सब सप्तमियां संपूर्ण देवता और ऋषियों से पूजित हुईहैं इनसबका विधान मैं यथार्थ क्रमसे वर्णन करताहूं ३ । ४ जब शुक्लपक्षकी सप्तमीको रविवारहोवे वह कल्याणिनी और विजयानामवाली सप्तमीकहाती है ५ उसदिन प्रातःकाल पंचगव्य से स्नानकर श्वेत वस्त्रोंको धारण कियेहुए कमल अक्षत आदिकों समेत पूर्वाभिमुख बैठकर अष्टदल कमलबनावै उसकमलकी गोलकर्णिका वनावै फिर उस कमल के ऊपर पुष्प अक्षतादिकों से सूर्य्यदेवताको स्थापितकर पूर्वकी ओर तपनायनमः मार्त्तण्डायनमः यह कहकर अग्निकोणमें अक्षतगेरै दिवाकरायनमः कहकर दक्षिणमें विधात्रेनमः कहकर नैर्ऋत्यकोणमें ६ । ८ और वरुणायनमः यह कहकर पश्चिममें अक्षतधरै--भास्करायनमः कहके वायव्यमें और वैकर्त्तनायनमः कहकर उत्तरकी ओर अक्षत रक्खे और आठवेंदलपर रवयेनमः यह कहकर अक्षत स्थापित करै ९ आदिअन्त और मध्यमें परमात्मनेनमः यह उच्चारणकरै इन सबमन्त्रों से दिग्देवताओंको नमस्कारकरै १० श्वेतवस्त्र--फल--भक्ष्यपदार्थ धूप--पुष्पऔर चन्दनादिकों से

पूजयेद्भक्त्या गुडक्षीरघृतादिभिः। तिलपात्रंहिरण्यञ्च ब्राह्मणायनिवेदयेत् १२ एवंनिय
मकृत्सुप्त्वा प्रातरुत्थायमानवः। कृतस्नानजपोविप्रैः सहैवघृतपायसम् १३ भुक्त्वाचवेद
विदुषि विडालव्रतवर्जिते। घृतपात्रंसकनकं सोदकुम्भन्निवेदयेत् १४ प्रीयतामत्रभगवा
न्परमात्मादिवाकरः। अनेनविधिनासर्वम्मासिमासिव्रतञ्चरेत् १५ ततस्त्रयोदशेमासि गा
वैदद्यात्त्रयोदश। वस्त्रालङ्कारसंयुक्ताः सुवर्णास्याःपयस्विनीः १६ एकामपिप्रदद्याद्वा वि
त्तहीनोविमत्सरः। नवित्तशाठ्यंकुर्वीत यतोमोहात्पतत्यधः १७ अनेनविधिनायस्तु कु
र्यात्कल्याणसप्तमीम्। सर्वपापविनिर्मुक्तः सूर्य्यलोकेमहीयते। आयुरारोग्यमैश्वर्यमनन्त
मिहजायते १८ सर्वपापहरानित्यं सर्वदैवतपूजिता। सर्वदुष्टोपशमनी सदाकल्याणसप्त
मी १९ इमामनन्तफलदांयस्तुकल्याणसप्तमीम्। शृणोतिपठतेचेहसर्वपापैःप्रमुच्यते २०
इति श्रीमत्स्यपुराणे त्रिसप्ततितमोऽध्यायः ७३॥

(ईश्वर उवाच) विशोकसप्तमीन्तद्वद्वक्ष्यामिमुनिपुङ्गव!। यामुपोष्यनरःशोकं नक
दाचिदिहाश्नुते १ माघेकृष्णतिलैःस्नात्वा षष्ठ्यांवैशुक्लपक्षतः। कृताहारःकृसरया दन्त
धावनपूर्वकम्। उपवासव्रतंकृत्वा ब्रह्मचारीभवेन्निशि २ ततःप्रभातउत्थाय कृतस्नानज

वेदीके ऊपर सूर्य्यका पूजनकरै गुड़तथा नमकका दानकरै ११ इसके पीछे भक्तिपूर्वक उत्तम ब्रा-
ह्मणोंका गुड़घृत और दूधसे पूजनकरके शक्तिके अनुसार तिलपात्र और सुवर्णका उन ब्राह्मणों के
अर्थ दानकरै १२ फिर व्याहृति के मन्त्रों से द्विजोत्तमों का विसर्जन करदे ऐसेनियमकरके शयनकरै
फिर प्रातःकाल उठ स्नानजपादिकर ब्राह्मणोंके साथही घृत खीरका भोजनकरै १३ भोजन करनेके
पीछे वेदज्ञहिंसा रहित ब्राह्मणको सुवर्ण से युक्त घृतपात्र जलके कलश समेत दानकरदे १४ और
यह वचनकहै कि परमात्माभगवान् सूर्य्य प्रसन्नहो—इसविधिसे प्रतिमास सूर्य्यकाव्रतकरै फिरतेरहवें
महीने में वस्त्रालंकार और सुवर्ण के सींगों समेत दूध वाली तेरह १३ गौओं का दानकरै १५। १६
जो द्रव्यहीन होयतो एकगौका भी दानदेना योग्यहै इसव्रतका करनेवाला कुटिलता और वित्तशाठ्य
आदि न करै जो अज्ञानी पुरुष ऐसा करते हैं वह नरकमें प्राप्तहोते हैं १७ इसविधिसे जो कल्याण सप्त-
मीका व्रतकरताहै वह सब पापों से छुटकर सूर्य्यलोक में प्राप्तहोताहै और उसके आयुआरोग्य और
ऐश्वर्य्यादिक भी अनन्तगुणवाले होजातेहैं १८ यह सप्तमी सबपापोंकी हरनेवाली सम्पूर्ण दुःखोंकी
दूरकरनेवाली सब देवताओं से पूजित हुई सदाकल्याणसप्तमी कहाती है १९ जो कोई इस अनन्त
कल्याणवाली और अनन्तफलवालीकल्याणसप्तमी को सुनताहै अथवा पढ़ता पढ़ाताहै वह सब
पापों से छुटजाताहै २०॥ इति श्रीमत्स्यपुराणभाषाटीकायांत्रिसप्ततितमोध्यायः ७३॥

शिवजी बोले कि हे मुनिश्रेष्ठ अब विशोकसप्तमीका वर्णनकरते हैं इसका व्रतकरनेवाला मनुष्य
शोकको कभी नहीं प्राप्त होता है १ माघशुक्लाषष्ठीको तिलोंसेस्नानकरके मृदुखिचड़ीअथवा दाल चा-
वलका भोजनकरै फिर प्रातःकाल सप्तमी के दिन दन्तधावनपूर्वक स्नानकरके जपादिक करता
हुआ ब्रह्मचर्य्यमेंरहै और अर्कायनमः यह कहकर सुवर्णके कमलको पूजे फिर लालकनेर अथवा दो

पःशुचिः। कृत्वातुकाञ्चनम्पद्ममर्कायेतिचपूजयेत् ३ करवीरेणरक्तेन रक्तवस्त्रयुगेनच। यथाविशोकम्भुवनन्त्वंयैवादित्य ! सर्वदा। तथाविशोकतामेऽस्तु त्वद्भक्तिःप्रतिजन्मच ४ एवंसम्पूज्यषष्ठ्यान्तु भक्त्यासम्पूजयेद्द्विजान्। सुप्त्वासम्प्राश्यगोमूत्रमुत्थायकृतनैत्यकः ५ सम्पूज्यविप्रानन्नेन गुड़पात्रसमान्वितम्। तद्वस्त्रयुग्मम्पद्मञ्च ब्राह्मणायानिवेदयेत् ६ अतैललवणम्भुक्त्वासप्तम्याम्मौनसंयुतः। ततःपुराणश्रवणंकर्तव्यम्भूतिमिच्छता ७ अनेनविधिनासर्वमुभयोरपिपक्षयोः। कृत्वायावत्पुनर्माघशुक्लपक्षस्यसप्तमी ८ व्रतान्तेकलशन्दद्यात्सुवर्णकमलान्वितम्। शय्यांसोपस्करान्दद्यात् कपिलाञ्चपयस्विनीम् ९ अनेनविधिनायस्तु वित्तशाठ्यविवर्जितः। विशोकसप्तमींकुर्यात् सयातिपरमाङ्गतिम् १० यावज्जन्मसहस्राणां साग्रंकोटिशतंभवेत्। तावन्नशोकमभ्येति रोगदौर्गत्यवर्जितः ११ यंयं प्रार्थयतेकामं तन्तमाप्नोतिपुष्कलम्। निष्कामःकुरुतेयस्तु सपरंब्रह्मगच्छति १२ यःपठेच्छृणुयाद्वापिविशोकाख्याञ्चसप्तमीम्। सोऽपीन्द्रलोकमाप्नोतिनदुःखीजायतेक्वचित् १३॥

इति श्रीमत्स्यपुराणे चतुःसप्ततितमोऽध्यायः ७४॥

(ईश्वर उवाच) अन्यामपिप्रवक्ष्यामि नाम्नातुफलसप्तमीम्। यामुपोष्यनरःपापाद्विमुक्तःस्वर्गभाग्भवेत् १ मार्गशीर्षेशुभेमासि सप्तम्यांनियतव्रतः। तामुपोष्याथकमलं

रक्तवस्त्रों समेत करके उसका दानकरदे और ऐसावचनकहै कि हे सूर्यदेवता जैसे तुम्हारा लोक सदा शोकरहितरहताहै इसीप्रकार मैं भी शोकसेरहितरहूं और मेरी भक्तिकाउदयहोय २।४ इसीप्रकार भक्तिसेषष्ठी के दिन ब्राह्मणोंका पूजनकरै और प्रातःकाल उठ गोमूत्रका आचमनकर नित्यक्रिया पूर्वक ५ अन्नसे ब्राह्मणोंका पूजनकरके गुड़से वा दो वस्त्रोंसे युक्तकियेहुए उस पूर्वोक्त कमलको ब्राह्मणके अर्थ दानकरै ६ सप्तमीके दिन तेलका और नमकका भोजननहींकरै मौन धारणरक्खे फिर ऐश्वर्य्यकी इच्छाकरनेवाला पुरुष पुराणको सुनै ७ इस सब विधिसे दोनों पक्षोंमें इसव्रतको अगले माघकी शुक्लपक्षकी सप्तमीतककरै ८ फिरव्रतके अन्तमें सुवर्ण के कमलसे युक्तकियेहुए कलशका दानकरै और सर्व सामग्री समेत शय्याका दानकरै इसके साथदूधवाली गौका भी दानकरै जो पुरुष वित्तकीशठता से रहित इस विधिके अनुसार भक्तिपूर्वक विशोक सप्तमीका व्रतकरताहै वह परमगति को प्राप्तहोताहै ९।१० उसको दशपद्मजन्मोंतक कभी शोक नहीं होताहै और रोग दुःखादि से भी रहित होताहै ११ इस व्रतकाकर्त्ता जिन २ कामनाओंकी इच्छाकरताहै वह सब कामनाउसको प्राप्त होती हैं और जो निष्कामहोकर करताहै वह परब्रह्ममें लीनहोजाताहै १२ इस व्रतको जो पढ़ता सुनता अथवा सुनाताहै वहभी इन्द्रलोक में प्राप्त होकर कभी दुखी नहीं होता १३॥

इति श्रीमत्स्यपुराणभाषाटीकायां चतुस्सप्ततितमोऽध्यायः ७४॥

शिवजीबोले--कि अब उसफलवाली सप्तमीका वर्णन करते हैं जिसके दिन व्रतकरनेवाला पुरुष पापोंसे छूटकर स्वर्गमें जाता है १ मार्गशिरकी शुक्लासप्तमीके दिन इसरीतिसे व्रतकरै कि एक सुवर्णका कमल बनाकर खांडसे संयुक्तकरके उसको किसी कुटुम्बी ब्राह्मणके अर्थ दानकरै और चारतोले

कारयित्वातुकाञ्चनम् २ शर्करासंयुतंदद्याद् ब्राह्मणायकुटुम्बिने । रविंकाञ्चनकंकृत्वा
पलस्यैकस्यधर्म्मवित् । दद्याद्द्विकालवेलायां भानुर्मेप्रीयतामिति ३ भक्त्यातुविप्रान्सं
पूज्य चाष्टम्यांक्षीरभोजनम् । दत्त्वाकुर्यात्फलयुतं यावत्स्यात्कृष्णसप्तमी ४ तासप्युपो
ष्यविधिवदनेनैवक्रमेणतु । तद्वद्धेमफलंदत्त्वा सुवर्णकमलान्वितम् ५ शर्करापात्रसंयुक्तं
वस्त्रमाल्यसमन्वितम् । संवत्सरञ्चतेनैव विधिनोभयसप्तमीम् ६ उपोष्यदत्त्वाक्रमशः
सूर्यमन्त्रमुदीरयेत् । भानुरर्कोरविर्ब्रह्मा सूर्यःशक्रोहरिःशिवः । श्रीमान्विभावसुस्त्वष्टा व
रुणःप्रीयतामिति ७ प्रतिमासञ्चसप्तम्यामेकैकंनामकीर्त्तयेत् । प्रतिपक्षंफलत्याग मेतत्
कुर्वन्समाचरेत् ८ व्रतान्तेविप्रमिथुनम्पूजयेद्वस्त्रभूषणैः । शर्कराकलशंदद्याद्धेमपद्मदला
न्वितम् ९ यथानविफलाकामास्त्वद्भक्तानांसदारवे ! तथानंतफलावाप्तिरस्तुमेसप्तजन्म
सु १० इमामनंतफलदां यःकुर्यात्फलसप्तमीम् । सर्वपापविशुद्धात्मा सूर्य्यलोकेमहीयते
११ सुरापानादिकङ्किञ्चिद्यदत्रामुत्रवाकृतम् । तत्सर्वंनाशमायाति यःकुर्यात्फलसप्तमीम्
१२ कुर्वाणःसप्तमीञ्चेमां सततंरोगवर्जितः । भूतान्भव्यांश्चपुरुषांस्तारयेदेकविंशतिम् ।
यःशृणोतिपठेद्वापि सोऽपिकल्याणभाग्भवेत् १३ ॥

इति श्रीमत्स्यपुराणे पञ्चसप्ततितमोऽध्यायः ७५ ॥

सुवर्णकी मूर्त्तिबनवाके सप्तमीकेदिन प्रदोषकालमें धर्मज्ञपुरुष ब्राह्मणको दानकरै और यह वचन भी
कहै कि हे सूर्य्यमुझपर प्रसन्नहूजिये २।३ फिर भक्तिसे अष्टमीके दिन ब्राह्मणोंका पूजनकरके उनको
दूधका भोजन करवावे और प्रतिमास कृष्णपक्षकी सप्तमीके दिनफलकादानकरै ४ इसविधिसे सुवर्णकाफल
और कमल शर्करायुक्त पात्र वस्त्र और पुष्प इनसबका दान वर्ष दिनतक महीने २ की
दोनोंपक्षकीसप्तमीके दिनकरना योग्य है ५ । ६ ऐसे व्रतकरके महीनों के क्रमसे भानु १ अर्क २
रवि ३ ब्रह्मा ४ सूर्य्य ५ शुक्र ६ हरि ७ शिव ८ श्रीमान् ९ विभावसु १० त्वष्टा ११ वरुण १२
इनदेवताओंके उद्देश से दानकरै ७ महीने २ की सप्तमीको एक २ नामकाउच्चारणकरै--पक्ष २ की
सप्तमीको फलोंकादानकरै ८ व्रतके अन्तमें ब्राह्मण ब्राह्मणी के जोड़ेका पूजनकरै वस्त्राभरण देकर
सुवर्णके कलशसे संयुक्तकिया खांड़सेभराहुआ कलशदानकरै ९ और यह वचनकहै कि हे सूर्य्य जैसे
तेरे भक्तोंके मनोरथ कभी निष्फल नहीं होतेहैं उसीप्रकार जन्म जन्मान्तरों में मुझको भी अनन्त
फलोंकी प्राप्तिहो १० इस अनन्तफलदेनेवाली सप्तमी को जो व्रतकरता है वह सब पापोंसे विमुक्त
होकर सूर्य्य लोकमें प्राप्तहोता है ११ और मदिरा पानादिक जो कुकर्म कियेहोंय वह सब तत्कालही
नष्टहोजाते हैं १२ इस प्रकारसे इस सप्तमी के व्रत करनेवाले को कभी रोग नहीं होता और आगे
पीछे होनेवाले इक्कीस पुरुषों को उद्धार करताहै जो इस व्रतको पढ़ता सुनता अथवा सुनाताहै वह
भी कल्याण का अधिकारी होताहै १३ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांपंचसप्ततितमोऽध्यायः ७५ ॥

(ईश्वर उवाच) शर्करासप्तमींवक्ष्ये तद्वत्कल्मषनाशिनीम् । आयुरारोग्यमैश्वर्यं ययानन्तम्प्रजायते १ माधवस्यासितेपक्षे सप्तम्यान्नियतव्रतः । प्रातःस्नात्वातिलैःशुक्लैः शुक्लमाल्यानुलेपनः २ स्थण्डिलेपद्ममालिख्य कुंकुमेनसकर्णिकम् । तस्मिन्नमःसवित्रेतु गन्धधूपौनिवेदयेत् ३ स्थापयेदुदकुंभञ्च शर्करापात्रसंयुतम् । शुक्लवस्त्रैरलंकृत्य शुक्लमाल्यानुलेपनैः । सुवर्णेनसमायुक्तं मन्त्रेणानेनपूजयेत् ४ विश्ववेदमयोयस्माद्वेदवादीतिपठ्यसे । सर्वस्यामृतमेवत्वमतःशान्तिम्प्रयच्छमे ५ पञ्चगव्यन्ततःपीत्वा स्वपेत्तत्पार्श्वतःक्षितौ । सौरसूक्तंस्मरन्नास्ते पुराणश्रवणेनच ६ अहोरात्रेगतेपश्चादष्टम्यांकृतनैत्यकः । तत्सर्वंविदुषेतद्वद्ब्राह्मणायनिवेदयेत् ७ भोजयेच्छक्तितोविप्राञ्छर्कराघृतपायसैः । भुञ्जीतातैललवणं स्वयमप्यथवाग्यतः ८ अनेनविधिनासर्वं मासिमासिसमाचरेत् । संवत्सरान्तेशयनं शर्कराकलशान्वितम् ९ सर्वोपस्करसंयुक्तं तथैकांगांपयस्विनीम् । गृहञ्चशक्तिमान्दद्यात्समस्तोपस्करान्वितम् १० सहस्रेणाथनिष्काणां कृत्वा दद्याच्छतेनवा । दशभिर्वाथनिष्केण तदर्द्धेनापिशक्तितः ११ सुवर्णाश्वःप्रदातव्यः पूर्ववन्मंत्रवादनम् । नवित्तशाठ्यंकुर्वीत कुर्वन्दोषंसमश्नुते १२ अमृतम्पिबतोवक्त्रात्सूर्य्यस्या

शिवजी कहते हैं कि इसीप्रकार उस सबपापोंकी नाशकरनेवाली शर्करा सप्तमीको भी वर्णनकरताहूं जिसके कि प्रभावसे आयु आरोग्य और ऐश्वर्य्य यह सब प्राप्तहोते हैं--१ वैशाख शुक्ला सप्तमीको प्रातःकाल श्वेततिल युक्त जलसे स्नानकर श्वेतपुष्प अनुलेप और चन्दनादिक धारणकरै २ वेदीमें केशरसे उत्तम दलोंसमेत कमल लिखे उसमें सवित्रेनमः इस मंत्रसे पुष्प गंधादिचढ़ावै ३ फिर शर्कराके पात्रसमेत जलका कलश उसपर स्थापितकरै और श्वेत चन्दन अक्षत पुष्प और वस्त्रसे उसको आच्छादितकरै और सुवर्ण से युक्तकरके इन वचनों से पूजनकरै ४ कि विश्वमें आप वेदमय हो इस हेतुसे वेदवादी कहातेहो तुम सबको अमृतरूप हो इस कारण आप मेरी शान्तिकरो यह सूर्य्य के मंत्रका अर्थ है ५ फिर पंचगव्य पीकर उसमूर्त्तिकेही समीप पृथ्वीपर शयनकरै सूर्य्यकेही मंत्रका पाठकरै--पुराणकोसुनै ६ जब एकदिन और रात्रि व्यतीत होजाय तब अष्टमी के दिन नित्य कर्मकरके वह सब वस्तु ब्राह्मणको दे दं ७ शक्तिके अनुसार ब्राह्मणों का भोजनकरवावे परन्तु शर्करा--घृत और खीर इन्हीं वस्तुओं को खिलावै तेल और निमक का भोजन नहीं करावै और आपभी नियमपूर्वक इसी विधिसे भोजनकरै इस विधिसे प्रतिमास संपूर्ण आचरणकरै जब एकवर्ष व्यतीत होजाय तब शर्कराके पात्रसमेत कलश संपूर्ण शय्याकी सामाग्रियों से और उत्तम गौसे युक्त शय्याका दानकरै और जो सामर्थ्यहोय तो सबखानेपीने आदि गृहस्थीकी द्रव्योंसे पूर्ण कियाहुआ गृहका दानकरै फिर यथाशक्ति सौ १०० निष्कका (एकनिष्कचाररुपयेका) वा दश निष्कका अथवा पांचही निष्कों का एक सुवर्णका घोड़ाबनवाके पूर्व कहेहुए मंत्रोंसे दानकरै वित्तशाठ्य न करै और खर्चकरने में लोभ न करै क्योंकि लोभकरनेमें दोषहोता है ८ । १२ अमृत पीतेहुए सूर्य्यके मुखसे अमृत की बूंदगिरतीहुई उसीसे शाली चावल मूंग और ईख यह तीनों वस्तु उत्पन्न होतीभईं इनतीनों में परम उत्तम

मृतविंदवः । निपेतुर्यैतदुत्थामी शालिमुद्गेक्षवःस्मृताः १३ शर्करातुपरातस्मादिक्षुसारोऽमृतात्मवान् । इष्टारवेरतःपुण्या शर्कराहव्यकव्ययोः १४ शर्करासप्तमीचेयं वाजिमेधफलप्रदा । सर्वदुष्टप्रशमनी पुत्रपौत्रप्रवर्द्धिनी १५ यःकुर्यात्परयाभक्त्या सर्वैसद्गतिमाप्नुयात् । कल्पमेकंवसेत्स्वर्गे ततोयातिपरम्पदम् १६ इदमनघंयःशृणोतिस्मरेद्वा परिपठतीहसुरेश्वरस्यलोके । मतिमपिचददातिसोऽपिदेवैरमरबधूजनमालयाभिपूज्यः १७ ॥

इति श्रीमत्स्यपुराणे षट्सप्ततितमोऽध्यायः ७६ ॥

(ईश्वर उवाच) अतःपरम्प्रवक्ष्यामि तद्वत्कमलसप्तमीम् । यस्याःसङ्कीर्तनादेव तुष्यतीहदिवाकरः १ वसन्तामलसप्तम्यां स्नातःसन्गौरसर्षपैः । तिलपात्रेचसौवर्णे विधायकमलंशुभम् २ वस्त्रयुग्मावृतंकृत्वा गंधपुष्पैःसमर्चयेत् । नमःकमलहस्ताय नमस्तेविश्वधारिणे ३ दिवाकर ! नमस्तुभ्यं प्रभाकर ! नमोऽस्तुते । ततोद्विकालवेलायामुदकुम्भसमन्विताम् ४ विप्रायदद्यात्सम्पूज्य वस्त्रमाल्यविभूषणैः । शक्त्याचकपिलांदद्यादलंकृत्यविधानतः ५ अहोरात्रेगतेपश्चादष्टम्याम्भोजयेद् द्विजान् । यथाशक्त्याथभुञ्जीत मांसतैलविवर्जितम् ६ अनेनविधिनाशुक्लसप्तम्यांमासिमासिच । सर्वसमाचरेद्भक्त्या वित्तशाठ्यविवर्जितः ७ व्रतांतेशयनंदद्यात्सुवर्णङ्कमलान्वितम् । गाश्चदद्यात्स्वशक्त्यातुसु

ईखसे खांड़बनी है क्योंकि ईखका सार अमृतासव के समान है इस हेतुसे हव्य कव्य दानमें सूर्य्य को शर्कराही प्रियहै १३--१४ इस शर्करा सप्तमीको अश्वमेध यज्ञके समान फलदेनेवाली वर्णनकी है यह सप्तमी संपूर्ण रोगोंको शान्तकरती है पुत्र पौत्रोंको बढ़ाती है १५ जो इस व्रतको परमभक्ति से करताहै उसकी सद्गतिहोतीहै वह व्रत कर्त्ता पुरुष एक कल्पतक तो स्वर्गलोकमें बासकरताहै और फिर परमपदको प्राप्तहोजाता है १६ जो कोई इस व्रतको सुनताहै स्मरण करताहै वा पढ़ताहै वह इन्द्रके लोकमें प्राप्तहोताहै जो इस व्रतके करनेकी किसीको अनुमति देताहै वहभी देवताओं की स्त्रियों से पूजित होकर स्वर्ग में वास करता है १७ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांषट्सप्ततितमोऽध्यायः ७६ ॥

शिवजी कहते हैं कि अब मैं उस कमल सप्तमीको कहताहूं जिसके संकीर्त्तनमात्र सेही सूर्य्य प्रसन्नहोते हैं १ वसन्त ऋतुमें शुक्लपक्षकी सप्तमीके दिन गोरी सरसोंसे स्नानकरके तिलोंका पात्र बनावै उसमें एकसुवर्णका कमल बनावै २ उसको दो वस्त्रोंसे आच्छादितकर गन्धपुष्पादिसे पूजन करै कमलहस्तायनमः विश्वधारिणेनमः इनमन्त्रोंका उच्चारणकरै ३ और कहै कि हे दिवाकर तुमको नमस्कार और हे प्रभाकर तुमको नमस्कार है यह कहकर सायंकाल के समय जलके कलश से युक्त उस कमलका दानकरै ४ और दानलेनेवाले ब्राह्मणको वस्त्र माला और आभूषणादिकसे पूजनकर शक्तिके अनुसार कपिलागौको आभूषितकरके दानकरै ५ जब एकदिनव्यतीतहोजाय तब अष्टमी के दिनमांस और तेलके विना सामर्थ्यके अनुसार ब्राह्मणों को भोजन करवावैं ६ इसविधिसे महीने २ की शुक्लपक्षकी सप्तमीके दिन वित्तशाठ्य से रहित सम्पूर्ण आचरणकरै किसी वस्तुमें भी

वर्णाढ्याम्पयस्विनीम् ८ भाजनासनदीपादीन्दद्यादिष्टानुपस्करान् । अनेनविधिनायस्तु कुर्यात्कमलसप्तमीम् । लक्ष्मीमनन्तामभ्येति सूर्य्यलोकेमहीयते ९ कल्पेकल्पेततोलोकान् सप्तगत्वापृथक्पृथक् । अप्सरोभिःपरिवृतस्ततोयातिपराङ्गतिम् १० यःपश्यतीदंशृणुयाद्वामर्त्यः पठेद्वाभक्त्याथमतिंददाति । सोऽप्यत्रलक्ष्मीमचलामवाप्य गन्धर्वविद्याधरलोकभाक्स्यात् ११

इति श्रीमत्स्यपुराणेसप्तसप्ततितमोऽध्यायः ७७ ॥

(ईश्वर उवाच) अथातःसंप्रवक्ष्यामि सर्वपापप्रणाशिनीम् । सर्वकामप्रदांरम्यां नाम्नामन्दारसप्तमीम् १ माघस्यामलपक्षेतु पञ्चम्यांलघुभुङ्नरः । दन्तकाष्ठंततःकृत्वा षष्ठीमुपवसेद्बुधः २ विप्रान्संपूजयित्वातु मन्दारंप्राशयेन्निशि । ततःप्रभातउत्थाय कृत्वास्नानं पुनर्द्विजान् ३ भोजयेच्छक्तितःकृत्वा मन्दारकुसुमाष्टकम् । सौवर्णंपुरुषंतद्वत् पद्महस्तंसुशोभनम् ४ पद्मंकृष्णतिलैःकृत्वा ताम्रपात्रेषुपत्रकम् । हैममन्दारकुसुमैर्भास्करायेतिपूर्वतः ५ नमस्कारेणतद्वच्च सूर्य्यायेत्यानलेदले । दक्षिणेतद्वदर्काय यथार्यम्णेतिनैर्ऋते ६ पश्चिमेवेदधाम्नेच वायव्येचण्डभानवे । पूषणेत्युत्तरतःपूज्यमानन्दायेत्यतःपरम् ७ कर्णिकायाञ्चपुरुषं स्थाप्यसर्वात्मनेतिच । शुक्लवस्त्रैःसमावेष्ट्य भक्ष्यैर्माल्यफलादिभिः ८ एव

लोभ न करै ७ जब व्रत समाप्तहोजाय तब सुवर्ण के कमल समेत शय्याका दानकरै और सुवर्णयुक्तगौका भी दानकरै इन सबके साथपात्र आसन और दीपकादिका भी दानकरै इसविधिसे जो कमल सप्तमीका व्रत करता है वह अनन्त लक्ष्मीसे युक्त होकर सूर्य्यलोकमें प्राप्तहोताहै ८ । ९ और कल्प २ के अन्तमें एक २ लोकमें प्राप्तहो सातोंलोकोंमें विचरता अप्सराओंके साथ रमण करता है और फिर मोक्षको प्राप्तहोजाता है १० इस व्रतको जो देखतासुनता कहता और आपभी कर्त्ता दूसरेको अनुमति देकरपढ़ता है वह भी इसलोकमें परमालक्ष्मीको प्राप्तहोके अन्तमें स्वर्गकोप्राप्तहोकर अप्सराओंके साथरमण करता है ११ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांसप्तसप्ततितमोऽध्यायः ७७ ॥

शिवजी कहते हैं--कि अब मैं सब कामनाओं की देनेवाली रमणीक मन्दार नामवाली सप्तमी को कहताहूं-- १ माघशुक्लापंचमी के दिनहलका भोजनकरै फिर षष्ठीके दिन दन्तधावनकर जलमेंप्रवेशकरके स्नानकरै २ ब्राह्मणोंका पूजनकर रात्रिमें नींबके पत्तोंका भक्षणकरै फिर सप्तमीको प्रातःकाल उठ स्नानादिसे निवृत्तहो शक्तिके अनुसार ब्राह्मणोंका भोजन करवावै तदनन्तर नींबके आठ फूल सुवर्ण और काले तिल इनको तांबेके पात्रमें रक्खकर पत्रबनावै फिर नींबके तथा सुवर्णके पुष्पों से पूर्व के समान सूर्य्य का आवाहनकरै ३ । ५ और सूर्य्य को नमस्कारकर अग्निकोणमें अक्षत और पुष्पोंको स्थापितकरै--दक्षिणदिशामें--अर्कायनमः नैर्ऋत्यमें--अर्य्यम्णेनमः पश्चिममें--वेदधाम्नेनमः--वायव्यमें--चंडभानवेनमः इस रीतिसे सूर्य्यको नमस्कारकर उत्तरको पूजनकरै आनन्दायनमः यह कहकर ईशानका पूजनकरै ६ । ७ कमलकी कर्णिकापर पुरुषकी मूर्त्ति स्थापितकर सर्वात्मनेनमः ऐसा कहकर उस मूर्त्तिपर श्वेत वस्त्र चढ़ावै और भक्ष्य पदार्थ समेत पुष्प फलादिकों

मभ्यर्च्यतत्सर्वं दद्याद्वेदविदेपुनः । भुञ्जीतातैललवणंवाग्यतःप्राङ्मुखोगृही ९ अनेन
विधिनासर्वं सप्तम्यांमासिमासिच । कुर्य्यात्संवत्सरंयावद्वित्तशाठ्यविवर्जितः १० एत
देवव्रतान्तेतु निधायकलशोपरि । गोभिर्विभवतःसार्द्धं दातव्यंभूतिमिच्छता ११ नमोम
न्दारनाथाय मन्दारभवनायच । त्वंरवे ! तारयस्वास्मान्संसारभयसागरात् १२ अनेन
विधिनायस्तु कुर्य्यान्मन्दारसप्तमीम् । विपाप्मासस्सुखंमर्त्यः कल्पञ्चदिविमोदते १३ इमा
मघौघपटलभीषणध्वान्तदीपिकाम् । गच्छन्प्रगृह्यसंसारे सर्वार्थांश्चलभेन्नरः १४ मन्दार
सप्तमीमेता मीप्सितार्थफलप्रदाम् । यःपठेच्छृणुयाद्वापि सर्वपापैःप्रमुच्यते १५ ॥

इति श्रीमत्स्यपुराणेऽष्टसप्ततितमोऽध्यायः ७८ ॥

(श्रीभगवानुवाच) अथान्यामपिवक्ष्यामि शोभनांशुभसप्तमीम् । यामुपोष्यनरोरोग
शोकदुःखैःप्रमुच्यते १ पुण्येचाश्वयुजेमासि कृतस्नानजपःशुचिः । वाचयित्वाततोविप्रा
नारभेच्छुभसप्तमीम् २ कपिलांपूजयेद्भक्त्या गन्धमाल्यानुलेपनैः । नमामिसूर्य्यसम्भू
तामशेषभुवनालयाम् । त्वामहंशुभकल्याणशरीरांसर्वसिद्धये ३ अथकृत्वातिलप्रस्थं ता
म्रपात्रेणसंयुतम् । काञ्चनंवृषभंतद्वद्गन्धमाल्यगुडान्वितैः ४ फलैर्नानाविधैर्भक्ष्यैर्घृतपाय
ससंयुतैः । दद्यात्द्विकालवेलायामर्यमाप्रीयतामिति ५ पञ्चगव्यञ्चसंप्राश्य स्वपेद्भूमौवि

से पूजनकरै ८ फिर वेदज्ञ ब्राह्मणके अर्थ दानकरदे और तेल तथा निमकसे रहित भोजनकरै गृह-
स्थी पुरुष तो मौन धारणकर पूर्व्वाभिमुख होकर भोजनकरै ९ इसी विधिसे प्रतिमासकी सप्तमीके
दिन एक वर्षतक इस व्रतको करै धनके खर्चनेमें कृपणता नहीं करै १० जब व्रत समाप्तहोजाय तब
इसीप्रकारसे बनायेहुए कमलको कलशपर स्थापितकरके दानकरै जो ऐश्वर्य्य होनेकी इच्छाकरताहै
उसको गौदानकरना उचितहै ११ मन्दरनाथके अर्थ नमस्कार मन्दरभवनके अर्थ नमस्कारहै हे
सूर्य्य आप हम सबको इस संसार रूपी भवसागरसे पार उतारो १२ इस विधिसे जो मन्दारस-
प्तमीका व्रतकरताहै वह पापसे रहितहोकर एक कल्पतक स्वर्गमें वासकरताहै १३ संसारके पाप रूप
भयंकर अन्धकारके निवृत्तकरनेके निमित्त यह दीपक रूप सप्तमी कही है इस व्रतके करनेसे संसार
में विचरताहुआ पुरुष सब मनोरथोंको प्राप्तहोजाताहै १४ इस वांछित फलकी देनेवाली मन्दार
सप्तमीको जो पढ़ता और सुनताहै वह सब पापोंसे छूटजाताहै १५ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायामष्टसप्ततितमोऽध्यायः ७८ ॥

श्रीभगवान् कहते हैं कि अब उस शुभ सप्तमीको कहताहूँ जिसका व्रतकरके मनुष्य सब दुःखोंसे
छुटजाताहै १ पवित्र आश्विनके महीनेमें शुभ शुक्ल पक्षकी सप्तमीके दिन स्नान जपादिसे पवित्रहो
ब्राह्मणोंसे स्वस्तिवाचन करवाके व्रतका प्रारम्भकरै २ गन्ध पुष्प और चन्दनादिकसे कपिला गौका
पूजनकरै और यह वचन कहै कि हे सूर्य्यसे उत्पन्नहोनेवाली हे सर्व भुवनोंमें स्थानवाली तुझको
नमस्कारहै मैं संपूर्ण सिद्धि और कल्याणोंके निमित्त तेरी शरण हुआहूं ३ इसके पीछे सवासेर तिल
तांबेके पात्रमें धर सुवर्णका बैल गंध माला गुड़ अनेक प्रकारके भक्ष्य पदार्थ दूध घृतके पदार्थ इन

मत्सरः। ततःप्रभातेसञ्जाते भक्त्यासंपूजयेद्द्विजान् ६ अनेनाविधिनादद्यान्मासिमासि
सदानरः। वाससीवृषभंहैमं तद्वद्गांकाञ्चनोद्भवाम् ७ संवत्सरान्तेशयनमिक्षुदण्डगुडा
न्वितम्। सोपधानकविश्रामं भाजनासनसंयुतम् ८ ताम्रपात्रेतिलप्रस्थं सौवर्णंवृषभंत
था। दद्याद्वेदविदेसर्वं विश्वात्माप्रीयतामिति ९ अनेनाविधिनाविद्वान्कुर्याद्यःशुभसप्तमी
म्। तस्यश्रीर्विपुलाकीर्तिर्भवेज्जन्मनिजन्मनि १० अप्सरोगणगन्धर्वैः पूज्यमानःसुराल
ये। वसेद्गणाधिपोभूत्वा यावदाभूतसंप्लवम्। कल्पादाववतीर्णस्तु सप्तद्वीपाधिपोभवेत्
११ ब्रह्महत्यासहस्रस्य भ्रूणहत्याशतस्यच। नाशायालमियंपुण्या पठ्यतेशुभसप्तमी १२
इमांपठेद्यःशृणुयान्मुहूर्तं पश्येत्प्रसङ्गादपिदीयमानम्। सोऽप्यत्रसर्वाघविमुक्तदेहः प्राप्नो
तिविद्याधरनायकत्वम् १३ यावत्समाःसप्तनरःकरोति यःसप्तमींसप्तविधानयुक्ताम्। स
सप्तलोकाधिपतिःक्रमेण भूत्वापदंयातिपरंमुरारेः १४॥

इति श्रीमत्स्यपुराणेनवसप्ततितमोऽध्यायः ७९॥

(मनुरुवाच) किमभीष्टवियोगशोकसंघादलमुद्धर्तुमुपोषणंव्रतंवा। विभवोद्भवका
रिभूतलेऽस्मिन् भवभीतेरपिसूदनञ्चपुंसः १ (मत्स्य उवाच) परिपृष्टमिदंजगत्प्रियन्ते वि

सब वस्तुओंसमेत उसको सायंकालके समय यह कहकर दानकरै कि हे अर्य्यमासूर्य्य प्रसन्नहूजिये ४।५ पंचगव्यका प्राशनकरै तब भोजनकरै कुटिलतासे रहितरहै पृथ्वीपर शयनकरै जब प्रातःकालहोय तब भक्तिसे ब्राह्मणोंका पूजनकरै इस विधिसे प्रतिमास दानकरै जब एक वर्ष पूराहोजाय तब सुन्दर वस्त्र सुवर्ण का बैल सुवर्ण की गौ शय्या इक्षु दंड--गुड--बिछौना--तकिया--पात्र--और आसन इत्यादिकों से युक्त शय्या दानकरै ६। ८ फिर तांबे के पात्रमें सवासेर तिल--और सुवर्ण का बैल इन दोनोंको स्थापितकरके वेदज्ञ ब्राह्मणके अर्थ दानकरै और कहै कि विश्वात्मा प्रसन्नहो ९ इस विधिसे जो विद्वान् इस शुभ सप्तमीका व्रतकरताहै उसके गृहमें बहुतसी लक्ष्मी होती है और जन्म २ में कीर्त्तिकी वृद्धि होती है १० इसके विशेष अप्सराओंके गणसे पूजितहोकर स्वर्गमें प्राप्त होताहै और प्रलयकालतक बहुतसे गणोंका अधिपति रहताहै फिर कल्पके अन्तमें पृथ्वीपर जन्मलेकर सातों द्वीपोंका अधिपति होताहै अर्थात् राजा होताहै ११ हज़ारों ब्रह्महत्या और सैकड़ों भ्रूणहत्याओं का नाश होजाताहै पढ़नेवालोंको यह शुभ सप्तमी पुण्यदात्री कहीहै १२ इस शुभ सप्तमीको जो पठन पाठनादिक करताहै अथवा सुनताहै वा एक मुहूर्त्त मात्र भी इस दिनके दियेहुए दानादिको देखता है वह सब पापोंसे छुटकर विद्याधरोंका नायक होताहै १३ सात वर्षतक सात प्रकारके विधानवाली इन सप्तमियोंको जो पुरुष करताहै वह क्रमसे सात लोकोंका अधिपति होकर फिर विष्णुलोकमें प्राप्त होताहै अर्थात् परमपदवाली मोक्षको प्राप्त होजाताहै १४॥

इतिश्रीमत्स्यपुराणभाषाटीकायामेकोनाशीतितमोऽध्यायः ७९॥

मनुजी बोले--हे भगवन् प्रियजनोंका वियोग न होना शोक न होना जिसका फलहोय और जिसके प्रभावसे इस लोक में एश्वर्य्य भी बहुतसा होय ऐसा कौनसा व्रत है उसको कृपा करके कहिये १

बुधानामपिदुर्लभंमहत्त्वात्। तवभक्तिमतस्तथापिवक्ष्येव्रतमिन्द्रासुरमानवेषुगुह्यम् २पुण्यमाश्वयुजेमासि विशोकद्वादशीव्रतम् । दशम्यांलघुभुग्विद्वानारभेन्नियमेनतु ३ उदङ्मुखःप्राङ्मुखोवा दन्तधावनपूर्वकम् । एकादश्यांनिराहारः समभ्यर्च्यतुकेशवम् । श्रियंवाभ्यर्च्यविधिवद्भोक्ष्यामित्यपरेऽहनि ४ एवंनियमकृत्सुप्त्वा प्रातरुत्थायमानवः । स्नानंसर्वौषधैःकुर्यात्पञ्चगव्यजलेनतु । शुक्लमाल्याम्बरधरः पूजयेच्छ्रीशमुत्पलैः ५ विशोकायनमः पादौ जंघेचवरदायवै । श्रीशायजानुनीतद्वदूरूचजलशायिने ६ कन्दर्पायनमोगुह्यं माधवायनमःकटिम् । दामोदरायेत्युदरम्पार्श्वेचविपुलायवै ७ नाभिञ्चपद्मनाभाय हृदयंसन्मथायवै । श्रीधरायविभोर्वक्षः करौमधुजितेनमः ८ चक्रिणेवामबाहुञ्च दक्षिणङ्गदिनेनमः । वैकुण्ठायनमःकण्ठमास्यंयज्ञमुखायवै ९ नासामशोकनिधये वासुदेवायचाक्षिणी । ललाटंवामनायेति हरयेतिपुनर्भ्रुवौ १० अलकान्माधवायेति किरीटंविश्वरूपिणे । नमः सर्वात्मनेतद्वच्छिरइत्याभिपूजयेत् ११ एवंसंपूज्यगोविन्दं फलमाल्यानुलेपनैः । ततस्तुमण्डलंकृत्वा स्थण्डिलंकारयेन्मृदा १२ चतुरस्रंसमन्ताच्च रत्निमात्रमुदक्प्लवम् । श्लक्ष्णं हृद्यंचपरितो विप्रत्रयसमावृतम् १३ अंगुलेनोच्छ्रिताविप्रास्तद्विस्तारस्तुद्व्यंगुलः । स्थ

ढ़ावे--मंगलपर मोहनभोग--बुधपै दूधसांठी के चावल चढ़ावै १९ बृहस्पतिपै चावल और दही--शुक्रपैगुड़भात--शनिपै खिचड़ी राहुपरबकरीकामांस--और केतुपै बिचित्र अन्न निवेदनकरै इसप्रकार के इन भक्ष्यपदार्थों से पूजन करै २० उस वेदीसे ईशानकोणमें दही अक्षतों से विभूषित आम्रके पत्तों से और फलवस्त्रादिकों से युक्त २१ पंचरत्नों से देदीप्य पांचलहरियोंसे शोभित छिद्ररहित उत्तमकलशको स्थापितकरै उसपर वरुणदेवता स्थापनकरै हस्ती-अश्व-रथ-सर्पकी बामी सरोवर और गौका स्थान इन सबस्थानोंकी मृत्तिका और सर्वौषधीसे युक्तकरै फिर उस जलसे यजमानका स्नान करावै और इसमन्त्रकोकहै कि संपूर्ण नदी समुद्र और नद यह सब पाप नाशकरनेके लिये यजमान के पास आओ २२ । २५ हे मुनिसत्तम इसप्रकारसे इन देवताओंका आवाहनकर पीछे घृतजव चावल और तिलादिकों से हवनकरै २६ आक-ढाक-खैर-ओंगा-पीपल-गूलर-जांटी दूब और कुशा यह समिधें क्रमसे नवग्रहोंकी कही हैं प्रत्येक ग्रहकी १०८ आहुति अथवा २८ आहुति करनी योग्य हैं शहद घृतसे हवनकरै अथवा दही युक्त साकल्यसे हवनकरै २७ । २८ यह सब समिधें प्रादेशमात्र प्रमाणवाली जड़शाखा-डाली-और पत्तोंसे रहित ऐसीहोनी चाहिये यही समिध सब कर्मों में श्रेष्ठकही हैं २९ प्रत्येक देवता की समिध और हरएकके जुदे २ मंत्र देवताके नाम सहित उच्चारण करके हवनकरै ३० घृतसे भीजाहुआ साकल्य और भक्ष्यादिक पदार्थों से हवनकरै होममें ग्रहों के मंत्रोंसे दश २ आहुतिकरै और व्याहृति मंत्रोंसे संपूर्ण होमकरै ३१ उत्तम ब्राह्मण उत्तरकी ओर मुखकरके अथवा पूर्वाभिमुख बैठके पृथक् २ देवताओं के प्रति मंत्रों से चरु हवनकरै ३२ उस च-

यस्वेतिसोमाय मन्त्रेणजुहुयात्पुनः। अग्निर्मूर्द्धादिवोमन्त्र इतिभौमायकीर्तयेत् ३४
अग्ने! विवस्वदुषस इतिसोमसुतायवै। बृहस्पते! परिदीया रथेनेतिगुरोर्मतः ३५
शुक्रन्तेअन्यदित्तिचशुक्रस्यापिनिगद्यते। शनैश्चरायेतिपुनः शन्नोदेवीतिहोमयेत् ३६
कयानश्चित्रआभुव इतिराहोरुदाहृतः। केतुंकृण्वन्नपिब्रूयात् केतूनामपिशान्तये ३७
आवोराजेतिरुद्रस्य बलिहोमंसमाचरेत्। आपोहिष्ठेत्युमायास्तु स्योनेतिस्वामिनस्त
था ३८ विष्णोरिदंविष्णुरिति तमीशेतिस्वयम्भुवः। इन्द्रमिद्देवतायेति इन्द्रायजुहुया
त्ततः ३९ तथायमस्यचायं गौरितिहोमःप्रकीर्त्तितः। कालस्यब्रह्मजज्ञानमितिमन्त्रःप्र
शस्यते ४० चित्रगुप्तस्यचाज्ञातमितिमन्त्रविदोविदुः। अग्निंदूतंवृणीमह इतिवह्नेरु
दाहृतः ४१ उदुत्तमंवरुणमित्यपांमन्त्रःप्रकीर्तितः। भूमेःपृथिव्यन्तरिक्षमितिवेदेषुप
ठ्यते ४२ सहस्रशीर्षापुरुष इतिविष्णोरुदाहृतः। इन्द्रायेन्दोमरुत्वत इतिशक्रस्यश
स्यते ४३ उत्तापर्णेसुभगेइति देव्याःसमाचरेत्। प्रजापतेःपुनर्होमः प्रजापतिरितिस्मृ
तः ४४ नमोऽस्तुसर्पेभ्य इतिसर्पाणांमन्त्रउच्यते। एषब्रह्मायऋत्विज्य इतिब्रह्मणयुदा
हृतः ४५ विनायकस्यचानूनमितिमन्त्रोबुधैःस्मृतः। जातवेदसेसुनवामितिदुर्गामन्त्र
उच्यते ४६ आदिप्रत्नस्यरेतस आकाशस्यउदाहृतः। प्राणाशिशुर्महीनाञ्च वायोर्मन्त्रः
प्रकीर्त्तितः ४७ एषोउषाअपूर्व्यादित्यश्विनोर्मन्त्रउच्यते। पूर्णाहुतिस्तुमूर्द्धानं दिवइत्य
भिपातयेत् ४८ अथाभिषेकमन्त्रेण वाद्यमङ्गलगीतकैः। पूर्णकुम्भेनतेनैव होमान्तेप्रा

रुकाहोम करके ग्रहोंका होमकरै आकृष्णेन--इस मन्त्रसे सूर्य्यके अर्थ आहुतिदे ३३ आप्यायस्व--
इसमंत्र से चन्द्रमाको-अग्निर्मूर्धादिव--इस मंत्रसे भौम के अर्थ ३४ अग्ने विवस्वदुषस--इसमंत्र से
बुधके अर्थ और बृहस्पतेपरिदीयारथेन--इसमंत्रसे बृहस्पति के अर्थ आहुतिकरै ३५ शुक्रन्तेअन्यत्-
इस मंत्र से शुक्रके अर्थ और शन्नोदेवीरभिष्ट--इस मंत्र से शनैश्चरं का हवन करै ३६ कयानश्चित्र
आभुव--इसमंत्र से राहुके अर्थ--केतुंकृण्वन्--इसमंत्र से केतु के अर्थ३७आवोराज--इसमंत्रसे शिव-
के अर्थ--आपोहिष्ठामयो--इसमंत्र से पार्वतीजी के अर्थ--स्योनापृथिवी--इसमंत्र से स्वामिकार्त्तिक
के अर्थ ३८ इदंविष्णु--इसमंत्र से विष्णु के अर्थ--तमीश--इस मंत्र से ब्रह्मा के अर्थ आहुतिदे
और इन्द्रमिद्देवताय—इसमंत्र से इन्द्रका आवाहन करै ३९ आयंगो—इसमंत्र से धर्मराज का आ-
वाहन करै—ब्रह्मजज्ञानं—इसमंत्रसे कालके अर्थ हवन करना कहाहै ४० अज्ञात—इसमंत्रसे चित्रगुप्त
के अर्थ और अग्निंदूतंवृणीमहे--इसमंत्र से अग्नि की आहुति करै ४१ और उदुत्तमंवरुण—यहमंत्र
वरुणका कहा है—पृथिव्यंतरिक्षम् यह मंत्र भूमिका है ४२ सहस्रशीर्षापुरुष--यह विष्णु का मंत्र है--
इन्द्रायेन्दोमरुत्वत--यहइन्द्र का मंत्र है ४३ उत्तापर्णेसुभगे--यह देवी का मंत्र पढ़ै और प्रजापति--
इसमंत्र से प्रजापतिका हवन करै ४४ नमोस्तुसर्पेभ्यः यह सर्पोंका मंत्र है-एषब्रह्मायऋत्विज्य-यह
ब्रह्माका मंत्रहै ४५ और अनूनम्-यह गणेशजी का मंत्र विद्वानोंने कहाहै-जातवेदसेसुनवाम्-यह दुर्गा-
का मंत्रकहाहै ४६ आदिप्रत्नस्यरतस--यहआकाश का मंत्रहै--प्राणाशिशुर्महीनांच-यहवायुका मंत्रहै ४७

अव्यंगावयवैर्ब्रह्मन् ! हेमस्रग्दामभूषितैः । यजमानस्यकर्त्तव्यं चतु
गुदङ्मुखम् ४९ अव्यंगावयवैर्ब्रह्मन् ! हेमस्रग्दामभूषितैः । यजमानस्यकर्त्तव्यं चतु
र्भिःस्नपनंद्विजैः ५० सुरास्त्वामभिषिञ्चन्तु ब्रह्माविष्णुमहेश्वराः । वासुदेवोजगन्नाथ
स्तथासङ्कर्षणोविभुः । प्रद्युम्नश्चानिरुद्धश्च भवन्तुविजयायते ५१ आखण्डलोऽग्नि
र्भगवान् यमोवैनिर्ऋतिस्तथा । वरुणःपवनश्चैव धनाध्यक्षस्तथाशिवः । ब्रह्मणासहितः
शेषो दिक्पालास्त्वामवन्तुते ५२ कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिःश्रद्धाक्रियामतिः । बुद्धिर्ल
ज्जावपुःशांतिस्तुष्टिःकान्तिश्चमातरः।एतास्त्वामभिषिञ्चन्तुधर्म्मपत्न्यःसमागताः५३
आदित्यश्चन्द्रमाभौमो बुधोजीवःसितोऽर्कजः ! ग्रहास्त्वामभिषिञ्चन्तु राहुःकेतुश्चत
र्पिताः ५४ देवदानवगन्धर्वा यक्षराक्षसपन्नगाः।ऋषयोमुनयोगावो देवमातरएवच ५५
देवपत्न्योद्रुमानागा दैत्याश्चाप्सरसांगणाः । अस्त्राणिसर्वशस्त्राणि राजानोवाहनानि
च ५६ औषधानिचरत्नानि कालस्यावयवाश्चये । सरितःसागराःशैला स्तीर्थानिजल
दानदाः । एतेत्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ५७ ततःशुक्लाम्बरधरः शुक्लगन्धानु
लेपनः । सर्वौषधैःसर्वगन्धैः स्नापितोद्विजपुङ्गवैः ५८ यजमानःसपत्नीकः ऋत्विजःसुस
माहितान् । दक्षिणाभिःप्रयत्नेन पूजयेद्गतविस्मयः ५९ सूर्य्यायकपिलांधेनुं शङ्खंदद्यात्त
थेन्दवे । रक्तंधुरन्धरंदद्याद्भौमायचककुद्मिनम् ६० बुधायजातरूपन्तु गुरवेपीतवाससी।

एषोउषा अपूर्व्यात्--यह अश्विनीकुमारोंका मंत्र है--मूर्द्धानंदिवः इसमंत्र से पूर्णाहुति करै ४८ इस
के अनन्तर अभिषेक मंत्रोंसे बाजे मंगल गीतादि युक्त होमके अन्तमें पूर्व वा उत्तरकी ओर मुख करके
उस कलशेके जलसे अभिषेक करवावै ४९ हे ब्रह्मन् अव्यंगअंगवाले सुवर्ण के आभूषण तथा माला
आदिकों से भूषितहुए चारब्राह्मणों से यजमानको स्नानकरवाना चाहिये ५० और स्नानकरवाने
के समय ब्राह्मण इसमंत्रार्थ को कहै कि ब्रह्मा विष्णु और महेश यह तीनों देवता तुम्हारे अभिषेक
को करैं और वासुदेव—जगन्नाथ—बलदेव—प्रद्युम्न और अनिरुद्ध यह सब तुम्हारा विजयकरैं ५१
इन्द्र अग्नि यम राक्षस वरुण वायु कुबेर शिव ब्रह्मा शेषनाग और दिग्पाल यह सब तुम्हारी रक्षा
करैं ५२ कीर्त्ति-लक्ष्मी-धृति—मेधा पुष्टि—श्रद्धा--क्रिया--मति--बुद्धि--लज्जा--वपु--शान्ति--तुष्टि और
कान्ति यह धर्म पत्नी माता आकर तुम्हारा अभिषेककरैं ५३ सूर्य्य--चन्द्रमा--भौम--बुध--बृहस्पति
शुक्र-शनि-राहु और केतु यह सब ग्रहभी तृप्तहोकर तुम्हारा अभिषेककरैं ५४ देवता-दानव गन्धर्व यक्ष
राक्षस पन्नग ऋषि मुनि गौ देवमातर ५५ देवपत्नी-वृक्ष-नाग-दैत्य-अप्सरा-अस्त्र सब प्रकारके शस्त्र
राजा-बाहन ५६ औषधी-रत्न-कालके अवयव-नदी-समुद्र-पर्व्वत-तीर्थ-जलके बहानेवाले नद और
छोटीनदी यह सब तुम्हारे मनोरथ की सिद्धि के अर्थ तुम्हारा अभिषेककरैं ५७ इसके पीछे सर्वगन्ध-
युक्त सर्वौषधीके जलसे उत्तम ब्राह्मणोंकेद्वारा स्नपन मार्जन करवाकर श्वेत वस्त्र धारणकर गन्धचन्द-
नादिक धारणकरै ५८ फिर वह यजमान और उसकी स्त्री दोनों ग्रन्थिबंधनपूर्व्वक दक्षिणाभिमुख
हो श्रद्धासे ऋत्विक् आदिकोंका पूजनकरै ५९ सूर्य्यके अर्थ कपिला गौ चन्द्रमाके अर्थ शंख मंगलके
अर्थ लालबैल ६० बुधके निमित्त सुवर्ण बृहस्पति के निमित्त पीतवस्त्र शुक्रके अर्थ श्वेतअश्व और शनि

श्वेताश्वन्दैत्यगुरवे कृष्णाङ्गामर्कसूनवे ६१ आयसंराहवेदद्यात् केतुभ्यश्छागमुत्तमम्।
सुवर्णेनसमाकार्य्या यजमानेनदक्षिणा ६२ सर्वेषामथवागावो दातव्याहेमभूषिताः। सु
वर्णमथवादद्याद् गुरुर्वायेनतुष्यति। समन्त्रेणैवदातव्याः सर्वाःसर्वत्रदक्षिणाः ६३ पुण्य
स्त्वंशङ्खपुण्यानांमङ्गलानाञ्चमङ्गलम्। विष्णुनाविधृतश्चासिततःशान्तिंप्रयच्छमे ६४
धर्म्मस्त्वंवृषरूपेण जगदानन्दकारक!। अष्टमूर्त्तेरधिष्ठानमतःशान्तिंप्रयच्छमे ६५ हि
रण्यगर्भगर्भस्त्वं हेमबीजंविभावसोः। अनन्तपुण्यफलदमतःशान्तिंप्रयच्छमे ६६ पी
तवस्त्रयुगंयस्माद्वासुदेवस्यवल्लभम्। प्रदानात्तस्यमेविष्णो! ह्यतःशान्तिंप्रयच्छमे ६७
विष्णुस्त्वमश्वरूपेण यस्मादमृतसम्भवः। चन्द्रार्कवाहनोनित्यमतःशान्तिंप्रयच्छमे६८
यस्मात्त्वंपृथिवीसर्वाधेनुःकेशवसन्निभा। सर्वपापहरानित्यमतःशान्तिंप्रयच्छमे६९यस्मा
दायसकर्म्माणि तवाधीनानिसर्वदा। लाङ्गलाद्यायुधादीनि तस्माच्छान्तिंप्रयच्छमे ७० य
स्मात्त्वंसर्वयज्ञानामङ्गत्वेनव्यवस्थितः। यानंविभावसोर्नित्यमतःशान्तिंप्रयच्छमे ७१
गवामङ्गेषुतिष्ठन्ति भुवनानिचतुर्दश। यस्मात्तस्माच्छ्रियेमे स्यादिहलोकेपरत्रच ७२ य
स्मादशून्यंशयनं केशवस्यचसर्वदा। शय्याममाप्यशून्यास्तु दत्ताजन्मनिजन्मनि ७३
यथारत्नेषुसर्वेषु सर्वेदेवाःप्रतिष्ठिताः। तथारत्नानियच्छन्तु रत्नदानेनमेसुराः ७४ यथा

के अर्थ कृष्णागौ यह दानकरने योग्य हैं ६१ राहुके अर्थ लोहा केतुके अर्थ बकरादानकरै अथवा यजमान चाहै तो सबग्रहोंकी सुवर्णहीकी दक्षिणादानकरै ६२ अथवा सुवर्ण से भूषितकीहुई गौका दान सबके निमित्तकरै अथवा केवल सुवर्णही दानकरै यहभी न होसकै तो जिससे गुरू प्रसन्नहोंय वह दान करै सब दक्षिणा अपने २ समान मन्त्रोंकरिकेदेनी चाहिये ६३ मंत्र--हेशंख तुम सब पुण्योंमें पुण्यरूपहो--सब मंगलों में मंगलरूपहो विष्णु भगवान् से धारण कियेगयेहो इस हेतुसे मेरे शान्तिको करो ६४ हेवृष तुम धर्मरूपकरके जगत्के आनन्दकरनेवालेहो और अष्टमूर्त्तिके अधिष्ठानहो इस निमित्तमुझे शान्तिदो ६५ हे सुवर्ण तुम हिरण्यगर्भ ईश्वर के गर्भसे उत्पन्नहुएहो सूर्य्यके भी बीजहो अनन्त फलदेनेवालेहो इसलिये मुझको शान्तिदो ६६ पीताम्बर श्रीकृष्णकोप्रियहै इसीसे मैंने इसका दानकिया है सो विष्णु भगवान् मेरे शान्तिकरो अश्वरूप और अमृतरूपसे विष्णुरूपअश्व है और सूर्य्य चन्द्रमा का भी सदैव से अश्वही बाहनहै इस हेतुसे मेरे अर्थ शान्तिकोदो ६७। ६८ हे गौ तुम विष्णु के और पृथ्वी के समानहो और सब पापों की हरनेवालीहो इसकारण मुझे शान्तिदो ६९ हे लोह हल शस्त्रादिकके सब कर्म तुम्हारे आधीन हैं इसहेतुसे आपमुझको शान्तिदो ७० हे सुवर्ण तुम यज्ञकेअंग और अग्निके कार्य्यहो इसलिये मेरी शान्ति करो ७१ गौओंके अंगोंमें चौदह भुवन स्थित हैं इसलिये मेरे अर्थ इसलोक और परलोक दोनोंमें लक्ष्मी सम्पत्तिदो यह तो गोदानका मंत्रार्थ है ७२ अब शय्याका मंत्रसुनो--जैसे कि विष्णु की शय्या कभी लक्ष्मी से शून्य नहीं है इसी प्रकार शय्यादानकरने से जन्म २ में मेरी भी शय्या परिपूर्णरहै ७३ जैसे सब रत्नों में देवताओं का बास है इसीप्रकार रत्नोंके दानकरने से सब देवतामुझको रत्नदें ७४ सब दान भूमिदानके सोलहवें

भूमिप्रदानस्यकलान्नार्हन्तिषोडशीम् । दानान्यन्यानिमेशान्तिर्भूमिदानाद्भवत्विह ७५
एवंसंपूजयेद्भक्त्या वित्तशाठ्येनवर्जितः । रत्नकाञ्चनवस्त्रौघैर्धूपमाल्यानुलेपनैः ७६
अनेनविधिनायस्तु ग्रहपूजांसमाचरेत् । सर्वान्कामानवाप्नोति प्रेत्यस्वर्गेमहीयते ७७
यस्तुपीड़ाकरोनित्यमल्पवित्तस्यवाग्रहः । तञ्चयत्नेनसम्पूज्य शेषानप्यर्चयेद्बुधः ७८
ग्रहागावोनरेन्द्राश्चब्राह्मणाश्चविशेषतः । पूजिताःपूजयन्त्येतेनिर्दहन्त्यवमानिताः ७९
यथाबाणप्रहाराणां कवचम्भवतिवारणम् । तद्वद्दैवोपघातानां शांतिर्भवतिवारणम् ८०
तस्मान्नदक्षिणाहीनंकर्तव्यंभूतिमिच्छता । सम्पूर्णयादक्षिणयायस्मादेकोऽपितुष्यति ८१
सदैवायुतहोमोऽयं नवग्रहमखेस्थितः । विवाहोत्सवयज्ञेषु प्रतिष्ठादिषुकर्म्मसु ८२ निर्वि
घ्नार्थंमुनिश्रेष्ठ! तथोद्वेगाद्भुतेषुच । कथितोऽयुतहोमोयं लक्षहोममतःशृणु ८३ सर्वका
माप्तयेयस्माल्लक्षहोमंविदुर्बुधाः । पितृणांवल्लभंसाक्षाद्भुक्तिमुक्तिफलप्रदम् ८४ ग्रहता
राबलंलब्धा कृत्वाब्राह्मणवाचनम् । गृहस्योत्तरपूर्वेण मण्डपङ्कारयेद्बुधः ८५ रुद्राय
तनभूमौवा चतुरस्रमुदङ्मुखम् । दशहस्तमथाष्टौवा हस्तान्कुर्याद्विधानतः ८६ प्रागुद
क्प्लवनाम्भूमिं कारयेद्यत्नतोबुधः । प्रागुत्तरंसमासाद्य प्रदेशम्मण्डपस्यतु ८७ शोभ
नङ्कारयेत्कुण्डं यथावल्लक्षणान्वितम् । चतुरस्रंसमन्तात्तु योनिवक्त्रंसमेखलम् ८८ च

भागकेभी समाननहीं हैं इसहेतुकरके भूमिकेदानकरने से मेरेशान्तिहोय ७५ इसप्रकार श्रद्धाकेअनुसार
रत्न-सुवर्ण-वस्त्र-धूप-पुष्प और चन्दनादिकोंसे पूजाकरै ७६ इसविधिसे जो ग्रहोंकी पूजाकरताहै वहसब
कामनाओंकी सिद्धिको प्राप्तहो अन्तसमय स्वर्गलोकमें प्राप्तहोताहै ७७ जो ग्रह कि पीड़ाकारकहोय
उसे यत्नसे विधिपूर्व्वक पूजै अन्यग्रहोंकोभी पूजै ७८ ग्रह गौ राजा ब्राह्मणआदिक सबपूजनेकेयोग्यहैं--
इनकी पूजाकरनेवाले आपभी पूजेजाते हैं अर्थात् कार्य्यसिद्धिको प्राप्तहोते हैं और नहींपूजनेवाले नष्ट
होजाते हैं ७९ जैसे कि बाणोंके प्रहारको शरीरपर पहराहुआ संजोवा और कवच सहकर पीड़ित
नहीं होने देता अर्थात् पीड़ा दूरकरताहै वैसेही प्रारब्धके कियेहुए कर्मोंकी पीड़ाको शान्ति दूर कर
देतीहै अर्थात् ग्रहादिकोंके पूजनसे दुःख निवारण होजाताहै ८० ऐश्वर्य्यके चाहनेवाले पुरुषको द-
क्षिणाहीन यज्ञ कभी न करना चाहिये अच्छी पूर्णदक्षिणासे युक्त कियाहुआ एकहीयज्ञ उत्तम कहा
है ८१ अयुत होम अर्थात् दशहज़ार मंत्रोंकी आहुतिसे हवन करना योग्यहै यहीविधि नवग्रहों के
यज्ञमें और विवाह उत्सव यज्ञ प्रतिष्टादि कर्मों में भी करनी उचितहै ८२ हे मुनिश्रेष्ठ निर्विघ्नता के
लिये तथा पूर्व्वोक्त उद्वेगादिक अद्भुत कर्मोंमें यह अयुत हवनकी विधि कहीहै अब लक्षप्रमाण हव-
नको कहताहूं ८३ विद्वान् लोगोंने सब कामनाओंकी सिद्धिके लिये लक्षहवन करना कहाहै वह
लक्ष हवन पितरोंका प्रिय और साक्षात् मुक्तिका देनेवालाहै ८४ ग्रह तारादिकोंके बल और उत्तम
मुहूर्त्तमें ब्राह्मणोंसे स्वस्तिवाचन करवाके घरके उत्तर पूर्वको ईशान कोणमें मंडप बनवावै ८५ अ-
थवा शिवालयके समीप उत्तर पूर्व्वकी ओर चौखूंटा अठारह हाथ विस्तारका मंडप बनावै ८६
बुद्धिमानीसे ईशानकोणमें बेदी बनावै यह मंडपका ईशान कोण अत्यन्त शोभित बनावै औरचारों

तुरंगुलविस्तारा मेखलातद्वदुच्छ्रिता । प्रागुदक्प्लवनाकार्या सर्वतःसमवस्थिता ८९
शान्त्यर्थंसर्वलोकानां नवग्रहमखःस्मृतः । मानहीनाधिकंकुण्डमनेकभयदम्भवेत् । य
स्मात्तस्मात्सुसम्पूर्णं शान्तिकुण्डंविधीयते ९० अस्माद्दशगुणःप्रोक्तो लक्षहोमःस्वयंभु
वा । आहुतीभिःप्रयत्नेन दक्षिणाभिस्तथैवच ९१ द्विहस्तविस्तृतन्तद्वच्चतुर्हस्तायतम्पु
नः । लक्षहोमेभवेत्कुण्डं योनिवक्त्रन्त्रिमेखलम् ९२ तस्यचोत्तरपूर्वेण वितस्तित्रयसंस्थि
तम् । प्रागुदक्प्रवणन्तच्च चतुरस्रंसमन्ततः ९३ विष्कम्भार्द्धोच्छ्रितम्प्रोक्तं स्थण्डिलं
विश्वकर्म्मणा । संस्थापनायदेवानां वप्रत्रयसमावृतम् ९४ द्व्यंगुलोह्युच्छ्रितोविप्रः प्र
थमःसउदाहृतः । अंगुलोच्छ्रयसंयुक्तं वप्रद्वयमथोपरि ९५ त्र्यंगुलस्यचविस्तारः सर्वे
षांकथ्यतेबुधैः । दशांगुलोच्छ्रिताभित्तिः स्थण्डिलेस्यात्तथोपरि । तस्मिन्नावाहयेद्देवान्
पूर्ववत्पुष्पतण्डुलैः ९६ आदित्याभिमुखाःसर्वाः साधिप्रत्यधिदेवताः । स्थापनीयामुनि
श्रेष्ठ ! नोत्तरेणपराङ्मुखाः ९७ गरुत्मानधिकस्तत्र सम्पूज्यःश्रियमिच्छता । सामध्व
निशरीरस्त्वं वाहनम्परमेष्ठिनः । विषपापहरोनित्यमतःशांतिम्प्रयच्छमे ९८ पूर्ववत्कु
म्भमामन्त्र्य तद्वद्धोमंसमाचरेत् । सहस्राणांशतंहुत्वा समित्संख्याधिकंपुनः । घृतकुम्भ
वसोर्द्धारां पातयेदनलोपरि ९९ औदुम्बरींतथार्द्रांञ्च ऋज्वींकोटरवर्जिताम् । बाहुमा

ओरसे चौखूंटा समान योनिके आकार मुखवाला मेखलाओंसे युक्त कुंडबनाना चाहिये ८७। ८८
मेखला चारअंगुल विस्तारवाली चारअंगुल ऊंची पूर्व्वसे उत्तरकी ओर ढलीहुई और सब ओरको
समान करै ८९ यह नवग्रहोंका यज्ञ सब मनुष्योंकी शान्तिके अर्थ कहाहै और इससे न्यूनाधिक
अग्निकुंडका बनाना अनेक भयों का देनेवालाहै इसलिये कुंडको अच्छेप्रकारसे ठीक २ बनावै ९०
इस हवनसे दशगुना हवन आहुतियोंसे वा दक्षिणाओं से करै इसको लक्ष हवन कहते हैं यह ब्रह्मा
जीने कहाहै ९१ उस लक्षहवनमें छः हाथ विस्तारका कुंड बनावै और योनिके आकारवाला मुख
बनावै तीन मेखलाबनावै ९२ उस कुंडके ईशान कोणकी ओर तीन बिलस्तकी चौखूंटी बेदी
बनावै ९३ वह वेदी डेढ़बिलस्त ऊंची और तीन मेखलाओंसे युक्तकरके देवताओंके स्थापनके लिये
बनावै ऐसा विश्वकर्माने कहाहै ९४ प्रथम वप्र अर्थात् मेखला दोअंगुल ऊंची और शेष बाक़ीकी दो
मेखला एक२ अंगुल ऊंची बनावै ९५ सब मेखलाओंका विस्तार तीन अंगुलकाहै उस वेदी पै दश
अंगुलऊंची भींत बनावै वहाँ पूर्व्वोक्त विधिसे पुष्प अक्षतादिकोंसे देवताओंका आवाहनकरै ९६हे
मुनिश्रेष्ठ अधिदेवता और प्रत्यधि देवताओंको सूर्य्य के सन्मुख स्थितकरै उत्तरमें पीछेको मुखकर
के स्थापित नहीं करै ९७ लक्ष्मीकी इच्छावाले मनुष्यको वहाँ गरुड़जीकाभी पूजनकरना योग्यहै-
मंत्र--तुम सामवेदकी ध्वनिके शरीरहो विष्णुके बाहनहो नित्यही विष और पापों के हरनेवाले हो
इस हेतुसे मुझको शान्तिदो ९८ यह कहकर पूर्व्वके समान कलश स्थापनादिक करके हवनका
प्रारम्भकरै लक्ष आहुतियों का हवनकरै इन आहुतियोंसेभी ग्रहोंकी समिधोंका होम अधिकहै फिर
अन्तमें अग्निपै घृतके कलशसे वसोर्द्धारा देवै ९९ गीली गूलरकी कोंपल सीधीखाट खोडररहित

त्रांस्रुचंकृत्वा ततस्तम्भद्वयोपरि । घृतधारान्तयासम्यगग्नेरुपरिपातयेत् १०० श्रावये
तूसूक्तमाग्नेयं वैष्णवंरौद्रमैन्दवम् । महावैश्वानरंसाम ज्येष्ठसामचवाचयेत् १०१ स्ना
नञ्चयजमानस्य पूर्ववत्स्वस्तिवाचनम् । दातव्यायजमानेन पूर्ववद्दक्षिणाःपृथक् १०२
कामक्रोधविहीनेन ऋत्विग्भ्यःशान्तचेतसा । नवग्रहमखेविप्राश्चत्वारोवेदवेदिनः १०३
अथवाऋत्विजौशान्तौ द्वावेवश्रुतिकोविदौ । कार्यावयुतहोमेतु नप्रसज्जेतविस्तरे १०४
तद्वद्दशचाष्टौच लक्षहोमेतुऋत्विजः । कर्तव्याःशक्तितस्तद्वच्चतुरोवाविमत्सरः १०५
नवग्रहमखात्सर्वं लक्षहोमेदशोत्तरम् । भक्ष्यान्दद्यान्मुनिश्रेष्ठ ! भूषणान्यपिशक्तितः
१०६ शयनानिसवस्त्राणि हैमानिकटकानिच । कर्णांगुलिपवित्राणि कण्ठसूत्राणिशक्ति
मान् १०७ नकुर्याद्दक्षिणाहीनं वित्तशाठ्येनमानवः । अददन्लोभतोमोहात् कुलक्षयम
वाप्नुते १०८ अन्नदानंयथाशक्त्या कर्तव्यंभूतिमिच्छता । अन्नहीनःकृतोयस्माद्दुर्भिक्ष
फलदोभवेत् १०९ अन्नहीनोदहेद्राष्ट्रं मंत्रहीनस्तुऋत्विजः । यष्टारंदक्षिणाहीनं नास्ति
यज्ञसमोरिपुः ११० नवाप्यल्पधनःकुर्याल्लक्षहोमंनरःक्वचित् । यस्मात्पीडाकरोनित्यं
यज्ञेभवतिविग्रहः १११ तमेवपूजयेद्भक्त्या द्वौवात्रीन्वायथाविधि । एकमप्यर्चयेद्भक्त्या
ब्राह्मणंवेदपारगम् । दक्षिणाभिःप्रयत्नेन नबहूनल्पवित्तवान् ११२ लक्षहोमस्तुकर्तव्यो

भुजाके समान लंबी लाकर उसका स्रुक् बनावै उसको दो आधारों पै स्थापित करके उसके द्वारा
अग्निमें घृतकी धारागेरे १०० और आग्नेयसूक्त–वैष्णवसूक्त–रौद्रसूक्त–चन्द्रसूक्त और महावैश्वानर
इत्यादिकोंके प्रतिपादक वेद मंत्रों का उच्चारण करै साम और ज्येष्ठसामका पाठकरै १०१ यजमान
का मार्जन और स्वस्तिवाचन पूर्व के समान करै और यजमान भी पूर्वके समान पृथक्२ दक्षिणा
देवै १०२ और काम क्रोधादिसे रहित शान्तचित्तसे ऋत्विजोंको दक्षिणादे इस नवग्रहयज्ञ
में चार वेदपाठी ब्राह्मण होने चाहिये १०३ अथवा शान्त स्वभाववाले दोही वेदपाठी ऋत्विग्
बनावै और दशहज़ारके हवनमें विशेष विस्तार न करै १०४ लक्ष हवनमें दश अथवा आठ ऋत्विक्
बनावै अथवा कुटिलतासे रहित शक्तिके अनुसार चारही ऋत्विक् बनावै १०५ पूर्व कहेहुए नवग्रहसे
इस लक्षहवनमें सब वस्तु दशगुणी अधिक करै शक्तिके अनुसार भक्ष्य पदार्थ और आभूषण
अंगूठी छल्ले आदि पवित्री और कण्ठाभरण इनकोभी शक्तिके अनुसारदे १०६।१०७ अपने वित्तके
अनुसार दक्षिणा देवे हीनदक्षिणा नहींकरै जो कोई मनुष्य लोभ मोहादिकोंसे दान नहींकरताहै उसके
कुलका नाश होजाताहै १०८ ऐश्वर्य्यकी इच्छा करनेवाला शक्तिके अनुसार अन्नदानभी करै
क्योंकि अन्नहीन कियाहुआ कर्म दुर्भिक्ष के फलको देताहै १०९ मंत्रहीन होनेसे ऋत्विक् लोगों का
नाशहोताहै दक्षिणाहीन यज्ञ यजमानका नाशकरताहै इसहेतुसे दुष्ट यज्ञके समान मनुष्यका कोई
शत्रुनहींहै ११० अल्प धनवाला पुरुष लक्षहवन कभी नहीं करै क्योंकि अल्पधनख़र्चनेमें भी पीड़ा
और विग्रह होताहै १११ भक्तिसे विधिके अनुसार एकदो वा तीन ब्राह्मणोंका पूजनकरै अल्पधन
वाला यजमान भक्तिसे वेदपाठी एकहीब्राह्मणका पूजनदक्षिणाआदिकसेकरै बहुतोंका न करै ११२

यथावित्तंभवेद्गृहे। यतःसर्वानवाप्नोति कुर्वन्कामान्विधानतः ११३ पूज्यतेशिवलोके
च वस्वादित्यमरुद्गणैः। यावत्कल्पशतान्यष्टावथमोक्षमवाप्नुयात् ११४ सकामोय
स्त्विमंकुर्याल्लक्षहोमंयथाविधि। सतंकाममवाप्नोति पदमानन्त्यमश्नुते ११५ पुत्रार्थी
लभतेपुत्रान् धनार्थीलभतेधनम्। भार्यार्थीशोभनांभार्य्यां कुमारीचशुभंपतिम् ११६
भ्रष्टराज्यस्तथाराज्यं श्रीकामःश्रियमाप्नुयात्। यंयंप्रार्थयतेकामं सवैभवतिपुष्कलः।
निष्कामःकुरुतेयस्तु सपरंब्रह्मगच्छति ११७ अस्माच्छतगुणःप्रोक्तः कोटिहोमःस्व
यम्भुवा। आहुतीभिःप्रयत्नेन दक्षिणाभिःफलेनच ११८ पूर्व्ववद्ग्रहदेवानामावाहन
विसर्ज्जने। होममन्त्रास्तएवोक्ताः स्नानेदानेतथैवच। कुण्डमण्डपवेदीनां विशेषोऽयं
निबोधमे ११९ कोटिहोमेचतुर्हस्तं चतुरस्रन्तुसर्व्वतः। योनिवक्त्रद्वयोपेतं तदप्याहु
स्त्रिमेखलम् १२० द्व्यंगुलाभ्युच्छ्रिताकार्य्या प्रथमामेखलाबुधैः। त्र्यंगुलाभ्युच्छ्रि
तातद्वद् द्वितीयापरिकीर्त्तिता १२१ उच्छ्रायविस्तराभ्याञ्च तृतीयाचतुरंगुला। द्व्यं
गुलश्चेतिविस्तारः पूर्व्वयोरेवशस्यते १२२ वितस्तिमात्रायोनिःस्यात् षट्सप्तांगुल
विस्तृता। कूर्म्मपृष्ठोन्नतामध्ये पार्श्वयोश्चांगुलोच्छ्रिता १२३ गजोष्ठसदृशी तद्वदा
यताच्छिद्रसंयुता। एतत्सर्व्वेषुकुण्डेषु योनिलक्षणमुच्यते। मेखलोपरिसर्व्वत्र अश्व

घर में जितना धन होय उसके अनुसार लक्षहवन करै क्योंकि विधानके अनुसार कर्म करनेवाला
जन सबकामनाओं को प्राप्तहोताहै ११३ ऐसे पूजन करनेवाला जन शिवलोक में वसु आदित्य
और मरुद्गण आदिकोंसे पूजित होताहै फिर ८०० सौ कल्पोंके अन्तमें मोक्ष को प्राप्त होजाताहै
११४ जो किसी प्रकारकी भी कामना वाला पुरुष यथार्थ विधिसे इस यज्ञको करताहै वह अपनी
सब कामनाओं को प्राप्त होताहै और अनन्त पद वैकुंठ लोकमें प्राप्तहोताहै ११५ पुत्रकी इच्छावाला
पुत्रको धनकी इच्छावाला धनको स्त्री की इच्छा करने वाला उत्तम स्त्री को और कन्याकरै तो
उत्तम पतिको प्राप्तहोतीहै ११६ भ्रष्ट राज्य वालेको राज्य लक्ष्मीके इच्छावालेको लक्ष्मी और जिस
२ कामना को विचार करताहै वहसब सिद्धहोती है निष्कामनासे करनेवालेको मोक्षकी प्राप्तिहोतीहै
११७ इस लक्ष हवनसे सौगुनाकोटि हवन ब्रह्माजीने कहाहै इसकी संख्या आहुतियोंसे और
दक्षिणाओंसे जानना ११८ इसमें भी पूर्व्व केही समान देवताओंका आवाहन और विसर्जन करै
और होम स्नान और दानके मन्त्र नहीं हैं परन्तु इसमें कुंड बेदी और मंडपमें जो विशेषताहै उसको
सुनो ११९ कोटि हवनमें चार हाथ प्रमाण सब ओरसेचौखूंटा योनिके आकार दोमुखों वाला तीन
मेखलाओं से युक्त तो कुंडबनावे १२० इनमेंसे पहली मेखला दो अंगुलऊंची दूसरी तीन अंगुलकी
१२१ और तीसरी मेखलाकी उँचाई और विस्तार चार अंगुलहोना चाहिये पहली और दूसरी मेखलाकाभी
विस्तार दोअंगुल होनाचाहिये १२२ योनिका विस्तार एकअंगुल करै परन्तु उँचाईतेरह
१३ अंगुलकी करै मध्यमें कछुएक समान ऊंची बगलोंमें एक२ अंगुल ऊंची बनावै १२३ हथिनी
तथा उंटनीकी योनिके समान विस्तृत और छिद्रवाली बनावै यही लक्षण सबकुंडों की योनिका कहाहै

त्थदलसन्निभम् १२४ वेदीचकोटिहोमेस्याद्वितस्तीनाञ्चतुष्टयम् । चतुरस्रासम-
न्ताच्च त्रिभिर्वप्रैस्तुसंयुता । वप्रप्रमाणंपूर्वोक्तं वेदीनांचतथोच्छ्रयः १२५ तथाषोडशह
स्तः स्यान्मण्डपश्चचतुर्मुखः । पूर्वद्वारेचसंस्थाप्य बह्वृचंवेदपारगम् १२६ यजुर्विदंत
थायाम्ये पश्चिमेसामवेदिनम् । अथर्ववेदिनंतद्वदुत्तरेस्थापयेद्बुधः १२७ अष्टौतुहो
मकाःकार्या वेदवेदाङ्गवेदिनः । एवंद्वादशविप्राः स्युर्वस्त्रमाल्यानुलेपनैः । पूर्ववत्पूजयेद्भ
क्त्या वस्त्राभरणभूषणैः १२८ रात्रिसूक्तंचरौद्रञ्च पावमानंसुमङ्गलम् । पूर्वतोबह्वृचःशा
न्ति पठन्नास्तेह्युदङ्मुखः १२९ शान्तंशाक्रञ्चसौम्यञ्च कौष्माण्डंशान्तिमेवच । पाठ
येद्दक्षिणद्वारि यजुर्वेदिनमुत्तमम् १३० सुपर्णमथवैराजमाग्नेयंरुद्रसंहिताम् । ज्येष्ठसा
मतथाशान्तिञ्छन्दोगःपश्चिमेजपेत् १३१ शान्तिसूक्तञ्चसौरञ्च तथाशाकुनकंशुभ
म् । पौष्टिकञ्चमहाराज्य मुत्तरेणाप्यथर्ववित् १३२ पञ्चभिःसप्तभिर्वापि होमःकार्योऽत्र
पूर्ववत् । स्नानेदानेचमन्त्राः स्युस्तएवमुनिसत्तम ! १३३ वसोर्धाराविधानञ्च लक्षहो
मेविशिष्यते । अनेनविधिनायस्तु कोटिहोमंसमाचरेत् । सर्व्वान्कामानवाप्नोति ततो
विष्णुपदंव्रजेत् १३४ यःपठेच्छृणुयाद्वापि ग्रहयज्ञत्रयंनरः । सर्वपापविशुद्धात्मा पदमि
न्द्रस्यगच्छति १३५ अश्वमेधसहस्राणि दशचाष्टौचधर्म्मवित् । कृत्वायत्फलमाप्नोति
कोटिहोमात्तदश्नुते १३६ ब्रह्महत्यासहस्राणि भ्रूणहत्यार्बुदानिच । कोटिहोमेन नश्यन्ति

मेखलाके ऊपर बडकेपत्तेके समान बनावे १२४ कोटि होममें चारबिलस्तके प्रमाणकी चौखूँटीसमान
तीनमेखलावाली वेदीबनावे इनमेखलाओंका प्रमाण और उंचाई पूर्व्वोक्त वेदियों के समान जानो
१२५ और हाथके प्रमाण विस्तारका चारद्वारेवाला मंडपबनावे पूर्व्वकेद्वारमें बहुऋच् वेदपाठीको
स्थितकरै १२६ दक्षिणमें यजुर्वेदी पश्चिममें सामवेदीको और उत्तरके द्वारमें अथर्ववेदी ब्राह्मणको
स्थापितकरै १२७ वेद वेदांगकेज्ञाता आठब्राह्मणोंको होमकरने में स्थितकरै इसप्रकार बारहब्राह्मणों
को स्थितकरै और उनको भक्तिसे पूर्व्वकेसमान वस्त्र मालाभूषण और चन्दनादिकसे पूजनकरै १२८
रात्रिसूक्त रौद्रसंज्ञकमंत्र—पवमान—सुमंगलिक इत्यादिक वेद मंत्रोंका शान्तिकेनिमित्त बहुऋच् संज्ञ-
क वेदपाठी ब्राह्मण उत्तरमें स्थितहोकर पाठ करै १२९ शान्तिकारक इन्द्रसम्बन्धी सौम्य कौष्मां-
ड और शान्ति इत्यादि मंत्रोंको दक्षिणके द्वारपर स्थित होकर यजुर्वेदी ब्राह्मण पढ़ै १३० सुपर्ण--
वैराज - आग्नेय - रुद्रसंहिता ज्येष्ठसाम शान्ति और छंदोग इनसब मंत्रोंका पाठ पश्चिमके द्वार
वाला ब्राह्मण करै १३१ शांति- सूक्त-सौर-शाकुन- पौष्टिक और महाराज्य इत्यादिक मंत्रोंको उत्तर
के द्वारवाला अथर्ववेदी ब्राह्मण पढ़ै १३२ पांच वा सात ब्राह्मणोंको पूर्वके समान होम करना चा-
हिये-हेमुनि सत्तम नारद स्नान और दानमें वही पूर्व्वोक्त मंत्र जानो १३३ लक्ष आहुतियोंके होममें
वसोर्द्धारा करनेमें घृतकी धाराका विधान विशेष है इस विधिसे जो कोटि आहुतियोंका हवनकराता
है वह सब कामनाओंको प्राप्त होके विष्णुके पदमें प्राप्त होताहै १३४ । १३५ अठारह हज़ार अश्व-
मेधोंका जो फल होता है सो कोटि होमके करनेसे होताहै १३६ हज़ार भ्रूण हत्या और अर्बुद भ्रूण-

यथावाञ्छिवभाषितम् १३७ वश्यकर्माभिचारादि तथैवोच्चाटनादिकम्। नवग्रहमखंकृत्वा ततःकाम्यंसमाचरेत् १३८ अन्यथाफलदंपुंसां नकाम्यंजायतेक्वचित्। तस्मादयुतहोमस्य विधानंपूर्वमाचरेत् १३९ वृत्तंवोच्चाटनेकुण्डं तथाचवशकर्म्मणि। त्रिमेखलञ्चैकवक्त्रमरत्निर्विस्तरेणतु १४० पलाशसमिधःशस्ता मधुगोरोचनान्विताः। चन्द्रेणागुरुणातद्वत् कुंकुमेनाभिषिञ्चिताः १४१ होमयेन्मधुसर्पिर्भ्यां विल्वानिकमलानिच। सहस्राणिदशैवोक्तं सर्वदैवस्वयम्भुवा १४२ वश्यकर्मणिविल्वानां पद्मानांचैवधर्मवित्। सुमित्रियानआपओषधयइतिहोमयेत् १४३ नचात्रस्थापनंकार्यं नचकुम्भाभिषेचनम्। स्नानंसर्वौषधैःकृत्वा शुक्लपुष्पाम्बरोगृही १४४ कण्ठसूत्रैःसकनकैः विप्रान्समभिपूजयेत्। सूक्ष्मवस्त्राणिदेयानि शुक्लागावःसकाञ्चनाः १४५ अवशानिवशीकुर्यात्सर्वशत्रुबलान्यपि। अमित्राण्यपिमित्राणि होमोऽयम्पापनाशनः १४६ विद्वेषणेऽभिचारेच त्रिकोणंकुंडमिष्यते। द्विमेखलंकोणमुखं हस्तमात्रञ्चसर्वशः १४७होमंकुर्युस्ततोविप्रा रक्तमाल्यानुलेपनाः। निवीतलोहितोष्णीषा लोहिताम्बरधारिणः १४८ नववायसरक्ताढ्यपात्रत्रयसमन्विताः। समिधोवामहस्तेन श्येनास्थिबलसंयुताः। होतव्यामुक्तकेशैस्तु ध्यायद्भिर शिवंरिपौ१४९ दुर्मित्रियास्तस्मैसन्तु तथाहुम्फडितीतिच। श्येनाभिचारमन्त्रेण क्षुरंसम

हत्याओंका नाश इस कोटि हवनके करनेसे होता है यह शिवजीने कहाहै १३७ नवग्रह यज्ञ करनेसे वश्यकर्म अभिचारादि और उच्चाटन इन सबका नाश होता है १३८ इन नवग्रह यज्ञोंके समान मनो वांछित फलका देने वाला कोई कर्म नहीं है इसलिये दशहज़ार आहुतियोंका विधान अवश्य करना योग्यहै १३९ वशीकरण मंत्र मारण और उच्चाटन आदिक मंत्रोंके हवनमें तीन मेखलासे युक्त मुष्टि प्रमाण एक मुखवाला कुंड बनावे ढाककी समिध शहद गोरोचन- कपूर और अगर इन सबको केशरके जलसे छिड़कके उसकी आहुति देवे १४०। १४१ शहद घृतमें मिला बेल फल तथा कमलगट्टोंकी आहुति करै इन सब कर्मोंमें सदा दश हज़ार आहुति करना ब्रह्माजीने कहा है १४२ वशीकरण कर्म में बेलफल और कमलगट्टों की आहुति करै सुमित्रियान आपओपधय इसमंत्र का उच्चारण करै १४३ इस कर्म में कलशस्थापन तथा अभिषेक न करै गृहस्थी पुरुष इस कर्म में सर्वौपधी के जलसे स्नान करै सफ़ेद वस्त्र और पुष्पों को धारण करै १४४ सुवर्ण का आभूषण कण्ठ के पहरने की जंजीर आदि भूपण देके ब्राह्मणों का पूजन करै श्वेत वस्त्र देवै श्वेत गौ का दान करै सुवर्ण की दक्षिणा देवै १४५ यह होम प्रवल शत्रुओं को वश में करता है प्रीति रहितों को मित्र बनाता है पापों का नाश करता है १४६ विद्वेष शत्रुता और दुःख कराने के लिये तीन कोण का मुख करै एक हाथ कुण्डका विस्तार करै १४७ फिर रक्त माला -लालचन्दन--लालयज्ञोपवीत--लालपगड़ी--और लालवस्त्र इन सबको धारण कियेहुए ब्राह्मण हवनकरै १४८ तरुणकाकके रुधिर से भीजेहुए तीनपात्रोंसे युक्तहुई समिधोंको बायेंहाथमें लेकर बाजकीहड्डी मिलाकर अपने शिरके बालखोलके शिवजीका ध्यानकरताहुआ शत्रुके निमित्त आहुतिकरै १४९ दुर्मित्रियास्तस्मैसन्तु हुं-

भिमन्त्र्यच १५० प्रतिरूपंरिपोःकृत्वा क्षुरेणपरिकर्तयेत्। रिपुरूपस्यशकलान्यथैवाग्नौ
विनिक्षिपेत् १५१ ग्रहयज्ञविधानान्ते सदैवाभिचरन्पुनः। विद्वेषणंतथाकुर्वन्नेतदेवसमा
चरेत् १५२ इहैवफलदंपुंसामेतन्नामुत्रशोभनम्। तस्माच्छान्तिकमेवात्र कर्त्तव्यंभूति
मिच्छता १५३ ग्रहयज्ञत्रयंकुर्य्याद्यस्त्वकाम्येनमानवः। सविष्णोःपदमाप्नोति पुनरावृ
त्तिदुर्लभम् १५४ यइदंशृणुयान्नित्यं श्रावयेद्वापिमानवः। नतस्यग्रहपीडास्यान्नचबन्धु
जनक्षयः १५५ ग्रहयज्ञत्रयंगेहे लिखितन्तत्रतिष्ठति। नपीडातत्रबालानां नरोगोनचब
न्धनम् १५६ अशेषयज्ञफलदं निःशेषाघविनाशनम्। कोटिहोमंविदुःप्राज्ञा भुक्तिमुक्तिफ
लप्रदम् १५७ अश्वमेधफलम्प्राहुर्लक्षहोमंसुरोत्तमाः। द्वादशाहमखस्तद्वन्नवग्रहमखः
स्मृतः १५८ इतिकथितमिदानीमुत्सवानन्दहेतोः सकलकलुषहारीदेवयज्ञाभिषेकः।
परिपठतियइत्थं यःशृणोतिप्रसङ्गादभिभवतिसशत्रूनायुरारोग्ययुक्तः १५९ ॥

इति श्रीमत्स्यपुराणे द्विनवतितमोऽध्यायः ९२ ॥

(शिवउवाच) पद्मासनःपद्मकरः पद्मगर्भसमद्युतिः। सप्ताश्वःसप्तरज्जुश्च द्विभुजः
स्यात्सदारविः १ श्वेतःश्वेताम्बरधरः श्वेताश्वःश्वेतवाहनः। गदापाणिर्द्विबाहुश्च क
र्तव्योवरदःशशी २ रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः। चतुर्भुजःश्वेतरोमा वरदः

फट् इन मंत्रों का उच्चारण करै फिर श्येनाभिचार मंत्र पढ़ के छुरी उठाकर शत्रु की मूर्त्ति बना
के उसके टुकडे कर अग्नि में आहुति कर देवै १५०।१५१ ग्रह यज्ञके विधान के अनुसार अभिचार
कर्म और विद्वेष कर्म करनेवाला पुरुष सदा यही विधि करै १५२ यह कर्म पुरुषों को इसी लोक में
फल देनेवाले हैं परलोक में अच्छे नहीं हैं इस निमित्त ऐश्वर्य्य का चाहनेवाला पुरुष सदैव शान्ति
केही कर्मकरै १५३ जो पुरुष निष्काम होकर मनसे इन तीन ग्रह यज्ञों को करताहै वह ऐसे विष्णु
के परमपद को प्राप्त होता है जहांसे कि फिर आगमन नहीं होता है १५४ जो इस कर्म को सुने
वा सुनावैगा उसके कभी रोग बन्धन और पीड़ा आदिक न होवेगा १५५ जिस घरमें यह तीनों
ग्रह यज्ञ लिखे हुए होते हैं वहां बालकों की पीड़ा और रोग बन्धनादिक कभी नहीं होते १५६ यह
यज्ञ सब यज्ञों के समान फल देनेवाले हैं और सम्पूर्ण पापों के नाश करनेवाले हैं और कोटि हवन
तो पण्डितों ने भुक्ति मुक्ति के फल का देनेवाला कहा है और लक्ष हवन करना अश्वमेधयज्ञ के स-
मान फल का देनेवाला है द्वादशाहयज्ञ और नवग्रहयज्ञ समान फल देनेवाले कहे हैं १५७।१५८
इस प्रकारसे यहउत्सव आनन्दके हेतुसे सम्पूर्ण पापों के नाशक देवयज्ञके अभिषेकको कहदियाहै इस
को जो पढ़ताहै अथवा सुनताहै वह शत्रुओंका नाश करताहै और आयु आरोग्यसे युक्त होता है१५९॥

इति श्रीमत्स्यपुराणभाषाटीकायां द्विनवतितमोऽध्यायः ९२ ॥

शिवजी कहते हैं कि पद्मासनवाला कमलों को खिलानेवाला कमलकोश के समान कान्ति
वाला सात अश्वोंवाला सात रज्जुओंवाला दो भुजाओंवाला ऐसा सूर्य्य सदा बनाना चाहिये १
श्वेत श्वेताम्बरधारी श्वेत अश्ववाला श्वेतवाहनवाला गदाधारी दोभुजावाला ऐसा चन्द्रमा बनाना

स्याद्धरासुतः ३ पीतमाल्याम्बरधरः कर्णिकारसमद्युतिः। खड्गचर्म्मगदापाणिः सिंहस्थो
वरदोबुधः ४ देवदैत्यगुरूतद्वत्पीतश्वेतौचतुर्भुजौ । दण्डिनौवरदौकार्य्यौसाक्षसूत्रकमण्ड
लू ५ इन्द्रनीलद्युतिःशूली वरदोगृध्रवाहनः । बाणबाणासनधरः कर्त्तव्योऽर्कसुतस्तथा ६
नीलसिंहासनस्थश्च राहुरत्रप्रशस्यते । धूम्राद्विबाहवःसर्वे गदिनोविकृताननाः । गृध्रास
नगतानित्यं केतवःस्युर्वरप्रदाः ७ सर्वेकिरीटिनःकार्य्या ग्रहालोकहितावहाः । द्व्यंगुलेनो
च्छ्रिताःसर्वेशतमष्टोत्तरंसदा८ ॥ इति श्रीमत्स्यपुराणे त्रिनवतितमोऽध्यायः ९३ ॥
(नारदउवाच) भगवन् ! भूतभव्येश ! तथान्यदपियच्छ्रुतम् । भुक्तिमुक्तिफलाया
लं ततपुनर्वक्तुमर्हसि १ एवमुक्तोऽब्रवीच्छम्भुरयंवाङ्मयपारगः । मत्समस्तपसाब्रह्म
न् ! पुराणश्रुतिविस्तरैः २ धर्मोऽयंवृषरूपेण नन्दीनामगणाधिपः । धर्मान्माहेश्वरान्
वक्ष्यत्यतःप्रभृतिनारद ! ३ (मत्स्य उवाच) शृणुष्वावहितोब्रह्मन् ! वक्ष्येमाहेश्वरंव्र
तम् । त्रिषुलोकेषुविख्यातं नाम्नाशिवचतुर्दशी ४ मार्गशीर्षत्रयोदश्यां सितायामेकभो
जनः । प्रार्थयेद्देवदेवेश ! त्वामहंशरणंगतः ५ चतुर्दश्यांनिराहारः सम्यगभ्यर्च्यशङ्कर
म् । सुवर्णवृषभंदत्त्वा भोक्ष्यामिचपरेऽहनि ६ एवंनियमकृत्सुक्त्वा प्रातरुत्थायमानवः ।

श्रेष्ठ कहा है २ लालमाला लालवस्त्र शक्तिशूल और गदा इनको धारण करनेवाला चार भुजाओंसे
युक्त श्वेतरोमोंवाला ऐसा मंगल बनाना ३ पीली माला पीले वस्त्र कमल की पंखड़ियों के समान
आकारवाला खड्ग चर्म्मगुप्ति और गदाको धारण कियेहुए सिंहवाहनवाला ऐसा बुध बनाना योग्य
है ४ बृहस्पतिका पीलावर्ण—शुक्रका श्वेतवर्ण इनदोनोंको चतुर्भुजी मूर्त्ति दंड--कमंडलु--और अक्षमाला
इनको धारण कियेहुए बनाना शुभ कहा है ५ इन्द्र नीलमणि के समान कान्तिवाला शूलधारी गिद्ध
वाहनवाला और बाणों का आसन ऐसा शनैश्चर बनाना चाहिये ६ राहुका नीलासिंहासन बनावै इस
की मूर्त्ति धूम्र वर्ण दो भुजावाली गदा धारण किये विकराल आकृतिवाली बनावे और ऐसीही केतु
की भी मूर्त्ति बनावे इनका वाहन गिद्ध बनावे इन ग्रहोंकी ऐसी मूर्त्ति वरदेनेवाली कही है ७ लोगों
के हित प्रिय करनेवाले सब ग्रह मुकुटधारी बनावे और सब ग्रहों की मूर्त्ति दो दो अंगुल ऊंची बनावे
सब ग्रहों के मंत्रों का जप सदैव अष्टोत्तरशत १०८ जपै ८ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांत्रिनवतितमोऽध्यायः ९३ ॥

नारदजीबोले हे भगवन् भूतभव्येश सबप्रकारसे भुक्तिमुक्तिके देनेवाले आप अब कोई अन्यविधान
को कहिये १ यह सुनकर वचनमनके पारके जानने वाले शिवजी बोले कि हे ब्रह्मन् तप पुराण और
श्रुतिके विस्तार करके वृषरूपसे यह नन्दीनाम गणाधिप मेरे समानहै हे नारद यह नन्दिकेश्वर वृषभ
शिवधर्मोंको कहैगा २।३ मत्स्यजीकहते हैं कि हेराजा सावधान होकर शिवव्रतको सुन इसत्रिलोकी
में शिवचतुर्दशी नामसे एकव्रत प्रसिद्ध है ४ मार्गशिर शुक्ला त्रयोदशी के दिन एक समय भोजनकरै
और हे देवदेवेश मैं तुम्हारी शरणहूं इसप्रकारसे शिवकी प्रार्थनाकरै ५ चतुर्दशीको निराहारव्रतकरै
और शिवजी का पूजनकरै फिर सुवर्ण के वृषभकादानकरके दूसरे दिनभोजनकरै ६ ऐसे नियम

कृतस्नानजपःपश्चादुमयासहशंकरम्। पूजयेत्कमलैःशुभ्रैः गन्धमाल्यानुलेपनैः ७ पादौ नमःशिवायेति शिरःसर्वात्मनेनमः। त्रिनेत्रायेतिनेत्राणि ललाटंहरयेनमः ८ मुखमिन्दुमुखायेति श्रीकण्ठायेतिकन्धराम्। सद्योजातायकर्णौतु वामदेवायवैभुजौ ९ अघोरहृदयायेति हृदयञ्चाभिपूजयेत्। स्तनौतत्पुरुषायेति तथेशानायचोदरम् १० पार्श्वेचानन्तधर्माय ज्ञानभूतायवैकाटिम्। ऊरूचानन्तवैराग्य सिंहायेत्यभिपूजयेत् ११ अनन्तैश्वर्य्यनाथाय जानुनीचार्चयेद्बुधः। प्रधानायनमोजंघे गुल्फौव्योमात्मनेनमः १२ व्योमकेशात्मरूपाय केशान्पृष्ठञ्चपूजयेत्। नमःपुष्ट्यैनमस्तुष्ट्यै पार्वतीञ्चापिपूजयेत् १३ ततस्तुवृषभंहैममुदकुम्भसमन्वितम्। शुक्लमाल्याम्बरधरं पञ्चरत्नसमन्वितम्। भक्ष्यैर्नानाविधैर्युक्तं ब्राह्मणायनिवेदयेत् १४ ततोविप्रान्समाहूय तर्पयेद्भक्तितःशुभान्। पृषदाज्यञ्चसंप्राश्य स्वपेद्भूमावुदङ्मुखः १५ पञ्चदश्यांततःपूज्य विप्रान्भुञ्जीतवाग्यतः। तद्वत्कृष्णचतुर्दश्या मेतत्सर्वसमाचरेत् १६ चतुर्दशीषुसर्वासु कुर्य्यात्पूर्ववदर्चनम्। येतुमासेविशेषाःस्युस्तान्निबोधक्रमादिह १७ मार्गशीर्षादिमासेषु क्रमादेतदुदीरयेत्। शंकरायनमस्तेऽस्तु नमस्तेकरवीरक! १८ त्र्यम्बकायनमस्तेऽस्तु महेश्वरमतःपरम्। नमस्तेऽस्तुमहादेव! स्थाणवेचततःपरम् १९ नमःपशुपतेनाथ! नमस्तेशम्भवेपुनः।

करके प्रातःकाल उठ स्नानजपकर उमा समेत शिवजीकापूजनकरै श्वेत कमल गन्धमाला और चन्दनादिक से पूजाकरै ७ शिवायनमः यहकहकर चरणोंकोपूजै--सर्वात्मनेनमः ऐसाकहकर शिरको पूजै--त्रिनेत्रायनमः यह कहकर नेत्रोंकोपूजै--हरयेनमः यहकहकर मस्तककोपूजै ८ इन्दुमुखायनमः कहकर मुखको श्रीकण्ठायनमः कहकर कंठको--सद्योजातायनमः यहकहकर कानोंको-वामदेवायनमः यह कहकर भुजाओं को ९ अघोरहृदयायनमः यह कहकर हृदयको--तत्पुरुषायनमः कहकर स्तनोंको ईशानायनमः यहकहकर उदरको-अनन्तायनमः कहकर पशालियोंको-ज्ञानभूतायनमः कहकर कटिको अनन्तवैराग्यसिंहायनमः कहकरजंघाओंको १०।११ अनन्तैश्वर्य्यनाथायनमः कहकर श्रीगौरीभगवती कोपूजे--प्रधानायनमः कहकर पिंडलियोंको व्योमात्मनेनमः कहकर गुल्फ और टकनोंकोपूजै १२ व्योमकेशात्मनेरूपायनमः कहकर केशोंको और पीठको पुष्ट्यैनमः तुष्ट्यैनमः यह कहकर पार्वतीजीकोपूजै १३ फिर सुवर्ण के वृषभको सुवर्णका कलश श्वेतवस्त्रमाला तथापंचरत्नसे युक्तकरके अनेकप्रकार के भक्ष्यपदार्थों समेत ब्राह्मणके अर्थ दानकरै १४ और सुन्दर ब्राह्मणों को बुलवाकर तृप्तिपर्य्यन्त भोजनकरवावै फिर आहुतियों से शेष बचेहुए घृतका प्राशनकर उत्तराभिमुखहोकरके शयनकरै इसके उपरान्त पूर्णिमाके दिन ब्राह्मणों को भोजन करवा मौन धारणकरके आप भी भोजनकरै और इसीप्रकार कृष्णपक्षकी चतुर्दशीकोभी करना चाहिये १५।१६ सब चतुर्दशियोंको इसी पूर्वोक्तप्रकारसे पूजनकरै अब जो मासोंमें विशेष हैं उनके विधानको सुनो १७ मार्गशिरआदि महीनोंमें क्रमसे इन आगेकहे हुये नामोंकाउच्चारणकरै-शंकरायनमः १ करवीरकायनमः २ त्र्यंबकायनमः ३ महेश्वरायनमः ४ महादेवायनमः ५ स्थाणवेनमः ६--१८। १९ हे पशुपते हे नाथ तुम्हारे अर्थ न-

नमस्तेपरमानन्द ! नमःसोमार्द्धधारिणे २० नमोभीमायइत्येवं त्वामहंशरणङ्गतः । गोमू
त्रङ्गोमयंक्षीरं दधिसर्पिःकुशोदकम् २१ पञ्चगव्यन्ततोविल्वं कर्पूरञ्चागुरुंयवाः । ति
लाःकृष्णाश्चविधिवत्प्राशनंक्रमशःस्मृतम् । प्रतिमासञ्चतुर्दश्योरेकैकम्प्राशनंस्मृतम्
२२ मन्दारमालतीभिश्च तथाधत्तूरकैरपि । सिन्दुवारैरशोकैश्च मल्लिकाभिश्चपाटलैः
२३ अर्कपुष्पैःकदम्बैश्च शतपत्र्यातथोत्पलैः । एकैकेनचतुर्दश्योरर्चयेत्पार्वतीपतिम्
२४पुनश्चकार्तिकेमासे प्राप्तेसन्तर्पयेद् द्विजान् । अन्नैर्नानाविधैर्भक्ष्यैर्वस्त्रमाल्यविभूषणैः
२५ कृत्वानीलवृषोत्सर्गं श्रुत्युक्तविधिनानरः । उमामहेश्वरंहैमं वृषभञ्चगवासह २६
मुक्ताफलाष्टकयुतं सितनेत्रपटवृताम् । सर्वोपस्करसंयुक्तां शय्यांदद्यात्सकुम्भकाम् २७
ताम्रपात्रोपरिपुनः शालितण्डुलसंयुतम् । स्थाप्यविप्रायशान्ताय वेदव्रतपरायच २८
ज्येष्ठसामविदेदेयं नवकव्रतिनेक्वचित् । गुणज्ञेश्रोत्रियेदद्यादाचार्येतत्त्ववेदिनि २९ अव्य
ङ्गाङ्गायसौम्याय सदाकल्याणकारिणे । सपत्नीकायसंपूज्य वस्त्रमाल्यविभूषणैः ३० गुरौ
सतिगुरोर्देयं तदभावेद्विजातये । नवित्तशाठ्यंकुर्वीत कुर्वन्दोषात्पतत्यधः ३१ अनेन
विधिनायस्तु कुर्याच्छिवचतुर्दशीम् । सोऽश्वमेधसहस्रस्य फलंप्राप्नोतिमानवः ३२ ब्रह्म
हत्यादिकंकिञ्चिद्यदत्रामुत्रवाकृतम् । पितृभिर्भ्रातृभिर्वापि तत्सर्वंनाशमाप्नुयात् ३३

मस्कारहै ७।८ शंभवेनमः ९ परमानन्दको नमस्कारहै १० सोमार्द्धधारीको नमस्कारहै ११-२० भीमायनमः १२ तुम्हारेशरणहूं इन सबनामों को मार्गशिर आदि महीने में क्रमसेकहै और गोमूत्र-गोबर--दूध--दही--घृत--कुशोदक २१ पंचगव्य बेलागिरी--कपूर--अगर-यव और कालेतिल इनका प्राशन और भक्षण मार्गशिर आदि महीनोंकी चतुर्दशियों को करै २२ और मंदारके पुष्प चमेली धतूरा-संभालू अशोक--मल्लिका-पाडल-आकके पुष्प-कदंब-उत्तमकमलिनी-कमल इन पुष्पों करके क्रमसे मार्गशिर आदि चतुर्दशियोंको शिवकापूजनकरै २३।२४ फिर जब कार्त्तिक महीना आवे तब अनेकप्रकारके भक्ष्यपदार्थोंसे ब्राह्मणोंको भोजनकरवाके तृप्तकरे और वस्त्रमाला विभूषण आदिकोंसे पूजाकरै २५ फिर वेदोक्तविधिसे नील वृषभको छोड़ै सुवर्णकेशिव और पार्व्वतीबनावै और गौसहित वृषभकीमूर्त्ति बनवावै फिर ब्राह्मणकेअर्थ निवेदनकरै आठ श्वेतमोती पाटकेवस्त्र तकिया तोशक आदिवस्त्र और कलश इनसबसे युक्त शय्याका दानकरै २६।२७ शिव पार्वतीकी मूर्त्तिको तांबे के पात्र मेंचावल भरकर उसके ऊपर स्थापितकरै और वेदपाठी व्रतमें तत्पर शान्त ब्राह्मणके अर्थ देवै २८ और विशेषकरके ज्येष्ठ सामवेदकेजाननेवाले के अर्थ देनायोग्यहै परन्तु वकवृत्ती दंभी आदिक ब्राह्मण को कभी न दे किन्तु गुणज्ञ श्रोत्रिय तत्त्ववेत्ता आचार्य्यकोदेवै २९ अंग व्यंगरहित सौम्य और सदा कल्याणकारी ऐसे सपत्नीक ब्राह्मणको वस्त्र माला और आभूषणादिक से पूजकर देना उत्तम है गुरू होंय तो उन्हीं को देदे नहीं तो उत्तम ब्राह्मणको वित्तशाठ्यरहित होके देवै क्योंकि कृपणता करने वाला नरकमें जाताहै ३०।३१ इसविधिसे जो शिवचतुर्दशीका व्रत करताहै वह हजार अश्वमेध यज्ञों के फलको प्राप्तहोताहै ३२ और इसजन्ममें तथा पूर्व्वजन्ममें जो ब्रह्महत्यादिक पापहोगयाहो अथवा

दीर्घायुरारोग्यकुलान्नवृद्धिरत्राक्षयामुत्रचतुर्भुजत्वम् । गणाधिपत्यंदिविकल्पकोटिशता
न्युषित्वापदमेतिशम्भोः ३४ नवृहस्पतिरप्यनन्तमस्याःफलमिन्द्रोनपितामहोऽपिवक्तुम्।
नचासिद्धगणोऽप्यलंनचाहं यदिजिह्वायुतकोट्यापिवक्रे ३५ भवत्यमरवल्लभः पठतियः
स्मरेद्वासदा शृणोत्यपिविमत्सरः सकलपापनिर्मोचनम् । इमांशिवचतुर्दशीममरका
मिनीकोटयः स्तुवन्तितमनिन्दितं किमुसमाचरेद्यःसदा ३६ यावाथनारीकुरुतेतिभ
क्त्याभर्तारमापृच्छ्यसुतान्गुरूनवा । सापिप्रसादात्परमेश्वरस्य परम्पदंयातिपिना
कपाणेः ३७ ॥

इति श्रीमत्स्यपुराणेनन्दिनारदसंवादेशिवचतुर्दशीव्रतन्नामचतुर्नवतितमोऽध्यायः९४ ॥

(नन्दिकेश्वरउवाच) फलत्यागस्यमाहात्म्यं यद्भवेच्छृणुनारद!। यदक्षयंपरंलोके
सर्वकामफलप्रदम् १ मार्गशीर्षेशुभेमासि तृतीयायांमुने! व्रतम्। द्वादश्यामथवाष्टम्यां
चतुर्दश्यामथापिवा। आरभेच्छुक्लपक्षस्य कृत्वाब्राह्मणवाचनम् २ अन्येष्वपिहिमासेषु
पुण्येषुमुनिसत्तम!। सदक्षिणम्पायसेन भोजयेच्छक्तितोद्विजान् ३ अष्टादशानांधा
न्यानामवर्ज्यंफलमूलकैः। वर्जयेदब्दमेकन्तु ऋतेऔषधकारणम्। सवृषंकाञ्चनंरुद्रं ध
र्म्मराजञ्चकारयेत् ४ कूष्माण्डंमातुलिंगञ्च वार्ताकम्पनसंतथा। आम्राम्रातकपित्था
नि कलिंगमथवालुकम् ५ श्रीफलाश्वत्थवदरञ्जम्बीरंकदलीफलम्। काश्मरन्दाडिमं

माता पिताका अपराध होगयाहो वह सब क्षणमात्रमें नष्ट होजाताहै ३३ दीर्घआयु-आरोग्य-कुल
और अन्नकी अनन्तगुणी वृद्धि चतुर्भुजी मूर्त्तिकी प्राप्ति और गणोंका अधिपतिहोके किरोड़कल्पोंतक
स्वर्गमें वासकरके शिवके पदको प्राप्तहोताहै ३४ इसव्रतके सम्पूर्ण फल कहनेको बृहस्पति इन्द्रादिक
देवता और ब्रह्माजी भी समर्थनहीं हैं मत्स्यजी कहते हैं कि सिद्धगणोंसमेत मैंभी अपनी किरोड़ों
जिह्वाओं से नहीं कहसका ३५ जो इस व्रतको पढ़ता स्मरणकरता और सुनताहै उसके सबपाप
दूरहोजाते हैं इस व्रतकी स्तुति देवताओंकी स्त्रियांभी करती हैं इसहेतुसे निन्दासे रहित होकर पुरुष
इसको सदैवकरै ३६ अपने भर्त्ता पुत्र वा गुरूकी आज्ञालेकर जो स्त्री भी इस व्रतको करती है वह
शिवजीकी प्रसन्नतासे शिवके परमलोकमें प्राप्तहोती है ३७॥

इतिश्रीमत्स्यपुराणभाषाटीकायांनन्दिनारदसंवादेशिवचतुर्दशीवृतंनामचतुर्नवतितमोऽध्यायः ९४॥

नन्दिकेश्वरने कहा कि हेनारद जो इस वृतके फलके त्यागका माहात्म्य परलोकमें अक्षयफलका
देनेवालाहै उसकोभी तुमसुनो १ हेमुने मार्गशिरशुक्ला तृतीया द्वादशी १२ अष्टमी ८ औरचतुर्दशी १४
इनतिथियोंमें ब्राह्मणोंसे स्वस्तिवाचन करवाके व्रतका प्रारंभकरै २ हे नारद इसमहीनेके सिवाय
अन्यभी पवित्र महीनोंमें ब्राह्मणोंको खीरका भोजन करवाके शक्तिके अनुसार दक्षिणादे ३ अठारह
प्रकारके व्रीहि आदिक धान्योंमें निन्दित कुत्सित धान्य और मूलफलोंको एक वर्षतक वर्जित करदे
परन्तु औषधमें कछुदोष न समझै और सुवर्णके वृषभ समेत सुवर्णकी शिवकी मूर्त्ति बनावै इ--
सी प्रकार धमराजकी भी मूर्त्ति बनावै ४ कोहला-बिजौरा-वार्त्ताकशाक--फालसा--आंब-लिहसौड़ा

शक्त्या कालधौतानिषोडश ६ मूलकामलकंजम्बू तिन्तिडीकरमर्दकम् कङ्कोलैलातु
ण्डिकेरी करीरकुटजंशमी ७ औदुम्बरंनालिकेरं द्राक्षाथबृहतीद्वयम्। रौप्यानिकारयेच्छ
क्त्या फलानीमानिषोडश ८ ताम्रंतालफलंकुर्य्यादगस्तिफलमेवच । कैडर्यःकाश्मर्य्य
फलं तथासूरणकन्दकम् ९ रक्तालुकाकन्दकञ्च कनकाह्वञ्चचिर्मिटम्। चित्रवल्लीफ
लंतद्वत्कूटशाल्मलिजम्फलम् १० आम्रानिष्पावमधुक बटमुद्गपटोलकम्। ताम्राणिषो
ड़शैतानि कारयेच्छक्तितोनरः ११ उदकुम्भद्वयंकुर्य्याद्धान्योपरिसवस्त्रकम्। ततश्च
कारयेच्छय्यां यथोपरिसुवाससीम् १२ भक्ष्यपात्रत्रयोपेतं यमरुद्रवृषान्वितम्। धेन्वास
हैवशान्ताय विप्रायाथकुटुम्बिने। सपत्नीकायसंपूज्य पुण्येऽह्निविनिवेदयेत् १३ यथाफ
लेषुसर्वेषु वसन्त्यमरकोटयः। तथासर्वफलत्यागव्रताद्भक्तिःशिवेऽस्तुमे १४ यथाशिव
श्चधर्म्मश्च सदानन्तफलप्रदौ। तद्युक्तफलदानेन तौस्यातांमेवरप्रदौ १५ यथाफला
न्यनन्तानि शिवभक्तेषुसर्वदा। तथानन्तफलावाप्तिरस्तुजन्मनिजन्मनि १६ यथाभेदं
नपश्यामि शिवविष्ण्वर्कपद्मजान्। तथाममास्तुविश्वात्मा शङ्करःशङ्करःसदा १७ इति
दत्त्वाचतत्सर्वमलंकृत्यचभूषणैः। शक्तिश्चेच्छयनंदद्यात् सर्वोपस्करसंयुतम् १८ अ
शक्तस्तुफलान्येव यथोक्तानिविधानतः। तथोदकुम्भसंयुक्तौ शिवधर्मौचकाञ्चनौ १९

कैथ-इन्द्रयव-एलुआ-नारियल-पीपल-बेर-जंबीर-खट्टा-केला-शिवणी और अनार इनसब १६फलोंको
शक्तिके अनुसार सुवर्णके बनावे ५।६ और मूली आमला--जामन-इमली-करोंदा-कंकोल-इलायची
पीलुपर्णी-कैर-कुडा-जाटी-गूलर-नारियल-दाख और दोप्रकारकी कटेली इनसोलह फलोंको शक्तिके
अनुसार चाँदी के बनावे ७।८ ताड़काफल-अगस्तकाफल-कायफल-खंभारी-जिमींकन्द ९ लाललज्जावन्तीकाकंद-स्वर्णक्षीरी-जो पिसोला नाम से गुजरात में प्रसिद्धहै चिरमिटी-पृष्ठिपर्णी-सालवण-इन
का फल--१० आंब--उत्तम महुआ बड़ मूंग परवल इनके फल यह सब १६ फल शक्तिके अनुसार
तांबे के बनवावै ११ धान्यके ऊपर दो कलशों को वस्त्रोंसे युक्त करके स्थापित करै और उत्तम शय्या
बनावै उस पर भी सुन्दर वस्त्रों को स्थापित करै १२ भोजन के तीन पात्र धर्मराज की मूर्त्ति वृषभ
समेत शिव की मूर्त्ति और गौ इन सब को किसी शान्त कुटुम्बी सपत्नीक ब्राह्मण के अर्थ निवेदन
करै पवित्र दिन में ब्राह्मणका पूजन करके इन सब वस्तुओं का दान करै १३ जैसे कि सब फलों में
देवताओं की कोटि वसती है इसी प्रकार सब फलोंके त्याग करने से शिवजी में मेरी भक्तिरहै १४
जैसे शिवजी और धर्मराज सदैव अनन्त फलके देनेवाले कहे जाते हैं इसी प्रकार उनके योग्य फलों
का दान करने से वह मुझको वरदान देनेवाले होयँ १५ जैसे शिवजी के भक्तों में सदा अनन्तफल
होते हैं ऐसेही मेरे भी जन्मजन्मोंमें अनन्त फलों की प्राप्ति रहै १६ जैसे मैं शिव,विष्णु अर्क और ब्रह्मा
इन में कुछ भेद नहीं मानता हूं इसी प्रकार विश्वात्मा शंकर सदैव मेरा कल्याण करैं १७ इसरीति से
पूर्वोक्त सब वस्तुओं को अलंकृत करके ब्राह्मण को दान करै और श्रद्धा होय तो सब बस्तुओं से पूरित हुई शय्या का दान करै और जो श्रद्धा न होय तो पूर्वोक्त फलोंकाही दान करै परन्तु जलके

विप्रायदत्त्वाभुञ्जीत वाग्यतस्तैलवर्जितम् । अन्यान्यपियथाशक्त्या भोजयेच्छक्तितो
द्विजान् २० एतद्भागवतानान्तु सौरवैष्णवयोगिनाम् । शुभंसर्वफलत्यागव्रतंवेदविदो
विदुः २१ नारीभिश्चयथाशक्त्या कर्तव्यंद्विजपुंगव ! । एतस्मान्नापरंकिञ्चिदिहलोके
परत्रच । व्रतमस्तिमुनिश्रेष्ठ ! यदनन्तफलप्रदम् २२ सौवर्णरौप्यताम्रेषु यावन्तःपर
माणवः । भवन्तिचूर्ण्यमाणेषु फलेषुमुनिसत्तम ! । तावद्युगसहस्राणि रुद्रलोकेमही
यते २३ एतत्समस्तकलुषापहरञ्जनाना माजीवनायमनुजेषुचसर्वदास्यात् । जन्मान्त
रेष्वपिनपुत्रवियोगदुःखमाप्नोतिधामचपुरन्दरलोकजुष्टम् २४ योवाशृणोतिपुरुषोऽल्प
धनःपठेद्वा देवालयेषुभवनेषुचधार्मिकाणाम् । पापैर्वियुक्तवपुरत्रपुरम्पुरारेरानन्दकृत्प
दमुपैतिमुनीन्द्र ! सोऽपि २५ ॥ इति श्रीमत्स्यपुराणे पञ्चनवतितमोऽध्यायः ९५॥

(नारद उवाच) यदारोग्यकरंपुंसां यदनन्तफलप्रदम् । यच्छान्तयेचमर्त्यानां वद
नन्दीशतद्व्रतम् १ (नन्दिकेश्वर उवाच) यत्तद्विश्वात्मनोधाम परंब्रह्मसनातनम् ।
सूर्य्याग्निचन्द्ररूपेणतत्त्रिधाजगतिस्थितम् २ तदाराध्यपुमान्विप्रप्राप्नोतिकुशलंसदा ।
तस्मादादित्यवारेण सदानक्ताशनोभवेत् ३ यदाहस्तेनसंयुक्तमादित्यस्यचवासरम् ।
तदाशनिदिनेकुर्य्यादेकभक्तंविमत्सरः ४ नक्तमादित्यवारेण भोजयित्वाद्विजोत्तमान् ।

कलशों पर सुवर्ण के शिव और धर्मराज बनाके रक्खे १८।१९ फिर इनको ब्राह्मण के अर्थ दान देकर
तैलसे वर्जित पदार्थों का मौन धारण करके भोजन करै और ब्राह्मणों को शक्तिके अनुसारभोजन
करवावै २० यह विष्णुभक्त सूर्य्यभक्त और योगीजन आदिकों का सर्व कर्म फल त्याग करना
वेदज्ञ ब्राह्मणों ने कहा है २१ यह व्रत स्त्रियों को भी शक्ति के अनुसार करना योग्य है हे मुनिश्रेष्ठ
नारद इस व्रत के समान इस लोक और परलोक दोनों लोकों में अनन्त फल का देनेवाला कोई
व्रत नहीं है २२ हे मुनिसत्तम पूर्व्वोक्त फलों में सुवर्ण चांदी और तांबा इनके चूर्ण के जितने परिमाण
हों उतनेही हज़ार युगों तक शिवजी के लोक में वास होता है २३ यह व्रत मनुष्यों के जीवन
पर्य्यन्त के सब पापों को नष्ट करता है किसी जन्म में भी पुत्र वियोग का दुःख नहीं होता और
देवताओं से सेवित किये हुए धाममें प्राप्त होता है २४ जो अल्प धनवाला पुरुष भी इस को सुनता
है अथवा पढ़ता है वह शिवजी के लोक में धार्मिक देवताओं के स्थानोंको प्राप्तहोकर आनन्द करताहै
और सब पापों से छुटजाताहै २५ ॥ इतिश्रीमत्स्यपुराणभाषाटीकायांपंचनवतितमोऽध्यायः ९५ ॥

नारद मुनिने पूछा कि हे नन्दिकेश्वर पुरुषोंका अत्यानन्दकारी शान्तिकर्त्ता जो अनन्तफल का
देनेवाला व्रतहोय वह मुझसे वर्णनकरो १ नन्दिकेश्वर बोले कि जो परमात्मा का परब्रह्म धाम
इसजगत् में सूर्य्य अग्नि और चन्द्रमा इनतीनरूपोंसे प्रसिद्धहोरहाहै २ जिसके कि आराधन करने
से पुरुष सदैव कुशलताको प्राप्तहोताहै उसके व्रतको मैंतुमसे कहताहूं कि रविवारके दिन सदैव रात्री में
भोजन करै ३ और रविवार के दिन हस्तनक्षत्र भी होय तब शनिवारके दिवस नियमपूर्व्वक एकही
वार भोजनकरै ४ और रविवार के दिन रात्रिमें ब्राह्मणों को भोजन कराकर लालचन्दनसे बारह

पत्रैर्द्वादशसंयुक्तं रक्तचन्दनपङ्कजम् ५ विलिख्यविन्यसेत्सूर्य्यं नमस्कारेणपूर्वतः। दि
वाकरन्तथाग्नेये विवस्वन्तमतःपरम् ६ भगन्तुनैर्ऋतेदेवं वरुणम्पश्चिमेदले। महे
न्द्रमनिलेतद्वदादित्यञ्चतथोत्तरे ७ शान्तमीशानभागेतु नमस्कारेणविन्यसेत्। कर्णि
कापूर्वपत्रेतु सूर्य्यस्यतुरगान्न्यसेत् ८ दक्षिणेऽर्य्यमनामानं मार्तण्डंपश्चिमेदले। उत्तरे
तुरविन्देवङ्कर्णिकायाञ्चभास्करम् ९ रक्तपुष्पोदकेनार्घ्यं सतिलारुणचन्दनम्। तस्मि
न्पद्मेततोदद्यादिमम्मन्त्रमुदीरयेत् १० कालात्मासर्वभूतात्मा वेदात्माविश्वतोमुखः।
यस्मादग्नीन्द्ररूपस्त्वमतःपाहिदिवाकर! ११ अग्निमीलेनमस्तुभ्य मिषत्वोर्जेचभा
स्कर!। अग्नआयाहिवरद! नमस्तेज्योतिषाम्पते १२ अर्घ्यंदत्त्वाविसृज्याथ निशितै
लविवर्जितम्। भुञ्जीतवत्सरान्तेतु काञ्चनंकमलोत्तमम्। पुरुषञ्चयथाशक्त्या कारये
द्द्विभुजंतथा १३ सुवर्णशृङ्गींकपिलांमहार्घ्यां रौप्यैःखुरैःकांस्यदोहांसवत्साम्। पूर्णगु
ड़स्योपरिताम्रपात्रे निधायपद्मंपुरुषञ्चदद्यात् १४ संपूज्यरक्ताम्बरमाल्यधूपैर्द्विजञ्चर
क्तैरथहेमशृङ्गैः। संकल्पयित्वापुरुषंसपद्मं दद्यादनेकव्रतदानकाय। अव्यङ्गरूपायजिते
न्द्रियाय कुटुम्बिनेदेयमनुद्धताय१५ नमोनमःपापविनाशनाय विश्वात्मनेसप्ततुरङ्गमाय।
सामर्ग्यजुर्द्धामनिधे! विधात्र भवाब्धिपोतायजगत्सवित्रे १६ इत्यनेनविधिनासमाच
रेदब्दमेकमिहयस्तुमानवः। सोऽधिरोहतिविनष्टकल्मषः सूर्य्यधामधुतचामरावलिः १७

पत्तोंका कमल बनावे उसमें पूर्वकी ओर सूर्य्यके अर्थ नमस्कार लिखै अग्निकोण में दिवाकरको--
दक्षिण में विवस्वान्को ५। ६ नैर्ऋत्यमें भगको--पश्चिममें वरुणको--वायव्यमें महेन्द्रको--और
उत्तरमें आदित्यको नमस्कार लिखै ७ ईशानमें शान्तको और कमलके पूर्वभागमें सूर्य्यके अश्वोंको
लिखै--दक्षिणमें अर्य्यमा देवतालिखै--पश्चिममें मार्त्तण्डको और उत्तरके दलमें रविदेवको लिखै
कमलकी पँखड़ियोंपर भास्करको लिखै--८। ९ और रक्त पुष्प--तिल-लालचन्दन--इनसबसे उस
कमलमें अर्घदानकरै और इसमंत्रका उच्चारणकरै १० कि हे दिवाकर तुम कालात्मा सर्वभूतात्मा
और वेदात्माभी हो चारोंओर मुखवालेहो इन्द्र और अग्निके रूपवाले हो इस हेतुसे मेरीरक्षाकरो ११
अग्निमीलेनमस्तुभ्यमिषेत्वोर्जेचभास्कर। अग्नआयाहिवरद नमस्तेज्योतिषांपते १२ इन मंत्रों से
अर्घदेकर विसर्ज्जन करदेवै रात्रिमें विनातेलको भोजनकरै जब वर्षदिन होजाय तब शक्तिके अनु-
सार सुवर्णका कमल और दोभुजावाला पुरुष बनावै १३ सुवर्णकी सींगड़ी रूपेके खुर उत्तम सवत्सा
कपिला गौ कांसेकी दोहनी तांबेके पात्रमें गुड़ पै स्थापित कियाहुआ कमल और सुवर्णका पुरुष इन
सबको दानकरै १४ फिर लालचन्दन माला और धूपादिसे ब्राह्मणका पूजनकर लालसुवर्ण के शृंगों
से संकल्पकरके अनेक व्रतदानादि करनेवाले व्यंगरहित जितेन्द्रिय कुटुम्बी औरमदरहित ब्राह्मणको
उस कमल सहित पुरुषका दानकरदे १५ और यहकहै कि हेपापनाशक विश्वात्मा सप्त अश्ववाले
ऋग्यजु और सामवेदके निधि विधाता संसार सागरके नौकारूप आपके अर्थ वारंवार नमस्कार
है १६ जो मनुष्य इसविधिको वर्षदिनतक करताहै वह सबपापोंसे छुटकर चमरोंसे शोभितहो सूर्य्य

धर्मसंक्षयमवाप्यभूपतिः शोकदुःखभयरोगवर्जितः। द्वीपसप्तकपतिःपुनःपुनर्द्धर्ममूर्तिरमि
तौजसायुतः १८ याचभर्तृगुरुदेवतत्परा वेदमूर्त्तिदिननक्तमाचरेत्। सापिलोकममरेश
वन्दिता यातिनारद ! रवेर्नसंशयः १९ यःपठेदपिशृणोतिमानवः पठ्यमानमथवानुमोद
ते। सोऽपिशक्रभुवनस्थितोऽमरैः पूज्यतेवसतिचाक्षयंदिवि २० ॥

इति श्रीमत्स्यपुराणे षण्णवतितमोऽध्यायः ९६ ॥

(नन्दिकेश्वर उवाच) अथान्यदपिवक्ष्यामि संक्रान्त्युद्यापनेफलम्। यदक्षयम्परे
लोके सर्वकामफलप्रदम् १ अयनेविषुवेवापि संक्रान्तिव्रतमाचरेत्। पूर्वेद्युरेकभक्तेनद
न्तधावनपूर्वकम्। संक्रान्तिवासरेप्रातास्तिलैःस्नानंविधीयते २ रविसंक्रमणेभूमौ चन्द
नेनाष्टपत्रकम्। पद्मंसकर्णिकंकुर्यात् तस्मिन्नावाहयेद्रविम् ३ कर्णिकायांन्यसेत्सूर्य्य मा
दित्यंपूर्वतस्ततः। नमउष्णार्चिषेयाम्ये नमोऋङ्मण्डलायच ४ नमःसावित्रेनैर्ऋत्ये
वारुणेतपनंपुनः। वायव्येतुभगंन्यस्य पुनःपुनरथार्चयेत् ५ मार्तण्डमुत्तरेविष्णुमीशा
नेविन्यसेत्सदा। गन्धमाल्यफलैर्भक्ष्यैः स्थण्डिलेपूजयेत्ततः ६ द्विजायसोदकुम्भञ्च
घृतपात्रंहिरण्मयम्। कमलञ्चयथाशक्त्या कारयित्वानिवेदयेत् ७ चन्दनोदकपुष्पैश्च

लोकमें निवासकरताहै १७ और जबपुण्यकी समाप्ति होजाय तब शोक दुःख भय और रोगादि से वर्जित होकर अतुल पराक्रमी और धर्ममूर्त्तिहोकर सातोंद्वीपोंका महाराज होताहै १८ जो अपने पति--देवता और गुरूकी भक्तिकरनेवाली स्त्री इस व्रतको करती है हेनारद वह स्त्रीभी देवताओं से वन्दितहुए सूर्य्यके लोकमें निस्सन्देह प्राप्तहोती है जो मनुष्य इस व्रतको पढ़ता सुनता अथवा पढ़ते हुएको अनुमोदन करवाताहै वहभी इन्द्रके लोकमें प्राप्तहोकर देवताओं से पूजित हो अनन्तकाल तक स्वर्गमें वासकरता है १९।२० ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांषण्णवतितमोऽध्यायः ९६ ॥

नन्दिकेश्वरबोले--हेनारदजी अब परलोकमें सब कामनाओं के फलोंको अक्षयगुणा देनेवाले संक्रान्तिके उद्यापनको कहताहूं १ मकर और कर्ककी संक्रान्तिके दिन अथवा जब रात्रि और दिनसमान होय ऐसे विषुव संज्ञक कालमें संक्रान्तिका व्रतकरै पहलेदिन एकवार भोजनकरै फिर संक्रान्तिके दिन दन्तधावनादिकर तिलोंसे स्नानकरै २ उस सूर्य्य संक्रान्तिके दिन भूमिपर आठपत्रों वाला कमल चन्दनसे लिखै उसके बीचमें कर्णिका अर्थात् कलियां बनावै उसमें रविका आवाहनकरै ३ कर्णिका में सूर्य्यको स्थापितकरै पूर्व में आदित्यको स्थापितकरै उष्णार्चिषेनमः ऋङ्मंगलायनमः यह कह कर दक्षिण में नमस्कारकरै ४ नैर्ऋत्यमें सविताको नमस्कार करै पश्चिममें तपनको नमस्कारकरै और वायव्यमें भगको स्थापित करके वारंवार पूजनकरै ५ उत्तरमें मार्त्तण्डको स्थापित करै और ईशानमें विष्णुको स्थापित करके गन्धपुष्प फल और भक्ष्यपदार्थों से वेदिका पर पूजनकरै ६ जल के कलशपर घृतके पात्रको रख सुवर्ण युक्तकर ब्राह्मणके अर्थ निवेदन करै और कमलको भी शक्तिके अनुसार सुवर्णका बनवाके ब्राह्मणके अर्थ दानकरदे ७ फिर चन्दन जल और पुष्पोंसे सूर्य्यके अर्थ

देवायार्घ्यंन्यसेद्भुवि। विश्वायविश्वरूपाय विश्वधाम्नेस्वयम्भुवे। नमोऽनन्त! नमोधात्रे ऋक्सामयजुषाम्पते! ८ अनेनविधिनासर्वं मासिमासिसमाचरेत्। वत्सरान्तेऽथवा कुर्यात्सर्वंद्वादशधानरः ९ संवत्सरान्तेघृतपायसेन सन्तर्प्यवह्निंद्विजपुङ्गवांश्च। कुम्भान्पुनर्द्वादशधेनुयुक्तान्सरत्नहैरण्मयपद्मयुक्तान् १० पयस्विनीःशीलवतीश्चदद्याद्धैमैःशृङ्गैरौप्यखुरैश्चयुक्ताः। गावोऽष्टवासप्तसकांस्यदोहा माल्याम्बरावाचतुरोऽप्यशक्तः। दौर्गत्ययुक्तःकपिलामथैकां निवेदयेद्ब्राह्मणपुङ्गवाय ११ हैमींचदद्यात्पृथिवींसशेषामाकार्यरूप्यामथवाचताम्रीम्। पैष्टीमशक्तःप्रतिमांविधाय सौवर्णसूर्येणसमम्प्रदद्यात्। नवित्तशाठ्यंपुरुषोऽत्रकुर्यात्कुर्वन्नधोयातिनसंशयोऽत्र १२ यावन्महेन्द्रप्रमुखैर्नगेन्द्रैः पृथ्वींचसप्ताब्धियुतेहतिष्ठेत्। तावत्सगन्धर्वगणैरशेषैः सम्पूज्यतेनारद! नाकपृष्ठे १३ ततस्तुकर्म्मक्षयमाप्यसप्तद्वीपाधिपःस्यात्कुलशीलयुक्तः। सृष्टेर्मुखेऽव्यङ्गवपुःसभार्यःप्रभूतपुत्रान्वयवन्दितांघ्रिः १४ इतिपठतिशृणोतिवाथभक्त्या विधिमखिलंरविसंक्रमस्य पुण्यम्। मतिमपिचददातिसोऽपिदेवैरमरपतेर्भवनेप्रपूज्यतेच १५॥

इति श्रीमत्स्यपुराणे सप्तनवतितमोऽध्यायः ९७॥

(नन्दिकेश्वर उवाच) शृणुनारद! वक्ष्यामिविष्णोर्व्रतमनुत्तमम्। विभूतिद्वादशी

यह पर्वत गोल आकृति भूमिमें समान अनेकप्रकार के रंगके सरोवरों वाला ब्रह्माजी के दियेहुए गुणोंसे युक्त है क्योंकि यह पर्व्वत अव्यक्त जन्मवाले ब्रह्माजी की नाभि के बन्धनसे उत्पन्न हुआ है इस पर्व्वतके एक पक्षमें श्वेतवर्ण है इसहेतु से उसमें ब्राह्मण भाव गिनते हैं दूसरीओर दक्षिण दिशामें पीतवर्ण है इसहेतु वैश्यभावहै पश्चिमकी ओर भौंरोंके समान कालावर्ण है इस कारण से शूद्रभाव है और उत्तर की ओर लालवर्ण है इस निमित्त इसका क्षत्रीपना प्रसिद्धहै ऐसे इसकेचारों वर्ण कहे हैं १३।१६ नल पर्व्वत वैदूर्य्यमणियों से जटितहै और श्वेतपीत होकर सुवर्ण के समान वर्ण मोर पंखके सदृश शोभित बड़े २ शृंगोंवालाहै १७ यह पर्व्वत पूर्व कहेहुए पर्व्वतोंका राजा है और सिद्ध चारणोंसे सेवितहै इन दोनों में हज़ार योजनका अन्तर कहाहै १८ मध्यमें इलावृतनाम पर्व्वतहै वह महामेरुके चारों ओर है उसका विस्तार चौबीस हज़ार योजनका है १९ इन सबके मध्यमें सुमेरु ऐसा देदीप्यमान है जैसी कि निर्धूम अग्नि होती है यह दक्षिणकी ओर आधा दक्षिण मेरुहै और उत्तर की ओर का उत्तर मेरु है २० जो यहां सातवर्ष कहे हैं उनवर्षों में उत्तर दक्षिण वर्ष दो हज़ार योजनवाले विस्तार में हैं २१ अब जंबूद्वीपका विस्तार और उन पर्व्वतोंकी चौड़ाई कहते हैं इनमें नील और निषध दो पर्व्वत बड़े हैं और बाकीके पर्व्वत छोटे हैं २२ इनमें हेमकूट–हिमवान्--शृंगवान् और ऋषभ यह श्वेतपर्व्वत जम्बू द्वीपके प्रमाणसे कहे हैं २३ अन्य पर्व्वतों से हेमकूट बारह गुणा बड़ाहै हेमकूट से हिमवान् बीस भाग बड़ाहै हेमकूट महागिरि अट्ठासी हज़ार योजन वर्णन कियाहै २४ हिमवान् पर्व्वत पूर्व पश्चिम अस्सी हज़ार योजन चौड़ा है ऐसे मण्डली

ह्रासवृद्धीप्रकीर्त्तिते २५ वर्षाणांपर्वतानाञ्च यथाभेदंतथोत्तरम् । तेषांमध्येजनपदास्तानि
वर्षाणिसप्तवै २६ प्रपातविषमैस्तैस्तु पर्वतैरावृतानितु । सप्ततानिनदीभेदैरगम्यानिपर
स्परम् २७ वसन्तितेषुसत्वानि नानाजातीनिसर्वशः । इमंहैमवतंवर्षं भारतंनामविश्रुतम्
२८हेमकूटंपरंतस्मान्नाम्नाकिम्पुरुषंस्मृतम् । हेमकूटाश्चनिषधं हरिवर्षंतदुच्यते २९ हरि
वर्षात्परश्चापि मेरोस्तुतदिलावृतम् । इलावृतात्परंनीलं रम्यकंनामविश्रुतम् ३० रम्यका
दपरंश्वेतं विश्रुतंतद्धिरण्यकम् । हिरण्यकात्परश्चैव शृङ्गशाकंकुरुंस्मृतम् ३१ धनुःसंस्थेतु
विज्ञेयेदेवर्षे ! दक्षिणोत्तरे । दीर्घाणितस्यचत्वारि मध्यमंतदिलावृतम् ३२ पूर्वतोनिषधस्ये
दं वेद्यर्द्धंदक्षिणंस्मृतम् । परन्त्विलावृतंपश्चाद्वेद्यर्द्धन्तुतदुत्तरम् ३३ तयोर्मध्येतुविज्ञेयो
मेरुर्यत्रत्विलावृतम् । दक्षिणेनतुनीलस्य निषधस्योत्तरेणतु ३४ उद्गायतोमहाशैलो
माल्यवान्नामपर्वतः । द्वात्रिंशतासहस्रेण प्रतीच्यांसागरानुगः ३५ माल्यवान्वैसहस्रैक
आनीलनिषधायतः । द्वात्रिंशत्त्वेवमप्युक्तः पर्वतोगन्धमादनः ३६ परिमण्डलयोर्मध्ये मे
रुःकनकपर्वतः । चातुर्वर्ण्यसमोवर्णैश्चतुरस्रःसमुच्छ्रितः ३७ नानावर्णःसपार्श्वेषु पूर्वान्ते
श्वेतउच्यते । पीतन्तुदक्षिणंतस्य भृङ्गिपत्रनिभम्परम् । उत्तरंतस्यरक्तंवै इतिवर्णसमन्वि
तः ३८ मेरुस्तुशुशुभेदिव्यो राजवत्सतुवेष्टितः । आदित्यतरुणाभासो विधूमइवपाव
कः ३९ योजनानांसहस्राणि चतुराशीतिउच्छ्रितः । प्रविष्टःषोडशाधस्तादष्टाविंशतिवि
स्तृतः ४० विस्तराद्द्विगुणश्चास्य परीणाहःसमन्ततः । सपर्वतोमहादिव्यो दिव्यौषधि

भाव होनेसे द्वीपकी ह्रास अर्थात् घटना और वृद्धि कहदी है २५ वर्ष और पर्व्वतों का जैसा भेद है
वैसाही उत्तर है उन वर्षों के बीचमें देशबसते हैं २६ यह वर्ष कि ले के समान पर्व्वतों से आवृत है
और इन पर्व्वतोंका परस्पर आना जाना केवल सातही नदियों करके बन्दहै २७ इन खंडों में सब
जगह अनेक जाति के जीव बसते हैं २८ हे मकूट नामसे किम्पुरुष कहा है हेमकूटसे निषध पर्य्यन्त
हरिवर्ष कहाजाता है २९ हरि वर्ष से परे मेरु मेरु से परे इलावृत और इलावृत से परे नीलरम्यक
नामसे विख्यातहै ३० रम्यक से परे श्वेत पर्व्वत है वह हिरण्यकनाम से विख्यातहै हिरण्यक से
परे शृंगशाक है उसीको कुर भी कहते हैं ३१ और दक्षिण उत्तर दो वर्ष धनुषाकार चार सौ योजन
चौड़े हैं इनके मध्यमें इलावृतहै ३२ इसमें आधा तो दक्षिण इलावृतहै और आधा उत्तर इलावृत
है ३३ इनके बीचो बीच सुमेरु-सुमेरु के दक्षिण नीलपर्व्वत और उत्तर में निषधहै ३४ और माल्य
वान् पर्व्वत बत्तीस हज़ार योजन लम्बा होकर पश्चिम समुद्रमें प्राप्तहै ३५ यह माल्यवान् नील
और निषध पर्व्वत पर्य्यन्त एक हज़ार योजनहै और बत्तीस योजन गन्धमादन है ३६ इस मंडल
के बीचमें सुवर्ण का सुमेरु पर्व्वत है वह चारों वर्णोंके समान चार रंगवाला चौखूंटा और ऊंचा
है ३७ पूर्वदिशाके अन्तमें श्वेत पर्व्वत है वह भृंगिपत्र के समान दक्षिणमें पीत है और उत्तरमें रक्त
है ३८ उन पर्व्वतों के मध्य में मेरुपर्व्वत तरुण सूर्य्य और निर्धूम अग्नि के समान प्रकाशमान है
३९ वह सुमेरु चौरासी हज़ार योजन ऊंचाहै सोलह हज़ार पृथ्वीमें है और अट्ठाईस हज़ार योजन

समन्वितः ४१ भुवनैरावृतःसर्वैर्जातरूपपरिष्कृतैः । तत्रदेवगणाश्चैव गन्धर्वासुरराक्षसाः । शैलराजेप्रमोदन्ते सर्वतोऽप्सरसाङ्गणैः ४२ सतुमेरुःपरिवृतो भुवनैर्भूतभावनैः । यस्येमेचतुरोदेशा नानापार्श्वेषुसंस्थिताः ४३ भद्राश्वंभारतञ्चैव केतुमालञ्चपश्चिमे । उत्तराश्चैवकुरवः कृतपुण्यप्रतिश्रयाः ४४ विष्कम्भपर्वतास्तद्वन् मन्दरोगन्धमादनः । विपुलश्चसुपार्श्वश्च सर्वरत्नविभूषितः ४५ अरुणोदंमानसञ्च सितोदंभद्रसंज्ञितम् । तेषामुपरिचत्वारि सरांसिचवनानिच ४६ तथाभद्रकदम्बस्तु पर्वतेगन्धमादने । जम्बूवृक्षस्तथाश्वत्थो विपुलेऽथबटःपरम् ४७ गन्धमादनपार्श्वेतु पश्चिमेऽमरगण्डिकः । द्वात्रिंशतिसहस्राणि योजनैःसर्वतःसमः ४८ तत्रतेशुभकर्माणः केतुमालाःपरिश्रुताः । तत्रकालानलाःसर्वे महासत्वामहाबलाः ४९ स्त्रियश्चोत्पलवर्णाभाः सुन्दर्यःप्रियदर्शनाः । तत्रदिव्योमहावृक्षः पनसःपत्रभासुरः ५० तस्यपीत्वाफलरसं संजीवन्तिसमायुतम् । तस्यमाल्यवतःपार्श्वे पूर्वेपूर्वातुगण्डिका । द्वात्रिंशच्चसहस्राणि तत्रापिशतमुच्यते ५१ भद्रश्च तत्रविज्ञेयो नित्यंमुदितमानसः । भद्रमालवनंतत्र कालाम्रश्चमहाद्रुमः ५२ तत्रतेपुरुषाः श्वेता महासत्वामहाबलाः । स्त्रियःकुमुदवर्णाभाः सुन्दर्यःप्रियदर्शनाः ५३ चन्द्रप्रभाश्चन्द्रवर्णाः पूर्णचन्द्रनिभाननाः । चन्द्रशीतलगात्राश्च स्त्रियोह्युत्पलगन्धिकाः ५४ दशवर्षसहस्राणि आयुस्तेषामनामयम् । कालाम्रस्यरसंपीत्वा तेसर्वेस्थिरयौवनाः ५५ (सूत

चौड़ा है ४० यह ऊपर की ओर इससे दुगुना चौड़ा होकर पर्व्वतों में महादिव्य उत्तम ओषधियों से युक्त हैं ४१ इस शैलपर सुवर्ण के स्थानों में देवता गन्धर्व और राक्षस आनन्द करते हैं ४२ वह सुमेरु भूत भावन भुवनों से युक्त है और पक्षमें चार देशस्थित हैं अर्थात् दक्षिणमें भद्राश्वभारत और केतुमाल और उत्तर में पुण्यात्मा कुरुदेश हैं ४३। ४४ इनकी मर्यादा मन्दर-- गन्धमादन--विपुल और सुपार्श्व यह सब अनेक रत्नों से भूषितहैं ४५ और इन पर्व्वतों पर अरुणोदय-- मानस सितोद-- और भद्रसंज्ञिक यह सरोवर और बनहैं ४६ और कदम्ब-- जामन-- पीपल और बड़ यह चार बड़े २ वृक्ष हैं ४७ गन्धमादन के पास पश्चिममें बत्तीस हज़ार योजन का अमर गंडक पर्व्वत है ४८ यहाँ संपूर्ण शुभकर्मी मनुष्य बासकरते हैं उन सबका तेज काल और अग्नि के समान है और बड़े २ शरीर धारी और पराक्रमी हैं वहाँ की स्त्रियां कमलके समान वर्णवाली महा सुन्दर और प्रिय दर्शन वाली हैं उस माल्यवान् पर्व्वत में सुन्दर फाल सों के वृक्ष पत्तों से भूषित हैं ४९। ५० उन फालसों के रसको पीकर वहाँ के बासी दशहज़ार बर्ष जीवते हैं माल्यवान्से पूर्व्वकी ओर गंडकी नदीहै वह बत्तीसहजार योजन बिस्तारवाली है ५१ भद्राश्वखंड के बासी मनुष्य सबकालमें आनन्दपूर्व्वक रहतेहैं उसी खंडमें भद्रमाल बनहै जहां बहुतबड़ा काला आम्रका वृक्ष है ५२ वहांके पुरुष श्वेतवर्णवाले महाशरीरी और पराक्रमी हैं स्त्रियां कमलमुखवाली महासुन्दरी और प्रियदर्शनाहैं ५३ उन स्त्रियों का चन्द्रमाके समानवर्ण मुख शीतलता कान्ति तेज और कमलकीसी गन्धिवाला शरीरहै ५४ उनकी आयु रोगोंसे रहित दशहज़ार वर्षोंकी और काले

उवाच) इत्युक्तवान्ऋषीन्ब्रह्मा वर्षाणिचनिसर्गतः। पूर्वंममानुग्रहकृद् भूयः किं वर्णया
मिवः ५६ एतच्छ्रुत्वावचस्तेतु ऋषयःसंशितव्रताः। जातकौतूहलाःसर्वे प्रत्यूचुस्तेमुदा
न्विताः ५७ (ऋषय ऊचुः) पूर्वापरौसमाख्यातौ यौदेशौतौत्वयामुने!। उत्तराणाञ्चवर्षा
णां पर्वतानाञ्चसर्वशः ५८ आख्याहिनोयथातथ्यं येचपर्वतवासिनः। एवमुक्तस्तुऋषि
भिस्तेभ्यस्त्वाख्यातवान्पुनः ५९ (सूत उवाच) शृणुध्वंयानिवर्षाणि पूर्वोक्तानिचवैम
या। दक्षिणेनतुनीलस्य निषधस्योत्तरेणतु ६० वर्षंरमणकंनाम जायन्तेयत्रवैप्रजाः। र
तिप्रधानाविमला जायन्तेयत्रमानवाः। शुक्लाभिजनसम्पन्नाः सर्वेतेप्रियदर्शनाः ६१ तत्रा
पिचमहावृक्षो न्यग्रोधोरोहिणोमहान्। तस्यापितेफलरसं पिवन्तोवर्तयन्तिहि ६२ दशव
र्षसहस्राणि दशवर्षशतानिच। जीवन्तितेमहाभागाः सदाहृष्टानरोत्तमाः ६३ उत्तरेणतु
श्वेतस्य पार्श्वेशृङ्गस्यदक्षिणे। वर्षंहिरण्वतंनाम यत्रहैरण्वतीनदी ६४ महाबलामहास
त्वा नित्यंमुदितमानसाः। शुक्लाभिजनसम्पन्नाः सर्वेचप्रियदर्शनाः ६५ एकादशसहस्रा
णि वर्षाणांतेनरोत्तमाः। आयुःप्रमाणंजीवन्ति शतानिदशपञ्चच ६६ तस्मिन्वर्षेमहावृ
क्षो लकुचःपत्रसंश्रयः। तस्यपीत्वाफलरसं तत्रजीवन्तिमानवाः ६७ शृङ्गसाह्वस्यशृङ्गा
णि त्रीणितानिमहान्तिवै। एकंमणियुतंतत्र एकन्तुकनकान्वितम्। सर्वरत्नमयंचैकं भुवनै
रुपशोभितम् ६८ उत्तरेचास्यशृङ्गस्य समुद्रान्तेचदक्षिणे। कुरवस्तत्रतद्वर्षं पुण्यंसिद्ध

आम्रके रसके पनिसे संपूर्ण वासी स्थिर यौवनवालेहैं ५५ सूतजी कहतेहैं कि हेऋषियो इस प्रकार
से वर्षोंकी रचना ब्रह्माजीने ऋषियोंसे वर्णनकरीहै और उन्हीं ब्रह्माजीने पूर्व्वके वर्षोंकीरचना मुझ
से कहीहै और मैंने तुम्हारेआगे वर्णनकीहै ५६ सूतजीके ऐसे सुन्दर वचन सुनकर संपूर्णऋषि आनंदितहुए
और यह वचनबोले ५७ कि हेमुने जो आपने पूर्व और अपर दो देश कहेहैं उनमें से उत्तर
वर्षोंका और पर्व्वतोंका यथार्थभेद वर्णनकीजिये ५८ इसके विशेष हे सूतजी आप पर्व्वत वासियोंका
भी भेद कहो इसप्रकार ऋषियोंके पूछनेपर सूतजी फिर संपूर्ण वृत्तान्त कहतेभये ५९ हेऋषियो जो
मैंने पहलेवर्ष कहेहैं जिनके कि दक्षिणमें नील पर्वत और उत्तरमें निषधहैं उनको कहताहूं तुम श्रवण
करो ६० वह रमणकनाम वर्ष है वहांके मनुष्य अति सुन्दर और विषयासक्त हैं परन्तु उनका
शुक्लकुल होकर अतिप्रियदर्शन हैं ६१ वहांभी एक बहुत बड़ा बड़कावृक्ष है वहांके मनुष्य उसके
फलके रसको पान करते हैं ६२ इसीसे उस रमणक वर्षके मनुष्य ग्यारह हज़ार वर्ष जीते हैं और
महाभाग उत्तम कहाकर सदाप्रसन्न रहतेहैं ६३ इसके उत्तरमें श्वेत पर्वत दक्षिणमें शृंग पर्व्वत वह
हिरण्वतनाम वर्ष ह और वहांही हिरण्वती नाम नदी है ६४ हिरण्वत वर्ष के मनुष्यभी बहुत बली
वड़े शरिरधारी आनन्दसे रहनेवाले स्वच्छ कुलवाले और प्रिय दर्शनवाले हैं ६५ इन मनुष्योंकीभी
ग्यारहहज़ार पन्द्रहसौ वर्षकी आयुहै और परम उत्तम नर कहलाते हैं ६६ उस वर्षमें लकुच अर्थात्
वड़हलके सुन्दर पत्तोंवाले वृक्षहैं उनकेभी फलोंका रस मनुष्य पीकर बहुत वर्ष जीते हैं ६७ और
शृंगनाम जो पर्व्वतहै उसके तीन वड़े २ शृंग हैं एक शृंगतो मणियोंसे युक्तहै दूसरा संपूर्ण रत्नोंसे

निषेवितम् ६९ तत्रवृक्षामधुफला दिव्यामृतमयापगाः। वस्त्राणितेप्रसूयन्ते फलैश्चाभरणानिच ७० सर्वकामप्रदातारः केचिद्वृक्षामनोरमाः। अपरेक्षीरिणोनाम वृक्षास्तत्र मनोरमाः। येरक्षन्तिसदाक्षीरं षट्पञ्चामृतोपमम् ७१ सर्वामणिमयीभूमिः सूक्ष्माकाञ्चनबालुका। सर्वत्रसुखसंस्पर्शा निःशब्दाःपवनाःशुभाः ७२ देवलोकच्युतास्तत्र जायन्तेमानवाःशुभाः। शुक्लाभिजनसम्पन्नाः सर्वेतेस्थिरयौवनाः ७३ मिथुनानिप्रजायन्ते स्त्रियश्चाप्सरसोपमाः। तेषान्तेक्षीरिणांक्षीरं पिवन्तिह्यमृतोपमम् ७४ एकाहाज्जायतेयुग्मं समञ्चैवविवर्द्धते। समंरूपंचशीलञ्च समञ्चैवम्रियन्तिवै ७५ एकैकमनुरक्ताश्च चक्रवाकमिव ध्रुवम्। अनामयाह्यशोकाश्च नित्यंमुदितमानसाः ७६ दशवर्षसहस्राणि दशवर्षशतानिच। जीवन्तिचमहासत्वा नचान्यास्त्रीप्रवर्त्तते ७७ (सूत उवाच) एवमेवनिसर्गोवै वर्षाणांभारतेयुगे। दृष्टःपरमधर्मज्ञाः किम्भूयःकथयामिवः ७८ आख्यातास्त्वेवमृषयः सूतपुत्रेणधीमता। उत्तरश्रवणेभूयः पप्रच्छुःसूतनन्दनम् ७९ ॥

इति श्रीमत्स्यपुराणेद्वादशोत्तरशततमोऽध्यायः ११२ ॥

(ऋषय ऊचुः) यदिदंभारतंवर्षं यस्मिन्स्वायम्भुवादयः। चतुर्दशैवमनवः प्रजासर्गं ससर्जिरे १ एतद्वेदितुमिच्छामः सकाशात्तवसुव्रत!। उत्तरश्रवणंभूयः प्रब्रूहिवदतांवर! २

जटितहै और तीसरा सुन्दर भुवनों करके शोभित है ६८ और जिसके उत्तरमें शृंग और दक्षिण में समुद्रका अन्तहै वह पवित्र कुरुदेश सिद्धोंकरके सेवितहै ६९ वहांकेभी मीठे फलवाले वृक्ष हैं और अमृतमय नदी हैं वह सुन्दरवृक्ष अपने फलोंकरके वस्त्र आभूषणोंको उत्पन्न करतेहैं ७० इनमें बहुतसे सुन्दरवृक्ष सब कामनाओंके देनेवालेहैं और बहुतसे अमृतके तुल्य दूध उत्पन्न करनेवालेहैं ७१ वहांकी सब भूमि मणिमय और सुवर्णकी बालूसे युक्तहै वहांहीएक सब सुखोंका स्पर्श करनेवाला शब्दरहित शुभ पर्व्वतहै ७२ वहां देवलोकसे आयेहुए मनुष्य जन्म लेतेहैं वह शुक्ल कुलसे युक्त होकर स्थिर यौवनवालेहैं ७३ वहां कन्या और पुत्रका जोड़ा उत्पन्न होताहै वह स्त्रीपुरुष इकट्ठे होकर अप्सरा और गन्धर्वोंके समान रूपवाले अमृतके समान वृक्षोंका दूधपीतेहैं ७४ एकही दिन कन्यापुत्र जन्मते बराबर बढ़तेहुए समानहीं रूप शीलवाले होकर एकही दिन मरतेहैं ७५ उन एक२ जोड़में चकवा चकवीके समान प्रीतिहोतीहै और सदैव रोग शोकसेरहित आनन्द मनवालेहोतेहैं ७६ यह महासत्व वाले ग्यारहहज़ार वर्ष जीवतेहैं और सदैव सुखपूर्व्वक अपनीआयुको व्यतीतकरतेहैं ७७ सूतजीकहते हैं कि हेऋषीश्वरो भारत युगमें ऐसे २ वर्षोंकी रचना देखीहै वह सब मैंने वर्णनकरी हे धर्मज्ञलोगो अब क्या सुनना चाहतेहो ७८ बुद्धिमान् सूतपुत्रके ऐसे वचन सुनकर ऋषिलोग फिर उत्तर श्रवण में सूतनन्दन से पूछतेभये ७९ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांद्वादशोत्तरशततमोऽध्यायः ११२ ॥

ऋषियोंने पूछा हे सूतजी स्वायंभुवादि चौदहमनु भारतवर्ष और प्रजाओंको कैसे रचतेभये १ हे कहनेवालोंमें श्रेष्ठ महाशुभव्रत यह सब रचना और उत्तर श्रवण वर्णन कीजिये २ ऋषियों के ऐसे

ऋषीणांतु प्राब्रवील्लौमहर्षणिः। पौराणिकस्तदासूत ! ऋषीणांभावितात्मनाम् ३
एतच्छ्रुत्वाऋषीणांतु प्राब्रवील्लौमहर्षणिः। पौराणिकस्तदासूत ! ऋषीणांभावितात्मनाम् ३
बुद्ध्याविचार्य्यबहुधा विमृश्यचपुनःपुनः। तेभ्यस्तुकथयामास उत्तरश्रवणंतदा ४ (सूत
उवाच) अथाहंवर्णयिष्यामि वर्षेऽस्मिन्भारतेप्रजाः। भरणात्प्रजनाच्चैव मनुर्भरतउच्यते
५ निरुक्तवचनैश्चैववर्षंतद्भारतंस्मृतम्। यतःस्वर्गश्चमोक्षश्च मध्यमश्चापिहिस्मृतः ६
नखल्वन्यत्रमर्त्यानां भूमौकर्म्मविधिःस्मृतः। भारतस्यास्यवर्षस्य नवभेदान्निबोधत ७
इन्द्रद्वीपःकेसरश्च ताम्रपर्णोगभस्तिमान्। नागद्वीपस्तथासौम्यो गन्धर्वस्त्वथवारुणः ८
अयंतुनवमस्तेषां द्वीपःसागरसंवृतः। योजनानांसहस्रन्तु द्वीपोऽयंदक्षिणोत्तरः ९ आय
तस्तुकुमारीतो गङ्गायाःप्रवहावधिः। तिर्यगूर्ध्वंतुविस्तीर्णः सहस्राणिदशैवतु १० द्वीपो
ह्युपनिविष्टोऽयं म्लेच्छैरन्तेषुसर्वशः। यवनाश्चकिराताश्च तस्यान्तेपूर्वपश्चिमे ११ ब्राह्म
णाःक्षत्रियावैश्या मध्येशूद्राश्चभागशः। इज्यायुतवाणिज्यादिवर्तयन्तोव्यवस्थिताः १२
तेषांसव्यवहारोऽयं वर्तनन्तुपरस्परम्। धर्मार्थकामसंयुक्तोवर्णानान्तुस्वकर्म्मसु १३ सङ्क
ल्पपञ्चमानान्तु आश्रमाणांयथाविधि। इहस्वर्गापवर्गार्थंप्रवृत्तिरिहमानुषे १४ यस्त्वयंमा
नवोद्वीपस्तिर्यग्यामःप्रकीर्त्तितः। यएनंजयतेकृत्स्नंससम्राडितिकीर्त्तितः १५ अयंलोक
स्तुवैसम्राडन्तरिक्षजितांस्मृतः। स्वराडसौस्मृतोलोकः पुनर्वक्ष्यामिविस्तरात् १६
सप्तचास्मिन्महावर्षे विश्रुताःकुलपर्वताः। महेन्द्रोमलयःसह्यः शुक्तिमान्ऋक्षवानपि
१७ विन्ध्यश्चपारियात्रश्च इत्येतेकुलपर्वताः। तेषांसहस्रशश्चान्ये पर्वतास्तुसमीपतः

वचन सुनकर पुराणोंके ज्ञाता सूतजी ऋषियोंको शुद्धभावयुक्त जानकर बहुत विचार पूर्वक बारंबार
निश्चयकरके उनके अर्थ उत्तर श्रवण वर्णन करने लगे ३। ४ सूतजीकहतेहैं हे ऋषिलोगो इसभारत
वर्षमें प्रजाओंका वर्णन करूंगा और वह भी कहूंगा जैसे कि पोषणकरने और जन्मलेने से भरतमनु
कहाताहै ५ इसीसे इसको भारतवर्ष कहाहै इसी भारतवर्षमें स्वर्ग मोक्ष और नरकलोक तक होता
है ६ भारतवर्षके विना इसभूमिमें मनुष्योंका कर्म विधान नहीं होताहै इस भारतवर्ष के नौ भेद
हैं ७ इन्द्रद्वीप-केसर-ताम्रपर्ण-गभस्तिमान्-नागद्वीप-सौम्य-गन्धर्व-वारुण और नवांद्वीप सा-
गरसे आच्छादितहै यह पूराद्वीप दक्षिण उत्तरकी ओर हज़ार योजनके विस्तारमेंहै ८। ९ और गंगाके
प्रवाह पर्य्यन्त चौड़ाईमें दशहज़ार योजनहै १० इसद्वीपके पूर्व पश्चिममें म्लेच्छ यवन और
किरात लोग वसतेहैं ११ मध्यमें ब्राह्मण क्षत्रिय वैश्य और शूद्र वसतेहैं और यज्ञ युद्ध वाणिज्य और
सेवा कर्ममें चारोंवर्ण अपने अपने कर्मोंको करतेहैं १२ सब वर्ण धर्म अर्थ काममें संयुक्त अपने २
कर्मोंमें स्थितहैं १३ इन चारोंवर्णोंके सिवाय पांचवें आश्रममें मनुष्य शरीरहीमें स्वर्ग मोक्षकी प्रवृत्ति
कहीहै १४ इस मानवनामद्वीप को तिर्य्यग् याम भी कहते हैं जो इस सम्पूर्णको जीतलेताहै उस
को सम्राट् कहतेहैं १५ यह सम्राट् स्वर्गवासियों के जीतनेवाले को कहतेहैं और लोक स्वराट्है इस
को फिर विस्तार पूर्वक कहूंगा १६ इस महावर्षमें सात कुल पर्व्वतहैं उनको कहताहूं महेन्द्र-म
लय-सह्य-शुक्तिमान्-ऋक्षवान-१७ विन्ध्य और पारियात्र यह सातबड़े पर्व्वतहैं और इनके छोटे

१८ अभिज्ञातस्ततश्चान्ये विपुलाश्चित्रसानवः । अन्ये तेभ्यःपरिज्ञाता ह्रस्वाह्रस्वोप
जीविनः १९ तैर्विमिश्राजानपदा आर्याम्लेच्छाश्चसर्वतः । पिबन्तिबहुलानद्यो गङ्गासि
न्धुःसरस्वती २० शतद्रूश्चन्द्रभागाच यमुनासरयूतथा । ऐरावतीवितस्ताच विशाला
देविकाकुहूः २१ गोमतीधौतपापाच बाहुदाचदृषद्वती । कौशिकीतुतृतीयाच निश्चला
गण्डकीतथा। इक्षुर्लौहितमित्येता हिमवत्पार्श्वनिःसृताः २२ वेदस्मृतिर्वेत्रवती वृत्रघ्नी
सिन्धुरेवच । पर्णाशानर्मदाचैव कावेरीमहतीतथा २३ पाराचधन्वतीरूपा विदुषावेणु
मत्यपि । शिप्राह्यवन्तीकुन्तीच पारियात्राश्रिताःस्मृताः २४ मन्दाकिनीदशार्णाच चित्र
कूटातथैवच । तमसापिप्पलीश्येनी तथाचित्रोत्पलापिच २५ विमलाचञ्चलाचैव तथा
चधूतवाहिनी । शुक्तिमन्तीशुनीलज्जा मुकुटाह्लादिकापिच । ऋष्यवन्तप्रसूतास्तानद्यो
मलजलाःशुभाः २६ तापीपयोष्णीनिर्विन्ध्या क्षिप्राचऋषभानदी। वेणावैतरणीचैव वि
श्वमालाकुमुद्वती २७ तोयाचैवमहागौरी दुर्गमातुशिलातथा। विन्ध्यपादप्रसूतास्ताः
सर्वाःशीतजलाःशुभाः २८ गोदावरीभीमरथी कृष्णवेणीचवञ्जुला । तुङ्गभद्रासुप्रयोगा
बाह्याकावेरीचैवतु । दक्षिणापथनद्यस्ताः सह्यपादाद्विनिःसृताः २९ कृतमालाताम्रपर्णी
पुष्पजाह्युत्पलावती । मलयप्रसूतानद्यस्सर्वाः शीतजलाःशुभाः३० त्रिभागाऋषिकुल्या
च इक्षुदात्रिदिवाचला । ताम्रपर्णीतथामूली शरवाविमलातथा । महेन्द्रतनयाःसर्वाः प्र
ख्याताःशुभगामिनीः ३१ काशिकासुकुमारीच मन्दगामन्दवाहिनी। कृपाचपाशिनीचैव

हज़ारों पर्वतहैं १८ यह सातोंपर्व्वत विचित्र शिखरोंवालेहैं छोटे पर्व्वत थोड़ी उपजवालेहैं केवल
बड़े २ पर्व्वतों से जानेजाते हैं १९ इन देशोंमें आर्य्य मनुष्य और म्लेच्छ हैं और जिन नदियोंका
जलपीतेहैं उनको कहतेहैं गङ्गा–सिन्धु–सरस्वती २० सतलज–चन्द्रभागा–यमुना–सरयू–ऐरावती
वितस्ता–विशाला–देविका–कुहू २१ गोमती–धौतपापा–बाहुदा–दृषद्वती–कौशिकी–निश्चला–
गण्डकी–इक्षु और लौहित–यह नदी हिमवान् पर्व्वतसे निकली हैं २२ और वेद स्मृति–वेत्रवती–
वृत्रघ्नी–सिन्धु–पर्णाशा–नर्मदा–कावेरी–महती २३ पारा–धन्वती–रूपा–विदुषा–वेणुमती–
शिप्रा अवन्ती और कुन्ती यह नदी पारियात्र पर्व्वतसे निकली हैं २४ और मन्दाकिनी–दशार्णा–
चित्रकूटा तमसा–पिप्पली–श्येनी–चित्रोत्पला २५ विमला–चंचला–धूतवाहिनी–शुक्तिमन्ती
शुनी–लज्जा मुकुटा और ह्लादिका-- यह सुन्दर जलवाली नदी ऋष्यवान् पर्व्वतसे निकली हैं २६
और तापी-- पयोष्णी-- निर्विन्ध्या-- क्षिप्रा-- ऋषभा-- वेणा-- वैतरणी-- विश्वमाला-- कुमुद्वती २७
तोया-- महागौरी-- दुर्गमा-- शिला-- यहठंढे जल वाली नदी विन्ध्याचलसे निकली हैं २८ और
गोदावरी-- भीमरथी-- कृष्णवेणी-- वंजुला-- तुंगभद्रा-- सुप्रयोगा-- बाह्या-- कावेरी-- यह सब नदियां
दक्षिण में बहने वाली सह्य पर्व्वत से निकली हैं २९ और कृतमाला-- ताम्रपर्णी-- पुष्पजा और
उत्पलावती यह शीतल जलवाली नदी मलयाचलसे निकली हैं ३० और त्रिभागा-- ऋषिकुल्या-
इक्षुदा-- त्रिदिवा-- चला ताम्रपर्णी-- मूली-- शरवा-- विमला यह सुन्दर बहने वाली सबनदी महे-

शुक्तिमन्तात्मजास्तुताः ३२ सर्वाःपुण्यजलाःपुण्याः सर्वगाश्चसमुद्रगाः। विश्वस्य मात
रःसर्वाः सर्वपापहराःशुभाः ३३ तासांनद्युपनद्यश्च शतशोऽथसहस्रशः । तास्त्विमेकुरु
पाञ्चालाः शाल्वाश्चैवसजाङ्गलाः ३४ शूरसेनाभद्रकारा बाह्याःसहपटच्चराः । मत्स्याःकि
राताःकुल्याश्च कुन्तलाःकाशिकोशलाः ३५ आवन्ताश्चकलिङ्गाश्च मूकाश्चैवान्धकैः
सह। मध्यदेशाजनपदाः प्रायशःपरिकीर्त्तिताः ३६ सह्यस्यानन्तरेचैते तत्रगोदावरी
नदी। पृथिव्यामपिकृत्स्नायां सप्रदेशोमनोरमः ३७ यत्रगोवर्द्धनोनाम मन्दरो गन्ध
मादनः । रामाप्रियार्थंस्वर्गीयावृक्षादिव्यास्तथौषधीः ३८ भरद्वाजेनमुनिना प्रियार्थ
मवतारिताः । ततःपुष्पवरोदेशस्तेन जज्ञेमनोरमः ३९ बाह्लीकावाटधानाश्च आ
भीराःकालतोयकाः। पुरन्ध्राश्चैवशूद्राश्च पल्लवाश्चात्तखण्डिकाः ४० गान्धारायवना
श्चैव सिंधुसौवीरमद्रकाः । शकाद्रुह्याःपुलिन्दाश्च पारदाहारमूर्तिकाः ४१ रामठाः
कण्टकाराश्च कैकेयादशनामकाः । क्षत्रियोपनिवेश्याश्च वैश्याःशूद्रकुलानिच ४२
अत्रयोऽथभरद्वाजाः प्रस्थलाःसदसेरकाः। लम्पकास्तलगानाश्च सैनिकाःसहजाङ्गलैः।
एतेदेशाउदीच्यास्तु प्राच्यान्देशान्निबोधत ४३ अङ्गावङ्गामद्गुरका अन्तर्गिरिबहिर्गिरी।
सुह्मोत्तराःप्रविजयाः मार्गवागेयमालवाः ४४ प्राग्ज्योतिषाश्चपुण्ड्राश्च विदेहास्ताम्र
लिप्तकाः। शाल्वमागधगोनर्दाः प्राच्याजनपदास्स्मृताः ४५ तेषांपरेजनपदा दक्षिणापथ
वासिनः। पाण्ड्याश्चकेरलाश्चैव चोलाःकुल्यास्तथैवच ४६ सेतुकाःसूतिकाश्चैव कुप

न्द्र पर्व्वत से निकली हैं ३१ और काशिका-- सुकुमारी-- मंदगा-- मन्दवाहिनी-- कृपा-- पाशिनी--
यह नदियां शुक्तिमन्तसे निकली हैं ३२ यह कहीहुई सबनदियां महापवित्र जलवाली समुद्रगामी
जगत्की माता और पापों की हरने वालीहैं ३३ इन नदियों के सिवाय पर्व्वतों से हज़ारों नदी
उपनदी आदिक निकलती हैं इनके मध्यमें कुरु-- पांचाल-- शालव-- जांगल-- ३४ शूरसेन भद्रकार-
बाह्य-- पटच्चर-- मत्स्य-- किरात-- कुल्य-- कुंतल-- काशिकौशल-- ३५ आवन्त-- कलिंग-- मूक
और अन्धक-- यह सब मध्यदेशकहे हैं ३६ यह सब देश सह्य पर्व्वतके पास २ हैं और जहाँ जहाँ
गोदावरी नदी है वहदेश सुन्दर कहाता है ३७ और जहां गोबर्द्धन--मन्दराचल--गन्धमादन--यहसब
पर्व्वत हैं वहाँ रामचन्द्रजी के प्यार के निमित्त स्वर्गमें होने वाली औषध ३८ भारद्वाज मुनिने
उतारी हैं उन्हींसे सुन्दर पुष्प वरदेश उत्पन्नहुआ है ३९ और वाह्लीक-- बाटधान-- आभीर--काल
तोयक-- यहसब शूद्रों के देश हैं पल्लव-- आन्तखंडिक ४० गांधार-- यहयवनों के देश हैं सिन्धु--
सौवीर-- मद्रक-- शक-- द्रुह्य-- पुलिन्द-- पारदा-- हारमूर्त्तिक ४१ रामठ-- कंटकार-- और कैकेय
इन दश देशों में क्षत्रिय वैश्य-- और शूद्रवसते हैं ४२ और आत्रेय-- भरद्वाज-- प्रस्थल-- सदसेरक-
लंपक-- आस्तल-- गान-- सैनिक-- और जांगल यह देश तो उत्तरमें हैं अबपूर्व के देशों को कहताहूं
उनको सुनो ४३ अंग --बंग -- मद्गुरक-- अन्तर्गिरि--बहिर्गिरि--सुह्म-- उत्तर-- प्रविजय-- मार्ग--
वागेय--मालव--४४ प्राग्ज्योतिष--पुण्ड्र--विदेह--ताम्रलिप्तक--शालव--मागध और गोनर्द यहसबपूर्वके

थावाजिवासिकाः । नवराष्ट्रामाहिषिकाः कलिङ्गाश्चैवसर्वशः ४७ कारूषाश्चसहैषीका आटव्याःशवरास्तथा । पुलिन्दाविन्ध्यपुषिका वैदर्भादण्डकैःसह ४८ कुलीयाश्चसिरालाश्च रूपसास्तापसैःसह । तथातैत्तिरिकाश्चैव सर्वेकारस्करास्तथा ४९ वासिकाश्चैवये चान्येयेचैवान्तरनर्म्मदाः । भारुकच्छाःसमाहेयाः सहसारस्वतैस्तथा ५० काच्छीकाश्चैव सौराष्ट्रा आनर्ताअर्बुदैःसह । इत्येतेअपरान्तास्तु शृणुयेविन्ध्यवासिनः ५१ मालवाश्च करूषाश्च मेकलाश्चोत्कलैःसह । औण्ड्रामाषादशार्णाश्च भोजाःकिष्किन्धकैःसह ५२ स्तोशलाःकोसलाश्चैव त्रैपुरावैदिशास्तथा । तुमुरास्तुम्बराश्चैव पद्गमानैषधैःसह ५३ अरूपाःशौण्डिकेराश्च वीतिहोत्राअवन्तयः । एतेजनपदाःख्याता विन्ध्यपृष्ठनिवासिनः ५४ अतोदेशान्प्रवक्ष्यामि पर्वताश्रयिणश्चये । निराहाराःसर्वगाश्च कुपथाअपथास्तथा ५५ कुथप्रावरणाश्चैव ऊर्णादर्वासमुद्गकाः । त्रिगर्तामण्डलाश्चैव किराताश्चामरैःसह ५६ चत्वारिभारतेवर्षे युगानिमुनयोऽब्रुवन् । कृतंत्रेताद्वापरञ्च कलिश्चेतिचतुर्युगम् । तेषांनिसर्गंवक्ष्यामि उपरिष्टाच्चकृत्स्नशः ५७ (मत्स्य उवाच) एतच्छ्रुत्वातुऋषयउत्तरंपुनरेवते । शुश्रूषवस्तमूचुस्तेप्रकामं लौमहर्षणिम् ५८ (ऋषय ऊचुः) यच्च किंपुरुषवर्षं हरिवर्षंतथैवच । आचक्ष्वनोयथातत्त्वं कीर्तितंभारतंत्वया ५९ जम्बूखण्डस्यविस्तारं तथान्येषांविदांवर । द्वीपानांवासिनांतेषां वृक्षाणांप्रब्रवीहिनः ६० पृष्टस्त्वेवं तदा विप्रैर्यथाप्रश्नंविशेषतः । उवाचऋषिभिर्दृष्टं पुराणाभिमतंयथा ६१ (सूत

देश हैं ४५ अब दक्षिण के देशों को सुनो पांड्य-- केरल-- चोल कुल्य-- सेतुक-- सूतिक-- कुपथ-- वाजिवासिक—नवराष्ट्र—माहिषिक—कलिंग ४६ । ४७ कारुष—सहैषीक—आटव्य—शवर—पुलिन्द विन्ध्य पुषिक—वैदर्भ—दण्डक ४८ कुलयि—सिराल—रूपस—तापस—तैत्तिरिक—कारस्कर और वासिक यह दक्षिणके देशहैं ४९ और नर्मदाके मध्यवर्ती भारुकच्छ—समाहेय—सारस्वत ५० काच्छीक सौराष्ट्र—आनर्त्त—और अर्बुद यह सब देश विन्ध्याचलके समीप वसतेहैं ५१ मालव—करूष—मेकल उत्कल—औंड्र—माष—दशार्ण—भोज—किष्किन्धक ५२ तोशल—कोसल—त्रैपुर—दिश—तुमुर—तुंबर पद्गम—नैषध ५३ अरूप—शौंडिकेर—वीतिहोत्र और अवन्ति यह सम्पूर्ण देश विन्ध्याचलकी पीठ पर वसतेहैं ५४ । ५५ अब पर्वतमें वसनेवाले देशोंकोसुनो निराहार—सर्वग—त्रिगर्त्त—मंडल—किरात और अमर यह देश पर्वतोंमें वसतेहैं ५६ इस भारतवर्षमें चारयुग वर्त्तते हैं सत्ययुग—त्रेता—द्वापर और कलियुग अब इनकी रचना सुनो ५७ मत्स्य भगवान् कहतेहैं कि हे राजन् ऐसा सुनकर ऋषि लोग उत्तर सुननेकी इच्छा करतेहुए सूतजीसे पूछनेलगे ५८ अर्थात् ऋषियोंनेकहा हे सूतजी भारत वर्ष तो आपने हमसे कहा अब आप कृपाकरके किंपुरुष वर्ष और हरिवर्षको कहिये ५९ इसके विशेष जम्बूद्वीपादिकके विस्तारसमेत वहांके निवासी और वृक्षोंका भी वृत्तान्त वर्णन कीजिये ६० ऋषियोंसे यह सुनकर सूतजी पुराणोक्त कथाको कहतेभय ६१ कि हे ऋषियो तुम सावधानहोकर

उवाच) शुश्रूषवस्तुयद्विप्राः शुश्रूषध्वमतन्द्रिताः । जम्बूवर्षःकिंपुरुषः सुमहान्नन्द
नोपमः ६२ दशवर्षसहस्राणि स्थितिःकिम्पुरुषेस्मृता । जायन्तेमानवास्तत्र सुतप्त
कनकप्रभाः ६३ वर्षेकिम्पुरुषेपुण्ये प्लक्षोमधुवहःस्मृतः। तस्यकिम्पुरुषाःसर्वे पिबन्तो
रसमुत्तमम् ६४ अनामयाह्यशोकाश्च नित्यंमुदितमानसाः । सुवर्णवर्णाश्चनराः स्त्रिय
श्चाप्सरसःस्मृताः ६५ ततःपरंकिम्पुरुषात् हरिवर्षंप्रचक्षते। महारजतसङ्काशा जाय
न्तेयत्रमानवाः ६६ देवलोकच्युताःसर्वे बहुरूपाश्चसर्वशः । हरिवर्षेनराःसर्वे पिबन्ती
क्षुरसंशुभम् ६७ नजराबाधतेतत्र तेनजीवन्तितेचिरम्। एकादशसहस्राणि तेषामायुः
प्रकीर्तितम् ६८ मध्यमंतन्मयाप्रोक्तं नाम्नावर्षमिलावृतम्। नतत्रसूर्यस्तपति नचजीव
न्तिमानवाः ६९ चन्द्रसूर्य्यौसनक्षत्रावप्रकाशाविलावृते । पद्मप्रभाःपद्मवर्णाः पद्मपत्र
निभेक्षणाः ७० पद्मगन्धाश्चजायन्ते तत्रसर्वेचमानवाः । जम्बूफलरसाहाराः अनिष्प
न्दाःसुगन्धिनः ७१ देवलोकच्युताःसर्वे महारजतवाससः। त्रयोदशसहस्राणि वर्षाणान्ते
नरोत्तमाः ७२ आयुःप्रमाणंजीवन्ति येतुवर्षइलावृते। मेरोस्तुदक्षिणेपार्श्वे निषधस्योत्तरे
णवा ७३ सुदर्शनोनाममहान् जम्बूवृक्षःसनातनः । नित्यपुष्पफलोपेतः सिद्धचारणसे
वितः ७४ तस्यनाम्नासमाख्यातो जम्बूद्वीपोवनस्पतेः। योजनानांसहस्रञ्च शतधाचमहा
नृपुनः ७५ उत्सेधोवृक्षराजस्य दिवमावृत्यतिष्ठति। तस्यजम्बूफलरसो नदीभूत्वाप्रसर्पति
७६ मेरुंप्रदक्षिणंकृत्वाजम्बूमूलगतापुनः। तंपिबन्तिसदाहृष्टाजम्बूरसमिलावृते ७७ जम्बू

श्रवण करो यह जम्बूद्वीप और किंपुरुष नन्दन वनके तुल्य वड़े हैं ६२ किं पुरुष खण्डमें मनुष्य तप्त
सुवर्णके समान कान्तिवाले होकर दशहज़ार वर्षतक जीतेहैं ६३ और पवित्र किंपुरुष देशमें एक
वटके वृक्षसे शहदकी धारा बहतीहै वहांके रहनेवाले सम्पूर्ण किन्नरलोग उस उत्तमरसकोपीतेहैं ६४
इसीसे रोग शोकादिकसे रहित महाप्रसन्न रहते हैं वहां के नरलोग सुवर्णके समान वर्णवालेहैं और
स्त्री अप्सराहैं ६५ उस किंपुरुषसे परे हरिवर्ष कहाहै और हरिचर्ष में लाल वर्णवाले मनुष्य जन्म
लेतेहैं देवलोक से आयेहुए अनेक वर्णवाले मनुष्य भी जन्मतेहैं इनके सिवाय वहांके सम्पूर्ण मनुष्य
ईखका रसपीतेहैं ६६।६७ उनको वृद्धावस्था नहींआती इसीसे बहुतदिनतक जीतेहैं उनकीआयु ग्यारह
हज़ार वर्षकी कही है ६८ और मध्यमें जो खण्ड है उसको इलावृत खंड कहते हैं वहां सूर्य्य नहीं
तपते इसीसे मनुष्य नहीं जीते ६९ इलावृतमें नक्षत्रों सहित चन्द्रमा और सूर्य्य प्रकाश करते हैं
वहां के मनुष्य कमलकीसीकान्ति कमलकेसे नेत्र ७० और पद्मकीसीही सुगन्धिवाले हैं उनके प्रस्वेद
नहीं आता जामनके फलोंका रस पीते हैं ७१ यह सब मनुष्य स्वर्गलोक से आते हैं कसूमे वस्त्र
पहरते हैं और तेरहहज़ारवर्ष जीते हैं मेरुके दक्षिण और निषधके उत्तरमें ७२।७३ सुदर्शननाम जाम-
नका बहुत बड़ा वृक्षहै वह सदैव पुष्प फलों से युक्त होकर सिद्ध चारणों से सेवित रहताहै ७४ इस
का नाम जंबूद्वीप है हज़ार योजन में बसता है और सौ प्रकारके उसके विभाग हैं ७५ और वहांके
जामनका वृक्ष इतना ऊंचाहै कि स्वर्गतक फैलरहाहै और उसके फलोंकारस नदीहोकर बहताहै ७६

फलरसंपीत्वा नजराबाधतेऽपितान् । नक्षुधानक्लमोवापि नदुःखञ्चतथाविधम् ७८ तत्र जाम्बूनदंनाम कनकंदेवभूषणम् । इन्द्रगोपकसङ्काशं जायतेभासुरञ्चयत् ७९ सर्वेषांवर्षवृक्षाणां शुभःफलरसस्तुसः । स्कन्नन्तुकांचनंशुभ्रं जायतेदेवभूषणम् ८० तेषांमूत्रंपुरीषंवा दिक्ष्वष्टासुचसर्वशः । ईश्वरानुग्रहाद्भूमिर्मृतांश्चग्रसतेतुतान् ८१ रक्षःपिशाचा यक्षाश्च सर्वेहेमवतास्तुते । हेमकूटेतुविज्ञेया गन्धर्व्वाःसाप्सरोगणाः ८२ सर्वेनागानिषेवन्ते शेषवासुकितक्षकाः । महामेरौत्रयस्त्रिंशत् क्रीडन्तेयाज्ञियाःशुभाः ८३ नीलवैदूर्य युक्तेऽस्मिन् सिद्धाब्रह्मर्षयोवसन् । दैत्यानांदानवानाञ्च श्वतःपर्वतउच्यते ८४ शृङ्गवान् पर्वतश्रेष्ठः पितृणांप्रतिसञ्चरः । इत्येतानिमयोक्तानि नववर्षाणिभारते ८५ भूतैरापनिविष्टानि गतिमन्तिध्रुवाणिच । तेषांवृद्धिर्बहुविधा दृश्यतेदेवमानुषैः । अशक्यापरिसंख्यातुं श्रद्धेयाचबुभूषता ८६ ॥

इतिश्रीमत्स्यपुराणेत्रयोदशाधिकशततमोऽध्यायः ११३ ॥

(मनुरुवाच) चरितंबुधपुत्रस्य जनार्दन ! मयाश्रुतम् । श्रुतःश्राद्धविधिःपुण्यः सर्वपापप्रणाशनः १ धेन्वाःप्रसूतमानायाः फलंदानस्यमेश्रुतम् । कृष्णाजिनप्रदानञ्च वृषोत्सर्गस्तथैवच २ श्रुत्वारूपंनरेन्द्रस्य बुधपुत्रस्यकेशव ! । कौतूहलंसमुत्पन्नं तन्ममाचक्ष्वपृच्छतः ३ केनकर्म्मविपाकेन सतुराजापुरूरवाः । अवापतादृशंरूपं सौभाग्यमपि

यह रससुमेरुकी परिक्रमाकरके फिर जंबूके वृक्षकीजड़के पासचलाआताहै और इलावृतमें प्रसन्नतापूर्व्वक लोग उसको पीते हैं ७७ उस जामन के रसके पीनेसे नतो उनको वृद्धावस्था आतीहै और न कभी क्षुधा ग्लानि वा दुःखादिक होते हैं ७८ वहां का जांबूनद नाम सुवर्ण देवताओंका आभूषण है वह बीरबहूटी के समान लाल रंग वाला है उस वर्ष के अन्य वृक्षों के फल और रस भी बड़े सुन्दर हैं उनमें से भी गोंदके समान श्वेत सुवर्ण झिरताहै वहभी देवताओं काही आभूषणहै ७९।८० उनके विष्ठा मूत्रको और मृतकों को ईश्वरके अनुग्रह से वहां की पृथ्वी आठों दिशाओं में ग्रस लेती है ८१ और राक्षस पिशाच यक्ष गन्धर्व और अप्सरा यह सब उस हेमकूट पर्व्वत में सुवर्ण के कहे हैं ८२ और शेष वासुकि और तक्षकादिक सर्प यह सब हेमकूटका सेवन करते हैं और तेंतीस यज्ञ करने वाले यज्ञ करते हैं ८३ यह महामेरु नील वैदूर्य्य मणियों से युक्त सिद्ध ब्रह्मर्षियों से व्याप्त और असंख्य दैत्यदानवों से भी भराहुआ है ८४ अन्य पर्व्वतों से शृंगवान् श्रेष्ठ है भारतखण्ड समेत यह नववर्ष कहाते हैं इन सब वर्षों में बहुतसे स्थावर जंगम जीव वासकरते हैं उनकी इतनीवृद्धिहै कि देवता और मनुष्य उनकी संख्या नहीं करसक्ते ८५। ८६ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांत्रयोदशोत्तरशततमोऽध्यायः ११३ ॥

मनुजी कहते हैं कि हे जनार्द्दनजी मैंने बुधके पुत्रका चरित सुना और संपूर्ण पापोंकी नाशकरनेवाली श्राद्धकी भी विधि सुनी १ अर्द्धप्रसूता गोदानकाफल काले मृगचर्म का दान और वृषोत्सर्गकी सब विधि सुनी २ परन्तु हे केशवजी राजा बुधके पुत्रका रूप सुनकर मुझको बड़ा आनन्द हुआ

चोत्तमम् ४ देवांस्त्रिभुवनश्रेष्ठान् गन्धर्वांश्चमनोरमान् । उर्वशीसङ्गतात्यक्त्वा सर्वभावे
नतंनृपम् ५ (मत्स्य उवाच) शृणुकर्म्मविपाकेन येनराजापुरूरवाः । अवापतादृशंरू
पं सौभाग्यमपिचोत्तमम् ६ अतीतेजन्मनिपुरा योऽयंराजापुरूरवाः । पुरूरवाइतिख्या
तो मद्रदेशाधिपोहिसः ७ चाक्षुषस्यान्वयेराजा चाक्षुषस्यान्तरेमनोः । सर्वैर्नृपगुणैर्युक्तः
केवलंरूपवर्जितः ८ (ऋषय ऊचुः) पुरूरवामद्रपतिः कर्म्मणाकेनपार्थिवः । बभूवक
र्म्मणाकेन रूपवांश्चैवसूतज ! ९ (सूत उवाच) द्विजग्रामेद्विजश्रेष्ठो नाम्नाचासीत्पुरू
रवाः । नद्याःकूलेमहाराजः पूर्वजन्मनिपार्थिवः १० सतुमद्रपतीराजा यस्तुनाम्नापुरूर
वाः । तस्मिन्जन्मन्यसौविप्रो द्वादश्यान्तुसदानघ ! ११ उपोष्यपूजयामास राज्यकामो
जनार्दनम् । चकारसोपवासश्च स्नानमभ्यङ्गपूर्वकम् १२ उपवासफलात्प्राप्तं राज्यंमद्रे
षकण्टकम् । उपोषितस्तथाभ्यङ्गाद्रूपहीनोऽभ्यजायत १३ उपोषितैर्नरैस्तस्मात् स्नान
मभ्यङ्गपूर्वकम् । वर्जनीयंप्रयत्नेन रूपघ्नंतत्परंनृप ! १४ एतद्वःकथितंसर्वं यद्वृत्तंपूर्व
जन्मनि । मद्रेश्वरस्यचरितं शृणुतस्यमहीपतेः १५ तस्यराजगुणैःसर्वैः समुपेतस्यभूप
तेः । जनानुरागोनैवासीद्रूपहीनस्यतस्यवै १६ रूपकामःसमद्रेशस्तपसेकृतनिश्चयः ।
राज्यंमन्त्रिगतंकृत्वा जगामाहिमपर्वतम् १७ व्यवसायद्वितीयस्तु पद्भ्यामेवमहायशाः ।

उसका सब वृत्तान्त कहिये ३ कि वह पुरूरवा कौनसे कर्म के फलसे ऐसे रूप और उत्तम सौभाग्य को प्राप्त हुआ ४ और वह उर्व्वशी त्रिभुवनके उत्तम २ देवता और गन्धर्वोंको त्यागकर उस राजा को कैसे प्राप्तहुई ५ ऐसे मनुके वचनोंको सुनकर मत्स्य भगवान् बोले कि हे राजा जिसकर्म के फल से राजा पुरूरवा ऐसे रूप और सौभाग्यको प्राप्त हुआ उसको मैं तुमसे कहताहूं ६ हे राजन् पूर्व्व जन्ममें यह पुरूरवा राजा पुरूरवा इस नामसे विख्यात मद्रदेशका अधिपतिथा ७ और चाक्षुष मनु के अन्तरमें यहराजा राजाओंके गुणसे तो केवल युक्तथा परन्तु रूपसे रहित था ८ इसीप्रश्नको ऋषियोंने भी सूतजी से पूछा कि हेसूतजी पुरूरवा राजा किसकर्म से राजा औरमहारूपवान् होता भया इसका ठीक २ वृत्तान्त आप हमसे वर्णन कीजिये ९ सूतजीने कहा हे ऋषीश्वरो इसका वृत्तान्त मुझसे सुनो कि किसी ब्राह्मणों के ग्राममें एक श्रेष्ठ पुरूरवा नाम ब्राह्मण था वह अगले जन्ममें नदी के तीर पर १० मद्रदेशका अधिपति पुरूरवा राजा विख्यात हुआ क्योंकि यह राजा पूर्व्व ब्राह्मण जन्ममें सदैव द्वादशीका व्रत करके राज्यके निमित्त जनार्द्दनका पूजन करता भया और मर्द्दन पूर्व्वक स्नान करता भया ११ । १२ सो उस उपवास के फल से तो राज्य प्राप्त हुआ और मर्द्दन करने से कुरूप होगया १३ क्योंकि व्रतीको मालिश करना वर्जितहै मालिशपूर्व्वक व्रती स्नानकरे तो अगले जन्ममें रूप नष्ट होजाता है १४ यह मैंने मद्रदेशके राजा पुरूरवाके पूर्वजन्म का वृत्तान्त वर्णनकिया अब अगले जन्म में जब मद्रदेशका अधिपति हुआ उसकी भी कथा सुनो १५ कि वह पुरूरवा राजा राजगुणों से युक्त होनेपर भी रूपहीनताके कारण प्रजासे तिरस्कृत होगया अर्थात् उसपर प्रजाकी प्रीति न हुई १६ फिर यह पुरूरवा रूपकी इच्छासे तप करनेका निश्चयकरके अपने राज्यको मंत्रि-

द्रष्टुंसतीर्थसदनं विषयान्तेस्वकेनदीम् । ऐरावतीतिविख्यातान्ददर्शातिमनोरमाम् १८
तुहिनगिरिमहौघवेगान्तुहिनगभस्तिसमानशीतलोदाम् । तुहिनसदृशहैमवर्णपुञ्जा
न्तुहिनयशाःसरितन्ददर्शराजा १९ ॥

इति श्रीमत्स्यपुराणे चतुर्दशाधिकशततमोऽध्यायः ११४ ॥

(सूत उवाच) सददर्शनदींपुण्यां दिव्यांहैमवतींशुभाम् । गन्धर्वैश्चसमाकीर्णां नि
त्यंशक्रेणसेविताम् १ सुरेभमदसंसिक्तां समन्तात्तुविराजिताम् । मध्येनशक्रचापाभां त
स्मिन्नहनिसर्वदा २ तपस्विशरणोपेतां महाब्राह्मणसेविताम् । ददर्शतपनीयाभां महा
राजःपुरूरवाः ३ सितहंसावलिच्छन्नाङ्काशचामरराजिताम् । साभिषिक्तामिवसतां प
श्यन्प्रीतिंपरांययौ ४ पुण्यांसुशीतलांहृद्यां मनसःप्रीतिवर्द्धिनीम् । क्षयवृद्धियुतांरम्यां
सोममूर्तिमिवापराम् ५ सुशीतशीघ्रपानीयां द्विजसंघनिषेविताम् । सुतांहिमवतःश्रेष्ठां
चञ्चद्वीचिविराजिताम् ६ अमृतस्वादुसलिलान्तापसैरुपशोभिताम् । स्वर्गारोहणनिः
श्रेणीं सर्वकल्मषनाशिनीम् ७ अग्र्यांसमुद्रमहिषीं महर्षिगणसेविताम् । सर्वलोकस्य
चौत्सुक्यकारिणींसुमनोहराम् ८ हितांसर्वस्यलोकस्य नाकमार्गप्रदायिकाम् । गोकुला
कुलतीरान्तां रम्यांशैवालवर्जिताम् ९ हंससारससंघुष्टां जलजैरुपशोभिताम् । आवर्त
नाभिगम्भीरां द्वीपोरुजघनस्थलीम् १० नीलनीरजनेत्राभां उत्फुल्लकमलाननाम् ।

योंके सुपुर्दकर हिमाचल पर्वतको जाता भया १७ फिर यह तीर्थ स्नान देखने के निमित्त अपने
देशके पास ऐरावती नदीको बड़ी उत्तमतासे देखताभया और उसकी शोभाको देखकर अत्यन्त प्रसन्न
हुआ उस नदीका वेग हिमाचल पर्वतके समान था चन्द्रमाकी किरनों के समान ठढे जल वाली
और तुषारके समान स्वच्छ श्वेत वर्णवाली ऐसीनदीको वहस्वच्छयशवालाराजादेखताभया १८।१९

इतिश्रीमत्स्यपुराणभाषाटीकायांचतुर्दशोत्तरशततमोऽध्यायः ११४ ॥

सूतजीबोले हे ऋषीश्वरलोगो उस शुभपवित्र हैमवतीनदीको गन्धर्वोंसेव्याप्त और इन्द्रसे सेवित
भी देखताभया १ इसके विशेषदेवताओंके हाथियोंके मदसे छिड़कीहुई और मध्यमें इन्द्रधनुषाकार
विराजमान तपस्वियोंसे आच्छादित ब्राह्मणोंसे सेवित सुन्दर कान्तिवाली श्वेत हंसों की पंक्तियों से
युक्त चंवररूप कांससे व्याप्त श्रेष्ठलोगों की अभिषेक कीहुई के समान उसनदी को देखकर वहराजा
पुरूरवा परम प्रीतिपूर्व्वक महापवित्र टेढ़ी मनको प्यारी प्रीतिबढ़ानेवाली ह्रासवृद्धिसे युक्त दूसरी
चन्द्रमूर्त्ति के समान रमणीक उस नदी को देखता भया २ । ५ जिस में कि शीतल और शीघ्रगामी
जल ब्राह्मणों के समूहों से सेवित था वह हिमवान् की पुत्री तरंगों से चंचल अमृत स्वादुवाली तप-
स्वियों से सेवित स्वर्गकी नसेनी सबपापोंकी नाश करनेवाली ६ । ७ समुद्रकी रानी महर्षियों से शो-
भित सबलोकों की उत्साह करनेवाली महामनोहर सर्वलोकोपकारी स्वर्गका मार्ग देनेवाली गोकुल
पर्य्यन्त नीरवाली महारमणीक शैवालसे वर्जित हंस सारसों से शब्दायमान कमलों करके अलंकृत
कमलरूप नाभिसे विराजित द्वीपरूपजंघा और पिंडिलियोंसेभूषित ८।१० नीलकमलरूप नेत्रोंवाली

हिमाभफेनवसनाञ्चक्रवाकाधरांशुभाम् । बलाकापङ्क्तिदशनाञ्चलन्मत्स्यावलिभ्रुवम्
११ स्वजलोद्भूतमातङ्गरम्यकुम्भपयोधराम् । हंसनूपुरसंघुष्टां मृणालवलयावली
म् १२ तस्यांरूपमहोन्मत्ता गन्धर्वानुगताःसदा । मध्याह्नसमयेराजन् ! क्रीडन्त्यप्सर
साङ्गणाः १३ तामप्सरोविनिर्मुक्तं वहन्तींकुंकुमंशुभम् । स्वतीरद्रुमसम्भूतनानावर्णसु
गन्धिनीम् १४ तरङ्गव्रातसंक्रान्त सूर्य्यमण्डलदुर्दृशम् । सुरेभजनिताघात विकूलद्वय
भूषिताम् १५ शक्रेभगण्डसलिलैर्देवस्त्रीकुलचन्दनैः । संयुतंसलिलंतस्याः षट्पदैरु
पसेव्यते १६ तस्यास्तीरभवावृक्षाः सुगन्धकुसुमाञ्चिताः । तथापकृष्टसम्भ्रान्त भ्रमर
स्तनिताकुलाः १७ यस्यास्तीरेरतिंयान्ति सदाकामवशामृगाः । तपोधनाश्चऋषयस्त
था देवाःसहाप्सराः १८ लभंतेयत्रपूताङ्गा देवेभ्यःप्रतिमानिताः । स्त्रियश्चनाकबहुलाः
पद्मेन्दुप्रतिमाननाः १९ याबिभर्तिसदातोयं देवसंघैरपीडितम् । पुलिंदैर्नृपसंघैश्च व्या
घ्रवृंदैरपीडितम् २० सतामरसपानीयां सतारगगनामलाम् । सतांपश्यन्ययौराजा स
तामीप्सितकामदाम् २१ यस्यास्तीररुहैःकाशैः पूर्णैश्चन्द्रांशुसन्निभैः । राजतेविविधा
कारै रम्यंतीरंमहाद्रुमैः । यासदाविविधैर्विप्रैर्देवैश्चापिनिषेव्यते २२ याचसदासकलौ
घविनाशं भक्तजनस्यकरोत्यचिरेण । यानुगतासरितांहिकदम्बैर्यानुगतासततंहिमुनी
न्द्रैः २३ याहिसुतानिवपातिमनुष्यान्याचयुतासततंहिमसंघैः । याचयुतासततंसुरवृन्दै

प्रफुल्लित जलजरूप मुखवाली श्वेतझाग रूप वस्त्रोंवाली चक्रवाक रूप सुन्दर ओष्ठवाली बलाकाओं की पंक्तिरूप दांतोंवाली चंचल मछलियों की पंक्ति रूप भृकुटियोंवाली ११ अपने जल से उत्पन्न हस्तीरूप कुचोंवाली हंसरूप नूपुरोंसे शब्दित मृणालरूप कंकणों से भूषित १२ ऐसी नदी में रूपसे उन्मत्त जो गन्धर्व अप्सरादिक मध्याह्न के स्नानादिक करते हैं उनकी क्रीड़ासे शोभित अप्सराओं के अंगसे छुटीहुई कुंकुमादिसे सुगन्धित अपने तटके वृक्षोंसे सुगंधकी बहनेवाली तरंगों के चंचल समूहों से और सूर्य्य के प्रतिबिम्बों से चमत्कृत देवताओं के हस्तियों के आघात से भूषित तीरोंवाली १३।१५ इन्द्र के ऐरावतादिक हाथियों के मदजलसे और देवताओं की स्त्रियों के चन्दनोंसे युक्त उस नदी के जलको भ्रमर सेवन करते हैं १६ उस नदी के तीर के वृक्षों के पुष्पोंकी सुगन्धिसे खिंचेहुए भ्रमरों के द्वारा शब्दायमान १७ कामके वशीभूत मृग जिसके तीरपर रतिको प्राप्त होते हैं वहांहीं तपोधन ऋषि देवता और अप्सरा आनन्दको प्राप्त होते हैं १८ और कमलाक्षी स्त्रियां जिस पर निवास करती हैं १९ वहनदी देवताओंके संगोंसे पीड़ा रहित जलकी धारण करनेवाली पुलिंद नृपसंघ और व्याघ्र वृन्दोंसे सेवितहोकर २० कमलों की शोभासे भूषित तारागणसमेत चन्द्रमासे प्रकाशित ऐसी सुन्दरतासे विराजमानहुई उसनदीको देखता हुआ कि जिसके तीरपर २१ चन्द्रमा कीसी किरणोंवाले तीरके कांसबड़े २ वृक्ष औरदेवता ब्राह्मणोंसे सेवितथे २२ वहांजाकर क्या देखता है कि यहनदी बहुतसे नदनादियोंसे सेवित थोड़ेहीकालमें भक्तोंके अनेकपापोंको नाशकरतीहुई बड़े २ मुनीन्द्रों से सेवित है २३ वहीनदी मनुष्योंको अपनेपुत्रोंके समान पालनकरनेवालीअपनेही हितके

र्यांचजनैःस्वहितायश्रितावै २४ युक्ताचकेसरिगणैःकरिवृंदजुष्टा सन्तानयुक्तसलिलापिसुवर्णयुक्ता। सूर्य्यांशुतापपरिवृद्धविवृद्धशीता शीतांशुतुल्ययशसाददृशेनृपेण २५॥

इति श्रीमत्स्यपुराणे पञ्चदशाधिकशततमोऽध्यायः ११५॥

(सूत उवाच) आलोकयन्नदीं पुण्यांतत्समीरहृतश्रमः। सगच्छन्नेवददृशे हिमवंतंमहागिरिम् १ खमुल्लिखद्भिर्बहुभिर्वृतं शृङ्गैस्तुपाण्डुरैः। पक्षिणामपिसञ्चारैर्विना सिद्धगतिंशुभम् २ नदीप्रवाहसञ्जातमहाशब्दैःसमन्ततः। असंश्रुतान्यशब्दंतं शीततोयमनोरमम् ३ देवदारुवनैर्नीलैः कृताधोवसनंशुभम्। मेघोत्तरीयकंशैलं ददृशेसनराधिपः ४ श्वेतमेघकृतोष्णीषं चंद्रार्कमुकुटंक्वचित्। हिमानुलिप्तसर्वाङ्गं क्वचिद्धातुविमिश्रितम् ५ चंदनेनानुलिप्ताङ्गं दत्तपञ्चांगुलंयथा। शीतप्रदंनिदाघेऽपि शिलाविकटसङ्कटम्। सालक्तकैरप्सरसां मुद्रितंचरणैःक्वचित् ६ क्वचित्संपृष्टसूर्य्यांशु क्वचिन्नतमसावृतम्। दरीमुखैःक्वचिद्भीमैः पिवंतंसलिलंमहत् ७ क्वचिद्विद्याधरगणैः क्रीडद्भिरुपशोभितम्। उपगीतंतथामुख्यैः किन्नराणाङ्गणैःक्वचित् ८ आपानभूमौगलितैर्गन्धर्वाप्सरसांक्वचित्। पुष्पैःसन्तानकादीनां दिव्यैस्तमुपशोभितम् ९ सुप्तोत्थिताभिः शय्याभिः कुसुमानांतथाक्वचित्। मृदिताभिःसमाकीर्णं गन्धर्वाणांमनोहरम् १० निरुद्धपवनैर्देशैर्नीलशाद्वलमण्डितैः। क्वचिच्चकुसुमैर्युक्तमत्यंतरुचिरंशुभम् ११ तपस्विशरणंशैलं कामिनामातिदुर्लभम्। मृगैर्यथानुचरितंदन्तिभिन्नमहाद्रुमम् १२ यत्रासिंहनिनादे

निमित्तदेवताओंसे सेवितहै २४ इसके विशेष सिंहहस्ती आदिजीवों से व्याप्त सुवर्णयुक्त जलसे भूषित सूर्य्यकी किरणोंसे प्रकाशित उसनदी को चन्द्रमाकी किरणों के समान यशवाला वह राजा पुरूरवा देखता भया २५॥ इति श्रीमत्स्यपुराणभाषाटीकायांपञ्चदशोत्तरशततमोऽध्यायः ११५॥

सूतजी कहते हैं कि हे ऋषियो उस पवित्र नदीको देखता और उसके जलसे परिश्रम दूर करके चलता हुआ वह राजा हिमवान् महागिरिको देखता भया १ वह पर्व्वत बहुत से श्वेत शृंगों से आकाशको छूताहुआ पक्षियोंके विना सिद्धोंकी गति वाला था २ इसके विशेष वह हिमवान् नदी के प्रवाह से उत्पन्न हुए महा शब्दों से प्रतिशब्द करता हुआ ठंढे जलों से पूर्ण महासुन्दर ३ देवदारु के नीले वनरूप धोती और मेघरूप डुपट्टेवाला और पगड़ीवाला चन्द्रमासूर्य्यरूप मुकुटवाला हिमसे लिप्त अंगवाला धातुओं सेमिला हुआ चन्दन से लिप्त अंग उष्णऋतुमें भी शीतलता देने वाला विकट शिलाओंसे युक्त कहीं लाल अप्सराओंके चरणोंसे मुद्रित ४।६ कहीं सूर्य्यकी किरण पड़ी कहीं अन्धकार से व्याप्त कहीं भयानक गुफाओं से बहुत जलपीता हुआ ७ कहीं क्रीडा करते हुए विद्याधरों के गणोंसे सेवितकहीं मुख्य किन्नरगणोंसे गायाहुआ ८ गन्धर्वअप्सराओंसे भूषित कहींकल्पवृक्षके पुष्पों से शोभित सोते से उठे हुए गन्धर्वोंकी शय्याओंसे व्याप्त मनका हरनेवाला ९।१० कहीं रुकी हुई पवनके देशमें नीलीघास से युक्त और कहीं पुष्पों से अत्यन्त रुचिरथा ऐसे सुन्दर पर्व्वत को देखता हुआ वह राजा ११ उस पर्व्वतकी अन्य शोभाको भी देखता भया अर्थात् कहीं तपस्वियों

न त्रस्तानांभैरवंरवम्। दृश्यतेनचसंभ्रान्त गजानामाकुलंकुलम् १३ तटाश्चतापसैर्यत्र
कुञ्जदेशैरलंकृताः। रत्नैर्यस्यसमुत्पन्नैस्त्रैलोक्यंसमलंकृतम् १४ अहीनशरणंनित्य म
हीनजनसेवितम्। अहीनःपश्यतिगिरि महीनंरत्नसम्पदा १५ अल्पेनतपसायत्र सिद्धिं
प्राप्स्यन्तितापसाः। यस्यदर्शनमात्रेण सर्वकल्मषनाशनम् १६ महाप्रपातसम्पात प्र
पातादिगताम्बुभिः। वायुनीतैःसदातृप्ति कृतदेशंक्वचित्क्वचित् १७ समालब्धजलैःशृ
ङ्गैः क्वचिच्चापिसमुच्छ्रितैः। नित्यार्कतापविषमैरगम्यैर्मनसायुतम् १८ देवदारुमहावृ
क्ष व्रजशाखानिरन्तरैः। वंशस्तम्बवनाकारैः प्रदेशैरुपशोभितम् १९ हिमच्छत्रमहाशृ
ङ्गं प्रपातशतनिर्झरम्। शब्दलभ्याम्बुविषमं हिमसंरुद्धकन्दरम् २० दृष्ट्वैवतंचारुनित
म्बभूमिं महानुभावःसतुमद्रनाथः। बभ्रामतत्रैवमुदासमेतस्थानं तदाकिञ्चिदथाससा
द २१ ॥ इति श्रीमत्स्यपुराणे षोडशोत्तरशततमोऽध्यायः ११६ ॥

तस्यैवपर्वतेन्द्रस्य प्रदेशंसुमनोरमम्। अगम्यंमानुषैरन्यैर्दैवयोगादुपागतः १ ऐरा
वतीसरिच्छ्रेष्ठा यस्माद्देशाद्विनिर्गता। मेघश्यामञ्चतंदेशन्द्रुमखण्डैरनेकशः २ शालै
स्तालैस्तमालैश्च कर्णिकारैःसशामलैः। न्यग्रोधैश्चतथाश्वत्थैः शिरीषैःशिंशपाद्रुमैः ३
महानिम्बैस्तथानिम्बैर्निर्गुण्डीभिर्हरिद्रुमैः। देवदारुमहावृक्षै स्तथाकालेयकद्रुमैः ४ प
द्मकैश्चन्दनैर्विल्वैः कपित्थैरक्तचन्दनैः। बाताम्रारिष्टकाक्षोटैरब्दकैश्चस्तथार्जुनैः ५ ह

का रक्षक कामियोंको दुर्लभ मृगोंसे युक्त जहां हाथियों के तोड़ेहुए वृक्षोंसे व्याप्त सिंहके भयानक शब्द
से हाथियोंका व्याकुल समूह दखिताहै १२।१३ कहीं तपस्वी और कुंजदेशोंसे भूषित तट कहींरत्नोंसे
भूषित श्रेष्ठोंकाशरण्य और उन्हींसे सेवित जिसको अच्छेपुरुष देखते हैं वहअच्छे रत्नोंसेयुक्तथा १४।१५
उस पर्व्वतमें तपस्वी थोड़ेही तपसे सिद्धिको प्राप्तथे इस पर्व्वतके दर्शनही मात्रसेसंपूर्ण पापनष्ट हो
जाते हैं और वायुसे प्राप्तहुए प्रपातडागादिके जल उस्से पूर्णहुआ देशतृप्तिको प्राप्तहोरहाहै १६।१७
कहीं ऊंचे शृंगोंसेयुक्त कहीं सजल शृंगोंमेभी युक्त कहीं सूर्य्यका विशेषताप कहीं कमताप १८ और
देवदारु महावृक्ष व्रजशाखा- बाँसोंके गुच्छे और देशों से भूषित हिमछत्रों से और सैकड़ों झिरनों से
व्याप्त जहाँ कि शब्दसे जल लब्धहोताहै जिसकी गुफा हिमसे रुकीहुई १९।२० यहमद्र देशका अधिपति महानुभाव ऐसी उस सुन्दर भूमिको देखकर वहाँहीं बिचरताभया और बहुतदिनतक बड़े
आनन्द पूर्व्वक वास करताभया २१ ॥

इति श्रीमत्स्यपुराण भाषाटीकायां षोडशोत्तरशततमोऽध्यायः ११६ ॥

सूतजी कहते हैं हेऋषीश्वरलोगो उसपूर्व्वकहेहुए अन्यदेवताओं से अगम्यपर्व्वतेन्द्रके सुन्दर देश
को वहराजा पुरूरवा प्राप्तहुआ १ और नदियोंमें उत्तम ऐरावतीनदी जिसदेशसे निकली है वह
देशभी अनेक प्रकारके वृक्ष समूहोंसे मेघके समान श्याम वर्णहै २ उसदेशमें शाल–ताल–तमाल–
कर्णिकार–शामल–बड़--पीपल--सिरस–सीसों–३ बकाँयन–नींब–निर्गुंडी–हरिद्रुम–देवदारु–महावृक्ष–केला–चन्दन–पद्माक–बेलपत्र–कैथ--लालचन्दन–आम–रीठा--अखोट--अर्जुन--४।५ह-

स्तिकर्णैःसुमनसैः कोविदारैःसुपुष्पितैः । प्राचीनामलकैश्चापि धनकैःसमराटकैः ६ ख
र्जूरैर्नारिकेलैश्च प्रियाल्वाम्रातकेंगुदैः । तन्तुमालैर्धवैर्भव्यैः काश्मीरीपर्णिभिस्तथा ७
जातीफलैःपूगफलैः कट्फलैलावलीफलैः । मन्दारैःकोविदारैश्च किंशुकैःकुसुमांशुकैः ८
यवासैःशमिपर्णासैर्वेतसैरम्बुवेतसैः । रक्तातिरङ्गनारङ्गैर्हिंगुभिःसप्रियंगुभिः ९ रक्ताशो
कैस्तथाशोकैराकल्लैरविचारकैः । मुचकुन्दैस्तथाकुन्दै राटरूषपरूषकैः १० किरातैः
किङ्किरातैश्च केतकैःश्वेतकेतकैः । सौभाञ्जनैरञ्जनैश्च सुकलिङ्गनिकोटकैः ११ सुव
र्णचारुवसनैर्द्रुमश्रेष्ठैस्तथासनैः । मन्मथस्यशराकारैः सहकारैर्मनोरमैः १२ पीतयूथि
कयाचैव श्वेतयूथिकयातथा । जात्याचम्पकजात्याच तुम्बरैश्चाप्यतुम्बरैः १३ मोचै
र्लोचैस्तुलकुचैस्तिलपुष्पकुशेशयैः । तथासुपुष्पावरणैः चव्यकैःकामिवल्लभैः १४ पु
ष्पांकुरैश्चवकुलैः पारिभद्रहारिद्रकैः । धाराकदम्बैःकुटजैः कदम्बैर्गिरिकूटजैः १५ आदि
त्यमुस्तकैःकुम्भैः कुंकुमैःकामवल्लभैः । कट्फलैर्वदरैर्नीपैर्दीपैरिवमहोज्ज्वलैः १६ रक्तैःपा
लीवनैःश्वेतैर्दाडिमैश्चम्पकद्रुमैः । बन्धूकैश्चसुबन्धूकैः कुञ्जकानान्तुजातिभिः १७कुसु
मैःपाटलाभिश्च मल्लिकाकरवीरकैः । कुरवकैर्हिमवरैर्जम्बुभिर्नृपजम्बुभिः १८ वीजपूरैः
सकर्पूरैर्गुरुभिश्चागरुद्रुमैः । विम्बैश्चप्रतिविम्बैश्च सन्तानकवितानकैः १९ तथागुग्गु
लवृक्षैश्च हिन्तालधवलेक्षुभिः । तृणशून्यैःकरवीरैरशोकैश्चक्रमर्दनैः २० पीलुभिर्धा
तकीभिश्च चिरि विल्वैःसमाकुलैः । तित्तिडीकैस्तथालोध्रैर्विडङ्गैःक्षीरिकाद्रुमैः २१ अ
श्मन्तकैस्तथाकालैर्जम्बीरैःश्वेतकद्रुमैः । भल्लातकैरिन्द्रयवैर्वल्गुजैःसिद्धिसाधकैः २२

।स्त कर्ण-सुमनस-पुष्पित कचनार-आंवला-धनक-मराटक-खजूर-नालीर-प्रियालु-आम्रातक- गूंदिया
-तंतुमाल-भव्य-काश्मीरी-पलाश-जायफल-सुपारीकेवृक्ष- कायफल- लावलीफल मंदार- कचनार-
केसू कुसुमांशुक ६।८ धमासा-जांट-पर्णास-वेत-जलवेत हरीड़ा-हींग-चिरोंजी ९ रक्तअशोक- अशोक-
आकल्ल-अवि-चारक-मुचकुन्द-कुन्द-अरडूं-फालसा १० चिरायता-किंकिरात-केतकी- श्वेतकेतकी-
सहोंजना-अंजन-बहेडा-निकोटक ११ सुवर्णसे वस्त्रोंवाला असना-कामदेवकेबाणोंकी समान सुग-
न्धिवाला-आम १२ पीली जुही- श्वेतजुही- चंपेकीजाति- तुम्बर १३ मोच- लोच लकुच- अर्थात्
वडहले-तिलपुष्प-कमल-पुष्पावरण कामी को प्यारा चीता पुष्पांकुर-बकुल- पारिभद्र-हारिद्रक- धारा
कदंब कूड़ा-कदंब-गिरिकूटज १४।१५ आदित्यमुस्तक-कुंभकामियों को प्यारी कुंकुम अर्थात् केशर-
कायफल-बड़बेर-दीपकों के प्रकाश के समानमाननीय अर्थात् कदंब १६ लालपालीवत- चंपा- बंधूक
जाति-कुंजकों- की जाति-१७ कुसुम-पाटला-मल्लिका-कनेर-कुरवक- हिमबर- जामन- राजजामन
१८ बिजौरा- कर्पूर- अगर- बिम्ब- प्रतिबिम्ब- सन्तानक- बिजानक- गूगल- हिंताल- सुपेदईख-
तृणशून्य- करवीर अशोक- पुंवाड़ १९ । २० जाल-धाय- अमली- लोध- वायबिडङ्ग- थूहर- अश्म-
न्तक-कालानींबू-भिलांवा-इन्द्रयव-चिलगोजा-सिद्धिसाधक २१।२२ करमर्द-कालमर्द-अविष्टक-बरि-

करमर्दैः कासमर्दैरविष्टकवरिष्टकैः। रुद्राक्षैर्द्राक्षसम्भूतैः सप्ताङ्कैःपुत्रजीवकैः २३ कङ्को
लैश्चलवङ्गैश्च त्वग्द्रुमैःपारिजातकैः। प्रतानैःपिप्पलीनाञ्च नागवल्यश्चभागशः २४
मरीचस्यतथागुल्मैर्नवमल्लिकयातथा। मृद्वीकामण्डपैर्मुख्यै रतिमुक्तकमण्डपैः २५ त्रपु
सैर्नर्तिकानाञ्च प्रतानैःसफलैःशुभैः। कूष्माण्डानांप्रतानैश्च अलावूनांतथाक्वचित् २६
चिर्भिटस्यप्रतानैश्च पटोलीकारवल्लिकैः। कर्कोटकीवितानैश्च वार्ताकैर्बृहतीफलैः २७
कण्टकैर्मूलकैर्मूल शाकैस्तुविविधैस्तथा। कह्लारैश्चविदार्या चरु रूटैःस्वादुकण्टकैः २८
सभण्डीरविदूसार राजजम्बुकबालुकैः। सुवर्चलाभिःसर्वाभिः सर्षपाभिस्तथैवच २९
काकोलीक्षीरकाकोलीच्छत्रयाचातिच्छत्रया। कासमर्दीसहासद्भिः शकन्दलसकाण्डकैः
३० तथाक्षीरकशाकेन कालशाकेनचाप्यथ। शिम्बिधान्यैस्तथाधान्यै सर्वैर्निरवशेषितः
३१ औषधीभिर्विचित्राभिर्दीप्यमानाभिरेवच। आयुष्याभिर्यशस्याभिर्बल्याभिश्चनरा
धिप! ३२ जरामृत्युभयघ्नीभिः क्षुद्भयघ्नीभिरेवच। सौभाग्यजननीभिश्च कृत्स्नाभि
श्चाप्यनेकशः ३३ तत्रवेणुलताभिश्च तथाकीचकबेणुभिः। काशैःशशाङ्ककाशैश्च शर
गुल्मैस्तथैवच ३४ कुशगुल्मैस्तथारम्यैर्गुल्मैश्चेक्षोमनोरमैः। कार्पासजातिवर्गेण दुर्ल
भेनशुभेनच ३५ तथाचकदलीखण्डैर्मनोहारिभिरुत्तमैः। तथामरकतप्रख्यैः प्रदेशैःशा
द्वलान्वितैः ३६ इरापुष्पसमायुक्तैः कुंकुमस्यचभागशः। तगरातिविषामांसी ग्रन्थिकैस्तु
सुरागदैः३७सुवर्णपुष्पैश्चतथाभूमिपुष्पैस्तथापरैः। जम्बीरकैर्भूस्तृणकैःसरसैःसशुकैस्त
था ३८ शृङ्गवेराजमोदाभिः कुवेरकप्रियालकैः। जलजैश्चतथावर्णैर्नानावर्णैःसुगन्धिभिः
३९उदयादित्यसङ्काशैः सूर्य्यचन्द्रनिभैस्तथा।तपनीयसवर्णैश्च अतसीपुष्पसन्निभैः ४०

ष्टक-रुद्राक्ष-सप्ताक-पुत्रजीवक २३ कंकोल-लौंग--भोजपत्र-पारिजातक-पीपलियोंकीबेल--नागरपान
की वेल-२४ मिरचोंका गुच्छा नवीन मल्लिका-सुन्दर दाखोंका मंडप-चेपेका मण्डप- २५ त्रपुस्-नर्ति
काओंकी फलोंसमेत बेल-कोंहलाओंकी बेल-घीयाओंकी बेल- २६ चिर्भिटोंकीबेल-परवल-करेलीबेल
ककोडाकी बेल-वार्त्ताक-कटेहली काफल २७ सिंघाड़ा-अनेक प्रकारके ज़मींकन्द-कमल विदारी--चरु-
रूठ-स्वादु-कंटक २८ भंडीर-विदूसार-राजजामन-नेत्रवाला-सुवर्चला-सिरसों-काकोली-क्षीर काको-
ली-छत्रा-अतिछत्रा-कास मर्दी शकंदल-कांडक-क्षीरशाक-कालशाक-शिंविधान्य-धान्य- ३०।३१ प्रका-
शमान अनेक प्रकारकी औषध—आयु बढ़ानेवाली—बल बढ़ानेवाली—यश बढ़ानेवाली जरा मरण
भयक्षुधा इनसबकी नाशकरनेवाली औषध और सौभाग्यकी उत्पन्न करनेवाली संपूर्ण औषध--
बांसों की वेल—छिद्रवाले वांस—चन्द्र मासाकाँक--शरों का बोझा ३३।३४ कुशाओं का झुण्ड—
सुन्दर ईखोंकाझुण्ड—दुर्लभ और शुभकपासकीजाति ३५ मनका हरनेवाला केलोंकासमूह—नीली
मणियोंकेसमान घासकी हरियाली ३६ इराकापुष्प- कुंकुमकाभाग—तगर—अतीस—जटामांसी—नेत्र-
वाला--सुरागद ३७ सुवर्णपुष्प—भूमिपुष्प—नींबू—तृणक ३८ अदरक-अजमोद-कुवेरक—चिरोंजी—
अनेकप्रकारके सुगन्धियुक्त कमल ३९ कोई कमल तो उदयहुए सूर्य्यकेसमान कोई सूर्य्य चन्द्रमा

शुकपत्रनिभैश्चान्यैः स्थलपत्रैश्चभागशः । पञ्चवर्णैःसमाकीर्णैर्बहुवर्णैस्तथैवच ४१
द्रष्टुर्दृष्ट्याहितमुदैः कुमुदैश्चन्द्रसन्निभैः । तथावह्निशिखाकारैर्गजवक्त्रोत्पलैःशुभैः ४२
नीलोत्पलैः सकर्पूरैर्गुञ्जातककसेरुकैः। शृङ्गाटकमृणालैश्च करटैराजतोत्पलैः ४३ जल
जैःस्थलजैर्मूलैः फलैःपुष्पैर्विशेषतः। विविधैश्चैवनीवारैर्मुनिभोज्यैर्नराधिप! ४४ नत
द्धान्यंनतच्छस्यं नतच्छाकंनततत्फलम्। नतन्मूलंनततत्कन्दं नतत्पुष्पंनराधिप! ४५
नागलोकोद्भवंदिव्यं नरलोकभवञ्चयत् । अनूपोत्थंवनोत्थञ्च तत्रयन्नास्तिपार्थिव ! ४६
सदापुष्पफलंसर्व मजर्यमृतुयोगतः। मद्रेश्वरःसददृशे तपसाह्यतियोगतः ४७ ददृशेच
तथातत्र नानारूपान्पतत्रिणः । मयूरांञ्छतपत्रांश्च कलविङ्कांश्चकोकिलान् ४८
तदाकादम्बकान्हंसान् कोयष्टीन्खञ्जरीटकान् । कुररान्कालकूटांश्च खट्वाङ्गान्लु
ब्धकांस्तथा ४९ गोक्ष्वेडकान्तथाकुम्भान् धार्तराष्ट्रान्शुकान्बकान् । धातुकांश्च
क्रवाकांश्चकटुकान् टिट्टिभान्भटान् ५० पुत्रप्रियान् लोहपृष्ठान् गोचर्मगिरिवर्त
कान् । पारावतांश्चकमलान् सारिकाजीवजीवकान् ५१ लाववर्तकवार्ताकान् रक्त
वर्त्मप्रभद्रकान् । ताम्रचूडान्स्वर्णचूडान् कुक्कुटान्काष्ठकुक्कुटान् ५२ कपिञ्जलान्
कलविङ्कान् तथाकुंकुमचूड़कान् । भृङ्गराजान्सीरपादान् भुलिङ्गान्डिण्डिमान्न
वान् ५३ मञ्जुलीतकदात्यूहान् भारद्वाजांस्तथाचषान् । एतांश्चान्यांश्चसुबहून्
पक्षिसङ्घान्मनोहरान् । श्वापदान्विविधाकारान् मृगांश्चैवमहामृगान् । व्याघ्रान्

दोनोंकेतुल्य–कोई सुवर्णकेतुल्य–कोई अतसीफूलके समान ४० कोई तोतेके पक्षकीसमान–कोई
स्थल पद्मपत्र पांचप्रकारके और प्रकारकेफूल ४१ देखनेवालेकी दृष्टिके हितकारी कमल–चन्द्रमा
के सदृश अग्नि शिखाकेतुल्य और हस्तीके मुखके समान कमल ४२ ऐसी २ वनौषधियों से भूषित
और नीलकमल–गुंजातक–कसेरू-शृंगाटक अर्थात् सिंघाड़ा–मृणाल–करट--इनसबसे भी शोभित
वह पर्व्वतथा ४३ हे राजन् जल और स्थलमें उत्पन्नहोनेवाले मूल फल पुष्प–और अनेकप्रकार के
मुनिभोज्य नीवार ४४ हे राजेन्द्र ऐसाकोई धान्य--शस्य--शाक--फल--मूल और कन्द न था जो उस
पर्व्वतपर न हो ४५ इनके सिवाय नागलोक–नरलोक–और अनूप–वन इनसबमें होनेवाले फल
मूल कन्दोंमें ऐसा कोई पदार्थ न था जो उस पर्व्वतपर न हो ४६ ऐसे पर्व्वतपर मद्रेश्वर पुरूरवा
अपने तपके योगसे सबकालोंमें उन वृक्षोंके फल पुष्पोंको देखताहुआ ४७ उसपर निवास करनेवाले
अनेकप्रकार के आगे लिखेहुए पक्षियोंको देखताभया--मयूर--शतपुत्र--चिड़ा--कोयल ४८ कादंवक--हंस--टटीहरी--खंजरीट--कुरर--कालकूट--खड्वाङ्ग--लुब्धक ४९ गोक्ष्वेडक--कुंभ--श्वेतहंस--
तोते--बगले -धातुक--चक्रवाक-- कटुक--टिट्टिभ--भट ५० पुत्रप्रिय-- लोहपृष्ठ--गोचर्म--गिरिवर्त्तक--
कबूतर--कमल--मैना--चकोर--लवा बतक--रक्तवर्त्म--प्रभद्रक-- मुरगा--स्वर्णचूड़--मुरग--खातीचिड़ा
५१।५२ कपोत-कलविंक--कुंकुमचूड़-भृङ्गराज--अर्थात् भौंरा-सीरपाद--भुलिंग--डिंडिम-नव ५३
मंजुली--दात्यूह--भारद्वाज और पपीहा--इनसबके सिवाय अन्यप्रकारके भी पक्षियों को वह राजा

केसरिणःसिंहान् द्वीपिनःशरभान्वृकान् ५५ ऋक्षांस्तरक्षूंश्चबहून् गोलांगूलान् सवानरान् । शशलोमान्सकादम्बान् मार्जारान्वायुवेगिनः ५६ तथामत्तांश्चमातङ्गान् महिषान्गवयान्वृषान् । चमरान्सृमरांश्चैव तथागौरखरानपि ५७ उरभ्रांश्च तथामेषान् सारङ्गानथकुंकुरान् । नीलांश्चैवमहानीलान् करालान्मृगमातृकान् ५८ सदंष्ट्रारामसरभान् कोञ्चाकारकशम्बरान् । करालान्कृतमालांश्च कालपुच्छांश्चतोरणान् ५९ दंष्ट्रान्खड्गान्वराहांश्च तुरङ्गान्खरगर्दभान् । एतानद्विष्टान्मद्रेशो विरुद्धांश्चपरस्परम् ६० अविरुद्धान्वनेदृष्ट्वा विस्मयंपरमंययौ । तच्चाश्रमपदंपुण्यं बभूवात्रेःपुरान्नृप!६१ तत्प्रसादात्प्रभायुक्तं स्थावरैर्जङ्गमैस्तथा । हिंसंतिहिनचान्योन्यं हिंसकास्तुपरस्परम् ६२ क्रव्यादाःप्राणिनस्तत्र सर्वेक्षीरफलाशनाः । निर्मितास्तत्रचात्यर्थमत्रिणासुमहात्मना ६३ शैलान्नितम्बदेशेषु न्यवसच्चस्वयंनृपः । पयःरक्षन्तितेदिव्यममृतस्वादुकण्टकम् ६४ क्वचिद्राजन्! महिष्यश्च क्वचिद्राजाश्चसर्वशः । शिलाःक्षीरेणसम्पूर्णादध्नाचान्यत्रवाबहिः ६५ सम्पश्यन्परमांप्रीतिमवापवसुधाधिपः । सरांसि तत्रदिव्यानि नद्यश्चविमलोदकाः ६६ प्रणालिकानिचोष्णानि शीतलानिचभागशः । कन्दराणिचशैलस्य सुसेव्यानिपदेपदे ६७ हिमपातोनतत्रास्ति समन्तात्पञ्चयोजनम् । उपत्यकासुशैलस्य शिखरस्यनविद्यते ६८ तत्रास्तिराजन्! शिखरं पर्वतेन्द्रस्यपाण्डुरम् । हिमपातङ्गग्यत्र कुर्वंतिसहिताःसदा ६९ तत्रास्तिचापरंशृङ्गं यत्रतोयघनाघनाः ।

देखताभया ५४ इनको देखकर आगे लिखेहुए इन पशुजीवोंको देखताभया--मृग--रोझ--बघेरा--सिंह--गेंडा--शरभ--भेड़िया ५५ रीछ--चीता--गोलांगूल--वानर--सूंसा--कदंब--वायुकेसे वेगवाले विलाव ५६ मदवाले हाथी महिष--रोझ--बैल--चमरीगौ--मृगभेद--गर्दभ ५७ उरभ्र--मेढ़ा--सारंग--कुत्ते--नील--महानील--कराल--मृगमातृक ५८ रामसरभ--कूज--सावर-कराल--कृतमाल-कालपुच्छ--तोरण ५९ दंष्ट्र--खङ्ग--सूकर--घोड़ा--गर्दभ--इनके सिवाय परस्पर शत्रु और परस्पर मित्रता करनेवाले जीवोंको देखताभया ६० यह राजा उन परस्पर मित्रता रखनेवालोंको देखकर बड़ेआश्चर्यको प्राप्तहुआ और हे राजा वहांही अत्रिऋषिका पूर्व आश्रमथा ६१।६२ उन ऋषि के प्रभाव और कृपासे सबहिंसक और अहिंसक स्थावर जंगमजीव परस्परमें हिंसानहीं करतेथे ६३ आशय यह है कि वहां अत्रिमहात्माकी कृपासे सब मांसभक्षी जीव दूध अथवा फलोंकाही भोजन करतेथे ६४ उस पर्व्वतीय देशमें आप राजा वासकरके महादिव्य और अकंटक राज्यका भोगकरताथा हेराजन् उस पर्व्वतमें कहीं पटरानी और कहीं राजा वसताभया वहांकी प्रत्येक शिला दूध दही से पूर्णथी ६५ राजा पुरूरवा ऐसे पर्व्वतको देखताहुआ परमप्रीतिको प्राप्तहोताभया वहांहीं दिव्य सरोवर और सुन्दर जलवाली नदियोंको भी देखताभया ६६ और शीतोष्ण जलबहनेवाले झिरने पर्व्वतकी गुफा यहभी क्षण२ में सेवनके योग्य समझेगये उस पर्व्वत के चारोंओर बीसकोस के बीचमें हिमनहीं पड़ताथा और पर्व्वत के शिखरकेपास पृथ्वी नहीं दीखतीथी क्योंकि उस पर्वतेन्द्र के शिखरपर मेघ

नित्यमेवाभिवर्षंति शिलाभिःशिखरंवरम् ७० तदाश्रमंमनोहारि यत्रकामधराधरा।
सुरमुख्योपयोगित्वात् शाखिनांसफलाःफलाः ७१ सदोपगीतभ्रमरं सुरस्त्रीसेवितंपरम्।
सर्वपापक्षयकरंशैलस्यैवप्रहारकम् ७२ वानरैःक्रीडमानैश्च देशाद्देशान्नराधिप!। हिम
पुञ्जाःकृतास्तत्र चन्द्रबिम्बसमप्रभाः ७३ तदाश्रमंसमन्ताच्च हिमसंरुद्धकन्दरैः। शैल
वाटैःपरिवृतमगम्यमनुजैःसदा ७४ पूर्वाराधितभावोऽसौ महाराजःपुरूरवाः। तदाश्रम
पदंप्राप्तो देवदेवप्रसादतः ७५ तदाश्रमंश्रमशमनंमनोहरं मनोहरैःकुसुमशतैरलंकृतम्।
कृतंस्वयंरुचिरमथात्रिणाशुभं शुभावहंहिददृशेसमद्रराट् ७६॥

इतिश्रीमत्स्यपुराणेसप्ताधिकशततमोऽध्यायः ११७॥

(सूत उवाच) तत्रयौतौमहाशृङ्गौ महावर्णौमहाहिमौ। तृतीयन्तुतयोर्मध्ये शृङ्गमत्यन्त
मुच्छ्रितम् १ नित्यातप्तशिलाजालं सदाभ्रपरिवर्जितम्। तस्याधस्ताद्वृक्षगणो दिशा
भागेचपश्चिमे २ जातीलतापरिक्षिप्तं बिवरंचारुदर्शनम्। दृष्ट्वैवकौतुकाविष्टस्तं विवेश
महीपतिः ३ तमसाचातिनिविडं नल्वमात्रंसुसङ्कटम्। नल्वमात्रमतिक्रम्य स्वप्रभाभर
णोज्ज्वलम् ४ तमुच्छ्रितमथात्यन्तं गम्भीरंपरिवर्तुलम्। नतत्रसूर्य्यस्तपति नविराज
तिचन्द्रमाः ५ तथापिदिवसाकारं प्रकाशंतदहर्निशम्। क्रोशाधिकपरीमाणं सरसाच
विराजितम् ६ समन्तात्सरसस्तस्य शैललग्नातुवेदिका। सौवर्णैराजतैर्वृक्षैर्विद्रुमैरुप

सदैव हिमकीही वर्षाकरतेथे ६७।६९ और उसके पासही दूसरे शिखरपर सघनमेघ नित्य वर्षाकिया
करतेहैं वह शिखर शिलाओं करके बडा श्रेष्ठ है वहांहीं मनका हरनेवाला अत्रिका आश्रमहै जहांकी
पृथ्वीकामनाकी देनेवालीहै और देवताओंके महाउपयोगी सुन्दर वृक्षोंकेफलहैं७०।७१ वह पर्व्वत
भ्रमरोंसे गायाहुआ देवांगणाओं से सेवित सम्पूर्ण पापोंका नाशकरने वालाहै ७२ वहांक्रीड़ा करते
हुयेजो देशदेशके वानरहैं उनके श्वेत पुंजोंसे वह चन्द्रमा केही समान कान्तिवालाहै ७३ वह अत्रि
ऋषिका आश्रमहिमसे रुकीहुई गुफाओंके कारण मनुष्यों को महाअगम्य है ७४ पूर्वकियाहै आराधनजिसने ऐसा वह पुरूरवा महाराज देवदेव भगवान्की कृपासे उसआश्रमको प्राप्तहोताभया ७५
खेदका हरनेवाला मनका हरनेवाला मनोहर पुष्पोंसे भूषित शुभदायक अत्रिजी का रचाहुआ वह
आश्रम यहमद्रदेशाधिपति देखताभया ७६॥

इतिश्रीमत्स्यपुराण भाषाटीकायां सप्तदशाऽधिक शततमोऽध्यायः ११७॥

सूतजी कहते हैं हे ऋषीश्वरो उस पर्व्वतमें अनेक वर्णके हिमसे ढकेहुये दोशृंगथे जिनके मध्य
में एकशृंग बहुत बड़ाथा १ और वहपर्व्वत तप्तशिलाओंके समूहसे व्याप्तहै--मेघों से वर्जित है और
पश्चिम भागमें उसके नीचे वृक्षोंके समूहोंसे अद्भुत शोभा होरहीथी २ इसीसे वह आश्रम जाती
लताओंसे युक्त और सुन्दर दर्शनवाला है ऐसे आनन्दकारी आश्रम में राजा प्रवेश करता भया ३
उस आश्रमका पूर्व भाग अन्धकार से युक्त और उसको उल्लंघन करके कान्ति से युक्तथा ४ जोकि
वहां सूर्य्य नहीं तपता इसीसे वह अत्यन्त गंभीर गोलाकार है और चन्द्रमाकी किरणोंसे शीतलता

शोभितम् ७ नानामाणिक्यकुसुमैः सुप्रभाभरणोज्ज्वलैः । तस्मिन्सरसिपद्मानि पद्म
रागच्छदानितु ८ वज्रकेसरजालानि सुगन्धीनितथायुतम् । पत्रैर्मरकतैर्नीलैर्वैदूर्य्यस्य
महीपते ! ९ कर्णिकाश्चतथातेषां जातरूपस्यपार्थिव ! । तस्मिन्सरसियाभूमिर्नसाव
ज्रसमाकुला १० नानारत्नैरुपाचिता जलजानांसमाश्रया । कपर्दिकानांशुक्तीनां शङ्खा
नाञ्चमहीपते ! ११ मकराणाञ्चमत्स्यानां चण्डानांकच्छपैःसह । तत्रमरकतखण्डानि
वज्राणाञ्चसहस्रशः १२ पद्मरागेन्द्रनीलानि महानीलानिपार्थिव !। पुष्परागाणिसर्वाणि
तथाकर्कोटकानिच १३ तुत्थकस्यतुखण्डानि तथाशेषस्यभागशः । राजावर्तस्यमुख्यस्य
रुचिराक्षस्यचाप्यथ १४ सूर्य्येन्दुकान्तयश्चैव नीलोवर्णान्तिमश्चयः । ज्योतीरसस्य
रम्यस्य स्यमन्तस्यचभागशः १५ सुरोरगवलक्षाणां स्फटिकस्यतथैवच । गोमेद
पित्तकानाञ्च धूलीमरकतस्यच १६ वैदूर्यसौगन्धिकयोस्तथाराजमणेर्नृप ! १७ वज्रस्यै
वचमुख्यस्य तथाब्रह्ममणेरपि । मुक्ताफलानिमुक्तानान्ताराविग्रहधारिणाम् १८ सु
खोष्णञ्चैवतत्तोयं स्नानाच्छीतविनाशनम् । वैदूर्यस्यशिलामध्ये सरसस्तस्यशोभना १९
प्रमाणेनतथासाच द्वेचराजन् ! धनुःशते । चतुरस्रातथारम्या तपसानिर्मितात्रिणा २०
विलद्वारसमोदेशो यत्रतत्राहिरण्मयः । प्रदेशःसतुराजेन्द्र ! द्वीपेतस्मिन्मनोहरे २१
तथापुष्करणीरम्या तस्मिन्राजन् ! शिलातले । सुशीतामलपानीया जलजैश्चविराजि
ता २२ आकाशप्रतिमाराजन् ! चतुरस्रामनोहरा । तस्यास्तदुदकंस्वादु लघुशीतंसुग

युक्त विराजमान था यह आश्रम सूर्य्यके आकारके समान अहर्निश प्रकाशकरता था और एक कोससे
अधिक विस्तृत और रसों करके सहित एकसरोवर था ६ उस सरोवर के चारोंओर पर्व्वतके समीप
सुन्दर वेदियोंसे शोभित यह पर्व्वत सुवर्णचांदी मूंगे और उत्तम वृक्षों से भूषितथा ७ उस सरोवर में
माणिक्यके पुष्प श्रेष्ठकान्ति वाले पत्ते और नानावर्ण के कमल शोभायमान थे ८ हे राजन् वह
सरोवर वैदूर्य्य मणि नीलमणि और हीरोंसे देदीप्यमानहोकर कमलोंकी सुगन्धियोंसे सुगन्धितथा ९
उस सरोवरके कमल सुवर्णकी पंखड़ियों से युक्त और हीरेमणियों से प्रकाशमान थे और उसकी
भूमिभी हीरोंसे जटित १० कौड़ी शंख--कमल--और रत्नोंसेशोभितथी ११ इनकेसिवाय मकरमत्स्य
कच्छपमणि और हीरेआदिसे व्याप्त १२ पद्मराग-इन्द्रमणि नीलमणि पुषराज-कर्कोटक-१३ तुत्थक
राजावर्त्त-मुख्य--रुचिराक्ष १४ सूर्य्यचन्द्रकी कांतिवालीमणि नीलमणि ज्योतरिस-स्यमन्तक १५ सु-
रोरगवलक्ष--स्फटिक--गोमेद--पित्तक--धूलीमरकत--१६ वैदूर्य्य--सौगन्धिक--राजमणि--वज्रमणि--मु-
ख्यमणि ब्रह्ममणि--मोती--और तारोंके समान मोती--ऐसे रत्नोंसे वह सरोवरव्याप्तहै १७। १८ उस
का जलभी मन्दोष्ण शीतका दूर करनेवाला है उस सरोवरमें वैदूर्य्य मणिकी सुन्दर शिलाहै १९
वह आठसौ हाथकी चौखूंटीहै और अत्रि ऋषिने अपने तपोबलसे रचीहै २० हे राजेन्द्र उसमनो-
हरद्वीपमें जहां तहां सुवर्णके बिलहैं वह देशके द्वारोंके समान विदित होतेहैं और उस शिलाकेनीचे
रमणीक नदीहै वह नदी सुन्दर शीतल स्वच्छ जलवाली और कमलोंसे शोभितहै २१। २२ इसके

न्धिकम् २३ नक्षिणोतियथाकण्ठं कुक्षिन्नापूरयत्यपि । तृप्तिंविधत्तेपरमां शरीरेचमहत्
सुखम् २४ मध्येतुतस्याःप्रासादं निर्मितंतपसात्रिणा । रुक्मसेतुप्रवेशान्तं सर्वरत्नमयं
शुभम् २५ शशाङ्करश्मेःसङ्काशं प्रासादंराजितंहितम् । रम्यवैदूर्यसोपानं विद्रुमामल
सारकम् २६ इन्द्रनीलमहास्तम्भं मरकतासक्तवेदिकम् । वज्रांशुजालैःस्फुरितं रम्यंदृष्टि
मनोरमम् २७ प्रासादेतत्रभगवान् देवदेवोजनार्दनः । भोगिभोगावलीसुप्तः सर्वालङ्कार
भूषितः २८ जान्वाचकुञ्चितस्त्वेको देवदेवस्यचक्रिणः । फणीन्द्रसन्निविष्टोऽङ्घ्रिर्द्वितीयश्चतथानघ!२९ लक्ष्म्युत्सङ्गगतोङ्घ्रिस्तु शेषभोगप्रशायिनः । फणीन्द्रभोगसन्यस्त
बाहुःकेयूरभूषणः ३० अंगुलीपृष्ठविन्यस्त देवशीर्षधरम्भुजम् । एकंवैदेवदेवस्य द्विती
यन्तुप्रसारितम् ३१ समाकुञ्चितजानुस्थमणिबन्धेनशोभितम् । किञ्चिदाकुञ्चितंचैव ना
भिदेशकरस्थितम् ३२ तृतीयन्तुभुजंतस्य चतुर्थन्तुतथाशृणु । आत्तसन्तानकुसुमंघ्राण
देशानुसर्पिणम् ३३ लक्ष्म्यासंवाह्यमानांघ्रिः पद्मपत्रानिभैःकरैः । सन्तानमालामुकुटं हार
केयूरभूषितम् ३४ भूषितञ्चतथादेवमङ्गदैरंगुलीयकैः । फणीन्द्रफणविन्यस्त चारुरत्न
शिरोज्ज्वलम् ३५ अज्ञातवस्तुचरितं प्रतिष्ठितमथात्रिणा । सिद्धानुपूज्यंसततं सन्तान
कुसुमार्चितम् ३६ दिव्यगन्धानुलिप्ताङ्गं दिव्यधूपेनधूपितम् । सुरसैःसुफलैर्हृद्यैः सिद्धै
रुपहृतैःसदा ३७ शोभितोत्तमपार्श्वन्तं देवमुत्पलशीर्षकम् । ततःसन्मुखमुद्वीक्ष्य ववन्दे

सिवाय वहां बहुत मनोहर चौखूंटी आकाशके समान स्वच्छ प्रतिमावाली नदी है जिसकाकि जल
अति सुस्वादु शीतल और सुगन्धिवाला है २३ कंठको शीतल उदर में नहीं लगनेवाला अत्यन्त
तृप्तिका करनेवाला और शरीरमें सुखका करनेवालाहै २४ उसके मध्यमें अत्रि मुनिने अपने तपसे
एक मन्दिर रचाहै वह मंदिर सुवर्णके पुलसे युक्त सम्पूर्ण रत्नोंसे संयुक्त है २५ उस चन्द्रमाकीसी
किरणोंवाले मंदिरमें वैदूर्य्यमणिकी सीढ़ीमूंगे और इन्द्रनीलमणि के महास्तंभ मरकत मणिकेदासे
हीरेकी जाली और झरोखेहैं ऐसे रमणीक मन्दिरमें २६। २७ जनार्द्दन भगवान् सम्पूर्ण अलंकारोंसे
युक्त शेषशय्या पर शयन करते हैं २८ वहांही विष्णु भगवान् एकपैरके घोंटूको खड़ाकियेहुए पैरको
शेषशय्या पर सीधापसारेहुए सोवते हैं २९ लक्ष्मीजिकी गोदीमें पैरधरेहुए शेषशय्यापर शयनकरते
हुए बाजूबन्द आदि भूषणोंसे भूषित दीर्घभुजा वालेहैं ३० विष्णु भगवान्ने अपनी एकभुजा तो
अंगुलीके स्थानसे अपनीग्रीवापर लगारक्खीहै और दूसरीभुजा पसाररक्खीहै ३१ वहपसारीहुई भुजा
खड़ेकियेहुए घोंटूपर पहुंचेके स्थानसे टिकीहुई शोभित होरहीहै तीसरी भुजा कुछ छोटीहोकर नाभि
की जगह टिकरहीहै और चौथी भुजामें कल्पवृक्षका पुष्पलियेहुए सूंघरहे हैं ३२ । ३३ और लक्ष्मी
जी अपने कमलके समान हाथोंसे चरणोंको दाबरहीहैं और कल्पवृक्षके पुष्पोंकी माला पहरे मुकुट
और नूपुर पर्य्यन्त सुन्दरहार इनसबसे महासुन्दर ३४ बाजूबंद अंगूठी आदिसे शोभित शेषनागके
फणके ऊपर सुन्दररत्नोंसे अलंकृत प्रकाशमान अपने शिरको स्थापित कररहेहैं ३५ अज्ञात वस्तुओं
के आचरण करनेवाले अत्रिऋषिसे प्रतिष्ठित कियेहुए सिद्धोंसे पूजेहुए सदैव कल्पवृक्षों के पुष्पोंसे

सनराधिपः ३८ जानुभ्यांशिरसाचैव गत्वाभूमिंयथाविधि । नाम्नांसहस्रेणतदातुष्टावम
धुसूदनम् ३९ प्रदक्षिणमथोचक्रे सतूत्थायपुनःपुनः । रम्यमायतनंदृष्ट्वा तत्रोवासाश्रमे
पुनः ४० जलाद्बहिर्गुहांकाञ्चित् आश्रित्यसुमनोहराम् । तपश्चकारतत्रैव पूजयन्मधु
सूदनम् ४१ नानाविधैस्तथापुष्पैः फलमूलैःसगोरसैः । नित्यंत्रिषवणस्नायी वह्निपूजाप
रायणः ४२ देववापीजलैःकुर्वन् सततंप्राणधारणम् । सर्वाहारपरित्यागं कृत्वातुमनुजे
श्वरः ४३ अनास्तृतगुहाशायी कालंनयतिपार्थिवः । त्यक्ताहारक्रियश्चैव केवलंतोयतो
नृपः । नतस्यग्लानिमायाति शरीरञ्चतदद्भुतम् ४४ एवंसराजातपसिप्रसक्तः संपूज
यन्देववरंसदैव । तत्राश्रमेकालमुवासकञ्चित् स्वर्गोपमेदुःखमविन्दमानः ४५ ॥

इतिश्रीमत्स्यपुराणेऽष्टादशाधिकशततमोऽध्यायः ११८ ॥

(सूत उवाच) सत्वाश्रमपदेरम्ये त्यक्ताहारपरिच्छदः । क्रीड़ाविहारंगन्धर्वैः पश्यत्यप्स
रसांसह १ कृत्वापुष्पोच्चयंभूरि ग्रथयित्वातथास्रजः । अग्रंनिवेद्यदेवाय गन्धर्वेभ्यस्तदा
ददौ २ पुष्पोच्चयप्रसक्तानां क्रीड़न्तीनांयथासुखम् । चेष्टानानाविधाकाराः पश्यन्नपिन
पश्यति ३ काचित्पुष्पोच्चयेसक्ता लताजालेनवेष्टिता । सखीजनेनसन्त्यक्ता कान्तेनाभि
समुज्झिता ४ काचित्कमलगन्धाभा निश्वासपवनाहृतैः । मधुपैराकुलमुखी कान्तेनप

पूजेहुए दिव्यगन्धसे लिप्तांग उत्तम धूपसेधूपित सदैव सिद्धोंसे रमणीक रसीले फलोंसे आच्छादित
उत्तम करवट लिये कमलके पुष्पोंका तकिया लगाये ऐसे प्रकारसे महा शोभित उनविष्णु भगवान्
के सन्मुख होकर वहराजा उनको प्रणाम करताभया ३६ । ३८ और यथार्थविधिसे नम्रतापूर्व्वक
समीप जाकर सहस्रनाम स्तोत्रसे विष्णुको प्रसन्नकर ३९ वारंवार परिक्रमा करताहुआ उसी रम-
णीक आश्रम में वास करताभया और जलसे बाहर निकसकर उस महामनोहर सुन्दर गुफा को
देखता भया और वहांही विष्णु भगवान्का पूजन करता तपस्या करने लगा ४० । ४१ अर्थात् प्रति-
दिन दोनोंबार स्नानकर अनेक प्रकारके फलपुष्प गन्ध कन्द मूल और गोरस इन सबसे अग्नि की
पूजामें तत्पर होकर नदियोंके जलसे प्राणोंका पोषण करता हुआ वह राजा सब आहारोंको क्रमसे
त्याग देताभया ४२ । ४३ विना बिछोने गुफामें शयनकरके भोजनादि क्रियाको त्याग केवल जल
पानही करने लगा ४४ उस समय राजाके शरिर में किसी प्रकारका कोई खेद न हुआ किन्तु अद्भुत
शरीर से तपमें लगारहा और विष्णु भगवान् को पूजता हुआ स्वर्गके समान उस आश्रममें किसी
प्रकार का खेद न मानताभया कुछ काल पर्य्यन्त उसी आश्रम में वास करताभया ४५ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायामष्टादशोत्तरशततमोऽध्यायः ११८ ॥

सूतजी कहतेहैं कि फिर वह राजा उसरमणीक आश्रम में भोजन वस्त्रादि को त्याग गन्धर्व और
अप्सराओं की क्रीड़ा व्यवहार को देखताभया १ और अनेक प्रकारके पुष्पोंकी सुगन्धित मालाओंको
बना विष्णु के अर्थ निवेदनकर गन्धर्वोंको देताभया २ और उन पुष्पोंके समूहोंमें प्रसक्त होकर अ-
प्सराओंकी क्रीड़ाको देखता हुआभी न देखता भया ३ कुछेक अप्सरा लताजाल से वेष्टित होके

रिमोचिता ५ मकरन्दसमाक्रान्तनयनाकाचिदङ्गना । कान्तनिश्वासवातेन नीरजस्क
कृतेक्षणा ६ काचिदुच्चीयपुष्पाणि ददौकान्तस्यभामिनी। कान्तसंग्रथितैःपुष्पै रराजकृत
शेखरा ७ उच्चीयस्वयमुद्ग्रथ्य कान्तेनकृतशेखरा । कृतकृत्यामिवात्मानं मेनेमन्मथवर्द्धि
नी ८ अस्त्यस्मिनाहनेकुञ्जे विशिष्टकुसुमालता। काचिदेवंरहोनीता रमणेनरिरंसुना ९
कान्तसन्नामितलता कुसुमानिविचिन्वती। सर्वाभ्यःकाचिदात्मानं मेनेसर्वगुणाधिकम् १०
काश्चित्पश्यन्तिभूपालं नलिनीषुपृथक्पृथक् । क्रीडमानास्तुगन्धर्वै रममाणामनोर
माः ११ काचिदाताडयत्कान्तमुदकेनशुचिस्मिता । ताड्यमानाथकान्तेन प्रीतिंकाचि
दुपाययौ १२ कान्तञ्चताडयामास जातखेदावराङ्गना । अदृश्यतवरारोहा श्वासनृत्यत्
पयोधरा १३ कान्ताम्बुताडनोत्घृष्टकेशपाशनिबन्धना। केशाकुलमुखीभाति मधुपैरिव
पद्मिनी १४ स्वचक्षुःसदृशैःपुष्पैः सञ्छन्नेनलिनीवने । छन्नाकाचिच्चिरात्प्राप्ता कान्तेना
न्विष्ययत्नतः १५ स्नाताशीतापदेशेन काचित्प्राहाङ्गनाभृशम् । रमणालिङ्गनंचक्रे म
नोऽभिलषिताञ्चिरम् १६ जलार्द्रवसनंसूक्ष्ममंगलीनंशुचिस्मिता । धारयन्तीजनंचक्रे
काचित्तत्रसमन्मथम् १७ कण्ठमाल्यगुणैःकाचित् कान्तेनाकृष्यताम्भसि। त्रुट्यत्स्र

पुष्पोंके समूह में आसक्त हुईं सखियों के त्यागने से भर्त्ताओंसेभी त्याग करादीगईं ४ कोई अप्सरा
कमलों के पुष्पोंकी सुगन्धि के समान मुखवाली वायुसे भ्रमतेहुए भौंरोंसे व्याकुलमुख होकर पतियोंसे त्यागी हुईं कोई पुष्पोंके रससे भीजेहुए नेत्रोंवाली पतिके श्वास की वायुसे रज रहित खुले
नेत्रोंसे महाशोभित हुईं ५। ६ कोई कोई पुष्पोंको इकट्ठा करके अपने भर्त्ताओं को देतीभईं कोई
भर्त्तासे गुथेहुए पुष्पोंसे शोभित चोटीसे प्रकाशमान होती भईं ७ कोई आपही पुष्पों को गूंथ अपने
भर्त्ताके समीप जाके उसीसे शिरपर गुंथवाती भईं कोई अप्सरा कामदेवकी बढ़ाने वाली वायु से
अपनी आत्मा को कृतकृत्य मानती भईं ८ किसी अप्सरा को भर्त्ताने इंगितकरके और यहकहकर कि
इस कुंजमें बहुत सुन्दर पुष्पवाली बेलि हैं रमण करने की इच्छा से एकान्त में बुला लिया ९
किसी स्त्रीने अपने भर्त्ता करके नवाई हुई बेलसे पुष्पों को तोड़कर अपनी सखियों को बांटा
कोई अपने आत्मा को अधिक गुणवाला और कृतकृत्यमानती भई १० कोई कमलिनियोंमें पृथक्
पृथक् गन्धर्वों के संग क्रीड़ा करती भईं फिर उन सुन्दर अप्सराओं ने इसराजा को भी देखा ११ कोई सुन्दर हास्यवाली अप्सरा जल करके अपने पतिको क्रीड़ा में पीड़ितकरती हुई फिर
पतिसे ताड़ितहुई परम प्रीतिको प्राप्तहोतीभई १२ फिर खेदको प्राप्तहुई वरांगना अपने श्वास से
कुचाओंको हिलातीभई १३ कोईपतिसे तोड़ेहुए कमलके पुष्पोंसे शिथिल केशोंवाली होकर बालों
से व्याकुल मुखवाली ऐसी शोभितहुई जैसीकि कमलिनी शोभित होती है १४ कोईअप्सरा अपने
नेत्रोंके समान पुष्पोंसे आच्छादितहुए कमलोंके वनमें विस्मरण होकर बड़े यत्नसे पतिको ढूंढ़ती
हुई इधर उधर घूमतीथी १५कोई स्नानकरके जाड़ेके मिससे पतिकेसंग मनोवाञ्छित रमणके समान
बहुत कालतक आलिंगन करतीभयी १६ कोई महासुन्दरहास्यवाली अप्सरा बड़े महीन गीलेवस्त्रों

ग्दामपतितं रमणंप्राहसच्चिरम् १८ काचिद्भग्नासखीदत्त जानुदेशेनखक्षता । संभ्रान्ता कान्तशरणं मग्नाकाचिद्गताचिरम् १९ काचित्पृष्ठकृतादित्या केशनिस्तोयकारिणी । शिलातलगताभर्त्रा दृष्टाकामार्तचक्षुषा २० कृत्तमाल्यंविलुलितं संक्रान्तकुचकुंकुमम् । रतिक्रीडितकान्तेव रराजतत्सरोदकम् २१ सुस्नातदेवगन्धर्व देवरामागणेनच । पूज्यमानञ्चददृशे देवदेवंजनार्दनम् २२ क्वचिच्चददृशेराजा लतागृहगताःस्त्रियः । मडयन्तीः स्वगात्राणि कान्तसंन्यस्तमानसाः २३ काचिदादर्शनकरा व्यग्रादूतीमुखोद्गतम् । शृण्वन्तीकान्तवचनम् अधिकातुतथाबभौ २४ काचित्सत्वरितादूत्या भूषणानांविपर्ययम् । कुर्वाणानैवबुबुधे मन्मथाविष्टचेतना २५ वायुनुन्नातिसुरभिकुसुमोतकरमण्डिते । काञ्चित्पिवन्तींददृशे मैरेयंनीलशाद्वले २६ पाययामासरमणं स्वयंकाचिद्वराङ्गना । काचित्पीवरारोहा कान्तपाणिसमर्पितम् २७ काचित्स्वनेत्रचपलनीलोत्पलयुतम्पयः । पीत्वापप्रच्छतरणं क्वगतौतौममोत्पलौ २८ त्वयैवपीतौतौनूनमित्युक्तारमणेनसा । तथाविदित्वामुग्धत्वाद्बभूवव्रीडिताभृशम् २९ काचित्कान्तार्पितंसुभ्रूः कान्तपीतावशेषितम् । सविशेषरसंपानं पपौमन्मथवर्धनम् ३० अपानगोष्ठीषुतथा तासांसनरपुङ्ग

कोपहनकर पुरुषों को कामातुर करतीभयी १७ किसी अप्सराके कंठकी मालाको उसका पति जलसे खींचताहुआ मालाके सूत्रके टूटनेसे गिरपड़ा और वहहंसतीभयी १८कोई अप्सरा गिरीहुई सखी के गोड़ेपर बैठीहुई नखक्षतहोनेसे अपनेभर्त्ताकी शरणमें बहुतकालतक होतीभयी १९ कोई सूर्य्यको पीठ पीछेकरके अपनेबालोंको सुखातीभई उससमय शिलातलपर खड़ीहुई उसको देखकर उसका भर्त्ता कामार्त्त नेत्रोंसे उसको आह्वानकरताभया २० उसकाल पुष्पोंकी मालाओं से आच्छादित कुचाओं की केशरसेयुक्त उससरोवरकाजल ऐसाशोभितहुआ जैसे कि रतिकेसमयमें स्त्रीकीशोभाहोरही हो २१ सुन्दरप्रकारसे स्नानकियेहुए देवता गन्धर्व और देवताओंकीस्त्री इनसबसे पूजितहुए विष्णु भगवान्को वह देखताभया २२ और कहींवहराजा बेलों के घरमें प्राप्तहुई स्त्रियोंकोभी देखताभया कहीं अपने पतिमें मनलगायेहुये शरीरको भूषितकरतीहुई स्त्रियों को देखताभया २३ कोई हाथमें सीसालेकर मुखदेखतीहुई व्यग्रहोकर सखी के मुखसे कहेहुए पतिकेवचनको सुनकर अधिक शोभा को प्राप्तहोतीभयी २४ कोईदूती के कहनेसे शीघ्रताकरतीहुई आभूषणोंकोविपरीत धारण करती कामदेवसे युक्तहुए चित्तसे कुछनहीं जानती थी २५ कहीं बायुसे कंपतेहुए सुगन्धिवाले पुष्पों से मंडित नीलीघासपर खड़ीहुई मदिरापीतीहुई अप्सराको देखताभया २६ कोई अंगनाअपनेपतिको अपने हाथसे पिलातीहुई और अपने पतिके हाथसे मदिराको पीतीहुई २७ कोईअपने नेत्ररूप चपल नीलकमलोंको दूधमें देखकर और उसदूधकोपीके पतिसे पूछतीभई कि मेरे दोकमलकेपुष्पकहांगये २८ तब उसकेपतिनेकहा कि वेतोनिश्चय तैंने आपहीपीलिये फिर भोलेपनसे उसीप्रकार जानकर अत्यन्त लज्जित होतीभई २९ कोई सुन्दर भृकुटियों वाली अप्सरा पतिके पियेहुए अधिक रसकेसमान कामदेवके बढ़ानेवाले दूधको पीतीभयी ३० इसके सिवाय वह राजा उन अप्सराओं के कटाक्षकी गोष्ठीके

वः। शुश्रावविविधङ्गीतं तन्त्रीस्वरविमिश्रितम् ३१ प्रदोषसमयेताश्च देवदेवंजनार्दनम्। राजन्! सदोपनृत्यन्ति नानावाद्यपुरःसराः ३२ याममात्रेगतेरात्रौ विनिर्गत्यगुहामुखात्। आवसन्संयुताःकान्तैः परर्धिरचिताड्गुहाम् ३३ नानागन्धान्वितलतां नानागन्धसुगन्धिनीम्। नानाविचित्रशयनां कुसुमोत्करमण्डिताम् ३४ एवमप्सरसांपश्यन् क्रीडितानिसपर्वते। तपस्तेपेमहाराजन्! केशवार्पितमानसः ३५ तमूचुर्नृपतिङ्गत्वा गन्धर्वाप्सरसाङ्गणाः। राजन्! स्वर्गोपमन्देशमिमं प्राप्तोऽस्यरिन्दम! ३६ वयंहितेप्रदास्यामो मनसःकांक्षितान्वरान्। तानादायगृहङ्गच्छ तिष्ठहयदिवापुनः ३७ (राजोवाच) अमोघदर्शनाःसर्वे भवन्तस्त्वमितौजसः। वरंवितरताद्यैव प्रसादंमधुसूदनात् ३८ एवमस्त्वित्यथोक्तस्तैः सतुराजापुरूरवाः। तत्रोवाससुखीमासं पूजयानोजनार्दनम् ३९ प्रियएवसदैवासीद्गन्धर्वाप्सरसांनृपः। तुतोषसजनोराज्ञस्तस्यालौल्येनकर्म्मणा ४० मासस्यमध्येसनृपःप्रविष्टस्तदाश्रमंरत्नसहस्रचित्रम्। तोयाशनस्तत्रउवासमासं यावत्सितान्तोनृप! फाल्गुनस्य ४१ फाल्गुनामलपक्षान्ते राजास्वप्नेपुरूरवाः। तस्यैवदेवदेवस्य श्रुतवान्गदितंशुभम् ४२ रात्र्यामस्यांव्यतीतायामत्रिणात्वंसमेष्यसि। तेनराजन्! समागम्य कृतकृत्योभविष्यसि ४३ स्वप्नमेवंसराजर्षिर्दृष्ट्वादेवेन्द्रविक्रमः। प्रत्यूषकालेविधिवत् स्नातःसप्रयतेन्द्रियः ४४ कृतकृत्योयथाकामं पूजयित्वाजनार्दनम्।

समयमें बीनकेस्वरसे विभूषित अनेक प्रकारके गीतोंको सुनताभया ३१ हेराजन् प्रदोष समयमें वह अप्सरा देवदेव विष्णुभगवान्के आगेबाजेबजाकर नृत्यकरतीहैं ३२ एकप्रहररात्रि व्यतीतहोजानेपर उस गुफाके मुखसे बाहर निकसकर महाउत्तम गोलाकार रचीहुई गुफाओंमें अपने २ पतियोंकेसाथरमण करतीहुई ३३ अनेकप्रकारकी सुगंधिवाली लताओंपर अनेकप्रकारकेपुष्पोंसेआच्छादितहुई शय्याओंपरशयनकरती भयीं ३४ इसप्रकारकी अप्सराओंकी क्रीडाकोवह राजा देखताहुआविष्णुमें तदाकारचित्तकरके तपकरताभया ३५ तब गन्धर्वोंसमेत अप्सराओं के गण उसराजाके समीप जाके बोले कि हेराजन् तुमस्वर्गके समान इस देशमें प्राप्तहुयेहो ३६ सो हमतुमको तुम्हारे मनोवांछित वरोंको देंगे उन वरोंको ग्रहणकरके चाहे अपने घरकोजाना अथवा यहाँही ठहरना ३७ राजा बोला-आप सबलोग अमोघ दर्शन और अतुल पराक्रमवाले हो सो अभी विष्णु भगवान्की प्रसन्नतासे मुझे वर प्राप्तकराओ ३८ तब वह सब तथास्तु कहकर चलेगये और वह राजा पुरूरवा उसीस्थानपर सुखपूर्वक एकमहीने तक निवास करताभया ३९ और गन्धर्वोंसमेत अप्सराओं को सदैव प्रियहोताभया फिर उस राजाके चंचलकर्मसे विष्णु भगवान् प्रसन्नहोतेभये ४० एकमहीने के पीछे वह राजा रत्नोंसे विचित्र एक रमणीक आश्रममें प्रवेशकरताभया वहाँ फाल्गुन महीनेके शुक्कपक्षके अन्ततक जलहीमें बासकरताभया ४१ फाल्गुनके व्यतीत होजानेपर वह राजा पुरूरवा स्वप्नमें विष्णुके कहेहुए इस वचनको सुनताभया ४२ कि रात्रिव्यतीत होजानेपर तुम अत्रिमुनिके साथ मुझको प्राप्तहोगे तभी तुम कृतकृत्य होजाओगे ४३ इस प्रकारके स्वप्नको देखकर वह राजा प्रातःकालही उठ जितेन्द्री हो

ददर्शात्रिमुनिंराजा प्रत्यक्षंतपसांनिधिम् ४५ स्वप्नन्तुदेवदेवस्य न्यवेदयतधार्मिकः । ततःशुश्राववचनं देवतानांसमीरितम् ४६ एवमेतन्महीपाल ! नात्रकार्य्याविचारणा । एवंप्रसादंसंप्राप्य देवदेवाज्जनार्दनात् ४७ कृतदेवार्चनोराजा तथाहुतहुताशनः । सर्वान्कामानवाप्तोऽसौ वरदानेनकेशवात् ४८ ॥

इति श्रीमत्स्यपुराणे एकोनविंशतिशततमोऽध्यायः ११९ ॥

(सूत उवाच) तस्याश्रमस्योत्तरतस्त्रिपुरारि निषेवितः । नानारत्नमयैःशृङ्गैः कल्पद्रुमसमन्वितैः १ मध्येहिमवतःपृष्ठे कैलासोनामपर्वतः । तस्मिन्निवसतिश्रीमान् कुवेरःसहगुह्यकैः २ अप्सरोऽनुगतोराजा मोदतेह्यलकाधिपः । कैलासपादसम्भूतं रम्यंशीतजलंशुभम् ३ मन्दारपुष्परजसा पूरितंदेवसन्निभम् । तस्मात्प्रवहतेदिव्या नदीमन्दाकिनीशुभा ४ दिव्यञ्चनन्दनंतत्र तस्यास्तीरेमहद्वनम् । प्रागुत्तरेणकैलासाद्दिव्यंसौगन्धिकंगिरिम् ५ सर्वधातुमयंदिव्यं सुवेलंपर्वतंप्रति । चन्द्रप्रभोनामगिरिः सशुभ्रोरत्नसन्निभः ६ तत्समीपेसरोदिव्यमच्छोदंनामविश्रुतम् । तस्मात्प्रभवतेदिव्या नदीह्यच्छोदिकाशुभा ७ तस्यास्तीरेवनंदिव्यं महच्चैत्ररथंशुभम् । तस्मिन्गिरौनिवसति मणिभद्रःसहानुगः ८ यक्षसेनापतिःक्रूरो गुह्यकैःपरिवारितः । पुण्यामन्दाकिनीनाम नदीह्यच्छोदिकाशुभा ९ महीमण्डलमध्येतु प्रविष्टेतुमहोदधिम् । कैलासदक्षिणेप्राच्यां शिवं

विधिपूर्वक स्नानकरताभया ४४ और कृतकृत्यहोकर बड़ी विधिसे भगवान्को पूजताहीथा कि उन महातपोनिधि अत्रिमुनिके प्रत्यक्ष दर्शन करताभया ४५ फिर जनार्दन भगवान्के स्वप्नको अत्रिमुनिसे निवेदनकरताभया इसके अनन्तर देवताओं के कहेहुए इसवचनको सुनताभया ४६ कि हेमहाराज ऐसाही है इसमें सन्देहनहीं है इस प्रकारसे विष्णु भगवान्से वरको प्राप्तहोकर पूजन हवनकर विष्णुके दियेहुए वरदानसे वह राजा सब कामनाओं को प्राप्तहोगया ४७।४८ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांएकोनविंशत्यधिकशततमोऽध्यायः ११९ ॥

सूतजी बोलेकि उस आश्रमसे उत्तरकी ओर शिवजी करके सेवित अनेक प्रकारके रत्नोंसे जटित शिखरोंसे संयुक्त कल्पवृक्षोंसे व्याप्त हिमवान् पर्वतके पृष्ठ भागके मध्यमें कैलास नाम पर्वतहै वहाँ श्रीमान् कुबेरजी अपने गुह्यकों समेत बासकरते हैं १।२ वह अलकापुरीके राजा कुबेर अप्सराओं के संग आनन्द करतेहैं उस कैलासमें रमणीक शीतल जलसे सिंचेहुए मंदारवृक्षके पुष्पोंकी रजसे पूरित देवताओंके समान कान्तिवाला शिखर है उसके तटपर दिव्य मंदाकिनीनदी बहती है उसीकेऊपर बड़ा दिव्य और बहुतबड़ा नन्दनबनहै और उसीके पूर्वोत्तर दिशामें संपूर्ण धातुमय सुगन्धिवाला सुन्दर वेलासे युक्त चन्द्रप्रभनाम श्वेत पर्वतहै वहरत्नके समान कान्तिवाला है ३।६ उसके समीप अच्छोदनाम सरोवर है जिस्से अच्छोदानामनदी निकलती है उसके तीरपर चैत्ररथनाम दिव्य बन है उस पर्वतपर अनुचरोंसमेत मणिभद्र बसताहै ७।८ यहमणिभद्र यक्षोंकी सेनाकापति महाक्रूर और यक्षोंको साथ लियेहुये फिरतारहता है और मंदाकिनीनाम पवित्र अच्छोदा नदी वहाँ बहती है ९

सर्वौषधिंगिरिम् १० मनःशिलामयंदिव्यं सुवेलंपर्वतंप्रति । लोहितोहेमशृङ्गस्तु गिरिः
सूर्य्यप्रभोमहान् ११ तस्यपादेमहद्दिव्यं लोहितंसुमहत्सरः । तस्मात्प्रभवतेपुण्यो लौहित्यश्चनदीमहान् १२ दिव्यारण्यंविशोकञ्च तस्यतीरेमहद्वनम् । तस्मिन्गिरौनिवसति
यक्षोमणिधरोवशी १३ सौम्यैःसुधार्मिकैश्चैव गुह्यकैःपरिवारितः । कैलासात्पश्चिमोदीच्यां
ककुद्मानौषधीगिरिः १४ ककुद्मतिचरुद्रस्य उत्पत्तिश्चककुद्मिनः । तदजनन्त्रैःककुदं
शैलन्त्रिककुदंप्रति १५ सर्वधातुमयस्तत्र सुमहान्वैद्युतोगिरिः । तस्यपादे
महद्दिव्यं मानसंसिद्धसेवितम् १६ तस्मात्प्रभवतेपुण्या सरयूर्लोकपावनी । तस्यास्तीरेवनंदिव्यं
वैभ्राजंनामविश्रुतम् १७ कुबेरानुचरस्तस्मिन् प्रहेतितनयोवशी । ब्रह्मधातानिवसति
राक्षसोऽनन्तविक्रमः १८ कैलासात्पश्चिमामाशांदिव्यःसर्वौषधिर्गिरिः । अरुणःपर्वतश्रेष्ठो
रुक्मधातुविभूषितः १९ भवस्यदयितःश्रीमान् पर्वतोहेमसन्निभः । शातकौम्भमयैर्दिव्यैः
शिलाजालैःसमाचितः २० शतसंख्यैस्तापनीयैः शृङ्गैर्दिवमिवोल्लिखन् ।
शृङ्गवान्सुमहादिव्यो दुर्गःशैलोमहाचितः २१ तस्मिन्शिरौनिवसति गिरिशो
धूम्रलोचनः । तस्यपादात्प्रभवति शैलोदंनामतत्सरः २२ तस्मात्प्रभवतेपुण्या नदी
शैलोदकाशुभा । साचक्षुषीतयोर्मध्ये प्रविष्टापश्चिमोदधिम् २३ अस्त्युत्तरेणकैलासाच्छिवः
सर्वौषधीगिरिः । गौरन्तुपर्वतश्रेष्ठं हरितालमयंप्रति २४ हिरण्यशृङ्गःसुमहान्

यहनदी पृथ्वीके मंडलपर आकर समुद्रमें प्रवेशकरती है और कैलासके दक्षिणकी ओर पूर्वदिशामें
सुन्दर सर्बौषधियां पर्व्वतमें निवास करती हैं १० उसपर्व्वतपर मनशिलके पर्व्वतकी बेलाहै और
सूर्य्यके समान कान्तिवाला हेमशृंग पर्व्वतहै ११ उसकेनीचे महादिव्य लालसरोवरहै उससेही बड़े
गेरूका नद उत्पन्न होताहै उसके तटपर दिव्यारण्य और विशोकनाम दो महाबनहैं उनमें मणिधर
यक्ष बसताहै १२ । १३ वह शीलस्वभाववाले धार्मिक गुह्यकों से युक्त रहताहै और कैलासके पश्चिमोत्तर
कोणमें ककुद्मान्नाम औषधियोंका पर्व्वत है उसपर्व्वतपर ककुद्मीरुद्रकी उत्पत्तिहै १४।१५
वहाँ सबधातुओंसे संयुक्त महान् वैद्युत नामवाला पर्व्वतहै उसके नीचे महादिव्य मानसरोवरहै वह
सिद्धोंसे सेवितहै उसीसे पवित्र सरयूनदी निकलीहै और लोकोंको पवित्र करतीहै उसके तीरपर
वैभ्राजनाम दिव्यबनहै १६ । १७ उसबनमें प्रहेतिकापुत्र कुबेरका अनुचर अनन्तपराक्रमी ब्रह्म धातानाम
राक्षस बसताहै १८ कैलाससे पश्चिमकी दिशामें दिव्यसर्बौषधिका लालरंगवाला पर्व्वत सुवर्णधातुसे
बिभूषित पर्व्वतोंमें श्रेष्ठ १९ शिवजीका प्रिय श्रीमान् हेम सन्निभ सुवर्णशिलावाला सुवर्णकी
दिव्यशिलाओंके जालोंसे मंडितहै २० वहपर्व्वत अपने सैकड़ों शृंगोंकी उंचाईसे और कान्तिसे
स्वर्गको स्पर्श करताहुआ विदित होताहै इसदिव्य शिखरवाले पर्व्वतमें धूम्रलोचन शिवजी बसतेहैं
उसके नीचेसेही शैलोदनाम सरोवर उत्पन्न होताहै २१ । २२ उसी सरोवरमें से पवित्र शैलोदानाम
नदी वहती है वह चक्षुषीनामसे प्रसिद्ध होकर पश्चिम के समुद्रमें प्रवेशकरती है २३
कैलास से उत्तर की ओर सर्वौषधनाम पर्व्वतहै उसके समीप हरिताल के पर्व्वत की ओर बड़ा

दिव्यौषधिमयोगिरिः । तस्यपादेमहद्दिव्यं सरःकाञ्चनबालुकम् २५ रम्यंबिन्दुसरोनाम
यत्रराजाभगीरथः । गङ्गार्थेसतुराजर्षिरुवासबहुलाःसमाः २६ दिवंयास्यन्तुमेपूर्वे गङ्गा
तोयाप्लुतास्थिकाः । तत्रत्रिपथगादेवी प्रथमंतुप्रतिष्ठिता २७ सोमपादात्प्रसूतासा सप्त
धाप्रविभज्यते । यूपामणिमयास्तत्र विमानाश्चहिरण्मयाः २८ तत्रेष्ट्वाक्रतुभिःसिद्धः श
क्रःसुरगणैःसह । दिव्यच्छायाम्पथस्तत्र नक्षत्राणान्तुमण्डलम् २९ दृश्यतेभासुरारात्रौ
देवीत्रिपथगातुसा । अन्तरिक्षंदिवंचैव भावयित्वाभुवङ्गता ३० भवोत्तमाङ्गेपतिता सं
रुद्धायोगमायया । तस्यायेविन्दवःकेचित् क्रुद्धायाःपतिताभुवि ३१ कृतन्तुतैर्बहुसरस्त
तो बिन्दुसरःस्मृतम् । ततस्तस्यानिरुद्धाया भवेनसहसारुषा ३२ ज्ञात्वातस्याह्यभि
प्रायं क्रूरंदेव्याश्चिकीर्षितम् । भित्त्वाविशामिपातालं स्रोतमागृह्यशङ्करम् ३३ अथावले
पितंज्ञात्वा तस्याःक्रुद्धस्तुशङ्करः । तिरोभावयितुंबुद्धिरासीदङ्गेषुतांनदीम् ३४ एतस्मि
न्नेवकालेतु दृष्ट्वाराजानमग्रतः । धमनीसन्ततंक्षीणं क्षुधाव्याकुलितेन्द्रियम् ३५ अनेन
तोषितश्चाहं नद्यर्थेपूर्वमेवतु । बुध्वास्यवरदानन्तु ततःकोपंसयच्छतु ३६ ब्रह्मणोवच
नंश्रुत्वा यदुक्तंधारयन्नदीम् । ततोविसर्जयामास संरुद्धांस्वेनतेजसा ३७ नदींभगीरथ
स्यार्थे तपसोग्रेणतोषितः । ततोविसर्जयामास सप्तस्रोतांसिगङ्गया ३८ त्रीणिप्राचीम

श्रेष्ठ गौर पर्व्वतहै २४ और सुवर्णके शृंगवाला बहुत बड़ा दिव्य औषधी का पर्व्वत है उसके नीचे
महा दिव्य कांचन बालुक नाम सरोवरहै वह रम्य बिन्दु सरोवर नामसे प्रसिद्धहै वहाँही राजा भगी-
रथ बहुत कालतक श्रीगंगाजी के निमित्त वास करताभया २५।२६ और कहताभया कि मेरे पूर्व्वज
अर्थात् पुरखे गंगाजी के जलमें अपने अस्थि स्पर्श करनेवाले होकर स्वर्गमें प्राप्त होयँ इसीसे प्रथम
गंगाजी वहाँही प्राप्तहुई हैं २७ सोमपाद तीर्थ से निकसीहुई वह गंगाजी सात भागों में विभाग हो-
गईहैं वहाँ मणियोंके स्तम्भ और सुवर्ण के विमानहैं २८ उसी स्थान पर देवताओं समेत इन्द्र यज्ञ
करके सिद्धिको प्राप्तहोताभया उस जगह दिव्यछायाका मार्ग और नक्षत्रोंका मंडल दीखताहै रात्रि
में वह गंगाजी देवी कैसी कान्ति वाली दीखती हैं और आकाशीयस्वर्ग को प्राप्त होकर पृथ्वी में
प्राप्तहुई हैं २९।३० शिवजी के मस्तक पर पड़तीहैं क्योंकि उन्होंने अपनी योगमाया सेही रोकी हैं
इसीसे क्रोधितहुई गंगाजी के जोबिन्दु पृथ्वीपर गिरे हैं उनसे एक सरोवर उत्पन्नहोगया है उसीको
बिन्दुसरोवर कहते हैं पीछे रोकी हुई गंगाजी के क्रोधका अभिप्राय शिवजीने यहजानाकि गंगाजीकी
इच्छाहै कि शिवजीको प्राप्तहोकर पाताल फोड़कर उसमें प्रवेशकर जाऊंगी ३१।३३ ऐसा उसकागर्व
जानकर शिवजी भी क्रोधितहोकर यह विचारनेलगे कि मैं इस गंगाको अपने शरीरही में रमालूंगा
३४ उसी समय आगे खड़ेहुए राजाभगीरथको ऐसी दशा में देखतेभयेकि धमनी श्वाससे क्षीणम-
हाक्षुधित और इन्द्रियोंसे व्याकुलथा ३५ और यहभी जाना कि इस राजाने मुझको प्रथमही नदी के
निमित्त प्रसन्न कियाथा तब मैंने उसको वर दियाथा यह सब विचारकर शिवजी ने अपने क्रोधको
शान्त कर दिया ३६ और ब्रह्माजी के वचनको सुन नदी को धारणकरते हुए शिवजी अपने तेजसे

भिमुखं प्रतीचीन्त्रीएयथैवतु। स्रोतांसित्रिपथयास्तु प्रत्यपद्यन्तसप्तधा ३९ नलिनीह्ला
दिनीचैव पावनीचैवप्राच्यगा। सीताचक्षुश्चसिन्धुश्च तिस्रस्तावैप्रतीच्यगाः ४० सप्त
मीत्वनुगातासां दक्षिणेनभगीरथम्। तस्माद्भागीरथीसावै प्रविष्टादक्षिणोदधिम् ४१
सप्तचैताःप्लावयन्ति वर्षन्तुहिमसाह्वयम्। प्रसूताःसप्तनद्यस्तु शुभाविन्दुसरोद्भवाः ४२
तान्देशान्प्लावयन्तिस्म म्लेच्छप्रायांश्चसर्वशः। सशैलान्कुकुरान्रौध्रान् बर्बरान्यवनान्
खसान् ४३ पुलिकांश्चकुलत्थांश्च अंगलोक्यान्वरांश्चयान्। कृत्वाद्विधाहिमवन्तं प्र
विष्टादक्षिणोदधिम् ४४ अथवीरमरूंश्चैव कालिकांश्चैवशूलिकान्। तुषारान्बर्बरान
ङ्गन्यगृह्लात्पारदान्शकान् ४५ एताञ्जनपदांश्चक्षुः प्लावयित्वोदधिङ्गता। दरदोर्जगुडां
श्चैव गान्धारानौरसान्कुहून् ४६ शिवपौरानिन्द्रमरून् वसतीन्समतेजसम्। सैन्धवा
नुर्वसान्वर्वान् कुपथान्भीमरोमकान् ४७ शुनामुखांश्चोर्दमरून् सिन्धुरेतान्निषेवते। ग
न्धर्वान्किन्नरान्यक्षान् रक्षोविद्याधरोरगान् ४८ कलापग्रामकांश्चैव तथाकिंपुरुषान्न
रान्। किरातांश्चपुलिन्दांश्च कुरून्वैभारतानपि ४९ पाञ्चालान्कौशिकान्मत्स्यान् मा
गधाङ्गांस्तथैवच। ब्रह्मोत्तरांश्चवङ्गांश्च ताम्रलिप्तांस्तथैवच ५० एताञ्जनपदानार्या
न् गङ्गाभावयतेशुभा। ततःप्रतिहताविन्ध्ये प्रविष्टादक्षिणोदधिम् ५१ ततस्तुह्लादिनी
पुण्या प्राचीनाभिमुखाययौ। प्लावयन्त्युपकांश्चैव निषादानपिसर्वशः ५२ धीवरान्नृषि

रोकीहुई गंगाजीको छोड़ देतेभये ३७ अर्थात् भगीरथके उग्रतपसे प्रसन्नहुए शिवजीने भगीरथके
निमित्त उस गंगा नदीको सात स्रोतों करके छोड़ा ३८ तीन स्रोततो पूर्व के सन्मुख तीन पश्चिम
को और एक अपने समीप छोड़ा इस प्रकारसे सातस्रोते होते भये ३९ नलिनी १ ह्लादिनी और
पावनी यह तीन नाम वाली गंगाजी पूर्वको बहती हैं-सीता-चक्षु और सिन्धु यह तीन पश्चिम को
बहती हैं सातवीं गंगाकी समीपवर्तीधारा भगीरथके पीछे २ चलतीहुई दक्षिणकी ओरको बहती है
वही भगीरथको प्राप्तहुई इसी हेतुसे वह भागीरथीनामसे प्रसिद्ध होकर दक्षिण समुद्रमें प्रवेशकर-
तीहैं और बिन्दुसरोवरसे उत्पन्नहुईं सातशुभनदी हैं ४०।४२ वहसातोंनदी बहुतसे म्लेच्छदेशोंमें और
पर्व्वतों में घूमती हुईं कुकुर-रौध्र-बर्बर-यवन-खस-पुलिन्द-कुलत्थ-और अंगलोक्य इन सब देशों के
मध्यमें बहतीहुईं हिमवान् पर्व्वत से मिलीहुईं दक्षिण समुद्रमें प्रवेश करती हैं ४३।४४ और चक्षु
गंगा वीर-मरु-कालिक शूलिक-तुषार वर्व्वर पारद और शक इन देशों में बहती हुई समुद्र में प्राप्त
होती हैं यह गंगाजी दरद-उर्जगुड़-गांधार अर्थात् काबुल कन्धार-नीरस कुहू-शिवपौर-इन्द्रमरु-वसति
समतेजा-सिन्धदेश-उर्व्वश-पर्व-कुपथ-भीमरोमक ४५।४७ शुनामुख-उर्दमरु और सिन्धु रेत इनदेशों
में गन्धर्व-किन्नर-यक्ष-राक्षस-विद्याधर-सर्प ४८ इनके बहुतसे ग्राम किंपुरुष-नर-व्याध-आभीरजाति
कुरुदेशके मनुष्य-पंजाबदेश-मैथिलदेश-मत्स्य देश-मागधदेश-ब्रह्मोत्तर-बंगाला-और ताम्रलिप्तदेश इन
आर्यदेशोंको पवित्रकरती हैं और विंध्याचलके समीपमें बहतीहुईं दक्षिणके समुद्रमेंप्राप्तहोतीहैं ४९।५१
और ह्लादिनी गंगा उपकदेश और निषादोंके सबदेशोंको पवित्रकरतीहुईं ५२ धीवर-ऋषिक-नीलमुख

कांश्चैव तथानीलमुखानपि । केकरानेककर्णांश्च किरातानपिचैवहि ५३ कालिन्दगति
कांश्चैव कुशिकान्स्वर्गभौमकान् । सामण्डलेसमुद्रस्य तीरेभूत्वातुसर्वशः ५४ ततस्तु
नलिनीचापि प्राचीमेवदिशंययौ । कुपथान्प्लावयन्तीसा इन्द्रद्युम्नसरांस्यपि ५५ तथा
खरपथान्देशान् वेत्रशंकुपथानपि । मध्येनोज्जानकमरून् कुथप्रावरणान्ययौ ५६ इन्द्र
द्वीपसमीपेतु प्रविष्टालवणोदधिम् । ततस्तुपावनीप्रायात् प्राचीमाशाञ्जवेनतु ५७ तो
मरान्प्लावयन्तीच हंसमार्गान्समूहकान् । पूर्वान्देशांश्चसेवन्ती भित्त्वासाबहुधागिरिम्
५८ कर्णप्रावरणान्प्राप्य गतासाश्वमुखानपि । सिक्तापर्वतमेरुंसा गत्वाविद्याधरान
पि ५९ शैमिमण्डलकोष्ठन्तु साप्रविष्टामहत्सरः । तासांनद्युपनद्योऽन्याः शतशोऽथसह
स्रशः ६० उपगच्छन्तितानद्यो यतोवर्षतिवासवः । तीरेवंशौकसारायाः सुरभिर्नामत
द्वनम् ६१ हिरण्यश्रृङ्गोवसति विद्वान्कौवरकोवशी । यज्ञादपेतःसुमहानमितौजाःसुवि
क्रमः ६२ तत्रागस्त्यैःपरिवृता विद्वद्भिर्ब्रह्मराक्षसैः । कुबेरानुचराह्येते चत्वारस्तत्समा
श्रिताः ६३ एवमेवतुविज्ञेया सिद्धिःपर्वतवासिनाम् । परस्परेणद्विगुणा धर्म्मतःकामतो
ऽर्थतः ६४ हेमकूटस्यपृष्ठेतु सर्पाणांतत्सरःस्मृतम् । सरस्वतीप्रभवति तस्माज्ज्योति
ष्मतीतुया ६५ अवगाढौह्युभयतः समुद्रौपूर्वपश्चिमौ । सरोविष्णुपदंनाम निषधेपर्वतो
त्तमे ६६ यस्मादग्रेप्रभवति गन्धर्वानुसुखावहः । मेरोःपार्श्वात्प्रभवति ह्रदश्चन्द्रप्रभो

केकरजाति-व्याध इनमनुष्य देशोंमेंहोकर कलिंदगतिक और कुशिक इन सबस्वर्ग और भूमिके देशों को पवित्रकरतीहुई समुद्रके मण्डलके तीरपर प्राप्तहोती है और नलिनीनाम धाराभी पूर्व्वकीओर बहतीहुई कुपथ-इन्द्रद्युम्न-सरोवर-खरपथदेश-वेत्र शंकुपथदेश उज्जानक-मरुदेश और कुथ प्रावरण इन देशोंके मध्यमें बहतीहुई इन्द्र द्वीपके समीप खारी समुद्र में प्रवेशकरती है-पावनीनाम धारा-बड़ेवेग पूर्व्वक पूर्व्वदिशामें तोमर हंसमार्ग--और समूहक इन देशोंको सेवती हुई बहुतसे पर्व्वतों को फोड़तीहुई कर्ण प्रावरण देशोंको प्राप्त होकर अश्वमुख देशोंको प्राप्त सुमेरुपर्व्वतमें प्राप्त होती हुई विद्याधरों के देशोंमें प्राप्तहोती है ५३।५९। वहांसे वह धारा शैमिमंडल कोष्ठमें प्रवेशहुई है वहां बड़ासरोवर है और उन पूर्व्वोक्त धाराओं से हज़ारों नदियां निकलती हैं ६० वह नदियां जहां प्राप्त हुई हैं उसी स्थान के प्रभावसे इन्द्र वर्षा करताहै वंशौकसारा नामवाली नदीके तीरपर सुरभि नाम बनहै ६१ वहां हेमश्रृंग पर्व्वतपर यज्ञोंसे त्यागा हुआ अतुलपराक्रमी महाविद्वान् कौवरक नाम ब्राह्मण बसताहै ६२ उसी स्थानपर अगस्ति ऋषि के वंशमें उत्पन्न होनेवाले विद्वान् ब्रह्मराक्षसोंकरके वह नदी व्याप्त है वह ब्रह्मराक्षस चारहैं और कुबेरके अनुचरहैं वही वहां बसते हैं इसीप्रकार पर्व्वतवासियोंकी परस्पर धर्म से वा कामना से द्विगुनी सिद्धि जाननी योग्य है ६३।६४ हेमकूट पर्व्वतके मस्तकपर वह सर्पोंका सरोवर कहाताहै उसमें उसीसे ज्योतिवाली सरस्वती नदी उत्पन्न होती है उस नदीके दोनों ओर पूर्व्व पश्चिमके समुद्र दृढ़ होकर प्राप्त होरहे हैं ६५ उत्तम निषध पर्व्वत में विष्णुपद नाम सरोवरहै उसके आगे सुमेरु पर्व्वतके पार्श्व से गन्धर्वोंका सुखदेनेवाला चन्द्रप्रभा-

महान् ६७ जम्बूश्चैवनदीपुण्या यस्यांजाम्बूनदंस्मृतम् । पयोदस्तुह्रदोनीलः सशुभः
पुण्डरीकवान् ६८ पुण्डरीकात्पयोदाच्च तस्माद्द्वेसम्प्रसूयताम् । सरसस्तुसरस्त्वेतत्
स्मृतमुत्तरमानसम् ६९ मृग्याचमृगकान्ताच तस्माद्द्वेसम्प्रसूयताम् । ह्रदाःकुरुषुविख्याताः
पद्ममीनकुलाकुलाः ७० नाम्नातेवैजयानाम द्वादशोदधिसन्निभाः । तेभ्यःशान्तीचमध्वीच
द्वेनद्यौसम्प्रसूयताम् ७१ किंपुरुषाद्यानियान्यष्टौ तेषुदेवोनवर्षति । उद्भिदान्युदकान्यत्र
प्रवहन्तिसरिद्वराः ७२ बलाहकश्चऋषभो चक्रोमैनाकएवच । विनिविष्टाः
प्रतिदिशं निमग्नालवणाम्बुधिम् ७३ चन्द्रकान्तस्तथाद्रोणः सुमहांश्चशिलोच्चयः ।
उद्गायताउदीच्यान्तु अवगाढामहोदधिम् ७४ चक्रोबधिरकश्चैव तथानारदपर्वतः ।
प्रतीचीमायतास्तेवै प्रतिष्ठास्तेमहोदधिम् ७५ जीमूतोद्रावणश्चैव मैनाकश्चन्द्रपर्वतः ।
आयतास्तेमहाशैलाः समुद्रंदक्षिणम्प्रति ७६ चक्रमैनाकयोर्मध्ये दिविसंदक्षिणापथे ।
तत्रसम्बर्तकोनाम सोऽग्निःपिबतितज्जलम् ७७ अग्निःसमुद्रवासस्तु और्वोऽसौवडवामुखः
। इत्येतेपर्वताविष्टाश्चत्वारोलवणोदधिम् ७८ छिद्यमानेषुपक्षेषु पुराइन्द्रस्यवैभयात्
। तेषान्तुदृश्यतेचन्द्रे शुक्लेकृष्णासमाप्लुतिः ७९ तेभारतस्यवर्षस्य भेदायेनप्रकीर्तिताः
। इहोदितस्यदृश्यन्ते अन्येत्वन्यत्रचोदिताः ८० उत्तरोत्तरमेतेषां वर्षमुद्रिच्यते

नाम बड़ा ह्रद है उसीसे पवित्र जम्बू नदी उत्पन्न होती है उसीमें जांबूनद सुवर्ण उत्पन्न होताहै दूसरा
सरोवर दूधके समान स्वच्छ जलवाला शुभ पुंडरीक नामहै उसमेंसे दो सरोवर उत्पन्न हुएहैं
एक का उत्तर मानस नामहै उस उत्तर मानस सरोवरमें से मृग्या और मृगकान्ता यह दो नदी उत्पन्न
हुईहैं और कुरु देशों में कमल और मत्स्यादिक जीवोंसे समाकुल वैजय नामवाले बारह १२
सरोवर प्रसिद्ध हैं वह समुद्रके समान गंभीर हैं उनमेंसे शान्ती और माध्वी नाम दो नदियां उत्पन्न
हुईहैं जो कि किंपुरुष, हरिवर्ष-भद्राश्व--रम्यक –हिरण्य--कुरुवर्ष--केतुमाल और इलावृत यह आठ
खण्ड हैं इनमें इन्द्र वर्षा नहीं करता वहां इन्हीं सरोवरों के जलसे नदियां बहती हैं ६६ । ७२
और वलाहक--ऋषभ--चक्र और मैनाक यह पर्व्वत हरएक दिशा में निविष्ट लवणोदधि समुद्रमें
डूब रहे हैं ७३ चन्द्रकान्त--द्रोण यह सुन्दर बड़े पर्व्वत उत्तर दिशामें फैलरहे हैं और महोदधि
पर्व्वत में प्रविष्ट होगये हैं ७४ और चक्र--वधिरक और नारद इन पर्व्वतोंका विस्तार पश्चिम दिशामें
है यह भी महोदधि पर्व्वतमें घुसेहुए हैं ७५ जीमूत द्रावण--मैनाक द्रावण और चन्द्र पर्व्वत
यह महान् पर्व्वत दक्षिण समुद्रके सन्मुख विस्तृत हैं ७६ चक्र और मैनाक इन पर्व्वतों के मध्य
में आकाश के दक्षिण पथ मार्ग में सम्बर्त्तक नामवाले मेघ बसते हैं उन मेघों के जलको अग्निनाम
पर्व्वत पीता है ७७ और अग्नि-समुद्रबास--और्व और बड़वामुख यहचार पर्व्वत खारीसमुद्रमें प्रवेशकररहे
हैं ७८ इसका कारणयह है कि जब इन्द्र ने पर्व्वतों के पक्षछेदन किये थे तभी से वह समुद्रमें
प्रवेशकर गये हैं सो प्रवेश हुओंकाभी चिह्न शुक्लपक्षके चन्द्रमा में काला २ दीखता है ७९
उनपर्व्वतों केही विभागसे भारतवर्षके भेद होगये हैं इस खण्डमें कहेहुए यहाँ दीखते हैं और अन्य

गुणैः । आरोग्यायुःप्रमाणाभ्यां धर्म्मतःकामतोऽर्थतः ८१ समन्वितानिभूतानि तेषुवर्षे
षुभागशः । वसन्तिनानाजातीनि तेषुसर्वेषुतानिवै ८२ इत्येतद्धारयद्विश्वं पृथ्वीजगदिदं
स्थिता ८३ ॥ इति श्रीमत्स्यपुराणे विंशत्यधिकशततमोऽध्यायः १२० ॥

(सूत उवाच) शाकद्वीपस्यवक्ष्यामि यथावदिहनिश्चयम् । कथ्यमानंनिबोधध्वं शा
कंद्वीपंद्विजोत्तमाः ! १ जम्बूद्वीपस्यविस्ताराद्द्विगुणस्तस्यविस्तरः । विस्तारात्त्रिगुणा
श्चापि परीणाहःसमन्ततः २ तेनावृतःसमुद्रोऽयं द्वितीयोलवणोदकः । तत्रपुण्याजन
पदा चिराच्चम्रियतेजनः ३ कुतएवचदुर्भिक्षं क्षमातेजोयुतेष्विह । तत्रापिपर्वताःशुभ्राः
सप्तैवमणिभूषिताः ४ शाकद्वीपादिषुत्वेषु सप्तसप्तनगास्त्रिषु । ऋज्वायताःप्रतिदिशं
निविष्टाःपर्वतोत्तमाः ५ रत्नाकराद्रिनामानः सानुमंतोमहाचिताः । समोदिताःप्रति
दिशं द्वीपविस्तारमानतः ६ उभयत्रावगाढौच लवणक्षीरसागरौ । शाकद्वीपेतु
वक्ष्यामि सप्तदिव्यान्महाचलान् ७ देवर्षिगन्धर्वयुतः प्रथमोमेरुरुच्यते । प्रागा
यतःससौवर्ण उदयोनामपर्वतः ८ तत्रमेघास्तुवृष्ट्यर्थं प्रभवन्त्यपयान्तिच । तस्यापरेण
सुमहान् जलधारोमहागिरिः ९ सवैचन्द्रःसमाख्यातः सर्वौषधिसमन्वितः । तस्मान्नित्य
मुपादत्ते वासवःपरमञ्जलम् १० नारदोनामचैवोक्तो दुर्गशैलोमहाचितः । तत्राचलौस

में कहेहुए अन्यत्र दीखते हैं ८० इनपर्व्वतोंके उत्तरोत्तर यह वर्षगुण वाला कहाहै वहाँके सब प्राणी आयु आरोग्य-धर्म और काम इनके प्रमाण क्रमसे उत्तरोत्तर अधिकगुणवाले होतेहैं इस प्रकार के खण्डों में अनेकजाति के प्राणीबसते हैं ऐसी रीतिसे यहपृथ्वी इसजगत् को धारणकियेहुए स्थित होरही है ८१ । ८३ ॥

इति श्रीमत्स्यपुराणभाषाटीकायां विंशत्यधिकशततमोऽध्यायः १२० ॥

सूतजीबोले हेद्विजोत्तमलोगो अब यथावत् प्रकारसे शाकद्वीपके निश्चयको मुझसेसुनो १ इसशाकद्वीपकी लंबाई जंबूद्वीपसे द्विगुणितहै और चौड़ाई चारोंओरसे त्रिगुणितहै २ इसद्वीपके एकओरको तो यहीखारी समुद्र आवृतहोरहाहै इसमें देशबड़े पवित्र हैं आयुबड़ी है ३ उनक्षमा तेजआदिकोंसे युक्तहुयेदेशोंमें दुर्भिक्ष कभीनहींहोता इसमें मणियोंसे भूषित सात श्वेत पर्व्वत हैं शाकद्वीपादिक तीनद्वीपोंमें सात २ पर्व्वतहैं और दिशा दिशामें सीधे विस्तारवाले हैं परन्तु रत्नाकर नामवाले पर्व्वत बड़ेउत्तम शिखरवाले हैं यहसब पर्व्वत समानहोकर दिशा २ के प्रतिद्वीपके समान लम्बाई रखते हैं इसद्वीपके दोनोंओर क्षारसमुद्र और क्षीरसमुद्र लगरहेहैं अबशाकद्वीपके सात महाचल पर्व्वतों को कहताहूं ४ । ७ देवऋषि और गन्धर्व इनसे सेवित पहलासुमेरु पर्व्वत है वहपूर्व में लम्बा सौवर्ण उदयनामहै अर्थात् उसमें सोना उत्पन्नहोताहै ८ वहाँ वर्षाकरनेके निमित्त मेघ आतेहैं और आकर उलटे चलेआतेहैं उसके बराबरमें जलधार महापर्व्वतहै ९ उसको चन्द्रमाके समान वर्णन करतेहैं सब ओषधियोंसे युक्तहै उस पर्व्वतसे इन्द्र अत्यन्त जल ग्रहण करताहै १० इस्से आगे नारदनाम महापर्व्वतहै उस पर्व्वतमें प्रथम नारद और पर्व्वत यह दोनों नामकेपर्व्वत उत्पन्नहुएहैं उसपर्व्वत

मुत्पन्नौ पूर्वंनारदपर्वतौ ११ तस्यापरेणसुमहान् श्यामोनाममहागिरिः। यत्रश्यामत्वमापन्नाः प्रजाःपूर्वमिमाःकिल १२ तत्रैवदुन्दुभिर्नाम श्यामपर्वतसन्निभः। शब्दमृत्युःपुरा तस्मिन् दुन्दुभिस्ताडितःसुरैः १३ रत्नमालान्तरमयः शाल्मलश्चान्तरालकृत्। तस्यापरेणरजतो महानस्तोगिरिःस्मृतः १४ सवैसोमकइत्युक्तो देवैर्यत्रामृतंपुरा। संभृतश्चहतश्चैव मातुरर्थेगरुत्मता १५ तस्यापरेचाम्बिकेयः सुमनाश्चैवसस्मृतः। हिरण्याक्षोवराहेण तस्मिन्शैलेनिषूदितः १६ आम्बिकेयात्परोरम्यः सर्वौषधिनिषेवितः। विभ्राजस्तुसमाख्यातः स्फाटिकस्तुमहान्गिरिः १७ यस्माद्विभ्राजतेवह्निर्विभ्राजस्तेनसस्मृतः। सैवेहकेशवेत्युक्तोयतोवायुःप्रवातिच १८ तेषांवर्षाणिवक्ष्यामि पर्वतानांद्विजोत्तमाः!। शृणुध्वंनामतस्तानि यथावदनुपूर्वशः १९ द्विनामान्येववर्षाणि यथैवगिरयस्तथा। उदयस्योदयंवर्षं जलधारेतिविश्रुतम् २० नाम्नागतभयंनाम वर्षंतत्प्रथमंस्मृतम्। द्वितीयंजलधारस्य सुकुमारमितिस्मृतम् २१ तदेवशैशिरंनाम वर्षंतत्परिकीर्त्तितम्। नारदस्यचकौमारन्तदेवचसुखोदयम् २२ श्यामपर्वतवर्षंतदनीचकमितिस्मृतम्। आनन्दकमितिप्रोक्तं तदेवमुनिभिःशुभम् २३ सोमकस्यशुभंवर्षं विज्ञेयंकुसुमोत्करम्। तदेवासितमित्युक्तं वर्षंसोमकसंज्ञितम् २४ आम्बिकेयस्यमैनाकं क्षेमकञ्चैवतत्स्मृतम्। तदेवध्रुवमित्युक्तं वर्षंविभ्राजसंज्ञितम् २५ द्वीपस्यपरिणाहञ्च ह्रस्वदीर्घत्वमेवच। जम्बूद्वी

की प्रजा प्रथमश्याम वर्णवाली होतीभई ११।१२ उसश्यामपर्व्वतके समान बड़ीकान्तिवाला दुन्दुभी नाम पर्व्वतहै वहाँ प्रथम देवताओंने मृत्युका शब्द दुन्दुभी अर्थात् नक्कारोंसे बजायाहै १३ शाल्मल वाला पर्व्वत भीतरसे रत्नजटितहै उसके बराबरमें बड़ाभारी चाँदीका पर्व्वत है वह सोमक नाम कहाताहै वहाँ पहले देवतालोगोंने अमृत पियाहै उसी स्थानपर गरुड़जीने अपनी माताके निमित्त अमृतहराहै १४। १५ तिसके बराबरमें आम्बिकेय पर्व्वत सुमनानामसे प्रसिद्धहै उस पर्व्वतपर वराहजीने हिरण्याक्ष दैत्यको माराहै १६ आम्बिकेय पर्व्वतसेपरे सुन्दर सर्वौषधियोंसे सेवित मणियोंका बड़ा पर्व्वत विभ्राजनाम वालाहै १७ उस पर्व्वतमेंसे अग्नि प्रकाशमान होताहै इसी हेतु से उसको विभ्राज कहतेहैं और केशव भी कहतेहैं इसमें वायु भी बहुत चलताहै १८ हेद्विजोत्तमलोगो अब उन पर्व्वतोंके खंडोंको नामोंसहित कहताहूं तुम यथार्थ रीतिसे सुनो १९ उन खंडोंके दो २ नामहैं पर्व्वत और खंड–उदय पर्व्वतका उदयखंड–और जलधाराका जलधारा खण्डहै २० पहले उदय खंडको गतभय कहतेहैं दूसरे जलधारा खण्डको सुकुमार कहतेहैं २१ यह शीतखण्ड कहाता है और नारद पर्व्वतका कौमार खण्डहै उसको सुखोदय भी कहते हैं २२ श्याम पर्व्वत का अनीचक खंडहै उसीको मुनियोंने आनन्दकभी कहाहै २३ सोमक पर्व्वतका कुसुमोत्कर खंडहै उसे सोमकसंज्ञिक असित भी कहतेहैं २४ आम्बिकेय पर्व्वतका मैनाक खंडहै उसे क्षेमक भी कहतेहैं–विभ्राज पर्व्वतके खंडको ध्रुव और विभ्राज कहतेहैं २५ इस द्वीपकी चौड़ाई ह्रस्वता और दीर्घता जंबूद्वीप के हिसाबसे जानो इसद्वीप के मध्यमें शाकनाम एक बड़ावृक्ष है उसीके

पेनसंख्यातं तस्यमध्येवनस्पतिम् २६ शाकोनाममहावृक्षः प्रजास्तस्यमहानुगाः। एते
षुदेवगन्धर्वाः सिद्धाश्चसहचारणैः २७ विहरन्तिरमन्तेच दृश्यमानाश्चतैःसह । तत्रपु
ण्याजनपदाश्चातुर्वर्ण्यसमान्विताः २८ तेषुनद्यश्चसप्तैव प्रतिवर्षसमुद्रगाः। द्विनाम्ना
चैवताःसर्वा गङ्गासप्तविधास्मृता २९ प्रथमासुकुमारीति गङ्गाशिवजलाशुभा। मुनितप्ता
चनाम्नैषा नदीसम्परिकीर्त्तिता ३० सुकुमारीतपःसिद्धा द्वितीयानामतःसती । नन्दाच
पावनीचैव तृतीयापरिकीर्त्तिता ३१ शिविकाचचतुर्थीस्यात् द्विविधाचपुनःस्मृता । इक्षु
श्चपञ्चमीज्ञेया तथैवचपुनःकुहूः ३२ वेणुकाचामृताचैव षष्ठीसम्परिकीर्तिता। सुकृताच
गभस्तीच सप्तमीपरिकीर्तिता ३३ एताःसप्तमहाभागाः प्रतिवर्षशिवोदकाः। भावयन्ति
जनंसर्वं शाकद्वीपनिवासिनम् ३४ अभिगच्छन्तिताश्चान्या नदनद्यःसरांसिच । बहूद
कपरिस्रावा यतोवर्षतिवासवः ३५ तासान्तुनामधेयानि परिमाणंतथैवच । नशक्यंपरि
संख्यातुं पुण्यास्तासरिदुत्तमाः ३६ ताःपिबन्तिसदाहृष्टा नदीर्जनपदास्तुते । एतेशान्त
भयाःप्रोक्ताः प्रमोदायेचवैशिवाः ३७ आनन्दाश्चसुखाश्चैव क्षेमकाश्चनवैःसह । वर्णा
श्रमाचारयुता देशास्तेसप्तविश्रुताः ३८ आरोग्याबलिनश्चैव सर्वेमरणवर्जिताः । अव
सर्पिणीनतेष्वस्ति तथैवोत्सर्पिणीपुनः ३९ नतत्रास्तियुगावस्था चतुर्युगकृताक्वचित् ।
त्रेतायुगसमःकालस्तथातत्रप्रवर्त्तते ४० शाकद्वीपादिषुज्ञेयं पञ्चस्वेतेषुसर्वशः । देश

अनुसार वहाँकी रहनेवाली प्रजाहै इन शाक आदिक द्वीपोंमें देवता गन्धर्व और सिद्ध चारण
इनकेसाथ सबप्रजा रमणकरतीहै यहाँ चारोंवर्णोंसे युक्त पवित्र देशहैं २६।२८ उनद्वीपोंमें खंडकेप्रति
सात२ नदीहैं वहसब समुद्रगामीहैं और सब दो२ नामवाली सातप्रकारकी गंगाकहातीहैं २९ पहली
गंगा सुकुमारी नामवाली सुन्दरजलयुक्तहै उसे मुनिलोग तप्तानदीभीकहतेहैं ३० दूसरीको तपसिद्धा
और सती भी कहतेहैं तीसरी नन्दा और पावनी नामसे प्रसिद्धहै ३१ चौथीको शिविका कहतेहैं
द्विविधा भी बोलतेहैं—पांचवीं नदीको इक्षु तथा कुहू कहतेहैं ३२ छठी वेणुका और अमृता नामसे
प्रसिद्धहै सातवीं सुकृता और गभस्ती कहातीहै ३३ यह सात पवित्र जलवाली महाभागा एक २
खण्डके प्रति बहतीहुई सब शाकद्वीपनिवासी जनोंको पवित्र करतीहैं ३४ उन नदियों के सन्मुख
बहुत जलोंसे पूर्ण बहुतसे नद नदी और सरोवरहैं जिनके कि प्रभावसे इन्द्र वर्षा करताहै ३५ उन
अन्य नदियोंकी संख्या और प्रमाण करनेको कोई समर्थ नहींहै वह सब नदी पवित्रहैं जो देश कि
सदैव प्रसन्नतापूर्वक उन नदियोंका जल पीतेहैं वह देश भयरहित आनन्दयुक्त और कल्याणरूपहैं
३६।३७ वह आनन्द क्षेमरूप देश नवीन जनोंकेसाथ सुख स्वरूप होतेहैं वह सातों देश वर्णाश्रम
और आचारादिकोंसे संयुक्त प्रसिद्धहैं ३८ वह सब देश आरोग्य बलयुक्त मृत्युसे रहित और शरीरका
परिणाम घटना बढ़ना कृशहोना आदि विकारों से रहित हैं ३९ वहाँ जुदे २ चारोंयुग अपनी २
अवस्थानहीं वर्त्ततेहैं वहाँकाकाल सदैव त्रेतायुगके समान वर्त्तताहै ऐसे शाकादि पांचद्वीपोंमें देशोंके वि-

स्यतुविचारेण कालःस्वाभाविकःस्मृतः ४१ नतेषुसङ्करःकश्चित् वर्णाश्रमकृतःक्वचित् : धर्म्मस्यचाव्यभीचारादेकान्तसुखिनःप्रजाः ४२ नतेषुमायालोभोवा ईर्ष्यासूयाभयंकुतः। विपर्ययोनतेष्वस्ति तद्वैस्वाभाविकंस्मृतम् ४३ कालोनैवचतेष्वस्ति नदण्डोनचदाण्डिकः। स्वधर्मेणचधर्मज्ञास्तेरक्षन्तिपरस्परम् ४४ परिमण्डलस्तुसुमहान् दीपोवैकुशसंज्ञकः। नदीजलैःपरिवृतः पर्वतैश्चाभ्रसन्निभैः ४५ सर्वधातुविचित्रैश्च मणिविद्रुमभूषितैः। अन्यैश्चविविधाकारै रम्यैर्जनपदैस्तथा ४६ वृक्षैःपुष्पफलोपेतैः सर्वतोधनधान्यवान्। नित्यंपुष्पफलोपेतः सर्वरत्नसमावृतः ४७ आवृतःपशुभिःसर्वैर्ग्रामारण्यैश्च सर्वशः। आनुपूर्वात्समासेन कुशद्वीपंनिबोधत ४८ अथतृतीयंवक्ष्यामि कुशद्वीपञ्चकृत्स्नशः। कुशद्वीपेनक्षीरोदः सर्वतःपरिवारितः ४९ शाकद्वीपस्यविस्तारो द्विगुणेनसमन्वितः। तत्रापिपर्वताःसप्त विज्ञेयारत्नयोनयः ५० रत्नाकारस्तथानद्यस्तेषांनामानिमेशृणु। द्विनामानश्चतेसर्वे शाकद्वीपेयथातथा ५१ प्रथमःसूर्य्यसङ्काशः कुमुदोनामपर्वतः। विद्रुमोच्चयइत्युक्तः सएवचमहीधरः ५२ सर्वधातुमयैःशृङ्गैः शिलाजालसमन्वितैः। द्वितीयःपर्वतस्तत्र उन्नतोनामविश्रुतः ५३ हेमपर्वतइत्युक्तः सएवचमहीधरः। हरितालमयैःशृङ्गै र्द्वीपमावृत्यसर्वशः ५४ बलाहकस्तृतीयस्तु जात्यञ्जनमयोगिरिः। द्युतिमान्नामतःप्रोक्तः सएवचमहीधरः ५५ चतुर्थःपर्वतोद्रोणो यत्रौषध्योमहागिरौ। विशल्यक

चारसे स्वाभाविककाल वर्त्तताहै ४०। ४१ उन देशोंमें वर्णाश्रमों का संकर अर्थात् वर्णसंकरपना नहींहै वहाँकी प्रजा धर्मके न बिगडनेसे निरन्तर सुखवालीहै ४२ उन देशोंमें कपट–लोभ–ईर्षा–असूया अर्थात् गुणोंमें अवगुण बताना और भय यह कभी नहींहोतेहैं जिसमें किसीप्रकारका विपर्य्ययनहोय ऐसा स्वाभादिक देश कहाताहै ४३ वहाँ कालदंड और दंडका देनेवाला नहींहै धर्मज्ञपुरुष परस्पर मिलकर अपने धर्मसे प्रजाकी रक्षाकरतेहैं ४४ और सुन्दर मंडलवाला महाकुशद्वीपहै यह द्वीप नदीके जलोंसे और भोड़लके समान श्वेत पर्व्वतोंसे संयुक्तहै ४५ इसके विशेष सबप्रकार की विचित्र धातु मणि मूंगा और रत्नोंसे विभूषित अनेक प्रकारके देशोंसे भी युक्तहै ४६ सर्वत्र पुष्प फल युक्त वृक्षोंसे समृद्धिवाला धन धान्यसे पूर्ण और सदैव सब रत्नोंसे व्याप्तहै ४७ ग्राम्य और वनवासी पशुओंसे युक्त इस द्वीपको क्रमानुसार सुनो ४८ प्रथम तीसरे कुशद्वीपको संपूर्णतासे कहताहूं इस कुशद्वीप के सबओर क्षीरसागर परिखाके समान आडे आरहाहै अर्थात् शाकद्वीप और कुशद्वीप के मध्यमें क्षीरसागरहै ४९ यह कुशद्वीप शाकद्वीपके विस्तारसे दूनेविस्तारवालाहै इसमें भी रत्नोंकी उत्पत्तिवाले सात पर्व्वतहैं ५० और सातही रत्नोंकी उत्पन्नकरनेवाली नदियां हैं उनपर्व्वतोंके नामोंको सुनो वहसब शाकद्वीपके समान दो २ नामवालेहैं ५१ पहला सूर्य्यके समान कान्तिवाला कुमुद पर्व्वतहै वह विद्रुमोच्चय कहाताहै ५२ दूसरा संपूर्ण धातुओंके शिखरोंसे युक्त शिलाजालों से मंडित उन्नतानाम पर्व्वतहै उसको हेम पर्व्वत कहतेहैं ३५ तीसरा हरितालके शिखरोंसे युक्त अंजनकी उत्पत्ति करनेवाला वलाहकनाम पर्व्वत उस द्वीपको सबओरसे आवृत कररहाहै उस पर्व्वतको

रणीचैव मृतसञ्जीवनीतथा ५६ पुष्पवान्नामसैवोक्तः पर्वतःसुमहाचितः । कङ्कस्तुपञ्च
मस्तेषां पर्वतोनामसारवान् ५७ कुशेशयइतिप्रोक्तः पुनःसपृथिवीधरः। दिव्यपुष्पफलो
पेतो दिव्यवीरुत्समन्वितः ५८ षष्ठस्तुपर्वतस्तत्र माहिषोमेघसन्निभः। सएवतुपुनःप्रोक्तो
हरिरित्यभिविश्रुतः ५९ तस्मिन्सोऽग्निर्निवसति महिषोनामयोऽप्सुजः । सप्तमःपर्वत
स्तत्र ककुद्मान्सहिभाषते ६० मन्दरःसैवविज्ञेयः सर्वधातुमयःशुभः । मन्दइत्येषयोधा
तुरपामर्थेप्रकाशकः ६१ अपांविदारणाच्चैव मन्दरःसनिगद्यते । तत्ररत्नान्यनेकानिस्वयं
रक्षतिवासवः ६२ प्रजापतिमुपादाय प्रजाभ्योविदधत्स्वयम् । तेषामन्तरविष्कम्भो द्वि
गुणःसमुदाहृतः ६३ इत्येतेपर्वताःसप्त कुशद्वीपेप्रभाषिताः । तेषांवर्षाणिवक्ष्यामि सप्तैव
तुविभागशः ६४ कुमुदस्यस्मृतःश्वेत उन्नतश्चैवसस्मृतः। उन्नतस्यतुविज्ञेयं वर्षलोहित
संज्ञकम् ६५ वेणुमण्डलकञ्चैव तथैवपरिकीर्त्तितम् । बलाहकस्यजीमूतः स्वैरथाकारमि
त्यपि ६६ द्रोणस्यहरिकंनाम लवणञ्चपुनःस्मृतम् । कङ्कस्यापिककुन्नाम धृतिमच्चैव
तत्स्मृतम् ६७ महिषंमहिषस्यापि पुनश्चापिप्रभाकरम् । ककुद्मिनस्तुतद्वर्षं कपिलंनाम
विश्रुतम् ६८ एतान्यपिविशिष्टानि सप्तसप्तपृथक्पृथक् । वर्षाणिपर्वताश्चैव नदीस्तेषु
निबोधत ६९ तत्रापिनद्यःसप्तैव प्रतिवर्षंहिताःस्मृताः । द्विनामवत्यस्ताःसर्वाः सर्वाःपु

द्युतिमान् भी कहतेहैं ५४ । ५५ चौथा द्रोण पर्व्वतहै इसमें बाण आदि के घावके अच्छे करनेवाली
और मरेहुओंको जिलानेवाली औषधीहै ५६ वह पर्व्वत पुष्पवान् भी कहाताहै पांचवाँ कंकपर्व्वत
है इसमें भी अच्छी सार२ वस्तुहैं उसको कुशेशयनामसे कहाकरतेहैं यहदिव्य पुष्प फल और लता-
ओंसे युक्तहै ५७। ५८ छठा पर्व्वत मेघके समान काले वर्णवाला महिषनामसे प्रसिद्धहोकर हरि-
नामसे भी विख्यात है ५९ उसमें जलमें उत्पन्न होनेवाला महिष अग्निरूप होकर वासकरता
है-सातवाँ ककुद्मान्नाम पर्व्वतहै ६० उसीको मंदर भी कहते हैं यह पर्व्वत सब धातुओंसे युक्त
मन्दरनामसे विख्यात धातु जलोंके अर्थका प्रकाशकहै जलोंके विदारण करनेसे उसे मन्दर कहतेहैं
यह भी सब रत्नोंसे जटितहै इसकीरक्षा इन्द्र आप करतेहैं ६१ । ६२ ब्रह्माजीकी आज्ञासे इन्द्र सब
प्रजाओं के निमित्त रत्नों को धारण करताथा परन्तु इन पर्व्वतों के मध्य में दूने प्रमाण से
धारण करताथा—विष्कंभ—अर्थात् स्तंभरूप पर्व्वत कहेहैं ६३ यह सात पर्व्वत कुशद्वीपमें हैं उनके
भी खंडोंको विभाग पूर्व्वक सुनो ६४ कुमुद पर्व्वतका श्वेतद्वीपहै उसे उन्नतभी कहते हैं और
दूसरा उन्नतनामवाले पर्व्वतका लोहित खंड है ६५ उसी को वेणुमंडल भी कहते हैं—वलाहक
पर्व्वतका जीमूत पर्व्वतहै उसको स्वैरथाकार भी कहतेहैं द्रोण पर्व्वतका हरिकनाम खंडहै उसको
लवणभी कहतेहैं—कंकपर्व्वतका ककुद्नाम खंडहै उसको धृतिमत् भी कहतेहैं ६६।६७महिष पर्व्वतका
महिषही खंड है उसको प्रभाकर भी कहते हैं—ककुद्मान् पर्वतका ककुद्मान् खंड है वह कपिल
नाम से प्रसिद्ध है ६८ यह सात २ खंड पृथक् २ एक एक द्वीपमें हैं और सात २ पर्व्वत और
नदी हैं उनके नामों को सुनो ६९ एक २ खंडमें सात २ नदी हैं वह सब दो २ नामों से विख्यात

पथ्यजलाःस्मृताः ७० धूतपापानदीनाम योनिश्चैवपुनःस्मृता । सीताद्वितीयाविज्ञेया साचैवहिनिशास्मृता ७१ पवित्रातृतीयाज्ञेया वितृष्णाहिचयापुनः । चतुर्थीह्लादिनीत्युक्ता चन्द्रभाइतिचस्मृता ७२ विद्युच्चपञ्चमीप्रोक्ता शुक्लाचैवविभाव्यते । पुण्ड्राषष्ठीतु विज्ञेया पुनश्चैवाविभावती ७३ महतीसप्तमीप्रोक्ता पुनश्चैषाधृतिःस्मृता । अन्यास्ताभ्योऽपिसञ्जाताः शतशोथसहस्रशः ७४ अभिगच्छन्तितानद्यो यतोवर्षतिवासवः। इत्येषसन्निवेशोवः कुशद्वीपस्यवर्णितः ७५ शाकद्वीपेनविस्तारः प्रोक्तस्तस्यसनातनः। कुशद्वीपःसमुद्रेण घृतमण्डोदकेनच ७६ सर्वतःसुमहान्द्वीप श्चन्द्रवत्परिवेष्टितः। विस्तारान्मण्डलाच्चैव क्षीरोदाद्द्विगुणोमतः ७७ ततःपरंप्रवक्ष्यामि क्रौञ्चद्वीपंयथातथा। कुशद्वीपस्यविस्ताराद् द्विगुणस्तस्यविस्तरः ७८ घृतोदकःसमुद्रोवै क्रौञ्चद्वीपेनसंवृतः। चक्रनेमिप्रमाणेन वृतोवृत्तेनसर्वशः ७९ तस्मिन्द्वीपेनराःश्रेष्ठा देवनोगिरिरुच्यते । देवनात्परतश्चापि गोविन्दोनामपर्वतः ८० गोविन्दात्परतश्चापि क्रौञ्चस्तुप्रथमोगिरिः। क्रौञ्चात्परेपावनकः पावनादन्धकारकः ८१ अन्धकारात्परेचापि देवावृन्नामपर्वतः। देवावृतःपरेणापि पुण्डरीकोमहान्गिरिः ८२ एतेरत्नमयाःसप्त क्रौञ्चद्वीपस्यपर्वताः। परस्परस्यद्विगुणो विष्कम्भोवर्षपर्वतः ८३ वर्षाणितस्यवक्ष्यामि नामतस्तुनिबोधत। क्रौञ्चस्यकुशलोदेशो वामनस्यमनोऽनुगः ८४ मनोऽनुगात्परेचोष्णस्तृतीयो

सुन्दर और पवित्र जलवाली हैं ७० पहली धूतपापा नदी है उसको योनिनदी भी कहतेहैं–दूसरी सीता नदी है उसे निशानदी भी कहते हैं ७१ तीसरी पवित्रा नदी है उसे वितृष्णा भी कहते हैं–चौथी ह्लादिनी नदी है उसको चन्द्रभाकहते हैं ७२ पाँचवीं विद्युत् नदी है उस को शुक्ला भी कहते हैं छठी पुंड्रा नदी है उसको विभावती भी कहते हैं ७३ सातवीं महती नदी है उसको धृति भी कहतेहैं उन नदियोंसे उत्पन्नहुईं अन्य हज़ारों नदियां हैं वह सब समुद्रके सन्मुख जातीहैं इसप्रकार से इस कुशद्वीपका वर्णन किया शाकद्वीपके चारोंओर इसका विस्तार कहाहै यह कुशद्वीपघृत मंडोद अर्थात् घृतसरी के जलवाले समुद्रसे व्यावृत होरहाहै ७४ । ७६ यह बड़ाद्वीप सबओरसे चन्द्रमाके मंडलके समान वेष्टित होरहाहै पहले क्षीरसागरके मंडलके विस्तारसे दूने विस्तारवालाहै ७७ इस्से आगे अब क्रौंचद्वीप का वर्णन करतेहैं इस क्रौंचद्वीपका विस्तार कुशद्वीपके विस्तारसे दूनाहै ७८ यह घृतोद समुद्र क्रौंचद्वीपकरके संयुक्त होरहाहै यह समुद्र इसद्वीपके चारोंओर ऐसा लगाहुआ है जैसे कि पहियेके ऊपर हाल लगाहुआ होताहै ७९ इस द्वीपमें उत्तममनुष्य बसतेहैं वहां पहला देवन नाम पर्व्वतहै देवनसे परे गोविंद नाम पर्व्वतहै ८० गोविंदसे परे उत्तम क्रौंच पर्व्वतहै उस्से परे पावनक नाम पर्व्वतहै पावनकसे परे अन्धकारक पर्व्वतहै ८१ अन्धकारकसे परे देवावृत पर्व्वतहै देवावृत से परे महान् पुंडरीक पर्व्वतहै यह सातों क्रौंचद्वीपके पर्व्वत रत्नोंसे जटितहैं परस्पर इनका विष्कम्भ अर्थात् स्तम्भरूप खंडके पर्व्वतका विस्तार दूनाहै अब इस द्वीपके खंडोंका वर्णन करतेहैं उनके यह नामहैं क्रौंचद्वीपका पहलाखंड कुशल नामहै उस्से परे मनोनुगखंडहै उससे परे तीसरा

उष्णात्परेपावनकः पावनादन्धकारकः ८५ अन्धकारकदेशात्तु मुनिद्रेश
ऽपिसउच्यते । मुनिदेशात्परेचापि प्रोच्यतेदुन्दुभिस्वनः ८६ सिद्धचारणसङ्कीर्णो गौरश्च
स्तयांवरः । श्रुतास्तत्रैवनद्यस्तु प्रतिवर्षङ्गताःशुभाः ८७ गौरीकुमुद्वतीचैव सन्ध्यारा
त्रिर्मनोजवा । ख्यातीचपुण्डरीकाच गङ्गाःसप्तविधाःस्मृताः ८८ तासांसहस्रशश्चान्या
नद्यःपार्श्वसमीपगाः । अभिगच्छन्तितानद्यो बहुलाश्चबहूदकाः ८९ तेषांनिसर्गोदेशा
ना मानुपूर्वेणसर्वशः । नशक्योविस्तराद्वक्तु मपिवर्षशतैरपि ९० सर्गोयश्चप्रजानान्तु
संहारोयश्चतेषुवै । अतऊर्ध्वंप्रवक्ष्यामि शाल्मलस्यनिबोधत ९१ शाल्मलोद्विगुणोद्वी
पः क्रौञ्चद्वीपस्यविस्तरात् । परिवार्य्यसमुद्रन्तु दधिमण्डोदकंस्थितम् ९२ तत्रपुण्या
जनपदाश्चिराच्चम्रियतेजनः । कुतएवतुदुर्भिक्षं क्षमातेजोयुताहिते ९३ प्रथमःसूर्य्यस
ङ्काशः सुमनानामपवर्तः । पीतस्तुमध्यमश्चासी त्ततःकुम्भमयोगिरिः ९४ नाम्नासर्वसु
खोनाम दिव्यौषधिसमन्वितः । तृतीयश्चैवसौवर्णो भृङ्गपत्रनिभोगिरिः ९५ सुमहान्रो
हितोनाम दिव्योगिरिवरोहिसः । सुमनाःकुशलोदेशः सुखोदर्कःसुखोदयः ९६ रोहितो
यस्तृतीयस्तु रोहिणोनामविश्रुतः । तत्ररत्नान्यनेकानि स्वयंरक्षतिवासवः ९७ प्रजापति
मुपादाय प्रसन्नोविदधत्स्वयम् । नतत्रमेघावर्षन्ति शीतोष्णञ्चनतद्विधम् ९८ वर्णाश्र

उष्णखंडहै उष्णसे परे पावनकखंडहै पावनकसे परे अंधकारखंडहै ८२ । ८५ अंधकारखंडसे परे
मुनिदेशखंडहै मुनिदेशसे परे दुन्दुभिस्वनखंडहै ८६ दुन्दुभिस्वनखंडमें विशेषकरके गौर मनुष्यहैं वह
बड़े पवित्रहैंऔर सिद्धवचारणोंसेसेवितहैं वहांएक२ खंडमें प्राप्तहोनेवाली पृथक्२ नदीभी सुनीजाती
हैं ८७ गौरी१ कुमुद्वती २ संध्या ३ रात्रि ४ मनोजवा ५ ख्याती ६ और पुंडरीका ७ यह सातप्रकार
की गंगा कहीहैं ८८ और उनमेंसे निकसीहुई हजारों नदियां समीपमें बहती हैं वहसब नदी बहुत
जलवाली हैं और उन बड़ी नदियोंके सन्मुख आती हैं उन देशोंका स्वभाव और विस्तार यथार्थ रीति
से कहनेको कोई भी समर्थ नहींहै इनका विस्तार सैकड़ोंवर्षोंमें भी कोई नहीं कहसक्ता ८९ । ९०
उन खंडोंकी संख्या और संहारको कौन कहसक्ताहै—अब शाल्मलद्वीपका वर्णन करतेहैं शाल्मलद्वीप
क्रौंचद्वीपसे दूने विस्तारवालाहै इसके चारोंओर दहीका समुद्र व्याप्त होरहाहै ९१ । ९२ वहांके प-
वित्र देशोंके मनुष्योंकी अवस्था बहुतबड़ीहै वहां दुर्भिक्षकभी नहीं होता वहांके वासी क्षमा दया और
तेज आदिकोंसे युक्तहैं ९३ वहांका प्रथमपर्व्वत सूर्य्य के समान कान्तिवाला सुमना नामसे प्रसिद्ध
है दूसरा पर्व्वत मध्यमें पीतवर्ण होकर कुंभमय नामहै उसको सर्वसुखभी कहतेहैं वह दिव्य औष-
धियोंसे सम्पन्नहै तीसरा पर्व्वत तेजपातके समान कान्तिवाला सुवर्णकाहै ९४ । ९५ वह महासुंदर
लालवर्णहै उस पर्व्वतका खंड कुशलरूप सुखस्वरूप फलवाला और सुखकी उत्पत्तिवालाहै इस
लालवर्णवाले पर्व्वतको रोहिणभी कहतेहैं वहां अनेकप्रकारके रत्नहैं उनकी रक्षा आप इन्द्र करता
है ९६ । ९७ इसको प्रजापतिकी आज्ञा से प्रसंन्नतापूर्व्वक इन्द्रने आप रचाहै वहां घनही वर्षा करते
हैं परन्तु वर्षाकी शीतलता और उष्णता वहां नहींहै ९८ और इन द्वीपोंमें वर्णाश्रमोंका भी विचार

माणांवार्तावा त्रिषुद्वीपेषुविद्यते। नग्रहोनचचन्द्रोऽस्ति ईर्ष्यासूयाभयंतथा ९९ उद्भिदा
न्युदकान्यत्र गिरिप्रस्रवणानिच। भोजनंषड्रसंतत्र तेषांस्वयमुपास्थितम् १०० अधमो
त्तमंनतेष्वस्ति नलोभोनपरिग्रहः। आरोग्यबलवन्तश्च एकान्तसुखिनोनराः १०१
त्रिंशद्वर्षसहस्राणि मानसींसिद्धिमास्थिताः। सुखमायुश्चरूपञ्च धर्मैश्वर्य्यन्तथैवच
१०२ शाल्मलान्तेषुविज्ञेयं द्वीपेषुत्रिषुसर्वतः। व्याख्यातःशाल्मलान्तानां द्वीपानान्तु
विधिःशुभः १०३ परिमण्डलस्तुद्वीपस्य चक्रवत्परिवेष्टितः। सुरोदेनसमुद्रेणाद्विगुणेन
समन्वितः १०४॥

इति श्रीमत्स्यपुराणेएकविंशत्यधिकशततमोऽध्यायः १२१॥

(सूतउवाच)। गोमेदकंप्रवक्ष्यामि षष्ठंद्वीपन्तपोधनाः॥ सुरोदकसमुद्रस्तु गोमेदेनस
मावृतः १ शाल्मलस्यतुविस्तारात् द्विगुणस्तस्यविस्तरः। तस्मिन्द्वीपेतुविज्ञेयौ पर्वतौ
द्वौसमाहितौ २ प्रथमःसुमनानाम जात्यञ्जनमयोगिरिः। द्वितीयःकुमुदोनाम सर्वौषधिस
मन्वितः ३ शातकौम्भमयःश्रीमान् विज्ञेयःसुमहाचितः। समुद्रेक्षुरसोदेन वृतोगोमेदक
श्चसः ४ षष्ठेनतुसमुद्रेण सुरोदाद्द्विगुणेनच। धातकीकुमुदश्चैव हव्यपुत्रौसुविस्तृतौ
५ सौमनंप्रथमंवर्षं धातकीखण्डमुच्यते। धातकिनःस्मृतंतद्वै प्रथमंप्रथमस्यतु ६ गोमे

नहींहै वहां न तो कोई ग्रहहै न चन्द्रमाहै और ईर्षा निन्दादिक कोई भयभी नहींहै ९९ वहां सब
पर्वतोंके झिरनोंका जलपीतेहैं और सब मनुष्यादिकोंको षट्रस भोजन आपही प्राप्त होजाताहै १००
उनमें उत्तम अधम कोई नहींहै लोभ नहीं है कोई किसीबस्तु का संग्रह नहींकरता वहां के मनुष्य
आरोग्य बली और निरन्तर सुखवाले हैं १०१ वहाँ तीसहज़ार वर्षोंमें मनुष्य मानसी सिद्धि अर्थात्
मनकी विचारीहुई सिद्धिको प्राप्तहोजातेहैं उन सबको सुख आयुरूप धर्म और ऐश्वर्य इनकी प्राप्ति
सदैव रहतीहै १०२ शाल्मल द्वीपके अन्तमें इनतीनद्वीप अर्थात् खंडोंमें जो रीति व्यवहारकीविधि
हैं वह कहीगई इसद्वीपका मंडलचक्रके समान गोल और मदिराके समुद्रसे वेष्टितहोरहाहै यहमदिरा
का समुद्र इस द्वीपसे दूने प्रमाणकाहै १०३। १०४॥

इति श्रीमत्स्यपुराणभाषाटीकायामेएकविंशत्यधिकशततमोऽध्यायः १२१॥

सूतजीबोले-हे ऋषियो अब गोमेदनामवाले छठे द्वीपका वर्णनसुनो-गोमेदद्वीप बाहरकी ओर
सुरोद अर्थात् मदिराके समुद्रसे व्याप्तहो रहाहै इसद्वीपका विस्तार भी शाल्मल द्वीपसे दूनाजानो-
इसद्वीपमें दो उत्तम पर्वतहैं १। २ पहला सुमना पर्वतहै वह अंजनके समान वर्णनकियाहै दूसरा
कुमुद्र पर्वतहै वह सब औषधियोंसे संयुक्तहै इसमें सुवर्णकी उत्पत्तिहै और बड़ा ऊंचाहै यह गोमेद
नाम द्वीप सुरोद समुद्रसे दूने प्रमाणवाले इक्षुरसोद अर्थात् ईखके रसके समान जलवाले समुद्रसे
वेष्टितहोरहाहै और धातकी और कुमुद यह दो पर्व्वत हव्यके पुत्रकहे हैं यह बहुत बड़े विस्तारवाले
हैं पहले सौमन पर्व्वतको धातकी कहतेहैं इस धातकी पर्व्वतका खंड भी धातकी नामवालाहै वह

दंयत्स्मृतंवर्षं नाम्नासर्वसुखन्तुतत्। कुमुदस्यद्वितीयस्य द्वितीयंकुमुदंततः ७ एतौद्वौ
पर्वतौवृत्तौ शेषौसर्वसमुच्छ्रितौ। पूर्वेणतस्यद्वीपस्य सुमनाःपर्वतःस्थितः ८ प्राक्पश्चि
मायतैःपादै रासमुद्रादितिस्थितः। पश्चार्द्धेकुमुदस्तस्य एवमेवस्थितस्तुवै ९ एतैःपर्व
तपादैस्तुसदेशोवैद्विधाकृतः। दक्षिणार्द्धेतुद्वीपस्यधातकीखण्डमुच्यते १० कुमुदन्तूत्तरे
तस्य द्वितीयंवर्षमुत्तमम्। एतौजनपदौद्वौतु गोमेदस्यतुविस्तृतौ ११ अतःपरंप्रवक्ष्या
मि सप्तमंद्वीपमुत्तमम्। समुद्रेक्षुरसंचैव गोमेदाद्द्विगुणंहिसः १२ आवृत्यतिष्ठतिद्वीपः
पुष्करःपुष्करैर्वृतः। पुष्करेणवृतःश्रीमांश्चित्रसानुर्महागिरिः १३ कूटैश्चित्रैर्मणिमयैः
शिलाजालसमुद्भवैः। द्वीपस्यैवतुपूर्वार्द्धे चित्रसानुःस्थितोमहान् १४ परिमण्डलसहस्रा
णि विस्तीर्णःपञ्चविंशतिः। ऊर्ध्वंसवैचतुर्विंशद्योजनानांमहाबलः १५ द्वीपार्द्धस्यपरि
क्षिप्तः पश्चिमेमानसोगिरिः। स्थितोवेलासमीपेतु पूर्णचन्द्रइवोदितः १६ योजनानांस
हस्राणि सार्द्धपञ्चाशदुच्छ्रितः। तस्यपुत्रोमहावीतः पश्चिमार्द्धस्यरक्षिता १७ पूर्वार्द्धेपर्वत
स्यापि द्विधादेशस्तुसस्मृतः। स्वादूदकेनोदधिना पुष्करःपरिवारितः १८ विस्तारान्म
ण्डलाच्चैव गोमेदाद्द्विगुणेनतु। त्रिंशद्वर्षसहस्राणि तेषुजीवन्तिमानवाः १९ विपर्ययोन
तेष्वस्ति एतत्स्वाभाविकंस्मृतम्। आरोग्यंसुखबाहुल्यं मानसींसिद्धिमास्थिताः २०

प्रथम खंड कहाताहै और गोमेद खण्ड सर्व सुख नामवालाहै दूसरे कुमुद पर्व्वतके खण्डको कुमुद कहते हैं ३। ७ यह दोनों पर्व्वत गोल हैं और चारों ओरसे एकसे ऊंचे हैं इस द्वीपके पूर्व्व की ओर सुमना पर्व्वत है वह पूर्व्व से पश्चिम की ओर समुद्र पर्य्यन्त स्थित होरहाहै और उस पिछले अर्द्ध भागमें इसीप्रकार कुमुद पर्व्वत स्थित होरहाहै ८। ९ इन पर्व्वतों के पदों से उस देशके दो विभाग होरहेहैं द्वीपके दक्षिणीय अर्द्ध भागमें धातकी खण्ड कहाताहै १० और दूसरा कुमुद खंड उस द्वीपके उत्तरकी ओरहै इस प्रकारसे यह दो देश गोमेद द्वीपके कहेहैं और उत्तम विस्तारवाले हैं ११ अब इससे आगे सातवें द्वीपको कहतेहैं सातवाँ द्वीप इक्षुरसवाले गोमेद पर्व्वतसे दूने प्रमाण वाले समुद्रसे बाहरकी ओर चारोंओर बसताहै उसको पुष्कर द्वीप कहतेहैं वह पुष्कर अर्थात् कमलों से युक्त होरहाहै इस पुष्कर द्वीपमें श्रीमान् चित्रसानु उत्तमपर्व्वतहै और महाउत्तम विचित्रमणियों वाली शिलाओंके शिखरोंसे शोभितहोरहाहै इस द्वीपके पूर्वार्द्ध भागमें यह चित्रसानु पर्व्वत स्थित है १२।१४ इसपर्व्वत के मंडलोंका विस्तार पच्चीसहज़ार योजन और उंचाई चौबीस हज़ार योजन है १५ उसद्वीपके पश्चिमके अर्द्धभागमें मानसनाम पर्व्वतहै यहसमुद्रके समीपमें ऐसा शोभायमान होरहाहै जैसे कि पूर्णमासीका चंद्रमा प्रकाशमान होताहै इस पर्व्वतकी उंचाई साढ़ेपचासयोजन कीहै और इसपर्व्वतका पुत्रमहाबीतनामहै वह इसद्वीपके पश्चिमभागकी रक्षाकरताहै १६।१७द्वीपके पूर्वभागमें दोखंडहोरहे हैं उसी पर्व्वतके विभागसे दोदेशबसते हैं यहपुष्करद्वीप स्वादुयुक्त जलके समुद्रसे वेष्टित होरहाहै इसकाविस्तार गोमेदद्वीपके मंडलसे दूने विस्तारमें है इसद्वीपके मनुष्य तीसहज़ार वर्षोंतक जीवते हैं १८।१९ तहाँ कुछ विपर्य्ययनहीं है और आयु आरोग्य-बहुत सुख और

सुखमायुश्चरूपञ्च त्रिषुद्वीपेषुसर्वशः । अधमोत्तमौनतेष्वास्तां तुल्यास्तेवीर्य्यरूपतः २१ नतत्रबध्यबधकौ नेर्ष्यासूयाभयंतथा । नलोभोनचदम्भोवा नचद्वेषःपरिग्रहः २२ सत्यानृतेनतेष्वास्तां धर्माधर्मौतथैवच । वर्णाश्रमाणांवार्ताच पाशुपाल्यंवाणिक्कृषिः २३ त्रयीविद्यादण्डनीतिः शुश्रूषादण्डएवच । नतत्रवर्षनद्योवा शीतोष्णञ्चनाविद्यते २४ उद्भिदान्युदकानि स्युर्गिरिप्रस्रवणानिच । तुल्योत्तरकुरूणान्तु कालस्तत्रतुसर्वदा २५ सर्वदःसुखकालोऽसौ जराक्लेशविवर्जितः । सर्गस्तुधातकीखण्डे महावीतेतथैवच २६ एवंद्वीपाःसमुद्रैस्तु सप्तसप्तभिरावृताः । द्वीपस्यानन्तरोयस्तु समुद्रस्तत्समस्तुवै २७ एवंद्वीपसमुद्राणां वृद्धिर्ज्ञेयापरस्परम् । अपाञ्चैवसमुद्रेकात् समुद्रइतिसंज्ञितः २८ ऋषद्वसन्त्योवर्षेषु प्रजायत्रचतुर्विधाः । ऋषिरित्येवरमणे वर्षत्वेतेनतेषुवै २९ उदयतीन्दौपूर्वेतु समुद्रःपूर्यतेसदा । प्रक्षीयमाणेबहुले क्षीयतेऽस्तमितेचवै ३० आपूर्यमाणोह्युदधिरात्मनैवापिपूर्यते । ततोवैक्षीयमाणेतु स्वात्मन्येवह्यपांक्षयः ३१ उदयात्पयसांयोगात् पुष्णन्त्यापोयथास्वयम् । तथासतुसमुद्रोऽपि वर्द्धतेशशिनोदये ३२ अन्यूनानतिरिक्तात्मा वर्द्धन्त्यापोह्सन्तिच । उदयेऽस्तमयेचेन्दोः पक्षयोःशुक्लकृष्णयोः ३३ क्षयवृ

मनोवाञ्छित सिद्धिकी प्राप्ति यहसबसभी पुरुषोंके स्वाभाविकहैं २० इनपिछले तीनद्वीपोंमें सुखरूप और आयु सबके हैं उनपरुषोंमें कोई उत्तम मध्यम और नीचनहीं हैं बल रूपमें सबसमानहैं २१ इसके विशेष वहाँ कोई मरने और मारने वालाभी नहींहै और ईर्षा निन्दा भय लोभ पाखण्ड-द्वेष और संग्रह आदिक भीनहीं हैं २२ सत्य असत्य धर्म अधर्म वर्णाश्रमों का व्यवहार पशुपालता, वणिज और खेती यहसबभीनहीं हैं २३ वेदत्रयी विद्या दंड नीति भी नहीं हैं वहाँ वर्षा नहींहोती नदीभी नहींहै शीतोष्णताकाभी अभावहै २४ वहाँ पर्व्वतोंके झिरनों केही जलहैं उत्तर कुरुदेशके समान सदैव उत्तमकाल बनारहताहै २५ सर्वत्रसुख व्याप्तहै वृद्धावस्था आदिकाभी क्लेशनहीं है इसप्रकारसे धातकी खंड और महावीत खंडकी रचना कही है २६ इसरीतिसे सातोंद्वीप सातोंसमुद्रोंसे वेष्टितहोरहेहैं द्वीपके आगेका समुद्र जितने प्रमाणमें है उतनेही प्रमाणमें अगला द्वीपहै इसीप्रकारसे द्वीपोंकी और समुद्रोंकी परस्पर वृद्धिहैं जलोंके समूहकी वृद्धिहोनेसे समुद्र कहाताहै २७ । २८ इनद्वीपोंके खंडोंमें प्रजा आनन्दसे रमणकरती है और इसीकारणसे वहाँ मेघोंके वर्षनेकी कुछ आवश्यकतानहींहै २९ जब पूर्वमें चन्द्रमा उदय होताहै तब सर्वदा समुद्र पूर्णहोकर उछलताहै जब चन्द्रमा क्षीण होताहै और अस्तहोता है तब समुद्रभी क्षीण होजाताहै ३० उछलताहुआ समुद्र अपनेही जलोंके वेगसे उछलता है जब क्षीणहोताहै तब अपनेहीमें ऐसेक्षीण होजाता है जैसे थोड़ेजलमें बहुत जलोंके मिलनेसे जलको जल आपही पवित्रकरलेताहै इसीप्रकार वहसमुद्रभी चन्द्रोदयके समयमें बढ़ता है ३१ । ३२ शुक्ल और कृष्ण पक्षमें चन्द्रोदयके समय और अस्तहोनेके समय समुद्रमें जल बढ़ता और घटता है परन्तु समुद्रका प्रमाण यथावस्थितही बनारहताहै ३३ चन्द्रमा के बढ़ने घटने के अनुसार समुद्र घटता बढ़ताहै पूर्णिमा और अमावास्याके दिनोंमें समुद्र पन्द्रहसौ १५०० अंगुल

द्धीसमुद्रस्य शशिवृद्धिक्षयेतथा । दशोत्तराणिपञ्चाहुरंगुलानांशतानिच ३४ अपांद्वाद्धिः
क्षयोदृष्टः समुद्राणान्तुपर्वसु । द्विरापत्वात्स्मृतोद्वीपो दधनाच्चोदधिःस्मृतः ३५ अपशी
र्णात्तुगिरयो पर्वबन्धाच्चपर्वताः । शाकद्वीपेतुवैशाकः पर्वतस्तेनचोच्यते ३६ कुशद्वीपे
कुशस्तम्बो मध्येजनपदस्यतु । क्रौञ्चद्वीपेगिरिःक्रौञ्चस्तस्यनाम्नानिगद्यते ३७ शाल्म
लिःशाल्मलद्वीपे पूज्यतेसमहाद्रुमः । गोमेदकेतुगोमेदः पर्वतस्तेनचोच्यते ३८ न्यग्रो
धःपुष्करद्वीपे पद्मवत्तेनसःस्मृतः । पूज्यतेसमहादेवैर्ब्रह्मांशोऽव्यक्तसम्भवः ३९ तस्मिन्
सवसतिब्रह्मा साध्यैःसार्द्धंप्रजापतिः । तत्रदेवाउपासन्ते त्रयस्त्रिंशन्महर्षिभिः ४० सत
त्रपूज्यतेदेवो देवैर्महर्षिसत्तमैः । जम्बूद्वीपात्प्रवर्तन्ते रत्नानिविविधानिच ४१ द्वीपेषुतेषु
सर्वेषु प्रजानांक्रमशस्तुवै । आर्जवाद्ब्रह्मचर्येण सत्येनचदमेनच ४२ आरोग्यायुःप्रमा
णाभ्यां द्विगुणंद्विगुणंततः । द्वीपेषुतेषुसर्वेषु यथोक्तंवर्षकेषुच ४३ गोपायन्तेप्रजास्तत्रस
र्वैः सहजपण्डितैः । भोजनञ्चाप्रयत्नेन सदास्वयमुपस्थितम् ४४ षड्रसंतन्महावीर्यं तत्रते
भुञ्जतेजनाः । परेणपुष्करस्याथ आवृत्यावस्थितोमहान् ४५ स्वादूदकसमुद्रस्तु सस
मन्तादवेष्टयत् । स्वादूदकस्यपरितः शैलस्तुपरिमण्डलः ४६ प्रकाशश्चाप्रकाशश्च लो
कालोकःसउच्यते। आलोकस्तत्रचार्वाक्च निरालोकस्ततःपरम् ४७ लोकविस्तारमात्रन्तु
पृथिव्यार्द्धन्तुबाह्यतः । प्रतिच्छन्नंसमन्तात्तु उदकेनावृतंमहत् ४८ भूमेर्दशगुणाश्चापःस

बढ़ता और घटता है दोसमुद्रोंके मध्यमें स्थितहोनेवाला द्वीप कहाता है द्वीपकेही धारण करनेसे समुद्रको
उदधि कहते हैं ३४ । ३५ जोकि पर्व्वत जलादिकोंमें गलते नहीं हैं इसीसे उनकानाम गिरि
बोलाजाता है उनकी पर्व अर्थात् सन्धि बंधीरहती है इसहेतुसे पर्व्वत कहाते हैं शाकद्वीपमें शाकनाम
पर्व्वत है इसहेतुसे उसको शाकद्वीप कहते हैं ३६ कुशद्वीपके मध्यमें कुशाकास्तंभहै इसकारण कुशद्वीप
कहाताहै क्रौंचद्वीपमें क्रौंचनामवाला पर्व्वतहै ३७ शाल्मलद्वीपमें महा उत्तम संभलका वृक्ष
पूजाजाता है गोमेदद्वीप सें गोमेदनाम पर्व्वत है ३८ पुष्कर द्वीपमें बटका वृक्षहै और कमलोंके पुष्पहैं
वहवृक्ष ब्रह्माके अंशसे उत्पन्न हुआहै उसको सबदेवता पूजते हैं ३९ उसपुष्करद्वीप में साध्य संज्ञक
देवताओं समेत प्रजापति ब्रह्मा बसते हैं और ब्रह्मर्षियों समेत तेंतीस देवता उनकी उपासना किया
करते हैं ४० सबदेवता ब्रह्माजीकी पूजाकरते हैं जंबूद्वीपमें अनेक प्रकारके रत्न उत्पन्नहोते हैं इनसब
द्वीपोंमें प्रजाकी सरलता-ब्रह्मचर्य्यता-सत्यता-इन्द्रियोंकी निग्रहता ४१।४२ नीरोगता और आयुकी
दीर्घता सेदूनी २ वृद्धिहोती गईहै उनसब खंडोंके द्वीपोंमें स्वाभाविक पंडितजन प्रजाकी रक्षाकरते
हैं उनसबको बिनाही यत्नके अपने आप भोजनकी प्राप्तिहोती है ४३।४४ वहाँके बसनेवाले मनुष्य
षट्रस भोजनकरते हैं और पुष्करद्वीपसे परे महासुन्दर स्वादु युक्त जलका समुद्र वेष्टित होरहा है
उसी समुद्रके पीछे चारोंओर लोकालोक पर्व्वतहै वहकहीं प्रकाशितहै और कहीं अप्रकाशितहै उसके
पूर्व्व की ओर आलोक पर्व्वत है उससे परे निरालोक पर्व्वतहै ४५। ४७ उस पर्व्वतकी पृथ्वी लोक
के विस्तार के समान है इस पर्व्वतका आधाभाग तो पृथ्वीसे बाहर स्थितहै और चारों ओरको जल

मन्तान्पालयन्तिगाम्। अद्भ्योदशगुणश्चाग्निः सर्वतोधारयत्यपः ४९ अग्नेर्दशगुणोवा
युर्धास्यम् ज्योतिरास्थितः। तिर्य्यक्चमण्डलोवायुर्भूतांन्यावेष्टयधारयन् ५० दशाधिकं
तथाकाशं वायोर्भूतान्यधारयत्। भूतादिधारयन्व्योम तस्माद्दशगुणस्तुवै ५१ भूतादि
तोदशगुणं महद्भूतान्यधारयत्। महत्तत्त्वंह्यनन्तेन अव्यक्तेनतुधार्य्यते ५२ आधाराधेय
भावेन विकारास्तेविकारिणाम् ५३ पृथ्व्यादयोविकारास्ते परिच्छिन्नाःपरस्परम्। परस्प
राधिकाश्चैव प्रविष्टाश्चपरस्परम् ५४ एवंपरस्परोत्पन्ना धार्य्यन्तेचपरस्परम्। यस्मात्
प्रविष्टास्तेऽन्योन्यं तस्मात्तेस्थिरतांगताः। आसंस्तेह्यविशेषाश्च विशेषाअन्यवेशनात्
५५ पृथ्व्यादयस्तुवाय्वन्ताः परिच्छिन्नास्तुतत्रते। भूतेभ्यःपरतस्तेभ्यो ह्यलोकःसर्वतः
स्मृतः ५६ तथाह्यालोकआकाशे परिच्छिन्नानिसर्वशः। पात्रेमहतिपत्राणि यथाह्यन्तग
तानिच ५७ भवन्त्यन्योन्यहीनानि परस्परसमाश्रयात्। तथाह्यालोकआकाशे भेदास्त्व
न्तर्गतागताः ५८ कृतान्येतानितत्त्वानि अन्योन्यस्याधिकानितु। यावदेतानितत्त्वानि
तावदुत्पत्तिरुच्यते ५९ जन्तूनामिहसंस्कारो भूतेष्वन्तर्गतेषुवै। प्रत्याख्यायेहभूतानि
कार्य्योत्पत्तिर्नविद्यते ६० तस्मात्परिमिताभेदाः स्मृताःकार्य्यात्मकास्तुवै। तेकारणात्मका

में डूबरहाहै ४८ पृथ्वीसे दशगुना जलहै वह सब ओरसे पृथ्वी की रक्षा करताहै जलोंसे दशगुणित
अग्निहै वह सबओरसे जलको धारण कररहा है ४९ अग्निसे दशगुणित वायुहै वह अग्निको धारण
करता हुआ स्थित होरहा है वायु मंडलमें तिरछा प्राप्त होकर भूतोंको वेष्टित करके धारण करताहै
५० वायुसे दशगुणा आकाश भूतोंको धारण कररहा है उस आकाशसे दशगुणा महाआकाश है वह
महत्तत्त्वादिकों को धारण करता हुआ स्थितहै और महत्तत्त्वको अनन्त अव्यक्त अर्थात् माया धारण
कर रही है विकारी अर्थात् सब प्राणियों के आधाराधेय भाव करके वहसब महत्तत्त्वादिक विकारी
कहे जातेहैं ५१।५३ पृथिव्यादिक विकार परस्पर परिच्छिन्न अर्थात् ढकेहुए रहते हैं आपसमें अधिक
हुए विकार आपसही में मिलेहुए रहते हैं इसप्रकार से आपसमें उत्पन्न हुए महत्तत्त्वादिक विकार
परस्परमेंही धारणा को प्राप्त होरहे हैं जोकि वहसब भूतादिक आपसमें प्रविष्ट होरहे हैं इसी हेतु से
वह स्थिरताको प्राप्त होगये हैं वह भूतादिक जुदे २ तो विशेष रहित हैं परन्तु अन्यके मिलजाने से
विशेष सहित दिखाई पड़ते हैं ५४।५५ पृथिव्यादिक महाभूत जहां मिलेहुए रहते हैं वहां सब दृश्यमान
कार्य्य हैं जहां इन महाभूतोंका अभावहै वहां सर्वत्र अलोक है अर्थात् कोई संसारमात्र नहीं
है ५६ सबभूतादिक महाआकाश में ऐसे परिच्छिन्न होरहे हैं जैसेकि बड़ेपात्रमें छोटेपात्र घुलरहे हों
५७ सबभूत आपसमें एक दूसरे की अपेक्षा रखते हैं इस निमित्त अन्योन्यहीन हैं महाआकाश के
अन्तर्गत इन महाभूतोंके अनेक भेद कहे हैं ५८ और अन्योन्य अधिक पंचीकरणहोने से पांचों तत्त्व
अलग २ दीखते हैं जबतक तत्त्व रहते हैं तभीतक संसारकी उत्पत्ति कही है सब जीवमात्रों का
संस्कार पंचभूतों के अन्तर्गत है इन भूतों के खंडन होनेमें कार्य्य की उत्पत्ति नहीं होती है ५९।६०
इस हेतुसे यह परिमित भेद कार्य्यात्मक कहेजाते हैं और इनके सूक्ष्म महदादिक कारणात्मक बोले

श्चैव स्युर्भेदामहदादयः ६१ इत्येवंसान्निवेशोयं पृथ्व्याक्रान्तस्तुभागशः। सप्तद्वीपस्समुद्रा
णां याथातथ्येनवैमया ६२ विस्तारान्मण्डलाच्चैव प्रसंख्यानेनचैवहि। विश्वरूपंप्रधान
स्यपरिमाणैकदेशिनः ६३ एतावत्सान्निवेशस्तु मयासम्यक्प्रकाशितः ६४ एतावदेवश्रो
तव्यं सन्निवेशस्यपार्थिव!। अतऊर्ध्वंप्रवक्ष्यामि सूर्य्याचन्द्रमसोर्गतिम् ६५॥

इतिश्रीमत्स्यपुराणे द्वाविंशत्यधिकशततमोऽध्यायः १२२॥

(सूतउवाच) अतऊर्ध्वंप्रवक्ष्यामि सूर्य्याचन्द्रमसोर्गतिम्। सूर्य्याचन्द्रमसावेतौ
भ्राजन्तौयावदेवतु १ सप्तद्वीपसमुद्राणां द्वीपानांभातिविस्तरः। विस्तरार्द्धंपृथिव्यास्तु
भवेदन्यत्रबाह्यतः २ पर्यासपरिमाणञ्च चन्द्रादित्यौप्रकाशतः। पर्यासपारिमाण्यात्तु बु
धैस्तुल्यंदिवःस्मृतम् ३ त्रीन्लोकान्प्रतिसामान्यात् सूर्य्योयात्यविलम्बतः। अचिरा
त्तुप्रकाशेन अवनात्तुरविःस्मृतः ४ भूयोभूयःप्रवक्ष्यामि प्रमाणंचंद्रसूर्य्ययोः। महितत्वा
न्महच्छब्दो ह्यस्मिन्नर्थेनिगद्यते ५ अस्यभारतवर्षस्य विष्कम्भात्तुल्यविस्तृतम्। म
ण्डलंभास्करस्याथ योजनैस्तन्निबोधत ६ नवयोजनसाहस्रो विस्तारोमण्डलस्यतु।
विस्तारात्त्रिगुणश्चापि परिणाहोऽत्रमण्डले ७ विष्कम्भान्मण्डलाच्चैव भास्कराद्द्वि
गुणःशशी। अतःपृथिव्यावक्ष्यामि प्रमाणंयोजनैःपुनः ८ सप्तद्वीपसमुद्रायाविस्तारो
मण्डलस्यतु। इत्येतादिहसंख्यातं पुराणेपरिमाणतः ९ तद्वक्ष्यामिप्रसंख्याय साम्प्रत
श्चाभिमानिभिः। अभिमानिनोह्यतीताये तुल्यास्तेसाम्प्रतैस्त्विह १० देवदेवैरतीता

जाते हैं ६१ इसप्रकार करके पृथ्वी समेत सातों समुद्रों का भेद यथार्थ विधिसे मंडल के विस्तार
और संख्याके प्रमाणसे कह दियाहै प्रधान अर्थात् मायासहित ब्रह्मका यह विश्वरूप है यह इतना
सन्निवेश मैंने प्रकाश किया है हे राजन् इतनाही सन्निवेश सुनना योग्य है ६२।६५॥

इतिश्रीमत्स्यपुराणभाषाटीकायांद्वाविंशत्यधिकशततमोऽध्यायः १२२॥

सूतजी बोले हे ऋषियो अबमैं सूर्य्य और चन्द्रमाकी गतिको अपनी मतिके अनुसार वर्णनकरता
हूं जितने स्थानमें सूर्य्य और चन्द्रमाका प्रकाश होरहा है और सदैव होताहै उतनेही विस्तार में
सातोंद्वीप और सातों समुद्रोंका विस्तार प्रकाशित होरहा है पृथ्वीका आधाविस्तार अन्यत्र बाहरकी
ओर प्रकाशित नहीं है १।२ पृथ्वी के मंडलके प्रमाणमें सूर्य्य चन्द्रमा अपना प्रकाश करते हैं बु-
द्धिमान् पुरुषों ने पृथ्वी के मंडलके समान स्वर्गका भी मंडल कहाहै ३ सूर्य्य तीनों लोकोंमें शी-
घ्रही प्रकाश करता है इन सूर्य्यनारायणको शीघ्र प्रकाश करके सबकी रक्षा करनेसे रवि कहते हैं ४
वारंवार इन दोनों सूर्य्य चन्द्रमाके प्रमाणको कहेंगे इनका बड़ा प्रमाण होने से इनके प्रमाण
में महच्छब्द कहाहै इस भारतखंडके मंडल प्रमाणके तुल्य सूर्य्य मंडल कहाहै अर्थात् सूर्य्य मंडल
की लम्बाई नवहज़ार योजनमें है इस्से त्रिगुणित गुलाई कही है ५।७ भारतखंडके मंडलसे और
सूर्य्यके मंडलसे चन्द्रमा दूनाहै और पृथ्वी मंडलके योजन फिर कहेंगे ८ सातों द्वीपों समेत समुद्रों-
वाली पृथ्वीकेमंडलके प्रमाणकी संख्या पुराणोंमें पृथ्वी के वर्त्तमान और व्यतीत अभिमानी देवताओं

स्तु रूपैर्नामभिरेवच। तस्माद्दैसाम्प्रतैर्देवैर्वक्ष्यामिवसुधातलम् ११ दिव्यस्यसन्निवेशो
वै साम्प्रतैरेवकृत्स्नशः। शतार्द्धकोटिविस्तारा पृथिवीकृत्स्नशःस्मृता १२ तस्याश्चार्द्ध
प्रमाणञ्च मेरोश्चैवोत्तरोत्तरम्। मेरोर्मध्येप्रतिदिशं कोटिरेकातुसास्मृता १३ तथाशतस
हस्राणामेकोननवतिंपुनः। पञ्चाशच्चसहस्राणि पृथिव्यर्द्धस्यविस्तरः १४ पृथिव्याविस्त
रंकृत्स्नं योजनैस्तन्निबोधत। तिस्रःकोट्यस्तुविस्तारात् संख्यातास्तुचतुर्दिशम् १५ त
थाशतसहस्राणामेकोनाशीतिरुच्यते। सप्तद्वीपसमुद्रायाः पृथिव्याःसतुविस्तरः १६ वि
स्तारंत्रिगुणञ्चैव पृथिव्यन्तरमण्डलम्। गणितंयोजनानांतु कोट्यस्त्वेकादशस्मृताः १७
तथाशतसहस्राणां सप्तत्रिंशाधिकास्तुताः। इत्येतद्वैप्रसंख्यातं पृथिव्यन्तरमण्डलम् १८
तारकासन्निवेशस्य दिवियावत्तुमण्डलम्। पर्य्याप्तसन्निवेशस्य भूमेस्तावत्तुमण्डलम् १९
पर्य्यासपरिमाणञ्च भूमेस्तुल्यंदिवःस्मृतम्। मेरोःप्राच्यांदिशायांतु मानसोत्तरमूर्द्धनि २०
वस्त्वेकसारामाहेंद्री पुण्याहेमपरिष्कृता। दक्षिणेनपुनर्मेरोर्मानसस्यतुपृष्ठतः २१ वैवस्व
तोनिवसति यमःसंयमनेपुरे। प्रतीच्यांतुपुनर्मेरोर्मानसस्यतुमूर्द्धनि २२ सुषानामपुरीर
म्यावरुणस्यापिधीमतः। दिश्युत्तरायांमेरोस्तु मानसस्यैवमूर्द्धनि २३ तुल्यामहेन्द्रपुर्या
पि सोमस्यापिविभावरी। मानसोत्तरपृष्ठेतु लोकपालाश्चतुर्दिशम् २४ स्थिताधर्म्म
व्यवस्थार्थं लोकसंरक्षणायच। लोकपालोपरिष्टात्तु सर्वतोदक्षिणायने २५ काष्ठागतस्य
सूर्य्यस्य गातिस्तत्रानिबोधत। दक्षिणोपक्रमेसूर्य्यः क्षिप्तेषुरिवसर्पति २६ ज्योतिषाञ्चक्र

के समान कहीहै ९।१० रूपनामादिकों करके सब देवता समान हैं इस हेतुसे वर्त्तमान देवताओं के
प्रमाणसे पृथ्वीतलको वर्णन करते हैं ११ पृथ्वीतलका विस्तार सब ओर से पचास किरोड़है १२
इस पृथ्वीका अर्द्धभाग सुमेरु पर्व्वतके उत्तरोत्तर है सुमेरुपर्व्वतके नीचे चारोंओर से दबीहुई पृथ्वी
एक किरोड़ योजन कही है और नवासी ८९ लाख पचास हज़ार कोसों में पृथ्वी के अर्द्धमंडलका
प्रमाण कहाहै अब सम्पूर्ण पृथ्वी के योजन के प्रमाण को कहते हैं चारोंओर की पृथ्वीका प्रमाण
तीन किरोड़ उनासी लाख ३७९००००० योजन है यह सातोंद्वीप और समुद्रों समेत सब पृथ्वी
की लम्बाई का प्रमाण है १३।१६ इससे त्रिगुना प्रमाण पृथ्वी के मध्यवर्त्ती भीतरके मंडलका है
जिसकी संख्या ग्यारह किरोड़ और सैंतीस लाखहै यह पृथ्वी के भीतरको प्रमाण कहा १७।१८
स्वर्गके बीच जितने स्थलमें नक्षत्रों की स्थितिहै उस सम्पूर्णमंडलके समान पृथ्वीका मंडल जानो
और पृथ्वी के चारोंओरको जितना आकाशहै उतनेही प्रमाणमें स्वर्ग कहाहै सुमेरु की पूर्व्वदिशामें
मानसोत्तर पर्व्वतपर एकसारानाम महेन्द्रकी पुरी है वह सुवर्णसे भूषितहै सुमेरु से दक्षिण मानस
पर्व्वतकी पीठपर धर्मराजकी संयमनीनाम पुरी है वहां धर्मराज वासकरते हैं सुमेरु से पश्चिम मानसपर्व्वतके मस्तकपर महेन्द्र की पुरीके समान विभावरीनाम चंद्रमाकीपुरीहै और मानस पर्व्वत
के उत्तरकीओर मस्तकपर चारों दिशाओं में लोकपालहैं वह सब धर्म की व्यवस्थावाले लोकपाल
सबलोकों की रक्षाके निमित्त स्थित होरहे हैं उन लोकपालों के ऊपर स्थित होनेवाले दक्षिणायन

मादाय सततंपरिगच्छति। मध्यगश्चामरावत्यां यदाभवतिभास्करः २७ वैवस्वतेसंयमने
उद्यन्सूर्य्यःप्रदृश्यते । सुषायामर्द्धरात्रस्तु विभावर्यास्तमेतिच २८ वैवस्वतेसंयमनेमध्या
ह्नेतुरविर्यदा। सुषायामथवारुण्यामुत्तिष्ठन्सतुदृश्यते २९ विभावर्यामर्द्धरात्रं माहेन्द्र्या
मस्तमेवच। सुषायामथवारुण्यां मध्याह्नेतुरविर्यदा ३० विभावर्य्यांसोमपुर्य्यां उत्तिष्ठति
विभावसुः । महेन्द्रस्यामरावत्यामुद्गच्छतिदिवाकरः ३१ अर्द्धरात्रंसंयमने वारुण्यामस्त
मेतिच। सशीघ्रमेवपर्येति भानुरालातचक्रवत् ३२ भ्रमन्वैभ्रममाणानि ऋक्षाणिचरते
रविः । एवंचतुर्षुपार्श्वेषु दक्षिणांतेषुसर्पति ३३ उदयास्तमयेवासावुत्तिष्ठतिपुनःपुनः ।
पूर्वाह्णेचापराह्णेचद्वौद्वौदेवालयौतुसः ३४ पतत्येकन्तुमध्याह्ने भाभिरेवचरश्मिभिः। उदि
तोवर्द्धमानाभिर्मध्याह्नेतपतेरविः ३५ अतःपरंह्रसन्तीभिर्गोभिरस्तंसगच्छति। उदयास्त
मयाभ्यांचस्मृतेपूर्वापरेतुवै ३६ यादृक्पुरस्तात्तपति तादृक्पृष्ठेतुपार्श्वयोः । यत्रोदय
स्तुदृश्येत तेषांसउदयःस्मृतः ३७ प्रणाशंगच्छतेयत्र तेषामस्तःसउच्यते। सर्वेषामुत्तरे
मेरुर्लोकालोकस्यदक्षिणे ३८ विदूरभावादर्कस्य भूमेरेषागतस्यच। अयन्तेरश्मयोयस्मा
त्तेनरात्रौनदृश्यते ३९ ऊर्ध्वंशतसहस्रांशुः स्थितस्तत्रप्रदृश्यते। एवंपुष्करमध्येतु यदाभ

सूर्य्य की गतिसुनो यह दक्षिणायन सूर्य्य छूटेहुए बाणके समान शीघ्रगतिसे चलते हैं १९।२६ यह
अपनी ज्योतियों के चक्रको लेकर सदैव अहर्निश गमन करता है जब इन्द्र की अमरावती पुरी के
मध्यमें सूर्य्य आताहै तब धर्मराजकी संयमनीपुरी में उदय होताहुआ दीखता है और सुषापुरी में
अर्द्धरात्रिहोती है निभावरी में अस्तहोताहै २७।२८ जब धर्मराजकी संयमनी पुरी में मध्याह्नहोताहै
तबवरुणकी सुषा पुरीमें उदयहोता दीखताहै जब विभावरी में अर्द्धरात्रिहोती है तब इन्द्रकी पुरी में
अस्तहोताहै जिस समयवरुणकी सुषापुरी में मध्याह्न होताहै उससमय चन्द्रमाकी विभावरी पुरी
में उदयहोताहै औरइन्द्रकी अमरावतीपुरी में जबसूर्य्य उदयहोताहै तब धर्मराजके संयमनपुरमें अर्द्ध-
रात्रि होतीहै और वरुणकी पुरीमें अस्त होताहै इसप्रकार आलातचक्र अर्थात् जलतेहुए काष्ठादिकके
समान शीघ्रही सब स्थानोंमें प्राप्तहोताहै २९। ३२ भ्रमताहुआ सूर्य्यभ्रमतेहुए नक्षत्रोंको प्राप्तहोताहै
ऐसे दक्षिणके अन्तवाले चारों कोणोंमें सूर्य्य प्राप्तहोताहै ३३ अथवा उदयाचल पर्वतपर यह वारं-
वार उदयहोताहै औरपूर्वाह्न तथा अपराह्न में दो२ देवताओं के स्थानमें प्राप्तहोताहै एकदेवताकी पुरी
में किरणों से प्रातःकाल के समय प्राप्तहोकर उदयसमयमें और मध्याह्न समयमें सूर्य्य अपनीबढ़ती
हुई किरणोंसे तपताहै ३४।३५ मध्याह्नके पीछेघटतीहुई किरणों से गमन करताहुआ अस्तहोताहै
उदय और अस्तके पूर्व और पश्चात्को पूर्व और अपर कहते हैं ३६ जैसे सूर्य्य आगे और पठिकी ओर
तपताहै वैसेही बराबरमें भी तपताहै जहाँ उदयहोता दीखताहै वहांका वही उदय होताहै और जहां
छिपजाताहै वही उनका अस्तकहाताहै सबसे उत्तरमें सुमेरुपर्वतहै लोकालोक पर्वतके दक्षिणकी
ओर सूर्य्यदूरचलाजाताहै तब भूमिकी रेखाआड़ी आजातीहैं वहाँसूर्य्यकी किरणें बन्दहोजाती हैं इसी
हेतुसे रात्रिमें नहींदीखताहै ३७।३९ अपने२ देशकेऊपर स्थितहुआ सूर्य्यदिखाईपड़ताहै इसीसे जब

वत्तिभास्करः ४० त्रिंशद्भागञ्चमेदिन्या मुहूर्त्तेनसगच्छति। योजनानांसहस्रस्य इमांसंख्यांनिबोधत ४१ पूर्णंशतसहस्राणामे कत्रिंशच्चसास्मृता। पञ्चाशच्चसहस्राणि तथान्यान्यधिकानिच ४२ मौहूर्त्तिकीगतिर्ह्येषा सूर्य्यस्यतुविधीयते। एतेनक्रमयोगेन यदाकाष्ठान्तुदक्षिणाम् ४३ परिगच्छतिसूर्य्योऽसौ मासंकाष्ठामुदक्दिनात्। मध्येनपुष्करस्याथ भ्रमते दक्षिणायने ४४ मानसोत्तरमेरोस्तु अन्तरंत्रिगुणंस्मृतम्। सर्वतोदक्षिणायान्तु काष्ठायांतन्निबोधत ४५ नवकोट्यःप्रसंख्याता योजनैःपरिमण्डलम्। तथाशतसहस्राणि चत्वारिंशच्चपञ्चच ४६ अहोरात्रात्पतङ्गस्य गतिरेषाविधीयते। दक्षिणादिङ्निवृत्तोऽसौ विषुवस्थोयदारविः ४७ क्षीरोदस्यसमुद्रस्योत्तरतोऽपिदिशंचरन्। मण्डलंविषुवच्चापि योजनैस्तन्निबोधत ४८ तिस्रःकोट्यस्तुसम्पूर्णा विषुवस्यापिमण्डलम्। तथाशतसहस्राणि विंशत्येकाधिकानितु ४९ श्रावणेचोत्तरांकाष्ठां चित्रभानुर्यदाभवेत्। गोमेदस्यपरद्वीपे उत्तराञ्चदिशंचरन् ५० उत्तरायाःप्रमाणन्तु काष्ठायामण्डलस्यतु। दक्षिणोत्तरमध्यानि तानिविन्द्याद्यथाक्रमम् ५१ स्थानंजरद्गवंमध्ये तथैरावतमुत्तरम्। वैश्वानरंदक्षिणतो निर्दिष्टमिहतत्त्वतः ५२ नागवीथ्युत्तरावीथी ह्यजवीथिस्तुदक्षिणा। उभेआषाढमूलंतु अजवीथ्यादयस्त्रयः ५३ अभिजित्पूर्वतःस्वाति न्नागवीथ्युत्तरास्त्रयः। अश्विनीकृत्तिकायाम्या नागवीथ्यस्त्रयःस्मृताः ५४ रोहिण्यार्द्राम्मृगशिरो नागवीथिरितिस्मृता। पुष्याश्लेषापुनर्वस्वोर्वीथीचैरावतीस्मृता ५५ तिस्रस्तुवीथयोह्येता उत्तरामार्गउच्य

पुष्कर द्वीपके मध्यमें सूर्य्य प्राप्तहोताहै तब एक मुहूर्त्त में पृथ्वीके तीसवें भागमें गमनकरजाताहै उसके योजनोंकी संख्या इकतीसलाख पचासहज़ार से भी कुछ अधिक है ४० । ४२ यह सूर्य्य की दो घडी की गतिहै इस क्रमयोगसे दक्षिण दिशामें सदा गमन करताहै एक महीनेमें उत्तर दिशामें प्राप्त होताहै पुष्कर द्वीपको मध्यमें करके दक्षिणायन में भ्रमताहै ४३ । ४४ मानसोत्तर मेरु पर्व्वतके अन्तर्गत त्रिगुणित भ्रमताहै जबसे दक्षिणायन आताहै तबसे १ किरोड़ पैंतालीसलाख योजन मंडलमें सूर्यकी गति एक दिनरातमें होती है जब दक्षिणायनसे निवृत्त होकर समान अयनमें अर्थात् रात्रि दिन समान होनेपर क्षीरसागरसे उत्तर दिशाकी ओर सूर्य्य की गतिहोतीहै उसको विषुव संज्ञक मंडल कहते हैं ४५। ४८ विषुव संज्ञक समयमें तीनकिरोड इक्कीसलाख योजनमें सूर्य्य प्राप्तहोताहै ४९ श्रावणके महीने में चित्रभानु सूर्य्य उत्तरदिशामें गोमेद द्वीपसे परले पुष्कर द्वीपकी उत्तर दिशामें प्राप्त होताहै ५० उत्तर दिशाके मंडलका और दक्षिण दिशाका तथा मध्यका प्रमाण क्रमपूर्व्वक जानलेना मध्यमें जरद्गवनाम स्थानहै उत्तरमें ऐरावतनाम स्थानहै औरदक्षिणमें वैश्वानर स्थान कहाजाताहै ५१।५२ नागवीथी उत्तरावीथीहै अजवीथी दक्षिणावीथीहै पूर्वा उत्तराषाढ़ और मूल यहतीनों अजवीथी कहातीहै ५३ अभिजित्का पूर्वार्द्ध स्वाति और तीनों उत्तरा यह नागवीथी कहातीहै अश्विनी भरणी और कृत्तिका यहतीनोंभी नागवीथी कहातीहै ५४ रोहिणी, आर्द्रा और मृगशिर इन तीनोंको भी नागवीथी कहते हैं और पुष्य श्लेषा और पुनर्वसु जब इन नक्षत्रों पर सूर्य्य आताहै तब ऐरा

ते। पूर्वोत्तरफल्गुन्यौ मघाश्चैवार्षभीभवेत् ५६ पूर्वोत्तरप्रोष्ठपदौ गोवीथीरेवतीस्मृता ।
श्रवणाश्च धनिष्ठाच्च बारुणञ्च जरद्गवम् ५७ एतास्तुवीथयस्तिस्रो मध्यमोमार्गउच्यते ।
हस्तश्चित्रातथास्वाती ह्यजवीथिरिति स्मृता ५८ ज्येष्ठाविशाखामैत्रञ्च मृगवीथीतथोच्यते।
मूलंपूर्वोत्तराषाढे वीथीवैश्वानरीभवेत् ५९ स्मृतास्तिस्रस्तुवीथ्यास्ता मार्गेवैदक्षिणेपुनः।
काष्ठयोरन्तरञ्चैतद्वक्ष्यतेयोजनैःपुनः ६० एतच्छतसहस्राणा मेकत्रिंशत्तुवैस्मृतम्। श
तानित्रीणिचान्यानि त्रयस्त्रिंशत्तथैवच ६१ काष्ठयोरंतरंह्येतद्योजनानांप्रकीर्त्तितम् । का
ष्ठयोर्लेखयोश्चैव अयनेदक्षिणोत्तरे ६२ तेवक्ष्यामिप्रसंख्याय योजनैस्तुनिबोधत । एकै
कमंतरंतद्वै युक्तान्येतानिसप्तभिः ६२ सहस्रेणातिरिक्ताचततोऽन्यापञ्चविंशतिः । लेख
योःकाष्ठयोश्चैव बाह्याभ्यंतरयोश्चरन् ६४ अभ्यन्तरंसपर्येति मण्डलान्युत्तरायणे। बाह्य
तोदक्षिणेचैव सततंसूर्य्यमण्डलम् ६५ चरन्नसावुदीच्याञ्च ह्यशीत्यामण्डलान्शतम् ।
अभ्यंतरंसपर्येति क्रमतेमण्डलानितु ६६ प्रमाणंमण्डलस्यापि योजनानान्निबोधत ।
योजनानांसहस्राणि दशचाष्टौतथास्मृतम् ६७ अधिकान्यष्टपञ्चाशद्योजनानतुवैपुनः।वि
ष्कम्भोमण्डलस्यैव तिर्यक्सतुविधीयते ६८ अहस्तुचरतेनाभेः सूर्य्योवैमण्डलंक्रमात् ।
कुलालचक्रपर्यन्तो यथाचन्द्रोरविस्तथा ६९ दक्षिणेचक्रवत्सूर्यस्तथाशीघ्रंनिवर्त्तते ।
तस्मात्प्रकृष्टांभूमिंतु कालेनाल्पेनगच्छति ७० सूर्य्योद्वादशभिःशीघ्रं मुहूर्त्तैर्दक्षिणायने।

वती वीथीहोतीहै ५५ इनतीनों बीथियोंमें सूर्य्यका उत्तरमार्ग कहाताहै पूर्वा, उत्तराफाल्गुनी और मघा नवइनपर सूर्य्य होताहै तब आर्षभी वीथी होजातीहै ५६ पूर्व्वा, उत्तराभाद्रपद और रेवती यह गोवीथीहै श्रवण, धनिष्ठा और शतभिषा इनकी जरद्गवनाम वीथीहै ५७ यहतीनों वीथी सूर्य्यका मध्यममार्ग कहाती हैं हस्त चित्रा और स्वाती यह अजवीथीहै ज्येष्ठा बिशाखा और अनुराधा यहमृगवीथी कहातीहै मूल, पूर्व्वाषाढ और उत्तराषाढ यह वैश्वानरी वीथीहै ५८ । ५९ यहतीनों वीथी सूर्य्यके दक्षिणमार्गकी कही हैं इनदिशाओंके अन्तरके योजनोंको कहते हैं ६० सूर्य्यकी दक्षिण उत्तर दिशाओंका अन्तर इकतीसलाख तेंतीससौ योजनकाहै इसको दक्षिणायन और उत्तरायणका अन्तर जानना ६१ । ६२ अब दक्षिणायन और उत्तरायण दिशाओंकी रेखाके योजनोंको कहताहूं उसको श्रवणकरो पृथक् २ अन्तरवाली सातरेखाहैं उनमें हरएक रेखा चौबीसहजार योजनके अन्तर से जानना रेखाके और दिशाके बाहर भीतर गमन करताहुआ सूर्य्य उत्तरायणमें तो भीतरको मंडल करताहै और दक्षिणायनहोनेपर निरन्तर रेखासे बाहर गमन करताहै ६३ । ६५ उत्तरायणमें गमन करताहुआ सूर्य्य ८००० मंडलोंको प्राप्त होताहै और मंडलोंपर चलताहुआ भीतरकी ओर प्राप्त होताहै ६६ मंडलोंके योजनोंका यह परिमाणहै कि अठारहहज़ार अट्ठावन योजनका एकमंडल होता है मंडलका स्तंभ तिरछा कहाहै ६७ । ६८ सूर्य्य नाभिके क्रमसे दिनमें मंडलको प्राप्त होताहै जैसाकि कुम्हारका चक्रचलताहै इसी प्रकार सूर्य्य और चन्द्रमा चलतेहैं अर्थात् घूमतेहैं ६९ दक्षिणायन में सूर्य्य चक्र के समान शीघ्रता से निवृत्त होजाता है इस निमित्त बहुतसी भूमिको थोड़ेही

त्रयोदशचऋक्षाणां मध्येचरतिमण्डलम् ७१ मुहूर्त्तैस्तानिऋक्षाणि नक्तमष्टादशैश्च
रन्। कुलालचक्रमध्यस्थोयथामन्दंप्रसर्पति ७२ उदग्यानेतथासूर्य्यः सर्पतेमन्दविक्रमः।
तस्माद्दीर्घेणकालेन भूमिंसोऽल्पांप्रसर्पति ७३ सूर्य्योऽष्टादशभिरह्नोमुहूर्तैरुदगायने।
त्रयोदशानांमध्येतु ऋक्षाणांचरतेरविः। मुहूर्तैस्तानिऋक्षाणि रात्रौद्वादशभिश्चरन् ७४
ततोमन्दतरंताभ्यां चक्रन्तुभ्रमतेपुनः। मृत्पिण्डइवमध्यस्थो भ्रमतेऽसौध्रुवस्तथा ७५
मुहूर्त्तैस्त्रिंशतातावदहोरात्रंध्रुवोभ्रमन् । उभयोःकाष्ठयोर्मध्ये भ्रमतेमण्डलानितु ७६
उत्तरक्रमणेऽर्कस्य दिवामन्दगतिःस्मृता । तस्यैवतुपुनर्नक्तं शीघ्रासूर्य्यस्यवैगतिः ७७
दक्षिणप्रक्रमेवापि दिवाशीघ्रंविधीयते। गतिःसूर्य्यस्यवैनक्तंमन्दाचापिविधीयते ७८ एवं
गतिविशेषेण विभजन्रात्र्यहानितु। अजवीथ्यांदक्षिणायां लोकालोकस्यचोत्तरम् ७९
लोकसन्तानतोह्येषवैश्वानरपथाद्बहिः। व्युष्टिर्यावत्प्रभासौरी पुष्करात्संप्रवर्त्तते ८०
पार्श्वेभ्योबाह्यतस्तावल्लोकालोकश्चपर्वतः । योजनानांसहस्राणि दशोर्ध्वंचोच्छ्रितोगि
रिः ८१ प्रकाशश्चाप्रकाशश्च पर्वतःपरिमण्डलः । नक्षत्रचन्द्रसूर्याश्च ग्रहास्तारागणैः
सह ८२ अभ्यन्तरेप्रकाशन्ते लोकालोकस्यवैगिरेः । एतावानेवलोकस्तु निरालोकस्त
तःपरम् ८३ लोकआलोकनेधातुर्निरालोकस्त्वलोकता । लोकालोकौतुसन्धत्ते तस्मा
त्सूर्यःपरिभ्रमन् ८४ तस्मात्सन्ध्येतितामाहु रुषाव्युष्टैर्यथान्तरम्। उषारात्रिःस्मृताविप्रै

काल में उल्लंघन करजाता है ७० अर्थात् दक्षिणायन में बहुत शीघ्रता पूर्वक सूर्य्य बारह मुहूर्त्तों
में तेरह नक्षत्रों में बिचरता है और रात्रि में उतनेही नक्षत्रोंपर अठारह मुहूर्त्तों में बिचरता है
कुह्मार के चक्र के मध्य में स्थितहोने के समान मन्द २ चलता है ७१ । ७२ और उत्तरायण में
सूर्य्य दिनमें मन्दगतिसे चलता है इसीहेतुसे बहुतकालमें थोड़ीसी पृथ्वीको उल्लंघन करताहै ७३
उत्तरायण में अठारह मुहूर्त्तोंमें तेरह नक्षत्रोंपर सूर्य्य बिचरताहै और रात्रिमें उतनेही नक्षत्रोंपर बारह मुहूर्त्तोंमें बिचरता है ७४ तब सूर्य्य और चन्द्रमा चक्रपर ऐसेमन्द २ भ्रमण करतेहैं जैसे कि चाकके मध्यमें स्थितहुआ मट्टीका पिण्ड मन्द २ भ्रमताहै इसीके समान ध्रुवकोभी जानना ७५ तीस
मुहूर्त्तोंमें भ्रमता हुआ ध्रुव दोनों दिशाओंके मध्यमें मंडलोंको भ्रमाताहै ७६ उत्तरायणके क्रमसे दिन
में सूर्य्यकी मन्दगति होतीहै और रात्रिमें शीघ्रगति होजाती है ७७ दक्षिणायनके क्रमसे दिनमें सूर्य्य
की शीघ्रगति और रात्रिमें मन्दगति होजातीहै ७८ इसरीतिसे गतिविशेषों करके रात्रिदिनोंका विभाग
करताहुआ अजवीथी मार्गमें बिचरताहुआ दक्षिण दिशामें लोकालोक पर्व्वतकी उत्तर दिशाकीओर
प्राप्तहोताहै ७९ यह सूर्य्यलोक संतान पर्व्वत और वैश्वानर मार्गसे जब बाहरकीओर आताहै तब पुष्कर
द्वीपमें सूर्य्यकी बहुतसी कान्ति होती है ८० वहाँ बराबरमें और बाहरकी ओर दशहज़ार योजन ऊंचा
लोकालोक पर्व्वतहै ८१ उस पर्व्वतका मंडल प्रकाश और अप्रकाशवालाहै अर्थात् नक्षत्र चन्द्रमा सूर्य
ग्रह और तारागण इनके साथ लोकालोक पर्व्वतके भाग प्रकाशित होते हैं इतना यह आलोक पर्वत
कहाहै इससे परे निरालोक पर्व्वतहै ८२ । ८३ लोकधातु देखनेमें वर्त्ता जाताहै नहीं देखनेको अलोक

व्युंष्टिश्चापिअहःस्मृतम् ८५ त्रिंशत्कलोमुहूर्तस्तु अहस्तेदशपञ्चच । ह्रासोवृद्धिरहर्भागैर्दिवसास्सायथातुवै ८६ सन्ध्यामुहूर्तमात्रायां ह्रासवृद्धौतुतत्स्मृते । लेखाप्रभृत्यथादित्ये त्रिमुहूर्तागतेतुवै ८७ प्रातःस्मृतस्ततःकालो भागांश्चाहुश्चपञ्चच । तस्मात्प्रातगतात्कालात् मुहूर्ताःसङ्गवस्त्रयः ८८ मध्याह्नस्त्रिमुहूर्तस्तु तस्मात्कालादनन्तरम् । तस्मान्मध्यन्दिनात्कालात् अपराह्णइतिस्मृतः ८९ त्रयएवमुहूर्तास्तु कालएषस्मृतोबुधैः । अपराह्णव्यतीताच्च कालःसायंसउच्यते ९० दशपञ्चमुहूर्ताह्नो मुहूर्तास्त्रयएवच । दशपञ्चमुहूर्तंवै अहस्तुविषुवेस्मृतम् ९१ वर्धत्यतोह्रसत्येव अयनेदक्षिणोत्तरे । अहस्तु ग्रसतेरात्रिं रात्रिस्तुग्रसतेअहः ९२ शरद्वसन्तयोर्मध्यं विषुवन्तुविधीयते । आलोकान्तःस्मृतोलोको लोकाच्चालोकउच्यते ९३ लोकपालाःस्थितास्तत्र लोकालोकस्यमध्यतः। चत्वारस्तेमहात्मान स्तिष्ठन्त्याभूतसंप्लवम् ९४ सुधामाचैववैराजः कर्दमश्चप्रजापतिः ।हिरण्यरोमापर्जन्यः केतुमान्राजसश्चसः ९५ निर्द्वन्द्वानिरभिमाना निस्तन्द्रानिष्परिग्रहाः। लोकपालाःस्थितास्त्वेते लोकालोकेचतुर्दिशम् ९६ उत्तरंयदगस्त्यस्य शृङ्गंदेवर्षिसेवितम् । पितृयानःस्मृतःपन्था वैश्वानरपथाद्बहिः ९७ तत्रासतेप्रजाकामाऋषयो येऽग्निहोत्रिणः । लोकस्यसन्तानकराः पितृयानेपथिस्थिताः ९८ भूतारम्भकृतंकर्म्म आ

कहते हैं इसलिये लोकालोक पर्व्वतकी सन्धि में भ्रमताहुआ सूर्य्य जब प्राप्तहोताहै तब संध्या होती है सूर्य्य की किरणोंके उदयहोनेमें जब थोड़ाकाल बाकी रहताहै उसीको ऊषाकाल कहते हैं किरणों के प्रकाशमें दिन कहलाताहै ८४। ८५ तीस कलाओंका एक मुहूर्त्त और पन्द्रह मुहूर्त्तों का दिनहोताहै दिनों के घटने बढ़नेके विभागसे मुहूर्त्तोंका भी घटना बढ़ना जानना ८६ संध्या एक मुहूर्त्तक होतीहै वहां दिनका घटना बढ़ना कहाहै सूर्य्यकी किरण उदयहोनेमें जब तीन मुहूर्त्त व्यतीत होजातेहैं उसको प्रातःकाल कहतेहैं वह पांचवांभाग कहाताहै इसके अनन्तर तीनमुहूर्त्त तक संगव संज्ञाहै ८७। ८८ उसके पीछे तीनमुहूर्त मध्याह्नकहलातेहैं मध्याह्नसे पीछे तीनमुहूर्त्त अपराह्णकहाते हैं अपराह्णके पीछे सायंकाल कहलाताहै ८९।९० पन्द्रह मुहूर्तोंका दिनहोताहै और पन्द्रह मुहूर्तों की रात्रिहोतीहै यह विषुव अर्थात् समान दिनरात्रि की व्यवस्थाहै ९१ और दक्षिण उत्तरअयनमें दिन घटता बढ़ताहै दिन बढ़कर रात्रिको घटाताहै और रात्रि बढ़कर दिनको घटातीहै ९२ शरद् वसन्तऋतुके मध्यमें समकाल आताहै जहांतक दर्शनहोवै वहांतक लोक कहाताहै देखनेसे आलोक कहतेहैं ९३ लोकालोक पर्व्वतके मध्यमें लोकपाल स्थितहैं वह चार महात्माहैं चारो प्रलयकाल तक स्थित रहतेहैं ९४ पहला सुधामा अर्थात् सुन्दर धामवाला वैराज १ दूसरा कर्दम नाम प्रजापति २ तीसरा सुवर्णके समान रोमोंवाला पर्जन्य ३ चौथा रजोगुणी केतुमान् ४ यह चारो सुख दुःखादि द्वन्द्व अभिमान आलस्य और संग्रहसे रहितहैं वह लोकालोक पर्व्वतकी चारोंदिशाओंमें एक २ स्थित होरहेहैं ९५। ९६ अगस्त्य पर्व्वतके उत्तरका शिखर देवता और ऋषियोंसे सेवितहै वैश्वानर मार्ग से बाहर पितृयान संज्ञक अर्थात् पितरोंका मार्ग वर्णन कियाहै ९७ वहां प्रजाकी कामना करनेवाले

शिषश्चविशाम्पते ! । आरम्भन्तेलोककामास्तेषांपन्थाःसदक्षिणः ९९ चलितन्तेपुनर्धर्मं
स्थापयन्तियुगेयुगे । सन्तप्ततपसाचैव मर्यादाभिःश्रुतेनच १०० जायमानास्तुपूर्वेवै प
श्चिमानांगृहेषुते । पश्चिमाश्चैवपूर्वेषां जायन्तेनिधनेष्विह १०१ एवमावर्तमानास्ते व
र्तन्त्याभूतसंप्लवम् । अष्टाशीतिसहस्राणि ऋषीणांगृहमेधिनाम् १०२ सवितुर्दक्षिणंमार्ग
माश्रित्याभूतसंप्लवम् । क्रियावतांप्रसंख्यैषा येश्मशानानिभेजिरे १०३ लोकसंव्यवहारा
र्थं भूतारम्भकृतेनच । इच्छाद्वेषरताच्चैव मैथुनोपगमाच्चवै १०४ तथाकामकृतेनेह सेवना
द्विषयस्यच । इत्येतैःकारणैःसिद्धाः श्मशानानीहभेजिरे १०५ प्रजैषिणःसप्तऋषयो द्वाप
रेष्विहजज्ञिरे । सन्ततिन्तेजुगुप्सन्ते तस्मान्मृत्युर्जितस्तुतैः १०६ अष्टाशीतिसहस्राणि
तेषामप्यूर्ध्वरेतसाम् । उदक्पन्थानपर्यन्त माश्रित्याभूतसंप्लवम् १०७ तेसम्प्रयोगाल्लो
कस्य मिथुनस्यचवर्जनात् । ईर्ष्याद्वेषनिवृत्त्याच भूतारम्भविवर्जनात् १०८ इत्येतैःकार
णैःशुद्धैस्तेऽमृतत्वंहिभेजिरे । आभूतसंप्लवस्थानाम मृतत्वंविभाव्यते १०९ त्रैलोक्यस्थि
तिकालोहि नपुनर्मारगामिनाम् । आभूतसंप्लवान्तेतु क्षीयन्तेचोर्ध्वरेतसः ११० ऊर्ध्वोत्त
रमृषिभ्यस्तु ध्रुवोयत्रानुसंस्थितः । एतद्विष्णुपदंदिव्यं तृतीयंव्योम्निभास्वरम् १११ यत्र
गत्वानशोचन्ति तद्विष्णोःपरमम्पदम् । धर्मेध्रुवस्यतिष्ठन्ति येतुलोकस्यकांक्षिणः ११२

इतिश्रीमत्स्यपुराणेत्रयोविंशत्यधिकशततमोऽध्यायः १२३ ॥

अग्निहोत्री ऋषि स्थितहैं लोककी वृद्धिकरनेके लिये पितरोंके मार्ग में स्थित होरहेहैं ९८ हे शौनक
और ऋषिलोगो लोकोंकी कामनावाले ऋषि भूतोंके आरंभ कियेहुए कर्मोंको और बिचारेहुए म-
नोरथोंको प्रारंभ करतेहैं उनका दक्षिणा पथ मार्ग कहाहै ९९ और युग २ के प्रचलित धर्मोंको स्थापित
करतेहैं मर्य्यादाकरके शास्त्रके सुननेसे सुन्दर तपोंसे युक्तहैं १०० पहलेके लोकपाल पिछले लोक-
पालोंके घरोंमें जन्म लेतेहैं और दूसरे लोकपाल पहले लोकपालों के घरोंमें जन्मतेहैं इस रीतिसे
वह प्रलयकाल तक अदलाबदल करतेहुए वर्त्तते हैं और अट्ठासीहजार गृहस्थी ऋषियोंके दक्षिणमार्ग
में सूर्य्य प्राप्तहोताहै और क्रियावाले पुरुषों की संख्याके लिये कई देवता श्मशानों में प्राप्तहोरहेहैं
लोकोंके उत्तम व्यवहारके निमित्त भूतोंके आरंभ करने से इच्छाद्वेषमें रतहोनेसे मैथुनकरनेसे १०१
१०४ और कामसे कियेहुए विषयके सेवनसे इत्यादिक कारणों से सिद्धपुरुष श्मशानों को प्राप्तहोते
भये हैं १०५ प्रजाकी इच्छावाले सप्तऋषि द्वापरयुग में इस लोकके मध्य जन्मते भये और सन्तान
की निन्दा करतेभये इसहेतुसे उन्होंने मृत्युको जीतलिया १०६ उन ऊर्ध्वरेता अर्थात् ऊपरको वीर्य
चढ़ानेवाले सप्तऋषियोंके उत्तर मार्गमें अट्ठासीहज़ार ऋषिलोग प्राप्तहोगये हैं और प्रलयकाल पर्य्य-
न्त रहैंगे वह सप्तऋषि संसारके रक्षकहुए उन महात्माओंने कभी मैथुन, ईर्षा, द्वेष और भूतोंका
आरंभ नहीं किया इन कारणोंसे अमरताको प्राप्तहोगये और प्रलयकाल तक अमर रहैंगे त्रिलोकी
की स्थिति करनेवाला काल उनको दूर नहीं करसक्ता परन्तु प्रलयकाल होनेपर ऐसे २ ऊर्ध्वरेता
लोग भी नष्ट होजाते हैं १०७ । ११० इन ऊर्ध्वरेतस सप्तऋषियों से ऊपर ध्रुवस्थित है यह दिव्य

एवंश्रुत्वाकथांदिव्यामब्रुवन्लोमहर्षणिम् । सूर्याचन्द्रमसोश्चारं ग्रहाणाञ्चैवसर्वशः १
(ऋषय ऊचुः) भ्रमन्तिकथमेतानि ज्योतींषिरविमण्डले । अव्यूहेनैवसर्वाणि तथाचा
सङ्करेणवा २ कश्चभ्रामयतेतानि भ्रमन्तियदिवास्वयम् । एतद्वेदितुमिच्छामस्ततोनिग
दसत्तम ! ३ (सूत उवाच) भूतसंमोहनंह्येतद्ब्रुवतोमेनिबोधत । प्रत्यक्षमपिदृश्यंतत्
संमोहयतिवैप्रजाः ४ योऽसौचतुर्दशर्क्षेषु शिशुमारोव्यवस्थितः । उत्तानपादपुत्रोऽसौ मे
ढीभूतोध्रुवोदिवि ५ सैषभ्रमन्भ्रामयते चन्द्रादित्यौग्रहैःसह । भ्रमन्तमनुसर्पन्ति नक्षत्रा
णिचचक्रवत् ६ ध्रुवस्यमनसायोवै भ्रमतेज्योतिषाङ्गणः । वातानीकमयैर्बन्धैर्ध्रुवेबद्धःप्रस
र्पति ७ तेषांभेदश्चयोगश्च तथाकालस्यनिश्चयः । अस्तोदयास्तथोत्पाता अयनेद
क्षिणोत्तरे ८ विषुवद्ग्रहवर्णश्च सर्वमेतद्ध्रुवेरितम् । जीमूतानामतेमेघा यदेभ्योजीवस
म्भवः ९ द्वितीयआवहन्वायुर्मेघास्तेत्वभिसंश्रिताः । इतोयोजनमात्राच्च अध्यर्द्धविकृता
अपि १० वृष्टिसर्गस्तथातेषां धाराधारःप्रकीर्तिताः । पुष्करावर्तकानाम येमेघाःपक्षस
म्भवाः ११ शक्रेणपक्षाश्छिन्नावै पर्वतानांमहौजसा । कामगानांसमृद्धानां भूतानांनाश
मिच्छताम् १२ पुष्करानामतेपक्षा वृहन्तस्तोयधारिणः । पुष्करावर्तकानाम कारणेनेह

विष्णुका तीसरापद आकाशमें स्थितहै बड़ी सुन्दर कान्तिवालाहै १११ और जहाँजाकर कोईशोच भी नहीं रहता यही विष्णुका परमपदहै जो लोककी इच्छा करनेवालेहैं वह ध्रुवके धर्ममें स्थितरहतेहैं ११२ ॥ इति श्रीमत्स्यपुराणभाषाटीकायांत्रयोविंशत्यधिकशततमोऽध्यायः १२३ ॥

ऐसे दिव्य कथाको सुनकर ऋषिलोग सूतजीसे बोले कि हेसूतजी सूर्य्यके मंडलमें तारा आदिक कैसे भ्रमते हैं सबमिलेहुएहैं अथवा विनामिलेहुए अलग २ विचरतेहैं १।२ इनसबको कौन भ्रमाताहै अथवा वो आपही भ्रमतेहैं तो कैसे भ्रमते हैं इसको हम सुनाचाहतेहैं आप कृपाकरके सुनाइये ३ सूतजीबोले कि जैसे सब भूतोंको मोह प्राप्तहोताहै वह क्रममैं तुमसे कहताहूं प्रत्यक्ष भी देखनेमें आताहै परन्तु प्रजामोहको प्राप्तहोरहीहै ४ जहाँकि चौदह नक्षत्रोंपर शिशुमारचक्र व्यवस्थित होरहाहै वहाँ उत्तानपादका पुत्र ध्रुव एक किनारेपर स्थितहै वह शिशुमारचक्र भ्रमताहुआ चन्द्रमा सूर्य्यादिक ग्रहोंको भ्रमाताहै उस चक्रके समान भ्रमतेहुए शिशुमारचक्र पर नक्षत्र भी भ्रमतेहैं ५।६ नक्षत्रोंका गण वायुके समूहोंके द्वारा बंधनोंसे ध्रुवपर बँधरहाहै वह ध्रुवके मनसे भ्रमताहुआ गमनकरताहै ७ उनका भेद, योग, कालकानिश्चय, अस्त, उदय, उत्पात, दक्षिण उत्तर अयन, विषुवसंज्ञक काल और ग्रहण यह सब ध्रुवसे कहेगयेहैं जो जीमूतनाम मेघहैं उनसे जीव उत्पन्नहोताहै ८ । ९ दूसरा आवहन नाम वायुहै उसकेही आश्रयमें वह मेघ रहते हैं यहाँसे एक योजन ऊपरको जाकर वह मेघ विकारको प्राप्तहोते हैं १० उन मेघोंसे वर्षाकी रचनाहोतीहै उन्हींको वर्षाकी धाराके आधार कहते हैं पुष्करावर्त्तक नाम जो मेघहैं वह पर्व्वतोंके पक्षोंसे उत्पन्नहुएहैं ११ बड़े पराक्रमी इन्द्रने इच्छापूर्व्वक चलनेवाले भूतोंके नाश करनेकी इच्छासे इकट्ठेहोनेवाले पर्व्वतोंके पक्ष जहाँ छेदन कर दियेथे १२ वहाँ पुष्कर नामवाले मेघ बहुत जलोंके धारण करनेवाले उत्पन्नहोते भये उनका पु-

शङ्खिलाः १३ नानारूपधराश्चैव महाघोरस्वराश्चते । कल्पान्तवृष्टिकर्तारः कल्पान्ता
ग्नेर्नियामकाः १४ वाय्वाधारावहन्तेवै साम्प्रताःकल्पसाधकाः । यान्यस्याण्डस्यभिन्नस्य
प्राकृतान्यभवंस्तदा १५ यस्मिन्ब्रह्मासमुत्पन्नश्चतुर्वक्त्रःस्वयंप्रभुः । तान्येवाण्डकपाला
नि सर्वेमेघाःप्रकीर्तिताः १६ तेषामप्यायनंधूमः सर्वेषामविशेषतः । तेषांश्रेष्ठश्चपर्जन्य
श्चत्वारश्चैवदिग्गजाः १७ गजानांपर्वतानाञ्च मेघानांभोगिभिःसह । कुलमेकंद्विधाभूतं
योनिरेकाजलंस्मृतम् १८ पर्जन्योदिग्गजाश्चैव हेमन्तेशीतसम्भवम् । तुषारवर्षंवर्षन्ति
वृद्धाह्यन्नविवृद्धये १९ षष्ठःपरिवहोनाम वायुस्तेषांपरायणः । योऽसौबिभर्तिभगवन् ! ग
ङ्गामाकाशगोचराम् २० दिव्यामृतजलांपुण्यां त्रिपथामितिविश्रुताम् । तस्याविस्पन्दि
तन्तोयं दिग्गजाःपृथुभिःकरैः २१ शीकरान्सम्प्रमुञ्चन्ति नीहारइतिसस्मृतः । दक्षिणेन
गिरिर्योऽसौहेमकूटइतिस्मृतः २२ उदग्घिमवतःशैलस्योत्तरेचैव दक्षिणे । पुण्ड्नामसमा
ख्यातं सम्यक्वृष्टिविवृद्धये २३ तस्मिन्प्रवर्ततेवर्षं तत्तुषारसमुद्भवम् । ततोहिमवतोवा
युर्हिमंतत्रसमुद्भवम् २४ आनयत्यात्मवेगेन सिञ्चयानोमहागिरिम् । हिमवन्तमतिक्रम्य
वृष्टिशेषंततःपरम् २५ इमास्येचततःपश्चादिदम्भूतविवृद्धये । वर्षद्वयंसमाख्यातं स
म्यग्वृष्टिविवृद्धये २६ मेघाश्चाप्यायनंचैव सर्वमेतत्प्रकीर्त्तितम् । सूर्य्यएवतुवृष्टीनां
स्रष्टासमुपदिश्यते २७ वर्षधर्मोहिमंरात्रिं सन्ध्येचैवादिनंतथा । शुभाशुभफलानीह ध्रुवा

ष्करावर्त्तकनाम भी किसी कारणसेही होगयाहै १३ यहमेघ अनेकप्रकारके रूपधारण करनेवाले महा-
घोर शब्दवाले कल्पान्तकी वर्षाकरनेवाले और कल्पान्तकी अग्निके शान्त करनेवालेहैं १४ वायुके आ-
धारहैं अमरहैं कल्पके साधकहैं इनके विशेष जो अन्यमेघहैं वह इस अण्डकटाहके भिन्नहोनेमें उत्पन्न
हुएहैं जिसअण्डमें अपनेआपही चतुर्मुखवाला ब्रह्मा उत्पन्नहुआ वह अण्डकी कपाली मेघ कहीजाती
है १५।१६ उन मेघोंका स्थान धुवां है उनमें सबसे श्रेष्ठ पर्जन्य नाम मेघहै चार दिग्गज हाथी हैं १७
हस्तीपर्व्वत और मेघ इन सबके भोगनेंवालों समेत एककुलके दोभेद होगये हैं सबकी योनि एक
जलहै १८ पर्जन्य मेघ और दिग्गज हाथी हेमन्तऋतुमें वृद्धिको प्राप्तहोकर शीतसे उत्पन्नहुई धूंवरको
अन्नकी वृद्धिके लिये वरसाते हैं १९ छठा परिवह नाम वायु उनका परमस्थानहै वहींवायु आकाश
गंगाको धारण करताहै २० दिव्य अमृत जलवाली पवित्र त्रिपथा गंगाहै उस्से गिरतेहुए जलको
दिग्गज हाथी अपनी२ मोटी सूंडोंमें ग्रहणकरके वायुसे प्रसरित जलको छोडतेहैं उसीको धूंवर ओस
कहते हैं दक्षिण दिशामें हेमकूट नाम पर्व्वत कहाहै वह हिमवान् पर्व्वत से उत्तरकी ओरहै और हि-
मवान्से दक्षिणकी ओर पुण्ड्र पर्व्वतहै वह सम्पूर्ण वर्षाकी वृद्धिके निमित्त वर्णन कियाहै उस पर्व्वत
पर जो वर्षा प्रवृत्तहोतीहै वह वहीपाला अर्थात् बर्फ होजातीहै वहां उसको वायु अपने वेग करके
हिमवान् पर्व्वत पर लातीहै और हिमवान्को सींचतीहुई वहांसे चलकर शेष रहीहुई धूंवर ओसको
इस खंडमें आकर वरसातीहै २१ । २५ और एक वृष्टि वहहै जो हस्तियोंके मुखसे वरसती है इस
प्रकारसे यह दोप्रकारकी वृष्टि सम्पूर्ण अन्नादिककी वृद्धिके निमित्त कहीगई हैं २६ सबके स्थान मेघ

तृसर्वंप्रवर्त्तते २८ ध्रुवेणाधिष्ठिताश्चापः सूर्य्योवैगृह्यतिष्ठति । सर्वभूतशरीरेषु त्वापोह्या
नुश्रिताश्चयाः २९ दह्यमानेषुतेष्वेह जङ्गमस्थावरेषुच । धूमभूतास्तुताह्यापो निष्क्राम
न्तीहसर्वशः ३० तेनचाभ्राणिजायन्ते स्थानमभ्रमयंस्मृतम् । तेजोभिःसर्वलोकेभ्य आ
दत्तेरश्मिभिर्जलम् ३१ समुद्राद्वायुसंयोगात् वहन्त्यापोगभस्तयः । ततस्त्वृतुवशात्काले
परिवर्तन्दिवाकरः३२नियच्छत्यापोमेघेभ्यःशुक्लाःशुक्लैस्तुरश्मिभिः । अभ्रस्थाःप्रपतन्त्या
पोवायुनासमुदीरिताः ३३ ततोवर्षतिषण्मासान् सर्वभूतविवृद्धये । वायुभिस्तनितंचैव वि
द्युतस्त्वग्निजाःस्मृताः ३४ मेहनाच्चमिहेर्धातोर्मेघत्वंव्यञ्जयन्तिच । नभ्रश्यन्तेततोह्याप
स्तस्मादभ्रस्यवैस्थितिः । सृष्टाऽसौवृष्टिसर्गस्य ध्रुवेणाधिष्ठितोरविः ३५ ध्रुवेणाधिष्ठितो
वायुर्वृष्टिंसंहरतेपुनः । ग्रहान्निवृत्त्यासूर्य्यातु चरतेऋक्षमण्डलम् ३६ चारस्यान्तेविशत्य
र्कं ध्रुवेणसमधिष्ठितम् । अतःसूर्य्यरथस्यापि सन्निवेशंप्रचक्षते ३७ स्थितेनत्वेकचक्रेण
पञ्चारेणत्रिनाभिना । हिरण्मयेनाणुनावै अष्टचक्रैकनेमिना । चक्रेणभास्वतासूर्य्यः स्यन्द
नेनप्रसर्पिणा ३८ शतयोजनसाहस्रो विस्तरायामउच्यते । द्विगुणाचरथोपस्थादीषाद
ण्डःप्रमाणतः ३९ सतस्यब्रह्मणासृष्टो रथोह्यर्थवशेनतु । असङ्गःकाञ्चनोदिव्यो युक्तःपर्वत

हैं और वर्षाका उत्पन्न करनेवाला सूर्य्य वर्णन कियाहै २७ वर्षा घाम शीत रात्रि सन्ध्या दिन और शुभाशुभ फल यहसब यहां ध्रुवसे उत्पन्न होतेहैं २८ ध्रुवकरके अधिष्ठित सूर्य्य जलोंको ग्रहण करके स्थितहोजाताहै और जो जल सब भूतोंके शरीरोंमें इकट्ठे होरहेहैं वह सब स्थावर जंगम जीवों के जलनेसे धुवां होकर चारोंओरसे सूर्य्यमें आजातेहैं २९।३० इसहेतुसे वह बादल होतेहैं बादलोंका स्थान सूर्य्यहै वह अपनी किरणों से जलको ग्रहण करताहै सूर्य्यकी किरणें वायु के योग से समुद्रमें से भी जलको ग्रहण करलेतीहैं फिर ऋतु २ में वर्त्तताहुआ सूर्य्य अपनी किरणोंसे मेघों के अर्थशुद्ध जलको देताहै बादलोंमें स्थितहुए जल वायुसे प्रेरितहोकर संतप्त होतेहैं तब छःमहीनोंतक सब भूतमात्रोंकी वृद्धिके निमित्त वर्षाहोतीहै वायु और अग्निसे उत्पन्नहुई बिजली होतीहै फिर उसीमें उनकी गर्जना होतीहै ३१। ३४ झिरने या सेचन करने से मेघ कहाते हैं यह मेघ शब्द (मिह सेचने) इसधातु से बनाया जाताहै जिस्से नीचे जलनहीं गिरे वह अभ्र कहाताहै इसीहेतुसे अभ्रही बादलोंकी स्थिति होतीहै सूर्य्यवृष्टि सर्गका रचनेवालाहै और ध्रुवकरके अधिष्ठितहै ३५ ध्रुवसेही अधिष्टित वायु वर्षाको हरलेतीहै नक्षत्रोंका मंडल सूर्य्यकी निवृत्तिसे विचरताहै ३६ और जब सूर्य्यकेसाथ संचारहोताहै तभी सूर्य्यमें प्रवेश होजाताहै और ध्रुवके अधिष्ठितहोकर संयुक्त रहताहै—अब हम सूर्य्यके रथका विस्तार वर्णन करतेहैं ३७ सूर्य्यका रथ एक चक्र पांच आरे और तीन नाभियोंसे स्थितहै ऐसे सुवर्णकी अणुवों से युक्त आठचक्र एकधुरे समेत बड़े प्रकाशित चक्रकेद्वारा गमन करनेवाले रथमें सूर्य्य स्थित रहतेहैं उसरथका विस्तार लाख योजनकाहै इससेदूने विस्तारवाला रथका जुवाहै ३८।३९ वह सूर्य्यकारथ ब्रह्माजीने बड़े प्रयोजनके लिये रचाहै और संगसे रहित स्वर्णमयी महादिव्य पर्व्वतपर चलनेवाले अश्वोंसे युक्तहै उसमें वेद घोड़ोंका रूप धारण कियेहुए चक्रके समान स्थितहैं यह रथ वरुण के रथके

गेह्यैः ४० छन्दोभिर्वाजिरूपैस्तैर्यथाचक्रंसमास्थितैः । वारुणस्यरथस्येह लक्षणैःसदृशश्चसः ४१ तेनाऽसौचरतिव्योम्नि भास्वाननुदिनन्दिवि । अथाङ्गानितुसूर्य्यस्य प्रत्यङ्गानिरथस्यच । संवत्सरस्यावयवैः कल्पितानियथाक्रमम् ४२ अहर्नाभिस्तुसूर्य्यस्य एकचक्रस्यवैस्मृतः । अरात्संवत्सरास्तस्य नेम्यःषड्ऋतवःस्मृताः ४३ रात्रिर्वरूथोधर्म्मश्च ध्वजऊर्ध्वंव्यवस्थितः । अक्षकोट्योर्युगान्यस्य अर्तवाहाःकलाःस्मृताः ४४ तस्यकाष्ठास्मृताघोणा दन्तपङ्क्तिःक्षणास्तुवै । निमेषश्चानुकर्षोऽस्य ईषाचास्यकलास्मृता ४५ युगाक्षकोटीतेतस्य अर्थकामावुभौस्मृतौ । सप्ताश्वरूपाश्छन्दांसि वहन्तेवायुरंहसा ४६ गायत्रीचैवत्रिष्टुप्च जगत्यनुष्टुप्तथैवच । पङ्क्तिश्चबृहतीचैव उष्णिगेवतुसप्तमः ४७ चक्रमक्षेनिबद्धन्तु ध्रुवेचाक्षःसमार्पितः । सहचक्रोभ्रमत्यक्षःसहाक्षोभ्रमतिध्रुवम् ४८ अक्षःसहैवचक्रेण भ्रमतेऽसौध्रुवेरितः । एवमर्थवशात्तस्य सन्निवेशोरथस्यतु ४९ तथासंयोगभागेन सिद्धोवैभास्करोरथः । तेनाऽसौतरणिर्देवो नभसःसर्पतेदिवम् ५० युगाक्षकोटीतेतस्य दक्षिणेस्यन्दनस्यतु । भ्रमतोभ्रमतोरश्मी तौचक्रयुगयोस्तुवै ५१ मण्डलानिभ्रमेतेऽस्य खेचरस्यरथस्यतु । कुलालचक्रभ्रमवन् मण्डलंसर्वतोदिशम् ५२ युगाक्षकोटितेतस्य वातोर्मीस्यन्दनस्यतु । संक्रमेतेध्रुवमहो मण्डलेसर्वतोदिशम् ५३ भ्रमत

लक्षणोंकेसमानहै ४०।४१ उसरथके द्वारा सूर्य्य देवता प्रतिदिन आकाशमें विचरतेहैं—अब उससूर्य्यके रथकेअंग प्रत्यंगोंको संवत्सरके अवयवोंसे कल्पित वर्णन करतेहैं ४२ सूर्य्यके एकचक्रकी नाभिदिनहै रथके पंहियोंकी पंखड़ी वर्षहै छओंऋतु उस रथकी पंखड़ियोंकी नेमिहै ४३ और रथमें लोहादिकके जड़ाओंका समूह रात्रिहै उसकी ऊंचीध्वजा धूपहै घड़ी कला आदि उसके जुवेकेअग्रभागहैं कलादिक घोड़ोंकी नासिकाहै क्षण दाँतोंकी पंक्तिहै निमेष अनुकर्षहै कलाको पणजारा कहतेहैं अर्थ और काम जुवेके अग्रभागहैं सात घोड़ोंके रूपोंको धारण कियेहुए वेदहैं वह वायुके समान वेगसे रथको लेकर चलतेहैं ४४। ४६ गायत्री, त्रिष्टुप् , जगती, अनुष्टुप् , पंक्ति, बृहती, और उष्णिग्—यहसातों चक्रके अक्षोंमें युक्त होरहेहैं और वह अक्ष ध्रुवमें बँधरहाहै चक्र समेत अक्ष भ्रमताहै और अक्ष समेत धुरी भ्रमतीहै ४७। ४८ ध्रुवसे प्रेरित अक्ष चक्र समेत भ्रमताहै इसप्रकारके प्रयोजनके लिये उस रथका सन्निवेश कहाहै ४९ सूर्य्यकारथ संयोगके भागसे सिद्धहोरहाहै उस रथके कारणसे सूर्य्य देवता जब आकाशमें गमन करते हैं तब उस रथके जुवेका अग्रभाग दक्षिणमें भ्रमताहै उस भ्रमतेहुए रथमें घोड़ोंकी बाग और चक्रादिक भी भ्रमते हैं आकाशमें विचरनेवाले इस रथके मंडल कुम्हारके चक्रके समान चारोंओरको भ्रमतेहैं जुवेका अग्रभाग दिवसमें चारोंदिशाओंमें भ्रमताहुआ वायुके वेगसे ध्रुवको प्राप्तहोताहै ५०। ५३ उस भ्रमतेहुए रथके जोत उत्तरायण मंडलमें बढ़ते हैं और दक्षिणायनमें घटतेहैं और उसी भ्रमतेहुए रथके जुवों के दो अग्रभागोंमें रथ के घोड़ोंकी बाग बँध रहीहै उनको ध्रुव धारण कररहाहै और सूर्य्य देवता भी धारण कररहेहैं जब ध्रुव उन बागोंको खैंचता है तब ध्रुवके अधिष्ठित होनेसे सूर्य्य भीतरके मंडलमें भ्रमताहै इन दक्षिण और उत्तर दोनों दिशाओं

स्तस्यरश्मीते मण्डलेतूत्तरायणे । वर्द्धेतेदक्षिणेष्वत्र भ्रमतोमण्डलानितु ५४ युगाक्षकोटीसम्बद्धौ द्वेरश्मीस्यन्दनस्यते । ध्रुवेणप्रगृहीतौतौ रश्मीधारयतारविम् ५५ आकृष्यतेयदातेतुध्रुवेणसमाधिष्ठिते । तदासोऽभ्यन्तरेसूर्य्यो भ्रमतेमण्डलानितु ५६ अशीतिमण्डलशतं काष्ठयोरुभयोश्चरन् । ध्रुवेणमुच्यमानेन पुनारश्मियुगेनच ५७ तथैवबाह्यतःसूर्य्यो भ्रमतेमण्डलानितु । उद्वेष्टयन्वैवेगेन मण्डलानितुगच्छति ५८ ॥

इति श्रीमत्स्यपुराणेचतुर्विंशत्यधिकशततमोऽध्यायः १२४ ॥

(सूत उवाच) सरथोऽधिष्ठितोदेवैर्मासिमासियथाक्रमम् । ततोवहत्यथादित्यं बहुभिर्ऋषिभिःसह १ गन्धर्वैरप्सरोभिश्च सर्पग्रामणिराक्षसैः । एतेवसन्तिवैसूर्ये मासौद्वौद्वौ क्रमेणच २ धातार्यमापुलस्त्यश्च पुलहश्चप्रजापती । उरगौवासुकिश्चैव सङ्कीर्णश्चैव तावुभौ ३ तुम्बरुर्नारदश्चैव गन्धर्वौगायताम्बरौ । कृतस्थलाप्सराश्चैव याचसापुञ्जिकस्थली ४ ग्रामण्यौरथकृत्तस्य रथौजाश्चैवतावुभौ । रक्षोहेतिःप्रहेतिश्च यातुधानावुभौ स्मृतौ ५ मधुमाधवयोर्ह्येष गणोवसतिभास्करे । वसन्ग्रीष्मेतुद्वौमासौ मित्रश्चवरुणश्च वै ६ ऋषीअत्रिर्वसिष्ठश्च नागौतक्षकरम्भकौ । मेनकासहधन्याच हाहाहूहूश्चगायकौ ७ रथन्तरश्चग्रामण्यो रथकृच्चैवतावुभौ । पौरुषेयोबधश्चैव यातुधानौतुतौस्मृतौ ८ एतेवसन्तिवैसूर्ये मासयोःशुचिशुक्रयोः । ततःसूर्येपुनश्चान्या निवसन्तिस्मदेवताः ९ इन्द्रश्चैवविवस्वांश्च अङ्गिराभृगुरेवच । एलापत्रस्तथासर्पः शङ्खपालश्चपन्नगः १० विश्वावसुसुसेनौच प्रातश्चैवरथश्चाहि । प्रम्लोचेत्यप्सराश्चैव निम्लोचन्तीचतेउभे ११ यातुधा

मेंआठहज़ार ८००० मंडल होतेहैं जब ध्रुवसे रथकीबाग छुटजातीहै तब सूर्य्य बाहरके मंडलों पर भ्रमतेहैं और मंडलोंको लपेटतेहुए बड़ेबेगसे गमन करतेहैं ५४ । ५८ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांचतुर्विंशत्यधिकशततमोऽध्यायः १२४ ॥

सूतजी बोले कि वह सूर्य्यका रथ प्रतिमास देवताओंसे संयुक्त रहताहै उसको सूर्य्यदेवता बहुतसे ऋषियोंके संगहोकर चलाताहै १ गन्धर्व अप्सरा और सर्पोंके समूह यहसब सूर्य्यमें वसतेहैं दोदो महीनेके क्रमसे २ ब्रह्मा, अर्य्यमादेवता, पुलस्त्य, पुलह, प्रजापति, बासुकिसर्प ३ और गानकरनेवाले तुम्बरु और नारद गन्धर्व कृतस्थला और पुंजिकस्थली यह अप्सरा, और रथकृत् रथौजा यह दोप्रधान पुरुष, और रक्षोहेति, प्रहेति यह दोराक्षस इन सबोंका गण चैत्र बैशाख महीनोंमें सूर्य्य के भीतर बसताहै ग्रीष्मऋतुके दोमहीनोंमें मित्र और वरुण यह दो देवता बसतेहैं ४ । ६ इनके सिवाय अत्रि वसिष्ठऋषि तक्षक और रम्भकनाग, मेनका, धन्या, अप्सरा, हाहा हूहू गन्धर्व रथंतर और रथकृत् प्रधानपुरुष, पौरुषेय और बध नाम राक्षस यहसब ग्रीष्मऋतुके दोमहीनों में सूर्य्यके भीतर बसते हैं इनके विशेष अन्य २ देवता भी सूर्य्यमें बसतेहैं ७ । ९ इन्द्र, विवस्वान्, अंगिरा और भृगु यह देवता और ऋषि, एलापत्र शंखपाल दोनों सर्प विश्वावसु, सुसेन नाम रथके प्रधानपुरुष प्रम्लोचा, नि·

नस्तथाहेतिर्व्याघ्रश्चैवतुतावुभौ । नभस्यनभसौरेतैर्वसन्तश्चदिवाकरे १२ मासौद्वौदेव
ताःसूर्ये वसन्तिचशरदृतौ । पर्जन्यश्चैवपूषाच भरद्वाजःसगौतमः १३ चित्रसेनश्चगन्ध
र्वस्तथावासुरुचिश्चयः । विश्वाचीचघृताचीच उभेतेपुण्यलक्षणे १४ नागश्चैरावतश्चै
व विश्रुतश्चधनञ्जयः । सेनजिच्चसुषेणश्च सेनानीग्रामणीस्तथा १५ चारोवातश्चद्वावे
तौ यातुधानावुभौस्मृतौ । वसन्त्येतेचवैसूर्ये मासयोश्चात्विषोर्जयोः १६ हेमन्तिकौचद्वौमा
सौ निवसन्तिदिवाकरे । अंशोभगश्चद्वावेतौ कश्यपश्चक्रतुश्चतौ १७ भुजङ्गश्चमहापत्य
सर्पःकर्कोटकस्तथा । चित्रसेनश्चगन्धर्वः पूर्णायुश्चैवगायनौ १८ अप्सराःपूर्वचित्तिश्चग
न्धर्वाह्युर्वशीचया। तक्षावारिष्टनेमिश्च सेनानीग्रामणीश्चतौ १९ विद्युत्सूर्यश्चतावुग्रौयातु
धानौतुतौस्मृतौ। सहेचैवसहस्येचवसन्त्येतेदिवाकरे २० ततस्तुशिशिरेचापि मासयोर्नि
वसन्तिते। त्वष्टाविष्णुर्जमदग्निर्विश्वामित्रस्तथैवच २१ काद्रवेयौतथानागौ कम्बलाश्व
तरावुभौ। गंधर्वौधृतराष्ट्रश्च सूर्यवर्चाश्चतावुभौ २२ तिलोत्तमाप्सराश्चैव देवीरम्भाम
नोरमा। ग्रामणीर्ऋतजिच्चै वसत्यजिच्चमहाबलः २३ ब्रह्मोपेतश्चवैरक्षोयज्ञोपेतस्तथैवच।
इत्येतेनिवसन्तिस्मद्वौद्वौमासौदिवाकरे २४ स्थानाभिमानिनोह्येते गणाद्वादशसप्तकाः
सूर्यमापादयन्त्येते तेजसातेजउत्तमम् २५ ग्रथितैस्तुवचोभिश्च स्तुवन्तिऋषयोरविम्
गन्धर्वाप्सरसश्चैव गीतनृत्यैरुपासते २६ विद्याग्रामणिनोयक्षाः कुर्वन्त्याभीषुसंग्रहम्

म्लोचन्तीनाम अप्सरा १० । ११ हेति और व्याघ्र दोनोंराक्षस इन सबका समूह श्रावण और भाद्रपद
महीनोंमें सूर्य्यके भीतर वसताहै १२ शरदृऋतुके दो महीनोंमें पर्जन्य, पूषा नाम दोनों देवता
बसतेहैं भरद्वाज और गौतमऋषि १३ चित्रसेन और सुरुचि गन्धर्व, विश्वाची, और कृताची नाम
सुन्दरी अप्सरा १४ ऐरावत और धनंजय दोनोंसर्प सेनजित् और सुषेण दोनों प्रधानपुरुष चार और
वात नाम दोनोंराक्षस यहसब आश्विन और कार्त्तिकके महीनेमें सूर्य्यमें बसतेहैं १५ । १६ हेमन्त
ऋतुके दोमहीनोंके बीच सूर्य्यमें अंश और भगदेवता और कश्यप ऋतुनाम दोनोंऋषि वसतेहैं १७
महापत्य और कर्कोटक नाम दोनोंसर्प चित्रसेन और पूर्णायु नाम दोनों गन्धर्व पूर्वचित्ति और
उर्वशी नाम अप्सरा, और तक्षा अरिष्टनेमि नाम सेनाके प्राप्त करनेवाले प्रधानपुरुष, विद्युत और
सूर्य्य नाम दोनोंराक्षस यह सब मार्गशिर और पौष इन दोमहीनोंमें सूर्य्यके भीतर बसतेहैं १८।२०
शिशिरऋतुके माघ फाल्गुननाम दोमहीनोंके बीच त्वष्टा, विष्णु,जमदग्नि, विश्वामित्र, यहसब देवता
और ऋषिलोग वसतेहैं २१ कद्रूके पुत्र कंबल अश्वतर नाग, धृतराष्ट्र और सूर्य्य वर्चानाम गंधर्व २२
तिलोत्तमा, उत्तमा, और रंभा यह अप्सरा ऋतजित् और सत्यजित् नाम प्रधान पुरुष ब्रह्मोपेत यज्ञोपेत
नाम राक्षस सूर्य्य में वसते हैं इस प्रकारसे यह सब देवता आदिक दो दो महीनों के क्रमसे
सूर्य्यमें वसते हैं २३ । २४ बारह महीनों में यह सात२ देवता आदिके गण स्थानके अभिमानी देवता
कहे हैं यह सब अपने तेजकरके सूर्य्यको उत्तम तेज प्राप्त करादेते हैं २५ गृह्य उत्तम वचनों करके
ऋषिलोग सूर्य्यकी स्तुति करते हैं और अप्सरा गन्धर्वादिक नृत्य गतादिसे सूर्य्यकीउपासना करते

सर्पाःसर्पन्तिवैसूर्य्यें यातुधानानुयान्तिच २७ बालखिल्यानयन्त्यस्तं परिवार्योदयाद्रवि
मू। एंतेषामेवदेवानां यथावीर्य्ययथातपः २८ यथायोगंयथाधर्मं यथातत्त्वंयथाबलम्।
तथातपत्यसौसूर्य्यस्तेषामिद्धस्तुतेजसा २९ भूतानामशुभंसर्वं व्यपोहतिस्वतेजसा।
मानवानांशुभैर्ह्येतैर्ह्रियतेदुरितन्तुवै ३० दुरितंशुभचाराणां व्यपोहन्तिक्वचित्क्वचित्।
एतेसहैवसूर्येण भ्रमन्तिसानुगादिवि ३१ तपन्तश्चजपन्तश्च ह्लादयन्तश्चवैप्रजाः।
गोपायन्तिस्मभूतानि ईहन्तेह्यनुकम्पया ३२ स्थानाभिमानिनांह्येतत्स्थानम्मन्वन्तरेषु
वै। अतीतानागतानाञ्च वर्तन्तेसाम्प्रतञ्चये ३३ एवंवसन्तिवैसूर्य्यें सप्तकास्तेचतुर्द
श। चतुर्दशेषुवर्त्तन्ते गणामन्वन्तरेषुवै ३४ ग्रीष्मेहिमेचवर्षासुचमुञ्चमानो घर्मंहिमञ्च
वर्षञ्चनिशांदिनञ्च। गच्छत्यसावनुदिनम्परिवृत्यरश्मीन्देवान्पितॄंश्चमनुजांश्चसुतर्पय
न्वै ३५ शुक्लेचकृष्णेतदहःक्रमेण कालक्षयेचैवसुराःपिवन्ति। मासेनतच्चामृतमस्यमृष्टं
सुवृष्टयेरश्मिषुरक्षितन्तु ३६ सर्वेऽमृतन्तत्पितरःपिवन्ति देवाश्चसौम्याश्चतथैवका
व्याः। सूर्य्येणगोभिर्हविवर्द्धिताभिरभिःपुनश्चैवसमुच्छ्रिताद्भिः ३७ वृष्ट्याभिवृष्टाभिर
थौषधीभिर्मर्त्या अथान्नेनक्षुधंजयन्ति। तृप्तिश्चाप्यमृतेनार्द्धमासंसुराणां मासेस्वाहाभिः
स्वधयापितॄणाम् अनेनजीवन्त्यनिशम्मनुष्याः सूर्य्यःश्रितन्तद्धिविभर्तिगोभिः ३८ इ

हैं २६ विद्याके प्रधान पुरुष यक्षादिक बाणोंका संग्रह करते हैं सर्प सूर्य्यमें विचरते रहते हैं राक्षस
सूर्य्यके साथ२ गमन करते हैं २७ बालखिल्य आदिक ऋषि उदयहोते हुए सूर्य्यको नमस्कार करते
हैं इन देवताओंका जैसा वीर्य्य तप, योग, धर्म, तत्त्व, बल, और पराक्रम है वैसेही उनके इन्धन रूप
तेजसे सूर्य्य तपताहै २८।२९ भूतों के संपूर्ण दुःखोंको सूर्य्य अपने तेजकरके दूर करदेताहै इन शुभ
देवता आदिकोंसे मनुष्योंके पाप नष्टहोजातेहैं ३० शुभ आचरण करनेवाले पुरुषोंके भी पाप सूर्य्य
नष्ट करताहै और यह सब देवता, अपने अनुचरों सहित सूर्य्यके साथही आकाशमें भ्रमते हैं ३१ तप
करतेहुए जप करते हुए प्रजाको आनन्द करातेहुए यह सब भूतोंकी रक्षा करते हैं औरकृपाकरके चेष्टा
करते हैं ३२ स्थानके अभिमानी देवताओंका यह स्थान मन्वन्तरोंमें बदलजाताहै जैसा अब वर्त्तमान
होरहाहै उसी प्रकार भूत भविष्य में भी जानना ३३ इस रीतिसे सूर्य्यमें यह दो दो के सात
गण वर्त्तते हैं सब चौदह हुए यह सब चौदह मन्वन्तरोंमें बदलजाते हैं ३४ ग्रीष्म हेमन्त और वर्षा
ऋतु इनमें घाम शीत और वर्षाको रात्रि दिन करताहुआ सूर्य्य प्रतिदिन अपनी किरणोंका विस्तार
करताहुआ गमन करताहै देवता पितर और मनुष्य इनको तृप्तकरताहै ३५ शुक्ल और कृष्णपक्ष में
कालक्षयके क्रमसे देवता मिष्ट अमृत पीते हैं फिर महीनेके क्रमसे वह अमृत रूप जल सूर्य्यकी किरणोंमें
रक्षितहोके सुन्दर बरसताहै ३६ सब पितृ देवता सौम्यसंज्ञक देवता और काव्य संज्ञक पितर
यह सब साकल्यसे वृद्धिहुई किरणों करके अमृत पीते हैं ३७ बारंबार वर्षा होनेसे औषधियों के और
अन्नके द्वारा मनुष्य क्षुधाको जीतलेते हैं पन्द्रह दिनमें स्वाहा करके देवताओंकी तृप्ति अमृतसे होती
है एक महीने में स्वधासे पितरोंकी तृप्तिहोतीहै इस सूर्य्यसेही सब जीव मात्र जीवते हैं सूर्य्य अपनी

त्येषएकचक्रेण सूर्य्यस्तूर्णम्प्रसर्पति । तत्रतैरक्रमैरश्वैः सर्पतेऽसौदिनक्षये ३९ हरिर्हरि
द्भिर्ह्रियतेतुरङ्गमैः पिवत्यथापोहरिभिःसहस्रधा । पुनःप्रमुञ्चत्यथताश्चयोहरिः समुह्यमा
नोहरिभिस्तुरङ्गमैः ४० अहोरात्रंरथेनासावेकचक्रेणवैभ्रमन् । सप्तद्वीपसमुद्रांस्तु सप्त
भिःसप्तभिर्द्रुतम् ४१ छन्दोरूपैश्चतैरश्वैर्यतश्चक्रन्ततःस्थितिः । कामरूपैःसकृद्युक्तैः
कामगैस्तैर्मनोजवैः ४२ हरितैरव्यथैःपिङ्गैरीश्वरैर्ब्रह्मवादिभिः । वाह्यतोऽनन्तरञ्चैव म
ण्डलन्दिवसःक्रमात् ४३ कल्पादौसम्प्रयुक्ताश्च वहन्त्याभूतसंप्लवम् । आवृतोबालखि
ल्यैश्च भ्रमतेरात्र्यहानितु ४४ ग्रथितैःस्ववचोभिश्च स्तूयमानोमहर्षिभिः । सेव्यतेगी
तनृत्यैश्च गन्धर्वाप्सरसाङ्गणैः ४५ पतङ्गैःपतगैरश्वैर्भ्राम्यमाणोदिवस्पतिः । वीथ्याश्र
याणिचरति नक्षत्राणितथाशशी ४६ ह्रासवृद्धीतथैवास्य रश्मयःसूर्यवत्स्मृताः । त्रिच
क्रोभयतोऽश्वश्च विज्ञेयःशशिनोरथः ४७ अपाङ्गर्भसमुत्पन्नो रथःसाश्वःससारथिः । स
हारैस्तैस्त्रिभिश्चक्रैर्युक्तःशुक्लैर्हयोत्तमैः ४८ दशभिस्तुरगैर्दिव्यैरसङ्गैस्तन्मनोजवैः । स
कृद्युक्तैरथेतस्मिन् वहन्तस्त्वायुगक्षयम् ४९ संग्रहीतारथेतस्मिन् श्वेतश्चक्षुःश्रवाश्च
वै । अश्वास्तमेकवर्णास्ते वहन्तेशङ्खवर्चसः ५० अजश्चत्रिपथश्चैव वृषोवाजीनरोह
यः । अंशुमान्सप्तधातुश्च हंसोव्योममृगस्तथा ५१ इत्येतेनामभिश्चैव दशचन्द्रमसो

किरणोंसे सबकी रक्षाकरताहै ३८ इस प्रकार एक चक्र करके सूर्य्य शीघ्रतासे गमनकरताहै सूर्य्य
हरित वर्णवाले अश्वों करके सदैव गमनकरताहै परन्तु अस्त समयमें तीन अश्वोंसे गमन करताहै
हजारों किरणोंसे जल पीताहै जब जलकी वृद्धि होजाती है तब छोडदेता है ३९ । ४० एक रात्रि
दिनमें सूर्य्य एक चक्रके द्वारा सात घोड़ोंसे सात समुद्रों समेत सातों द्वीपोंकी सब पृथ्वीभरको उल्लंघन
करजाताहै ४१ वह घोडे वेदरूपी हैं इस हेतुसे एक चक्रमें रथकी स्थिति है कामरूपी एक
बार जुड़नेवाले मनके वेगके समान चलनेवाले उनका मग अश्वोंसे सूर्य्य सदैव गमन करताहै ४२
हरित वर्णवाले व्यथासे रहित ईश्वर ब्रह्मवादी ऐसे सूर्य्यके घोड़े बाहर भीतरसे दिनके क्रम करके
सूर्य्यके मंडलको करते हैं ४३ यह घोड़े कल्पकी आदिमें जुड़ेहैं प्रलय काल तक लेचलते हैं बालखिल्य
ऋषियों से युक्तहोकर रात्रि दिन भ्रमते हैं ४४ ग्रथेहुए अपनेवचनों करके महर्षि सूर्य्यकी स्तुति करते
हैं गन्धर्व अप्सरा गणके गीत नृत्यादि से सेवितहैं यह सूर्य्य पक्षियोंके समान उड़ने वाले अश्वों
करके भ्रमायाजाताहै और वीथी के आश्रित होनेवाले नक्षत्रोंको प्राप्तहोताहै और इसी प्रकार चन्द्रमा
भी विचरताहै ४५ । ४६ चन्द्रमाकी भी घटने बढ़नेकी विधि सूर्य्यकेही समान वर्णन की है
चन्द्रमाके रथके तीन चक्रहैं और दोनों ओरको अश्वहैं ४७ चन्द्रमाका रथ अश्व और सारथी सहित
जलोंके गर्भमें उत्पन्नहुआहै वह रथ सुन्दर हारोंसे शोभित श्वेत अश्वोंसे अलंकृत और तीन चक्रों
से युक्तहै ४८ मनके समान वेगवाले दिव्य असंग दश अश्वोंसे युक्त चन्द्रमाकारथहै वह अश्व एक
वार रथमें युक्तहुए प्रलयकाल तक रहेंगे ४९ उस रथमें श्वेतवर्णवाला चक्षुश्रवा नामसारथीहै और
उसीके समान वर्ण युक्त शंखके सदृश कान्तिवाले अश्वहैं ५० अज, त्रिपथ, वृष, वाजी, नर, हय,

हयाः । एवंचन्द्रमसन्देवं वहन्तिस्मायुगक्षयम् ५२ देवैःपरिवृतःसोमः पितृभिःसहगच्छति । सोमस्यशुक्लपक्षादौ भास्करेपरतःस्थिते ५३ आपूर्यतेपरोभागः सोमस्यतुअहःक्रमात् । ततःपीतक्षयंसोमं युगपद्व्यापयन्रविः ५४ पीतम्पञ्चदशाहञ्च रश्मिनैकेन भास्करः । आपूरयन्ददौतेन भागम्भागमहःक्रमात् ५५ सुषुम्नाप्यायमानस्य शुक्लेवर्द्धन्तिवैकलाः । तस्माद्ध्रसन्तिवैकृष्णे शुक्लेह्याप्याययन्तिच ५६ इत्येवंसूर्य्यवीर्य्येण चन्द्रस्याप्यायतेतनुः । पौर्णमास्यांप्रदृश्येत शुक्लःसम्पूर्णमण्डलः ५७ एवमाप्यायतेसोमः शुक्लपक्षेष्वहःक्रमात् । ततोद्वितीयाप्रभृति बहुलस्यचतुर्दशी ५८ अपांसारमयस्येन्दो रसमात्रात्मकस्यच । पिवन्त्यम्बुमयंदेवा मधुसौम्यन्तथामृतम् ५९ सम्भृतन्त्वर्द्धमासेन अमृतंसूर्य्यतेजसा । भक्षार्थमागतंसोमं पौर्णमास्यामुपासते ६० एकरात्रंसुराःसार्द्धं पितृभिर्ऋषिभिश्चवै । सोमस्यकृष्णपक्षादौ भास्कराभिमुखस्यवै ६१ प्रक्षीयतेपरेह्यात्मा पीयमानकलाक्रमात् । त्रयश्चत्रिंशतासार्द्धं त्रयस्त्रिंशच्छतानितु ६२ त्रयस्त्रिंशत्सहस्राणि देवाःसोमंपिवन्तिवै । इत्येवंपीयमानस्य कृष्णेवर्द्धन्तिताःकलाः ६३ क्षीयन्तेचततःशुक्लाः कृष्णाह्याप्याययन्तिच । एवंदिनक्रमात्पीते देवैश्चापिनिशाकरे ६४ पीत्वार्द्धमासंगच्छन्ति अमावास्यांसुराश्चते । पितरश्चोपातिष्ठन्ति अमावास्यांनिशाकरम् ६५ ततःप

अंशुमान्, सप्तधातु, हंस, और व्योम, मृग इन दश नामोंवाले दश चन्द्रमाके घोड़े हैं और इसी रीतिसे वह घोड़े चन्द्रमाके रथको प्रलय कालतक खैंचते हैं ५१।५२ यह चन्द्रमा देवता और पितरों समेत गमन किया करताहै शुक्लपक्षकी आदि में जब सूर्य्य चन्द्रमासे परे स्थित होताहै तब चन्द्रमाका मंडल पूर्ण होताहै यह चन्द्रमाके दिनका क्रमहै इसके पीछे सूर्य्य चन्द्रमाको पानकर क्षयकिये हुए चन्द्रको एकबार ध्यावताहै यह सूर्य्य पन्द्रह दिनमें एक किरणसे चन्द्रमाको पीताहै फिर पूर्ण करताहुआ उस चन्द्रमाके अर्थ प्रतिदिन एक२ भाग देताहै ५३ । ५५ सुषुम्ना नाड़ीसे बढ़तेहुए चन्द्रमाकी कला शुक्लपक्षमें बढ़ती हैं इसलिये कृष्णपक्षमें कला घटती है और शुक्लपक्षमें बढ़तीहै ५६ इस प्रकार सूर्य्यके वीर्य्यसे चन्द्रमाका शरीर भी पुष्ट होताहै पूर्णमासीके दिन चन्द्रमाका संपूर्ण मंडल श्वेत होजाताहै ५७ इस प्रकारसे शुक्लपक्षमें दिनोंके क्रमसे चन्द्रमा पूर्ण होताहै तब द्वितीयासे चतुर्दशी पर्य्यन्त जलोंका सारभूत रसमात्रात्मक चन्द्रमाके जलरूपी मधुरअमृतको देवता पीते हैं सूर्य्यके तेज करके पन्द्रह दिनमें संचय कियेहुए अमृत के पीनेके लिये पूर्णमासीको चन्द्रमा की उपासना करते हैं ५८ । ६० एक रात्रि पर्य्यन्त देवतालोग पितर और ऋषियों समेत चन्द्रमाकी उपासना करते हैं कृष्णपक्षकी आदि में सूर्य्य के सन्मुखहुआ चन्द्रमाका मंडल क्षीण होजाता है और कला भी क्रम क्रमसे क्षीण होजाती हैं इस चन्द्रमाके अमृतको छत्तीसहज़ार तीनसौ तेंतीस ३६३३३ देवता पीते हैं इस पानकियेहुए चन्द्रमाकीकला कृष्णपक्षमें बढ़ती है फिर वही शुक्लपक्षमें क्षीण होतीहै फिर कृष्णपक्षमें पूर्णहोजाती है यह दिनके क्रमसे चन्द्रमाका अमृत पियाजाताहै फिर वह देवता अमृतको पीके अर्द्धमास होजानेपर अमावास्याको चलेजाते हैं और पितर अमावा-

ञ्चदशेभागे किञ्चिच्छेषेनिशाकरे। ततोऽपराह्लेपितरो यदन्यदिवसेपुनः ६६ पिवन्तिद्वि
कलङ्कालं शिष्टास्तास्तुकलास्तुयाः। विनिसृष्टन्त्वमावास्यां गभस्तिभ्यस्तदामृतम् ६७
अर्द्धमाससमाप्तौतु पीत्वागच्छन्तितेमृतम्। सौम्यावर्हिषदश्चैव अग्निष्वात्ताश्चयेस्मृ
ताः ६८ काव्याश्चैवतुयेप्रोक्ताः पितरःसर्वएवते । संवत्सराश्चयेकाव्याः पश्चाद्यावैद्वि
जाःस्मृताः ६९ सौम्याःसुतपसोज्ञेया सौम्यावर्हिषदस्तथा। अग्निष्वात्तास्त्रयश्चैव पि
तृसर्गस्थिताद्विजाः ७० पितृभिःपीयमानायां पञ्चदश्यान्तुवैकलाम्। यावच्चक्षीयतेतस्मा
द् भागःपञ्चदशस्तुसः ७१ अमावास्यांतथातस्य अन्तरापूर्यतेपरः। वृद्धिक्षयौवैपक्षादौ
षोडश्यांशशिनःस्मृतौ। एवंसूर्य्यनिमित्तेते क्षयवृद्धीनिशाकरे ७२ ॥

इति श्रीमत्स्यपुराणे पञ्चविंशत्यधिकशततमोऽध्यायः १२५ ॥

(सूत उवाच) ताराग्रहाणांवक्ष्यामि स्वर्भानोस्तुरथम्पुनः । अथतेजोमयःशुभ्रः
सोमपुत्रस्यवैरथः १ युक्तोहयैःपिशङ्गैस्तु दशभिर्वातरंहसैः। श्वेतःपिशङ्गःसारङ्गो नीलः
श्यामोविलोहितः २ श्वेतश्चहरितश्चैव पृषतोवृष्णिरेवच। दशभिस्तुमहाभागैरुत्तमै
र्वातसम्भवैः ३ ततोभौमरथश्चापि अष्टाङ्गःकाञ्चनःस्मृतः । अष्टभिर्लोहितैरश्वैः सध्व
जैरग्निसम्भवैः ४ सर्पतेऽसौकुमारोवै ऋजुवक्रानुवक्रगः । अतश्चाङ्गिरसोविद्वान् देवा
चार्यौबृहस्पतिः ५ गौराश्वेनतुरौप्येण स्यन्दनेनविसर्पति । युक्तेनाष्टाभिरश्वैश्च ध्वजै

स्याको चन्द्रमामें प्राप्तहोते हैं फिर चन्द्रमाका पन्द्रहवाँ भाग जब बाकी रहजाताहै तब दूसरे दिन
अपराह्णकालमें सायंकालके समय शेषरहे हुए अमृतको पीते हैं चन्द्रमाकी किरणों से संचितकिये
हुए अमृतको अर्द्धमासकी समाप्तिमें पीकर चलेजाते हैं सौम्य, वर्हिषद अग्निष्वात्ता और काव्यादिक
जो पितरहैं वह सब अमृतको पीते हैं वर्षके अधिपति जो काव्य पितर हैं वह द्विज कहाते हैं
सौम्यसंज्ञक पितर सुन्दर तपवाले हैं, वर्हिषद और अग्निष्वात्ता पितर सदैव पितृमार्गमें स्थितहुए पितरों
के ब्राह्मण कहलाते हैं ६१ । ७० पूर्णमासी के दिन चन्द्रमाकी कलाको पीकर जबतक कि चन्द्रमा
का पन्द्रहवाँ भाग क्षीण होताहै तबतक अमावास्या पर्य्यन्त चन्द्रमाके भीतर की कला पूर्ण होती है
पक्षके आदिमें चन्द्रमाके सोलहवें भागकी वृद्धिका क्षय होताहै इस प्रकार से सूर्य्यके कारणसे
चन्द्रमाकी वृद्धि क्षय वर्णन करी है ७१ । ७२ ॥

इति श्रीमत्स्यपुराणभाषाटीकायां पंचविंशत्यधिकशततमोऽध्यायः १२५ ॥

सूतजी कहते हैं कि अब मैं ताराग्रह और राहुकेरथको कहताहूं, सुन्दर तेजवाला श्वेत रथ बुध
काहै १ वह भूरेवर्ण वाले वायुके समान वेगयुक्त दशघोड़ों से युक्तहै अर्थात् श्वेत, पिशंग, सारंग, नील,
श्याम, विलोहित, शुभ्र, हरित, पृषत और वृष्णि इन दशमहाभाग उत्तम अश्वोंकरके युक्त है २।३
मंगलका रथ आठ अंगुलवाला सुवर्णका है वह लाल वर्णवाले आठघोड़े और अग्निसे उत्पन्न हुई
आठ लाल ध्वजाओं करके युक्त है ४ यह मंगल सरल और वक्र गतिसे चलनेवाला है इसके आगे
देवताओंके आचार्य्य बृहस्पति हैं ५ वह भूरे घोड़ों वाले चाँदीके रथमें बैठकर गमन करताहै और

रग्निसमुद्भवैः ६ अब्दंवसतियोराशौ स्वदिशन्तेनगच्छति। ततःशनैश्चरोऽप्यश्वैः सब
लैर्वातरंहसैः ७ कार्ष्णायसंसमारुह्य स्यन्दनंयात्यसौशनिः। स्वर्भानोस्तुतथाष्टाश्वाः
कृष्णावैवातरंहसः ८ रथन्तमोमयन्तस्य वहन्तिस्मसुदंशिताः। आदित्यनिलयोराहुः
सोमङ्गच्छतिपर्वसु ९ आदित्यमेतिसोमाच्च तमसांतेषुपर्वसु। ततःकेतुमतस्त्वश्वा अष्टौ
तेवातरंहसः १० पलालधूमवर्णाभाः क्षामदेहाःसुदारुणाः। एतेवाहाग्रहाणांवै मयाप्रो
क्तारथैःसह ११ सर्वेध्रुवेनिबद्धास्ते निबद्धावातरश्मिभिः। एतेवैभ्राम्यमाणास्ते यथायो
गंवहन्तिवै १२ वायव्याभिरदृश्याभिः प्रबद्धावातरश्मिभिः। परिभ्रमन्तितद्बद्धाश्चन्द्र
सूर्यग्रहादिवि १३ यावत्तमनुपर्यैति ध्रुवंवैज्योतिषांगणः। यथानद्युदकेनौस्तु उदकेनस
होह्यते १४ तथादेवगृहाणिस्युरुह्यन्तेवातरंहसा। तस्माद्यानिप्रगृह्यन्ते व्योम्निदेवगृ
हाइति १५ यावन्त्यश्चैवताराःस्युस्तावन्तोऽस्यमरीचयः। सर्वाध्रुवनिबद्धास्ता भ्रमन्त्यो
भ्रामयंतिच १६ तैलपीडंयथाचक्रं भ्रामतेभ्रामयंतिवै। तथाभ्रमंतिज्योतींषि वातबद्धा
निसर्वशः १७ अलातचक्रवद्यान्ति वातचक्रेरितानितु। यस्मात्प्रवहतेतानि प्रवहस्तेन
सस्मृतः १८ एवंध्रुवेनियुक्तोऽसौ भ्रमतेज्योतिषाङ्गणः। एषतारामयःप्रोक्तः शिशुमारेध्रु
वोदिवि १९ यदह्नाकुरुतेपापन्तं दृष्ट्वानिशिमुञ्चति। शिशुमारशरीरस्था यावन्त्यस्तारका

आठ घोड़ों से युक्त होकर अग्निसे उत्पन्न हुई ध्वजासे संयुक्तहै ६ यह मंगल वर्ष दिनतक राशि पर स्थित रहताहै अपने उस रथके द्वारा अपनी दिशामें जाता है इसके अनन्तर श्यामवर्ण वायु के समान वेगवाले अश्वोंसे युक्त लोहे के रथमें स्थित शनैश्चर गमन करताहै उस अंधकार रूप रथको वह घोड़े चलाते हैं राहुसूर्य्यके स्थानमें पहुंचकर ग्रहणमें चन्द्रमा को प्राप्त होताहै ७। ८ चन्द्रमाके पीछे अंधेरेके अन्तमें पर्व पर्व में सूर्य्य को प्राप्त होताहै उसके पीछे केतुको प्राप्त होजाताहै इस राहु के वायु के समान वेग वाले धूम्रवर्ण के आठ घोड़े हैं ९। १० पलाल और धुएं के समान रूप कृशदेह और महादारुण राहु के बाहन हैं इसरीतिसे यह मैंने इन ग्रहोंके बाहन कहे और रथभी कहे ११ यह सब ग्रह ध्रुवमें बंधेहुए हैं सो वायुके वेगसे भ्रमायेहुए योगके द्वारा लेचलते हैं १२ चन्द्रमा और सूर्य्यादिक ग्रह बद्धीहुई अदृश्य वायु समूहोंकरके भ्रमायेहुए ध्रुवमें बंधेहुए भ्रमते हैं १३ जबतक ताराओं का गण उस ध्रुवके पास रहताहै तब तक ऐसे भ्रमता है जैसे कि नदीके जल में नौका जलके साथही चलती है १४ जैसे कि देवताओंके गृह वायु के वेगसे हला करते हैं वैसेही वह जो आकाश में दीखते हैं सोई देवताओंके गृह कहातेहैं जितने तारागण हैं उतनीही ध्रुवकी किरण हैं सब किरणें ध्रुवमें बँधीहुईं भ्रमती हैं और ताराओंको भ्रमाती हैं १५। १६ जैसे कि तेलीका कोल्हू भ्रमतारहताहै उसीप्रकार वायु में बंधेहुए सब तारागण भ्रमतेहैं १७ वायु के चक्रसे प्रेरितहुए तारागण अलात चक्र के समान भ्रमते रहतेहैं जो वायु उनको चलाताहै वह वायु प्रवहसंज्ञक वायु कहाता है १८ इसप्रकार ध्रुवमें नियुक्त होकर ताराओं का गण भ्रमता है यह तारागण शिशुमार चक्र में जड़ा हुआ स्वर्ग में ध्रुवहै अर्थात् अचलहै १९ दिनका कियाहुआ पाप रात्रिमें शिशुमार चक्रके दर्शन करने से

स्तुताः २० वर्षाणिदृष्ट्वार्जीवेत तावदेवाधिकानितु । शिशुमाराकृतिंज्ञात्वा प्रविभागेतस
र्वशः २१ उत्तानपादस्तस्याथ विज्ञेयःसोत्तराहनुः । यज्ञोधरस्तुविज्ञेयो धर्मोमूर्द्धानमाश्रि
तः २२ हृदिनारायणःसाध्या अश्विनौपूर्वपादयोः । वरुणश्चार्यमाचैव पश्चिमेतस्यस
क्थिनी २३ शिश्नेसंवत्सरोज्ञेयो मित्रश्चापानमाश्रितः । पुच्छेऽग्निश्चमहेन्द्रश्च मरी
चिःकश्यपोध्रुवः २४ एषतारामयःस्तम्भो नास्तमेतिनवोदयम् । नक्षत्रचन्द्रसूर्याश्च ग्र
हास्तारागणैःसह २५ तन्मुखाभिमुखाःसर्वे चक्रभूतादिविस्थिताः । ध्रुवेणाधिष्ठिताश्चैव
ध्रुवमेवप्रदक्षिणम् २६ परियान्तिसुरश्रेष्ठं मेढीभूतंध्रुवंदिवि । आग्नीध्रकाश्यपानान्तु ते
षांसपरमोध्रुवः २७ एकएवभ्रमत्येष मेरोरन्तरमूर्द्धनि । ज्योतिषाञ्चक्रमादाय आकर्षंस्त
मधोमुखः २८ मेरुमालोकयन्नेव प्रतियातिप्रदक्षिणम् २९ ॥

इति श्रीमत्स्यपुराणे षड्विंशत्यधिकशततमोऽध्यायः १२६ ॥

(ऋषय ऊचुः) यदेतद्भवताप्रोक्तं श्रुतंसर्वमशेषतः । कथंदेवगृहाणिस्युः पुनर्ज्योतीं
षिवर्णय १ (सूत उवाच) एतत्सर्वंप्रवक्ष्यामि सूर्य्याचन्द्रमसोर्गतिम् । यथादेवगृहाणि
स्युः सूर्याचन्द्रमसोस्तथा २ अग्नेर्व्युष्टौरजन्यांवै ब्रह्मणाव्यक्तयोनिना । अव्याकृतमिदं
त्वासीन्नैशेनतमसावृतम् ३ चतुर्भूतावशिष्टेऽस्मिन् ब्रह्मणासमधिष्ठिते । स्वयम्भूर्भगवां

नष्ट होजाताहै शिशुमार के शरीर में स्थित हुए जितने ताराओं के दर्शन करताहै उतनेही वर्षों तकवह
अधिक जीताहै शिशुमार के विभागोंकी आकृति जाननेवाले की भी दीर्घ आयु होती है २० । २१
उत्तानपाद तो शिशुमार की ऊपर वाली ठोढ़ी है यज्ञ नीचेका ओठहै धर्म मस्तकहै हृदयमें नारायण
है इसके प्रथम चरण में साध्यसंज्ञक देवता और अश्विनीकुमार हैं वरुण और अर्य्यमा यह पिछले
चरणकी जंघाहै २२।२३ लिंगमें वर्ष गुदामें मित्रदेवता और पूंछमें अग्नि,इन्द्र,मरीचि, कश्यप और
ध्रुवहै २४ यह तारे नतो कभी अस्तहोते न उदय होते किन्तु स्तंभरूपही जहां के तहां बने रहते हैं
नक्षत्र, चन्द्रमा, सूर्य्यग्रह और अन्य तारागण वह सब चक्र रूपहो शिशुमार के अंगवाले तारों के सन्मुख
होकर आकाशमें स्थित रहते हैं सब तारागण ध्रुवकरकेही अधिष्ठित होकर ध्रुवकीही प्रदक्षिणा
करते हैं मेंडके समान स्थित होकर ध्रुवके चारों ओर फिरते हैं और आग्नीध्र और काश्यप इन ऋषियोंका
परमध्रुव दूसराहै वह ध्रुव अकेलाही सुमेरु पर्व्वतके मस्तकपर भ्रमण करताहै अर्थात ज्योति
गणोंके चक्रको लेकर नीचेको मुख कियेहुए खैंचताहुआ और सुमेरु पर्व्वतको देखता हुआ प्रदक्षिणा
करताहै २५। २६ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांषड्विंशत्यधिकशततमोऽध्यायः १२६ ॥

ऋषियोंने पूछा हे सूतजी जो आपने कहा सो हमने अच्छेप्रकार से जाना परन्तु यह न जाना
कि सूर्य्य चन्द्रमा आदिक देवताओंके घर कैसे हैं इसको भी आप कहिये–सूतजी बोले कि अब मैं
सूर्य्य चन्द्रमाकी सब गतिको कहताहूं और जैसे कि अन्य देवताओं के घरहैं उसी प्रकारके सूर्य्य चन्द्रमाके
भी गृह हैं अप्रकटयोनिवाले ब्रह्माजीने अग्नि की वृष्टि रात्रिमें रात्रिके तमोगुणसे आवृत

स्तत्र लोकतत्त्वार्थसाधकः ४ खद्योतरूपीविचरन्नाविर्भावंव्यचिन्तयत् । ज्ञात्वाग्निंकल्प
कालादावपःपृथ्व्यांऽचसंश्रिताः ५ ससम्भृत्यप्रकाशार्थंत्रिधातुल्योऽभवत्पुनः । पाचको
यस्तुलोकेऽस्मिन् पार्थिवःसोऽग्निरुच्यते ६ यश्चासौतपतेसूर्य्ये शुचिरग्निश्चसस्मृतः ।
वैद्युतोजठरःसौम्यो वैद्युतश्चाप्यनिन्धनः ७ तेजोभिश्चाप्यतेकश्चित् कश्चिदेवाप्यनि
न्धनः । काष्ठेन्धनस्तुनिर्मथ्यः सोऽद्भिःशाम्यतिपावकः ८ अर्चिष्मान्पचनोऽग्निस्तु नि
ष्प्रभःसौम्यलक्षणः । यश्चासौमण्डलेशुक्ले निरूष्माचप्रकाशते ९ प्रभासौरीतुपादेन ह्य
स्तंयातिदिवाकरे । अग्निमाविशतेरात्रौ तस्मादग्निःप्रकाशते १० उदितेतुपुनःसूर्य्ये ऊ
ष्माग्नेस्तुसमाविशत् । पादेनतेजसश्चाग्नेस्तस्मात्सन्तपतेदिवा ११ प्रकाश्यश्चतथो
ष्णश्च सौर्याग्नेयेतुतेजसी । परस्परानुप्रवेशादाप्यायेतेदिवानिशम् १२ उत्तरेचैवभूम्यर्द्धे
तथाह्यस्मिंस्तुदक्षिणे । उत्तिष्ठतिपुनःसूर्य्ये रात्रिमाविशतेह्यपः १३ तस्मात्ताम्राभवन्त्या
पो दिवारात्रिप्रवेशनात् । अस्तङ्गतेपुनःसूर्य्ये अहोवैप्रविशत्यपः १४ तस्मान्नक्तंपुनःशु
क्ला ह्यापोदृश्यन्तिभासुराः । एतेनक्रमयोगेन भूम्यर्द्धेदक्षिणोत्तरे १५ उदयास्तमयेह्यत्र
अहोरात्रंविशत्यपः । यश्चासौतपतेसूर्य्यः सोऽपःपिबतिरश्मिभिः १६ सहस्रपादस्त्वेषो
ऽग्नी रक्तकुम्भनिभस्तुसः । आदत्तेसतुनाडीनां सहस्रेणसमन्ततः १७ आपोनदीसमु

हुआ यह सब स्थावर जंगम प्रकट कियाहै १ । ३ कल्पकी आदिमें ब्रह्माजी इन चारप्रकार के भूतों
के अधिष्ठाताहुए फिर लोकोंके तत्त्व सिद्धकरनेकेनिमित्त पटबीजनेकारूप करके गमन करतेहुए इस
संसारके प्रकट होनेकी चिन्ता करते भये फिर कल्पकी आदिमें अग्निको जल और पृथ्वीमें जानकर
प्रकाश करनेके निमित्त इकट्ठा करतेभये फिर तीनप्रकारसे समान अग्नि उत्पन्न होताभया संसार
में जो पाचक अर्थात् पकानेवाला अग्नि है वह पृथ्वी से उत्पन्न हुआ है ४ । ६ जो अग्नि सूर्य्य
में तपताहै वह शुचि अग्नि कहाताहै बिजली में होनेवाला जठरअग्नि कहाताहै वह इन्धनसे रहि-
तहै कोई अग्नि अपने तेजोंकरके बढ़ताहै कोई जलकेही इन्धनसे बढ़ताहै जो अग्नि काष्ठ इन्धनके
मथनेसे होताहै वह जलोंसे शान्त होजाताहै ७ । ८ पकानेवाला अग्नि ज्वालावाला है जो कान्ति
रहितहै वह सौम्य अग्नि कहाता है जो सूर्य्यके श्वेतमंडलमें ज्वालासे रहित अग्नि प्रकाशित हो
रहाहै वह सूर्य्यकी प्रभा कही है जब सूर्य्य अस्त होजाताहै तब वह प्रभा अग्निमें प्रवेश होजाती है
इसी हेतुसे रात्रिको अग्निमें प्रकाश होताहै ९ । १० जब सूर्य्यका उदय होजाताहै तब अग्नि का
तेज और प्रकाशका भाग सूर्य्यमें प्रवेश कर जाताहै इसी कारण दिनमें सूर्य्य तपताहै ११ सूर्य्य का
और अग्निका प्रकाश इन दोनोंकी गरमाई वा तेज परस्परमें प्रवेशित होनेसे रात्रि दिन बढ़तेहैं १२
भूमिके उत्तरार्द्ध भागमें और इस दक्षिणभागमें सूर्य्यका उदय होताहै फिर रात्रिको जलोंमें प्रवेश
होजाताहै १३ इसी हेतुसे दिनरात्रियों के प्रवेश होजानेसे जल ताँबेके समान होते हैं जब सूर्य अ-
स्त होजाते हैं तब रात्रिमें चमकनेवाले सफेद जल दीखते हैं इसी क्रम योगसे भूमिका दक्षिणोत्तर
अर्द्धभाग उदय अस्त समयमें अहोरात्र जलोंमें प्रवेश होताहै सूर्य्य जब तपताहै तब अपनी किरणों

द्रेभ्यो ह्रदकूपेभ्यएवच । तस्यरश्मिसहस्रेण शीतवर्षोष्णनिःस्रवः १८ तासाञ्चतुःशतं ना
ड्यो वर्षन्तेचित्रमूर्तयः । चन्दनाश्चैवमेध्याश्च केतनाश्चेतनास्तथा १९ अमृताजीवनाः
सर्वा रश्मयोवृष्टिसर्जनाः । हिमाद्भवोश्चतान्योन्यं रश्मयस्त्रिंशतःस्मृताः । चन्द्रताराग्रहैः
सर्वैः पीताभानोर्गभस्तयः २० एतामध्यास्तथान्याश्च ह्लादिन्योहिमसर्जनाः । शुक्लाश्चक
कुभश्चैव गावोविश्वसृजश्चयाः २१ शुक्लास्तानामतःसर्वास्त्रिंशत्याधर्म्मसर्जनाः । संविभ्र
तिहिताःसर्वाः मनुष्यान्देवताःपितॄन् २२ मनुष्यानौषधीभिश्च स्वधयाचपितॄनपि । अमृ
तेनसुरान्सर्वान् संततम्परितर्पयन् २३ वसंतेचैवग्रीष्मेच शनैःसंतपतेत्रिभिः । वर्षासुचश
रद्येवं चतुर्भिःसंप्रवर्षति २४ हेमंतेशिशिरेचैव हिमोत्सर्गस्त्रिभिःपुनः । औषधीषुबलंधत्ते
सुधाञ्चस्वधयापुनः २५ सूर्योऽमरत्वममृते त्रयस्त्रिषुनियच्छति । एवंरश्मिसहस्रन्तु सौरंलो
कार्थसाधनम् २६ भिद्यतेऋतुमासाद्य सहस्रंबहुधापुनः । इत्येवंमण्डलंशुक्लं भास्वरंलोक
संज्ञितम् २७ नक्षत्रग्रहसोमानां प्रतिष्ठायोनिरेवच । चन्द्रऋक्षग्रहाःसर्वे विज्ञेयाःसूर्यस
म्भवाः २८ सुषुम्णासूर्यरश्मिर्या क्षीणंशशिनमेधते । हरिकेशःपुरस्तात्तु योवैनक्षत्रयोनि
कृत् २९ दक्षिणेविश्वकर्मातु रश्मिराप्याययद्बुधम् । विश्वावसुश्चयःपश्चाच्छुक्रयोनि

से जलोंको पीताहै यह सूर्य्य हज़ार चरणवाला अग्निहै लाल कलशके समान कान्ति वालाहै हज़ारों
नाड़ियों के द्वारा चारों ओरसे नदी समुद्र कूप और सरोवर आदिके जलोंको ग्रहण कर लेता
है उसकी हज़ारों किरणों से शीत उष्णता और वर्षा होती है १४ । १८ सूर्य्यकी चारसौ नाड़ी
रूप किरणें विचित्र मूर्त्तिवाली हैं यही वर्षा करती हैं, चन्दना मेध्या, केतना चेतना, अमृता और
जीवना यह सब किरणें वर्षा रचनेवाली हैं शीत से उत्पन्न होनेवाली तीस किरणें हैं उन कि-
रणों को चन्द्रमा और तारागण आदिक पीते हैं १९ । २० यह मध्यकी किरणें और ह्लादिनी
नाम किरणें शीतको उत्पन्न करनेवाली हैं शुक्ला और ककुभ नाम किरणें विश्वको रचनेवाली
हैं शुक्ला नामकी तीस किरण हैं वह सब धर्म की रचनेवाली हैं और मनुष्य देवता पितर इन
की पालन करनेवाली हैं २१।२२ मनुष्योंको औषधियों करके पितरोंको स्वधाकरके और देवताओंको
स्वाहाकरके तृप्त करती हैं २३ वसन्त और ग्रीष्मऋतुमें सूर्य्य तीन किरणों से धीरे २ तपताहै, वर्षा
और शरद्ऋतुमें चार किरणों से बरसताहै २४ हेमन्त शिशिर ऋतुमें तीन किरणों से शीत बरसा-
ता है औषधियों में बलधारण करता है स्वधा करके अमृतधारण करता है २५ अमृतकी वृद्धि तीन
किरणोंसे होती है इसप्रकार सूर्य्यकी हज़ारों किरणें संसार के प्रयोजनों की सिद्ध करनेवाली हैं २६
ऋतु के आश्रय होकर सूर्य्यका मंडल अनेकप्रकारके भेदोंको प्राप्त होजाताहै इसप्रकार से सूर्य्य भा-
स्वर शुक्ल मंडललोक संज्ञक कहाताहै २७ यही नक्षत्र, ग्रह और चन्द्रमाकी प्रतिष्ठा और योनि है
चन्द्रमा, नक्षत्र और सबग्रह सूर्य्यही से उत्पन्नहुए जानो २८ सूर्य की सुषुम्णा किरणोंकरके क्षीण
हुआ चन्द्रमा बढ़ताहै पूर्वदिशामें हरिकेश नाम सूर्य्य है वह नक्षत्रोंकी उत्पत्ति करनेवाला है २९
दक्षिणमें विश्वकर्मा नाम सूर्य्य है वह बुधकी किरणोंका बढ़ानेवाला है, पश्चिममें विश्वावसुनाम

संवर्द्धनस्तुयोरश्मिः सयोनिर्लोहितस्यच । षष्ठस्तुह्यश्वभूरश्मिर्योनिः
श्चसस्मृतः ३० संवर्द्धनस्तुयोरश्मिः सयोनिर्लोहितस्यच । नक्षीयतेयतस्तानि तस्मा
सहिबृहस्पतेः ३१ शनैश्चरंपुनश्चापि रश्मिराप्यायतेसुराट् । नक्षीयतेयतस्तानि तस्मा
न्नक्षत्रतास्मृता ३२ क्षेत्राण्येतानिवैसूर्यमापतन्तिगभस्तिभिः । क्षेत्राणितेषामादत्ते सू
र्यौनक्षत्रतातत: ३३ अस्माल्लोकादमुंलोकं तीर्णानांसुकृतात्मनाम् । तारणात्तारकाह्ये
ताः शुक्लत्वाच्चैवशुक्तिकाः ३४ दिव्यानांपार्थिवानाञ्च वंशानाञ्चैवसर्वशः । तपसस्तेजसो
योगादादित्यइतिगद्यते ३५ स्रवतिःस्यन्दनार्थे धातुरेषनिगद्यते । स्रवणात्तेजसश्चैव
तेनासौसवितास्मृतः ३६ बह्वर्थश्चन्दइत्येष प्रधानोधातुरुच्यते । शुक्लत्वेह्यमृतत्वेच शी
तत्वेह्लादनेऽपिच ३७ सूर्याचन्द्रमसोर्दिव्ये मण्डलेभास्वरेखगे । जलतेजोमयेशुक्ले वृत्त
कुम्भनिभेशुभे ३८ वसन्तिकर्म्मदेवास्तु स्थानान्येतानिसर्वशः । मन्वन्तरेषुसर्वेषु ऋषि
सूर्यग्रहादयः ३९ तानिदेवगृहाणिस्युः स्थानाख्यानिभवन्तिहि । सौरंसूर्योऽविशत्स्थानं
सौम्यंसोमस्तथैवच ४० शौक्रंशुक्रोऽविशत्स्थानं षोडशारंप्रभास्वरम् । बृहस्पतिर्बृहत्व
ञ्च लोहितञ्चापिलोहितः ४१ शनैश्चरोऽविशत्स्थानमेवंशानैश्चरंतथा । बुधोऽपिवैबुध
स्थानं भानुंस्वर्भानुरेवच ४२ नक्षत्राणिचसर्वाणि नाक्षत्राण्यविशन्तिच । ज्योतींषिसुकृ
तामेते ज्ञेयादेवगृहास्तुवै ४३ स्थानान्येतानितिष्ठन्ति यावदाभूतसंप्लवम् । मन्वन्तरेषुस

है वह शुक्र की योनि कहाहै ३० संवर्धन नाम किरण मंगलकी योनिहै छठी अश्वभू नाम किरण बृहस्पति को उत्पन्न करनेवाली है ३१ सुराट् नाम किरण शनैश्चरकी पुष्टि करनेवाली है जो कभी क्षीण नहीं होते हैं वह नक्षत्र कहाते हैं ३२ यह सब क्षेत्र किरणों करके सूर्यको प्राप्त होते हैं सूर्य्य उनके क्षेत्रोंको ग्रहण करता है इसहेतुसे सूर्य्य में नक्षत्रता है ३३ जो इसलोकसे तिरनेकी इच्छा करनेवाले सुकृती पुरुषहैं उनको तारदेते हैं इसी हेतुसे तारका कहते हैं और श्वेत होनेसे शुक्तिका कहते हैं ३४ दिव्य पार्थिव वंशों के तपतेजके योग होनेसे आदित्य कहते हैं स्रवति में स्रवधातु झिरने अर्थ में वर्त्तता है सो तेजके झिरनेसे सविता कहते हैं ३५।३६ चन्द धातु बहुत अर्थों में प्रसिद्ध है अर्थात् शुक्ल अर्थ में, अमृत अर्थ में शीत अर्थ में और ह्लाद अर्थ में इस धातु से चन्द्रमा होता है ३७ आकाश में चलनेवाले सूर्य्य और चन्द्रमाके मंडल दिव्य प्रकाशवाले जलवाले अग्निवाले होकर शुक्ल कलश के समानगोल और सुन्दर हैं ३८ इन स्थानों में कर्मरूपी देवता बसते हैं सब मन्वन्तरों में ऋषि सूर्य्य और ग्रहादि देवता होते हैं वही देवताओंके गृह और स्थानके अधिपाति हैं सूर्य्य देवता सूर्य्य मण्डल स्थानमें प्रवेशकररहाहै चन्द्रमा सोम मण्डलमें प्रवेशकर रहाहै ३९ । ४० शुक्र के मण्डलमें शुक्र प्रवेशकररहाहै यह शुक्रका मण्डल पंखड़ियोंवाला होकर बड़ी कान्तिसे भरा हुआ है बृहस्पति के मंडलमें बृहस्पाति और मंगल के मंडलमें मंगल प्रवेशकर रहाहै ४१ शनैश्चरके मंडलमें शनैश्चर बुधके में बुध और राहुके में राहु प्रवेशकररहाहै सब नक्षत्र सब नक्षत्रों में प्रवेशकर रहे हैं इसप्रकार जो ज्योतिस्वरूप मण्डल दीखते हैं वह देवताओं के घर समझना ४२ । ४३ इन स्थानों में पूर्व्वलिखे देवता प्रलयकाल तक ठहरते हैं सब मन्वन्तरों में इन स्थानों के यही अभि-

येषु देवस्थानास्मितानिवै ४४ अभिमानेनतिष्ठन्ति तानिदेवाःपुनःपुनः। अतीतास्तुसहातीतैर्भाव्याभाव्यैःसुरैःसह ४५ वर्तन्तेवर्त्तमानैश्च सुरैःसार्द्धन्तुस्थानिनः। सूर्योदेवोविवस्वांश्च अष्टमस्त्वदितेःसुतः ४६ द्युतिमान्धर्म्मयुक्तश्च सोमोदेवोवसुःस्मृतः। शुक्रोदैत्यस्तुविज्ञेयो भार्गवोस्तुसुरयाजकः ४७ बृहस्पतिर्बृहत्तेजा देवाचार्योऽङ्गिरःसुतः। बुधोमनोहरश्चैव शशिपुत्रस्तुसस्मृतः ४८ शनैश्चरोविरूपश्च संज्ञापुत्रोविवस्वतः। अग्निर्विकेश्यांजज्ञेतु युवाऽसौलोहिताधिपः ४९ नक्षत्रनाम्न्यःक्षेत्रेषु दाक्षायण्यःसुताःस्मृताः। स्वर्भानुःसिंहिकापुत्रो भूतसंसाधनोसुरः ५० चन्द्रार्कग्रहनक्षत्रेष्वभिमानीप्रकीर्त्तितः। स्थानान्येतानिचोक्तानि स्थानिन्यश्चैवदेवताः ५१ शुक्लमग्निसमंदिव्यं सहस्रांशोर्विवस्वतः। सहस्रांशुत्विषःस्थानमन्मयन्तेजसंतथा ५२ आशास्थानंमनोज्ञस्य रविरश्मिगृहेस्थितम्। शुक्रःषोडशरश्मिस्तु यस्तुदेवोह्यपोमयः ५३ लोहितोनवरश्मिस्तु स्थानंरक्तन्तुतस्यवै। बृहद्द्वादशरश्मीकं हरिद्राभन्तुवेधसः ५४ अष्टरश्मिशनेस्तत्तुकृष्णंवृद्धमयस्मयम्। स्वर्भानोस्त्वायसंस्थानं भूतसन्तापनालयम् ५५ सुकृतामाश्रयास्तारा रश्मयस्तुहिरण्मयाः। तारणात्तारकाह्येताः शुक्लत्वाच्चैवतारकाः ५६ नवयोजनसाहस्रो विष्कम्भःसवितुःस्मृतः। मण्डलंत्रिगुणंचास्य विस्तारोभास्करस्यतु ५७ द्विगुणःसूर्य्यविस्ताराद्विस्तारःशशिनःस्मृतः। त्रिगुणंमण्डलंचास्य वैपुल्याच्छशिनःस्मृतम् ५८ सर्वोपरि निसृष्टानि मण्डलानितुतारकाः। योजनार्द्धप्रमाणानि ताभ्योऽन्यानिगणानितु ५९

मानी देवता बारंबार स्थित होते हैं जैसे व्यतीत होगये हैं उन्होंकेही सदृश होनेवाले देवता हैं ४४। ४५ वर्त्तमानोंके साथ वर्त्तमान देवता वर्त्तरहे हैं विवस्वान् नाम आठवां सूर्य्य अदितिका पुत्र है ४६ कान्तिवाला धर्मयुक्त चन्द्रदेवता वसुनाम वालाहै शुक्र भार्गव और दैत्योंका पुरोहितहै ४७ बृहस्पति बड़ा तेजस्वी देवताओंका आचार्य्य है और अंगिरा ऋषिका पुत्रहै, बुध बड़ा मनोहर रूप और चन्द्रमा का पुत्रहै ४८ शनैश्चर विरूपहैं संज्ञास्त्री में सूर्य्य के सकाशसे हुआहै, मंगल अग्निके सकाश से पृथ्वी में हुआ है ४९ यह सब नक्षत्र दक्षकी सन्तानहैं, राहु सिंहिका राक्षसी का पुत्रहोकर दैत्यहै ५० इसप्रकार से चन्द्रमा, सूर्य्य, ग्रह और नक्षत्र इन सब पर एक एक अभिमानी देवता कहा है यह कहे हुए मंडल तो स्थान हैं और इनके स्थानी देवता स्थान के पति हैं ५१ और शुक्र अग्निके समान महा कान्तिवाला दिव्य हज़ार किरणोंसे युक्त ऐसा तेजस्वरूप स्थान सूर्य्यका है ५२ सूर्य्य की किरणोंसे और सूर्य्य की दशामें बुधका स्थान है शुक्र सोलह किरणोंवाला होकर जलका स्थानहै ५३ मंगल नौ किरणोंवाला है उसका स्थान लालहै, बृहस्पति बारह किरणोंवाला और हरिद्राके समान पीतवर्णहै ५४ शनैश्चर की आठ किरणहैं उसका कालावर्ण और लोहेका स्थानहै राहुका लोहे का स्थान है और सब भूतों को संताप देनेवालाहै ५५ सब तारे सुकृतोंके आश्रयहैं सुवर्ण के सदृश किरणों वाले होकर तारण करनवाले हैं इसी से उनको तारका कहते हैं श्वेततासे शुक्किका कहाते हैं ५६ नौ ९००० हज़ार योजनमें सूर्य्य मंडलके स्तम्भहैं सत्ताईस हज़ार २७००० योजन में सूर्य्य मंडल का

तुल्योभूत्वातुस्वर्भानुस्तदधस्तात्प्रसर्पति । उद्धृत्यपार्थिवीञ्छायां निर्मितांमण्डलाकृति
म् ६० ब्रह्मणानिर्मितंस्थानं तृतीयन्तुतमोमयम् । आदित्यात्सतुनिष्क्रम्य सोमंगच्छति
पर्वसु ६१ आदित्यमेतिसोमाच्च पुनःसौरेषुपर्वसु । स्वभासातुदतेयस्मात् स्वर्भानुरिति
सस्मृतः ६२ चन्द्रतःषोडशोभागो भार्गवस्यविधीयते । विष्कम्भान्मण्डलाच्चैव योजना
नान्तुसस्मृतः ६३ भार्गवात्पादहीनश्च विज्ञेयोवैबृहस्पतिः । बृहस्पतेःपादहीनौ केतुवक्रावुभौस्मृतौ
६४ विस्तारमण्डलाभ्यान्तु पादहीनस्तयोर्बुधः । तारानक्षत्ररूपाणि व-
पुष्मन्तीहयानिवै ६५ बुधेनसमरूपाणि विस्तारान्मण्डलात्तुवै । तारानक्षत्ररूपाणि
हीनानितुपरस्परम् ६६ शतानिपञ्चचत्वारि त्रीणिद्वेचैकमेवच । सर्वोपरिनिसृष्टानि
मण्डलानितुतारकाः ६७ योजनार्द्धप्रमाणानि तेभ्योह्रस्वंनविद्यते । उपरिष्टात्तुयेतेषां
ग्रहायेक्रूरसात्विकाः ६८ सौरश्चाङ्गिरसोवक्रो विज्ञेयामन्दचारिणः । तेभ्योऽधस्तात्तुचत्वा
रः पुनश्चान्येमहाग्रहाः ६९ सोमःसूर्य्योबुधश्चैव भार्गवश्चेतिशीघ्रगाः । यावन्तिचैवऋ
क्षाणि कोट्यस्तावन्तितारकाः ७० सर्वेषान्तुग्रहाणांवै सूर्य्योऽधस्तात्प्रसर्पति । विस्तीर्णं
मण्डलंकृत्वा तस्योर्ध्वंचरतेशशी ७१ नक्षत्रमण्डलंचापि सोमादूर्ध्वंप्रसर्पति । नक्षत्रेभ्यो
बुधश्चोर्ध्वं बुधाच्चोर्ध्वन्तुभार्गवः ७२ वक्रस्तुभार्गवादूर्ध्ववक्रादूर्ध्वंबृहस्पतिः । तस्माच्छनै
श्चरश्चोर्ध्वं देवाचार्योपरिस्थितः ७३ शनैश्चरात्तथाचोर्ध्वं ज्ञेयंसप्तर्षिमण्डलम् । सप्त

विस्तारहै ५७ सूर्य्यके विस्तारसे चन्द्रमा का विस्तार दूनाहै और सूर्य्य के मण्डलकी चौड़ाई से चन्द्रमा
का मंडल तिगुना है ५८ सब से ऊपर ताराओंका मंडलहै और अन्य तारागण दो कोश मंडल
के प्रमाण वाले हैं ५९ राहु शय्यारूप होकर नीचेको चला आताहै फिर मंडलकी आकृति के समान
रचीहुई पृथ्वीकी छायाको उठाकर ब्रह्माके रचेहुए तीसरे तमोमय स्थानको प्राप्तहो सूर्य्यको उल्लंघन
करता हुआ पर्वों में चन्द्रमाको प्राप्त होताहै ६० । ६१ सूर्य्य ग्रहणमें चन्द्रमा में होकर सूर्य्यको प्राप्त
होजाताहै और वहां जाकर अपनी कान्तिसे बाधाकरताहै इसीसे उसका नाम स्वर्भानु कहते हैं चन्द्रमाका
सोलहवां भाग शुक्र को कहाहै यह सब भाग स्तंभ और मंडलोंके कहेहैं ६२।६३ शुक्रसे एक भागहीन
बृहस्पति का है, बृहस्पति से एक पादहीन राहु और केतुका जानो यह राहु केतु सदैव वक्र
रहते हैं ६४ इनके विस्तार और मंडलोंसे एक पादहनि बुध है. तारा और नक्षत्रों के रूप जितने
शरीर युक्त हैं वह सब बुधके समान हैं यह विस्तार और मण्डलों का प्रमाणहै तारा और नक्षत्रों के
रूप परस्परमें हीन हैं ६५ । ६६ पांचसौ चारसौ तीनसौ दोसौ और एकसौ इतने ताराओंके मंडल
सबसे ऊपरहैं वह मंडल दो दो कोशके प्रमाणमें हैं, उनमें कोई भी तारा छोटा नहीं है उनसे
ऊपर जो क्रूर ग्रह हैं वह शनैश्चरादिक ग्रह मन्द २ चलनेवाले और वक्र गतिवाले हैं उनसे नीचे
चार महाग्रह हैं ६७ । ६९ सोम सूर्य्य बुध और शुक्र यह चारों शीघ्र चलनेवाले हैं जितने करोड़
नक्षत्र हैं उतनेही तारे हैं उनके ऊपर विस्तीर्ण मंडल करके चन्द्रमा विचरता है ७० । ७१ नक्षत्रों
का मंडल चन्द्रमासेभी ऊपर गमन करता है नक्षत्रों से ऊपर बुधहै बुधसे ऊपर शुक्रहै शुक्रसे ऊपर

र्षिभ्योध्रुवश्चोर्ध्वं समस्तंत्रिदिवंध्रुवे ७४ द्विगुणेषुसहस्रेषु योजनानांशतेषुच । गृहान्तर
मथैकैकमूर्ध्वंनक्षत्रमण्डलात् ७५ताराग्रहान्तराणिस्युरुपर्य्युपर्यधिष्ठितम् । ग्रहाश्चचन्द्र
सूर्य्यौच दिविदिव्येनतेजसा ७६ नक्षत्रेषुचयुज्यन्ते गच्छन्तोनियतक्रमात् । चन्द्रार्क
ग्रहनक्षत्रा नीचोच्चगृहमाश्रिताः ७७ समागमेचभेदेच पश्यन्तियुगपत्प्रजाः । परस्परं
स्थिताह्येवं युज्यन्तेचपरस्परम् ७८ असङ्करेणविज्ञेयस्तेषांयोगस्तुवैबुधैः । इत्येवंसन्नि
वेशोवै पृथिव्याज्योतिषाञ्चयः ७९ द्वीपानामुदधीनाञ्च पर्वतानांतथैवच । वर्षाणाञ्च
नदीनाञ्च येचतेषुवसन्तिवै ८० इत्येषोऽर्कवशेनैव सन्निवेशस्तुज्योतिषाम् । आवर्त्तः
सान्तरोमध्ये संक्षिप्तश्चध्रुवात्तुसः ८१ सर्वतस्तेषुविस्तीर्णो वृत्ताकारइवोच्छ्रितः । लोक
संव्यवहारार्थमीश्वरेणविनिर्मितः ८२ कल्पादौबुद्धिपूर्वन्तु स्थापितोऽसौस्वयम्भुवा । इत्ये
षसंन्निवेशोवैसर्वस्यज्योतिरात्मकः ८३ वैश्वरूपंप्रधानस्य परिणाहोऽस्ययःस्मृतः । तेषां
शक्यंन सङ्ख्यातुं याथातथ्येनकेनचित् । गतागतंमनुष्येण ज्योतिषांमांसचक्षुषा ८४ ॥

इति श्रीमत्स्यपुराणेसप्तविंशत्यधिकशततमोऽध्यायः १२७॥

(ऋषय ऊचुः) कथंजगामभगवन् ! पुरारित्वंमहेश्वरः । ददाहचकथंदेवस्तन्नोविस्त
रतोवद १ पृच्छामस्त्वांवयंसर्वे बहुमानात्पुनःपुनः । त्रिपुरन्तद्यथादुर्गं मयमायाविनि
र्मितम् । देवेनैकेषुणादग्धं तथानोवदमानद ! २ (सूत उवाच) शृणुध्वंत्रिपुरंदेवो यथा

मंगल है मंगल से ऊपर बृहस्पति है बृहस्पति से ऊपर शनैश्चर है ७२ । ७३ शनैश्चर से ऊपर सप्तऋषियोंका मंडलहै सप्तऋषियों से ऊपर ध्रुव है ध्रुवही में सम्पूर्णस्वर्ग है ७४ हज़ार धनुष और सौयोजनोंपर एक एक गृहके मंडलका अन्तरहै ७५ तारा और ग्रहोंके अन्तर ऊपर ऊपर जानना और चन्द्र सूर्य्यादिक ग्रह स्वर्गमें दिव्य तेजकरके नक्षत्रोंपर नियत क्रमसे गमन करते हैं चन्द्रमा सूर्य्य ग्रह नक्षत्र नीच और उच्चस्थानपर जब प्राप्त होयँ वा दो ग्रहोंका समागमन अथवा भेद होताहै तब परस्परमें स्थित होकर संयुक्त होतेहैं पण्डित लोगोंको इन ग्रहोंका योग संकर जानना चाहिये अर्थात् परस्पर नहीं मिलते हैं इस प्रकारसे पृथ्वी और तारागणोंका सन्निवेश और द्वीप, समुद्र, पर्व्वत तथा खण्ड और नदियोंका सन्निवेश तथा खंडोंमें जो निवास करते हैं उनका सन्निवेश यह सब सूर्य्यकेही बशसे प्रकाशित होरहाहै मध्यमें ध्रुव करके संक्षिप्त होरहाहै इसका विस्तार सब ओरसें गोलेके आकारके समानहै इसप्रकार सब जगत् लोगोंके व्यवहारके निमित्त ईश्वरने रचाहै ७६ । ८२ ब्रह्माजीने कल्पकी आदिमें यह सब पृथ्वी और तारागण आदिका सन्निवेश बुद्धिके अनुसार स्थापित कियाहै ८३ यह सब जो कुछहै सो प्रधान पुरुषका विराट् रूपहै इस सबके कहने को और चर्म दृष्टिसे देखनेको कोई मनुष्यभी समर्थ नहीं है ८४ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांसप्तविंशत्यधिकशततमोऽध्यायः १२७ ॥

ऋषियोंने पूछा हे सूतजी पूर्व्वमें शिवजी महाराज त्रिपुरासुर दैत्यके भुवन कैसे जातेभये और वहाँ जाकर उन्होंने उसके पुरको कैसे भस्मकिया इसको विस्तारपूर्व्वक आप हमारे ऊपर कृपा

दारितवान्भवः । मयोनाममहामायो मायानांजनकोऽसुरः ३ निर्जितःसतुसंग्रामे तताप
परमन्तपः । तपस्यन्तन्तुतंविप्रादैत्यावन्यावनुग्रहात् ४तस्यैवकृत्यमुद्दिश्यतेपतुःपरमन्त
पः । विद्युन्मालीचबलवान् तारकाख्यश्चवीर्यवान् ५ मयतेजःसमाक्रान्तौ तेपतुर्मयपा
र्श्वगौ । लोकाइवयथामूर्तास्त्रयस्त्रय इवाग्नयः ६ लोकत्रयंतापयन्तस्ते तेपुर्दानवास्तपः
हेमन्तेजलशय्यासु ग्रीष्मेपञ्चतपेतथा ७ वर्षासुचतथाकाशेक्षपयन्तःस्तनूःप्रियाः । सेवा
नाःफलमूलानिपुष्पाणिचजलानिच ८ अन्यदाचरिताहाराःपङ्केनाचितवल्कलाः । मग्नाः
शैवालपङ्केषु विमलाविमलेषुच ९ निर्मांसाश्चततोजाताः कृशाधमनिसन्तताः । तेषांतपः
प्रभावेन प्रभावविधुतंयथा १० निष्प्रभन्तुजगत्सर्वं मन्दमेवाभिभाषितम् । दह्यमानेषु
लोकेषु तैस्त्रिभिर्दानवाग्निभिः ११ तेषामग्रेजगद्बन्धुः प्रादुर्भूतःपितामहः।ततःसाह
सकतारः प्राहुस्तेसहसागतम् १२ स्वकम्पितामहं दैत्यास्तंवैतुष्टुवुरेवच । अथतान्दा
नवान्ब्रह्मा तपसातपनप्रभान् १३ उवाचहर्षपूर्णाक्षो हर्षपूर्णमुखस्तदा । वरदोऽहंहिवो
वत्सास्तपस्तोषितआगतः १४ व्रीयतामीप्सितंयच्चसाभिलाषंतदुच्यताम् । इत्येवमुच्य
मानन्तु प्रतिपन्नंपितामहम् १५ विश्वकर्मामयःप्राह प्रहर्षोत्फुल्ललोचनः । देवदैत्याःपुरा
देवैः संग्रामेतारकामये १६ निर्जितास्ताडिताश्चैवहताश्चाप्यायुधैरपि । देवैर्वैरानुबन्धाच्च

करके वर्णन कीजिये १ मय दैत्यकी मायासे रचाहुआ त्रिपुर श्री महादेवजीने एकही बाणसे दग्ध
किया यह सब वृत्तान्त हमारे आगे कहिये २ सूतजी बोले हे ऋषियो जैसे त्रिपुरको महादेवजीने द-
ग्धकिया उसको मुझसे सुनो मय नाम महामायावी दैत्यको जब देवताओंने युद्धकरके जीत लिया
तब उसने बड़ी तपस्या करी और उसीके साथ दो अन्य दैत्यभी तपकरने लगे ३ । ४ अर्थात् उसी
के कर्मके उद्देशसे बलवान् विद्युन्माली और तारकासुर यह दोनों परमतप करने लगे ५ मय दैत्यके
तेजसे आक्रान्त मय के समीपमें बैठेहुए जैसे मूर्त्तिको धारण किये तीनों अग्नि तीनों लोकों समेत
बैठेहों वैसेही स्थितहोके त्रिलोकीको सन्ताप देतेहुए परमतप करनेवाले हेमन्तमें जल शय्या ग्री-
ष्ममें पंचाग्नि वर्षामें खुले आकाशमें अपने प्रिय शरीरोंको पटकते हुए फल मूल पुष्प जलादिकर
आहार करते भये ६ । ८ शरीरमें कीच लगाये अथवा बक्कल ओढ़ेहुए शिवारकी कीचमें लोटे और
कभी निर्मल स्वच्छभी रहतेभये ९ इन तपोंके कारणसे मांस रहित होकर महाकृश होगये ऐसे उन
के तपके प्रभावसे सबजगत् कंपायमान होगया और सबकी कान्तियां जाती रहीं मन्द२ भाषणकरने
लगे उन अग्निरूप दानवोंके तेजसे सबजगत् जब दग्ध होनेलगा तब उनके आगे जगत्का बन्धु च-
तुर्मुख ब्रह्मा प्रकट हुआ तब हठ करनेवाले दैत्य ब्रह्माजी से बोले १० । १२ और ब्रह्माजीको स्तुति-
योंसे प्रसन्न करतेभये तब तपसे सूर्य के समान होनेवाले उन दैत्योंसे ब्रह्माजी यह वचन बोले १३
कि हे दैत्यो मैं तुम्हारे तप से प्रसन्न हुआहूं और तुमको वरदान देनेके लिये आयाहूं १४ जो तुम्हारी
इच्छाहो सो वर मांगो ब्रह्माजी के इस वचनको सुनकर हर्ष से प्रफुल्लित नेत्रों वाला मय नाम दैत्य
बोला कि पूर्वकाल में तारकामय युद्धमें देवताओं ने दैत्यों को जीतकर बड़ी ताड़नापूर्व्वक शस्त्रों

धावन्तोभयवेपिताः १७ शरणन्नैवजानीमः शर्म्मवाशरणार्थिनः । सोऽहंतपःप्रभावेनत
वभक्त्यातथैवच १८ इच्छामिकर्त्तुंतद्दुर्गं यद्देवैरपिदुस्तरम् । तस्मिंश्चत्रिपुरेदुर्गे मत्कृ
तेकृतिनांवर ! १९ भूम्यानांजलजानाञ्च शापानांमुनितेजसाम् । देवप्रहरणानाञ्चदे
वानाञ्चप्रजापते ! २० अलङ्घनीयंभवतु त्रिपुरंयदितेप्रियम् । विश्वकर्माइतीवोक्तःस
तदाविश्वकर्मणा २१ उवाचप्रहसन्वाक्यं मयंदैत्यगणाधिपम् । सर्वामरत्वंनैवास्ति
असद्वृत्तस्यदानव ! २२ तस्माद्दुर्गविधानंहि तृणादपिविधीयताम् । पितामहवचः
श्रुत्वा तदैवंदानवोमयः २३ प्राञ्जलिःपुनरप्याह ब्रह्माणंपद्मसम्भवम् । शम्भुरेकेषु
णादुर्गं सकृन्मुक्तेननिर्दहेत् २४ समंससंयुगेहन्यादबध्यंशेषतोभवेत् । एवमस्त्विति
चाप्युक्त्वा मयंदेवःपितामहः २५ स्वप्नेलब्धोयथार्थोवै तत्रैवादर्शनंययौ । गतेपितामहेदै
त्या गतामयरविप्रभाः २६ वरदानाद्विरेजुस्ते तपसाचमहाबलाः । समयस्तुमहाबुद्धिर्दा
नवोवृषसत्तमः २७ दुर्गव्यवसितःकर्त्तुमितिचाचिन्तयत्तदा । कथंनामभवेद्दुर्गं तन्मया
त्रिपुरंकृतम् २८ वत्स्यंहिततपुरंदिव्यं मत्तोनान्यैर्नसंशयः । यथाचैकेषुणातेन ततपुरंन
हिहन्यते २९ देवैस्तथाविधातव्यं मयामतिविचारणम् । विस्तारोयोजनशतमेकैकस्यपु
रस्यतु ३० कार्यस्तेषाञ्चविष्कम्भश्चैकैकशतयोजनम् । पुष्पयोगेननिर्माणं पुराणञ्चभवि
ष्यति ३१ पुष्पयोगेनचदिवि समेष्यन्तिपरस्परम् । पुष्पयोगेनयुक्तानि यस्तान्यासादयि

करके मारा तब देवताओं के शत्रुभावसे भयके कारण कांपतेहुए हमलोगोंने किसी को अपना रक्षक
नहीं जाना और न किसी कल्याणको जाना सो हम तपके प्रभावसे और तुम्हारी भक्ति करके देवता
ओं से दुस्तर महाकाठिन अभेद्यदुर्ग अर्थात् किला बनाया चाहते हैं वह मेरा बनायाहुआ त्रिपुर भूमि
के रहनेवाले मनुष्य जलके विचरनेवाले जीव और तेजस्वी मुनियों का शाप इत्यादिक वार्तोंसे भी
किसी प्रकार चलायमान नहीं होसके यह आप वरदाजिये यह मय दैत्यके वचन सुनकर १५ । २१
ब्रह्माजी बोले कि हे असत् वृत्ति वाले मय दैत्य दैत्योंको देवताओंका सा सब भाव नहीं होसक्ता इस
हेतुसे तुम तृणोंका किला बनालो तब अंजली बांधकर मय दैत्य फिर ब्रह्माजी से बोला कि मैं यह
चाहताहूं कि मेरेदुर्गको शिवजी एकही बाणमें भस्मकरदें २२ । २४ युद्धमें शिवजी के सिवाय मेरे
पुरको कोई दूसरा नहीं भस्म करसके यह आप मुझे वरदान दो तब ब्रह्माजी ऐसाही हो ऐसाकहकर
चलेगये २५ अर्थात् स्वप्नमें प्राप्त होनेके समान अन्तर्द्धान होगये जब ब्रह्माजी चलेगये तब रोगरहित
सूर्य्य के समान कान्ति वाले वह बड़े बलवान् दैत्य वरदान और तपके प्रभावसे अत्यन्त शोभित होते
भये २६।२७ और मयदैत्य उस दुर्गके बनानेकी व्यवस्थाको चिन्तवन करनेलगा कि मैं अपने त्रिपुर
को कैसा बनाऊं २८ उस दिव्य त्रिपुरमें मुझकोही वसना योग्यहै यह त्रिपुर ऐसा बनाना चाहिये
कि शिवजी से भी एक बाण करके दग्ध न होसके २९ देवतालोग तो ऐसाही करेंगे परन्तु मुझको बु-
द्धिके विचारसे एक२ पुरका विस्तार सौ १०० योजनका बनाना चाहिये ३० इनत्रिपुरोंकी मोटाई
भी सौ २ ही योजनकी होनी चाहिये जब पुष्पयोग होगा उसके योगसे उनका पुरातन निर्माण

पुराण्येकप्रहारेण सतानिनिहनिष्यति । आयसन्तुक्षितितले राजतन्तुनभ
स्तले ३३ राजतस्योपरिष्टात्तु सौवर्णंभवितापुरम् । एवंत्रिभिःपुरैर्युक्तं त्रिपुरंतद्भविष्य
ति। शतयोजनविष्कम्भैरन्तरैस्तद्दुरासदम् ३४ अट्टालकैर्यन्त्रशतघ्निभिश्च सचक्रशू
लोपलकम्पनैश्च । द्वारैर्महामन्दरमेरुकल्पैः प्राकारशृङ्गैःसुविराजमानम् ३५ सतारका
ख्येनमयेनगुप्तं खस्थञ्चगुप्तंतडिन्मालिनापि । कोनामहन्तुंत्रिपुरंसमर्थो मुक्तात्रिनेत्रंभग
वन्तमेकम् ३६ ॥ इतिश्रीमत्स्यपुराणेऽष्टाविंशत्यधिकशततमोऽध्यायः १२८ ॥

(सूत उवाच) इतिचिन्त्यमयोदैत्यो दिव्योपायप्रभावजम् । चकारत्रिपुरंदुर्गं मनः
सञ्चारचारितम् १ प्राकारोऽनेनमार्गेण इहवामुत्रगोपुरम् । इहचाट्टालकद्वारमिहचाट्टा
लगोपुरम् २ राजमार्गइतश्चापि विपुलोभवतामिति । रथ्योपरथ्याःसत्रिका इहचत्वरए
वच ३ इदमन्तःपुरस्थानं रुद्रायतनमत्रच । सवटानितड़ागानि ह्यत्रवाप्यःसरांसिच ४
आरामाश्चसभाश्चात्र उद्यानान्यत्रवातथा । उपनिर्गमोदानवानां भवत्यत्रमनोहरः ५
इत्येवंमानसंतत्रा कल्पयत्पुरकल्पवित् । मयेनतत्पुरंसृष्टं त्रिपुरंत्वितिनःश्रुतम् ६ कार्ष्णा
यसमयंयत्तु मयेनविहितंपुरम् । तारकाख्योऽधिपस्तत्र कृतस्थानाधिपोऽवसत् ७ यत्तुपू
र्णेन्दुसङ्काशं राजतंनिर्मितंपुरम् । विद्युन्मालीप्रभुस्तत्र विद्युन्मालीत्विवाम्बुदः ८ सुवर्णा

होवेगा पुष्पयोगके कारण से वह परस्पर आकाश में मिलजांयगे पुष्पयोगसे युक्त होना जो उनका
जानलेगा वह एकही प्रहार करके उनको नष्ट करदेगा--पृथ्वीतलमें लोहा आकाशमें चाँदी उसके
ऊपर सुवर्णका पुर होवेगा इसीप्रकार के तीन पुरोंसे युक्त होकर वह त्रिपुर कहावेगा सौ २ योजन
का उनतीनोंका अन्तर रहैगा ३१ । ३४ लोहेकी अटारी यंत्र चक्र शूल और पापाणोंसे युक्त मन्दराचल
और सुमेरु पर्व्वत के समान द्वारों समेत ध्वजा शृंगादि से शोभित आकाशमें स्थित हुआ तारकासुर
मय और विद्युन्माली इनदोनों से रक्षित कियेहुए पुरको शिवजीके सिवाय कौन नष्ट करसकेगा
ऐसा विचार करनेलगा ३५ । ३६ ॥

इति श्रीमत्स्यपुराणभापाटीकायामष्टाविन्शत्यधिकशततमोऽध्यायः १२८ ॥

सूतजी बोले कि वह मय दैत्य ऐसे दिव्य उपायोंको विचारकर मनके विचारसे उस त्रिपुर नाम
दुर्गको बनाताभया १ अर्थात् यहाँ किला बनानाचाहिये यहाँ द्वार बनाना यहाँ अटारी यहाँ अटारियों
के द्वार यहाँ कचहरी यहाँ बैठनेका कमरा सड़क गली कूंचे चौहट्टे बाजार बैठकके मकान यहाँ शिवजीका
स्थान यहाँ बट वृक्षों समेत तड़ाग बनाना यहाँ बावड़ी सरोवर बाग बगीचे सभाके मकान
पुष्पवाटिका और यहाँ दैत्योंके आने जानेका सुन्दर मार्ग होगा इस प्रकार मनहीमें पुरकी रचनाकी
कल्पना विचार करतेहुए मय दैत्यने उस त्रिपुरनाम पुरको रचा ऐसा हमने सुनाहै २ । ६ जहाँ कि
असल धातु लोहेका पुर बनायाथा वहाँ तो तारकासुर स्थान बनाकर बसताभया दूसरा जहाँ चन्द्रमाके
समान कान्तिवाला चाँदीका पुर बनायाथा उसमें विद्युन्माली दैत्योंका अधिपति होकर बास
करनेलगा ७। ८ और जो सुवर्णका पुर बनायाथा उसमें आपमय दैत्य अधिपतिहोकर बासकरताभया ९

विकृतंयच्च मयेनविहितंपुरम् । स्वयमेवमयस्तत्र गतस्तदधिपःप्रभुः ९ तारकस्यपुरंतत्र
शतयोजनमन्तरम् । विद्युन्मालिपुरञ्चापि शतयोजनकेऽत्तरम् १० मेरुपर्वतसङ्काशं म
यस्यापिपुरंमहत् । पुष्पसंयोगमात्रेण कालेनसमयःपुरा ११ कृतवांस्त्रिपुरंदैत्य स्त्रिनेत्रःपु
ष्पकंयथा । येनयेनमयोयाति प्रकुर्वाणःपुरंपुरात् १२ प्रशस्तास्तत्रनत्रैव वारुण्यामाल
याःस्वयम् । रुक्मरूप्यायसानाञ्च शतशोऽथसहस्रशः १३ रत्नाचितानिशोभन्ते पुराण्य
मरविद्विषाम् । प्रासादशतजुष्टानि कूटागारोत्कटानिच १४ सर्वेषांकामगानिस्युः सर्वलो
कातिगानिच । सोद्यानवापीकूपानि सपद्मसरवन्तिच १५ अशोकवनभूतानि कोकिला
रुतवन्तिच । चित्रशालाविशालानि चतुःशालोत्तमानिच १६ सप्ताष्टदशभौमानि सत्कृ
तानिमयेनच । बहुध्वजपताकानि स्रग्दामालंकतानिच १७ किङ्किणीजालशब्दानि ग
न्धवन्तिमहान्तिच । सुसंयुक्तोपलिप्तानि पुष्पनैवेद्यवन्तिच १८ यज्ञधूमान्धकाराणि संपू
र्णकलशानिच । गगनावरणाभानि हंसपङ्क्तिनिभानिच १९ पङ्क्तीकृतानिराजन्ते गृहा
णित्रिपुरेपुरे । मुक्ताकलापैर्लम्बद्भिर्हसन्तीवशशिश्रियम् २० मल्लिकाजातिपुष्पाद्यैर्ग
न्धधूपाधिवासितैः । पञ्चेन्द्रियसुखैर्नित्यं समैःसत्पुरुषैरिव २१ हेमराजतलोहाद्य मणि
रत्नाञ्जनाङ्किताः । प्राकारास्त्रिपुरेतस्मिन् गिरिप्राकारसन्निभाः २२ एकैकस्मिन्पुरेतस्मिन्
गोपुराणांशतंशतम् । सपताकाध्वजवतीर्दृश्यन्तेगिरिशृङ्गवत् २३ नूपुरारावरम्याणि

इन तारकासुर और विद्युन्माली के पुरोंमें सौ२ योजनका अन्तरथा इस मय दैत्यने अपने सुमेरु
पर्व्वतकी कान्तिके समान पुरको पुष्पके संयोगमें बनायाथा १० । ११ जैसे कि शिवजी अपने पु-
ष्पक विमानको बनातेभये उसीप्रकार मय दैत्यने अपने त्रिपुरको बनाया जिस२ मार्ग होकर मय
दैत्य एक पुरसे दूसरे पुरमें जाताथा वहाँ२ मार्गोंमें बड़े सुन्दर वारुणी मदिराके पात्रोंकी पंक्ति शो-
भित लगती भई और मार्गमेंही सोने चाँदी और लोहेसे जटित दैत्योंके पुर भी बड़े२ उत्तम महलों
समेत शोभायमान होतेभये १२ । १४ यह सब पुर इच्छापूर्व्वक सबलोकों में चलनेवाले होतेभये
इनपुरों में बागबगीचे कूपवापिका और कमलों समेत सरोवर भी होतेभये १५ अशोक वृक्षोंके वन
कोकिलाओंके शब्द विचित्र शाला और चतुःशाला इन सबसे भी युक्त होतेभये १६ वहां मय दैत्य
ने एकसौछब्बीस १२६ पृथ्वी के स्थान भी सुन्दरतासे भूषित करे बहुतसी ध्वजा और मालाओं
से सुशोभित होतेभये १७ किंकिणी जालियों से युक्त सुन्दर पुष्पोंकी बड़ी २ गन्धमाला और नै-
वेद्यादिकसे पूजित १८ यज्ञ धूमके अंधकारों और पूर्ण कलशों से आकाशके विद्युत समेत बादलोंके
समान शोभायमान थे कोई २ मकान हंसोंकी पंक्तियों के समान श्वेत १९ जिनमें चन्द्रमाकी कि-
रणोंके समान दिव्य मोती लटकते हुए चमेली जुही आदि के सुगन्धित पुष्पोंसे और गंध धूपादि से
महा सुगन्ध युक्त होते भये और नानासुखोंके भोगनेवाले सत्पुरुषों के समान उसमें निवास करने
वाले लोग थे उसकोटि के एक २ कंगूरोंमें सोनेचाँदी और लोहे आदि की दृढ़ जड़ावट थी वह ऐसे
विदित होतेथे जैसे कि मणिमय पर्व्वतोंके शिखरहोतेहैं २०।२२ एक२ पुरमें सौ२द्वार सबके ऊपर

त्रिपुरेतत्पुराण्यपि । स्वर्गातिरिक्तश्रीकाणि तत्रकन्यापुराणिच २४ आरामैश्चविहा
रैश्च तडागवटचत्वरैः । सरोभिश्चसरिद्भिश्च वनैश्चोपवनैरपि २५ दिव्यभोगोपभो
गानि नानारत्नयुतानिच । पुष्पोत्करैश्चसुभगास्त्रिपुरस्योपनिर्गमाः । परिखाशतग
म्भीराः कृतामायानिवारणैः २६ निशम्यतद्दुर्गविधानमुत्तमम् कृतंमयेनाद्भुतवीर्यकर्म
णा । दितेःसुतादैवतराजवैरिणः सहस्रशःप्रापुरनन्तविक्रमाः २७ तदासुरैर्दर्पितवैरिमर्द
नैर्जनार्दनैःशैलकरीन्द्रसन्निभैः । बभूवपूर्णंत्रिपुरंतथापुरा यथाम्बरंभूरिजलैर्जलप्रदैः २८॥

इति श्रीमत्स्यपुराणेएकोनत्रिंशदधिकशततमोऽध्यायः १२९ ॥

(सूत उवाच) निर्मितेत्रिपुरेदुर्गे मयेनासुरशिल्पिना । तद्दुर्गंदुर्गतांप्राप बद्धवैरैःसु
रासुरैः १ सकलत्राःसपुत्राश्च शस्त्रवन्तोऽश्चकोपमाः । मयादिष्टानिविविशुर्गृहाणिहर्षि
ताश्चते २ सिंहावनमिवानेके मकराइवसागरम् । रोषैश्चैवातिपारुष्यैः शरीरमिवसंह
तैः ३ तद्वद्बलिभिरध्यस्तं तत्पुरंदेवतादिभिः । त्रिपुरंसंकुलंजातं दैत्यकोटिशताकुल
म् ४ सुतलादपिनिष्पत्य पातालाद्दानवालयात् । उपतस्थुःपयोदाभा येचगिर्युपजीवि
नः ५ योयंप्रार्थयतेकामं संप्राप्तस्त्रिपुरात्त्रयात् । तस्यतस्यमयस्तत्र माययाविदधाति
सः ६ सचन्द्रेषुचदोषेषु साम्बुजेषुसरःसुच । आरामेषुसचूतेषु तपोधनवनेषुच ७ स्व

ध्वजा पताका टंगरहीं वह वृक्षों समेत सुन्दर पर्व्वतोंके शिखरसमान विदित होतेथे २३ उसपुरमें दैत्योंकीकन्याओंके महल उनके नूपुरोंकीध्वनियोंसे स्वर्गके समानहोरहेथे इन सबबातोंके सिवाय वहपुर बाग,बगीचे,क्रीड़ाकेस्थान,तड़ाग,चौहटे,बाजार,सरोवर,नदी व वन,छोटेवन,दिव्यभोगऔर अनेकप्रकार केरत्नादिकोंसे भी संयुक्तथे उसत्रिपुरके सबमार्ग पुष्पोंकी बाटिकाओंसे शोभितरहतेथे उसपुरमें सैकड़ों बड़ी २ खाइयांथीं २४।२६ उस मयदैत्य के रचेहुए त्रिपुरके उत्तम बिधानको देवताओंके शत्रु बड़े २ बलवान् दैत्य सुनकर हजारों उसपुरमें आकर प्राप्त होतेभये २७ पर्व्वत हाथियोंकेसमान आकार वाले देवताओं के पीड़ादेनेवाले महाअभिमानी दैत्योंके समूहोंसे वहपुर ऐसापूर्णहोगया जैसेकि बहुत जलवाले काले २ मेघोंसे आकाश पूर्ण होजाताहै २८ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांएकोनत्रिंशदधिकशततमोऽध्यायः १२९ ॥

सूतजीबोले दैत्योंमें बड़ेशिल्पी उसमय दैत्यने वहत्रिपुरनाम दुर्गऐसारचा जो दैत्योंकेशत्रु देवतादिकोंसे बड़ा दुर्गम और अभेद्यथा १ उसमयके रचेहुये भवनोंमें स्त्री पुत्रादिकों समेत क्रोधयुक्त शस्त्रधारी बड़ी प्रसन्नता पूर्व्वक दैत्यबास करने लगे २ वहघरोंमें ऐसे प्रवेशकरतेभये जैसे घनेबनमें सिंह और अथाह समुद्रमें मकरादिक क्रोधसे श्वासकोखेंकर प्रवेश करजातेहैं ३ उन देवदुःखदायी किरोड़ोंदैत्योंसे वहत्रिपुर दुर्गपूरित होगया ४ सुतलादिक पाताल और पर्व्वतोंसे निकलकर वह मेघके समान कांतिवाले असंख्यदैत्य उसमें आकर बासकरनेलगे ५ उसपुरके दैत्य जो २ इच्छाकरतेथे वहसब मय दैत्य अपनी मायासे उनको प्राप्तकरदेताथा ६ चन्द्रमाके समान कान्तिवाले कमलोंके पुष्पोंसे भरे हुए सरोवरोंमें और आमके वृक्षोंसे युक्त बागबनोंमें चन्दनसे लिप्तअंगोंवाले दैत्य मदोन्मत्तहाथियोंके

ङ्गाश्चन्दनदिग्धाङ्गाः मातङ्गाःसमदाइव ।मृष्टाभरणवस्त्राश्च मृष्टस्रगनुलेपनाः ८ प्रि
याभिःप्रियकामाभिर्हावभावप्रसूतिभिः । नारीभिःसततंरेमुर्मुदिताश्चैवदानवाः ९ मये
ननिर्मितेस्थाने मोदमानामहासुराः । अर्थेधर्मेचकामेच निदधुस्तेमतीःस्वयम् १० ते
षांत्रिपुरयुक्तानां त्रिपुरेत्रिदशारिणाम् । व्रजतिस्मसुखंकालः स्वर्गस्थानांयथातथा ११
शुश्रूषन्तेपितॄन्पुत्रा पत्न्यश्चापिपतींस्तथा । विमुक्तकलहाश्चापि प्रीतयःप्रचुराभव
न् १२ नाधर्मस्त्रिपुरस्थानां बाधतेवीर्य्यवानपि । अर्चयन्तोदितेःपुत्रास्त्रिपुरायतनेहर
म् १३ पुण्याहशब्दानुच्चैरुराशीर्वादांश्चवेदगान् । स्वनूपुररवोन्मिश्रान् वेणुवीणार
वानपि १४ हासश्चवरनारीणां चित्तव्याकुलकारकः । त्रिपुरेदानवेन्द्राणां रमतांश्रूयते
सदा १५ तेषामर्चयतांदेवान् ब्राह्मणांश्चनमस्यताम् । धर्मार्थकामतन्त्राणां महान्का
लोऽभ्यवर्तत १६ अथालक्ष्मीरसूयाच तृड्बुभुक्षेतथैवच । कलिश्चकलहश्चैव त्रिपु
रंविविशुःसह १७ सन्ध्याकालंप्रविष्टास्ते त्रिपुरञ्चभयावहाः । समध्यासुःसमंघोराः श
रीराणियथामयाः १८ सर्वएतेविशन्तस्तु मयेनत्रिपुरान्तरम् । स्वप्नेभयावहादृष्टा आवि
शन्तस्तुदानवान् १९ उदितेचसहस्रांशौ शुभभासाकरेरवौ । मयःसभामाविवेश भास्क
राभ्यामिवाम्बुदः २० मेरुकूटनिभेरम्ये आसनेस्वर्णमण्डिते । आसीनाःकाञ्चनगिरेः

समान उज्ज्वल आभूषण वस्त्र अतर आदिक गन्धोंको लगाये हुए विचरतेहुए ७। ८ और हाव
भाव कटाक्ष करनेवाली प्रिय कामनावाली अपनी प्यारी स्त्रियोंसे अत्यन्त प्रसन्नहोकर रमण
कटनेलगे ९ मयसे रचेहुए स्थानोंमें आनन्द करतेहुए दैत्य धर्म अर्थ और कामोंमें अपनी बुद्धि
करतेभये १० उस त्रिपुरमें रहनेवाले दैत्योंका काल सुखसे ऐसे व्यतीत होताभया जैसे कि
स्वर्गमें स्थितहोनेवालोंका व्यतीत होताहै ११ दैत्योंके पुत्र तो अपने पिता माताओं की और
स्त्रियां अपने पतियोंकी सेवाकरती भई और सब मिलेहुए कलहसे रहितहोकर आपसमें अत्यन्त
प्रसन्न रहतेभये १२ त्रिपुरमें स्थितहुआ कोई बलवान् दैत्य भी किसी छोटेपर अन्याय और
अधर्म नहीं करताथा सब दैत्यमात्र उस त्रिपुरमें शिवजीकाही पूजन करते भये १३ यहाँतक कि
दैत्य होकर पुण्याहवाचन और वेदपाठ ऊंचेस्वरसे करतेहुए नूपुरकेशब्दोंसे मिलाकर वीणा और
बाँसुरीके शब्दोंको करतेथे १४ त्रिपुरमें बसते हुये और अपनी स्त्रियों से भोग विलास करते हुए
सदैव चित्तके विनोद करनेवाले उत्तम स्त्रियोंके हास्योंको सुनाकरतेथे १५ इस रीतिसे और
देवताका पूजन ब्राह्मणोंको नमस्कारादिक करतेहुए अर्थ धर्म कामनाओंके सिद्धकरनेवाले दैत्योंका
काल व्यतीत होताभया १६ इसके थोड़ेही समयपीछे उस त्रिपुर दुर्गमें अलक्ष्मी, असूया, निन्दा,
तृषा, कलियुग और कलह यह सब एकहीबार सायंकालके समय प्रवेश करतेभये यह सब दैत्योंके
शरीरोंमें घोर रोगोंके समान भयके देनेवाले होतेभये इन सब भयके देनेवालोंको अपनेपुरमें प्रवेश
करतेहुए स्वप्नमें मय दैत्यने देखा १७। १९ जब प्रातःकालके सूर्य्यका उदयहुआ तबमयदैत्य सभा
में आया उस समय मय दैत्यकी शोभा दोनों दैत्योंसे ऐसी होतीभई जैसे कि दो सूर्य्योंसे मेघ की

शृङ्गेतोयमुचोयथा २१ पार्श्वयोस्तारकाख्यश्च विद्युन्मालीचदानवः । उपविष्टोमय
स्यान्ते हस्तिनःकलभाविध २२ ततःसुरारयःसर्वे शेषकोपारणाजिरे । उपविष्टादृढं
विद्वा दानवादेवशत्रवः २३ तेष्वासीनेषुसर्वेषु सुखासनगतेषुच । मयोमायाविज
नक इत्युवाचसदानवान् २४ खेचराःखेचरारावा भोभोदाक्षायणीसुताः ! । निशाम
यध्वंस्वप्नोऽयं मयादृष्टोभयावहः २५ चतस्रःप्रमदास्तत्र त्रयोमर्त्याभयावहाः । को
पानलादीप्तमुखाः प्रविष्टास्त्रिपुरार्दिनः २६ प्रविश्यरुषितास्तेच पुराण्यतुलविक्रमाः ।
प्रविष्टास्तच्छरीराणि भूत्वाबहुशरीरिणः २७ नगरंत्रिपुरञ्चेदं तमसासमवस्थितम् । सगृ
हंसहयुष्माभिः सागराम्भसिमज्जितम् २८ उलूकंरुचिरानारी नग्नारूढाखरंतथा । पु
रुषःसिन्दुतिलकश्चतुरंघ्रिस्त्रिलोचनः २९ येनसाप्रमदानुन्ना अहञ्चैवविबोधितः । ईदृशी
प्रमदादृष्टा मयाचातिभयावहा ३० एषईदृशिकःस्वप्नो दृष्टोवैदितिनन्दनाः ! । दृष्टःकथं
हिकष्टाय असुराणांभविष्यति ३१ यदिवोऽहंक्षमोराजा यदिदंवेत्थचोद्धितम् । निबोधध्वं
सुमनसो नचासूयितुमर्हथ ३२ कामंचेर्ष्याञ्चकोपञ्च असूयांसंविहायच । सत्येदमेचधर्मे
चमुनिवादेचातिष्ठत ३३ शान्तयश्चप्रयुज्यन्तां पूज्यताञ्चमहेश्वरः । यदिनामास्यस्वप्नस्य
ह्येवञ्चोपरमोभवेत् ३४ कुप्येतनोध्रुवंरुद्रो देवदेवस्त्रिलोचनः । भविष्याणिचदृश्यन्ते य
तोनस्त्रिपुरेसुराः ३५ कलहंवर्जयन्तश्च अर्जयन्तस्तथार्जवम् । स्वप्नोदयंप्रतीक्षध्वं का

शोभाहोतीहै २० सुमेरु पर्व्वतके शिखरके समान वह सब अपने २ आसनोंपर इस रीतिसे बैठेकि
एक ओरको तारकासुर दूसरी ओर विद्युन्माली उन दोनोंके मध्यमें ऐसे बैठताभया जैसे कि अपने
बच्चों समेत बड़ा हाथी बैठताहै २१ । २२ इसके पीछे देवताओंके शत्रु दैत्यलोग शेषनागके समान
क्रोधकरके दृढ़तासे बैठे २३ जब सब दैत्य अपने २ स्थानके समान आसनोंपर बैठगये तब मय
दैत्य उन सबसे यह वचन बोला २४ हे आकाशगामी दैत्यलोगो मेरे इस देखेहुए भयानक स्वप्न
को सुनो २५ कि आजकी रातमें चार स्त्री तीन भयानक मनुष्य अग्निके समान क्रोधकियेहुए बड़े
देदीप्त मुखसे इस त्रिपुर दुर्गमें घुसआये हैं २६ और उन्होंने प्रवेश करके बड़े पराक्रमी होकर बहुत
से शरीरोंको धारणकर लियाहै २७ और इस त्रिपुर नगरको अन्धकारसे युक्त होकर तुमसब समेत
उनलोगोंने समुद्र के जलमें डुबोदियाहै २८ उनमें एकनंगी स्त्रीभी उल्लूपर चढ़ी हुई देखीहै और
तीन नेत्रवाला चार पैरोंसे युक्त एकपुरुष भी गधेपर चढ़ा देखाहै २९ उस पुरुषने उसस्त्रीको प्रेरणा
करके मुझको बोधकराया है ऐसी भयानकस्त्री और वह पुरुष दोनोंमैंने देखेहैं ३० हे दैत्यलोगो मैंने
यह ऐसा स्वप्ना देखाहै यह स्वप्ना सब दैत्योंको दुःखका देनेवाला होगा इसहेतुसे जो तुम मेरेराजा
होनेको मनसे चाहतेहो और इस स्वप्नेकोभी समझगये होतो तुम सब आनन्दपूर्व्वक प्रसन्न चित्त
से रहो और कोई किसीकी चुगली नकरो ३१ । ३२ काम,क्रोध,ईर्षा,असूया, और निन्दा इनसबको
त्यागकर सत्य, दम, धर्म और मुनियोंका संभाषण इन सब धर्मोंमें तत्पररहो ३३ शान्तिको धारण
करके शिवजीका पूजनकरो इसआचरण के करनेसे इस स्वप्नकी शान्ति होगी ३४ ऐसा न होने पर

लोदयमथापिच ३६ श्रुत्वादाक्षायणीपुत्रा इत्येवंमयभाषितम्। क्रोधेर्ष्यावस्थयायुक्ता द
श्यन्तेचविनाशगाः ३७ विनाशमुपपश्यन्तो ह्यलक्ष्म्याध्यापितासुराः। तत्रैवदृष्ट्वातेन्योऽ
न्यं संक्रोधापूरितेक्षणाः ३८ अथदैवपरिध्वस्ता दानवास्त्रिपुरालयाः। हित्वासत्यञ्चधर्म्मं
ञ्च अकार्य्याण्यपिचक्रमुः ३९ द्विषन्तिब्राह्मणानूपुण्यान्नचार्चन्तिहिदेवताः। गुरुंचैव
नमन्यन्ते ह्यन्योन्यञ्चापिचुक्रुधुः ४० कलहेषुचसज्जन्ते स्वधर्मेषुहसन्तिच। परस्परञ्च
निन्दन्ति अहमित्येववादिनः ४१ उच्चैर्गुरूनूप्रभाषन्त नाभिभाषन्तिपूजिताः। अकस्मा
त्साश्रुनयना जायन्तेचसमुत्सुकाः ४२ दधिसक्तूनूपयश्चैव कपित्थानिचरात्रिषु। भक्षय
न्तिचशेरन्त उच्छिष्टाःसंवृतास्तथा ४३ मूत्रंकृत्वोपस्पृशन्ति चाकृत्वापादधावनम्। सं
विशन्तिचशय्यासु शौचाचारविवर्जिताः ४४ संकुचन्तिभयाच्चैव मार्जाराणांयथाखुकः।
भार्य्यांगत्वानशुध्यन्ति रहोवृत्तिषुनिस्त्रपाः ४५ पुरासुशीलाभूत्वाच दुःशीलत्वमुपागताः।
देवांस्तपोधनांश्चैव बाधन्तेत्रिपुरालयाः ४६ मयेनवार्यमाणापि तेविनाशमुपस्थिताः।
विप्रियाण्येवविप्राणां कुर्व्वाणाःकलहैषिणः ४७ वैभ्राजंनन्दनंचैव तथाचैत्ररथंवनम्।
अशोकंचवराशोकं सर्वर्त्तुकमथापिच ४८ स्वर्गंचदेवतावासं पूर्वदेववशानुगाः। विध्वं

हम सबपर त्रिलोचन शिवजी कोपयुक्त होजायंगे इस त्रिपुरमें प्राप्तहोने वाले देवता लोग दीखते
हैं ३५ तुमं सब लोग कलहको त्यागकर सरलताको प्राप्तकरके इस स्वप्नेके उदय और कालको
देखो ३६ इस प्रकारके मयके कहेहुये वचनोंको सुनकर वह सब क्रोध ईर्षामें युक्तहोके विनाशवाले
दिखाई पड़े ३७ अलक्ष्मीके प्रभावसे दैत्यलोग विनाशके ध्यानमें तदाकार होगये अर्थात् उसी स्थान
पर वह सब परस्पर में देखकर क्रोधसे पूरित नेत्रोंवाले होजाते भये ३८ इसकेअनन्तर दैवसेध्वस्त
कियेहुए दानव सत्यधर्मोंको त्यागकर कुकर्मोंको करतेभये ३९ प्रथम तो ब्राह्मणोंसे शत्रुता करतेभये
देवताओं की पूजाकरना छोड़दिया गुरूकी पूजासे बहिर्मुख हुए और परस्परही में क्रोध करते भये
४० कलहकरने में आसक्त होकर अपने धर्मों का हास्य करके परस्पर निन्दा करने लगे प्रत्येक
को यही अहंकार होगया कि मैंहीहूं दूसरा कोई नहीं है ४१ गुरूलोगों से कठोर बचन कहने लगे
जिनका प्रतिदिन पूजन करते थे उनसेभी नहीं बोलतेभये बात २ में नेत्रोंको लालकर लेतेथे कभी
उत्सव नहीं करते थे ४२ दही, सत्तू, दूध, कैथ इन सब को रात्रिमें भोजन करके उच्छिष्ट मुखसेही
शयन करते थे मूत्रपुरीषादिक करके सब वस्तुओंको स्पर्श करलेतेथे बिना मूत्रकिये पैर धोवते और
मूत्र करके नहीं धोवते शौचाचारसे रहितहो शय्यापर शयन करतेभये ४३। ४४ बिलावोंसे मूसोंके
समान भयसे संकोच करते थे स्त्री का संग करके भी शुद्धता नहीं करते और रमण आदिक कर्मोंके
करनेमें किसी की लज्जा नहीं करते प्रथम सुन्दर शीलस्वभाव वाले होकर भी दुष्ट स्वभावको प्राप्त
होतेभये देवता और तपोधन ऋषि लोगोंको बाधा करनेलगे ४५।४६ मयसे निषेध कियेहुये भी दैत्य
ब्राह्मणोंसे विरोध करतेहुए नाशको प्राप्त होजातेभये ४७ विभ्राज, नन्दनवन, चैत्ररथवन, अशोकवन,
वराशोकवन, सब ऋतुओंके पुष्पोंसे फूलेहुये इन वनोंको और देवताओंके वासस्थान स्वर्ग को

सयन्तिसंक्रुद्धास्तपोधनवनानिच ४९ विध्वस्तदेवायतनाश्रमंच संभग्नदेवद्विजपूज
कंतु। जगद्बभूवामरराजदुष्टैरभिद्रुतंसस्यमिवालिवृन्दैः ५० ॥

इति श्रीमत्स्यपुराणेत्रिंशदधिकशततमोऽध्यायः १३० ॥

(सूत उवाच) अशीलेषुप्रदुष्टेषु दानवेषुदुरात्मसु। लोकेषूत्साद्यमानेषु तपोधन
वनेषुच १ सिंहनादेव्योमगानान्तेषुभीतेषुजन्तुषु। त्रैलोक्येभयसंमूढे तमोन्धत्वमुपा
गते २ आदित्यावसवःसाध्याः पितरोमरुताङ्गणाः। भीताःशरणमाजग्मुर्ब्रह्माणंप्रपिता
महम् ३ तेतंस्वर्णोत्पलासीनं ब्रह्माणंसमुपागताः। नेमुरूचुश्चसहिताः पञ्चास्यंचतु
राननम् ४ वरगुप्तास्तवैवेह दानवास्त्रिपुरालयाः। बाधन्तेस्मान्यथाप्रेष्य ननुशाधिततो
ऽनघ! ५ मेघागमेयथाहंसा मृगाःसिंहभयादिव। दानवानांभयात्तद्वद्बभ्रामप्रपिता
महः ६ पुत्राणांनामधेयानि कलत्राणांतथैवच। दानवैर्भ्राम्यमाणानां विस्मृतानिततोऽ
नघ! ७ देववेश्मप्रभङ्गाश्च आश्रमभ्रंशनानिच। दानवैर्लोभमोहान्धैः क्रियन्तेचभ्रम
न्तिच ८ यदिनत्रायसेलोकं दानवैर्विद्रुतंद्रुतम्। धर्षणानेननिर्देवं निर्मनुष्याश्रमंजगत् ९
इत्येवंत्रिदशैरुक्तः पद्मयोनिःपितामहः। प्रत्याहत्रिदशान्सेंद्रानिन्द्रतुल्याननःप्रभुः १०
मयस्ययोवरोदत्तो मयामातिमतांवराः!। तस्यान्तएषसंप्राप्तो यःपुरोक्तोमयासुराः! ११

और ऋषियोंके वनोंको क्रोधसे विध्वंस करतेभये ४८। ४९ देवताओंके स्थान, आश्रम, और देवपूजक लोगोंका नाशकरतेभये देवताओंके दुःख देनेसे सब जगत् ऐसे नष्टहोगया जैसे कि टीड़ियोंसे सब खेती नष्ट होजाती हैं ५० ॥

इति श्रीमत्स्यपुराणभाषाटीकायांत्रिंशदधिकशततमोऽध्यायः १३० ॥

सूतजी बोले–कि जब दुष्ट स्वभाववाले दुरात्मा दैत्य लोगोंको उजाड़नेलगे ऋषियोंकेवन तपोवनोंको बिगाड़नेलगे उस समय सबजीव भयभीत होगये उन आकाशमें चलनेवाले दैत्योंका सिंहनादके समान शब्द होताभया सर्वत्र अन्धकार होगया १। २ यह समय देखकर आदित्य–वसु–साध्य संज्ञक देवता, पितर और मरुद्गण यहसब भयभीत होकर ब्रह्माजीकी शरणमें जातेभये और वहाँ जाकर उनसब देवताओंने सुवर्णके आसन पर विराजमान चारमुखवाले ब्रह्माजीको नमस्कार किया ३। ४ और कहा कि हेदेवदेव तुम्हारे वरदानसे रक्षित कियेहुए त्रिपुरमें वसनेवाले दैत्यलोग हमको पीड़ादेतेहैं सो आप इनको शिक्षाकरो ५ जैसे कि मेघके आगमनसे हंस और सिंहके आगमनसे मृग भागजातेहैं वैसेही इनदानवोंके भयसे हमलोग भागेहुए भ्रमतेहैं ६ हेअनघ दानवोंसे दुःखितकियेहुए हमलोग अपनेपुत्र स्त्रियोंकेभी नामभूलगयेहैं ७ इनलोभ मोहसे अंधेहुए दैत्योंने देवताओंके मन्दिर तोड़डाले और ऋषियोंके आश्रमभी भंगकरदिये ८ जो आप इन दानवोंसे दुःखित कियेहुए लोककी रक्षा शीघ्रतासे नहीं करोगे तो यहसब जगत् देवता और ऋषियोंके आश्रमोंसे रहित होजायगा ९ देवताओंके ऐसे वचनोंको सुनकर ब्रह्माजी इन्द्रादिक सब देवताओंसे यहवचनबोले १० कि हेदेवतालोगो मैंने जो पूर्व मयदैत्यको वरदान दियाथा उसमेरे कहेहुए वरदानका भोग अबतकहुआ और अब

तच्चतेषामधिष्ठानं त्रिपुरंत्रिदशर्षभाः । एकेषुपातमोक्षेण हन्तव्यंनेषुवृष्टिभिः १२ भव
ताञ्चनपश्यामि कमप्यत्रसुरर्षभाः । यस्तुचैकप्रहारेण पुरंहन्यात्सदानवम् १३ त्रिपुरं
नाल्पवीर्येण शक्यंहन्तुंशरेणतु । एकंमुक्त्वामहादेवं महेशानंप्रजापतिम् १४ तेयूयंयदि
अन्येच क्रतुविध्वंसकंहरम् । याचामःसहितादेवं त्रिपुरंसहनिष्यति १५ कृतःपुराणांवि
ष्कम्भो योजनानांशतंशतम् । यथाचैकप्रहारेण हन्यतेवैभवेनतु । पुष्पयोगेनयुक्तानि
तानिचैकक्षणेनतु १६ ततोदेवैश्चसंप्रोक्तो यास्यामइतिदुःखितैः । पितामहश्चतैःसार्द्धं
भवसंसदमागतः १७ तंभवंभूतभव्येशं गिरिशंशूलपाणिनम् । पश्यन्तिचोमयासार्द्धं
नन्दिनाचमहात्मना १८ अग्निवर्णमजन्देव मग्निकुण्डनिभेक्षणम् । अग्न्यादित्यसह
स्राभ मग्निवर्णविभूषितम् १९ चन्द्रावयवलक्ष्माणं चन्द्रसौम्यतराननम् । आगम्य
तमजन्देवमथतंनीललोहितम् २० स्तुवन्तोवरदंशम्भुं गोपतिंपार्वतीपतिम् २१
(देवा ऊचुः) नमोभगवतेशाय रुद्रायवरदायच । पशूनाम्पतयेनित्यमुग्रायचकपर्दि
ने २२ महादेवायभीमाय त्र्यम्बकायचशान्तये । ईशानायभयघ्नाय नमस्त्वन्धकघाति
ने २३ नीलग्रीवायभीमाय वेधसेवेधसास्तुते । कुमारशत्रुनिघ्नाय कुमारजनकायच २४
विलोहितायधूम्राय वरायक्रथनायच । नित्यंनीलशिखण्डाय शूलिनेदिव्यशायिने २५

अन्त प्राप्तहोगयाहैं ११ अबयह त्रिपुरदुर्ग एकही वाणसे नष्टकरनेके योग्यहै इसका नाश बहुतबाणोंसे
नहीं होसक्ता १२ हे देवता लोगो तुमसबमें ऐसा मैं किसीको भी नहीं देखताहूं जो एकही बाणसे
त्रिपुरसमेत मय दैत्यका नाशकरसके १३ वह त्रिपुरदुर्ग एक महेशान शिवजीके विना दूसरे किसी
स्वल्पपराक्रम वालेसे एकही बाणके द्वारा नष्ट नहीं होसक्ता १४ जो तुम अथवा अन्य सब देवता
लोग मिलकर दक्षके यज्ञ विध्वंस करनेवाले महादेवजीसे जाकर प्रार्थना करोगे तो वही त्रिपुरका
नाशकरसकेंगे १५ क्योंकि उनपुरों की मुटाई सौ २ योजन की है और सब पुष्पयोग करके रचेहैं
सो तुम अबवही उपायकरो जिस्से कि शिवजी एकही बाणसे क्षणभरमें उसको नष्टकरदें १६ इसके
होनेकेलिये हमभी चलेंगे ऐसे कहकर उनदुःखित देवताओं के साथ ब्रह्माजीभी शिवजीके स्थानपर
जातेभये १७ उनभूत भव्येश महादेवजीको पार्वती और नादिये समेत देखतेभये १८ अर्थात् अग्निके
समान वर्णयुक्त अग्निके कुंडके समान नेत्रवाले अग्नि और सूर्य्यके समान कान्तिवाले अग्निकेही
वर्णसे विभूषित चन्द्रवर्ण चन्द्रमाकेही तुल्य प्रकाशित नेत्र ऐसे नीललोहित वर्णवाले श्रीमहादेवजी
को सब देवतालोग देखतेभये १९। २० दर्शन करके उन पार्वतीश पशुपतिनाथ महावर दायक शिवजी
महाराजको स्तुति करके सब ब्रह्मादिक देवता प्रसन्न करते भये २१ और यह वचन बोले कि
हे भगवन् ईश रुद्र बरदायक पशुपति उग्र जटाधारी आपके अर्थ नमस्कारहै २२ हेमहादेव भीमत्र्यंबक
शान्तरूप ईशान भवनाशक अन्धक के नाशक आपके अर्थ नमस्कार है २३ हे नीलग्रीव भीम
वेधा स्वामिकार्तिक के शत्रुके नाशक और स्वामिकार्त्तिक के उत्पन्न करनेवाले आपके अर्थ नमस्कार
है २४ विलोहित धूम्रवरक्रथन नीलशिखंडी शूली दिव्यशायी इननामोंवाले आपके अर्थ नमस्कार

उरगायत्रिनेत्राय हिरण्यवसुरेतसे । अचिन्त्यायाम्बिकाभर्त्रे सर्वदेवस्तुतायच २६
वृषध्वजायमुण्डाय जटिनेब्रह्मचारिणे । तप्यमानायसलिले ब्रह्मण्यायाजितायच २७
विश्वात्मनेविश्वसृजे विश्वमावृत्यातिष्ठते । नमोऽस्तुदिव्यरूपाय प्रभवेदिव्यशम्भवे २८
अभिगम्यायकाम्याय स्तुत्यायाच्र्यायसर्वदा । भक्तानुकम्पिनेनित्यं दिशतेयन्मनो
गतम् २९ ॥ इतिश्री मत्स्यपुराणेएकत्रिंशदाधिकशततमोऽध्यायः १३१ ॥

(सूत उवाच) ब्रह्माद्यैस्तूयमानस्तु देवैर्देवोमहेश्वरः । प्रजापतिमुवाचेदं देवानां
क्षभयंमहत् १ भो ! देवाः ! स्वागतंवोऽस्तु ब्रूतयद्वोमनोगतम् । तावदेवप्रयच्छामि नास्त्य
देयंमयाहिवः २ युष्माकंनितरांशंवै कर्ताहंविबुधर्षभाः ! । चरामिमहदत्युग्रं यच्चापिपर
मंतपः ३ विद्विष्टावोममाद्विष्टाः कष्टाःकष्टपराक्रमाः । तेषामभावःसम्पाद्यो युष्माकंभवए
वच ४ एवमुक्तास्तुदेवेन प्रेम्णासब्रह्मकाःसुराः । रुद्रमाहुर्महाभागं भागार्हाःसर्वएवते ५
भगवंस्तैस्तपस्तप्तं रौद्रंरौद्रपराक्रमैः । असुरैर्बध्यमानाःस्म वयंत्वांशरणंगताः ६ मयो
नामदितेःपुत्रस्त्रिनेत्रकलहप्रियः । त्रिपुरंयेनतद्दुर्गं कृतंपाण्डुरगोपुरम् ७ तदाश्रित्यपुरं
दुर्गं दानवावरनिर्भयाः । बाधन्तेऽस्मान्महादेव प्रेष्यमस्वामिनंयथा ८ उद्यानानिचभ
ग्नानि नन्दनादीनियानिच । वराश्चाप्सरसःसर्वा रम्भाद्यादनुजैर्हृताः ९ इन्द्रस्यबाह्या
श्चगजाः कुमुदाञ्जनवामनाः । ऐरावताद्यापहृता देवतानांमहेश्वर ! १० येचेन्द्ररथमु

है २५ हे उरग, त्रिनेत्र, हिरण्यवसुरेता, अचिन्त्य अम्बिका के भर्त्ता सब देवताओं से स्तुतिमान आपके अर्थ नमस्कारहै २६ हे वृषध्वज मुंड, जटी, ब्रह्मचारी, तप्यमान सलिल ब्रह्मण्य इननामों वाले आपके अर्थ नमस्कार है २७ हे विश्वात्मा, विश्वके रचनेवाले, विश्वको आवरण करके ठहरने वाले दिव्यरूप युक्त आपके अर्थ नमस्कारहै २८ हे अभिगम्य, काम्य, स्तुत्य, सबकालमें स्तुतिकरने के योग्य भक्तोंपर अनुग्रह करनेवाले मनोवाञ्छित फलोंके देनेवाले इन सब गुण युक्त आपके अर्थ नमस्कार है २९ ॥ इतिश्रीमत्स्यपुराणभाषाटीकायामेकत्रिंशदधिकशततमोऽध्यायः १३१ ॥

सूतजी बोले कि ब्रह्मादिक देवताओंसे स्तुति कियेहुए महादेवजी देवताओं से बोले कि देवताओं को भय नहीं है १ हे देवताओ तुम्हारा आनाश्रेष्ठ और सफलहै तुम अपने मनोरथको कहो तुम्हारे लिये कोई अदेय वस्तुनहीं है जो तुममांगोगे सो सबदूंगा २ हे देवता लोगो मैं तुम्हारा निरन्तर कल्याण करूंगा जो परन्तपहै उसकोभी मैं करूंगा ३ तुमसे और अपनेसे बैर करनेवालेका मैं नाश करूंगा ४ महादेवजी के इसवचनको सुनकर देवता शिवजी से बोले कि हेभगवन् आप अतुल पराक्रम वालेहैं और महापराक्रमी दैत्योंने उग्रतप कियाहै उनदैत्यों से पीड़ितहुए हमसब आपकी शरण हैं ५। ६ यह मयनाम दैत्य बड़ीकलहका करनेवाला है उसने तीन पुरोंवाला अपना गढ़रचाहै ७ उस पुरके आश्रय होकर सबमहाबली दानव निर्भय होकर हमको पीड़ा देतेहैं वह हमको ऐसेप्रकार से पीड़ित करतेहैं जैसे कि विना स्वामिके भृत्यको पीड़ादेते हैं ८ नन्दन आदिक बगीचे तोड़डाले रंभादिक उत्तम अप्सराओं को हरलियाहै इन्द्रके कुमुद, अंजन, वामन, और ऐरावत नाम हाथी हर

स्याश्च हरयोऽपहृतासुरैः। जाताश्चदानवानान्ते रथयोग्यास्तुरङ्गमाः ११ येरथायेग
जाश्चैव याःस्त्रियोवसुयच्चनः। तन्नोऽव्यपहृतंदैत्यैः संशयोजीवितेपुनः १२ त्रिनेत्रएवमु
क्तस्तु देवैःशक्रपुरोगमैः। उवाचदेवान्देवेशो वरदोवृषवाहनः १३ व्यपगच्छतुवोदे
वामहद्दानवजम्भयम्। तदहंत्रिपुरन्धक्ष्ये क्रियतांयद्ब्रवीमितत् १४ यदीच्छथमया
दग्धुं तत्पुरंसहदानवम्। रथमौपयिकंमह्यं सज्जयध्वंकिलास्यते १५ दिग्वाससात
थोक्तास्ते सपितामहकाःसुराः। तथेत्युक्तामहादेवञ्चक्रुस्तेरथमुत्तमम् १६ धरांकूवर
कौतुद्धौ रुद्रपार्श्वचरावुभौ। अधिष्ठानंशिरोमेरो रक्षोमन्दरएवच १७ चक्रुश्चन्द्र
ञ्चसूर्य्यञ्च चक्रेकाञ्चनराजते। कृष्णपक्षंशुक्लपक्षं पक्षद्वयमपीश्वराः १८ रथनेमिद्वयंचक्रु
र्देवाब्रह्मपुरःसराः। आदिद्वयंपक्षयन्त्रं यन्त्रमेताश्चदेवताः १९ कम्बलाश्वतराभ्याञ्च
नागाभ्यांसमवेष्टितम्। भार्गवश्चाङ्गिराश्चैव बुधोऽङ्गारकएवच २० शनैश्चरस्तथाचा
त्र सर्वेतेदेवसत्तमाः। वरूथंगगनंचक्रुश्चारुरूपंरथस्यते २१ कृतंद्विजिह्वनयनं त्रिवेणुं
शातकौम्भिकम्। मणिमुक्तेन्द्रनीलैश्च वृतंहृष्टमुखैःसुरैः २२ गङ्गासिन्धुःशतद्रूश्च चन्द्र
भागासरस्वती। वितस्ताचविपाशाच यमुनागण्डकीतथा २३ सरस्वतीदेविकाच तथा
चसरयूरपि। एताःसरिद्वराःसर्वा वेणुसंज्ञाःकृतारथे २४ धृतराष्ट्राश्चयेनागास्तेचवैश्या
त्मकाःकृताः। वासुकेकुलजायेच येचरैवतवंशजाः २५ तेसर्पादर्पसम्पूर्णाश्चापतूणेष्वनू

लियेहैं ९।१० और इन्द्रके रथमें जो मुख्य घोड़ेथे वह हरलिये हैं वह दानवोंके रथोंकेयोग्य होगये हैं
हमारे रथ हाथी स्त्री और जो २ धनथे वह सब हरलिये अब हमको फिर उनके जीतने में भी सन्देह
है ११। १२ इसप्रकार इन्द्रादिक देवताओंसे कहेगये शिवजी वरदान देनेके लिये देवताओंसे बोले
१३ हे देवताओ तुम दानवोंके बड़े भयको त्यागदो मैं त्रिपुर को दग्धकरूंगा परन्तु जो मैं कहूं उसे
तुमको करना योग्यहै १४ जो मुझसेही उस पुर समेत दैत्योंको दग्ध कराया चाहतेहो तो मेरे उप-
योगी रथको सजाकर तैयारकरो १५ दिगम्बर रूपहुए वह सब ब्रह्मादिक देवता उनकी आज्ञाको
अंगीकार करके उसीप्रकार के उत्तम रथको बनाते हुए १६ पृथ्वीको आधार करके रुद्रके समीपवर्ती
पार्षदोंको तो दोनों जुएबनाये सुमेरु पर्व्वत को और कुबेर के मन्दिर को बैठनेका पीढ़ा और सूर्य्य
चन्द्रमाको चांदीके दोनों चक्रबनाये शुक्ल और कृष्णदोनों पक्षोंको रथके पहियोंकी धारा बनाया रथ
के मंत्रोंके स्थानमें देवता लगतेभये १७। १९ कम्बल और अश्वतर नाम दोनोंसर्पोंसे रथको बांधते
भये और शुक्र, बृहस्पति, बुध, मंगल और शनैश्चर यह सब देवसत्तम रथके बरूथ अर्थात् आकाश
में ले जानेवाले गुब्बारे बने २०। २१ और प्रसन्न मुखवाले देवताओंने दो जिह्वा दोनेत्र और तीन
सुवर्णके बांस मणि, मोती, और इन्द्रनील मणियोंसे भी युक्त बनाया २२ गंगा, समुद्र, शतद्रूनदी
चन्द्रभागा, सरस्वती, वितस्तानदी, विपाशा, यमुना, गंडकी, देविका, और सरयू यहसबनदियांरथ के
बांसोंकी जगह पनजारों में लगाई गईं २३। २४ धृतराष्ट्र संज्ञक सर्प, वैश्यात्मकसर्प, वासुकिके
कुल के सर्प, रैवत वंशके सर्प यह सब सर्प तूणीर संज्ञक धनुषके बाण रखने के पात्रमें प्रवेश करगये

नगाः । अवतस्थुःशराभूत्वा नानाजातिशुभाननाः २६ सुरसासरमाकद्रूर्विनताशुचिरेव
च । तृषाबुभुक्षासर्वोग्रा मृत्युःसर्वशमस्तथा २७ ब्रह्मबध्याचगोबध्या बालबध्याःप्रजाभ
याः । गदाभूत्वाशक्तयश्च तदादेवरथेऽभ्ययुः २८ युगंकृतयुगञ्चात्र चातुर्होत्रप्रयोजकाः ।
चतुर्वर्णाःसलीलाश्च बभूवुःस्वर्णकुण्डलाः २९ तद्युगंयुगसङ्काशं रथशीर्षेप्रतिष्ठितम् ।
धृतराष्ट्रेणनागेन बद्धंबलवतामहत् ३० ऋग्वेदःसामवेदश्च यजुर्वेदस्तथापरः । वेदाश्च
त्वारएवैते चत्वारस्तुरगाभवन् ३१ अन्नदानपुरोगाणि यानिदानानिकानिचित् । तान्या
सन्वाजिनांतेषां भूषणानिसहस्रशः ३२ पद्मद्वयंतक्षकश्च कर्कोटकधनञ्जयौ । नागाबभू
वुरेवैते हयानांबालबन्धनाः ३३ ओङ्कारप्रभवास्तावा मन्त्रयज्ञक्रतुक्रियाः । उपद्रवाःप्र
तीकाराः पशुबन्धेष्टयस्तथा ३४ यज्ञोपवाहान्येतानि तस्मिन्लोकरथेशुभे । मणिमुक्ता
प्रवालैस्तु भूषितानिसहस्रशः ३५ प्रतोदोङ्कारएवासीत्तदग्रञ्चवषट्कृतम् । सिनीबाली
कुहूराका तथाचानुमतीशुभा ३६ योक्ताण्यासंस्तुरङ्गाणामपसर्पणविग्रहाः ३७ कृष्णान्य
थचपीतानि श्वेतमाञ्जिष्ठकानिच । अवदाताःपताकास्तु बभूवुःपवनेरिताः ३८ ऋतुभि
श्चकृतःषड्भिर्धनुःसंवत्सरोऽभवत् । अजराज्याभवच्चापि साम्बिकाधनुषोदृढा ३९ का
लोहिभगवान्रुद्रस्तञ्चसंवत्सरंविदुः । तस्मादुमाकालरात्रिर्धनुषोज्याजराभवत् ४० सग
भैत्रिपुरंयेन दग्धवान्सत्रिलोचनः । सइषुर्विष्णुसोमाग्नित्रिदैवतमयोऽभवत् ४१ आननं
ह्यग्निरभवच्छल्यंसोमस्तमोनुदः । तेजसःसमवायोऽथ चेषोस्तेजोरथाङ्गधृत् ४२ तस्मिं

वहाँ पात्रमें जाकर अनेकप्रकारके मुख धारणकरके बाणरूपहोके स्थित होतेभये २५ । २६ सुरसा-सरमा-कद्रू-विनता-शुचि, तृषा,बुभुक्षा,सर्वोग्रा—सबका शान्तकरनेवाला मृत्यु, ब्रह्महत्या,गोहत्या, और बालहत्या, यहसब गदा और बरछी रूपहोके शिवजीके रथपर प्राप्तहोती भयीं २७। २८ चारों युगजुवेबने, चातुर्होत्र करने वाले चारोंवर्ण सुवर्णके कुंडलहोते भये वह रथका जुवा युगोंके समान कान्तिवाला होकर रथके शिरपर स्थितहुआ और बलवान् धृतराष्ट्र सर्पसे बाँधागया २९ । ३० ऋग्वेद-सामवेद-यजुर्वेद और अथर्वण यह चारोंवेद रथके घोड़े होतेभये ३१ अन्नदानादिक जितने दानहैं वह सब उनघोड़ों के आभूषणहोते भये तक्षक, कर्कोटक और धनंजय यह सर्प अश्वोंके बाल बांधनेके उपयोगी होतेभये ३२ । ३३ ॐकारसे उत्पन्नहुए मंत्र, यज्ञ और पशुबधवाले यज्ञ यहसब उपद्रवोंके नाशकरनेवाले होते भये और लाखों संख्यामें होकर मणि मोती और मूंगोंसे विभूषितहो रथपर लगतेभये ३४। ३५ ॐकार घोड़े हाँकनेका चाबुकबना उसके अग्रभागमें वषट्लगा सिनीवाली,कुहू, अमावास्या, राका और अनुमती यह सब घोड़ों की लगामें औ रथपर काली पीली, श्वेत, लाल और भूरी ध्वजा होती भयीं छःऋतुओंसे कियाहुआ वर्षधनुष होता भया—अम्बिका सहित अजरामाया धनुषकी दृढप्रत्यंचा होतीभयी ३६ । ३९ काल भगवान रुद्र वर्षहुए इसीसे कालरात्रि और पार्वतीजीको धनुषकी प्रत्यंचा जानों वह अजराहै ४० जिस बाण से कि त्रिलोचन शिवजी त्रिपुरको भस्म करते भये वहबाण विष्णु सोम और अग्नि इन तीन देवताओं से संयुक्त

श्चवीर्य्यवृद्ध्यर्थं वासुकिर्नागपार्थिवः। तेजःसंवसनार्थंवै मुमोचातिविषोविषम् ४३ कृ
त्वादेवारथञ्चापि दिव्यंदिव्यप्रभावतः। लोकाधिपतिमभ्येत्य इदंवचनमब्रुवन् ४४ सं
स्कृतोऽयंरथोऽस्माभिस्तवदानवशत्रुजित्। इदमापत्परित्राणं देवान्सेन्द्रपुरोगमान् ४५
तंमेरुशिखराकारं त्रैलोक्यरथमुत्तमम्। प्रशस्यदेवान्साध्विति रथंपश्यतिशङ्करः ४६
मुहुर्दृष्ट्वारथंसाधु साध्वित्युक्त्वामुहुर्मुहुः। उवाचसेन्द्रानमरानमराधिपतिःस्वयम् ४७ या
दृशोऽयंरथःक्लृप्तो युष्माभिर्ममसत्तमाः। ईदृशोरथसम्पत्त्या यन्ताशीघ्रंविधीयताम् ४८
इत्युक्तादेवदेवेन देवाबिद्धाइवेषुभिः। अवापुर्महतींचिन्तां कथंकार्यमितिब्रुवन् ४९ महा
देवस्यदेवोऽन्यः कोनामसदृशोभवेत्। मुक्ताचक्रायुधंदेवं सोपास्यइषुमाश्रितः ५० धुरि
युक्ताइवोक्षाणो घटन्तइवपर्वतैः। निश्वसन्तःसुराःसर्वे कथमेतादितिब्रुवन् ५१ देवोऽह
श्यतदेवांस्तु लोकनाथस्यधूर्गतान्। अहंसारथिरित्युक्त्वा जग्राहाश्वांस्ततोऽग्रजः ५२
ततोदेवैःसगन्धर्वैः सिंहनादोमहान्कृतः। प्रतोदहस्तंसंप्रेक्ष्य ब्रह्माणंसूततांगतम् ५३ भ
गवानपिविश्वेशो रथस्थेवैपितामहे। सदृशःसूतइत्युक्त्वा चारुरोहरथंहरः ५४ आरोह
तिरथंदेवे ह्यश्वाहरभरातुराः। जानुभिःपतिताभूमौ रजोग्रासश्चग्रासितः ५५ देवोदृष्ट्वा

बनाया गयाथा ४१ बाणकामुख अग्निहुआ आगेके शल्यमें अंधेरेको दूरकरनेवाला चन्द्रमा हुआ उस बाणमें तेजस्वरूपी विष्णु भगवान् हुए ४२ उस बाणमें पराक्रमकी वृद्धिके निमित्त तेज फैलानेके लिये वासुकि सर्प अपने विषको छोड़ताभया ४३ देवतालोग दिव्य प्रभावसे इस दिव्य रथको बनाकर लोकों के अधिपति शिवजीके समीप जाकर यह वचन बोले ४४ हे दानव शत्रुओं के जीतनेवाले शिवजी हमने यह रथ तैयारकियाहै यह रथ इन्द्रादिक देवताओंकी विपत्तिका दूरकरनेवालाहै ४५ इसके पीछे सुमेरु पर्व्वतके शिखरके समान आकारवाले उसउत्तम दिव्यरथको शिवजीने देखकर बड़ी प्रशंसाकरी और साधु २ शब्दोंसे देवताओंकी सराहनाकरी ४६ और बारंबार उस रथको देखकर सराहना समेत शिवजी इन्द्रादिक देवताओंसे बोले ४७ हे श्रेष्ठदेवताओ जैसा तुमने यह रथ रचाहै ऐसाही इसके हाँकनेवाला सारथी भी तुमको शीघ्र बनाना चाहिये ४८ यह महादेवके वचन सुनकर देवतालोग बाणोंसे बिंधेहुओंके समान परमचिन्ताको प्राप्तहोते भये और विचारकरने लगे कि यहकाम अबकैसे होगा ४९ शिवजीके समान दूसरा कौनसा देवताहै एक विष्णुजी के बिनाकोई नहींहै इस हेतुसे अब विष्णुकी उपासना करनी चाहिये ५० जैसेकि धुरीमें युक्त हुए चक्र पर्व्वत परचलते हुए घिसजाते हैं उसी प्रकार श्वासोंको लेते हुए सब देवता लोग बोले कि यहकार्य्य कैसेहोगा ५१ संसारके भारमें प्राप्तहुए देवताओंको बिकल देखकर ब्रह्माजी बोले कि मैंसारथीहूं यह कहकर रथके घोड़ोंको पकड़तेभये इसके अनन्तर देवता और गन्धर्वों ने सिंहनाद के समान प्रसन्न होकर शब्दकिया और ब्रह्माजी सारथी होकर रथको हाँकने लगे तब शिवजी महाराज बोले कि मेरेही समान यह सारथी है ऐसा कहकर रथके ऊपर सवार होजाते भये ५२। ५४ जब शिवजी रथपर सवारहुए तब शिवजी के भयसे घोड़ोंके घोंटू पृथ्वी परगिरे और मुखधूलमेंलगगये ५५

धवेदांस्तानभीरुग्रहयान्भयात् । उज्जहारपितॄनार्तान् सुपुत्रइवदुःखितान् ५६ ततःसिंहरवोभूयो बभूवरथभैरवः । जयशब्दश्चदेवानां संबभूवार्णवोपमः ५७ तदोङ्कारमयंगृह्य प्रतोदंवरदःप्रभुः । स्वयम्भूःप्रययौवाहाननुमन्त्र्ययथाजवम् ५८ ग्रसमानाइवाकाशं मुष्णन्तइवमेदिनीम् । मुखेभ्यःससृजुःश्वासानुच्छ्वसन्तइवोरगाः ५९ स्वयम्भुवाचोद्यमानाश्चोदितेनकपर्दिना । व्रजन्तितेऽश्वाजवनाः क्षयकालइवानिलाः ६० ध्वजोच्छ्रयविनिर्माणे ध्वजयष्टिमनुत्तमाम् । आक्रम्यनन्दीवृषभं तस्थौतस्मिञ्छिवेच्छया ६१ भार्गवाङ्गिरसौदेवौ दण्डहस्तौरविप्रभौ । रथचक्रेतुरक्षेते रुद्रस्यप्रियकाङ्क्षिणौ ६२ शेषश्चभगवान्नागः अनन्तोऽन्तकरोऽरिणाम् । शरहस्तोरथस्पाति शयनंब्रह्मणस्तदा ६३ यमस्तूर्णसमास्थाय महिषञ्चातिदारुणम् । द्रविणाधिपतिर्व्यालं सुराणामधिपोद्विपम् ६४ अरक्षतमयूरंनिकूजन्तंकिन्नरंयथा । गुहआस्थायवरदोयुगोपमरथंपितुः ६५ नन्दीश्वरश्चभगवान्शूलमादायदीप्तिमान् । पृष्ठतश्चापिपार्श्वाभ्यां लोकस्यक्षयकृद्यथा ६६ प्रमथाश्चाग्निवर्णाभाः साग्निज्वालाइवाचलाः । अनुजग्मूरथंशार्थं नक्राइवमहार्णवम् ६७ भृगुर्भरद्वाजवसिष्ठगौतमाः क्रतुःपुलस्त्यःपुलहस्तपोधनाः । मरीचिरत्रिर्भगवानथाङ्गिराः पराशरागस्त्यमुखामहर्षयः ६८ हरमजितमजंप्रतुष्टुवुर्वचनविशेषैर्विचित्रभूषणैः । रथ

उस समय उन वेदरूप घोड़ोंको शिवजी गिराहुआ जानके उनका उद्धार ऐसे करते भये जैसे कि श्रेष्ठ लायक पुत्र अपने पीड़ित और दुःखी पितरोंका उद्धार करतेहैं ५६ इसके पीछे रथका भयंकर शब्द सिंहके शब्दके समान होताभया और प्रलयके समुद्रोंके समान बड़ाघोर देवताओंके जय २ कारका ऊंचा शब्द होताभया ५७ तब बरदायी ब्रह्माजी ओंकार रूपी चाबुकको पकड़के बड़े वेगपूर्व्वक रथके घोड़ोंको प्रेरतेभये ५८ मानों आकाशको ग्रसलेंगे और पृथ्वीको चुरालेंगे ऐसे मुखोंके ऊंचे श्वासोंको छोड़तेहुए बड़ेभारी सर्पोंके समान गमन करते भये ५९ ब्रह्मासे और शिवजीसे प्रेरेहुए अश्व प्रलय कालके वायुके समान अतिशीघ्र वेगयुक्त होकर चलते भये ६० शिवजीकी उत्तम ध्वजाकी यष्टीको ग्रहण करके शिवजीकी आज्ञासे उसके ऊपर नन्दिकेश्वर स्थितहोता भया ६१ और सूर्य्य की समान कान्तिवाले यहबृहस्पति और शुक्र दोनों ग्रह शिवजीके प्रियकी इच्छा करते हुए रथके चक्रोंकी रक्षामें स्थितहुए ६२ जब ब्रह्माजी निद्रामेंहोंय तब शेषनागजी हाथमें बाण ग्रहणकरके रथकी रक्षाकरते भये ६३ धर्मराज दारुणभैंसेपर आरूढ़होकर आये कुबेर सर्पकी रक्षामें रहे कूजते हुए मोरकी सवारीपर स्वामिकार्त्तिक आये वह अपने पिताके रथकी रक्षा करतेभये ६४ । ६५ नन्दीश्वर शूलको ग्रहण करके आये सबलोग आगेपीछे और बराबरसे ऐसेआये मानों लोकोंका नाश करेंगे ६६ अग्निके समान वर्णवाले शिवजीके गण ज्वलित पर्व्वतोंके शिखरोंके सदृश बड़े प्रकाशित होकर शिवजीके रथके पीछे प्राप्त होतेभये यहसब ऐसे विदितहोतेथे जैसे कि समुद्रमें बड़े भयानक ग्राहादिक होतेहैं ६७ भृगु, भरद्वाज, वसिष्ठ, गौतम, पुलस्त्य, पुलह, क्रतु, मरीचि, अत्रि, अंगिरा, और पराशरादिक ऋषि इन अजित शिवजीको उत्तम विचित्र वचनोंकी स्तुतियोंके द्वारा प्रसन्न करतेभये

स्त्रिपुरेसकाञ्चनाचलो व्रजतिसपक्षइवाद्रिरम्बरे ६९ करिगिरिरविमेघसन्निभाः सजल
पयोदनिनादनादिनः। प्रमथगणाःपरिवार्य्यदेवगुप्तं रथममरापिययुःस्मदर्पयुक्ताः ७० म
करतिमितिमिङ्गिलावृतः प्रलयइवातिसमुद्धतोऽर्णवः। व्रजतिरथवरोऽतिभास्वरो ह्यश
निनिपातपयोदनिस्वनः ७१ ॥

इति श्रीमत्स्यपुराणेद्वात्रिंशदधिकशततमोऽध्यायः १३२ ॥

(सूत उवाच) पूज्यमानेरथेतास्मिन्लोकैर्देवैरथेस्थिते। प्रमथेषुनदत्सूग्रं प्रवदत्सुच
साध्विति १ ईश्वरस्वरघोषेण नर्दमानेमहावृषे। जयत्सुविप्रेषुतथा गर्ज्जत्सुतुरगेषुच २
रणाङ्गणात्समुत्पत्य देवर्षिर्नारदःप्रभुः। कान्त्याचन्द्रोपमस्तूर्णं त्रिपुरंपुरमागतः ३ औत्पा
तिकन्तुदैत्यानां त्रिपुरेवर्त्ततेध्रुवम्। नारदश्चात्रभगवान्प्रादुर्भूतस्तपोधनः ४ आगतंज
लदाभासं समेताःसर्वदानवाः। उत्तस्थुर्नारदंदृष्ट्वा अभिवादनवादिनः ५ तमर्घ्येणचपा
द्येन मधुपर्केणचेश्वराः। नारदंपूजयामासुर्ब्रह्माणमिववासवः ६ तेषांसपूजांपूजार्हः प्रति
गृह्यतपोधनः। नारदःसुखमासीनः काञ्चनेपरमासने ७ मयस्तुसुखमासीने नारदेनारदो
द्भवे। यथार्हंदानवैःसार्द्धमासीनोदानवाधिपः ८ आसीनंनारदंप्रेक्ष्य मयस्त्वथमहासुरः
अब्रवीद्वचनंतुष्टो हृष्टरोमाननेक्षणः ९ औत्पातिकंपुरेऽस्माकं यथानान्यत्रकुत्रचित्। व

उस इसप्रकारसे चलनेवाले शिवजी के रथकी ऐसीशोभा होतीभई मानों परोंसे उड़ताहुआ सुवर्ण
का सुमेरु पर्व्वत जाताहो ६८। ६९ हाथी पर्व्वत सूर्य्य और जल सहित मेघोंके गर्जनेके समान
शब्दवाले इनसबकी समानरूप और कान्तिवाले शिवजी के गण देवताओंसे रक्षितकिये हुए रथको
प्राप्त होते भये और अभिमानी देवता भी प्राप्त होते भये मकर मत्स्य और ग्राहादिकों से आवृत
जैसा कि प्रलयका समुद्र होताहै वैसेही इन सबरक्षकों समेत बिजली समेत मेघके शब्दके समान
गर्जना करनेवाला वह रथ अत्यन्त कान्तिसे युक्त होकर चलता भया ७०। ७१ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांद्वात्रिंशदधिकशततमोऽध्यायः १३२ ॥

सूतजी कहते हैं सब लोकों से पूजित कियेहुए उसरथमें महादेवजी दृढतासेस्थित होगये और
शिवजीके गण उग्रनाद करने लगे देवता साधु२ कहने लगे शिवजी के घोषसे नादिया गर्जने लगा
उस समय उस रणभूमिमें चन्द्रमाकी समान कान्ति वाले नारद मुनिभी बड़ी शीघ्रतापूर्व्वक
त्रिपुरमें पहुंचे और दैत्योंके आगे प्रकट होगये १।४ उनको देखकर मेघके समान कान्तिवाले सब दैत्य
लोग उनके दर्शनके लिये खड़े होकर उनको नमस्कार करने लगे ५ और अर्घ पाद्य और मधुपर्क
से नारद मुनिका पूजन ऐसे करते भये जैसे कि ब्रह्माजीका इन्द्रादिक देवताओं ने किया ६ पूजाके
योग्य वह नारदजी पूजाको ग्रहण करके सुखपूर्व्वक सुवर्णके आसन पर बैठते भये ७ जब आनन्द-
पूर्व्वक नारदजी आसन पर बैठगये तब मय दैत्यभी दानवों समेत सुखसे आसन पर बैठा ८ उस
समय आनन्दपूर्व्वक आसन पर बैठे हुए नारदजी से बड़े प्रसन्न मुख होकर मय दैत्यने पूछा कि
हेनारदजी जैसा कि आनन्द हमारे पुरमें है वैसा अन्यत्र कहीं नहीं है आप भूत भविष्य वर्त्तमानके

तैतवर्तमानज्ञ ! वदत्वंहिचनारद १० दृश्यन्तेभयदाःस्वप्ना भज्यन्तेचध्वजाःपरम्। वि
नाचवायुनाकेतुः पततेचतथाभुवि ११ अट्टालकाश्चनृत्यन्ते सपताकाःसगोपुराः। हिंस
हिंसेतिश्रूयन्ते गिरश्चभयदाःपुरे १२ नाहंबिभेमिदेवानां सेन्द्राणामपिनारद !। मुक्त्वैक
वरदंस्थाणुं भक्ताभयकरंहरम् १३ भगवन्नास्त्यविदितमुत्पातेषुतवानघ ! । अनागत
मतीतञ्च भवान्जानातितत्त्वतः १४ तदेतन्नोभयस्थानमुत्पाताभिनिवेदितम् । कथय
स्वमुनिश्रेष्ठ ! प्रपन्नस्यतुनारद ! १५ इत्युक्तोनारदस्तेन मयेनामयवर्जितः । (नारद
उवाच) शृणुदानव ! तत्त्वेनभवन्त्यौत्पातिकायथा १६ धर्मेतिधारणेधातुर्माहात्म्येचै
वपठ्यते। धारणाच्चमहत्त्वेन धर्म्मएषनिरुच्यते १७ सइष्टप्रापकोधर्म्म आचार्य्यैरुपदि
ष्यते। इतरश्चानिष्टफल आचार्य्यैर्नोपदिश्यते १८ उत्पथान्मार्गमागच्छेन्मार्गाच्चैव वि
मार्गताम्। विनाशस्तस्यनिर्देश्य इतिवेदविदोविदुः १९ सस्वधर्म्मरथारूढः सहैभिर्मत्त
दानवैः। अपकारिषुदेवानां कुरुषेत्वंसहायताम् २० तदेतान्येवमादीनि उत्पातवेदिता
नि च। वैनाशिकानिदृश्यन्ते दानवानांतथैवच २१ एषरुद्रःसमास्थायं महालोकमयंरथ
म्। आयातित्रिपुरंहन्तुंमय ! त्वामसुरानपि २२ सत्वंमहौजसंनित्यं प्रपद्यस्वमहेश्वरम्।
यास्यसेसहपुत्रेण दानवैःसहमानद ! २३ इत्येवमावेद्यभयं दानवोपस्थितंमहत् । दान

ज्ञाताहो जो दूसरे किसी स्थानमें होय उसको आप बताइये ९।१० परन्तु हेमुने यह क्या बातहै
कि भयकारी स्वप्न दीखते हैं विनावायुके ध्वजा टूटती है पताका पृथ्वी पर गिरती है ११ स्थान के
चौबारे पताका और द्वार यह सब नृत्य करते दीखते हैं और इस पुरमें मारो२ ऐसा भयानक शब्द
सुनते हैं १२ हेनारद मैं इन्द्रादिक सब देवताओं से नहीं डरताहूं भक्तोंके अभय करने वाले एक
शिवजीके विना मैं किसी से नहीं डरताहूं १३ हे भगवन् आपसे कोई उत्पात छुवा नहीं है आप
अपनी तत्त्व दृष्टिसे तीनोंकालके वृत्तान्तोंको जानते हो १४ इसी हेतुसे हमने इसभयके स्थानको
उत्पात कहाहै हेमुनियों में श्रेष्ठ मुझ शरणागत से उस उत्पातको कहिये १५ यह मयदैत्यके वचन
सुनकर नारदजी बोले हेमय तुम तत्त्वसे अपनी सब उत्पत्तिका वृत्तान्तसुनो १६ कि धर्मधातुधारण
अर्थमें और माहात्म्य अर्थमें वर्त्तताहै इस हेतुसे धारण करने से और महत्त्व करने सेही उसको धर्म
कहते हैं १७ सो वह धर्म आचार्य्योंने इष्ट कहाहै इसके विपरीत अधर्म अनिष्ट फलका देनेवाला
है वह आचार्य्योंने नहीं कहाहै १८ जो कोई उत्पथ मार्गसे उत्तम मार्गमें आताहै और उत्तममार्ग
से कुमार्ग में चलने लग जाताहै उसका नाश होजाताहै यह वेदज्ञ लोगोंने कहाहै १९ सो तुम
अपने धर्ममें आरूढ होकर भी इनमदोन्मत्त दानवोंके कारण से तिरस्कारको प्राप्त होजाओगे इन
दानवोंसे तुम्हारी कुछ सहायता न होगी और जो तुमने स्वप्नमें उत्पात देखेहैं वह सब नाश करनेवाले हैं
अर्थात् यहसब उत्पात सबदानवों समेत तुम्हारे नाशके हेतुहैं २०।२१ यह रुद्र महादेवलोकस्वरूपी
रथमें बैठकर तेरे त्रिपुर और सबदैत्यों समेत तुझको नाश करनेको आते हैं २२ सोतुम अपना
भला चाहतेहो तो अपने सब परिवार पुत्रपौत्रादि और दैत्यों समेत होके महादेवजीकी शरण

वानांपुनर्देवो देवेशपदमागतः २४ नारदेतुमुनौयाते मयोदानवनायकः । शूरसंमतमित्येवंदानवानाहदानवः २५ शूराःस्थजातपुत्राःस्थ कृतकृत्याःस्थदानवाः । युध्यध्वंदैवतैःसार्द्धं कर्तव्यंचापिनोभयम् २६ जित्वावयंभविष्यामः सर्वेऽमरसभासदः । देवांश्चसेन्द्रकान्हत्वालोकान्भोक्ष्यामहेसुराः २७ अट्टालकेषुचतथा तिष्ठध्वंशस्त्रपाणयः । दंशितायुद्धसज्जाश्च तिष्ठध्वंप्रोद्यतायुधाः २८ पुराणित्रीणिचैतानि यथास्थानेषुदानवाः । तिष्ठध्वंलङ्घनीयानि भविष्यन्तिपुराणिच २९ नभोगतास्तथाशूरा देवताविदिताहिवः । ताःप्रयत्नेनवार्याश्च विदार्याश्चैवसायकैः ३० इतिदनुतनयान्मयस्तथोक्त्वा सुरगणवारणवारणेवचांसि।युवतिजनविषण्णमानसंतत् त्रिपुरपुरंसहसाविवेशराजा ३१ अथरजतविशुद्धभावभावो भवमभिपूज्यदिगम्बरंसुगीर्भिः। शरणमुपजगामदेवदेवं मदनार्यन्धकयज्ञदेहघातम् ३२ मयमभयपदैषिणंप्रपन्नं नकिलबुबोधतृतीयदीप्तनेत्रः । तदभिमतमदात्ततःशशाङ्की सचकिलनिर्भयएवदानवोऽभूत् ३३ ॥

इति श्रीमत्स्यपुराणेत्रयास्त्रिंशदधिकशततमोऽध्यायः १३३ ॥

(सूत उवाच) ततोरणेदेवबलं नारदोऽभ्यगमत्पुनः । आगत्यचैवत्रिपुरात्सभायामास्थितःस्वयम् १ इलावृतमितिख्यातं तद्वर्षविस्तृतायतम् । यत्रयज्ञोबलेर्वृत्तोबलिर्यत्रचसंयतः २ देवानांजन्मभूमिर्या त्रिषुलोकेषुविश्रुता । विवाहाःक्रतवश्चैव जातकर्म्मादिकाःक्रियाः ३ देवानांयत्रवृत्तानि कन्यादानानियानिच । रेमेनित्यंभवोयत्र सहायैःपार्षदैर्गणैः ४

में प्राप्त होजाओ २३ इस प्रकारसे नारदमुनि सब दानवोंको भय दिखाकर देवताओंके स्थानको चलेगये नारद मुनिके चलेजानेपर मय दैत्यने सब शूरबीर दानवोंको यह सलाह बताई कि हेवीर पुत्रो तुम अब कृतकृत्यहुए देवताओंके साथ युद्धकरो और कुछ भी भय मतकरो तुमको कभी भयकरना न चाहिये २४ । २६ हमसबदेवताओंको जीतकर स्वर्गकी सभामें प्राप्त होवेंगे और इन्द्र समेत सब देवताओंको मारकर सब लोकोंको भोगेंगे २७ हाथोंमें शस्त्रलेके अपनी २ अटारियोंपर चढ़जाओ अपने कवच पहनकर युद्धमें खडेहोजाओ २८ हे दैत्यो इन तीनों पुरोंमें अपने २ स्थानोंपर चढ़जाओ अपना स्थाननहीं छोड़ना चाहिये २९ आकाशमें आतेहुए देवताओंको तुम जानजाओगे उन देवताओंको तुम अपने बाणोंके प्रहारोंसे यत्नपूर्वक निवारण करनेको योग्यहो ३० मय इसप्रकार का वचन सब दानवोंसे कहकर स्त्रियोंकी चिन्तासे दुःखितचित्त होकर पुरमें प्रवेश करता भया ३१ फिर मय दैत्य चाँदीके समान स्वच्छहो कामादिकोंके शत्रु शिवजीको सुन्दर वचनोंसे पूजकर उन्हीं महादेवजीकी शरणमें प्राप्तहुआ ३२ उस समय दैत्यके अभिमानसे क्रोधयुक्त तीसरे नेत्रकी प्रज्वलित अग्निसे युक्तहोकर शरणागत और अभय पदके प्राप्त होनेकी इच्छा करनेवाले मय दैत्यको नहीं जानते भये और वह दैत्य निभय होजाता भया ३३ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांत्रयस्त्रिंशदधिकशततमोऽध्यायः १३३ ॥

सूतजीबोले इसके पीछे नारद मुनि रणभूमिमें आकर देवताओंकी सभामें प्राप्त होतेभये १ और

लोकपालाःसदायत्र तस्थुर्मेरुगिरौयथा। मधुपिङ्गलनेत्रस्तु चन्द्रावयवभूषणः। देवानाम
धिपंप्राह गणपांश्चमहेश्वरः ५ वासवैतदरीणांते त्रिपुरंपरिदृश्यते। विमानैश्चपताकाभि
र्ध्वजैश्चसमलंकृतम् ६ इदंवृत्तमिदंख्यातं वह्निवद्भृशतापनम्। एतेजनागिरिप्रख्याः
सकुण्डलकिरीटिनः ७ प्राकारगोपुराट्टेषु कक्षान्तेदानवाःस्थिताः। इमेचतोयदाभासा दनु
जाविकृताननाः ८ निर्गच्छन्तिपुरोदैत्याः सायुधाविजयैषिणः ९ सत्वंशरशतैःसार्द्धं ससहा
योवरायुधः। सहाद्भिर्मामकैर्भृत्यैर्व्यापादयमहासुरान् १० अहंचरथवर्येण निश्चलाचल
वस्थितः। पुरःपुरस्यरन्ध्रार्थीस्थास्यामिविजयायवः ११ यदातुपुष्पयोगेन एकत्वंस्था
स्यतेपरम्। तदेतान्निर्दहिष्यामि शरेणैकेनवासव! १२ इत्युक्तोवैभगवता रुद्रेणेहसुरेश्व
रः। ययौतत्त्रिपुरंजेतुं तेनसैन्येनसंवृतः १३ प्रक्रान्तरथभीमैस्तैः सदेवैःपार्षदाङ्गणैः।
कृतसिंहरवोपेतैरुद्गच्छद्भिरिवाम्बुदैः १४ तेननादेनत्रिपुराद्दानवायुद्धलालसाः। उत्पत्य
दुद्रुवुश्चेलुः सायुधाःखेगणेश्वरान् १५ अन्येपयोधरारावाः पयोधरसमावभुः। सासिंह
नादंवादित्रं वादयामासुरुद्धताः १६ देवानांसिंहनादश्च सर्वतूर्यरवोमहान्। ग्रस्तोभूद्दै
त्यनादैश्च चन्द्रस्तोयधरैरिव १७ चन्द्रोदयात्समुद्धूतः पौर्णमासइवार्णवः। त्रिपुरंप्रभव

जो बड़े बिस्तारवाला इलावृत नाम खण्ड बलिराजाका यज्ञस्थान जहाँ राजाबलि बाँधागयाथा
वही देवताओंकी जन्मभूमि त्रिलोकीमें प्रसिद्ध है जिसमें कि विवाहयज्ञ और जातकर्मादिक क्रिया
होतीहैं देवताओंके व्रतहोतेहैं सब कन्यादान करतेहैं अपने गणोंसमेत शिवजी नित्य बिहारकरतेहैं २।४
और सुमेरु पर्व्वतपर लोकपाल स्थितहोकर रहतेहैं वहाँदेवताओंके अधिपति शिवजी देवताओंसे और
अपने गणोंसे यह वचन बोले कि हे इन्द्र यह शत्रुओंका त्रिपुर दिखाई देताहै यहत्रिपुर विमान ध्वजा
और पताकादिकोंसे युक्तहै और यह अग्निके समान देदीप्यमान वृत्रासुरहै और यह पर्व्वताकार मुकुट
कुंडलोंको धारण कियेहुए गढ़द्वार और अटारी इत्यादिकोंपर खड़ेहुए दैत्यलोग दीखते हैं यह मेघके
समान आकार वाले हाथोंमें शस्त्रलिये महाविकृत मुख जीतनेकी इच्छा करने वाले दैत्यलोग गमन
करतेहैं सो तुम मेरे भृत्योंसे युक्त होकर अपने असंख्य शस्त्रोंसे दैत्योंको दूरकरो ५।१० मैं उत्तमरथके
द्वारा निश्चलाचल पर्व्वतपर स्थितहोके इसपुरके छिद्रको देखूंगा और तुम्हारी बिजय करूंगा ११
जब पुष्पयोग करके यह तीनों पुर एक स्थानपर मिलेंगे तब एकही बाणसे मैं इसत्रिपुरको दग्धकर
दूंगा १२ देवेन्द्र शिवजीके इस वचनको सुनकर अपनी सेनाको साथ लेकर उस पुरके विजय करने
के लिये प्रस्थान करता भया अर्थात् इन्द्र अपने भयंकर देवता और शिवजीके पार्षदों समेत होकर
जबचला उससमय देवता मेघोंके समान गर्जने और सिंहों के समान शब्दकरने लगे १३।१४ उस
शब्दको सुनकर युद्धकी लालसावाले दैत्य त्रिपुरसे निकसकर आकाशमें दौड़तेहुए आये १५ बहुत
से दैत्य मेघके समान गर्जनाकर मदोन्मत्त होकर सिंहके नादोंके समान बाजा बजाने लगे १६ देव-
ताओं की भेरियों के शब्द जो सिंहके शब्दों के समान हो रहेथे वह दैत्यों के शब्दोंसे ऐसे नष्ट होगये
जैसे कि बादलोंमें चन्द्रमा नष्टहोजाताहै और जैसे चन्द्रमाके उदयहोने पर समुद्र चढ़ताहै इसी प्रकार

त्तद्भीमरूपमहासुरैः १८ प्राकारेषुपुरेतत्र गोपुरेष्वपिचापरे। अट्टालकान्समारुह्य केचिद्वलितवादिनः १९ स्वर्णमालाधराःशूराः प्रभासितकराम्बराः। केचिन्नदन्तिदनुजास्तोयमुक्ताइवाम्बुदाः २० इतश्चेतश्चधावन्तः केचिदुद्धूतवाससः। किमेतदितिपप्रच्छुरन्योन्यंगृहमाश्रिताः २१ किमेतन्नैवजानामि ज्ञानमन्तर्हितंहिमे। ज्ञास्यसेनन्तरेणेति कालोविस्तारतोमहान् २२सोऽप्यसौपृथिवीसारं सिंहश्चरथमास्थितः। तिष्ठतेत्रिपुरंपीड्य देहंव्याधिरिवोच्छ्रितः २३ यएषोस्तिसएषोऽस्तु काचिन्तासंभ्रमेसति। एहिमायुधमादाय क्कमेपृच्छाभविष्यति २४ इतितेऽन्योन्यमाविद्धा उत्तरोत्तरभाषिणः। आसाद्यपृच्छन्ति तदा दानवास्त्रिपुरालयाः२५ तारकाक्षपुरेदैत्यास्तारकाक्षपुरःसराः। निर्गताःकुपितास्तूर्णं विलादिवमहोरगाः२६निर्द्धावन्तस्तुतेदैत्याः प्रमथाधिपयूथपैः। निरुद्धागजराजानो यथा केसरियूथपैः २७दर्पितानांततश्चैषां दर्पिनानामिवाग्निनाम्। रूपाणिजज्वलुस्तेषामग्नीनामिवधम्यताम् २८ ततोव्रहन्तिचापानि भीमनादानिसर्वशः। निकृष्यजघ्नुरन्योन्यमिषुभिःप्राणभोजनैः२९मार्जारमृगभीमास्यान्पार्षदान्विकृताननान्। दृष्ट्वादृष्ट्वाहसन्नुच्चैर्दानवारूपसम्पदा ३० बाहुभिःपरिघाकारैः कृष्यतांधनुषांशराः। भटवर्मेषुविविशुस्तडागानी

दैत्योंके उदय होने से त्रिपुर दुर्गका भयंकर रूप होजाता भया१७।१८ कुछ दैत्य लोग गढ़ द्वार और अपने २ स्थानोंपर चढ़े हुए बाजोंको बजाते थे कितनेही अटारियों पर और कितनेही चलते हुए अपने बाजोंको बजातेभये १९ कितनेही सुवर्णमाला धारण कियेहुए शोभित हाथोंवाले कितनेही मेघोंके समान नाद करने वाले होकर भी वाजे बजाने लगे कितनेही वस्त्रोंको कंपातेहुए जहां तहां भागतेहुए फिरनेलगे कितनेही अपने२ घरोंमें आकर परस्पर पूछतेहुए कि यहक्याहै२०।२१किसीने कहा कि मैं नहीं जानता मेरे भीतरका ज्ञान आच्छादित होगया कुछकाल पीछे सब जाना जायगा यह कालबड़ा विस्तार कर रहाहै २२ और सुमेरु पर्व्वत पर सिंहरूपसे रथमें बैठाहै त्रिपुर के पीड़ित करनेकेनिमित्त इसप्रकारसे स्थितहुआहै जैसे कि शरीरके पीड़ादेनेको रोगशरीरमें स्थित होताहै २३ जो होयसोहोय हमको संभ्रम क्यों करनाचाहिये क्या चिन्ताहै तुमशस्त्रलेकरआओ मुझसे क्या पूछनाचाहतेहो २४ त्रिपुरवासी दैत्य इसप्रकार संभाषणकरके परस्परपूछनेलगे कि तारकासुरके पुरवासी दैत्य तारकासुरसमेत क्रोधकरके वड़ीशीघ्रतापूर्व्वक पुरसे ऐसे निकसते भये जैसेकि क्रोधयुक्तसर्प अपने२ बिलों से शीघ्रतापूर्व्वक निकलतेहैं २५। २६ उनभागतेहुए दैत्योंको शिवजी के गणोंने ऐसेरोकलिया जैसे कि सिंहोंकेगण बड़े २ हाथियोंको रोकलेतेहैं २७ तब अभिमानकरनेवाले धुमायेहुए अग्नियोंकेसमान इनदेवता और दैत्योंकेरूप देदीप्तहोजातेभये २८ इसके अनन्तर बहुतसे धनुषधारी भयंकर शब्दकरतेहुए प्राणोंके नाशकारक बाणोंको परस्परमें खींचकर मारतेभये २९ दैत्यलोग उनबिलाव और मृगोंके समान बिकराल मुखवाले शिवजीके गणोंको देख २ कर ऊंचे स्वरोंसे हँसनेलगे ३० मूसलोंकेसमान आकारवाली भुजाओंसे खैंचेहुए धनुषों के बाण शूरवीरोंकेशरीरों में ऐसेप्रवेश करजाते भये जैसेकि तड़ागों में मत्स्य और वृक्षों में पक्षी घुस

वपाक्षिणः ३१ मृताःस्थक्कनुयास्येथ हनिष्यामोनिवर्त्तताम्।इत्येवंपरुषाण्युक्त्वा दानवाःपार्षदर्षभाम् ३२ विभिदुःसायकैस्तीक्ष्णैः सूर्य्यपादाइवाम्बुदाम्। प्रमथाश्चापिसिंहाक्षाः सिंहविक्रान्तविक्रमाः। खण्डशैलशिलावृक्षैर्विभिदुर्दैत्यदानवान् ३३ अम्बुदैराकुलमिव हंसाकुलमिवाम्बरम्। दानवाकुलमत्यर्थं तत्पुरंसकलंबभौ ३४ विकृष्टचापादैत्येन्द्राः सृजन्तिशरदुर्दिनम्। इन्द्रचापांकितोरस्का जलदाइवदुर्दिनम् ३५ इषुभिस्ताड्यमानास्ते भूयोभूयोगणेश्वराः। चक्रुस्तेदेहनिर्यासं स्वर्णधातुमिवाचलाः ३६ तथावृक्षशिलावज्रशूलपट्टिपरश्वधैः। चूर्ण्यन्तेऽभिहतादैत्याःकाचाष्टङ्कहताइव ३७ चन्द्रोदयात्समुद्भूतः पौर्णमासइवार्णवः। त्रिपुरंप्रभवत्तद्वद्भीमरूपमहासुरैः ३८ तारकाक्षोजयत्येष इतिदैत्याअघोषयन्। जयतीन्द्रश्चरुद्रश्च इत्येवचगणेश्वराः ३९ वारितादारिताबाणैर्योधास्तस्मिन्बलोभये। निःस्वनन्तोऽम्बुसमये जलगर्भाइवाम्बुदाः ४० करैश्छिन्नैःशिरोभिश्च ध्वजैश्छत्रैश्चपाण्डुरैः। युद्धभूमिर्भयवती मांसशोणितपूरिता ४१ व्योम्निचोत्प्लुत्यसहसा तालमात्रंवरायुधैः। दृढाहताःपतन्पूर्वं दानवाःप्रमथास्तथा ४२ सिद्धाश्चाप्सरसश्चैव चारणाश्चनभोगताः। दृढप्रहारहर्षिताः साधुसाध्वितिचुक्रुशुः ४३ अनाहताश्चवियति देव

जातेहैं ३१ हम गयेहैं कहाँ जाओगे तुम को मारेंगे हटजाओ ऐसे२ कठोर वचन दैत्य लोग शिवजी के पार्षदों से कहते भये ३२ वह दैत्य शिवगणों को तीक्ष्ण बाणोंसे ऐसे बेधते भये जैसे कि बादलों को सूर्य्यकी किरणें भेदती हैं सिंहके समान नेत्रवाले महा पराक्रमी शिवके पार्षदभी शिला वृक्षादिकों करके दानवों को मारते भये जैसे कि मेघ और हंसोंसे संकुल आकाश होताहै उसी प्रकार दानवोंसे आकुल संपूर्ण त्रिपुर होताभया ३३।३४ जैसे कि इन्द्रधनुपसे शोभितहुए मेघ दुर्दिनको भेदन करतेहैं उसी प्रकार सब दैत्य वाणोंको खींचकर वाणरूपी दुर्दिन को मारतेथे ३५ बाणों करके ताड़ित कियेहुए गणेश्वर देहोंको ऐसे त्याग करते थे जैसे कि पर्व्वतों के समूह सुवर्ण धातुको अलग काढ़ देते हैं ३६ इसके पीछे वृक्ष शिला, वज्र, शूल, पट्टिश, फरसे और अनेक शस्त्र विशेषों से हतहुए दैत्यों के शरीर ऐसे चूर्ण होजाते भये जैसे कि पत्थर आदिक वस्तुओं से काच चूर्ण होजाते हैं ३७ जैसे कि चन्द्रमाके उदयहोनेसे समुद्र उभलताहै उसी प्रकार भयंकर रूप महाअसुरों से त्रिपुर दुर्ग उभलताभया ३८ फिर दैत्योंने तो पुकारा कि यह तारकासुरजीतता है और गणेश्वरोंने पुकारा कि इन्द्र और शिवजीततेहैं ३९ उन दोनों सेनाओं में बाणोंसे विदारित हुए योद्धा ऐसे श्वास लेतेभये जैसे कि जलसे भरेहुए मेघश्वास लेतेहैं ४० कटेहुए हाथ, शिर, ध्वजा, छत्रादिकों से मांसरुधिरसे भरी हुई वह रणभूमि महा भयकारी होजातीभई ४१ वह सब गणेश्वर हाथोंसे ताल बजाकर आकाशमें उछलते हुए फिर श्रेष्ठ शस्त्रों को भी धारण करते भये उस समय जब सब प्रकार से हतहोकर दानव गिरते भये तब गणेश्वर, सिद्ध, अप्सरा और चारणादिक यह सब आकाशमें स्थित होकर प्रहार कर२ प्रसन्नहो२ साधुसाधु शब्द करतेभये ४२। ४३ आकाश में देवताओं के नगाड़े बजे वह समय ऐसा शोभित मालूम होताथा जैसे कि मेघकेगर्जनसे क्रोधयुक्त कुत्तोंके भोंकनेपर शोभा होती

दुन्दुभयस्तथा। नदन्तोमेवशब्देन सरमाइवरोषिताः ४४ तेतस्मिंस्त्रिपुरेदैत्या नद्यःसि
न्धुपताविव। विशन्तिक्रुद्धवदना वल्मीकमिवपन्नगाः ४५ तारकाक्षपुरेतस्मिन्सुराःशूराः
समन्ततः। सशस्त्रानिपतन्तिस्म सपक्षाइवभूधराः ४६ योधयन्तित्रिभागेन त्रिपुरेतुग
णेश्वराः। विद्युन्मालीमयश्चैव भग्नौचद्रुमवद्रणे ४७ विद्युन्मालीसदैत्येन्द्रो गिरीन्द्रस
दृशद्युतिः। आदायपरिघंघोरं ताडयामासनन्दिनम् ४८ सनन्दीदानवेन्द्रेण परिघेणदृढ़ा
हतः। भ्रमतेमधुनाव्यक्तः पुरानारायणोयथा ४९ नन्दीश्वरेगतेतत्र गणपाख्यातविक्रमा।
दुद्रुवुर्जातसंरम्भा विद्युन्मालिनमासुरम् ५० घण्टाकर्णःशंकुकर्णौ महाकालश्चपार्षदाः।
ततश्चसायकैःसर्वान् गणपाण्गणपाकृतीन् ५१ भूयोभूयःसविव्याधगणेश्वरमहत्तमान्।
भित्वाभित्वारुरावोच्चैर्नभस्यम्बुधरोयथा ५२ तस्यारम्भितशब्देन नन्दीदिनकरप्रभः।
संज्ञांलभ्यततःसोऽपि विद्युन्मालिनमाद्रवत् ५३ रुद्रदत्तंतदादीप्तं दीप्तानलसमप्रभम्।
वज्रंवज्रनिभाङ्गस्य दानवस्यससर्जह ५४ तन्नन्दिभुजनिर्मुक्तं मुक्ताफलविभूषितम्। प
पातवक्षसितदावज्रंदैत्यस्यभीषणम् ५५ सवज्रनिहतोदैत्यो वज्रसंहननोपमः। पपातव
ज्राभिहतः शक्रेणाद्रिरिवाहतः ५६ दैत्येश्वरंविनिहतं नन्दिनाकुलनन्दिना। चुक्रुशुर्दान
वाःप्रेक्ष्यदुद्रुवुश्चगणाधिपाः ५७ दुःखामर्षितरोषास्ते विद्युन्मालिनिपातिते। द्रुमशैल

है ४४ उस समय वह शेष बचे हुए दैत्य त्रिपुर में ऐसे प्रवेश करते भये जैसे कि समुद्रमें नदी और
बिलोंमें सर्प प्रवेश करतेहों ४५ उस तारकाक्ष पुरमें सब दैत्य शस्त्रों को धारण करके ऐसे पड़तेभये
जैसे कि सपक्ष पर्व्वत उड़२ कर गिरतेहों ४६ उसपुरमें जाकर गणेश्वर लोग तीन स्थानमें युद्धकरते
भये तब उसरणमें मय दैत्य और विद्युन्माली यह दोनों भी आतेभये उस समय हस्ती के समान
स्थूल शरीर वाले विद्युन्माली ने मूसलको ग्रहण करके शिवजीके नन्दीको ताड़न किया उस
मूसल के प्रहार से नन्दी ऐसे भ्रमण करता भया जैसे कि नारायण के प्रहार से मधुदैत्य भ्रमता
हुआ था ४७। ४९ फिर वहाँ से नन्दिकेश्वर चला गया तब बड़े प्रसिद्ध पराक्रम वाले
शिवजीके गणवेगसे दौड़तेहुए विद्युन्माली दैत्यके पासआये ५० अर्थात् घंटाकर्ण, शंकुकर्ण, और
महाकाल यहतीन पार्षदआये इनसबको विद्युन्मालीदैत्यने बाणोंसेवेधा ५१ और गणेशादिक गणे-
श्वरोंको बहुत पीड़ादेकर मेघकी गर्जनाकेसमान भयंकर शब्दकरनेलगा ५२ फिर तो उसके उच्चस्वर
के शब्दोंकरके सूर्यके समान कान्तिवाले नन्दिकेश्वरको संज्ञाहुई तब फिर वहभी विद्युन्माली
दैत्यके सन्मुख आया ५३ और शिवजीके दियेहुए अग्निके समान कान्तिवाले वज्रको उसने दैत्यके
ऊपरछोड़ा ५४ तब नन्दिकेश्वरके हाथसे छूटाहुआ मोतियोंसे भूषित महाभयंकर वह वज्र उसदैत्यकी
छातीमें लगताभया ५५ उसवज्रके लगतेही वज्रके समान कठोर शरीरवाला वह दैत्यपृथ्वीपरऐसे-
गिरताभया जैसे कि इन्द्रके वज्रसे हतहुआ पर्व्वत गिरताहै ५६ फिर नन्दिकेश्वरसे हतहुए विद्यु-
न्माली दैत्यको अन्य दानव देखकर पुकारे और सेनाओंके सब स्वामी भागे ५७ तब तो महादुःख
के क्रोधसे युक्त होकर दैत्य लोग शिवजीके पार्षदोंपर वृक्ष और पर्व्वतोंकी ऐसे वर्षा करते भये जैसे

महावृष्टिंपयोदाःसस्रृजुर्यथा ५८ तेपीड्यमानागुरुभिर्गिरिभिश्चगणेश्वराः। कर्तव्यंन
विदुःकिञ्चिद्वन्द्यमाधार्मिकाइव ५९ ततोऽसुरवरः श्रीमांस्तारकाक्षःप्रतापवान्। सतरू
णांगिरीणांवै तुल्यरूपधरोबभौ ६० भिन्नोत्तमाङ्गागणपा भिन्नपादाङ्कितानना: । विरेजु
र्भुजगामन्त्रैर्वार्यमाणायथातथा ६१ मयेनमायावीर्येण बध्यमानागणेश्वराः।भ्रमन्तिबहुश
ब्दालाःपञ्जरेशकुनाइव ६२ तथासुरवरःश्रीमांस्तारकाक्षः प्रतापवान्। ददाहचबलंसर्वं
शुष्केन्धनमिवानलः ६३ तारकाक्षेणवार्यन्ते शरवर्षैस्तदागणाः । मयेनमायानिहतास्ता
रकाख्येणचेषुभिः ६४ गणेशाविधुराजाता जीर्णमूलायथाद्रुमाः ६५ भूयःसम्पततेचाग्नि
र्ग्रहान्ग्राहान्भुजङ्गमान्। गिरीन्द्रांश्चहरीन्व्याघ्रान् वृक्षान्सृमरवर्णकान् ६६ शरभान
ष्टपादांश्चआपःपवनमेवच । मयोमायाबलेनैव पातयत्येवशत्रुषु ६७ तेतारकाक्षेणमयेन
मायया संमुह्यमानाविवशागणेश्वराः । नशक्नुवंस्तेमनसापिचेष्टितुं यथेन्द्रियार्थामुनिना
भिसंयताः ६८ महाजलाग्न्यादिसकुञ्जरोरगैर्हरीन्द्रव्याघ्रर्क्षतरक्षुराक्षसैः । विबाध्यमाना
स्तमसाविमोहिताःसमुद्रमध्येष्विवगाधकाङ्क्षिणः ६९ संमर्द्यमानेषु गणेश्वरेषु सन्नर्दमाने
ष्वसुरेतरेषु। ततःसुराणांप्रवराभिरक्षितुं रिपोर्बलंसंविविशुः सहायुधाः ७० यमोगदास्त्रो
वरुणश्चभास्करस्तथाकुमारोऽमरकोटिसंयुतः । स्वयंचशक्रःसितनागवाहनःकुलीशपा

कि जलकी वर्षा मेघ करते हों ५८ बहुत भारी २ पर्व्वतों से पीड़ित हुए शिवजीके गणेश्वर कुछ
कर्त्तव्यको भी भूलगये अर्थात् कुछ अपना करतब न करसके ५९ इसके अनन्तर तारकासुर दैत्य
वृक्षों से युक्त पर्व्वताकार शरीर धारण करताभया ६० उस समय कटेहुए शिर चरण और मुखों
वाले वह गणेश्वर ऐसे शोभितहुए जैसे कि मंत्रों से कीले हुए सर्प होते हैं ६१ मायाके पराक्रम
वाले मयदैत्यसे बांधेहुए शिवजीके गण ऐसे भ्रमते भये जैसे कि बहुत शब्दोंवाले पक्षी पिंजरे में
भ्रमते हैं ६२ और श्रीमान् तारकासुर दैत्य देवताओं की सेनाको ऐसे दग्ध करता भया जैसे कि
प्रबलअग्नि सूखे इंधनको जलाताहै ६३ उस समय तारकासुर और मयदैत्यने बाणोंकी वर्षाकरके
शिवजीके गणोंको महाहत करदिया तब शिवजीके गण ऐसे कांपने लगे जैसे कि जीर्णहोने वाले
वृक्षवायुके वेगसे कंपायमान होते हैं ६४। ६५ फिर मयदैत्यकी मायाके बलसे वहां अग्नि उत्पन्न
होताभया वह अग्नि देवता और शिवजीके गणों पर ग्रह,ग्राह, सर्प, पर्व्वत,सिंह, व्याघ्र, वृक्ष कटी
हुई [illegible]वाली टीड़ी जल और वायु इन सबको छोंड़ता भया ६६।६७ मयदैत्यकी मायासे मोहके
द्वारा विवश हुए वह गणेश्वर दैत्योंके साथमन करके भी युद्ध करने को ऐसे समर्थ नहीं होते भये
जैसे कि मुनियोंसे रोके हुए विषय अपनी २ सामर्थ्य से रहित होजाते हैं महा जल, अग्नि, हाथी,
सर्प, सिंह, व्याघ्र, रीछ और राक्षस इनसे पीड़ित और अन्धकारसे मोहित हुए गणेश्वर ऐसे महा
दुःखको प्राप्त होते भये जैसे कि थाहको ढूंढ़ता समुद्र में डूबता हुआ पुरुष विकल होताहै ६८।६९
जब गणेश्वर पीड़ित होने लगे दैत्य शब्द करनेलगे तब देवताओंकी रक्षाके निमित्त शस्त्रोंको धारण
किये हुए आगे कहे हुए गण प्राप्त हुए ७० गदाको धारण किये हुए धर्मराज, वरुण, सूर्य्य, देवता-

णिःसुरलोकपुङ्गवः ७१ सचोडुनाथःससुतोदिवाकरः ससान्तकस्त्र्यक्षपतिर्महाद्युतिः।
एतेरिपूणांप्रबलाभिरक्षितं तदाबलंसंविविशुर्मदोद्धताः ७२ यथावनंदर्पितकुञ्जराधिपा
यथानभःसाम्बुधरंदिवाकरः। यथाचसिंहैर्विजनेषुगोकुलं तथाबलंतत्त्रिदशैरभिद्रुतम् ७३
कृतप्रहारातुरदीनदानवं ततस्त्वभज्यन्तबलंहिपार्षदाः। स्वज्र्योतिषांज्योतिरिवोष्मवान्
हरिर्यथातमोघोरतरंनराणाम् ७४ विशान्तयामासयथासदैव निशाकरःसञ्चितशार्वरन्त
मः। ततोऽपकृष्टेचतमःप्रभावे अस्त्रप्रभावेचविवर्द्धमाने ७५ दिग्लोकपालैर्गणनायकै
श्च कृतोमहान्सिंहरवोमुहूर्तम्। संख्येविभग्नाविकराविपादाश्छिन्नोत्तमाङ्गाःशरपूरिता
ङ्गाः ७६ देवेतरादेववरैर्विभिन्नाः सीदन्तिपङ्केषुयथागजेन्द्राः। वज्रेणभीमेनचवज्रपाणिः
शक्त्याचशक्त्याचमयूरकेतुः ७७ दण्डेनचोग्रेणचधर्मराजः पाशेनचोग्रेणचवारिगोप्ता।
शूलेनकालेनचयक्षराजो वीर्येणतेजस्वितयासुकेशः ७८ गणेश्वरास्तेसुरसन्निकाशाः पू
र्णाहुतीसिक्तशिखिप्रकाशाः। उत्सादयन्तेदनुपुत्रवृंदान्यथैवइन्द्राशनयःपतन्त्यः ७९ म
यस्तुदेवान्परिरक्षितारमुमात्मजंदेववरंकुमारम्। शरेणभित्त्वासहितारकासुतं सतारका
स्यासुरमाबभाषे ८० कृत्वाप्रहारंप्रविशामिवीरं पुरंहिदैत्येन्द्रबलेनयुक्तः। विश्राममूर्ज
स्करमप्यवाप्य पुनःकरिष्यामिरणंप्रपन्नैः ८१ वयंहिशस्त्रक्षतवीक्षिताङ्गा विशीर्णशस्त्रध्व

ओंकी कोटिसे युक्त स्वामिकार्त्तिक, ऐरावत हाथीपर वज्रको हाथमें लिये इन्द्र ७१ और महाकान्ति
वाले नवग्रह यह सब मदोन्मत्त ग्रहों समेत वैरियों की सेनामें ऐसे प्रवेश करतेभये जैसे मदो-
न्मत्त हाथीवनको तोड़े और मेघवाले बादल में सूर्य्य चमकता होय उनके प्रवेश करतेही दैत्यों की
सेना ऐसे भागी जैसे कि निर्जन वनमें सिंहों के मारे गौएं भाजती चलीजाती हैं ७२ । ७३
प्रहारों से पीड़ितहुए दैत्योंको देवतालोग ऐसेदूर करदेतेभये जैसेकि बड़ेघोर अन्धकारको सूर्य्य दूर
करदेते हैं ७४ जैसेकि रात्रिके संचितहुए अंधेरेको चन्द्रमा दूर करदेताहै उसीप्रकार शिवजीकी कृपा
से दैत्यों के अन्धकाररूपी शस्त्रोंका प्रभाव दूरहोगया उससमय दिग्पाल, लोकपाल और गणेश्वरों
ने सिंहके शब्दके समान महानाद किया उसयुद्धमें सब दैत्यकटेहुए हाथपैर और शिरोंवाले बाणोंसे
भिदे अंगवाले होतेभये ७५।७६ देवताओंसे भेदन कियेहुए दैत्य ऐसेदुःख पातेभये जैसेकि कीचमें
फँसे हुए हाथी दुःखपाते हैं उसकालमें इन्द्रने वज्रसे ताड़न किया, स्वामिकार्त्तिकने अपनी शक्तिसे
७७धर्मराजने उग्रदंडसे, वरुणजीने फाँसीसे और कुबेरने अपने पराक्रमके द्वारा बड़ेतेजयुक्त त्रिशूल
से दैत्योंका नाशकिया ७८ वह गणेश्वरलोग पूर्णाहुति से प्रकाशित अग्निके समान देदीप्यमानहो-
कर युद्धमेंसे दैत्योंको भजातेहुए विद्युतोंके समान इधरउधर कड़कतेभये ७९, तब मयदैत्य देवताओं
के रक्षक स्वामिकार्त्तिकको बाणोंसे बेधकर तारकासुर दैत्यसे बोला ८० हे दैत्य अबमैं प्रहार करके
इस त्रिपुर में प्रवेशकरूंगा तू भी यहां पुरमें विश्रामकर फिर इन प्राप्त होनेवाले देवताओं से युद्ध
करेंगे ८१ हमशस्त्रों के लगने से कटेहुए अंगवाले होरहे हैं हमारे शस्त्र, ध्वजा और वाहनोंको सजो
यद्यपि यहसब शिथिल होरहे हैं तो भी सजो क्योंकि यहसब गणेश्वर लोग हमारे जीतने कीइच्छा

जवर्मवाहाः।जयैषिणस्तेजयकाशिनश्च गणेश्वरालोकवराधिपाश्च ८२ मयस्यश्रुत्वादि
वितारकाख्यो वचोऽभिकाङ्क्षन्नक्षतजोपमाक्षः । विवेशतूर्णंत्रिपुरन्दितेःसुतैः सुतैरदित्या
युधिविद्धहर्षैः ८३ ततःसशङ्खानकभेरिभीमं ससिंहनादंहरसैन्यमाबभौ । मयानुगंघोरग
भीरगह्वरं यथाहिमाद्रेर्गजसिंहनादितम् ८४ ॥

इति श्रीमत्स्यपुराणेचतुस्त्रिंशदधिकशततमोऽध्यायः १३४ ॥

(सूत उवाच)मयःप्रहारंकृत्वातु मायावीदानवर्षभः। विवेशतूर्णंत्रिपुरमभ्रंनीलमिवा
म्बरम् १ सदीर्घमुष्णंनिश्वस्य दानवान्वीक्ष्यमध्यगान्। दध्यौलोकक्षयेप्राप्ते कालंकाल
इवापरः २ इंद्रोऽपिविभ्यतेयस्य स्थितोयुद्धेप्सुरग्रतः। सचापिनिधनंप्राप्तो विद्युन्माली
महायशाः ३ दुर्गंवैत्रिपुरस्यास्य नसमंविद्यतेपुरम्। तस्याप्येषोनयःप्राप्तो नदुर्गंकारणं
क्वचित्४कालस्यैववशेसर्वं दुर्गंदुर्गतरञ्चयत्।कालेक्रुद्धेकथंकालात्त्राणंनोऽद्यभविष्यति५
लोकेषुत्रिषुयत्किञ्चिद्बलंवैसर्वजन्तुषु । कालस्यतद्वशंसर्वमितिपैतामहोविधिः ६ अ
स्मिन्कःप्रभवोद्योगोह्यसन्धार्योमितात्मनि। लङ्घनेकःसमर्थःस्यादृतेदेवंमहेश्वरम् ७ बि
भेमिनेन्द्राद्धियमाद्वरुणान्नचवित्तपात्। स्वामीचैषान्तुदेवानां दुर्जयःसमहेश्वरः ८ ऐश्व
र्यस्यफलंयत्तत् प्रभुत्वस्यचयत्फलम्। तदद्यदर्शयिष्यामि यावद्वीराःसमन्ततः ९ वापी
ममृततोयेन पूर्णांस्रक्ष्येवरौषधीः। जीविष्यन्तितदादैत्याः सञ्जीवनवरौषधीः १० इति

कररहे हैं ८२ इसमयके वचनको तारकासुर दैत्य सुनकर शीघ्रही सव दैत्यों समेत पुरमें प्रवेश करता भया ८३ तव देवताओं की सेना में शंखढोल और भेरीआदिक का शब्द सिंहनादके समान होता भया वह ऐसाशब्दहुआ मानों हिमाचलपर्व्वत में सिंह और हाथी गर्जना कररहे हों ८४ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांचतुस्त्रिंशदधिकशततमोऽध्यायः १३४ ॥

सूतजी वोले कि दानवोंमें उत्तम वड़ा मायावी मयनाम दैत्य देवतोंपर प्रहारकरके त्रिपुरमें ऐसे प्रवेश करगया जैसेकि नीले अम्वरमें नीलाबादल प्रवेश करजाता है १ फिर वह दैत्य बड़े २ दीर्घ श्वासोंको लेकर अपनेको दानवों के मध्यमें प्राप्तहुआ देखकर लोकके नाशमें कालका ध्यान करने लगा कि वह विद्युन्माली जो दूसरे कालके बराबरथा और जिसके भयसे वज्रधारी इन्द्रयुद्धसे हट कर जलोंमें स्थितहुआ था ऐसा महायशवाला भी होकर नाशको प्राप्तहोगया २।३ इस त्रिपुरनाम पुरके समान कोई गढ़नहीं है ऐसा विचारकर उससमय इस दैत्यको यह नीति प्राप्त हुई कि यहां कुछ यह पुरही कारण नहीं होसक्ता है क्योंकि यहगढ़ और इस्से भी बड़े २ गढ़ यह सब कालही के वशीभूत हैं जब कि हमारे क्रोधसे कालही हमारा शत्रु है उस्से युद्धकैसे होसक्ताहै तीनों लोकों के जीवमात्रमें जो वल पराक्रमहै वह सब कालकेही आधीनहै यह ब्रह्माजीकी युक्त विधिहै ६ ऐसे कालमें कौनसा उद्योग सफल होसक्ताहै शिवजीके विना इसप्रबल कालको कौनउल्लंघनकर सक्ताहै ७ मैं इन्द्र, वरुण, यम और कुबेरादिकोंसे भी नहीं डरताहूं परन्तु जो काल इन सबकाभी स्वामीहै उसकालका जीतनाबड़ा कठिनहै ८ मैं अब सब बीरोंके सन्मुख अपनी ईश्वरता, प्रभुता

सञ्चिंत्यबलवान् मयोमायाविनांवरः । माययाससृजेवापीं रम्भामिवपितामहः ११ द्वियो
जनायतांदीर्घां पूर्णयोजनविस्तृताम् । आरोहसंक्रमवतीं चित्ररूपांतथैवच १२ इन्दोः
किरणकल्पेन मृष्टेनामृतगन्धिना । पूर्णांपरमतोयेन गुणपूर्णामिवाङ्गनाम् १३ उत्पलैःकु
मुदैःपद्मैर्वृतांकादम्बकैस्तथा । चन्द्रभास्करवर्णाभैर्भीमैरावरणैर्वृताम् १४ खगैर्मधुररावै
श्च चारुचामीकरप्रभैः । कामैषिभिरिवाकीर्णां जीवानामरणीमिव १५ तांवापींसृज्यसम
यो गङ्गामिवमहेश्वरः । तस्याम्प्रक्षापयामास विद्युन्मालिनमादितः १६ सवाप्यांमज्जि
तोदैत्यो देवशत्रुर्महाबलः । उत्तस्थाविन्धनैरिद्धः सद्योहुतइवानलः १७ मयस्यचाञ्जलिं
कृत्वा तारकाख्योऽभिवादितः । विद्युन्मालीतिवचनं मयमुत्थायचाब्रवीत् १८ क्वनन्दीस
हरुद्रेण वृतःप्रमथजम्बुकैः । युद्ध्यामोनन्दिनंपीड्य दयादेहेषुकाहिनः १९ अन्वास्यैवच
रुद्रस्य भवामःप्रभविष्णवः । तैर्वाविनिहतायुद्धे भविष्यामोयमाशनाः २० विद्युन्माले
र्निशम्यैतन्मयोवचनमूर्जितम् । तंपरिष्वज्यसाद्र्राक्ष इदमाहमहासुरः २१ विद्युन्मालिन्न
मेराज्य मभिप्रेतन्नजीवितम् । त्वयाविनामहाबाहो ! किमन्येनमहासुर ! २२ महामृतम
यीवापी ह्येषामायाभिरीश्वर ! । सृष्टादानवदैत्यानां हतानांजीववर्द्धिनी २३ दिष्ट्यात्वांदै

और पराक्रमका जो फलहै वह अच्छेप्रकारसे दिखाऊँगा मैं एक अमृत जलसे हुई बावड़ी बनाऊंगा
और ऐसी श्रेष्ठ औषधीको भी बनाऊंगा जिस्से कि मेरे सब दैत्य उस संज वनी औषधीसे जीवेंगे
९।१०उस महामाया रचने वालोंमें श्रेष्ठ बड़े बलवान् मयदैत्यने ऐसा विचारकर अपनी माया
करके आठकोसलंबी चारकोस चौड़ी सुन्दर सीढ़ियों वाली अनेकरूपयुक्त चन्द्रमाकी किरणोंके समान
स्वच्छ अमृत के समान सुगन्धियुक्त जलसे पूर्ण सुन्दर गुण सम्पन्न स्त्री के समान ऐसी बावड़ी
रची जैसाकि ब्रह्माजीने रंभाको रचाथा११।१३कमल कुमोदिनी पद्म और कदम्बों समेत सूर्य्य
चन्द्रमाके वर्णवाले भयानक आवरणोंसे युक्त उस बावड़ी को चारों ओर से सुन्दर मीठे भमीरी के
समान शब्दकरने वाले और कामदेवके इच्छाकरानेवाले पक्षियों से व्याप्तवृक्षोंसे शोभितकिया यह
ऐसी बावड़ीथी जैसी कि जीवोंसे भरीहुई नौकाहोती है जैसे कि गंगाजीको शिवजीने प्रकटकिया उसी
प्रकार मय दैत्यने उस बावड़ीको रचकर उसमें विद्युन्मालीकी लासको स्नानकरवाया उसमें स्नान
करातेही वह देवताओंका शत्रु मराहुआ विद्युन्माली जीकर ऐसे उठबैठा जैसे कि बुझीहुई अग्नि घृत
के डालने से देदीप्तहोजाती है १४।१७ फिर वह सत्कार कियाहुआ तारकनाम दैत्य अंजली बाँधकर
मयके आगेबोला और विद्युन्माली भी बोला १८ कि नन्दी प्रेतादिक गण और शृगालादिकों समेत
शिवजी कहाँ हैं हम उन्हीं शिवजीकेसंग युद्धकरेंगे और नादियेको मारकर सबसेनाको जीतेंगे और
शिवजीको निकासकर सब जगत् के स्वामीहोंगे अथवा सेनासमेत शिवजीसे मारेहुए होकर धर्मराज
के स्थानमें चलेजावेंगे१९।२०विद्युन्माली के इसवचनको सुनकर मयदैत्य बड़ेप्रसन्ननेत्रहृदयसे उस्से
मिलकर यह वचनबोला २१ हे विद्युन्माली तेरे विनामुझे राज्यसमेत अपना जीवनभी अच्छानहीं
लगता तो और वस्तु क्या अच्छीलगेंगी २२ और हेवीर यह महा अमृतमयी बावड़ी जो मैंने माया

त्य ! पश्यामि यमलोकादिहागतम् । दुर्गतावनयग्रस्तं भोक्ष्यामोऽद्यमहानिधिम् २४ द
ष्ट्वादृष्ट्वाचतांवापीं माययामयनिर्मिताम् । हृष्टाननाक्षादैत्येन्द्रा इदंवचनमब्रुवन् २५ दान
वा ! युद्ध्यतेदानीं प्रमथैःसह निर्भयाः । मयेननिर्मितावापी हतान्सञ्जीवयिष्यति २६ त
तःक्षुब्धाम्बुधिनिभाभेरीसानुभयङ्करी । वाद्यमानाननादोच्चै रौरवीसापुनःपुनः २७ श्रुत्वा
भेरीरवंघोरं मेघारम्भितसन्निभम् । न्यपतन्नसुरास्तूर्णं त्रिपुराद्युद्धलालसाः २८ लोहरा
रथ २९ हिंसास्तेयानृतंमाया दम्भश्चैवतपस्विनाम् । एतेस्वभावाःपुष्यस्य साधयन्तिच
ताःप्रजाः ३० एषधर्म्मःस्मृतःकृत्स्नो धर्म्मश्चपरिहीयते । मनसाकर्म्मणावाचा वार्त्ताः
सिद्ध्यन्तिमानवाः ३१ कलिःप्रमारकोरोगःसततंचापिक्षुद्भयम् । अनावृष्टिभयञ्चैव देशा
नाञ्चविपर्ययः ३२ नप्रमाणेस्थितिर्ह्यस्ति पुष्येघोरेयुगेकलौ । गर्भस्थोम्रियतेकश्चिद्

दिक उपद्रव होते हैं १८ तब मनबाणी और कर्म जन्य दुःखोंकरके उनको निर्वेद उत्पन्नहोताहै उस निर्वेदके होनेसे वहपुरुष उस दुःखसे छुटनेका विचारकरते हैं १९ विचारकरनेसे वैराग्य उत्पन्न होता है वैराग्यसे सबवस्तुओंमें दोष दीखनेलगता है फिर दोषोंके देखनेसे ज्ञानकी उत्पत्ति होती है २० इसप्रकारसे उनमेधावी पुरुषोंको स्वायंभुव मन्वन्तरमें ज्ञान उत्पन्न होताहै द्वापरमें शास्त्रोंके बंचक अर्थात् ठगनेवाले आयुर्वेदके विकल्प, ज्योतिश्शास्त्रके विकल्प, अर्थशास्त्रके विकल्प, धर्म शास्त्रके विकल्प, कल्प सूत्रोंकी प्रक्रिया, भाष्य विद्याका विवाद और स्मृति शास्त्रके भेदादिक वार्त्ताओंसे मनुष्यों की बुद्धियोंके अनेकभेद होजातेहैं फिरकर्म मनबाणी आदिसे मनुष्योंकी आजीविका कष्टकरके सिद्ध होती है २१ । २४ द्वापरमें सबप्राणियोंको विशेषकरके क्लेशही रहताहै जब लोभ धैर्य्य युद्ध और तत्त्वोंके निश्चयका अभाव, वेद शास्त्रका संघात, गुप्तहोना, वर्णाश्रमों का मिलना ध्वंसहोना और कामद्वेष यहसब होजाते हैं तबमनुष्योंकी दोहज़ार वर्षोंकी पूर्णायु होती है जबद्वापरका कुछ शेषरह जाताहै तबउसके संध्या संध्यांश व्यतीत होते हैं उनमेंभी गुणहीन पुरुष रहते हैं फिरजब द्वापरका थोड़ासा अंश शेषरहजाता है तब कलियुगकी उत्पत्ति होती है २५ । २९ इस कलियुगमें सब लोग हिंसा, चोरी, मिथ्या, और छल आदिक दोषोंमें लिप्त होजातेहैं और तपस्वी लोगोंके माया, पाखंड और दंभ यहसब स्वभावहीसे उत्पन्न होजाते हैं ३० जो २ धर्म कहे हैं वहसब कलियुगमें नष्टहोजातेहैं सबमनुष्य मनबाणी और कर्मोंकरके अपनी आजीविका करनेमें प्रवृत्त रहते हैं ३१ कलियुगमें मारनेवाले रोगहैं और अनावृष्टिभय औरदेशोंका विपर्य्यय यहसब हुआकरते हैं ३२ जब घोरकालि-

यौवनस्थस्तथापरः ३३ स्थावर्य्यमध्यकौमारे म्रियन्तेचकलौप्रजाः । अल्पतेजोबलाःपा
पा महाकोपाह्यधार्मिकाः ३४ अनृतव्रतलुब्धाश्च पुष्येचैवप्रजाःस्थिताः । दुरिष्टैर्दुरधी,
तैश्च दुराचारैर्दुरागमैः ३५ विप्राणांकर्म्मदोषैस्तैः प्रजानांजायतेभयम् । हिंसामानस्त
थेर्ष्याच क्रोधोऽसूयाऽक्षमाऽधृतिः ३६ पुष्येभवन्तिजन्तूनां लोभोमोहश्चसर्वशः । संक्षो
भोजायतेऽत्यर्थं कलिमासाद्यवैयुगम् ३७ नाधीयन्तेतथावेदान्यजन्तेवैद्विजातयः । उत्सी
दन्तियथाचैव वैश्यैःसार्द्धन्तुक्षत्रियाः ३८ शूद्राणांमन्त्रयोनिस्तु सम्बन्धोब्राह्मणैःसह ।
भवतीहकलौतस्मिन् शयनासनभोजनैः ३९ राजानःशूद्रभूयिष्ठाः पाषण्डानांप्रवृत्तयः ।
काषायिणश्चनिष्कच्छास्तथाकापालिनश्चह ४० येचान्येदेवव्रतिनस्तथायेधर्म्मदूषकाः ।
दिव्यवृत्ताश्चयेकेचिद् वृत्त्यर्थंश्रुतिलिङ्गिनः ४१ एवम्विधाश्चयेकेचिद्भवन्तीहकलौयुगे ।
अधीयतेतदावेदाञ्शूद्राधर्मार्थकोविदाः ४२ यजन्तिह्यश्वमेधैस्तु राजानःशूद्रयोनयः ।
स्त्रीबालगोबधंकृत्वा हत्वाचैवपरस्परम् ४३ उपहत्यतथान्योन्यं साधयन्तितदाप्रजाः ।
दुःखप्रचुरताल्पायुर्देशोत्सादःसरोगता ४४ अधर्माभिनिवृत्तत्वं तमोवृतंकलौस्मृतम् ।
भ्रूणहत्याप्रजानाञ्च तथाह्येवंप्रवर्त्तते ४५ तस्मादायुर्बलंरूपं प्रहीयन्तेकलौयुगे । दुः
खेनाभिप्लुतानांच परमायुःशतंनृणाम् ४६ भूत्वाचनभवन्तीह वेदाःकलियुगेऽखिलाः ।
उत्सीदन्तेयथायज्ञाः केवलंधर्म्महेतवः ४७ एषाकलियुगावस्था सन्ध्यांशौतुनिबोधत ।

युग आता है तब प्रमाण नहींरहता कोईतो गर्भमेंही स्थितहुआ मरजाताहै कोई बाल्यावस्थामें और कोई युवावस्थामेंही मरजाता है ३३ किसी वस्तुकाठिक प्रमाण नहीं रहता कलियुगके लोग अल्पतेज बलवाले पापी, महाक्रोधी अधर्मी मिथ्यावादी और महालोभी होते हैं ३४ सबप्रजा मिथ्यावादी और लोभी होजाती है और बुरेइष्ट, बुरापढ़ना दुराचार और दुरागम इत्यादिक ब्राह्मणोंके कर्मों से प्रजाको बड़ाभयउत्पन्न होताहै हिंसा, अभिमान, ईर्षा, क्रोध,निन्दा, क्षमानकरना, अधैर्य्य, लोभ और मोह यहसब बातें कलियुगके जीवोंमें होजाती हैं इसयुग में विषय भोगादिक बहुत बढ़जाते हैं ३५। ३७ ब्राह्मण वेदोंको नहीं पढ़ते, यज्ञोंको नहींकरते, वैश्योंके साथ क्षत्री नष्टहोजाते हैं ३८ शूद्रोंको मंत्र संस्कार होताहै ब्राह्मणोंसे संबंध होताहै बहुधा लोग शय्यापरही बैठहुए या सोतेहुए भोजन करनेलगते हैं ३९ बहुत शूद्रराजा होकर पाखंडों की प्रवृत्ति करते हैं, शूद्ररंगे वस्त्र पहर कर संन्यास धारण करते हैं देवता के नियमवाले दिव्य वृत्तान्तवाले ब्राह्मणोंके धर्ममें दोष निकालते हैं आजीविकाके निमित्त वेदोक्त चिह्नों को धारण करते हैं ४० । ४१ इसप्रकारसे कलियुगमें धर्म अर्थके जाननेवाले शूद्रही वेदोंको पढ़ते हैं ४२ शूद्रजातिके राजा अश्वमेधादिक यज्ञों से पूजन करतेहैं और सब प्रजा परस्पर में स्त्रीबध, बालकबध, और गोबध करकेभी अपनेकार्य्यको सिद्ध करती है,बहुत से दुःखों से स्वल्पआयु से, और नानारोगों से युक्तहोकर देश उजड़जाते हैं ४३ । ४४ कलियुग में अधर्म और तमोगुण के उत्पन्नहोने से लोग भ्रूणहत्या करतेहैं इसीसे मनुष्यों के आयु और रूपबल आदिक क्षीण होजातेहैं दुःखसे युक्तहुए मनुष्योंकी पूर्णआयु सौ १०० वर्षकी है ४५।४६ इस

युगेयुगेतुहीयन्ते त्रींस्त्रीन्पादांश्चसिद्धयः ४८ युगस्वभावाःसन्ध्यासु अवतिष्ठन्तिपादतः।
सन्ध्यास्वभावाःस्वांशेषु पादेनैवावतास्थिरे ४९ एवंसन्ध्यांशकेकाले सम्प्राप्तेतुयुगान्तिके।
तेषामधर्मिणांशास्ता भृगूणाञ्चकुलेस्थितः ५० गोत्रेणवैचन्द्रमसेनाम्नाप्रमतिरुच्यते।क
लिसन्ध्यांशभागेषु मनोःस्वायम्भुवेऽन्तरे ५१ समास्त्रिंशत्तुसम्पूर्णाः पर्यटन्वैवसुन्धराम्।
अस्त्रकर्मासवैसेनां हस्त्यश्वरथसंकुलाम् ५२ प्रगृहीतायुधैर्विप्रैः शतशोऽथसहस्रशः। स
तदातैःपरिवृतोम्लेच्छान्सर्वान्निजघ्निवान् ५३ सहत्वासर्वशश्चैव राजानःशूद्रयोनयः।
पाषण्डान्सतदासर्वान्निःशेषानकरोत्प्रभुः ५४ अधार्मिकाश्चयेकेचित्तान्सर्वान्हान्तिसर्वशः।
औदीच्यान्मध्यदेशांश्च पार्वतीयांस्तथैवच ५५ प्राच्यान्प्रतीच्यांश्चतथा विन्ध्यपृष्ठाप
रान्तिकान्।तथैवदाक्षिणात्यांश्च द्रविडान्सिंहलैःसह ५६ गन्धारान्पारदांश्चैव पह्लवान्य
वनान्शकान्।तुषारान्बर्बशान्श्वेतान् पुलिन्दान्बर्बरान्खसान् ५७ लम्पकानान्ध्रकांश्चा
पिचोरजातींस्तथैवच। प्रवृत्तचक्रोबलवान्शूद्राणामन्तकृद्बभौ ५८ विद्राव्यसर्वभूतानि
चचारवसुधामिमाम्। मानवस्यतुवंशेतु नृदेवस्येहजज्ञिवान् ५९ पूर्वजन्मनिविष्णुश्च
प्रमतिर्नामवीर्यवान्। स्वतःसर्वैचन्द्रमसः पूर्वकलियुगेप्रभुः ६० द्वात्रिंशेऽभ्युदितेवर्षे प्र
क्रान्तोविंशतिंसमाः। निजघ्नेसर्वभूतानि मानुषाण्येवसर्वशः ६१ कृत्वाबीजावशिष्टान्तां
पृथ्वींक्रूरेणकर्म्मणा। परस्परनिमित्तेन कालेनाकस्मिकेनच ६२ संस्थितासहसायासे से

कलियुग में सबवेद होनेपरभी प्रवृत्त नहींहोते और धर्म के हेतु यज्ञादिकोंकाभी विध्वंस होजाताहै ४७
यह कलियुग की व्यवस्थाहै अब सन्ध्या और सन्ध्यांशकोंकोभी सुनो प्रत्येक युगमें तीन २ चरण सिद्धि
से हीनहोजाते हैं सन्ध्याओं में एकपादमात्रही युगों के स्वभावस्थित रहते हैं सन्ध्याके स्वभाव एक
चरणमात्र अपने सन्ध्यांशों में स्थित रहते हैं ४८।४९,इस रीतिसे जब सन्ध्यांशकाल प्राप्तहुआ तब उन
अधर्मियों को दण्डदेनेवाला भृगुवंशी चन्द्रमस गोत्र में होनेवाला प्रमतिनाम राजा स्वायंभुव मनु के
अन्तरमें कलियुग के सन्ध्यांशों में उत्पन्न होताभया ५०।५१ वह राजा तीसवर्ष की अवस्थाको प्राप्त
होकर हाथी घोड़े समेत उत्तम सेनाको साथ ले शस्त्रों को धारण कियेहुए हज़ारों ब्राह्मणों से युक्त होकर
सम्पूर्ण म्लेच्छोंको मारताभया ५२।५३ शूद्रजातिके सब राजाओं को मारकर उसने सब पाखण्डोंकाभी
नाशकरदिया ५४ जितने अधर्मीलोग थे उनको मारकर उत्तर के रहनेवाले मध्यदेशके
रहनेवाले पर्वतों के रहनेवाले, पूर्व्व पश्चिम के रहनेवाले, विंध्याचल की पीठपर रहनेवाले, दक्षिणात्य,
द्रविड़,सिंहल,म्लेच्छदेश के अर्थात् काबुल क़न्धारके रहनेवाले,पारद,पह्लव,शक,तुषार,बर्बशश्वेत,
पुलिन्द,बर्बर,खस,लंपक और अन्धक,चोरजातियों समेत इन जातियों को मारता हुआ वह बलवान्
राजा अपने चक्रको प्रवृत्त करके शूद्रोंको शिक्षा देताभया ५५।५८ यह प्रमतिनाम राजा
पूर्व्व जन्ममें मानववंशमें पैदाहोकर सबभूतों को भगाता हुआ पृथ्वीपर विचराथा फिर कलियुग में
चन्द्रवंशमें उत्पन्न होकर बत्तीसवें वर्षमें सबदुष्ट भूत मनुष्यादिकों को मारता भया ५९।६१ बड़े २
क्रूरकर्मों से पृथ्वीपर बीजमात्र छोडके अकस्मात् कालसे परस्पर निमित्त करके उसप्रमति राजा को

नाप्रमतिनासह । गङ्गायमुनयोर्मध्ये सिद्धिंप्राप्तास्समाधिना ६३ ततस्तेषुप्रनष्टेषु सन्ध्यां
शेक्रूरकर्म्मसु । उत्साद्यपार्थिवान्सर्वान्तेष्वतीतेषवैतदा ६४ ततःसन्ध्यांशकेकाले सं
प्राप्तेचयुगान्तके । स्थिताःस्वल्पावशिष्टासु प्रजास्विहक्कचित्क्कचित् ६५ स्वाप्रदानास्त
दातेवै लोभाविष्टास्तुवृन्दशः । उपहिंसंतिचान्योन्यं प्रलुम्पान्तिपरस्परम् ६६ अराजके
युगांशेतु संक्षयेसमुपास्थिते । प्रजास्तावैतदासर्वाः परस्परभयार्दिताः ६७ व्याकुलास्ताः
परावृत्तास्त्यज्यदेवगृहाणितु । स्वान्स्वान्प्राणानवेक्षन्तो निष्कारुण्यात्सुदुःखिताः ६८
नष्टेश्रौतस्मृतेधर्मे कामक्रोधवशानुगाः। निर्मर्यादानिरानन्दा निःस्नेहानिरपत्रपाः६९ नष्टे
धर्मेप्रतिहता ह्रस्वकाःपञ्चविंशकाः । हित्वादारांश्चपुत्रांश्च विषादव्याकुलप्रजाः ७०
अनावृष्टिहतास्तेवै वार्त्तामुत्सृज्यदुःखिताः । चीरकृष्णाजिनधरा निष्क्रुद्धाःनिष्परिग्रहाः
७१ वर्णाश्रमपरिभ्रष्टाः सङ्करङ्घोरमास्थिताः । एवंकष्टमनुप्राप्ता ह्यल्पशेषाःप्रजास्ततः
७२ जन्तवश्चक्षुधाविष्टा दुःखान्निर्वेदमागमन् । संश्रयन्तिचदेशांस्तांश्चक्रवत्परिवर्त्तनाः
७३ ततःप्रजास्तुताःसर्वा मांसाहाराभवन्तिहि । मृगान्वराहान्वृषभान्येचान्येवनचा
रिणः ७४ भक्ष्यांश्चैवाप्यभक्ष्यांश्च सर्वांस्तान्भक्षयन्तिताः । समुद्रंसंश्रितायास्तु नदी
श्चैवप्रजास्तुताः ७५ तेऽपिमत्स्यान्हरन्तीह आहारार्थंचसर्वशः । अभक्ष्याहारदोषेण
एकवर्णगताःप्रजाः ७६ यथाकृतयुगेपूर्वमेकवर्णमभूत्किल । तथाकलियुगस्यान्ते शूद्री

सेना राजा समेत होकर गंगा यमुनाके मध्यमें समाधि के द्वारा परमसिद्धिको प्राप्त होती भई
६२ । ६३ संध्या के अंशमें जब वह क्रूरकर्म नष्ट होगये और सब दुष्टराजा मारेगये तब युगके अन्त
में संध्यांश कालके बीच कहीं २ थोड़ीसी प्रजा बाकीरही वह शेष बचे जीव लोभसे युक्तहोकर
परस्पर हिंसाकरके लूट मार करनेलगे इस हेतु से राजासे रहितहुए युगांश में वह सब प्रजा
आपस के भयसे महापीड़ित होतीभयी ६४ । ६७ उस समय व्याकुलहोकर प्रजा अपने २
घरोंको त्यागकर निर्दयतासे महादुःखितहो अपने २ प्राणबचाने की इच्छा करतीभयी ६८ जब श्रुति
और स्मृतियों के धर्म नष्टहोगये तब काम क्रोधके वशमेंहुए सबजन मर्यादा, आनन्द, स्नेह, और
लज्जा, इनसबसे रहित होजातेभये ६९ जब धर्म नष्टहोगया तब पच्चीसवर्षकी अवस्थावाले छोटे २
पुरुष स्त्री और पुत्रोंको त्यागतेभये विषादसे सबप्रजा व्याकुलहुई वर्षा नहींहोने से महादुःखी पुरुष
अपनी २ आजीविकाको छोड़कर चीर,मृगचर्म,आदि धारणकर क्रोधकेद्वारा परिग्रहसे और वर्णाश्रमों
से रहित हो वर्ण संकरपने को प्राप्त होतेभये इसप्रकारसे यह शेष बचेहुए प्रजाके लोग कष्टोंको प्राप्त
होतेभये ७० । ७२ क्षुधातुरजीव दुःखी हो देश देशान्तरों में चक्रके समान भ्रमतेभये इसके अनन्तर
सबप्रजा मांसके आहार करनेवाली होतीभई जबक्षुधातुर होकर मृग, बैल, और अन्य बनचारी जीव
इन सब भक्ष्य और अभक्ष्य जीवोंको भक्षण करतेभये नदी समुद्रादिकों पर जाकर मत्स्यादिक जीवों
को मारमार कर प्रजा खातीभई फिर अभक्ष्य वस्तुओं के आहारके दोषसे सब प्रजा एकवर्णवाली
होगई ७३ । ७६ जैसे कि पहले सत्युगमें एकही वर्णथा इसीप्रकार सब प्रजा शूद्रहोकर एकजाति

भूताःप्रजास्तथा ७७ एवंवर्षशतंपूर्णं दिव्यंतेषांन्यवर्त्तत । षट्त्रिंशच्चसहस्राणि मानुषाणितुतान्निवै ७८ अथदीर्घेणकालेन पक्षिणःपशवस्तथा । मत्स्याश्चैवहताःसर्वैः क्षुधाविष्टैश्चसर्वशः ७९ निःशेषेष्वथसर्वेषु मत्स्यपक्षिपशुष्वथ । सन्ध्यांशेप्रतिपन्नेतु निःशेषास्तुतदाकृताः ८० ततःप्रजास्तुसम्भूय कन्दमूलमथोऽखनन् । फलमूलाशनाःसर्वे अनिकेतास्तथैवच ८१ वल्कलान्यथवासांसि अधःशय्याश्चसर्वशः । परिग्रहोनतेष्वस्ति धनशुद्धिमवाप्नुयुः ८२ एवंक्षयंगमिष्यन्ति ह्यल्पशिष्टाःप्रजास्तदा । तासामल्पावशिष्टानामाहाराद्वृद्धिरिष्यते ८३ एवंवर्षशतंदिव्यं सन्ध्यांशस्तस्यवर्त्तते। ततोवर्षसहस्रान्ते अल्पशिष्टाःस्त्रियःसुताः ८४ मिथुनानितुताःसर्वा ह्यन्योन्यंसंप्रजज्ञिरे। ततस्तास्तुघ्नियन्तेवै पूर्वोत्पन्नाःप्रजास्तुयाः ८५ जातमात्रेष्वपत्येषु ततःकृतमवर्त्तत । यथास्वर्गेशरीराणि नरकेचैवदेहिनाम् ८६ उपभोगसमर्थानि एवंकृतयुगादिषु । एवंकृतस्यसन्तानः कलेश्चैवक्षयस्तथा ८७ विचारणात्तुनिर्वेदः साम्यावस्थात्मनातथा । ततश्चैवात्मसम्बोधः सम्बोधाद्धर्मशीलता ८८ कलिशिष्टेषुतेष्वेवं जायन्तेपूर्ववत्प्रजाः। भाविनोऽर्थस्यचबलात्ततःकृतमवर्त्तत ८९ अतीतानागतानिस्युर्य्यानिमन्वन्तरेष्विह । एतेयुगस्वभावास्तु मयोक्तास्तुसमासतः ९० विस्तरेणानुपूर्व्याच्च नमस्कृत्यस्वयम्भुवे । प्रवृत्तेतुततस्तस्मिन् पुनःकृतयुगेतुवै ९१ उत्पन्नाःकलिशिष्टेषु प्रजाःकार्त्तयुगास्तथा। तिष्ठन्तिचे

होजातीभई ७७ इसीप्रकार से इन मनुष्यों के दिव्य सौवर्ष व्यतीत होगये और मनुष्योंके छत्तीस हज़ारवर्ष व्यतीत होगये इसके अनन्तर बहुतसे कालमें क्षुधासे युक्तहोकर उन मनुष्यों ने पशुपक्षी और मत्स्यादिक जीव सब नष्ट करदिये ७८ । ७९ संध्यांशमें स्थितहुए शेषबचेहुए पशुपक्षी और मत्स्यादिक जीव उन मनुष्यों ने नष्ट करदिये इसके अनन्तर सब मनुष्य वारंवार कन्दमूल और फलोंको भक्षण करतेभये अपने रहनेके निमित्त कोई स्थानादिक नहीं रखतेभये बक्कलोंकोही ओढ़ते और बिछातेभये किसीके पास कुछ संग्रह नहीं रहा धन की कुछ चाह नहीं रही इसप्रकार बाकीरही सब प्रजाभी नष्ट होजाती है उनमेंसेभी जो और कुछ बाकीरहे उनकी वृद्धि आहारकरने में होतीभई ऐसे दिव्य सौवर्षोंतक उस कलियुगका संध्यांशरहता है फिर हज़ारवर्षके अन्तमें थोड़े से शेषबचेहुए पुत्र और स्त्री उनके परस्पर मैथुन होनेसे अन्य सन्तान उत्पन्न होतीभयी उनके पीछे उनके पिता माता आदिक पहले की सब प्रजा नष्टहोजाती है और उनसे उत्पन्नहुए पुत्रोंसे आदिलेके सत्ययुग प्राप्त होताहै जैसे कि स्वर्ग वासी शरीर और नरकवासी यहदोनों शरीर अपने कियेहुए कर्मों के भोगों को भोगते हैं इसी प्रकार सत्युगकी सन्तान कलियुग के क्षीण होनेसे अच्छेप्रकार प्रवृत्तहोती है ८०।८७ आत्माकी साम्यावस्थाके विचारमेंसे ज्ञान होताहै आत्मज्ञान होनेसे धर्म में शीलताकी वृद्धि होती है ८८ इस पूर्व्वोक्त प्रकारसे कलियुग के अन्त में शेषरही हुई प्रजा में भावी की प्रबलता के द्वारा सत्युग वर्त्तने लगजाताहै ८९ व्यतीत और आनेवाले सब मन्वन्तरों में मैंने यह युगों के स्वभाव संक्षेपमात्र से कहदिये हैं ९० अनुपूर्व्वक विस्तार करके उस सतयुगके प्रवृत्तहोने

ह्येसिद्धा अदृष्टाविहरन्तिच ९२ सहसप्तर्षिभिर्येतु तत्रयेचव्यवस्थिताः । ब्रह्मक्षत्रवि
शःशूद्रा बीजार्थेयइहस्मृताः ९३ तेषांसप्तर्षयोधर्मं कथयन्तीहतेषुच । वर्णाश्रमाचारयुतं
श्रौतस्मार्त्तविधानतः ९४ एवंतेषुक्रियावत्सु प्रवर्त्तन्तीहवैकृते । श्रौतस्मार्त्तस्थितानान्तु
धर्मेसप्तर्षिदर्शिते ९५ तेतुधर्मव्यवस्थार्थं तिष्ठन्तीहकृतेयुगे । मन्वन्तराधिकारेषु तिष्ठ
न्ति ऋषयस्तुते ९६ यथादावप्रदग्धेषु तृणेष्वेवापनक्षितौ । वनानांप्रथमंदृष्टा तेषांमूले
षुसम्भवः ९७ एवंयुगाद्युगानांवै सन्तानस्तुपरस्परम् । प्रवर्त्ततेह्यविच्छेदाद्यावन्मन्वन्त
रक्षयः ९८ सुखमायुर्बलंरूपं धर्मार्थौकामएवच, युगेष्वेतानिहीयन्ते त्रयःपादाःक्रमेणतु ९९
इत्येषप्रतिसन्धिर्वः कीर्तितस्तुमयाद्विजाः !। चतुर्युगाणांसर्वेषामेतदेवप्रसाधनम् १००
एषांचतुर्युगाणान्तु गणिताह्येकसप्ततिः । क्रमेणपरिवृत्तास्ता मनोरन्तरमुच्यते १०१
युगाख्यासुतुसर्वासु भवतीहयदाचयत् । तदेवचतदन्यासु पुनस्तद्वैयथाक्रमम् १०२
सर्गेसर्गेयथाभेदा ह्युत्पद्यन्तेतथैवच । चतुर्दशसुतावन्तो ज्ञेयामन्वन्तरेष्विह १०३ आसु
रीयातुधानीच पैशाचीयक्षराक्षसी । युगेयुगेतदाकाले प्रजाजायन्तिताःशृणु १०४ यथा
कल्पंयुगैःसार्द्धं भवन्तेतुल्यलक्षणाः । इत्येतल्लक्षणंप्रोक्तं युगानांवैयथाक्रमम् १०५ म
न्वन्तराणांपरिवर्त्तनानि चिरप्रवृत्तातियुगस्वभावात् । क्षणंनसंतिष्ठतिजीवलोकः क्षयो

के पीछे के वृत्तान्तको भी संक्षेपता से कहताहूं उसको तुम सुनो ९१ कलियुगके सध्यांशों में
सत्युगकी प्रजा उत्पन्न होती है तब जो २ सिद्धलोग रहते हैं वह अदृष्ट होकर विहार करते
हैं ९२ । ९३ सप्तऋषियों समेत सिद्धपुरुष इससंसारमें उत्पन्न होते हैं वह उत्पन्न हुए सब
लोग सप्तऋषियों के धर्मको कहते हैं ९४ इस प्रकारसे सत्युग में उनक्रियावानों के श्रुति स्मृत्युक्त
धर्मको कहतेहुए वह ऋषि मन्वन्तरों के अधिकारों में धनकी व्यवस्था कहने के लिये स्थित रहते
हैं जैसे कि वनमें दावानल अग्निसे तृणादिके समूह जलजाते हैं और उनकी दग्धहुई जड़ें फूटकर
फिर झुंडके झुंड होजाते हैं इसीप्रकार एकयुगसे अगले युगकी सन्तान बढ़ती है मन्वन्तरों के अन्त
तक इसीप्रकार युगोंकी सन्तान निरन्तर चलीजाती है ९५।९८ सुख, आयु, बल, रूप, धर्म, अर्थ
और काम यह सबयुग २ में तृतीयांश हीन होजाते हैं ९९ हे द्विज लोगो मैंने यह युगोंकी सन्धि
तुम्हारे आगे वर्णन करीहै चारोंयुगों का यहीप्रकार है इन चारोंयुगों की जो इकहत्तर चौकड़ी होतीहैं
उनमेंही मनुकाअन्तर अर्थात् बदलना होताहै पहले युगोंमें जो २ व्यवहार होते हैं वहीसब अन्य २
युगोंमें भी होते हैं जैसी रचना एकसर्ग में कही है इसीप्रकार से उतनीही रचना चौदहों मन्वन्तरों
में होती है १००।१०३ आसुरी, यातुधानी, पैशाची, यक्ष--और राक्षसी यहसब प्रजा युग २ में जिस २
समयमें उत्पन्न होती है उनको अब मुझसे तुम सुनो १०४ कल्पके अनुसार युगोंकेसाथ तुल्य
लक्षणवाली प्रजा उत्पन्न होती है यह इस प्रकारके लक्षणवाला युगोंका क्रम मैंने तुमसे वर्णन किया
१०५ बहुतकालमें प्रवृत्तहुए युगोंके बदलने से मन्वन्तर बदलते हैं जन्ममरणसे भ्रमताहुआ जीव

दयाभ्यांपरिवर्त्तमानः १०६ एतेयुगस्वभावावः परिक्रान्तायथाक्रमम्।मन्वन्तराणियान्य
स्मिन् कल्पेवक्ष्यामितानिच १०७॥
इति श्रीमत्स्यपुराणे मन्वन्तरानुकीर्त्तनोनाम त्रिचत्वारिंशदधिकशततमोऽध्यायः १४३॥

(सूत उवाच) मन्वन्तराणियानिस्युः कल्पेकल्पेचतुर्दश । व्यतीतानागतानिस्युर्या
निमन्वन्तरेष्विह १ विस्तरेणानुपूर्व्याच्च स्थितिंवक्ष्येयुगेयुगे । तस्मिन्युगेचसम्भूतिर्या
सांयावच्चजीवितम् २ युगमात्रन्तुजीवन्ति न्यूनंतत्स्याद्द्वयेनच । चतुर्दशसुतावन्तो ज्ञे
यामन्वन्तरेष्विह ३ मनुष्याणांपशूनाञ्च पक्षिणांस्थावरैःसह । तेषामायुरुपक्रान्तं युगध
र्मेषुसर्वशः ४ तथैवायुःपरिक्रान्तं युगधर्मेषुसर्वशः । अस्थितिश्चकलौदृष्ट्वा भूतानांमानुषे
तथा ५ परमायुःशतन्त्वेतन्मानुषाणांकलौस्मृतम् । देवासुरमनुष्याश्च यक्षगन्धर्वरक्ष
साः ६ परिणाहोच्छ्रयेतुल्या जायन्तेह्यकृतेयुगे । षण्णवत्यंगुलोत्सेधो अष्टानांदेवयोनिना
म् ७ नवांगुलप्रमाणेन निष्पन्नेनतथाष्टकम् । एतत्स्वाभाविकंतेषां प्रमाणमधिकुर्वता
म् ८ मनुष्यावर्त्तमानास्तु युगसन्ध्यांशकेष्विह । देवासुरप्रमाणन्तु सप्तसप्तांगुलंक्रमा
त् ९ चतुराशीतिकैश्चैव कलिजैरंगुलैःस्मृतम् । आपादतलमस्तको नवतालोभवेत्तुयः
१० संहत्याजानुबाहुश्च दैवतैरभिपूज्यते । गवाश्वहस्तिनांचैव महिषस्थावरात्मनाम् ११
क्रमेणैतेनविज्ञेये ह्रासवृद्धीयुगेयुगे । षट्सप्तत्यंगुलोत्सेधः पशुराककुदोभवेत् १२ अंगु

क्षणमात्र नहीं ठहरताहै इसप्रकारसे यह युगोंके स्वभाव मैंने तुमसे क्रमपूर्वक कहे हैं अब इसकल्प में मन्वन्तरों को कहूंगा १०६ । १०७

इति श्रीमत्स्यपुराणभाषाटीकायांमन्वन्तरानुकीर्त्तनंनामत्रिचत्वारिंशदधिकशततमोऽध्यायः १४३॥

सूतजीबोले कि कल्प २ में जो चौदह मनु होते हैं उनमें से जो व्यतीत होगये हैं और आगे होने वाले हैं उनसबोंकी विस्तारपूर्वक स्थिति युग २ के प्रतिकहके उसयुगमें जो उनकी विभूति और जैसा जीवन है वहसब वर्णन करते हैं १ । २ चौदह मनुओंमें मनुष्य पशुपक्षी और स्थावर वृक्षादिक इन सब समेत यह जगत् युग पर्य्यन्त उसीयुगके स्वभाववाला रहताहै और इनसबों की आयुभी युगों के अनुसार रहती है कलियुगमें भूतों की अस्थिति देखकर मनुष्यों की परम आयु सौ १०० वर्ष की कही गई है ३ । ५ और देवता, असुर, राक्षस, मनुष्य, यक्ष और गन्धर्व यहसब सतयुगमें स्थूलता और उँचाई में एकही से होते भये देवयोनि आठ प्रकारकी होतीहै उनके शरीर छानबे ९६ अंगुल ऊँचेहोतेहैं और उनके शरीरों की मुटाई बहत्तर ७२ अंगुलमें होती है यहतो उनके शरीरका स्वाभाविक प्रमाणहै और मायारचने के समय चाहे जितना न्यूनाधिक करसक्ते हैं ६ । ८ युगों की संध्याओं में वर्त्ततेहुए मनुष्य देवता और दैत्योंका प्रमाण अपने २ उनचास ४९ अंगुलोंका रहताहै ९ कलियुगमें जो पुरुष अपने चौरासी ८४ अंगुलोंका होताहै और पैरोंसे मस्तक पर्य्यन्त जो नौ ९ ताल प्रमाणका है और आजानुबाहु होय वह पुरुष देवताओं से भी पूजाजाताहै गौ हाथी भैंस और स्थावर वृक्षादिक इनसबों के शरीर युग २ में घटते बढ़ते हैं बैल आदिक पशुग्रीवा पर्य्यन्त छिहत्तर

तान्यष्टशतमुत्सेधो हस्तिनांस्मृतः । अंगुलानांसहस्रन्तु द्विचत्वारिंशदंगुलम् १३
शतार्द्धमंगुलानान्तु ह्युत्सेधःशाखिनाम्परः । मानुषस्यशरीरस्य सन्निवेशस्तुयादृशः १४
तल्लक्षणन्तुदेवानां दृश्यतेऽन्वयदर्शनात् । बुद्ध्यातिशयसंयुक्तो देवानांकायउच्यते १५
तथान्यातिशयश्चैव मानुषःकायउच्यते । इत्येवहिपरिक्रान्ता भावायेदिव्यमानुषाः १६
पशूनांपक्षिणांचैव स्थावराणांचसर्वशः । गावोऽजाश्वाश्चविज्ञेया हस्तिनःपक्षिणोमृगाः
१७ उपयुक्ताःक्रियास्वेते यज्ञियास्त्विहसर्वशः । यथाक्रमोपभोगाश्च देवानांपशुमूर्त्तयः
१८ तेषांरूपानुरूपैश्च प्रमाणैःस्थिरजङ्गमाः । मनोज्ञैस्तत्रतेभोगैः सुखिनोह्युपपेदिरे
१९ अथसन्तःप्रवक्ष्यामि साधूनथततश्चवै । ब्राह्मणाःश्रुतिशब्दाश्च देवानांपशुमूर्त्तयः
२० संयुज्यब्रह्मणाह्यन्तस्तेनसन्तःप्रचक्षते । सामान्येषुचधर्मेषु तथावैशेषिकेषुच २१
ब्रह्मक्षत्रविशोयुक्ताः श्रौतस्मार्तेनकर्म्मणा । वर्णाश्रमेषुयुक्तस्य सुखोदर्कस्यस्वर्गतौ २२
श्रौतस्मार्तोहियोधर्मो ज्ञानधर्मःसउच्यते । दिव्यानांसाधनात्साधुर्ब्रह्मचारीगुरोर्हितः २३
कारणात्साधनाच्चैव गृहस्थःसाधुरुच्यते । तपसश्चतथारण्ये साधुर्वैखानसःस्मृतः २४
यत्तमानोयातिःसाधुः स्मृतोयोगस्यसाधनात् । धर्मोधर्मगतिःप्रोक्तः शब्दोह्येषक्रियात्मकः
२५ कुशलाकुशलौचैव धर्माधर्मौब्रवीत्प्रभुः । अथदेवाश्चपितर ऋषयश्चैवमानुषाः
२६ अयंधर्मोह्ययंनेति ब्रुवतेमौनमूर्त्तिना । धर्मेतिधारणेधातुर्महत्त्वेचैवमुच्यते २७ आ

७६ अंगुल के होते हैं १० । १२ हाथी आठसौ ८०० अंगुल ऊँचा होता है एकहज़ार बानवे १०९२ अंगुल की परम उँचाई वृक्षों की कही है जैसा लक्षण मनुष्य के शरिरका है वैसाही सब लक्षण देवताओं के शरीरका होताहै देवताओं का शरीर अत्यन्तबुद्धिसे युक्तरहताहै १३।१५ मनुष्यों के शरीर में अत्यन्त बुद्धिनहीं रहती है इसप्रकारसे दिव्यभाव और मानुषीभाव वर्णन किये हैं गौ बकरी अश्व हस्ती पक्षी और मृग पशु पक्षी और स्थावर वृक्षादि यह सब जीव यथाक्रम सब क्रियाओं में युक्तरहते हैं, पशुओं की मूर्त्ति देवताओं के निमित्त उपभोग रूपकही है उन देवताओं के रूप और प्रमाण के अनुसार सब स्थावर जंगम भूतों की व्यवस्था है सो देवता उन पशुओं के मनोहर उपभोगों को प्राप्तहोते हैं १६ । १९ इसके अनन्तर अब सन्त और साधुलोगों का वर्णनकरते हैं वेदकेपढ़ेहुए ब्राह्मण देवताओं की मूर्त्तिके समानहैं २० जो पुरुष सामान्य धर्मोंमें और वैशेषिक धर्मोंमें सर्वत्र ब्रह्मके साथ अपने सिद्धान्तको युक्तकरते हैं वह सन्त कहाते हैं २१ ब्राह्मण क्षत्रिय और वैश्य यह सब श्रुतिस्मृति सम्बन्धी कर्मोंके अनुसार कामकरते हैं उनके सुखका उत्तर फल स्वर्गगति है २२ श्रुतिस्मृति में जो कहाहुआ धर्म है वह ज्ञान धर्म कहाताहै दिव्य वस्तुओं के साधन करनेवालों को साधु कहते हैं गुरूके हितमें रहनेवाला ब्रह्मचारी कहाताहै कारणके सिद्धकरने से गृहस्थी साधुकहाताहै वनमें तपकरने से वैखानस साधुकहाताहै २३।२४ जो सब इन्द्रिय आदिको शान्तरखकर योगको सिद्धकरताहै वह यतिसाधु कहाताहै यह धर्मका शब्द क्रियात्मक धर्मकीगतिमें रहनेवालाहै, धर्म और अधर्म यह दोनों कुशल और अकुशल रूपहैं ऐसा

धारणेमहत्त्वेवा धर्म्मःसतुनिरुच्यते । तत्रेष्टप्रापकोधर्म्म आचार्यैरुपदिश्यते २८ अ
धर्म्मश्चानिष्टफल आचार्यैर्नोपदिश्यते । वृद्धाश्चालोलुपाश्चैव आत्मवन्तोह्यदाम्भि
काः २९ सम्यग्विनीतामृदवस्तानाचार्यान्प्रचक्षते । धर्मज्ञैर्विहितोधर्म्मः श्रौतस्मार्त्तौ
द्विजातिभिः ३० दाराग्निहोत्रसम्बन्धमिज्याश्रौतस्यलक्षणम् । स्मार्त्तोवर्णाश्रमाचारो
यमैश्चनियमैर्युतः ३१ पूर्वेभ्योवेदयित्वेह श्रौतंसप्तर्षयोऽब्रुवन् । ऋचोयजूंषिसामानि
ब्रह्मणोऽङ्गानिवैश्रुतिः ३२ मन्वन्तरस्यातीतस्य स्मृत्वातन्मनुरब्रवीत् । तस्मात्स्मार्त्तः
स्मृतोधर्म्मो वर्णाश्रमविभागशः ३३ एवंवैद्विविधोधर्म्मः शिष्टाचारःसउच्यते । शिषे
र्धातोश्चनिष्ठान्ताच्छिष्टशब्दंप्रचक्षते ३४ मन्वन्तरेषुयेशिष्टा इहतिष्ठन्तिधार्मिकाः । म
नुःसप्तर्षयश्चैव लोकसन्तानकारिणः ३५ तिष्ठन्तीहचधर्मार्थं ताञ्छिष्टान्सम्प्रचक्षते ।
तैःशिष्टैश्चलितोधर्मः स्थाप्यतेवैयुगेयुगे ३६ त्रयीवार्त्तादण्डनीतिः प्रजावर्णाश्रमेष्व
या । शिष्टैराचर्य्यतेयस्मात् पुनश्चैवमनुक्षये ३७ पूर्वैःपूर्वैर्मतत्वाच्च शिष्टाचारःशा
श्वतः । दानंसत्यंतपोलोको विद्येज्यापूजनन्दमः ३८ अष्टौतानिचरित्राणि शिष्टाचा
रस्यलक्षणम् । शिष्टायस्माच्चरन्त्येनं मनुःसप्तर्षयश्चह ३९ मन्वन्तरेषुसर्वेषु शिष्टा

मनुजी का वचनहै देवता पितर ऋषि और मनुष्य यह सब मौन मूर्त्तिकरके धर्मके होने नहोने को
कहते हैं अर्थात् यह धर्महै यह धर्म नहीं है ऐसा कहते हैं वह धर्म धातु धारणकरने में और महत्त्व
अर्थमें वर्त्तताहै अर्थात् धारणकरने से महत्त्व अर्थमें धर्मकहाताहै वहाँ इष्ट सिद्धिको प्राप्तकरनेवाला
धर्मका उपदेश आचार्य्योंने कहाहै, अधर्म अनिष्ट फलवालाहै उसको आचार्य्योंने नहीं कहाहै अव-
स्थामें वृद्ध लोभसेरहित आत्मज्ञानवाले दंभ पाखंडसे रहित सम्यक् नीतिवाले और सरलचित्तजन
आचार्य्य कहाते हैं उन धर्मके जाननेवाले ब्राह्मणों ने श्रुतिस्मृत्युक्त धर्मका उपदेशकियाहै २८।३०
स्त्रीसहित होकर अग्निहोत्र करना और यज्ञकरना यह श्रुतिके अर्थ हैं, यमनियमोंकरके युक्तहोना,
वर्णाश्रमों के आचारमें युक्तरहना, यह स्मृतिका अर्थकहाहै ३१ पूर्व्वके आचार्य्यों से अच्छेप्रकार जान
कर श्रुतिविहित धर्मोंको सप्तऋषियों ने कहाहै कि ऋक्यजु और साम यह तीनों वेद ब्रह्माके अंग
हैं-३२ व्यतीतहुए मन्वन्तरके वृत्तान्तको अगलामनु स्मरणकरके वर्णाश्रमों के विभाग द्वारा जो स्मृ-
तिके धर्मका वर्णन करताभया वही स्मार्त्त धर्मकहाताहै इसप्रकारसे दोप्रकारके धर्मको शिष्टाचर कहते
हैं,(शासु अनुशिष्टौ)इसधातुका शिष्ट शब्द बनताहै ३३।३४ मन्वन्तरों में धार्मिक शिष्ट पुरुषरहते हैं
और मनु समेत सप्तऋषि यह सबलोकों की वृद्धिकरनेवाले कहे हैं ३५ धर्मके निमित्त जो शिष्टपुरुष
स्थितहोते हैं उन्हींको शिष्टकहते हैं वह शिष्ट पुरुष युग २ में बिगड़तेहुए धर्मका स्थापन करते हैं ३६
मनुके अन्तमें वेदत्रयीकी जीविका दण्डनीति और वर्णाश्रमोंकरके शिष्टपुरुष प्रजाको सुधारदेते हैं ३७
पूर्व्व २ के आचार्य्यों के मतके अनुसार शिष्टपुरुषों का आचार होता है, दान,सत्य, तप,विद्या,यज्ञ,
पूजन,अहिंसा, और इन्द्रियों का निग्रह ३८ यह आठलक्षण शिष्टपुरुषों के आचरणके हैं शिष्ट पुरुष,
मनु और सप्तऋषि यह सब जिसधर्मका आचरण करते हैं वह शिष्टाचार कहाताहै सदैवसे जिस

चारस्ततःस्मृतः। विज्ञेयःश्रवणाच्छ्रौतः स्मरणात्स्मार्त्तउच्यते ४० इज्यावेदात्मकःश्रौतः स्मार्तौवर्णाश्रमात्मकः। प्रत्यङ्गानिप्रवक्ष्यामि धर्मस्येहतुलक्षणम् ४१ दृष्टानुभूतमर्थञ्च यःपृष्टोनविगूहते। यथाभूतप्रवादस्तु इत्येतद्धर्मलक्षणम् ४२ ब्रह्मचर्यंतपोमौनं निराहारत्वमेवच। इत्येतत्तपसोरूपं सुघोरन्तुदुरासदम् ४३ पशूनांद्रव्यहविषामृक्सामयजुषांतथा। ऋत्विजांदक्षिणायाश्च संयोगोयज्ञउच्यते ४४ आत्मवत्सर्वभूतेषु योहितायशुभायच। वर्त्ततेसततंहृष्टः क्रियाश्रेष्ठादयास्मृता ४५ आक्रुष्टोऽभिहतोयस्तु नाक्रोशेत्प्रहरेदपि। अदुष्टोवाङ्मनःकायैस्तितिक्षुःसाक्षमास्मृता ४६ स्वामिनारक्षमाणानामुत्सृष्टानाञ्चसम्भ्रमे। परस्वानामनादानमलोभइतिसंज्ञितः ४७ मैथुनस्यासमाचारो जल्पनाच्चिन्तनात्तथा। निर्वृत्तिर्ब्रह्मचर्यञ्च तदेतच्छ्रमलक्षणम् ४८ आत्मार्थेवापरार्थेवा इन्द्रियाणीहयस्यवै। विषयेनप्रवर्त्तन्ते दमस्यैतत्तुलक्षणम् ४९ पञ्चात्मकेयोविषये कारणेचाष्टलक्षणे। नक्रुद्ध्येतप्रतिहतः सजितात्माभविष्यति ५० यद्यदिष्टतमंद्रव्यं न्यायेनैवागतञ्चयत्। तत्तद्गुणवतेदेयमित्येतद्दानलक्षणम् ५१ श्रुतिस्मृतिभ्यांविहितो धर्मोवर्णाश्रमात्मकः। शिष्टाचारप्रवृद्धश्च धर्मोऽयंसाधुसम्मतः ५२ अप्रद्वेष्योह्यनिष्टेषु इष्टंवैनाभिनन्दति। प्रीतितापविषादानां विनिवृत्तिर्विरक्तता ५३ संन्यासःकर्मणांन्यासः कृतानामकृतैस्सह।

धर्मको सुनते आयेहों और वही धर्म सब करते चलेआतेहों वह श्रौत धर्महै जो धर्म कि स्मरणकरने से चलाआताहै वह स्मार्त्त धर्मकहाताहै ३९। ४० जिसमें वेदके मंत्र और यज्ञोंकी विधिकही है वह श्रौतधर्म है वर्णाश्रमों का जो धर्म चलाआताहै वह स्मार्त्तधर्म है, अब धर्मके प्रत्यंग लक्षणोंका वर्णन करते हैं ४१ जो पुरुष देखेहुए धर्मका निश्चय कररहाहो वह दूसरे के पूछनेपर उसको नहीं छुपावे अर्थात् जैसाहै वैसाही ठीक २ कहताहै वह धर्मका लक्षणहै ४२ ब्रह्मचर्य, तप, मौन, निराहार यह सुन्दर घोरतपका स्वरूप है ४३ पशु द्रव्यादिक शाकल्य वा ऋग् यजु सामवेद और ऋषियों की दक्षिणा इनसबों के योगकरने को यज्ञकहते हैं ४४ जो पुरुष सबभूतोंमें अपने प्रियतमों के समान सदैव हितरखताहै वह उसकी दयाही परम श्रेष्ठक्रिया कहाती है ४५ जो अन्यके क्रोधकरने से अथवा किसी के धमकाने से भी मनवाणी और शरीरकेद्वारा क्रोध नहीं करता वही तितिक्षु और परमक्षमावान् कहाताहै ४६ स्वामी ने जो किसीवस्तुकी रक्षाकरने के निमित्त भृत्य छोड़ रक्खे हैं वह भृत्य उस पराये द्रव्यको जो ग्रहण नहीं करे उसीको निर्लोभ कहते हैं ४७ कहने से और चिन्तवन करने से जिसको कि मैथुन करने की कभी इच्छा नहीं होती है और निरन्तर ब्रह्मचर्य्य में रहता है यह शमका लक्षण कहाता है ४८ जिसकी इन्द्रियां अपने वा पराये अर्थ विषयमें प्रवृत्त नहीं होती हैं यह दमका लक्षण कहाताहै ४९ जो पुरुष पांच प्रकारके विषयोंमें और आठ प्रकारके कारणोंमें प्रतिहत होकर क्रोध नहीं करताहै वह जितात्मा कहाताहै ५० जो अत्यन्त प्रिय द्रव्यको न्यायसे संचितकरके गुणवानोंको देताहै यह दानका लक्षणहै ५१ श्रुतिस्मृतियों से विहित जो शिष्टाचारों से बढ़ाया हुआ धर्महै वह उत्तम धर्महै ५२ बुरीवस्तु और उत्तमवस्तु इन दोनोंमें द्वेष और प्रीतिदोनों नहीं करना,

कुशलाकुशलाभ्यांतु प्रहाणंन्यासउच्यते ५४ अव्यक्तादिविशेषान्त विकारेऽस्मिन्निवर्त्तते।
चेतनाचेतनंज्ञात्वा ज्ञानेज्ञानीसउच्यते ५५ प्रत्यङ्गानितुधर्मस्य चेत्येतल्लक्षणंस्मृतम् ।
ऋषिभिर्द्धर्मतत्त्वज्ञैः पूर्वेस्वायम्भुवेऽन्तरे ५६ अत्रवोवर्णयिष्यामि विधिंमन्वन्तरस्यतु ।
तथैवचातुर्होत्रस्य चातुर्वर्ण्यस्यचैवहि ५७ प्रतिमन्वन्तरंचैव श्रुतिरन्याविधीयते । ऋ
चोयजूंषिसामानि यथावत्प्रातिदैवतम् ५८ विधिस्तोत्रंतथाहोत्रं पूर्ववत्संप्रवर्तते । द्रव्य
स्तोत्रंगुणस्तोत्रं कर्म्मस्तोत्रंतथैवच ५६ तथैवाभिजनस्तोत्रं स्तोत्रमेवंचतुर्विधम् । म
न्वन्तरेषुसर्वेषु यथावेदाद्भवन्तिहि ६० प्रवर्तयन्तितेषांवै ब्रह्मस्तोत्रंपुनःपुनः । एवंमन्त्र
गुणानान्तु समुत्पत्तिश्चतुर्विधा ६१ अथर्वऋग्यजुःसाम्नां वेदेष्विहपृथक्पृथक् । ऋ
षीणांतप्यतांतेषां तपःपरमदुश्चरम् ६२ मन्त्राःप्रादुर्भवन्त्यादौ पूर्वमन्वन्तरस्यह । अ
सन्तोषाद्भयाद्दुःखान्मोहाच्छोकाच्चपञ्चधा ६३ ऋषीणांतारकायेन लक्षणेनयदृच्छया ।
ऋषीणांयादृशत्वंहि तद्वक्ष्यामीहलक्षणम्६४अतीतानागतानाञ्च पञ्चधाह्यार्षकंस्मृतम्।
तथाऋषीणांवक्ष्यामि आर्षस्येहसमुद्भवम् ६५ गुणसाम्येनवर्त्तन्ते सर्वसम्प्रलयेतदा। अ
विभागेनवेदानामनिर्देश्यतमोमये ६६ अबुद्धिपूर्वकंतद्वै चेतनार्थंप्रवर्तते । तेनार्षबुद्धि
पूर्वन्तु चेतनेनाप्यधिष्ठितम् ६७ प्रवर्ततेयथातेतु यथामत्स्योदकावुभौ । चेतनाधिकृतं
सर्वं प्रावर्ततगुणात्मकम् । कार्यकारणभावेन तथातस्यप्रवर्तते ६८ विषयोविषयित्वञ्च

प्रीति दुःख और विषाद इन सबकी निवृत्ति करनी यह विरक्तता कहाती है ५३ किये हुए कर्मों को
और शुभाशुभ फलोंके त्यागने को संन्यास कहते हैं ५४ अव्यक्त माया आदि, विशेष पदार्थों पर्य्यन्त
सब चेतन अचेतनोंको जानकर सबसे निवृत्त होजाताहै वह ज्ञानी कहाताहै ५५ इतने लक्षणोंवाले
धर्मके प्रत्यंग कहे हैं पहले स्वायंभुव मन्वन्तरमें तत्त्वज्ञ ऋषियोंने यह लक्षण वर्णन किये हैं ५६ अब
मन्वन्तर, चातुर्होत्र, और चारोंवर्णोंकी जो विधिहैं उन सबको कहताहूं ५७प्रत्येक मनुमें अन्य २ श्रुति
का विधान होताहै-ऋक् यजु और साम यहतीनों वेद यथार्थ देवताओंसे युक्त हुए रहते हैं ५८ विधि
स्तोत्र और अग्निहोत्र यह सब प्रथमके समान वर्त्तते हैं द्रव्यके स्तोत्र, गुणस्तोत्र, कर्मकेस्तोत्र, और
कुलकेस्तोत्र यहचार प्रकारके स्तोत्र सब मन्वन्तरों में वेदसेही उत्पन्न होते हैं ५९।६०उनहीसे बारं-
बार ब्रह्मस्तोत्र प्रवर्त्त होताहै ऐसे मंत्रगुणोंकी उत्पत्ति चार प्रकारसे कही है६१अथर्वण ऋक् यजु और
साम इन वेदोंमें पृथक् २ तपस्या करते हुए उन ऋषियोंका परमदुश्चर तप होता भया ६२ पहले
मन्वन्तरकी आदिमें मंत्र प्रकट भये हैं फिर सन्तोष न होने से, भयसे, दुःखसे, मोहसे, और शोकसे
वह मंत्र पांच प्रकारके होते भये ६३ जिस लक्षण करके वे मन्त्र ऋषियों के उद्धार करनेवालेहुए
उससब लक्षणको कहता हूं ६४ व्यतीत होनेवाले और आने वाले ऋषियोंके जो पांचप्रकारके आर्ष
मंत्र कहे हैं उनकी भी उत्पत्तिको कहूंगा ६५ प्रलय काल में वह मंत्र गुण सामान्यता करके वर्त्तते हैं
वेदोंके विना विभाग हुएही अबुद्धि पूर्व्वक चेतनोंके निमित्त रहगये हैं और फिर चेतनोंही करके प्रवृत्त
हुए हैं इसी हेतुसे आर्ष कहाते हैं ६६।६७ जैसे कि जल में मछली जलस्वरूप से उत्पन्न भयी है

तदाह्यर्थपदात्मकौ। कालेनप्रापणीयेन भेदाश्चकारणात्मकाः ६९ सांसिद्धिकास्तदावृत्ताः
क्रमेणमहदादयः। महतोऽसावहङ्कारस्तस्माद्भूतेन्द्रियाणिच ७० भूतभेदाश्चभूतेभ्यो
जज्ञिरेतुपरस्परम्। संसिद्धिकारणंकार्य्यं सद्यएवाविवर्त्तते ७१ यथोल्मुकात्तुविटपा एकका
लाद्भवन्तिहि । तथाप्रवृत्ताःक्षेत्रज्ञाः कालेनैकेनकारणात् ७२ यथान्धकारेखद्योतः सहसा
सम्प्रदृश्यते । तथानिवृत्तोह्यव्यक्तः खद्योतइवसज्वलन् ७३ समहात्माशरीरस्थस्तत्रैवे
हप्रवर्त्तते । महतस्तमसःपारे वैलक्षण्याद्विभाव्यते ७४ तत्रैवसंस्थितोविद्वान् तपसान्त
इतिश्रुतम् । बुद्धिर्विवर्द्धतस्तस्य प्रादुर्भूताचतुर्विधा ७५ ज्ञानंवैराग्यमैश्वर्यं धर्मश्चेति
चतुष्टयम्। सांसिद्धिकान्यथैतानि अप्रतीतानितस्यवै ७६ महात्मनःशरीरस्थ चैतन्या
त्सिद्धिरुच्यते । पुरिशेतेयतःपूर्वं क्षेत्रज्ञानंतथापिच ७७ पुरेशयनात्पुरुषः क्षेत्रज्ञाना
त्क्षेत्रज्ञउच्यते । यस्माद्धर्मात्प्रसूतेहि तस्माद्वैधार्मिकस्तुसः ७८ सांसिद्धिकेशरीरेच
बुद्ध्याव्यक्तस्तुचेतनः। एवंविवृतःक्षेत्रज्ञः क्षेत्रंह्यनभिसन्धितः ७९ निवृत्तिसमकालेतुपु
राणन्तदचेतनम्। क्षेत्रज्ञेनपरिज्ञातं भोग्योऽयंविषयोमम८० ऋषिर्हिंसागतौधातुर्विद्यास
त्यंतपःश्रुतम् । एषसन्निचयोयस्माद् ब्रह्मणस्तुततस्त्वृषिः ८१ निवृत्तिसमकालाच्च बु
द्ध्याव्यक्तऋषिस्त्वयम् । ऋषतेपरमंयस्मात्परमर्षिस्ततःस्मृतः ८२ गत्यर्थादृषतेर्धातो

इसी प्रकार सब गुणात्मक जगत् चेतनकरके अधिष्ठितहै कार्य्य कारणभाव करके जगत् की प्रवृत्ति है
विषय और विषयी यह अर्थपद हैं प्राप्त करने वाले कालसे कारणात्मक भेद होरहे हैं ६८।६६ सिद्ध
हुए महदादिक विकार क्रमपूर्व्वक आवृत होते हैं महत्तत्त्वसे अहंकार होता है अहंकार से भूतेन्द्रिय
होती है फिर पंच महाभूतोंसे भूतोंके अनेक भेद होते हैं सिद्ध हुए कारण से कार्य्य तत्काल उत्पन्न
होता है ७०।७१ जैसे जलती और भ्रमाई हुई अग्निके उल्मुक से एकही बारचक्र बँधजाताहै उसी
प्रकार क्षेत्रज जीवभी एकही कालमें प्रवृत्त होजाते हैं ७२ जैसेअन्धकारमें पटबीजना एकबार चमकता
है इसी प्रकार प्रकट होता हुआ जीव प्रवृत्त होजाताहै ७३ महान् तमोगुणके पारमें शरीर में स्थित
हुआ भी वह महात्मा ब्रह्म वैलक्षण्य प्रकारसे विदित होताहै ७४ वहां जीवरूपहुए ब्रह्मकी बुद्धि तपों
के प्रभाव से बढ़ती है और चारप्रकारसे प्रकट होती है ७५ ज्ञान, वैराग्य, ऐश्वर्य्य, और धर्म, यहचार
प्रकारके भेद उसकी बुद्धिमें सांसिद्धिक रहते हैं परन्तु प्रतीत नहीं होतेहैं ७६ महात्मा पुरुषके शरीर
में स्थित हुए चैतन्यसे सब वस्तुओंकी सिद्धि वर्णनकी है प्रथमपुरीमें शयन करताहै तब भी क्षेत्रका
ज्ञान रहताहै उस पुरीमेंही शयनकरने से वह पुरुष कहाता है क्षेत्रका ज्ञान होने से क्षेत्रज्ञ कहाताहै
जो धर्महीसे उत्पन्न होते हैं उनको धार्मिक कहते हैं ७७।७८ सांसिद्धिक शरीरमें बुद्धिसे युक्तहुए
चेतनके विवृत होनेसे क्षेत्रज्ञ कहाताहै निवृत्ति समकालमें, पुरातन अचेतन विषयको क्षेत्रज्ञ जानता
है और यह मेरा भोग्य है ऐसा मान लेताहै ७९।८० ऋषिधातु हिंसा और गति अर्थ में वर्त्तता है,
इसीसे जो ब्राह्मण विद्या, तप, और श्रुत इनका संचय करता है वह ऋषि कहाताहै ८१ जो निवृत्ति
समकाल में बुद्धि से युक्त चेतनरूप रहता है और परम स्वरूपको जानता है वह परमऋषि कहा-

नांमनिर्वृतिकारणम् । यस्मादेषस्वयम्भूतस्तस्माच्चऋषितामता ८३ सेश्वराःस्वयमुद्भू
ता ब्रह्मणोमनसाःसुताः । निवर्तमानैस्तैर्बुद्ध्या महान्परिगतःपरः ८४ यस्मादृशपरत्वेन
सहतस्मान्महर्षयः । ईश्वराणांसुतास्तेषां मानसाश्चौरसाश्चवै ८५ ऋषिस्तस्मात्पर
त्वेन भूतादिर्ऋषयस्ततः । ऋषिपुत्राऋषीकास्तु मैथुनाद्गर्भसम्भवाः ८६ परत्वेनऋषन्ते
वै भूतादीनृषिकांस्ततः । ऋषीकाणांसुतायेतु विज्ञेयाऋषिपुत्रकाः ८७ श्रुत्वाऋषंपरत्वे
न श्रुतास्तस्माच्छ्रुतर्षयः । अव्यक्तात्मामहात्मावाहङ्कारात्मातथैवच ८८ भूतात्माचे
न्द्रियात्माच तेषांतद्ज्ञानमुच्यते । इत्येवमृषिजातिस्तु पञ्चधानामविश्रुता ८९ भृगुर्म
रीचिरत्रिश्च अङ्गिराःपुलहःक्रतुः । मनुर्दक्षोवसिष्ठश्च पुलस्त्यश्चापितेदश ९० ब्रह्मणो
मानसाह्येते उत्पन्नाःस्वयमीश्वराः । परत्वेनर्षयोयस्मान्मतास्तस्मान्महर्षयः ९१ ईश्वरा
णांसुतास्त्वेषा मृषयस्तान्निबोधत । काव्योबृहस्पतिश्चैव कश्यपश्च्यवनस्तथा ९२ उ
तथ्योवामदेवश्च अगस्त्यःकौशिकस्तथा । कर्दमोबालखिल्याश्च विश्रवाःशक्तिवर्द्धनः ९३
इत्येतेऋषयःप्रोक्तास्तपसाऋषिताङ्गताः । तेषांपुत्रानृषीकांस्तु गर्भोत्पन्नान्निबोधत ९४
वत्सरोनग्नहूश्चैव भरद्वाजश्चवीर्यवान् । ऋषिर्दीर्घतमाचैव वृहद्वक्षाःशरद्वतः ९५ वा
जिश्रवाःसुचिन्तश्च शावश्चसपराशरः । शृङ्गीचशङ्खपाच्चैव राजावैश्रवणस्तथा ९६ इ

ताहै ८२ गत्यर्थकऋषि धातुसे निवृत्ति का कारण यह ऋषिनाम सिद्धहोताहै जो यह आपही होता
है इसीसे ऋषिपनाहै ८३ ब्रह्माके मनसे उत्पन्नहुए पुत्र ईश्वरसहित होकर आपही उत्पन्न भये हैं
फिर निवर्त्तमान होनेसे उनको बुद्धिकेद्वारा परम पदकी प्राप्तिहोतीहै ८४ वह ब्रह्माके पुत्र महर्षिहो-
तेभये फिर उन ईश्वरोंके पुत्रमनसे होतेभये और स्त्रीधर्मसे भी होतेभये ८५ सबभूतोंके आदि में
ऋषिहोतेभये फिर ऋषियोंके मैथुन करनेसे पुत्रहोतेभये वहऋषिपुत्र, भूतादिकोंको परमार्थमें त्याग
देते हैं इसीसे ज्ञानीहोते हैं,इसप्रकारसे ऋषिलोग पहलेसेही सुनेजाते हैं उन्हींको श्रुतऋषि कहते हैं
अव्यक्तात्मा १ महात्मा २ अहंकारात्मा ३ भूतात्मा ४ और इन्द्रियात्मा ५ यह पांचप्रकारके ऋषि-
योंके पुत्र इसरीतिसे होते हैं इनको अपने २ आत्माका ज्ञान होताहै ८६। ८९ भृगु १ मरीचि २
अत्रि ३ अंगिरा ४ पुलह ५ क्रतु ६ मनु ७ दक्ष ८ वसिष्ठ ९ पुलस्त्य १० यहदश ब्रह्माजी के मान-
सपुत्र हैं अर्थात् मनसे उत्पन्न हुए हैं आपही ईश्वरहैं परत्वसे ऋषि हैं इसलिये इनको परमऋ-
षिकहते हैं ९०।९१ इन ईश्वरों के पुत्रजो ऋषिहैं उनकोभी सुनो, शुक्राचार्य्य बृहस्पति, कश्यप,
च्यवन, उतथ्य, वामदेव, अगस्त्य, कौशिक, कर्दम, बालखिल्य, विश्रवा, और शक्तिवर्द्धन, यह इतने
ऋषि हैं यहसब तपकरनेसे ऋषिपनेको प्राप्तभयेहैं, अबजो इनके पुत्रगर्भसे उत्पन्न भयेहैं उनको सु-
नो ९२। ९४ वत्सर, नग्नहू,भरद्वाज,दीर्घतमा, वृहद्वक्षा, शरद्वान्,९५वाजिश्रवा,सुचिन्त,शाव, परा-
शर, शृंगीऋषि शंखपाद, वैश्रवण और राजा यहसब ऋषियोंके पुत्रहैं यहसत्यबोलनेसे ऋषिपनेको
प्राप्त हुएहैं, यह ईश्वर, ऋषि और ऋषीक अर्थात् ऋषियोंके इतनेपुत्रहैं– अबमंत्र कृत् ऋषियोंको
सुनो, भृगु, काश्यप, प्राचेता, दधीचि, ऊर्व, जमदग्नि, सारस्वत, आर्ष्टिषेण, च्यवन, पीतहव्य, वेधा

त्येतऋषिकाःसर्वे सत्येनऋषिताङ्गताः । ईश्वराऋषयश्चैव ऋषीकायेचविश्रुताः ९७
एवंमन्त्रकृतःसर्वे कृत्स्नशश्चनिबोधत । भृगुःकाश्यपःप्राचेता दधीचोह्यात्मवानपि ९८
ऊर्वोऽथजमदग्निश्च वेदःसारस्वतस्तथा। आर्ष्टिषेणश्च्यवनश्च पीतहव्यःसवेधसः ९९
वैण्यःपृथुर्दिवोदासो ब्रह्मवान्गृत्सशौनकौ। एकोनविंशतिर्ह्येते भृगवोमन्त्रकृत्तमाः १००
अङ्गिराश्चैवत्रितश्च भरद्वाजोऽथलक्ष्मणः। कृतवाचस्तथागर्गः स्मृतिस्संकृतिरेवच १०१
गुरुवीतश्चमान्धाता अम्बरीषस्तथैवच । युवनाश्वःपुरुकुत्सः स्वश्रवस्तुसदस्यवा
न् १०२ अजमीढःस्वहार्यश्च ह्युत्कलःकविरेवच। पृषदश्वोविरूपश्च काव्यश्चैवाथमु
द्गलः १०३ उतथ्यश्चशरद्वांश्च तथावाजिश्रवाअपि । अपस्यौषःसुचित्तिश्च वामदेव
स्तथैवच १०४ ऋषिजोवृहच्छुल्कश्च ऋषिर्दीर्घतमाअपि। कक्षीवांश्चत्रयस्त्रिंशत् स्मृ
ताह्याङ्गिरसांवराः १०५ एतेमन्त्रकृतःसर्वे काश्यपांस्तुनिबोधत । कश्यपःसहवत्सारो
नैध्रुवोनित्यएवच १०६ असितोदेवलश्चैव षडेतेब्रह्मवादिनः । अत्रिरर्द्धस्वनश्चैव शा
वास्योऽथगविष्ठिरः १०७ कर्णकश्चऋषिःसिद्धस्तथापूर्वातिथिश्चयः १०८ इत्येतेत्वत्र
यःप्रोक्ता मन्त्रकृत्षण्महर्षयः । वसिष्ठश्चैवशक्तिश्च तृतीयश्चपराशरः १०९ ततस्तुइ
न्द्रप्रतिमः पञ्चमस्तुभरद्वसुः । षष्ठस्तुमित्रावरुणः सप्तमःकुण्डिनस्तथा ११० इत्येतेसप्त
विज्ञेया वासिष्ठाब्रह्मवादिनः । विश्वामित्रश्चगाधेयो देवरातस्तथाबलः १११ तथाविद्व
न्मधुच्छन्दा ऋषिश्चान्योऽघमर्षणः । अष्टकोलोहितश्चैव भृतकीलश्चमाम्बुधिः ११२
देवश्रवादेवरतः पुराणश्चधनञ्जयः । शिशिरश्चमहातेजाः शालङ्कायनएवच ११३
त्रयोदशैतेविज्ञेया ब्रह्मिष्ठाःकौशिकावराः। अगस्त्योऽथदृढद्युम्नो इन्द्रबाहुस्तथैवच ११४

बेण्य, पृथु, दिवोदास, गृत्स, और शौनक, यह उन्नीसऋषि मंत्रकृत् हैं और भृगुवंशमें होते हैं ९९ । १०० अंगिरा, त्रित, भरद्वाज, लक्ष्मण, कृतवाच, गर्ग, स्मृति, संकृति, गुरुबीत, मांधाता, अंबरीष, युवनाश्व, पुरुकुत्स, स्वश्रव, सदस्यवान्, १०१ । १०२ अजमीढ़, स्वहार्य्य, उत्कल, कवि, पृषदश्व, विरूप, काव्य, मुद्गल, उतथ्य, शरद्वान्, बाजिश्रवा, अपस्यौष, सुचित्ति, वामदेव, ऋषिज, वृहच्छुल्क, दीर्घतमाऋषि, कक्षीवान्, यह तेंतीसऋषि अंगिरसगोत्रमें होनेवाले हैं १०३ । १०५ यह मंत्रकृत्ऋषिहैं-अबकश्यप गोत्रमेंहोने वाले ऋषियोंको सुनो, कश्यप, सहवत्सार, नैध्रुव, नित्य, असित और देवल यहछः ब्रह्मचारी ऋषि होतेभये और अत्रि१, अर्द्धस्वन२, शाव ३ गविष्ठिर ४ कर्णक ५ सिद्ध, पूर्व्वातिथि६ यहमहर्षि मंत्रकृत्कहाते हैं और वसिष्ठ१ शक्ति२ पराशर३इन्द्रप्रतिम४ भरद्वसु५ मित्रावरुण ६ और कुंडिन यहसात ऋषि वसिष्ठ गोत्रवाले होकर ब्रह्मवादी हैं और विश्वामित्र गाधेय, देवरात, बल, विद्वान् मधुच्छन्दा, अघमर्षण, अष्टक, लोहित, भृतकील, देवश्रवा, देवरत, पुराण, धनंजय, शिशिर महातेजा, और शालंकायन यह तेरह ऋषि ब्रह्मनिष्ठ कौशिक गोत्रमें हुए हैं और अगस्त्य, दृढद्युम्न, इन्द्रबाहु, यहतीनों अगस्त्य गोत्रमें होनेवाले परम कीर्तिमान् कहेहैं औरबे-

ब्राह्मिष्ठागस्तयोह्येते त्रयःपरमकीर्त्तयः। मनुर्वैवस्वतश्चैव ऐलोराजापुरूरवाः ११५ क्ष
त्रियाणांवरौह्येतौ विज्ञेयौमन्त्रवादिनौ। भलन्दकश्चवासाश्वः सङ्कीलश्चैवतेत्रयः ११६
एतेमन्त्रकृतोज्ञेया वैश्यानांप्रवराःसदा। इतिद्विनवतिःप्रोक्ता मन्त्रायैश्चबहिष्कृताः ११७
ब्राह्मणाःक्षत्रियावैश्या ऋषिपुत्रान्निबोधत। ऋषीकाणांसुताह्येते ऋषिपुत्राःश्रुतर्षयः ११८
इतिश्रीमत्स्यपुराणेमन्वन्तरकल्पवर्णनोनामचतुश्चत्वारिंशदधिकशततमोऽध्यायः १४४
(ऋषय ऊचुः) कथंमत्स्येनकथितस्तारकस्यबधोमहान्। कस्मिन्कालेविनिर्वृत्ता
कथेयंसूतनन्दन! १ त्वन्मुखक्षीरसिन्धूत्था कथेयममृतात्मिका। कर्णाभ्यांपिबतांतृप्तिर
स्माकंनप्रजायते २ इदंमुने! समाख्याहि महाबुद्धे! मनोगतम्। (सूत उवाच) पृष्ट
स्तुमनुनादेवो मत्स्यरूपीजनार्दनः ३ कथंशरवनेजातो देवःषड्वदनोविभो!। एतत्तुवचनं
श्रुत्वा पार्थिवस्यामितौजसः ४ उवाचभगवान्प्रीतो ब्रह्मसूनुर्महामतिम्। (मत्स्य उ
वाच) वज्राङ्गोनामदैत्योऽभूत्तस्यपुत्रस्तुतारकः ५ सुरानुद्वासयामास पुरेभ्यःसमहाबलः।
ततस्तेब्रह्मणोऽभ्यासं जग्मुर्भयनिपीडिताः ६ भीताश्चत्रिदशान्दृष्ट्वा ब्रह्मातेषामुवाचह।
सन्त्यज्यध्वंभयंदेवाः! शङ्करस्यात्मजःशिशुः ७ तुहिनाचलदौहित्रस्तंहनिष्यतिदानव
म्। ततःकालेतुकस्मिंश्चिद्दृष्ट्वावैशैलजांशिवः ८ स्वरेतोवह्निवदने व्यसृजत्कारणान्त
रे। तत्प्राप्तंवह्निवदने रेतोदेवानतर्पयत् ९ विदार्यजठराण्येषामजीर्णंनिर्गतंमुने!।

वस्वतमनु १ और पुरूरवा वंशमें होनेवाले ऐलराजा यहदो मंत्रवादी कहेहैं, और भलंदक, वासाश्व
संकील यहतीनों मन्त्रकृत् होकर वैश्यजातिमें प्रधान कहे हैं इसप्रकारसे यहबानबे ९२ पुरुष मंत्रकृत्
कहे हैं इन्हीं पुरुषोंने मंत्रप्रकट किये हैं और ब्राह्मण,क्षत्रिय, वैश्य–यहतीनों जाति ऋषियोंसे हुई हैं
यहसब श्रुतऋषि कहाते हैं १०६। ११८॥

इति श्रीमत्स्यपुराणभाषाटीकायांमन्वन्तरकल्पवर्णनोनामचतुश्चत्वारिंशदधिकशततमोऽध्यायः १४४

ऋषियोंने पूछा हेसूतजी तारकासुर दैत्यका महाबध मत्स्यावतारने कैसे कहा है और यहकथा
किस कालमें प्रवृत्तहुई है १ आपके क्षीरसागररूपी मुखसे निकलीहुई इसअमृतरूपी कथाको कानों
से पीनेवाले हमलोगोंको सुनते २ भी तृप्तिनहींहोती २ हेमुने आप इसहमारे मनोरथको कहिये यह
सुनकर सूतजी बोले कि मत्स्यरूपी भगवान्से पहले मनुने पूछाकि हे भगवन् वह स्वामिकार्तिक
शरोंके झुंडमें कैसे उत्पन्नभये, इसवचनको सुनकर भगवान् प्रसन्नहोकरबोले कि पूर्वकालमें एकवज्रांग
नाम दैत्यहुआथा उसकापुत्र तारकासुर होताभया ३।५ उसमहाबली तारकासुरने त्रिपुरके द्वारा सब
देवताओंकोभगादिया फिरभयसेपीड़ितदेवता ब्रह्माजीकीशरणमें जातेभये ६ उनभयभीतहुए देवताओं
कोदेखकरब्रह्माजीबोले कि हेदेवतालोगो तुमभयको त्यागदो,शिवजीकापुत्र हिमाचलकादोहिता स्वामिकार्तिक
उसदानवकोमारेगा तदनन्तर शिवजी महाराज किसी समयपर पार्वतीजीकोदेखकर किसी
हेतुसे अपनेवीर्य्यको अग्निके मुखमें छोड़तेभये फिरअग्निके मुखमें प्राप्त हुआ वहबीर्य्य देवताओंको
अपने से तृप्तकरताभया ७।९ फिरदेवताओंके उदरको फोड़कर वहवीर्य्य अजीर्णहुआही निकसा फिर

पतितंतत्सरिद्वरे ततस्तुशरकानने १० तस्मात्तुससमुद्भूतो गुहोदिनकरप्रभः। ससप्त
दिवसोबालो निजघ्नेतारकासुरम् ११ एवंश्रुत्वाततोवाक्यं तमूचुर्ऋषिसत्तमाः। (ऋ
षय ऊचुः)। अत्याश्चर्यवतीरम्या कथेयंपापनाशिनी १२ विस्तरेणहिनोब्रूहि यथा
तथ्येनशृण्वताम्। वज्राङ्गोनामदैत्येन्द्रः कस्यवंशोद्भवःपुरा १३ तस्याभूत्तारकःपुत्रः
सुरप्रमथनोबली। निर्मितःकोबधेचाभूत्तस्यदैत्येश्वरस्यतु १४ गुहजन्मतुकार्त्स्न्येन
अस्माकंब्रूहिमानद!। (सूत उवाच)। मानसोब्रह्मणःपुत्रो दक्षोनामप्रजापतिः १५
षष्टिंऽसोजनयत्कन्या वैरिण्यामेवनःश्रुतम्। ददौसदशधर्माय कश्यपायत्रयोदश १६
सप्तविंशतिसोमाय चतस्रोऽरिष्टनेमये। द्वेवैबाहुकपुत्राय द्वेचान्येऽङ्गिरसेतथा १७ द्वे
कृशाश्वायविदुषे प्रजापतिसुतःप्रभुः। अदितिर्दितिर्दनुर्विश्वा ह्यरिष्टासुरसातथा १८
सुरभिर्विनताचैव ताम्राक्रोधवशाइरा। कद्रूर्मुनिश्चलोकस्य मातरोगोषुमातरः १९ ता
सांसकाशाल्लोकानां जङ्गमस्थावरात्मनाम्। जन्मनानाप्रकाराणां ताभ्योऽन्येदेहिनःस्मृ
ताः २० देवेन्द्रोपेन्द्रपूजाद्याः सर्वेतेदितिजामताः। दितेःसकाशाल्लोकास्तु हिरण्यकशि
पादयः २१ दानवाश्चंदनोःपुत्रा गावश्चसुरभीसुताः। पक्षिणोविनतापुत्रा गरुड़प्रमु
खाःसुताः २२ नागाःकद्रूसुताज्ञेयाः शेषाश्चान्येऽपिजन्तवः। त्रैलोक्यनाथंशक्रन्तु सर्वा
मरगणप्रभुम् २३ हिरण्यकशिपुश्चक्रे नीत्वाराज्यंमहाबलः। ततःकेनापिकालेन हिरण्य
कशिपादयः २४ निहताविष्णुनासंख्ये शेषाश्चेन्द्रेणदानवाः। ततोनिहतपुत्राभूद्दितिर्वि

नदी में गिरकर वहाँ से बहताहुआ शरों के झुंडोंमें प्राप्त होताभया १० फिरउसशरोंके झुंडमेंसे वह
सूर्य्यकेसमान कान्तिवाला स्वामिकार्तिकउत्पन्न होताभया वहसातदिनका बालकही तारकासुरकोमार
ताभया ११ ऐसीकथाको सुनकर ऋषियोंने कहा हे सूतजी यह पापनाशिनी कथा अत्यन्त आश्चर्य्य-
कारी है १२ इसको आप विस्तार पूर्व्वक कहिये हम यथार्थ रीतिसे इसको सुनेंगे प्रथम वज्रांगदैत्य
किसके वंशमें हुआहै जिसका कि पुत्र महाबली तारकासुरनामदैत्य हुआ उस दैत्यका वध कैसे हुआ
और स्वामिकार्तिकजी के जन्मकोभी अच्छी रीतिसे वर्णन करो यह सुनकर सूतजी कहते भये कि
ब्रह्माका मानसपुत्रदक्ष प्रजापति होताभया१३।१५फिर वैरिणीनाम स्त्रीमें वह दक्ष साठकन्याओं को
उत्पन्न करता भया जिनमें से दश १० धर्मको दी तेरह १३ कश्यपको दी सत्ताईस २७ चन्द्रमाको,
चार ४ अरिष्टनेमिको, दो बाहुक राजाको, दो अंगिराऋषिको, १६।१७और दो कृशाश्वको दी इनमें
अदिति१ दिति२ दनु३ विश्वा४ अरिष्टा ५ सुरसा ६ सुरभि७ बिनता८ ताम्रा९ क्रोधवशा१० इरा११
कद्रू१२और मुनि यह तेरह कश्यपजीकी स्त्री लोकोंकी माताहोती भयीं१८।१९उन्हीं के द्वारा स्थावर
जंगम लोकोंका जन्म हुआहै जिनके कि अनेक प्रकारके देहधारी जीव हुए हैं २० देवता,इन्द्र,उपेन्द्र
इत्यादिक सबअदितिकेहुए और दिति से हिरण्यकशिपु आदिक दैत्यउत्पन्नभये २१ दनुके पुत्रदानवहुए,
सुरभि के गौएं उत्पन्नहुईं विनताके गरुड़आदिक पक्षीउत्पन्नभये हैं२२कद्रूके शेषनागआदिक सर्पउत्पन्न
भये हैं यह हिरण्यकशिपु दैत्य त्रिलोकी समेत सब देवताओं के अधिपति इन्द्रको भी वशमें करके

रमयाचत २५ भर्त्तारंकश्यपंदेवं पुत्रमन्यंमहाबलम्। समरेशक्रहन्तारं सतस्याश्रददा
तूप्रभुः २६ नियमेवर्तहेदेवि ! सहस्रंशुचिमानसा। वर्षाणांलप्स्यसेपुत्रमित्युक्तांसातथा
करोत् २७ वर्त्तन्त्यानियमेतस्याः सहस्राक्षःसमाहितः। उपासामाचरत्तस्याः साचैनमन्व
मन्यत २८ दशसँव्वत्सरशेषस्य सहस्रस्यतदादितिः। उवाचशक्रंसुप्रीता वरदातपसि
स्थिता २९ (दितिरुवाच) पुत्रोत्तीर्णव्रतांप्रायः विद्धिमांपाकशासन !। भविष्यतिच
तेभ्राता तेनसार्द्धमिमांश्रियम् ३० भुङ्क्ष्ववत्स ! यथाकामं त्रैलोक्यंहतकण्टकम्। इत्यु
क्तानिद्रयाविष्टा चरणाक्रान्तमूर्द्धजा ३१ स्वयंसुष्वापानियता भाविनोऽर्थस्यगौरवात्।
तत्तुरन्ध्रंसमासाद्य जठरंपाकशासनः ३२ चकारसप्तधागर्भं कुलिशेनतुदेवराट्। एकैक
न्तुपुनःखण्डं चकारमघवाततः ३३ सप्तधासप्तधाकोपात् प्रबुध्यतततोदितिः। विबुध्यो
वाचमाशक्र ! घातयेथाःप्रजांमम ३४ तच्छ्रुत्वानिर्गतःशक्रः स्थित्वाप्राञ्जलिरग्रतः।
उवाचवाक्यंसन्त्रस्तो मातुर्वैवदनेरितम् ३५ (शक्रउवाच) दिवास्वप्नपरामातः ! पादा
क्रान्तशिरोरुहा। सप्तसप्तभिरेवातस्तवगर्भःकृतोमया ३६ एकोनपञ्चाशत्कृता भागाव
ज्रेणतेसुताः। दास्यामितेषांस्थानानिदिविदैवतपूजिते ३७ इत्युक्तासासदादेवी सैवम
स्त्वित्यभाषत। पुनश्चदेवीभर्तारमुवाचासितलोचना ३८ पुत्रंप्रजापते ! देहि शक्रजे

विश्वभरका राज्य आपही करता भया, इसके अनन्तर किसी कालमें हिरण्यकशिपु आदि दैत्योंको
तो विष्णुजीने मारा और शेषरहेहुए दानवोंको इन्द्रने मारा जबदितिके सबपुत्र मारेगये उससमय
शोकसे व्याकुलहुई दिति अपने भर्त्ता कश्यपजीसे यह बरमांगती भयी कि २३।२५ इन्द्रका मारनेवाला
मेरापुत्रहोय तब कश्यपजीने कहाकि एकहज़ार वर्षतक जोतुम नियमोंसे रहोगीतो तुम्हारे वैसाही इन्द्रकामारनेवाला
पुत्रहोगा इसवचनको सुनके दिति उसीप्रकार करनेलगी २६।२७ फिर उस नियम
में वर्त्तमान होनेवाली दितिकी उपासना इन्द्र करताभया इसबातको वहदितिभी जानतीथी जबदशवर्ष
बाक़ीरहे तबतपमें स्थितहुई दिति इन्द्रको बरदेनेके लिये २८ यहवचन बोली कि हेपुत्र तूसुझको
उग्र व्रतकरनेवालों में अग्रगणनीयजान तेरे भाई होगा उसके साथमें होकर तू इस लक्ष्मीको
इच्छापूर्व्वक अकण्टक भोगकरताहुआ त्रिलोकीका राज्यकर ऐसे कहकर वहदिति निद्राके वशीभूत
होकर सोजातीभई और उसकेबाल चरणोंपरगिरतेभये २९।३१ वहदिति भावीके वशमें होकर सोगई
उसछिद्रको देखकर इन्द्र उसके उदरमेंप्रवेशकरगया ३२ और अपने वज्रसे उसगर्भके सातखंड करदेता
भया और अत्यन्त क्रोधसे एक२ खंडकेभी सात२ टुकड़े करताभया तब दिति जागी और कहनेलगी
किहे इन्द्र मेरी सन्तानको मतमारे ३३।३४ इसप्रकारके वचनको सुनकर इन्द्र उदरसे बाहर निकलकर
माताके आगे खड़ाहोके भयभीतहो अंजली बांधकरबोला कि हेमातः तुम शिरके बाल खोले
हुए दिनमें सोगयीं इसहेतुसे मैंने इसगर्भके उनचासटुकड़े करदिये हैं अर्थात् अपनेवज्रसे तेरे पुत्रोंको
उनचासटुकड़े करादिये हैं सो इनसबको मैं देवताओं से भी पूजित उत्तम२ स्थानोंको दूंगा ३५।३७
यह वचन सुनकर दिति बोली कि अच्छा ऐसाही हो—फिर वह दिति अपने भर्त्तासे जाकर कहती

तारमूर्जितम् । योनास्त्रशस्त्रैर्बध्यत्वं गच्छेत्त्रिदिववासिनाम् ३९ इत्युक्तःसतथोवाच तांपत्नींमतिदुःखिताम् । दशवर्षसहस्राणि तपःकृत्वातुलप्स्यसे ४० वज्रसारमयैरङ्गैरच्छेद्यैरायसैर्दृढैः । वज्राङ्गोनामपुत्रस्ते भवितापुत्रवत्सले ४१ सातुलब्धवरादेवी जगामतपसेवनम् । दशवर्षसहस्राणि सातपोघोरमाचरत् ४२ तपसोऽन्तेभगवती जनयामासदुर्जयम् । पुत्रमप्रतिकर्म्माणमजेयंवज्रदुश्छिदम् ४३ सजातस्तत्रएवाभूत् सर्वशस्त्रास्त्रपारगः । उवाचमातरंभक्त्या मातः!किङ्करवाण्यहम् ४४ तमुवाचततोहृष्टा दितिर्दैत्याधिपञ्चसा । बहवोमेहताःपुत्राः सहस्राक्षेणपुत्रक! ४५ तेषांत्वंप्रतिकर्त्तुंवै गच्छशक्रबधायच । बाढमित्येवतामुक्त्वा जगामत्रिदिवंबली ४६ बद्ध्वाततःसहस्राक्षं पाशेनामोघवर्चसा । मातुरन्तिकमागच्छद्व्याघ्रःक्षुद्रमृगंयथा ४७ एतस्मिन्नन्तरेब्रह्मा कश्यपश्चमहातपाः । आगतौतत्रयत्रास्तां मातापुत्रावभीतकौ ४८ दृष्ट्वातुतमुवाचेदं ब्रह्माकश्यपएवच । मुञ्चैनंपुत्र! देवेन्द्रं किमनेनप्रयोजनम् ४९ अपमानोबधःप्रोक्तः पुत्रसम्भावितस्यच । अस्मद्वाक्येनयोमुक्तो विद्धितंमृतमेवच ५० परस्यगौरवान्मुक्तः शत्रूणांभारमावहेत् । जीवन्नेवमृतोवत्स! दिवसेदिवसेसतु ५१ महतांवशमायाते वैरंनैवास्तिवैरिणि । एतच्छ्रुत्वातुवज्राङ्गःप्रणतोवाक्यमब्रवीत्५२नमेकृत्यमनेनास्ति मातुराज्ञाकृतामया । त्वंसुरासुरनाथोवैममचप्र

भयी ३८ हेप्रजापते इन्द्रका जीतने वाला शस्त्र अस्त्रोंसे नहीं मरने वाला और स्वर्गमें जानेवाला पुत्र मुझको दीजिये ३९ उसके ऐसे वचन सुनकर वह ऋषि अपनी पत्नी से कहने लगे कि तू दश हज़ार वर्ष तपस्या करने से पुत्रको प्राप्त होगी ४० हेपुत्रवत्सले वज्र और लोहे के समान दृढ़अंगों वाला वज्रांग नामतेरा पुत्रहोगा ४१ फिर वह देवी वरको प्राप्तहो तपके निमित्त वनमें जाती भयी और दशहज़ार बर्षतक घोरतपको करती भयी ४२ वह दिति तपके अन्तमें वज्रसे भी न कटसके किसी से जीता न जाय ऐसे पुत्रको जनती भयी ४३ वह जन्मतेही सब अस्त्रशस्त्रोंको सीखताभया फिर भक्तिपूर्व्वक अपनी मातासे कहने लगा कि हे मातः आज्ञा करो कि मैं तुम्हारे निमित्त क्या करूं ४४ तबदिति अपने पुत्रको देखकर बोली कि हे पुत्र मेरे बहुतसे पुत्रमारे हैं उनका बदलालेने के लिये तू इन्द्र के मारनेके निमित्त जा तब बहुत अच्छा ऐसा दृढ़वचन कहकर वह महाबली दैत्य स्वर्गमें जाताभया ४५।४६ वहां जाकर वह अमोघतेज वाला दैत्य इन्द्रको फांसीमें बांधकर अपनी माताके समीपमें आता भया वह इन्द्रको पकड़कर ऐसे ले आया जैसे कि छोटे से मृगको सिंहपकड़ लाता है ४७ इसके अनन्तर जहां वह निर्भय हुए माता और पुत्र दोनों बैठेथे वहाँ ब्रह्माजी और महातप वाले कश्यपजी यह दोनों आवतेभये ४८ फिर इन्द्रको देखकर ब्रह्मा और कश्यप दोनों बोले कि हे पुत्र इस देवेन्द्रको छोड़दे इस्से क्या प्रयोजन है ४९ अपमान अर्थात् निरादर होनाही अच्छे पुरुषका मरण है-हमारे वचनसे यह छुटेगा यही इसका मरण है ५० हे पुत्र जो पराये वड़प्पनसे छुटे उसके शिरपर शत्रुओंका बोझारहताहै वह प्रतिदिन जीताहुआही मरेके समानहै ५१ महान् पुरुषों के वशमें आयेहुए वैरीके वैरनहीं रहताहै इसप्रकारके वचनोंको सुनकर वह वज्रांगदैत्य बड़ी नम्रता

करिष्येत्वद्वचोदेव! एषमुक्तःशतक्रतुः। तपसेमेरातिर्देव! निर्विघ्नंचैवमेभवेत्
पितामहः ५३ त्वत्प्रसादेनभगवन्नित्युक्त्वाविररामसः। तस्मिंस्तूष्णींस्थितेदैत्ये प्रोवाचेदंपितामहः ५५
५४
(ब्रह्मोवाच) तपस्त्वंक्रूरमापन्नो अस्मच्छासनसंस्थितः। अनयाचित्तशुद्ध्याते पर्याप्तंज
न्मनःफलम् ५६ इत्युक्त्वापद्मजःकन्यां ससर्जायतलोचनाम्। तामस्मैप्रददौदेवः पत्न्यर्थं
पद्मसम्भवः ५७ वराङ्गेतिचनामास्याः कृत्वायातःपितामहः। वज्राङ्गोऽपितयासार्द्धं ज
गामतपसेवनम् ५८ ऊर्ध्वबाहुःसदैत्येन्द्रोऽचरदब्दसहस्रकम्। कालंकमलपत्राक्षः शुद्ध
बुद्धिर्महातपाः ५९ तावच्चावाङ्मुखःकालं तावत्पञ्चाग्निमध्यगः। निराहारोघोरतपास्त
पोराशिरजायत ६० ततःसोऽन्तर्जलेचक्रे कालंवर्षसहस्रकम्। जलान्तरंप्रविष्टस्यतस्य
पत्नीमहाव्रता ६१ तस्यैवतीरेसरसस्तप्स्यन्तीमौनमास्थिता। निराहारातपोघोरं प्रविवे
शमहाद्युतिः ६२ तस्यांतपसिवर्त्तन्त्यामिन्द्रश्चक्रेविभीषिकाम्। भूत्वातुमर्कटस्तत्र तदा
श्रमपदंमहान् ६३ चक्रेविलोलंनिःशेषं तुम्बीघटकरण्डकम्। ततस्तुमेषरूपेणकम्पंत
स्याकरोन्महान् ६४ ततोभुजङ्गरूपेण बध्वाचचरणद्वयम्। अपकृष्टाततोदूरं भ्रमंस्त
स्यामहीमिमाम् ६५ तपोबलाढ्यासातस्य नबध्यत्वंजगामह। ततोगोमायुरूपेण तस्यादू
षयदाश्रमम् ६६ ततस्तुमेघरूपेण तस्याःक्लेदयदाश्रमम्। भीषिकाभिरनेकाभिस्तांक्लि
श्यन्पाकशासनः ६७ विररामयदानैवं वज्राङ्गमहिषीतदा। शैलस्यदुष्टतांमत्वा शापन्दा

से यह वचनबोला ५२ कि मेरा कृत्य कुछ इन्द्रसे नहीं है मैंनेतो अपनी माताकी आज्ञाकी है तुम
देवता और दैत्योंके मालिकहो और मेरेभी पिता और प्रपितामहहो इस निमित्त आपके वचनोंको
करूंगा-मैंने यह इन्द्र छोड़दिया, हे देव मेरी प्रीति तपकरनेमें है इस्से मुझको निर्विघ्नकरो ५३।५४
हे भगवन् तुम्हारीकृपासे मुझे आनन्दरहै ऐसा कहकर वह दैत्य चुपकाहोगया तब ब्रह्माजी बोले ५५
हे पुत्र तू हमारी शिक्षाके अनुसार उग्रतपकरने में स्थित होजा ऐसी चित्तकी शुद्धीकरनेसे तेरे जन्म
का फल सफल होजायगा ५६ ऐसाकहकर ब्रह्माजी उत्तम नेत्रोंवाली कन्याको रचतेभये फिर उस
कन्याको पत्नी के निमित्त इसदैत्यके अर्थ देतेभये ५७ उस स्त्रीकानाम ब्रह्माजीने वरांगीकिया फिर
अपने स्थानको जातेभये-वह वज्रांगदैत्य उस स्त्रीको पाकर तपकरनेको चलागया ५८ और वहाँ
जाकर वह महातप करनेवाला दैत्य ऊपरको हाथकियेहुए हज़ारवर्ष तक तपकरताभया हज़ारवर्ष
अधोमुख होकर और हज़ारवर्षतक पंचाग्नियों में तपको करके निराहार घोरतपस्याको करके तपकी
राशि होजाताभया ५९।६० फिर हज़ारवर्षतक जलकेभीतर तपकरताभया उससमय उसकी स्त्रीभी
मौनतासे निराहारहो उसी सरोवरके किनारेपर तप करनेलगी ६१।६२ उस स्त्रीके तपकरतेहुए उस
आश्रमके समीपमें इन्द्र आया और बन्दरका रूप धारणकरके उसको डराताभया ६३ चपलता करके
तुंबी घट आदिकोंको बजानेलगा फिर मेढ़ाबनकर डरानेलगा फिर सर्पहोकर उसके दोनों पैरोंको
बांधकर दूर खैंच ले जाताहुआ और पृथ्वी में भ्रमानेलगा तब वह बलवाली स्त्री उसके बंधनमें नहीं
आई तब वह इन्द्र शृगालबनकर उसके आश्रमको दूषित करनेलगा ६४।६६ फिर मेघरूपसे उसके

तुंव्यवस्थिता ६८ सशापाभिमुखांदृष्ट्वा शैलःपुरुषविग्रहः। उवाचतांवरारोहां वराङ्गींभीरुचेतनः ६९ नाहंवराङ्गने! दुष्टःसेव्योऽहंसर्वदेहिनाम्। विभ्रमन्तुकरोत्येष रुषितःपाकशासनः ७० एतस्मिन्नन्तरेजातः कालवर्षसहस्रिकः। तस्मिन्गतेतुभगवान् कालेकमलसम्भवः ७१ तुष्टःप्रोवाचवज्राङ्गं तमागम्यजलाश्रयम्। (ब्रह्मोवाच) ददामिसर्वकामांस्तेउत्तिष्ठदितिनन्दन! ७२ एवमुक्तस्तदोत्थाय दैत्येन्द्रस्तपसांनिधिः। उवाचप्राञ्जलिर्वाक्यं सर्वलोकपितामहम् ७३ (वज्राङ्ग उवाच) आसुरोमास्तुमेभावः सन्तुलोकामाक्षयाःतपस्येवरतिर्मेऽस्तु शरीरस्यास्तुवर्तनम् ७४ एवमस्त्वितितन्देवो जगामस्वकमालयम्। वज्राङ्गोऽपिसमाप्तेतु तपसिस्थिरसंयमः ७५ आहारमिच्छन्भार्यांस्वान्नददर्शाश्रमेस्वके। क्षुधाविष्टःसशैलस्य गहनम्प्रविवेशह ७६ आदातुंफलमूलानि सचतस्मिन्व्यलोकयत्। रुदन्तींतांप्रियान्दीनां तनुप्रच्छादिताननाम् ७७ तांविलोक्यसदैत्येन्द्रःप्रोवाचपरिसान्त्वयन्। (वज्राङ्ग उवाच) केनतेऽपकृतंभीरु! यमलोकंयियासुना ७८ कंवाकामंप्रयच्छामि शीघ्रंमेब्रूहिमानिनि ७९ ॥

इति श्रीमत्स्यपुराणेतारकासुरोपाख्यानेपञ्चचत्वारिंशदधिकशततमोऽध्यायः १४५ ॥

(वरांग्युवाच) त्रासितास्म्यपविद्धास्मि ताडितापीडितापिच। रौद्रेणदेवराजेन नष्टनाथेवभूरिशः १ दुःखपारमपश्यन्ती प्राणांस्त्यक्तुंव्यवस्थिता। पुत्रंमेतारकंदेहि दुः

आश्रमको गीलाकरनेलगा ऐसे अनेक भयपूर्व्वक दुःखकोदेताहुआ इन्द्र जब बन्दनहींहुआ तब वज्रांगदैत्यकी पत्नी उस पहाड़के दोषकोजानकर पर्व्वतको शापदेने के लिये तैयारहुई तब वह पर्व्वत पुरुषका रूप धारणकरके उस भयंकर चित्तवाली वरांगीसे बोला ६७। ६९ हे वरांगने मैं दुष्टनहींहूं मैं तो सबकें सेवनेलायकहूं यह इन्द्र तुझपर क्रोधकरके नानाभय दिखाताहै ७० इसके अनन्तर उन दोनोंके जब हज़ारवर्ष पूरेहोचुके तब ब्रह्माजी प्रसन्नहोकर उस जलाशयपर आये और वज्रांग दैत्य से बोले कि हे दितिनन्दन तू खड़ाहो मैं तुझको सबकामनादूंगा ७१। ७२ ऐसे वचनको सुनकर वह तपोनिधि दैत्य हाथजोड़कर लोकोंके पितामह ब्रह्माजी से बोला ७३ हे पितामह मेरे आसुरीभाव और दैत्यपना न हो मुझको अक्षयलोक की प्राप्ति हो और मेरा शरीर सदैव तपही करने में रहै यह सुनकर ब्रह्माजी ने कहा ऐसाहीहोगा यह कहकर ब्रह्माजी अपने स्थानको चलेगये तब वज्रांगदैत्य भी तपके समाप्तहोनेपर अपने नियमोंको समाप्त करताभया ७४। ७५ और भोजनकी इच्छाकरके आश्रमको गया वहाँ जाकर अपनी स्त्रीको नहीं देखताभया तब तो क्षुधासे युक्तहोकर पर्व्वत के गह्वर वनमें प्रवेश करताभया वहाँ फल मूलोंको ग्रहणकरती और रोतीहुई दीन अपनी स्त्रीको देखके शिक्षा करताहुआ यह वचनबोला ७६। ७८ हे भीरुप्रिये धर्मरायकी पुरीमें जानेकी इच्छा करनेवाले किसने तेरा निरादर कियाहै मैं तेरे किस मनोरथ को करूं यह तू मुझसे शीघ्र कह ७९ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांतारकासुरोपाख्यानेपंचचत्वारिंशदधिकशततमोऽध्यायः १४५ ॥

वरांगी बोली—कि मुझको भयंकर इन्द्रने भयभीत किया है और बहुतताड़ना करके मुझको

खशोकमहार्णवात् २ एवमुक्तःसदैत्येन्द्रः कोपव्याकुललोचनः। शक्तोऽपिदेवराजस्य
प्रतिकर्तुंमहासुरः ३ तपःकर्तुंपुनर्दैत्यो व्यवस्यतमहाबलः। ज्ञात्वातुतस्यसंकल्पं ब्रह्मा
क्रूरतरंपुनः ४ आजगामतदातत्र यत्रासौदितिनन्दनः। उवाचतस्मैभगवान्प्रभुर्मधुरया
गिरा ५ (ब्रह्मोवाच) किमर्थंपुत्रभूयस्त्वं नियमंक्रूरमिच्छसि। आहाराभिमुखोदैत्यस्त
त्वंब्रूहिमहाव्रत ६ यावदब्दसहस्रेण निराहारास्यतत्फलम्। क्षणेनैकेनतल्लब्धा त्यक्ता
हारमुपस्थितम् ७ त्यागोह्यप्राप्तकामानां कामेभ्योनतथागुरुः। यथाप्राप्तंपरित्यज्य का
मंकमललोचन! ८ श्रुत्वैतद्ब्रह्मणोवाक्यं दैत्यःप्राञ्जलिरब्रवीत्। चिंतयंस्तपसायुक्तो
हृदिब्रह्ममुखेरितम् ९ (वज्राङ्ग उवाच) उत्थितेनमयादृष्टा समाधानात्त्वदाज्ञया। म
हिषीभीषितादीना रुदन्तीशाखिनस्तले १० सामयोक्तातुतन्वङ्गी दूयमानेनचेतसा।
किमेवंवर्त्तषेभीरु! वदत्वंकिञ्चिकीर्षसि ११ इत्युक्तासामयादेव! प्रोवाचस्खलिताक्षरम्
वाक्यंवाचस्पते! भीता तन्वङ्गीहेतुसंहितम् १२ (वरांग्युवाच) त्रासितास्म्यपविद्धा
स्मि कर्षितापीडितास्मिच। रौद्रेणदेवराजेन नष्टनाथेवभूरिशः १३ दुःखस्यान्तमपश्य
न्तीप्राणांस्त्यक्तुंव्यवस्थिता। पुत्रंमेतारकंदेहि ह्यस्माद्दुःखमहार्णवात् १४ एवमुक्तस्तु
संक्षुब्धस्तस्याःपुत्रार्थमुद्यतः। तपोघोरंकरिष्यामि जयायत्रिदिवौकसाम् १५ एतच्छ्रु
त्वावचोदेवः पद्मगर्भोद्भवस्तदा। उवाचदैत्यराजानं प्रसन्नश्चतुराननः १६ (ब्रह्मोवाच)

उसने ऐसा पीड़ित किया है जैसे कि कोई विधवास्त्रीको पीड़ादेताहै मैं अपनेदुःखसे पार न होनेके
कारण अपने प्राणों के त्यागनेकी इच्छा कररहीहूं हे पति अब आपमुझको दुःखशोकसे तारनेवाला
पुत्रदो १।२ यहबात सुनकर क्रोधसे रक्तनेत्रवाला वहदैत्य यद्यपि इन्द्रसे बदलालेनेकोसामर्थभीथा
परन्तु तपही करने में उपस्थित होताभया तब ब्रह्माजी उसके क्रूरतप को जानकर उस दैत्यके
समीप आये और उस्से मधुर २ वचन बोले ३।५ कि हे पुत्र इसक्रूर नियमको तू फिर किस निमित्त करताहै और क्यों नहीं भोजनकरताहै यह हमसे वर्णन करो ६ हज़ार वर्षतक जो निराहार
रहनेका फलहै उसको तू इसप्राप्तहुए आहारके त्यागनेसेही प्राप्त होगयाहै ७ जिनकी कामना प्राप्त
नहीं होती है उनका त्याग ऐसाबड़ानहीं है जैसाकि प्राप्त वस्तुके त्यागनेका माहात्म्यहोताहै ८ इस
प्रकार ब्रह्माके वचनको सुनकरवह दैत्य अंजली बांधकर हृदयमें ब्रह्माके वचनोंको चिंतवनकरताहुआ
यह वचनबोला ९ कि हे ब्रह्माजी आपकीहीआज्ञासे समाधिसे उठेहुए मैंनेयह अपनीस्त्री वृक्षके नीचे
खड़ीहुई भयभीत दीन औररोती हुई देखी १० तब मैंने चित्तसे दुःखितहोकर उस्से पूछाकि हेभीरु
तू इस प्रकार उदासहोकर क्योंरोरही है औरक्याचाहती है ११ मेरेइसवचनको सुनकर वहस्त्री गद्गद
वाणीसे भयभीतहोकर हेतुसमेत यह वचन बोली १२ कि हे प्राणपति मुझको भयंकर रूप इन्द्रने
डरायाहै और महादुःखित करके ताड़नाकरी है मुझको उसने ऐसा पीड़ित कियाहै जैसाकि कोई
अनाथस्त्रीको दुःखदेताहै १३ मैं दुःखके पारको नदेखकर अपने प्राणोंको त्यागतीहूं नहीं तो दुःख-
शोक से तारने वाला पुत्रमुझकोदो १४ ऐसे उसके वचनों से क्षोभको प्राप्तहुआ मैं उसके पुत्रके

अलन्तेतपसावत्स ! माक्लेशेदुस्तरेविश । पुत्रस्तेतारकोनाम भविष्यतिमहाबलः १७
देवसीमन्तिनीकान्त धम्मिल्लस्यविमोक्षणः । इत्युक्तोदैत्यनाथस्तु प्रणिपत्यपितामहम्
१८ आगत्यानन्दयामास महिषींहर्षिताननः । तौदम्पतीकृतार्थौतु जग्मतुःस्वाश्रमंमु
दा १९ वज्राङ्गेनाहितंगर्भं वराङ्गावरवर्णिनी । पूर्णंवर्षसहस्रञ्च दधारोदरएवहि २० त
तोवर्षसहस्रान्ते वराङ्गीसुषुवेसुतम् । जायमानेतुदैत्येन्द्रे तस्मिन्लोकभयङ्करे २१ चचा
लसकलापृथ्वी समुद्राश्चचकम्पिरे । चेलुर्महीधराःसर्वे ववुर्वाताश्चभीषणाः २२ जेपु
र्जप्यंमुनिवरा नेदुर्व्यालमृगाअपि । चन्द्रसूर्याजहुःकान्तिं सनीहारादिशोऽभवन् २३
जातेमहासुरेतस्मिन्सर्वेचापिमहासुराः । आजग्मुर्हर्षितास्तत्र तथाचासुरयोषितः २४
जग्मुर्हर्षसमाविष्टा नन्नृतुश्चासुराङ्गनाः । ततोमहोत्सवोजातो दानवानांद्विजोत्तमाः!२५
विषण्णमनसोदेवाः समहेन्द्रास्तदाभवन् । वराङ्गीस्वसुतंदृष्ट्वा हर्षेणापूरितातदा २६ बहु
मेनेनदेवेन्द्र विजयन्तुतदैवसा । जातमात्रस्तुदैत्येन्द्रस्तारकश्चण्डविक्रमः २७ अभिषि
क्तोऽसुरैःसर्वैः कुजम्भमहिषादिभिः । सर्वासुरमहाराज्ये पृथिवीतुलनक्षमैः २८ सतुप्रा
प्यमहाराज्यं तारकोमुनिसत्तमाः!। उवाचदानवश्रेष्ठान्युक्तियुक्तमिदंवचः २९ ॥
इति श्रीमत्स्यपुराणे तारकासुरोपाख्याने षट्चत्वारिंशदधिकशततमोऽध्यायः १४६ ॥

उद्योगके निमित्त देवताओं के जीतनेके लिये फिर घोरतप करूंगा १५ वह चतुरानन ब्रह्माजी उस
के वचनको सुनकरवज्रांग दैत्यसे यह वचन बोले १६ कि हेपुत्र बस अबतेरातप होचुका तू फिर
दुस्तर क्लेश को मतकरै तेरे तारकासुर नाम एक महाबली पुत्र होगा १७ तब वह वरांगीका पति
वज्रांग दैत्य ब्रह्माजी से इस वरदानको सुनकर ब्रह्माजीको नमस्कारकर प्रसन्न मुखसे अपनी स्त्रीके
पास आया और दोनों स्त्रीपुरुष कृतार्थ और प्रसन्नहोकर अपने आश्रममें आवतेभये १८।१९ इसके
उपरान्त वज्रांग दैत्यसे स्थापित हुए गर्भको उसकी स्त्री धारणकरती भयी और एक हज़ार वर्षतक
उसने गर्भकोधारणरक्खा २० तदनन्तर वह वरांगी ऐसे महाबली लोकों के अभयकारी पुत्र को
जन्मती भयी कि जिस समय वह लोकोंका भयकारी उत्पन्नहुआ उससमय संपूर्णपृथ्वी औरसमुद्रों
समेत सब पर्व्वतकांपे और भयंकर वायु चलतेभये २१।२२ उत्तम मुनिलोग मंत्रोंका जप करते
भये सर्प मृग आदिक जीव शब्दकरते भये चन्द्रमा सूर्य्य अपनी कान्ति को त्यागतेभये सब दिशा
धूम्रवर्ण होगईं २३ उस महादैत्य के जन्मतेही सब दैत्य और दैत्यों की स्त्रियां बड़े प्रसन्नचित्तों से
आतीहुईं २४ दैत्योंकी स्त्रियां मगन हो २ नृत्य और गानकरनेलगीं और दानवों के गृहों में बड़े
भारी उत्सव होतेभये २५ इन्द्रादिक देवता महादुःखित मनहुए और वह वरांगीस्त्री अपने पुत्रको
देखके बड़े हर्षसे पूरित होतीभयी उस समय वरांगी इन्द्रके जीतनेको कुछ बड़ी बात न समझती
भयी और वह तारकासुर दैत्य जन्मतेही अत्यन्त पराक्रमवाला होताभया २६।२७ फिर कुजंभ और
महिषासुर इत्यादिक दैत्यों ने तारकासुर दैत्य का राज्याभिषेक किया अर्थात् अपना अधिपति
बनाया २८ हे मुनि सत्तम लोगो वह तारकासुर दैत्य राज्यतिलक को प्राप्तहो कर बड़े २ दानवों
से यह युक्ति पूर्वक वचन कहताभया २९॥ इति षट्चत्वारिंशदधिकशततमोऽध्यायः १४६ ॥

(तारक उवाच) शृणुध्वमसुराः!सर्वे वाक्यंममममहाबलाः !। श्रेयसेक्रियतांबुद्धिः स
वैःकृत्यस्यसंविधौ १ वंशक्षयकरादेवाः सर्वेषामेवदानवाः। अस्माकंजातिधर्मोवै विरूढं
वैरमक्षयम् २ वयमद्यगमिष्यामः सुराणांनिग्रहायतु। स्वबाहुबलमाश्रित्य सर्वएवमसं
शयः ३ किन्तुनातपसायुक्तो मन्येऽहंसुरसङ्गमम्। अहमादौकरिष्यामि तपोघोरन्दितेः
सुताः! ४ ततःसुरान्विजेष्यामो भोक्ष्यामोऽथजगत्त्रयम्। स्थिरोपायोहिपुरुषः स्थिर
श्रीरपिजायते ५ रक्षितुंनैवशक्नोति चपलश्चपलाःश्रियः। तच्छ्रुत्वादानवाःसर्वे वाक्यं
तस्यासुरस्यतु ६ साधुसाध्वित्यवोचंस्ते तत्रदैत्याःसविस्मयाः। सोऽगच्छत्पारियात्रस्य
गिरेःकन्दरमुत्तमम् ७ सर्वर्तुकुसुमाकीर्णं नानौषधिविदीपितम्। नानाधातुरसस्रावचित्रं
नानागुहागृहम् ८ गहनैःसर्वतोगूढं चित्रकल्पद्रुमाश्रयम्। अनेकाकारबहुलंपृथक् प
क्षिकुलाकुलम् ९ नानाप्रस्रवणोपेतं नानाविधजलाशयम्। प्राप्यतत्कन्दरं दैत्यश्च
चारविपुलंतपः १० निराहारःपञ्चतपाः पत्रभुग्वारिभोजनः। शतंशतंसमानान्तु तपां
स्येतानिसोऽकरोत् ११ ततःस्वदेहादुत्कृत्य कर्षंकर्षंदिनेदिने। मांसस्याग्नौजुहावा
सौ ततोनिर्मांसताङ्गतः १२ तस्मिन्निर्मांसतांयाते तपोराशित्वमागते। जज्वलुःसर्व
भूतानितेजसातस्यसर्वतः १३ उद्विग्नाश्चसुराःसर्वे तपसातस्यभीषिताः। एतस्मिन्न
न्तरेब्रह्मापरमंतोषमागतः १४ तारकस्यवरंदातुं जगामत्रिदशालयात्। प्राप्यतंशैल

तारकासुर बोला कि हे महाबली दैत्यलोगो तुममेरे इसवचनको सुनो कि सबको अपने कल्याण में बुद्धि करनी योग्यहै १ हे दानवो यह सब देवता हमारे वंशों के नाश करनेवाले हैं इन देवताओं सेहमारी जातिका वैर सदैवसे दृढ चला आताहै २ अबहम देवताओं के रोकने के लिये गमन करेंगे हमसब अपनी भुजाओं के बलमें आश्रितहोकर उनको निस्सन्देह जीतेंगे ३ परन्तु हम विना तप किये देवताओं के साथ युद्ध करनेको उत्तमनहीं मानते इसलिये मैं प्रथम महाघोर तप करूंगा ४ क्योंकि जिसपुरुप का उपाय स्थिर होताहै उसकी लक्ष्मीभी स्थिर होजाती है और जो चपलहोताहै वह चपल लक्ष्मी की रक्षा नहीं करसक्ताहै ऐसे उसके वचनोंको सुनकर सबदानव आश्चर्य्ययुक्त होकर साधु २ वचन बोलतेभये वह तारकासुर दैत्य पारियात्र पर्व्वत की उत्तरवाली गुफामें गमनकरता भया ५।७ सब ऋतुओंके पुष्पों से और सर्वौषधियोंसे युक्त नानाप्रकारकी धातुओं से विचित्र अनेक गुफारूपीगृहों से शोभित ८ विचित्र वृक्षादिकों से गह्वर अनेक चिह्नोंसे चित्रित बहुतसे ऋषियों से सेवित ९ अनेक झरनों और जलाशयों से युक्त ऐसी उस पर्व्वतकी कन्दराको प्राप्तहोकर वह दैत्य आगेलिखे प्रकारोंसे बहुतसा तप करनेलगा १० निराहार रहना, पंचाग्निमें तपना और पत्तों का और जलोंका भोजन करना, इनसब तपोंको सौ २ वर्षतक करताभया ११ फिर प्रतिदिन अपने शरीरमें से सवातोले मांसको काट २ कर अग्निमें हवन करनेलगा फिरजब मांस रहित शरीर हो गया तब केवल तपो मूर्त्ति होगया उससमय सब भूतमात्र उसके तेजसे देदीप्त होते भये १२।१३ और उसतपसे सब देवता कांपते भये इसके अनन्तर ब्रह्माजी अत्यन्त प्रसन्न होकर स्वर्ग से उस

राजानं सगिरेःकन्दरस्थितम् १५ उवाचतारकंदेवो गिरामधुरयायुतः । (ब्रह्मोवाच)
पुत्रालंतपसातेऽस्तु नास्त्यसाध्यंतवाऽधुना १६ वरंवृणीष्वरुचिरं यत्तेमनासिवर्त्तते ।
इत्युक्तस्तारकोदैत्यः प्रणम्यात्मभुवंविभुम् १७ उवाचप्राञ्जलिर्भूत्वा प्रणतःपृथुवि
क्रमः (तारक उवाच) देव ! भूतमनोवास ! वेत्सिजन्तुविचेष्टितम् १८ कृतप्रतिकृ
ताकांक्षी जिगीषुःप्रायशोजनः । वयञ्चजातिधर्मेण कृतवैराःसहामरैः १९ तैश्चनिःशेषि
तादैत्याः क्रूरैःसन्त्यज्यधर्मिताम् । तेषामहंसमुद्धर्त्ता भवेयमितिमेमतिः २० अबध्यंसर्वं
भूतानामस्त्राणाञ्चमहौजसाम् । स्यामहंपरमोह्येष वरोममहृदिस्थितः २१ एतन्मेदेहिदेवे
श ! नान्योमेरोचतेवरः । तमुवाचततोदैत्यं विरिञ्चिःसुरनायकः २२ नयुज्यन्तेविनामृत्युं
देहिनोदैत्यसत्तम ! । यतस्ततोऽपिवरयमृत्युंयस्मान्नशङ्कसे २३ ततःसञ्चिन्त्यदैत्येन्द्रः शि
शोर्वैसप्तवासरात् । वव्रेमहासुरोमृत्युमवलेपनमोहितः २४ ब्रह्माचास्मैवरंदत्त्वा यत्कि
ञ्चिन्मनसेप्सितम् । जगामत्रिदिवंदेवो दैत्योऽपिस्वकमालयम् २५ उत्तीर्णतपसस्तंतुदै
त्यंदैत्येश्वरास्तथा । परिवव्रुःसहस्राक्षं दिविदेवगणायथा २६ तस्मिन्महतिराज्यस्थे
तारकेदैत्यनन्दने । ऋतवोमूर्त्तिमन्तश्च स्वकालगुणबृंहिताः २७ अभवन्किङ्करास्तस्य
लोकपालाश्चसर्वशः । कान्तिर्द्युतिर्धृतिर्मेधा श्रीरवेक्ष्यचदानवम् २८ परिवव्रुर्गुणाकीर्णं
निश्छिद्राःसर्वएवहि । कालागुरुविलिप्ताङ्गं महामुकुटभूषणम् २९ रुचिराङ्गदनद्धाङ्गं म

तारकासुरको वरदान देनेको आये और उसपर्व्वतकी कन्दरापर प्राप्तहोकर उस दैत्यके प्रति बड़ी
मधुरवाणी से बोले कि हे पुत्र अब तेराव्रत समाप्त हुआ अबतुझको किसी बातकी अपेक्षा नहीं
रही १४ । १६ जो अभीष्टहो वह वरमांग यह सुनकर वह तारकासुर दैत्य हाथ जोड़कर कहनेलगा
कि हे देव आपसब जीवोंके मनकी चेष्टाको जानते हो १७ । १८ सब मनुष्य अपने शत्रुसे बदला
लेने के निमित्त उसके जीतनेकी इच्छा करते हैं हमारा स्वाभाविक सदैवसे जाति धर्म के द्वारा देवताओंसे
वैर चला आता है १९ क्योंकि उन देवताओं ने सबजगहसे दैत्योंको निकालदियाहै सो मैं
आपकी कृपासे उन देवताओं का मारनेवाला होजाऊं ऐसी मेरीबुद्धिहै २० मैं सब भूतमात्रों से
शस्त्र अस्त्रादिके द्वारा नहीं मरूं यही परमवर मेरे हृदयमें स्थित है हे देवेश इसवरको आप मुझेदो
इसके सिवाय और कोई वरनहीं चाहता उसके इसवचनको सुनकर ब्रह्माजी बोले २१।२२ हे दैत्य
कोई भी जीवधारी मृत्युसे नहीं बचसक्ताहै इसलिये तू जिस्सेकुछशंका नहींमानताहो उस्सेही अपनीमृत्यु
मांगले २३ फिर अभिमान से युक्तहुआ वह दैत्य अपने मनमें चिन्तवन करके सातदिनके
बालक से अपनी मृत्युको मांगता भया २४ इसके इसअभीष्टवरको देकर ब्रह्माजी स्वर्गको गये और
यह दैत्य भी अपने स्थानको चला आया २५ तब सब दैत्येश्वर इस तपसे निवृत्त होनेवाले तारकासुरसे
युद्धकीवार्त्ता कहने लगे और देवता लोग स्वर्गमें इन्द्रसे कहतेभये २६ जबतारकासुर राज्य
करने लगा तब अपने कालके गुणोंसे वृद्धियुक्त ऋतु मूर्तिमान होती भयीं सब लोकपाल उसके
किंकर होतेभये कान्ति, द्युति, धृति, मेधा, श्री और यह सब वस्तु उस दानवको देखकर इसको अपना

हासिंहासनेस्थितम् । वीजयन्त्यप्सरःश्रेष्ठाः भृशंमुञ्चन्तिनैवताः ३० चन्द्रार्कौदीपमार्गे
षु व्यजनेषुचमारुतः । कृतान्तोऽग्रेसरस्तस्यबभूवुर्मुनिसत्तमाः ! ३१ एवंप्रयातिकाले
तु विततेतारकासुरः । बभाषेसचिवान्दैत्यः प्रभूतवरदर्पितः ३२ (तारक उवाच) रा
ज्येनकारणंकिंमे त्वनाक्रम्यत्रिविष्टपम् । अनिर्य्याप्यसुरैर्वैरं काशान्तिर्हृदयेमम ३३ भुञ्ज
तेऽद्यापियज्ञांशा नमरानाकएवहि । विष्णुःश्रियंनजहाति तिष्ठतेचगतभ्रमः ३४ स्वस्था
भिःस्वर्गनारीभिः पीड्यन्तेऽमरवल्लभाः । सोत्पलामदिरामोदा दिविक्रीड़ायनेषुच ३५
लब्ध्वाजन्मनयःकश्चिद् घटयेत्पौरुषंनरः । जन्मतस्यवृथाभूतमजन्मातुविशिष्यते ३६
मातापितृभ्यांनकरोतिकामान् बन्धूनशोकान्नकरोतियोवा । कीर्तिंहिवानार्जयतेहिमाभ्यां
पुमान्सजातोऽपिमृतोमतंमे ३७ तस्माज्जयायामरपुङ्गवानां त्रैलोक्यलक्ष्मीहरणायशी
घ्रम् । संयोज्यतांमेरथमष्टचक्रं बलञ्चमेदुर्जयदैत्यचक्रम् । ध्वजञ्चमेकाञ्चनपट्टनद्धञ्छत्रञ्चमे
मौक्तिकजालबद्धम् ३८ तारकस्यवचःश्रुत्वा ग्रसनोनामदानवः । सेनानीर्दैत्यराजस्य त
था चक्रेबलान्वितः ३९ आहत्यभेरींगम्भीरां दैत्यानाहूयसत्वरः । तुरगाणांसहस्रेणचक्रा
ष्टकविभूषितम् ४० शुक्लाम्बरपरिष्कारं चतुर्योजनविस्तृतम् । नानाक्रीडागृहयुतं गीतवा

स्वामी बनाके सब छिद्रों से रहितहो उसके पास रहती भयीं उस नाना सुगन्धियुक्त शरीर वाले
महामुकुट बाजूबन्द आदिसे शोभित और सिंहासन पर बैठे हुए दैत्यके ऊपर अप्सरागण चँवर
ढुलाती हुईं किसी समय पर भी खाली नहीं छोड़तीं दीपकोंके स्थानापन्न चन्द्रमा और सूर्य्य हुए
व्यजनोंके स्थानापन्न वायुहुआ धर्मराज आगे चलनेवाला हुआ २७।३१ ऐसेप्रतापसे राज्यकरतेहुए
तारकासुरका जब बहुत समय व्यतीत होचुका तब तारकासुर अभिमानी होकर यहवचनबोला ३२
कि स्वर्ग में पहुंचे विना इसराज्यसे क्या लाभहै देवताओंसे शत्रुता किये विना मेरे हृदयमें शान्ति
नहीं है ३३ अबभी देवता लोग स्वर्गमें बैठे हुए यज्ञों के भागों को भोगते हैं विष्णु लक्ष्मीजीको नहीं
छोड़ते वह विष्णु निर्भय होकर बैठाहै ३४ कमलाक्षी मदिरा की गंधसे युक्त देवताओं की स्त्रियाँ
स्वर्ग के क्रीड़ा स्थानोंमें देवताओंके साथ रमण करती हैं ३५ जो पुरुष इससंसार में जन्म लेकर
अपना कुछ भी पुरुषार्थ नहीं दिखाताहै उसका जन्म वृथाहै इस्से तो जन्मका न होनाहीश्रेष्ठहै ३६
जो अपने मातापिताओंके मनोरथों को सिद्ध नहीं करता है अथवा बंधुओंके शोकोंको दूर नहींकरता
और कीर्तियों का संग्रह नहीं करताहै वह जन्माहुआ भी पुरुष मृतककेही समान है ३७ इस हेतु
से त्रिलोकी की लक्ष्मीके हरनेके निमित्त बड़ी शीघ्रतासे देवताओंसे युद्ध करेंगे, आठ चक्रोंवाला
मेरा रथ बनाओ हेदुर्जय दैत्य चक्रसेयुक्त मेरा बलकरो सुवर्णके वस्त्रों सेयुक्त मेरीध्वजाबनाओ और
मोतियों की जालीसे युक्त मेरा छत्र बनानाचाहिये ऐसे तारकासुरके वचनों को सुनकर ग्रसन नाम
सेनापति दैत्य उसके सब विचारों को यथावस्थित पूराकरता भया ३८ । ३९ भेरी के बाजे बजा-
कर शीघ्रही दैत्यों को बुलाता भया फिर हज़ार घोड़ों से युक्त आठ चक्रों से विभूषित श्वेत वस्त्रों
से जटित चार योजन में विस्तृत हुए रथमें बैठकर जहां जहां तारकासुर आताभयावहाँ २ अनेक

घमनोहरम् ४१ विमानमिवदेवस्य सुरभर्त्तुःशतक्रतोः । दशकोटीश्वरादैत्या दैत्यास्ते
चण्डविक्रमाः ४२ तेषामग्रेसरोजम्भः कुजम्भोऽनन्तरस्ततः । महिषःकुंजरोमेघः काल
नेमिर्निमिस्तथा ४३ मथनोजम्भकःशुम्भो दैत्येन्द्रादशनायकाः । अन्येऽपिशतशस्तस्य
पृथिवीदलनक्षमाः ४४ दैत्येन्द्रागिरिवर्ष्माणः सन्तिचण्डपराक्रमाः । नानायुधप्रहरणा
नानाशस्त्रास्त्रपारगाः ४५ तारकस्याभवत्केतू रौद्रःकनकभूषणः । केतुनामकरेणापि सेना
नीर्ग्रसनोऽरिहा ४६ पैशाचंयस्यवदनं जम्भस्यासीदयोमयम् । खरंविधूतलांगूलं कु
जम्भस्याभवद्ध्वजे ४७ महिषस्यतुगोमायुर्ङ्केतोर्हैमंतदाभवत्। ध्वांक्षंध्वजेतुशुम्भस्यकृष्णा
योमयमुच्छ्रितम् ४८ अनेकाकारविन्यासाश्चान्येषान्तुध्वजास्तथा । शतेनशीघ्रवेगानां
व्याघ्राणांहेममालिनाम् ४९ ग्रसनस्यरथोयुक्तो किङ्किणीजालमालिनाम् । शतेनापिच
सिंहानांरथोजम्भस्यदुर्जयः ५० कुजम्भस्यरथोयुक्तः पिशाचवदनैःखरैः । रथस्तुमहिष
स्योष्ट्रैर्गजस्यतुतुरङ्गमैः ५१ मेघस्यद्वीपिभिर्भीमैः कुञ्जरैःकालनेमिनः । पर्वताभैःसमारू
ढो निमिर्मत्तैर्महागजैः ५२ चतुर्दन्तैर्गन्धवद्भिः शिक्षितैर्मेघभैरवैः । शतहस्तायतेकृष्णे
तुरङ्गैर्हैमभूषणैः ५३ सितचामरजालेन शोभितेदक्षिणांदिशम् । सितचन्दनचार्वङ्गो ना
नापुष्पस्रजोज्ज्वलः ५४ मथनोनामदैत्येन्द्रः पाशहस्तोऽव्यराज्यत । जम्भकःकिङ्किणीजा
लमालमुष्ट्रंसमास्थितः ५५ कालशुक्लमहामेषमारूढः शुम्भदानवः । अन्येऽपिदानवा

प्रकार के गीत मंगल होते भये इस दैत्य का रथ इन्द्रके विमानकेही समान शोभित हुआ उसके साथ अतुल पराक्रमवाले दशकिरोड़ दैत्य युद्धके निमित्तचले ४० । ४२ उससेना में जंभ, कुजंभ, महिष, कुंजर, मेघ कालनेमि, मथन, जंभक, निमि और शुभ यह दश दैत्य सेनापति की पदवी पर नायक होते भये इनके विशेष और २ बहुत से दैत्य भी महाबली नियत होते भये ४३ । ४४ पर्व्वत के समान शरीरवाले अतुल पराक्रमी नानाप्रकार के अस्त्र शस्त्रों को धारण कियेहुए भयानक दैत्य युद्धकरने को आये ४५ तारकासुर की ध्वजा सुवर्ण से भूषित और महाभयंकर थी, ग्रसन दैत्य की मगरमच्छकी आकृतिवाली थी, जंभदैत्य की ध्वजा पिशाचरूप लोहेकी थी कुजंभकी ध्वजामें कटीहुई पूंछवालागधा था, शुंभदैत्यकी ध्वजामें कालेलोहेका ऊंचाकाक होताभया, ४६ । ४८ और अन्य २ दैत्योंकी ध्वजाओंमें भी नानाप्रकार के आकार होतेभये और शीघ्रगामी सुवर्णकी मालाओं से युक्त सौ १०० सिंह ग्रसन दैत्यके रथमें जुड़तेभये उसीप्रकार सौ सिंहोंसे युक्त महादुर्जय रथमें जंभदैत्य बैठा कुजंभदैत्यके रथमें पिशाच और गधेजुड़े महिषासुरके रथमें ऊंटलगे, कुंजर दैत्यके रथमें घोड़े जोतेगये ४९ । ५१ मेघ दैत्यके रथमें भयंकर गैंड़ेजुते, कालनेमिके रथमें हाथीजुते, सौहाथके विस्तृत कालेघोड़ोंसे युक्त श्वेतचँवर और जालियों से शोभित दक्षिणदिशा में अनेक पुष्पोंकी मालाओं से युक्त रथमें सुन्दर अंगवाला मथनदैत्य हाथमें फांसीलेकर बैठा और किंकिणी जाली और मालाओंसे शोभित सुन्दर ऊंटपर जंभकदैत्य स्थितहोता भया शुंभदैत्य बहुतबड़े

वीरा नानावाहनगामिनः ५६ प्रचण्डचित्रकर्माणः कुण्डलोष्णीषभूषणाः । नानाविधोत्त
रासङ्गा नानामाल्यविभूषणाः ५७ नानासुगन्धिगन्धाढ्या नानावन्दिजनस्तुताः । नाना
वाद्यपरिष्पन्दाश्चाग्रेसरमहारथाः ५८ नानाशौर्यकथासक्तास्तस्मिन् सैन्येमहासुराः ।
तद्बलंदैत्यसिंहस्य भीमरूपंव्यजायत ५९ प्रमत्तचण्डमातङ्गतुरङ्गरथसंकुलम् । प्रत
स्थेऽमरयुद्धाय बहुपत्तिपताकिनम् ६० एतस्मिन्नन्तरेवायुर्देवदूतोऽम्बरालये । दृष्ट्वासदा
नवबलं जगामेन्द्रस्यशंसितुम् ६१ सगत्वातुसभांदिव्यां महेन्द्रस्यमहात्मनः । शशंस
मध्येदेवानां तत्कार्यसमुपस्थितम् ६२ तच्छ्रुत्वादेवराजस्तु निमीलितविलोचनः । बृह
स्पतिमुवाचेदं वाक्यंकालेमहाभुजः ६३ (इन्द्र उवाच) संप्राप्नोतिविमर्दोऽयं देवानांदा
नवैःसह । कार्यंकिमत्रतद्ब्रूहि नीत्युपायसमन्वितम् ६४ एतच्छ्रुत्वातुवचनं महेन्द्रस्य
गिरांपतिः । इत्युवाचमहाभागो बृहस्पतिरुदारधीः ६५ सामपूर्वास्मृतानीतिश्चतुरङ्गा
मपताकिनीम् । जिगीषतांसुरश्रेष्ठ ! स्थितिरेषासनातनी ६६ सामभेदस्तथादानं दण्ड
श्चाङ्गचतुष्टयम् । नीतौक्रमोद्देशकालंरिपुयोग्यक्रमादिदम् ६७ सामदैत्येषुनैवास्ति यत
स्तेलब्धसंश्रयाः । जातिधर्मेणवाभेद्यादानंप्राप्तश्रियेचकिम् ६८ एकोऽभ्युपायोदण्डोऽत्र
भवतायदिरोचते । दुर्जनेषुकृतंसाममहद्यातिचवन्ध्यताम् ६९ भयादितिव्यवस्यन्तिक्रूराः
साममहात्मनाम् । ऋजुतामार्य्यबुद्धित्वं दयानीतिव्यतिक्रमम् ७० मन्यन्तेदुर्जनानित्यं

श्वेत मेढ़ेकी सवारीपर वैठा इनके विशेष अनेक वाहनोंवाले महाशूरवीर असंख्य दानव आये ५२।५६
महाविचित्रकर्मी कुंडल वेष्टनीधारे अनेक प्रकारके दुपट्टोंसे शोभित अनेक सुगन्धित मालाओंसे भू-
षित वन्दीजनों से स्तुति कियेहुए उन दैत्यों के आगेवड़े उत्तमवाजे वजतेभये वहसव महाअसुर और
अनेक शूरवीरों की कथाओं में आसक्तहुए दैत्यों की सेना महाभयंकररूप होतीभयी ५७ । ५८ रथ
हाथी घोड़े और ध्वजाओंसे समाकुल वह दैत्योंकी सेना देवताओं से युद्धकरने को तैयारहोती भयी
६० इसके अनन्तर आकाशमें विचरनेवाला देवताओंका दूतरूप वायु दैत्योंकी सेनाको देखकर इन्द्र
से कहनेके लिये जाताभया ६१ और इन्द्रकी दिव्यसभामें पहुंचकर प्राप्तहुए देवताओं के कार्यको
कहताभया ६२ इसबातको इन्द्र सुनकर बृहस्पतिजी से यह वचन बोला ६३ हे गुरूजी अव देव-
ताओं का दैत्योंके साथ मरनेका काल प्राप्त होगयाहै सो हमको अव क्या करना योग्यहै आप नीति
पूर्वक उपायको कहिये ६४ इन्द्रके इसवचन को सुनकर महाउदार बुद्धिवाले बृहस्पतिजी यह
वचन बोलतेभये ६५ कि हे सुरश्रेष्ठ चारों अंगों में साम अर्थात् समझाकर मेलकरने की नीति
श्रेष्ठहै यह विजय करनेवालों की सनातनी स्थिति है ६६ साम, दाम, दंड और भेद यह चारोंअंग
नीतिके हैं सो देशकाल और शत्रु इनके यथायोग्य क्रमके अनुसार वर्त्तने चाहिये ६७ दैत्यों के
सामनीति नहीं है इसी से जातिधर्म करके उनका भेद करना योग्य है और जिनको लक्ष्मी प्राप्त
होरहीहै उनको दानदेनेसे क्या लाभ है ६८ इसलिये जोआपकी सलाह होय तो उनका केवल
एकदण्ड देनेहीका उपायहै क्योंकि दुर्जनको जोसामनीति समझाताहै वहव्यर्थजाताहै ६९ महात्मा

सामचापिभयोदयात् । तस्माद् दुर्जनमाक्रान्तुं श्रेयान्पौरुषसंश्रयः ७१ आक्रान्तेतुक्रि
यायुक्ता सतामेतन्महाव्रतम् । दुर्जनःसुजनत्वाय कल्पतेनकदाचन ७२ सुजनोऽपिस्व
भावस्य त्यागंवाञ्छेत्कदाचन । एवंमेबुद्ध्यतेबुद्धिर्भवन्तोऽत्र व्यवस्यताम् ७३ एवमुक्तः
सहस्राक्षएवमेवेत्युवाचतम् । कर्त्तव्यतांससञ्चिन्त्य प्रोवाचामरसंसदि ७४ (इन्द्र उवाच)
सावधानेनमे वाचंशृणुध्वंनाकवासिनः ! । भवन्तोयज्ञभोक्तारस्तुष्टात्मानोऽतिसात्विकाः
७५ स्वेमहिम्निस्थितानित्यं जगतःपरिपालकाः । भवतश्चानिमित्तेन बाधन्तेदानवेश्व
राः ७६ तेषांसामादिनैवास्ति दण्डएवविधीयताम् । क्रियतांसमरोद्योगः सैन्यंसंयुज्यतां
मम ७७ आद्रियन्तांचशस्त्राणि पूज्यन्तामस्त्रदेवताः । वाहनानिचयानानि योजयन्तुसहाम
राः ७८ यमंसेनापतिंकृत्वा शीघ्रमेवंदिवौकसः ।इत्युक्ताःसमनह्यन्त देवानांयेप्रधानतः७९
वाजिनामयुतेनाजौ हेमघण्टापरिष्कृतम् । नानाश्चर्यगुणोपेतं संप्राप्तंसर्वदैवतैः ८० रथं
मातलिनाक्लृप्तं देवराजस्यदुर्जयम् । यमोमहिषमास्थायसेनाग्रेसमवर्त्तत ८१ चण्डकिङ्करवृ
न्देन सर्वतःपरिवारितः । कल्पकालोद्धतज्वालापूरिताम्बरलोचनः ८२ हुताशनश्छागरू
ढः शक्तिहस्तोव्यवस्थितः । पवनोऽङ्कुशपाणिस्तु विस्तारितमहाजवः ८३ भुजगेन्द्रसमा
रूढो जलेशोभगवान्स्वयम् । नरयुक्तरथेदेवो राक्षसेशोवियच्चरः ८४ तीक्ष्णखड्गयतोभीमः

पुरुष जब सामनीति करते हैं तब क्रूरपुरुष यह जानताहै कि यह हमसे भयमानकर हमको सम-
झाताहै सरलपुरुषों की बुद्धि तो समझाने से सुधरती है और क्रूरपुरुषों की विपरीत होती है ७०
दुर्जन पुरुष सदैव सामनीति को भयसे उत्पन्न हुई जानते हैं इसकारण दुर्जन के दबाने के नि-
मित्त पुरुषार्थही करना श्रेष्ठहै ७१ समझाने की क्रिया तो श्रेष्ठही पुरुषों के आगे करनी योग्य है
दुर्जन पुरुष कभी सज्जन पुरुष नहीं होताहै ७२ चाहे सुजन पुरुष किसी समय को पाकर अपने
स्वभाव के त्यागने की इच्छा कर भी लेताहै परन्तु दुर्जन कभी भी अपने स्वभाव के त्यागने की
इच्छा नहीं करता यह मेरामतहै तुम भी विचारलो यह सुनकर इन्द्र बहुतसा चिन्तवनकरके देव-
ताओं की सभामें यह वचन बोला ७३ । ७४ कि हे स्वर्गवासियो-तुम सावधान होकर मेरे वचन
को सुनो तुम यज्ञ भोक्ताहो आत्मामें प्रसन्न रहनेवाले और अति सात्विकीहो ७५ अपनी महिमा में
स्थित हुए तुम नित्यही जगत् की पालना करतेहो तुमको बिनाही कारणके दानव दुःख देतेहैं ७६
इन दैत्योंके सामआदिक नीति नहींहैं दंडही देना योग्यहै अब उपाय करना चाहिये और मेरी
सेनाको तैयार करो शस्त्रों का आदर करके अस्त्रोंके देवताओं का पूजन करना योग्यहै सब बाहनों
को सजो ७७ । ७८ और धर्मराजको सेनापति बनाकर बड़ी शीघ्रता से चलो यहसुनकर प्रधान २
देवता अपने २ कवचादिक पहरनेलगे सुवर्ण के घंटे आदिसे शोभित दशहज़ार घोड़ों से व्याप्त सेना
को रणभूमिमें निकासतेभये ७९ । ८० मातलि सारथी इन्द्रके रथको लाया उसमें इन्द्र सवार
हुआ धर्मराज भैंसेपर चढ़कर आगे चले ८१ और प्रचंड किंकरों के समूहों से युक्त प्रलय की अग्नि
के समान रक्तनेत्रवाला अग्नि बकरे की सवारी पर हाथ में शक्ति धारण किये हुए तैयार होता

महासिंहरवोदेवो धनाध्यक्षोगदायुधः ८५ चन्द्रादित्यावश्विनौच चतुर
समेरेसमवस्थितः। राजभिःसहितास्तस्थुर्गन्धर्वाहेमभूषणाः ८६ हेमपीठोत्तरासङ्गाश्चित्रवर्म
ध्वलान्वितौ। नाकपृष्ठशिखण्डास्तु वैदूर्य्यमकरध्वजाः ८७ जपारक्तोत्तरासङ्गा राक्षसारक्तमू
रथायुधाः। गृध्रध्वजामहावीर्या निर्मलायोविभूषणाः ८८ मुसलासिगदाहस्ता रथेचोष्णीषदं
र्ध्वजाः। महामेघरवानागा भीमोल्काशनिहेतयः ८९ यक्षाःकृष्णाम्बरभृतो भीमबाणधनु
शिताः। ताम्रोलूकध्वजारौद्रा हेमरत्नाविभूषणाः ९० द्वीपिचर्मोत्तरासंगं निशाचरबलंबभौ।
र्द्धराः। गार्धपत्रध्वजप्रायमस्थिभूषणभूषितम् ९१ मुसलायुधदुष्प्रेक्ष्यं नानाप्राणिमहारवम्। कि
न्नराःश्वेतवसनाः सितपत्रिपताकिनः ९२ मत्तेभवाहनप्रायास्तीक्ष्णतोमरहेतयः। मुक्ताजा
लपरिष्कारो हंसोरजतनिर्मितः ९३ केतुर्जलाधिनाथस्य भीमधूमध्वजानलः।पद्मरागमहा
रत्न विटपंधनदस्यतु ९४ ध्वजंसमुच्छ्रितंभाति गन्तुकाममिवाम्बरम्। वृकेणकाष्ठलोहे
न यमस्यासीन्महाध्वजः ९५ राक्षसेशस्यकेतौवै प्रेतस्यमुखमाबभौ। हेमसिंहध्वजौदेवौ
चन्द्रर्कावमितद्युती ९६ कुम्भेनरत्नचित्रेण केतुरश्विनयोरभूत्। हेममातंगरजितं चित्रर
त्नपरिष्कृतम् ९७ ध्वजंशतक्रतोरासीत् सितचामरमण्डितम्। सनागयक्षगन्धर्व महोर

भया वायु अपने महावेगका विस्तारकर अंकुश धारणकरके आया ८२।८३ सर्पकी सवारी पर वरुण
आये आकाशमें बिचरने वाला राक्षसों का अधिपति देव नरों से युक्त हुए रथपर खड्ग धारण कर-
के आता भया ८४ तीक्ष्ण खड्ग और गदाधारी महासिंहके समान शब्द वाला कुबेरआया ८५
चन्द्रमा सूर्य्य और अश्विनीकुमार यह सब चतुरंगिणीसेना समेत आये और सुवर्ण से विभूषित सुग-
न्धित अंगवाले गन्धर्व राजा लोगों में युक्त होकर आये ८६ सुवर्णासन डुपट्टा बिचित्र कवच रथ शस्त्र
वैदूर्य्यमणि और मत्स्यादिकों की ध्वजा इन सब लक्षणों वाले देवता युद्ध में आते भये ८७ लाल
वस्त्र वाले खुले हुए रक्तकेशों से युक्त गृध्र की ध्वजा वाले महापराक्रमी लोहे के आभूषणवाले
राक्षस आते भये ८८ मूसल, खड्ग. और गदा हाथोंमें लिये वागरी कवचधारी रथमें बैठे हुए महा
मेघ के समान शब्द वाले भयंकर नाग आते भये ८९ काले वस्त्रों को पहरे भयंकर धनुष बाणधारी
ताम्र के उल्लू की ध्वजा वाले महाभयंकर हेमरत्नों से विभूपित यक्ष आवते भये ९० गेंडे कें चर्म
वस्त्र धारी गृद्धपक्ष की ध्वजा हस्तियों के विभूषणधारी राक्षस और भूत प्रेतादिक आवते भये ९१
मुसलधारी अनेक प्राणियों के समान शब्दवाले श्वेत वस्त्र युक्त श्वेत ध्वजाधारी किन्नर आते
भये ९२ और सब किन्नर लोग मदोन्मत्त हाथियों पर चढ़कर पैने २ खड्ग धरेहुए शोभितहुए
९३ मोतियों की जालियोंसे युक्त चाँदी का हंस वरुणने अपनी ध्वजा पर लगाया अग्नि की ध्वजा
पर भयंकर धूमलगा पद्मक आदि महारत्नोंसे शोभित वृक्ष कुबेरकी ध्वजा पर लगा ९४
धर्मराजकी ध्वजा काष्ठ और लोहेके भेडियोंकी बनाई गयी ९५ राक्षसेश केतुकी ध्वजामें प्रेतका
मुख लगरहाथा, चन्द्रमा और सूर्य्य इनदोनोंकी ध्वजाओंमें सुवर्णका सिंह लगरहाथा ९६ अश्विनी-
कुमारोंकी ध्वजा रत्नोंके विचित्र कलशोंसे युक्त होती भयी सुवर्णके हाथी से युक्त विचित्र रत्नों से

गनिशाचरा ९८ सेनासादेवराजस्य दुर्जयाभुवनत्रये। कोटयस्तास्त्रयस्त्रिंशद्देवेदेवनिका
यिनाम् ९९ हिमाचलाभेसितकर्णचामरे सुवर्णपद्मामलसुन्दरस्राजि। कृताभिरागोज्ज्वल
कुंकुमांकुरे कपोललीलालिकदम्बसंकुले १०० स्थितस्तदैरावतनामकुञ्जरे महाबलश्चि
त्रविभूषणाम्बरः। विशालवस्त्रांशुवितानभूषितः प्रकीर्णकेयूरभुजाग्रमण्डलः। सहस्रदृक्
बान्दिसहस्रसंस्तुतास्त्रिविष्टपेऽशोभतपाकशासनः १०१ तुरंगमातंगबलौघसंकुलासितात
पत्रध्वजराजिशालिनी।चमूश्चसादुर्जयपत्रिसन्तता विभातिनानायुधयोधदुस्तरा १०२॥

इति श्रीमत्स्यपुराणेतारकोपाख्यानेसप्तचत्वारिंशदधिकशततमोऽध्यायः १४७॥

(सूतउवाच)सुरासुराणांसम्मर्दस्तस्मिन्नत्यन्तदारुणे। तुमुलोऽतिमहानासीत् सेनयो
रुभयोरपि १ गर्जतांदेवदैत्यानां शङ्खभेरीरवेणच। तूर्याणाञ्चैवनिर्घोषैर्मातङ्गानाञ्चबृंहितैः २
ह्रेषतांहयवृन्दानां रथनेमिस्वनेनच। ज्याक्षेपेणचशूराणान्तुमुलोऽतिमहानभूत् ३ समा
साद्योभयेसेने परस्परजयैषिणाम्। रोषेणातिपरीतानान्त्यक्तजीवितचेतसाम् ४ समासा
द्यतुतेऽन्योन्यं प्रक्रमेणाविलोमतः। रथेनासक्तपादातो रथेनचतुरंगमः ५ हस्तीपदाति
संयुक्तो रथिनाचक्वचिद्रथी। मातंगेनापरोहस्ती तुरंगैर्बहुभिर्गजः ६ पदातिरेकोबहुभिर्ग
जैर्मत्तैश्चयुज्यते। ततःप्रासाशनिगदा भिन्दिपालपरश्वधैः ७ शक्तिभिःपट्टिशैःशूलैर्मुद्गरैः
कडपैर्गडैः। चक्रैश्चशंकुभिश्चैव तोमरैरंकुशैःशितैः ८ कर्णिकालीकनाराच वत्सदन्तार्द्ध

शोभित श्वेत चंवरसे मंडित हुई ध्वजा इन्द्रकी होतीभयी ९७।९८ नाग, यक्ष, गन्धर्व, महोरग और
निशाचर इन्होंसे युक्त हुई देवताओं की सेना त्रिलोकी में दुर्जय होकर तेंतीस कोटि होती भयी ९९
हिमाचल पर्व्वतके समान श्वेत श्वेत चंवर सुवर्ण मालासे शोभित कपोलोंपर केशर रोली आदि
से चिह्नित क्रीड़ा करते हुए भ्रमरोंसे युक्त ऐसे ऐरावत नामहाथी पर विराजमान महाबली विचित्र
वस्त्रालंकारों से विभूषित बाजूबन्दों वाले भुजोंसे शोभित वन्दीजनों से स्तुतिमान सहस्राक्ष इन्द्र
स्वर्गमें शोभित होताभया १००।१०१ घोड़े हाथियों के बलसे युक्त श्वेतचंवर और ध्वजा आदिकों
की पंक्तिमें शोभित और अनेक शस्त्रोंसे दुस्तर ऐसी देवताओंकी सेना प्रकाशित होतीभयी १०२॥

इतिश्रीमत्स्यपुराणभाषाटीकायांतारकोपाख्यानेसप्तचत्वारिंशदधिकशततमोऽध्यायः १४७॥

सूतजी बोले कि उस अत्यन्त दारुण रणमें देवता और असुरोंकी सेनाओं का महादारुण शब्द
होता भया १ देवता और दैत्य दोनों शंखभेरी आदिके शब्दोंसे गर्जना करते भये मदोन्मत्त हाथियों
की चिघाड़ोंके घोड़ोंकी हिनहिनाटके रथों के चक्रों के और धनुषकी प्रत्यंचा के शब्द इनसब शब्दों
करके शूरवीरोंका महातुमुल घोष होताभया २।३ दोनों सेनाओंमें परस्पर जीतने की इच्छा वाले
जीवनको त्यागे हुए क्रोध युक्त देवता और दैत्य आपसमें विलोम युद्ध करते भये रथके साथ प्यादे
आसक्त होगये और रथीसे घोड़े वाले लड़ने लगे कहीं हाथी के साथ प्यादे हुए कहीं रथीके साथ
रथीही होताभया कहीं हाथीके साथ दूसरी सेनाका हाथीही बहुतसे घोड़ोंसे लड़ने लगा ४।६ कहीं
एक प्यादाही बहुत से मदोन्मत्त हाथियों से युद्ध करने लगा फिर वज्र, गदा, गोफियायंत्र, फरसा

चन्द्रकैः। भल्लैश्चंशतपत्रैश्च शुकतुण्डैश्चनिर्म्मलैः ९ वृष्टिरत्यद्भुताकारा गगनेसमदृश्यत। संप्रच्छाद्यदिशःसर्वास्तमोमयमिवाकरोत् १० नप्राज्ञायतते ऽन्योऽन्यं तस्मिंस्तमसिसंकुले। अलक्ष्यंविसृजन्तस्ते हेतिसङ्घातमुद्धतम् ११ पतितंसेनयोर्मध्ये निरीक्षन्तेपरस्परम्। ततोध्वजैर्भुजैश्छत्रैः शिरोभिश्चसकुण्डलैः १२ गजैस्तुरंगैःपादातैः पतद्भिःपतितैरपि। आकाशसरसोभ्रष्टैः पङ्कजैरिवभूस्तृता १३ भग्नदन्ताभिन्नकुम्भाश्छिन्नदीर्घमहाकराः। गजाःशैलनिभाःपेतुर्धरण्यांरुधिरस्रवाः १४ भग्नेषादण्डचक्राक्षा रथाश्चशकलीकृताः। पेतुःशकलतांयातास्तुरङ्गाश्चसहस्रशः १५ ततोऽसृक्ह्रदद्दुस्तारा पृथिवीसमजायत। नद्यश्चरुधिरावर्ता हर्षदाःपिशिताशिनाम् १६ वेतालाक्रीड़मभवत्तत्संकुलरणाजिरम् १७ ॥ इति श्रीमत्स्यपुराणेतारकासुरोपाख्यानेदेवासुरयुद्धेअष्टचत्वारिंशदधिकशततमोऽध्यायः १४८॥

(सूत उवाच) अथग्रसनमालोक्य यमःक्रोधविमूर्च्छितः। ववर्षशरवर्षेण विशेषेणाग्निवर्चसाम् १ सविद्धोबहुभिर्बाणैर्ग्रसनोऽतिपराक्रमः। कृतप्रतिकृताकाङ्क्षी धनुरानम्य भैरवम् २ शतैःपञ्चभिरत्युग्रैः शराणांयममर्दयन्। सविचिन्त्ययमोबाणान् ग्रसनस्यातिपौरुषम् ३ बाणवृष्टिभिरुग्राभिर्यमोग्रसनमर्दयन्। कृतान्तशरवृष्टिन्तां वियतिप्रतिसर्पिणीम् ४ चिच्छेदशरवर्षेण ग्रसनोदानवेश्वरः। विफलांतांसमालोक्य यमस्तांशरसन्नतिम् ५ सविचिन्त्यशरव्रातं ग्रसनस्यरथंप्रति। चिक्षेपमुद्गरंघोरन्तरसातस्यचान्तकः ६ स

बरछी, पट्टिश, शस्त्र,शूल, मुद्‌गर,चक्र, शंकु,तोमर और तीक्ष्णअंकुश खड्ग खांड़े छुरीभाले, शतपत्र शस्त्र और शुकतुंड इन शस्त्रोंकी अत्यन्त वर्षासी आकाशमें होने लगी सबदिशा अन्धकारके समान आच्छादित होने लगीं ७।१० उसे युद्धका ऐसा अन्धकार हुआ कि कोई आपसमें पहिचाना नहीं गया दोनों सेनाओंमें शस्त्रही शस्त्र दीखने लगे ११ उनदोनों सेनाओंमें कटीहुई ध्वजाछत्र शिर हाथी घोड़े और प्यादे यह सब गिरतेभये उस समय ऐसीशोभाहोगई मानों आकाश रूपी सरोवरोंमें से गिरेहुए कमलोंकरके पृथ्वी विस्तृत होरही है १२।१३ कटेदांत टूटे मस्तकों वाले महाउन्नतहाथी रुधिर गिरते हुएही पर्व्वतोंके समान गिरतेभये १४ और चक्र, धुरी, दंड और जूआ आदिक टूटने से रथोंके खण्ड२ होगये हजारों घोड़े गिरपड़े उनके भी टुकड़े२ होगये १५ तब पृथ्वीपर स्थान २ पर रुधिर भरगया और उन सब रुधिरों से रुधिरकी नदी बहनिकली मांसभक्षी जीवोंको बड़ाहर्ष होताभया तब उस रणमें वैताल भूतादिक क्रीड़ा करते भये १६।१७॥ इतिश्रीमत्स्यपुराण भाषाटीकायांतारकासुरोपाख्यानेदेवासुरयुद्धेअष्टचत्वारिंशदधिकशततमोऽध्यायः १४८॥

सूतजी कहते हैं कि इसके अनन्तर क्रोधसे मूर्च्छित हुआ धर्मराज ग्रसन दैत्यको देखकर उसके ऊपर बाणोंकी बर्षा करने लगा १ तव वहुत से बाणों से भिदा हुआ ग्रसन दैत्य अपना बदलालेने के निमित्त धनुषको ग्रहणकर अत्यन्त उग्रपांच बाणों करके धर्मराजको बांध लेताभया तब धर्मराज भी ग्रसन दैत्यके अत्यन्त पराक्रमको जान कर उग्रबाणोंकी बर्षा करके तिस दैत्यको पीड़ा देनेलगा

तंमुद्गरमायान्त मुत्प्लुत्यगगनास्थितम्। जग्राहवामहस्तेन याम्यंदानवनन्दनः ७ तमेवमुद्गरंगृह्य यमस्यमहिषंरुषा।पातयामासवेगेन सपपातमहीतले ८ उत्प्लुत्याथयमस्तस्मान्महिषान्निष्पतिष्यतः।प्रासेनताड़यामास ग्रसनंवदनेदृढम्९ सतुप्रासप्रहारेण मूर्च्छितोन्यपतद्भुवि। ग्रसनंपतितंदृष्ट्वा जम्भोभीमपराक्रमः १० यमस्यभिन्दिपालेन प्रहारमकरोद्धृदि। यमस्तेनप्रहारेण सुस्रावरुधिरंमुखात् ११ कृतान्तमर्दितंदृष्ट्वा गदापाणिर्धनाधिपः। वृतोयक्षायुतशतैर्जम्भंप्रत्युद्ययौरुषा१२जम्भोरुषातमायान्तं दानवानीकसंवृतः। उवाचप्राज्ञोवाक्यन्तु यथास्निग्धेनभाषितम्१३ग्रसनीलब्धसंज्ञोऽथ यमस्यप्राहिणोद्गदाम्। मणिहेमपरिष्कारां गुर्वीमरिविमार्दिनीम् १४ तामप्रतर्क्यांसंप्रेक्ष्य गदांमहिषवाहनः। गदायाः प्रतिघातार्थं जगद्दलनभैरवम् १५ दण्डंमुमोचकोपेन ज्वालामालासमाकुलम्। सगदां वियतिप्राप्य ररासाम्बुधरोयथा १६ सङ्घट्टमभवत्ताभ्यां शैलाभ्यामिवदुःसहम्। ताभ्यां निष्पेषनिर्ह्रादजड़ीकृतदिगन्तरम् १७ जगद्व्याकुलतांयातं प्रलयागमशङ्कया। क्षणात्प्रशान्तनिह्रादं ज्वलदुल्कासमाचितम् १८ निष्पेषेणतयोर्भीम मभूद्गगनगोचरम्। निहत्याथगदांदण्डस्ततोग्रसनमूर्द्धनि १९ हत्वाश्रियमिवानर्थो दुर्वृत्तस्यापतद्दृढः। सतु

उससमय धर्मराजकी की हुई बाणोंकी बर्षाको ग्रसन दैत्य अपने बाणोंसे छेदन करता भया २।५ तब धर्मराज अपने बाणोंकी बर्षाको विफल हुआ जानकर ग्रसन दैत्यके रथके सन्मुख बड़े बलसे मुद्गरको फेंकते भये ६ उससमय आकाशमें आतेहुए मुद्गरको देखकर उसमुद्गरको वहदैत्य अपने बायें हाथसे पकड़ लेता भया ७ और उसी मुद्गरसे बड़े क्रोध पूर्व्वक धर्मराजके भैंसे को मारता भया तब वह भैंसा पृथ्वीपर गिरपड़ा ८ उससमय उसगिरते हुए भैंसे परसे धर्मराज कूदगये और ग्रसन दैत्यके शरीरमें भाला मारताभया ९ उसभालेके प्रहारसे वह ग्रसन दैत्य मूर्च्छित होकर पृथ्वी पर गिरपड़ा तबपड़ेहुए ग्रसन को देखकर भयंकर पराक्रमवाला जंभ दैत्य आया १० और आते ही धर्मराज के हृदय में गोफिया यंत्रसे प्रहार करताभया उसप्रहार के लगने से धर्मराज के मुखमेंसे रुधिर निकलने लगा ११ उस समय पीड़ित हुए धर्मराजको देखकर दशहजार यक्षों समेत कुबेर हाथमें गदा लेकर आये और क्रोधकरके जंभ दैत्यके सन्मुख दौड़तेभये १२ तब दानवोंकी सेना समेत जंभ दैत्यभी क्रोधसे आताभया और कुबेरको देखकर यद्वातद्वा बचन बोलताभया १३ और ग्रसन दैत्यकोभी चेतहोगया तबवह दैत्य मणि सुवर्णसे जटित महाभारी शत्रुओंकी मारनेवाली धर्मराजकी गदाको तोड़ताभया तबतो धर्मराजभी उसतोड़ीहुई गदाको देखकर दैत्यकी गदाको तोड़नेके लिये जगत्का दलनेवाला महाज्वलित अपना दण्ड बड़े क्रोधसे फेंकताभया १४।१६ वह दैत्य गदाको लेकर मेघके समान शब्द करनेलगा उन दोनोंका संग आकाश में ऐसा होताभया मानों दुस्सह दोपर्व्वत आपसमें भिड़ रहेहों उनके भिड़नेके शब्दोंसे दिशा औरआकाश बधिरहोगये १७ और प्रलय आनेकी शंकासे जगत् व्याकुल होगया क्षणमात्रमें उनके परस्पर संघर्षणसे अग्निसी निकली उस समय आकाश भयंकर होताभया इसके अनन्तर धर्मराजका दण्ड गदाको तोड़कर

तेनप्रहारेण दृष्ट्वासातिमिरादिशः २० पपातभूमौनिःसंज्ञो भूमिरेणुविभूषितः। ततोहाहारवोघोरः सेनयोरुभयोरभूत् २१ ततोमुहूर्त्तमात्रेण ग्रसनःप्राप्यचेतनाम्। अपश्यत्स्वान्तनुंध्वस्तां विलोलाभरणाम्बराम् २२ सचापिचिन्तयामास कृतेप्रतिकृतिक्रियाम्। मद्विधेवस्तुनिपुंसि प्रभोःपरिभवोदयात् २३ मय्याश्रितानिसैन्यानिर्जितेमयिविनाशिता। असम्भावितएवास्तु मनःस्वच्छन्दचेष्टितः २४ नतुव्यर्थेशतोद्घुष्ट सम्भावितधनोनरः। एवंसञ्चिन्त्यवेगेन समुत्तस्थौमहाबलः २५ मुद्गरंकालदण्डाभं गृहीत्वागिरिसन्निभः। समाग्रसनोघोरसङ्कल्पः सन्दष्टौष्ठपुटच्छदः २६ रथेनत्वरितोगच्छन्नाससादान्तकंरणे। सायमंयुद्धे ग्रसनोभ्राम्यमुद्गरम् २७ वेगेनमहतारौद्रञ्चिक्षेपयममूर्द्धनि। विलोक्यमुद्गरं दीप्तं यमःसम्भ्रान्तलोचनः २८ वञ्चयामासदुर्द्धर्षं मुद्गरंसमहाबलः। तस्मिन्नपसृतेदूरं ततस्तांनिचण्डानांभीमकर्मणाम् २९ याम्यानांकिङ्कराणान्तु सहस्रंनिष्पिपेषह। हतांदृष्ट्वा घोरांकिङ्करवाहिनीम् ३० अगमत्परमंक्षोभं नानाप्रहरणोद्यतः। ग्रसनस्तु समालोक्य तांकिङ्करमयींञ्चमूम् ३१ मेनेयमसहस्राणि सृष्टानियममायया। निग्राह्यग्रसनःसेनां विसृजन्नस्त्रवृष्टयः ३२ कल्पान्तघोरसङ्काशो बभूवक्रोधमूर्च्छितः। कांश्चिद्बिभेदशूलेन कांश्चिद्बाणैरजिह्मगैः ३३ कांश्चित्पिपेषगदया कांश्चमुद्गरवृष्टि

ग्रसन दैत्यके मस्तकमें लगताभया १८। १९ जैसेकि दुष्टपुरुषका अनर्थ लक्ष्मी को हरलेताहै उसी प्रकार वह दैत्यभी दंडसे हतहोगया अर्थात् उसदंडके प्रहारसे वहग्रसन दैत्य नेत्रोंसे अन्धासा होकर भूममें गिरपड़ा और पृथ्वीकी धूलिसे विभूषित होगया इसके अनन्तर दोनों सेनाओंमें हाहाकार शब्द मचगया २० । २१ जब ग्रसन दैत्यको चेतहुआ तब विध्वस्त हुए अपने शरीरको देखकर धर्मराजसे अपना बदला लेनेकी इच्छा करताभया और यहबचन बोलाकि मुझसरीखे पुरुषसे समर्थ पुरुषकाभी तिरस्कार होनाचाहिये २२। २३ जोमैं जीताजाऊंगा तोमेरे आधीन हुई सब सेनाकाभी नाश होजायगा और यहमेराशत्रु स्वच्छन्दहोकर विचरताहै यहअसंभावि नहीं है क्योंकि समर्थ पुरुष अपने उद्योगके व्यर्थ होजानेपरभी अपने उद्योगको नहीं छोड़ता है ऐसा चिन्तवन करके वहमहाबली दैत्य स्थितहोताभया २४। २५ कालदंड और पर्वतके समान दंडको ग्रहण करके घोरसंकल्प युक्त ओष्ठोंको चबाता ग्रसन दैत्य रथमें बैठ शीघ्रही रणमें आवताभया वहाँ आकर मुद्गर भ्रमाकर धर्मराजसे युद्ध करनेलगा २६। २७ और बड़े बेगसे उस भयंकर मुद्गरको धर्मराज के मस्तकपर फेंकताभया उसदीप्त हुए मुद्गरको देखकर संभ्रान्त नेत्रोंवाले धर्मराज वहाँसे दूरहोकर उस मुद्गर से शरीर को बचाते भये जवमुद्गरसे धर्मराज दूरहोगये तब प्रचंडकर्मी हजारों धर्मराजके दूतों का उसके प्रहार से चूर्ण होगया फिर उस अपनी सेनाको निहतहुई देखकर २८। ३० धर्मराज अनेक शस्त्रों को धारण करके परमक्रोधको करते भये और ग्रसन दैत्य उससेना को देखकर यह मानताभया कि यह सेना धर्मराजने अपनीमायासे रची है ऐसाजानके बाणोंकी वर्षा करनेलगा और प्रलयकाल के समुद्रके समान परमक्रोध से उग्ररूप होकर किसीको शूलसे और किसीको बाणों से

भिः। केचित्प्रासप्रहारैश्च दारुणैस्ताडितास्तदा ३४ अपरेबहुशस्तस्य ललम्बु र्बाहुम
ण्डले। शिलाभिरपरेजघ्नुर्द्रुमैरन्यैर्महोच्छ्रयैः ३५ तस्यापरेतुगात्रेषु दशनैरपिदंशयन्।
अपरेमुष्टिभिःपृष्ठं किङ्कराःप्रहरन्तिच ३६ अभिद्रुतस्तथाघोरैर्ग्रसनःक्रोधमूर्च्छितः।
उत्सृज्यगात्रंभूपृष्ठे निष्पिपेषसहस्रशः ३७ कांश्चिदुत्थायमुष्टीभिर्जघ्नेकिङ्करसंश्रयान्।
सतुकिङ्करयुद्धेन ग्रसनःश्रममाप्तवान् ३८ तमालोक्ययमःश्रान्तं निहताञ्चस्ववाहिनीम्।
आजगामसमुद्यम्य दण्डंमाहिषवाहनः ३९ ग्रसनस्तुसमायान्तमाजघ्नेगदयोरसि। अचि
न्तयित्वातत्कर्म्म ग्रसनस्यान्तकोऽरिहा ४० जघ्नेरथस्यमूर्द्धन्यान् व्याघ्रान्दण्डेनकोपनः।
सरथोदण्डमथितैर्व्याघ्रैरर्द्धैर्विकृष्यते ४१ संशयःपुरुषस्येव चित्तंदैत्यस्यतद्रथम्। समु
त्सृज्यरथंदैत्यः पदातिर्धरणींगतः ४२ यमंभुजाभ्यामादाय योधयामासदानवः। यमोऽपि
शस्त्राण्युत्सृज्य बाहुयुद्धेष्ववर्त्तत ४३ ग्रसनःकटिवस्त्रैस्तु यमंगृह्यबलोद्धतः। भ्रामयामा
सवेगेन प्रचित्तमिवसंभ्रमन् ४४ यमोऽपिकण्ठेऽवष्टभ्य दैत्यंबाहुयुगेनतु। वेगेनभ्रामया
मास समुत्कृष्यमहीतलात् ४५ ततोमुष्टिभिराजघ्नुरर्दयन्तौपरस्परम्। दैत्येन्द्रस्याति
कायत्वात्ततः श्रांतभुजोयमः ४६ स्कन्धेनिधायदैत्यस्य मुखंविश्रान्तिमैच्छत। तमालक्ष्य
ततोदैत्यः श्रान्तमन्तकमोजसा ४७ निष्पिपेषमहीपृष्ठे बहुशःपार्ष्णिपाणिभिः। यावद्य
मस्यवदनात् सुस्रावरुधिरंबहु ४८ निर्जीवितंयमंदृष्ट्वा ततःसन्त्यज्यदानवः। जयंप्राप्यो

वेधताभया ३१।३३ किसीको गदासे पीसा किसीको मुद्‌गरोंसे चूर्ण किया और कितनोंहीको अपने
दारुण भालेके प्रहारोंसे नाश करदिया ३४ कितनेही उसकी भुजासे और कितनेही शिलासे चूर्ण
हुए और कितनोंहीको वह वृक्षोंसे मारताभया ३५ उससमय बहुतसे दूत उसके शरीर को नोचते
और मुक्कोंसे मारते भये ३६ तब तो घोरदूतों से भगायाहुआ ग्रसन दैत्य क्रोधसे मूर्च्छित होके ह-
जारों दूतोंको अपने शरीरसे दूरकरके पृथ्वीमें गेरकर मसलता भया ३७ कितनोंको मुक्कोंसे भी मा-
रताभया इस प्रकारसे धर्मराज के दूतों से युद्धकरता हुआ दैत्य बहुतही श्रमित होगया ३८ तब थ-
कितहुए उसदैत्यको और हारीहुई अपनी सेनाको देखकर धर्मराज अपने भैंसेपर चढ़कर दंडधारण
करके संग्राममें आतेभये ३९ उससमय ग्रसन दैत्यने उनआतेहुए धर्मराजकी छातीमें एकगदामारी
तब धर्मराज उसके उसकर्मको साधारण मानकर अपने दंडसे उसकेरथमें जुतेहुए भेड़ियोंको मारते
भये फिर दंडसे पीड़ितहुए भेड़ियों से वह रथखैंचा न गया तब सन्देहसे युक्तहोकर वह दैत्य रथको
त्यागकर पैदलहोकर आया ४०।४२ और धर्मराजको अपनी भुजाओं से पकड़कर जब युद्धकरने
लगा तब धर्म्मराज भी शस्त्रोंको त्यागके बाहुयुद्ध करनेलगा ४३ उस समय वह ग्रसनदैत्य धर्मराज
की धोतीको पकड़कर बड़े वेगसे भ्रमाताभया और धर्मराज भी अपनी भुजाओं से दैत्यकी ग्रीवाको
कड़ा पकड़कर भ्रमाकर पृथ्वीमें पटकतेभये फिर वह दोनों परस्पर मुष्टिकाओं से युद्धकरनेलगे दैत्य
का शरीर बहुत बड़ाथा इसहेतुसे धर्मराज थकितहोगये ४४।४६ और दैत्यके कन्धोंपर हाथरखकर
दैत्यके मुखकी हारको देखताभया उस समय वह दैत्य धर्मराजको थकाहुआ जानके पृथ्वी में बहुत

द्धतंदैत्यो नादंमुक्त्वामहास्वनः ४९ स्वयंसैन्यंसमासाद्य तस्थौगिरिरिवाचलः। धनाधिपस्य
जम्भेन सायकैर्मर्मभेदिभिः ५० दिशोऽवरुद्धाःक्रुद्धेन सैन्यंचास्यनिकृन्तितम्। ततः
क्रोधपरीतस्तु धनेशोजम्भदानवम् ५१ हृदिविव्याधबाणानां सहस्रेणाग्निवर्चसाम्।
सारथिञ्चशतेनाजौ ध्वजंदशभिरेवच ५२ हस्तौचपञ्चसप्तत्या मार्गणैर्दशभिर्धनुः। मार्गणैर्
बर्हिपत्राङ्कैस्तैलधौतैरजिह्मगैः ५३ सिंहमेकेनतंतीक्ष्णैर्विव्याधदशभिःशरैः। जम्भस्तु
कर्मतद्दृष्ट्वा धनेशस्यातिदुष्करम् ५४ हृदिधैर्यंसमालम्ब्य किञ्चित्सन्त्रस्तमानसः।
जग्राहनिशितान्बाणान् शत्रुमर्मविभेदिनः ५५ आकर्णाकृष्टचापस्तु जम्भःक्रोधपरिप्लुतः।
विव्याधधनदंतीक्ष्णैः शरैर्वक्षसिदानवः ५६ सारथिंचास्यबाणेन दृढेनाभ्यहनद्धृदि।
चिच्छेदज्यामथैकेन तैलधौतेनदानवः ५७ ततस्तुनिशितैर्बाणैर्दारुणैर्मर्मभेदिभिः।
विव्याधोरसिवित्तेशं दशभिःक्रूरकर्म्मभिः ५८ मोहंपरमतोगच्छन् दृढविद्धोहिवित्तपः।
सक्षणाद्धैर्यमालम्ब्य धनुराकृष्यभैरवम् ५९ किरन्बाणसहस्राणि निशितानिधनाधिपः।
दिशःखंविदिशोभूमीरनीकान्यसुरस्यच ६० पूरयामासवेगेन सञ्छाद्यरविमण्डलम्।
जम्भोऽपिपरमेकैकं शरैर्बहुभिराहवे ६१ चिच्छेदलघुसन्धानो धनेशस्यातिपौरुषात्।
ततोधनेशःसंक्रुद्धो दानवेन्द्रस्यकर्म्मणा ६२ व्यधमत्तस्यसैन्यानि नानासायकवृष्टिभिः।
तद्दृष्ट्वादुष्कृतंकर्म्म धनाध्यक्षस्यदानवः ६३ गृहीत्वामुद्गरंभीममायसंहेमभूषितम्।

बार अपनी एड़ियोंसे मसलताभया तब धर्मराजके मुखसे बहुतसा रुधिर निकलनेलगा ४७।४८
तब वह दैत्य धर्मराजको मराहुआ जानकर छोड़देताभया और विजयको प्राप्तहोकर उच्चस्वरसे नाद
करतागया ४९ फिर अपनी सेनामें आके पर्व्वतके समान खड़ाहोगया क्रोधसे युक्तहुए जंभदैत्यने
कुबेरकी दशोंदिशाओंको रोकदिया और सेनाको मारगेरा फिर कुबेरने भी महाक्रोधयुक्त होकर जंभ
दैत्यके हृदयमें अग्निके समान दीप्तिमान् हज़ार बाणोंको मारा ५०।५२ पिछत्तर बाणोंसे ७५ उसके
हाथोंको काटा और बड़े तीक्ष्ण सीधे दशबाणों से धनुषको काटकर एक बाणसे उसके सिंहको वेधा
और वैसेही तीक्ष्ण दशबाणों से दैत्यको भी वेधनकिया कुबेरके इस दुष्कर्म को वह जंभदैत्य देखकर
हृदयमें धैर्य्य धारणकरके शत्रुके कर्मके भेदन करनेवाले तीक्ष्ण बाणोंको ग्रहणकरताभया ५३।५५
और क्रोधसे अपने धनुषको कानतकखैंचकर उन तीक्ष्ण बाणोंको कुबेरके हृदयमें मारताभया ५६
और एक दृढ बाणसे इसके प्रबलसारथीको मारताभया दूसरे बाणसे इसके धनुषकी प्रत्यंचा को
काटताभया ५७ फिर पैने महादारुण दश बाणों करके कुबेरकी छाती को बेधताभया ५८ तब
कुबेर क्षणभर मूर्च्छाको प्राप्तहोकर धैर्य्ययुक्त होकर धनुषको खैंचताभया ५९ और हज़ारों बाणों
को छोड़कर दैत्यकी सबदिशा आकाश भूमि और सब स्थानोंपर सेनाके लोगों पर बाणों की वर्षा
करताभया उन बाणोंकी वर्षासे सूर्य्यका मंडल छायगया तब जंभ दैत्यभी अपने बहुतसे बाणोंकर
के प्रत्येक बाणको काटताभया ६०।६१ अर्थात् कुबेरके बहुतसे पुरुषार्थ को थोड़ेही परिश्रमसे
काटतभया तब दैत्य के कर्मको देखकर कुबेर क्रोधकेद्वारा बाणोंकी वर्षाकरके जंभ दैत्यकी सेनाको

धनदानुचरान्यक्षान् निष्पिपेषसहस्रशः ६४ तेबध्यमानादैत्येन मुञ्चन्तोभैरवान्रवान्। रथंधनपतेःसर्वे परिवार्यव्यवस्थिताः ६५ दृष्ट्वातानर्दितान्देवःशूलंजग्राहदारुणम्। तेनदैत्यसहस्राणि सूदयामाससत्वरः ६६ क्षीयमाणेषुदैत्येषु दानवःक्रोधमूर्च्छितः। जग्राहपरशुंदैत्यो मर्दनंदैत्यविद्विषाम् ६७ सतेनासितधारेण धनभर्तुर्महारथम्। चिच्छेदतिलशोदैत्यो ह्याखुःस्निग्धमिवाम्बरम् ६८ पदातिरथवित्तेशो गदामादायभैरवीम्। महाहवविमर्देषु दृप्तशत्रुविनाशिनीम् ६९ अधृष्यांसर्वभूतानां बहुवर्षगणार्चिताम्। नाना चन्दनदिग्धाङ्गां दिव्यपुष्पविवासिताम् ७० निर्मलायोमयींगुर्वीममोघांहेमभूषणाम्। चिक्षेपमूर्ध्निसंक्रुद्धो जम्भस्यतुधनाधिपः ७१ आयान्तींतांसमालोक्य तडित्सङ्घातमण्डिताम्। दैत्योगदाभिघातार्थं शस्त्रवृष्टिंमुमोचह ७२ चक्राणिकोणपःप्रासान् भुशुण्डी पट्टिशानपि। हेमकेयूरनद्धाभ्यां बाहुभ्यांचण्डविक्रमः ७३ व्यर्थीकृत्यतुतान्सर्वा नायुधान् दैत्यवक्षसि। अस्फुरन्तीपपातोग्रामहोल्केवाद्रिकन्दरे ७४ गदयाभिहतोगाढं पपातरथकूबरे। स्रोतोभिश्चास्यरुधिरं सुस्रावगतचेतसः ७५ जम्भन्तुनिहतंमत्वा कुजम्भोभैरवस्वनः। धनाधिपस्यसंक्रुद्धो वाक्येनातीवकोपितः ७६ चक्रेबाणमयंजालं दिक्षुयक्षाधिपस्यतु। चिच्छेदबाणजालंतदर्द्धचन्द्रैःशितैस्ततः ७७ मुमोचशरवृष्टिन्तु तस्ययक्षाधि

उजाड़ताभया ऐसे कुबेरके दुष्कर्मको देखकर जंभ दैत्य सुवर्णसे विभूषित लोहेके मुद्गरको ग्रहणकर उसके द्वारा हज़ारों कुबेरके अनुचरों को चूर्ण करताभया ६२। ६४ तब दैत्यसे पीड़ितहुए कुबेर के अनुचर भयकरके कुबेरके रथके चारों ओरको खड़े होतेभये ६५ फिर पीड़ितहुए अनुचरों को देखकर कुबेर दारुण शूलको ग्रहणकर उस्से हज़ारों दैत्यों को मारताभया ६६ उन दानवोंकानाश देखकर क्रोधसे व्याकुल जंभ दैत्य फरसेको ग्रहण करताभया ६७ वह फरसा अपनी तीक्ष्णधारों से कुबेरके रथको ऐसे टुकड़े२ करताभया जैसे कि चिकनेवस्त्रको मूसा टुकड़े २ कर डालताहै ६८ तब पैदलहुआ कुबेरउस भयंकर अभिमान वाली शत्रुओं की मारने वाली भयानक गदाको संग्राम में ग्रहण करताभया ६९ जो किसी प्राणीसे न सहने के योग्य बहुत वर्षोंसे गंधाक्षत पुष्पों से पूजी हुई ७० अच्छे लोहेकी भारी अमोघ सुवर्ण से विभूषितथी ऐसी गदाको उठाकर कुबेर जंभ दैत्य के मस्तकमें मारताभया ७१ तब बिजलीके समान आतीहुई गदाको देखकर जंभदैत्य उसके निवारण करनेकेलिये इनशस्त्रों की वर्षा करताभया चक्र, बरछी भाला, भुशुंडी, अस्त्र, और पट्टिश इनसबको अपने सुवर्णके बाजूबन्दोंसे शोभित हुए हाथों से छोड़ताभया ७२। ७३ परन्तु इन अस्त्रशस्त्रों के रोकनेपर भी वह कुबेरकी गदा उनसब अस्त्रोंको व्यर्थकरके उस दैत्यके हृदयमें ऐसे लगती भयी जैसे कि पर्व्वतकी कन्दरामें बिजली गिरती हो ७४ गदाके लगनेसे यहदैत्य रथके जुए के समीप गिरपड़ा इसके मरतेही इसके मुखकान आदिसे बहुतसारुधिर निकलता भया इसप्रकार से मरेहुए जंभदैत्यको देखकर भयंकरशब्दवाला कुजंभदैत्य कुबेरपर अत्यन्त क्रोधकरताभया ७५।७६ और कुबेरकी सबदिशाओंमें बाणोंका जाल बाँधदिया तबकुबेर अपने २ तीक्ष्ण अर्द्ध चन्द्रोंकरके उ-

पोवली । सतंदैत्यःशरव्रातं चिच्छेदनिशितैःशरैः ७८ व्यर्थीकृतान्तुतांदृष्ट्वा शरवृष्टिंध
नाधिपः । शक्तिंजग्राहदुर्द्धर्षां हेमघण्टाट्टहासिनीम् ७९ बाहुनारत्नकेयूर कान्तिसन्तान
हासिना । सतांनिरूप्यवेगेन कुजम्भायमुमोचह ८० सकुजम्भस्यहृदयं दारयामासदारु
णा।वित्तेशःस्वल्पसत्वस्य पुरुषस्यातिभाविता८१ अथास्यहृदयंभित्त्वा जगामधरणीतल
म्। ततोमुहूर्त्तादस्वस्थो दानवोदारुणाकृतिः ८२ जग्राहपट्टिशंदैत्यः प्रांशुंशितशिलीमु
खम् । सतेनपट्टिशेनाजौ धनदस्यस्तनान्तरम् ८३ वाक्येनतीक्ष्णरूपेण मर्मान्तरविस
र्पिणा । निर्बिभेदाभिजातस्य हृदयंदुर्जनोयथा ८४ तेनपट्टिशघातेन धनेशःपरिमूर्च्छितः।
निपपातरथोपस्थे जर्जरोधूर्वहोयथा ८५ तथागतन्तुतंदृष्ट्वा धनेशंनरवाहनम् । खड्गास्त्रो
निर्ऋतिर्देवो निशाचरबलानुगः ८६ अभिदुद्राववेगेन कुजम्भंभीमविक्रमम् । अथदृष्ट्वा
तुदुर्द्धर्षं कुजम्भोराक्षसेश्वरम् ८७ चोदयामाससैन्यानि राक्षसेन्द्रबधंप्रति। सदृष्ट्वाचोदि
तांसेनां भल्लनानास्त्रभीषणाम् ८८ रथादाप्लुत्यवेगेन भूषणद्युतिभास्वरः । खड्गेनकम
लानीव विकोशेनाम्बरत्विषा ८९ चिच्छेदरिपुवक्त्राणि विचित्राणिसमन्ततः । तिर्यक्पृ
ष्ठमधश्चोर्ध्वं दीर्घबाहुर्महासिना ९० सन्दष्टौष्ठपुटाटोपभ्रूकुटीविकटाननः । प्रचण्डको
परक्ताक्षो न्यकृन्तद्दानवान्रणे ९१ ततोनिःशेषितप्रायां विलोक्यस्वामनीकिनीम् । मुक्त्वा
कुजम्भोधनदं राक्षसेन्द्रमभिद्रवत् ९२ लब्धसंज्ञोऽथजम्भस्तु धनाध्यक्षपदानुगान् । जी
वग्राहान्सजग्राह बध्वापाशैःसहस्रशः ९३ मूर्तिमन्तितुरत्नानि विविधानिचदानवाः। वा

सके बाणजालको काटताभया ७७ और उस दैत्यपर बड़े तीक्ष्ण बाणोंकी वर्षा करताभया तबवह
कुजंभ दैत्य अपने बाणोंसे कुबेरके बाणोंको काटताभया ७८ जबबाण व्यर्थ होगये तब सुवर्णके घंटों
से शोभितहुई अपनी शक्तिको ग्रहण करताभया ७९ और अपने स्वर्णभूषणोंसे शोभितहुई भुजाओंसे
उस शक्तिको बड़ेबेगसे कुजंभके ऊपर छोड़ताभया ८० इस प्रकारसे छोड़ीहुई शक्तिके द्वारा कुबेर
कुजंभ दैत्यके हृदयको फाड़ता भया और वह शक्ति हृदयको फाड़कर पृथ्वीमें गिरपड़ी फिर दोघड़ीमें
वहदानव चैतन्य होकर तक्षिण और ऊंची बरछीसे कुबेरके हृदयको ऐसे बेधता भया जैसेकि दुर्जन
पुरुष वचनों करके हृदयको वेधदेताहै ८१ । ८४ उस बरछीके घातसे कुबेर मूर्च्छित होकर रथ
के जुएके पास ऐसे गिरपड़ा जैसेकि बूढ़ा बैल गिरपड़ाहो ८५ इस प्रकारसे गिरेहुए कुबेरको देखकर
निशाचरोंके बलसे युक्तहुआ राक्षसोंका स्वामी हाथमें खड्ग लेकर आया और कुजंभ दैत्यके सन्मुख
दौड़ा उस समय उस दुर्धर्ष राक्षसको देखकर कुजंभ दैत्य अपनी सेनाको उसके साथ लड़नेकेलि
ये प्रेरताभया तब अनेकप्रकारके शस्त्रोंवाली सेनाको देखकर वह राक्षस रथसे नीचेउतर हाथमें खड्ग
लेकर सब दैत्योंके शिरोंको काटता भया और क्रोधसे ओष्ठोंको चबाताहुआ दीर्घभुजा विकराल
मुख और प्रचंड कोपयुक्त वहराक्षस रणमें उसखड्गसे दानवोंको काटताभया ८६ । ९१ उससमय
जंभदैत्य थोड़ीसी बाकी रही अपनी सेनाको देखके कुबेरको छोड़ उसराक्षसके सन्मुख भाजताभया
९२ इसके अनन्तर कुजंभदैत्य को भी चेष्टा होगई तब वह दैत्य सेनाके हज़ारों पुरुषोंको फांसी में

हनानिचदिव्यानि विमानानिसहस्रशः ९४ धनेशोलब्धसंज्ञोऽथ तामवस्थांविलोक्यतु।
निश्वसन्दीर्घमुष्णञ्च रोषात्ताम्रविलोचनः ९५ ध्यात्वास्त्रंगारुडन्दिव्यं बाणंसन्धाय
कार्मुके। मुमोचदानवानीके तंबाणंशत्रुदारणम् ९६ प्रथमङ्कार्मुकात्तस्य निश्चेरुर्धूमरा
जयः। अनन्तरंस्फुलिङ्गानां कोटयोदीप्तवर्चसाम् ९७ ततोज्वालाकुलंव्योम चकारास्त्रं
संमन्ततः। ततःक्रमेणदुर्वारं नानारूपंतदाभवत् ९८ अमूर्तश्चाभवल्लोको ह्यन्धकार
समावृतः। ततोऽन्तरिक्षेशंसान्ति तेजस्तेतुपरिष्कृतम् ९९ कुजम्भस्तत्समालोच्य दान
वोऽतिपराक्रमः। अभिदुद्राववेगेन पदातिर्धनदंनदन् १०० अथाभिमुखमायान्तं दैत्यं
दृष्ट्वाधनाधिपः। बभूवसंभ्रमाविष्टः पलायनपरायणः १०१ ततःपलायतस्तस्य मुकुटंर
त्नमण्डितम्। पपातभूतलेदीप्तं रविबिम्बमिवाम्बरात् १०२ शूराणामभिजातानां भर्तर्य
पसृतेरणात्। भर्तुःसंग्रामशिरसि युक्तन्तद्भूषणाग्रतः १०३ इतिव्यवस्यदुर्द्धर्षा नानाश
स्त्रास्त्रपाणयः। युयुत्सवःस्थितायक्षा मुकुटंपरिवार्यतम् १०४ अभिमानधनावीरा धनद
स्यपदानुगाः। तानमर्षाच्चसंप्रेक्ष्य दानवाश्चण्डपौरुषाः १०५ भुशुण्डींभैरवाकारां गृही
त्वाशैलगौरवाम्। रक्षिणोमुकुटस्याथ निष्पिपेषनिशाचरान् १०६ तान्प्रमथ्याथदनुजो
मुकुटन्तत्स्वकेरथे। समारोप्यामररिपुर्जित्वाधनदमाहवे १०७ धनानिरत्नानिचमूर्तिम
न्ति तथानिधानानिशरीरिणश्च। आदायसर्वाणिजगामदैत्यो जम्भःस्वसैन्यन्दनुजेन्द्र
सिंहः। धनाधिपोवैविनिकीर्णमूर्धजो जगामदीनःसुरभर्तुरन्तिकम् १०८ कुजम्भनाथसं

बांधकर उनके दिव्य २ रत्न हज़ारों विमान और वाहनादिकों को हरलेता भया, फिर कुबेरको भी
चेष्टाहुई तब जंभदैत्य के कर्मको देख ऊर्ध्वश्वासले क्रोधसे रक्तनेत्रकर दिव्य गारुड़ास्त्रका ध्यानकर
बाणको धनुषपर चढ़ाकर दानवोंकी सेनामें छोड़ताभया ९३।९६ उस बाणमें से एक धुएंकी रेखा
निकली फिर किरोड़ों अग्निके पतंगे निकले ९७ इसके पीछे वह अस्त्रचारोंओर आकाशको व्याप्त
करता भया तबवह क्रम २ से दुर्जयअस्त्र होगया और सबदैत्य अन्धकारसे अन्धे हो २ कर मरतेभये
उसके तेजको आकाशके प्राणी सब सराहते भये ९८।९९ इसकर्म को कुजंभदैत्य देखकर पैदलही
कुबेरके सन्मुख शब्द करताहुआ भागकर आया १०० फिर दैत्यको सन्मुख आताहुआ देखकर कुबेर
भाजता भया १०१ उससमय भाजतेहुए कुबेरका रत्नोंसे जटितमुकुट पृथ्वीपर ऐसेगिरा मानों आकाश
से सूर्यही गिरपड़ाहो १०२ शूरवीरोंका स्वामी जबरणसे भागजाताहै तबस्वामीका आभूषणही पति
होताहै ऐसा निश्चय करके दुर्धर्ष यक्ष लोग अनेक प्रकारके शस्त्रोंको धारण करके मुकुटके चारों ओर
खड़ेहोगये १०३।१०४ कुबेरके अनुचर यक्षोंके अभिमानका धनथा ऐसेउनयक्षोंको देखकर अनेक दानव
भयंकर आकार वाली बरछी को ग्रहणकर उनके द्वारा मुकुटके समीपवर्ती खड़े हुए यक्षों को मारते
भये १०५।१०६ तिन यक्षों को मार मुकुटको अपने रथमें स्थापित कर कुबेर को जीत वह
प्रसन्न होताभया १०७ तब जंभदैत्य मरेहुए यक्षोंके धनों को ग्रहण करके अपनी सेना समेत
चलागया और कुबेर दीनरूप होकर खुले हुए बालोंसे इन्द्र के समीप जाताभया १०८ इसके अ-

सक्तो रजनीचरनन्दनः । मायाममोघामाश्रित्य तामसींराक्षसेश्वरः १०९ मोहयामासदै
त्येन्द्रं जगत्कृत्वातमोमयम् । ततोविफलनेत्राणि दानवानांबलानितु ११० नशेकुश्च
लितुन्तत्र पदादपिपदन्तदा । ततोनानास्त्रवर्षेण दानवानांमहाचमूम् १११ जघानघन
नीहार तिमिरातुरवाहनाम् । बध्यमानेषुदैत्येषु कुजम्भेमूढचेतसि ११२ महिषोदानवे
न्द्रस्तु कल्पान्ताम्भोदसन्निभः। अस्त्रञ्चकारसावित्र मुल्कासङ्घातमण्डितम् ११३ विजृ
म्भत्यथसावित्रे परमास्त्रेप्रतापिनि । प्रणाशमगमत्तीव्रं तमोघोरमनन्तरम् ११४ ततो
ऽस्त्रंविस्फुलिङ्गाङ्गं तमःकृत्स्नंव्यनाशयत् । प्रफुल्लारुणपद्माभं शरदीवामलंशरः ११५
ततस्तमसिसंभ्रान्ता दैत्येन्द्राःप्राप्तचक्षुषः । चक्रुःक्रूरेणमनसा देवानीकैःसहाद्भुतम् ११६
शस्त्रैरमर्षान्निर्मुक्तैर्भुजङ्गास्त्रंविनोदितम् । अथादायधनुर्घोरमिषूंश्चाशीविषोपमान् ११७
कुजम्भोऽधावतक्षिप्रंरक्षोराजबलम्प्रति । राक्षसेन्द्रस्तमायान्तं विलोक्यसपदानुगः ११८
विव्याधनिशितैर्बाणैःक्रूराशीविषभीषणैः । तदादानञ्चसन्धानं नमोक्षश्चापिलक्ष्यते ११९
चिच्छेदास्यशरव्रातान् स्वशरैरतिलाघवात् । ध्वजंपरमतीक्ष्णेन चित्रकर्मामरद्विषः १२०
सारथिञ्चास्यभल्लेन रथनीडादपातयात् । कुजम्भःकर्मतद्दृष्ट्वा राक्षसेन्द्रस्यसंयुगे १२१
रोषरक्तेक्षणयुतो रथादाप्लुत्यदानवः । खड्गंजग्राहवेगेन शरदम्बरनिर्मलम् १२२ चर्मचो
दयखण्डेन्दु दशकेनाविभूषितम् । अभ्यद्रवरणेदैत्यो रक्षोऽधिपतिमोजसा १२३ तंरक्षो

नन्तर राक्षसोंका स्वामी प्रधान राक्षस कुजंभ दैत्यके आगेतामसी माया रचताभया १०९ अर्थात् तमोमय
आकाश को करके कुजंभ दैत्य को मोहित करता भया और सब दानव अंधे होकर एकचरण
व्याहितसायकम् ७३ शतक्रतुरदीनात्मा दृढमाधत्तकार्मुकम् । बाणञ्चतैलधौताग्रमर्द्धचन्द्रमजिह्मगम् ७४ तेनास्यसशरञ्चापं रणेचिच्छेदवृत्रहा।क्षिप्रंसन्त्यज्यतच्चापंजम्भोदानवनन्दनः ७५ अन्यत्कार्मुकमादाय वेगवद्भारसाधनम्। शरांश्चाशीविषाकारांस्तैलधौतानजिह्मगान् ७६ शक्रंविव्याधदशभिर्जत्रुदेशेतुपत्रिभिः । हृदयेचत्रिभिश्चापि द्वाभ्यांचस्कन्धयोर्द्वयोः ७७ शक्रोऽपिदानवेन्द्राय बाणजालमपीदृशम्। अप्राप्तान्दानवेन्द्रस्तुशरान्शक्रभुजेरितान् ७८ चिच्छेददशधाकाशे शरैरग्निशिखोपमैः। ततस्तुशरजालेनदेवेन्द्रोदानवेश्वरम् ७९ आच्छादयतयत्नेन वर्षास्विवघनैर्नभः । दैत्योऽपिबाणजालन्तद्व्यधमत्सायकैःशितैः ८० यथावायुर्घनाटोपं परिवार्यदिशोमुखे।शक्रोऽथक्रोधसंरम्भान्नविशेषयतेयदा ८१ दानवेन्द्रंतदाचक्रे गन्धर्वास्त्रंमहाद्भुतम्। तदुत्थतेजसाव्याप्तमभूद्गगनगोचरम् ८२ गन्धर्वनगरैश्चापि नानाप्राकारतोरणैः। अश्वाद्भिरद्भुताकारैरस्त्रवृष्टिःसमन्ततः ८३ अथास्त्रवृष्ट्यादैत्यानां हन्यमानामहाचमूः । जम्भंशरणमागच्छदप्रमेयपराक्रमम् ८४ व्याकुलोऽपिस्वयंदैत्यः सहस्राक्षास्त्रपीडितः। स्मरन्साधुसमाचारं भीतत्राणपरोऽभवत् ८५ अथास्त्रंमौसलंनाम मुमोचदितिनन्दनः । ततोयोमुसलैःसर्वमभवत्पूरितंजगत् ८६ एकप्रहारकरणैरप्रधृष्यैःसमन्ततः। गन्धर्वनगरन्तेषु गन्धर्वास्त्रविनिर्मितान् ८७ गान्धर्वमस्त्रंसन्धाय सुरसैन्येषुचापरम्। एकैकेनप्रहारेण गजानश्वान्महारथान् ८८ रथा

स दैत्यको आताहुआ देखकर इन्द्रभी अपने धनुषको लेकर तीक्ष्ण बाणको चढ़ाताभया ७१ । ७४ और बाणकी वर्षा करके दैत्य के धनुषबाण को छेदन करता भया तब जंभ दैत्य उस धनुष को त्यागकर दूसरे धनुषको लेकर सर्पों के समान विषवाले बाणोंको छोड़ताभया ७५ । ७६ दशबाण इन्द्र के जोतों में मारे तीन हृदय में और दोबाणदोनों कन्धों पर मारे ७७ तबइन्द्र भी इसी प्रकार से दैत्य के ऊपर बाण छोड़ने लगा उस समय वह दैत्य इन्द्रके बाणों को आकाशही में अपने अग्निके समान तीक्ष्णबाणों से छेदन करताभया फिर इन्द्र भी अन्य बाणोंको छोड़कर ऐसे आच्छादन करता भया जैसे कि वर्षा ऋतुमें बादलों से आकाश आच्छादित होजाता है उस समय वह जंभ दैत्य इन्द्र के बाणों को ऐसे दूर करदेताभया जैसे कि बादलोंको वायु दूर करके छिन्न भिन्न करदेता है तब तो इन्द्रने क्रोधकरके कुछ विशेष माया रची ७८ । ८१ अर्थात् उस दैत्य के ऊपर गन्धर्व अस्त्र को छोड़ा उस अस्त्र के तेजसे सब आकाश व्याप्त होगया ८२ और उसी आकाश में गन्धर्वों के पुर रचे गये उनपुरों में से अस्त्रों की वर्षा होने लगी दैत्यों की सब सेनाका नाश होने लगा उससमय सबदैत्य जंभकी शरणमें जातेभये और जंभदैत्य भी इन्द्रके अस्त्रों से पीड़ित होकर उनदैत्यों के समाचार सुनके अत्यन्त भयभीत होताभया ८३ । ८५ इसके अनन्तर वह दैत्य भी मौसल अस्त्रको छोड़ताभया तब उसअस्त्रसे सब जगत् लोहे के मूसलों से व्याकुल होगया और एक २ प्रहारकरके उन गन्धर्व नगरोंका नाश करदेताभया इसकेपीछे वह दैत्य गन्धर्व अस्त्रका संधान करके देवताओं की सेनामें छोड़ताभया तबवह अस्त्र एक २ प्रहार करके हाथी घोड़े रथ और रथके घोड़े इन

स्त्रान्सोऽहनत्क्षिप्रं शतशोऽथसहस्रशः। ततःसुराधिपस्त्वाष्ट्रमस्त्रञ्चसमुदीरयत् ८९ स
न्धमानेस्ततस्त्वाष्ट्रे निश्चेरुःपावकार्चिषः। ततोयन्त्रमयान्दिव्यानायुधान्दुष्प्रधर्षिणः ९०
तैर्यन्त्रैरभवद्द्वन्द्वमन्तरिक्षेवितानकम्। वितानकेनतेनाथ प्रथमंमौसलेगते ९१ शैला
स्त्रंमुमुचेजम्भो यन्त्रसङ्घातताडनम्। व्यामप्रमाणैरुपलैस्ततोवर्षमवर्तत ९२ त्वाष्ट्रस्य
निर्मितान्यासु यन्त्राणितदनन्तरम्। तेनोपलनिपातेन गतानितिलशस्ततः ९३ यन्त्रा
णितिलशःकृत्वा शैलास्त्रंपरिमूर्धसु। निपपातातिवेगेनादारयत्पृथिवींततः ९४ ततो
वज्रास्त्रमकरोत् सहस्राक्षःपुरन्दरः। तदोपलमहाहर्षं व्यशीर्यतसमन्ततः ९५ ततःप्र
शान्तेशैलास्त्रे जम्भोभूधरसन्निभः। ऐषीकमस्त्रमकरोदभीतोऽतिपराक्रमः ९६ ऐषीकेना
गमन्नाशं वज्रास्त्रंशक्रवल्लभम्। विजृम्भत्यथचैषीके परमास्त्रेतिदुर्धरे ९७ जज्वलुर्देवसै
न्यानि सस्यन्दनगजानितु। दह्यमानेष्वनीकेषु तेजसासुरसत्तमः ९८ आग्नेयमस्त्रमक
रोद्बलवान्पाकशासनः। तेनास्त्रेणततस्त्वैन्द्रमग्रसत्तदनन्तरम् ९९ तस्मिन्प्रतिह
तेचास्त्रे पावकास्त्रंव्यजृम्भत। जज्वालकायंजम्भस्य सरथञ्चससारथिम् १०० ततःप्र
तिहतःसोथ दैत्येन्द्रःप्रतिभानवान्। वारुणास्त्रंमुमोचाथ शमनंपावकार्चिषाम् १०१ त
तोजलधरैर्व्योमस्फुरद्विद्युल्लताकुलैः। गम्भीरमुरजध्वानैरापूरितमिवाम्बरम् १०२
करीन्द्रकरतुल्याभिर्जलधाराभिरम्बरम्। पतन्तीभिर्जगत्सर्वं क्षणेनापूरितंबभौ १०३
शान्तमाग्नेयमस्त्रंतत् प्रविलोक्यसुराधिपः। वायव्यमस्त्रमकरोन्मेघसङ्घातनाशनम् १०४
सब हज़ारोंको शीघ्रही नष्टकरदेता भया फिर इन्द्रने त्वाष्ट्रनाम अस्त्रको छोड़ा ८६। ८९ जब कि
त्वाष्ट्र अस्त्रका संधान कियागया उसमें से अग्निके कण निकसतेभये उन अग्निकणों का और दैत्यके
दिव्यअस्त्रोंका आकाशमें युद्ध होताभया उस समय पहले मूसलों का नाशहोगया उस समय जंभ
दैत्य उनयन्त्रोंके संघातको ताड़ना देनेवाले अपने शैल अस्त्रको छोड़ता भया तब साढ़ेतीन २ हाथ
लंबे पाषाण बरसनेलगे ९०। ९२ इसके पीछे त्वाष्ट्र अस्त्रसे रचेहुए यन्त्रों का नाश उन पत्थरों
की वर्षा से होगया ९३ सब यन्त्रों के मस्तक पर गिरता हुआ शैल अस्त्र उन यन्त्रों का नाश करके
वेगसे पृथ्वी में गिरता भया ९४ इसके अनन्तर इन्द्रने अपने वज्रास्त्र को छोड़ा उस वज्रास्त्र से
चारों ओर को पत्थरों की वर्षा होनेलगी ९५ तब जंभ दैत्यका शैल अस्त्र नष्ट होगया इसके पीछे
जंभ दैत्यने ऐषीक अस्त्रको छोड़ा उस ऐषीक अस्त्र से इन्द्र के वज्रास्त्र का नाश होगया और
वह ऐषीक अस्त्र चारों ओर को फैलगया तब देवताओं की सेनामें रथ हाथी आदिक जलनेलगे और
सब सेना भी जलनेलगी उस समय इन्द्रने अपने तेजसे आग्नेय अस्त्र को छोड़ा वह अस्त्र जंभ
के अस्त्रको ग्रस लेताभया ९६। ९९ जब दैत्यका अस्त्र नष्ट होगया तब अग्निअस्त्र बढ़ता भया
उसने जंभ दैत्यका शरीर और रथसमेत सारथी भी जलनेलगा तब महादुःखित हुआ वह दैत्य
अग्निका शान्तकरनेवाला वारुणास्त्र छोड़ताभया १००। १०१ उससमय गर्जने और वर्षनेवाले
बड़े २ मेघआकाशमें आच्छादित होगये १०२ हाथी की सूंड़ों के समान गिरतीहुई जलधाराओं से

वायव्यास्त्रबलेनाथ निर्धूतेमेघमण्डले । बभूवविमलंव्योमनीलोत्पलदलप्रभम् १०५
वायुनाचातिघोरेण कम्पितास्तेतुदानवाः । नशेकुस्तत्रतेस्थातुं रणेऽतिबलिनोऽपिये
१०६तदाजम्भोऽभवच्छैलो दशयोजनविस्तृतः।मारुतप्रतिघातार्थं दानवानांभयापहः
१०७ मुक्तनानायुधोदग्रतेजोऽभिज्वलितद्रुमः । ततःप्रशमितेवायौ दैत्येन्द्रेपर्वताकृतौ
१०८ महाशनींवज्रमयीं मुमोचाशुशतक्रतुः । तयाशन्यापतितया दैत्यस्याचलरूपिणः
१०९ कन्दराणिव्यशीर्यन्त समन्तान्निर्भराणितु । ततःसादानवेन्द्रस्य शैलमायान्यवर्त
त ११० निवृत्तशैलमायोऽथ दानवेन्द्रोमदोत्कटः । बभूवकुञ्जरोभीमो महाशैलसमाकृ
तिः १११ सममर्दसुरानीकं दन्तैश्चाप्यहनत्सुरान् । बभञ्जपृष्ठतःकांश्चित्करेणावेष्ट्य
दानवः ११२ ततःक्षपयतस्तस्य सुरसैन्यानिवृत्रहा । अस्त्रंत्रैलोक्यदुर्धर्षं नारसिंहंमुमो
चह ११३ ततःसिंहसहस्राणि निश्चेरुर्मन्त्रतेजसः । कृष्णदंष्ट्राट्टहासानि क्रकचाभन
खानिच ११४ तैर्विपादितगात्रोऽसौ गजमायांव्यपोथयत् । ततश्चाशीविषोघोरोऽभव
त्फणशताकुलः ११५ विषनिश्वासनिर्दग्धं सुरसैन्यंमहारथः । ततोऽस्त्रंगारुडंचक्रेशक्र
श्चारुभुजस्तदा ११६ ततोगरुत्मतस्तस्मात् सहस्राणिविनिर्ययुः । तैर्गरुत्मभिरासा

सबजगत् क्षणमात्र में जलसे पूरितहोगया १०३ तब इन्द्र अग्निअस्त्रको अस्तहुआ जानकर वायव्य
अस्त्रको छोड़ताभया उसवायु अस्त्रसे सब मेघउड़गये और नीलकमलके समान आकाश
स्वच्छहोगया उससमयके अतिघोर वायुके वेगसे कंपायमानहुए दानव रणमें खड़े होनेकोभी समर्थ
नहींरहे १०४ । १०६ उससमय जंभदैत्य वायुके रोकनेके निमित्त अपने शरीरको दशयोजन का
पर्व्वत बनाताभया १०७ और उसशरीरमें अनेकप्रकारके शस्त्र उज्ज्वलवृक्षों के समान शोभित होते
भये इसप्रकारसे इन्द्रका वायव्यअस्त्रभी शान्तहोगया इसके पीछे इन्द्रने अपने विद्युत् अस्त्रको छोड़ा
उसविद्युत् अस्त्रसे दैत्यके पर्व्वतरूपी शरीरका नाशहोगया पर्वतकी कन्दरा और झिरने आदिक सब
नष्टहोगये और सब पर्व्वतरूपी मायाभी नष्टहोगई १०८ । ११० जब पर्व्वतकी सब माया नष्ट
होगई उससमय वहदैत्य मदोन्मत्त हाथी के स्वरूपको धारण करताभया उसहाथिकाभी बड़ेभारी
पर्व्वतकेही समान आकार होताभया १११ और अपने दाँतों से देवताओं की सेनाको मारताभया
किसीको पीठसे दाबता और किसीको सूंड़से लपेटकर मारताथा मरतीहुई अपनी सेनाको देखकर
इन्द्र त्रिलोकीमें दुर्धर्ष नारसिंह अस्त्रको छोड़ताभया उसअस्त्रमेंसे मन्त्रकेद्वारा कालीडाढ़ीवालेअट्टहासयुक्त
भयंकर नखोंवाले हज़ारोंसिंह निकलतेभये ११२।११४उन सिंहों ने दैत्योंके देहों को फाड़ा
जब सिंहोंसे सबके शरीर फटनेलगे तब वह दैत्य हस्तीकी मायाको दूर करताभया और सेकडोंफणों
से युक्त बड़ाभारी घोर सर्पबन जाताभया अपने विषभरी श्वासोंसे देवताओं की सेनाको दग्धकरने
लगा तब इन्द्रने गरुड़ास्त्रको छोड़ा उस गरुड़ास्त्र से हज़ारों गरुड़ निकलकर सर्परूपवाले जंभ
दैत्य के शरीर पर जालगे ११५ । ११६ और जंभदैत्यके शरीरके खण्ड २ करडाले तब जंभकी
वह मायाभी नष्टहोगई इसके पीछे जंभदैत्यने चन्द्रमा सूर्य्यके मार्गके समान अपने शरीरकोबढ़ाय।

ग्रजम्भंभुजगरूपिणम् ११७ कृतन्तुखण्डशोदैत्यं सास्यमायाव्यनश्यत । प्रनष्टायान्तु
मायायां ततोजम्भोमहासुरः ११८ चकाररूपमतुलं चन्द्रादित्यपथानुगम् । विवृत्तवद
नोग्रस्तु मियेषसुरपुङ्गवान् ११६ ततोऽस्यविविशुर्वक्त्रं समहारथकुञ्जराः । सुरसेनावि
शत्भीमं पातालोत्तानतालुकम् १२० सैन्येषुग्रस्यमानेषु दानवेनबलीयसा । शक्रोदैन्यं
समापन्नः श्रांतबाहुःसबाहनः १२१ कर्तव्यतांनाध्यगच्छत् प्रोवाचेदंजनार्दनम् । किम
नन्तरमत्रास्ति कर्तवस्यावशेषितम् १२२ यदाश्रित्यघटामोऽस्य दानवस्ययुयुत्सवः ।
ततोहरिरुवाचेदं वज्रायुधमुदारधीः १२३ नसाम्प्रतंरणस्त्याज्यस्त्वयाकातरभैरवः । व
र्द्धस्वाशुमहामायां पुरन्दर ! रिपुम्प्रति १२४ मयैषलक्षितोदैत्योऽधिष्ठितःप्राप्तपौरुषः ।
माशक्र ! मोहमागच्छ क्षिप्रमस्त्रंस्मरप्रभो १२५ ततःशक्रःप्रकुपितो दानवंप्रतिदेवराट् ।
नारायणास्त्रंप्रयतो मुमोचासुरवक्षसि १२६ एतस्मिन्नन्तरेदैत्यो विवृतास्योऽग्रसत्क्षणा
त् । त्रीणिलक्षाणिगन्धर्व किन्नरोरगराक्षसान् १२७ ततोनारायणास्त्रंतत् पपातासुरवक्ष
सि । महास्त्रभिन्नहृदयः सुस्त्रावरुधिरञ्चसः १२८ रणागारमिवोद्गारं तत्याजासुरनन्दनः ।
तदस्त्रतेजसातस्य रूपंदैत्यस्यनाशितम् १२६ ततएवान्तर्दधेदैत्यो वियत्यनुपलक्षितः ।
गगनस्थःसदैत्येन्द्रः शस्त्रासनमतीन्द्रियम् १३० मुमोचसुरसैन्यानां संहारेकारणम्परम् ।
प्रासान्परश्वधांश्चक्रान् बाणान्वज्रान्समुद्गरान् १३१ कुठारान्सहखड्गैश्च भिन्दिपा
लानयोगुडान् । ववर्षदानवोरौद्रो ह्यवन्ध्यानक्षयानपि १३२ तैरस्त्रैर्दानवैर्मुक्तैर्देवानीकेषु

और बड़ाभारी मुखफाड़कर देवताओं के निगलजानेकी इच्छाकरी और देखताभीभया उसके देखने
केही समय हाथियोंवाले महारथियों समेत देवताओंकी सब सेना उसके मुखमें समागई ११७।१२०
इसप्रकार से जंभदानवने देवताओंकी सबसेना ग्रसलीनी तब इन्द्रकेभुज और सब बाहनभी थकित
होगये और महादीन रूपहोकर कुछभी करसकने को समर्थ न होकर इन्द्र विष्णुके प्रति कहनेलगा
कि हे देवदेव अबक्या करनायोग्यहै जो करना उचित होय वह मुझ से कहिये यह सुनकर इन्द्रसे
विष्णु भगवान् यह वचनबोले १२१।१२२ कि हेइन्द्र अब तुमको युद्ध त्यागना योग्यनहीं है और
शीघ्रही महामायाको बढ़ाओ मैंने इसदैत्यको देखलिया है इसने अपना पुरुषार्थ बढ़ा रक्खा है तुम
अज्ञानको प्राप्तमतहो शीघ्रही अस्त्रका स्मरण करो १२३।१२५ यह सुनतेही इन्द्रस्वस्थचित्तहोकर
जंभदैत्यकी छाती में नारायणास्त्रको छोड़ताभया १२६ इतनेही अन्तरमेंजंभदैत्य मुखफाड़कर तीन
लाख गन्धर्वों को ग्रस लेताभया तदनन्तर जंभदैत्यकी छाती में इन्द्र का छोड़ाहुआ नारायणास्त्र
लगा तबतो उसकी छाती टूटगई और रुधिर निकलनेलगा १२७।१२८ उस समय रण में
डकारलेकर उसने सब देवताओंको उगलदिया और अस्त्रके तेजसे दैत्यकारूप भी नष्टहोगया १२९
इसके पीछे वहदैत्य आकाशमें अन्तर्द्धान होकर देवताओंकी सेनामें शस्त्रोंकी वर्षा करनेलगा अर्थात्
भाले, कुल्हाड़े, चक्र, बाण, वज्र, मुद्गर, कुठार, खड्ग, गोफियायंत्र, और लोहे के मूसल इनसब
अनन्तगुणवाले अस्त्र शस्त्रों को वह दानव अलक्षित होकर वर्षाने लगा १३०।१३२ उन भयं-

भीषणैः । बाहुभिर्द्धरणिःपूर्णा शिरोभिश्चसकुण्डलैः १३३ ऊरुभिर्गजहस्ताभैः करीन्द्रै
र्वाचलोपमैः । भग्नेषादण्डचक्राक्षैरथैःसारथिभिःसह १३४ दुःसञ्चाराभवत्पृथ्वी मांस
शोणितकर्दमा । रुधिरौघह्रदावर्ता शवराशिशिलोच्चयैः १३५ कबन्धनृत्यसंकुले स्रवद्व
सास्रकर्दमे । जगत्त्रयोपसंहृतौ समेसमस्तदेहिनाम् १३६ शृगालगृध्रवायसाः परंप्रमो
दमादधुः । क्वचिद्विकृष्टलोचनः शवस्यरौतिवायसः १३७ विकृष्टपीवरान्त्रकाः प्रयान्ति
जम्बुकाःक्वचित् । क्वचित्स्थितोऽतिभीषणः स्वतुण्डनिहितौरसः १३८ मृतस्यमांसमा
दाय श्वजातयश्चसंस्थिताः । क्वचिद्वृकोगजासृजम्पपौनिर्लीयतान्त्रतः १३९ क्वचि
त्तुरङ्गमण्डलीर्विकृष्यतेश्वजातिभिः । क्वचित्पिशाचजातकैः प्रपीतशोणितासवैः १४०
स्वकामिनीयुतैर्द्रुतं प्रमोदमत्तसम्भ्रमैः । ममैतदानयाननं खुरोयमस्तुमेप्रियः १४१ करो
ऽयमब्जसन्निभो ममास्तुकर्णपूरकः । सरोषमीक्षतेपरावपां विनाप्रियंतदा १४२ पराप्रि
याह्यवापयत् धृतोष्णशोणितासवम् । विकृष्यशावचर्म तत्प्रबद्धसान्द्रपल्लवम् १४३ च
कारयक्षकामिनीतरुं कुठारपाटितम् । गजस्यदन्तमासृजंप्रगृह्यकुम्भसम्पुटम् १४४विपा
ट्यमौक्तिकंपरं प्रियाप्रसादमिच्छते । समांसशोणितासवं पपुश्चयक्षराक्षसाः १४५ मृता
श्चकेशवासितं रसंप्रगृह्यपाणिना । प्रियाविमुक्तजीवितं समानयासृगासवम् १४६ नप
श्यतांप्रयातिमे गतंश्मशानगोचरम् । नरस्यतज्जहात्यसौ प्रशस्यकिन्नराननम् १४७

कर अस्त्रशस्त्रोंके गिरने से देवताओंके भुजदंड और कुंडलों समेत शिर कट२ कर गिरने लगे और
भुजाशिर आदिसे पृथ्वी पूरित होगई १३३ इसके विशेष बड़े२ पर्व्वतके समान आकारवाले हाथी
गिरतेभये १३४ पृथ्वी पर मांस और रुधिरकी कीचहोगई और रुधिर समूहसे ऐसे तड़ागादिक
होकर भरगये जिनपर मृतकोंकी शिलासी बनगई थी कितनेही कटेहुए शिर वाले योद्धाओं के रुंड
इधर उधर दौड़नेलगे इस प्रकारसे वह महाभयानक युद्ध होताभया उस रणमूभि में कोई नहीं
ठहरसका १३५।१३६ शृगाल काक और गिद्ध यह सबजीव परमानन्दको प्राप्तहुए कहीं मरेहुए
मुरदेके नेत्रोंको निकालता हुआ काकस्वरसे शब्द करताभया १३७ कहीं मरेहुए योद्धाओंकी आंतों
को शृगाल काटते भये कहीं गिद्ध अपनी चोंचसे मांसखातेथे १३८ भेड़िये आदिक जीव मृतकों
के मांस खैंचकर खातेथे और कहीं हाथियोंकी आंतोंमें घुसके रुधिर पीतेथे १३९ यही मांसाहारी
जीव कहीं घोड़ोंको भक्षण करते कहीं पिशाच रुधिरको पीते और कहीं मदोन्मत्त राक्षस अपनी २
स्त्रियों समेत दौड़दौड़कर कहतेथे कि यह पशुकामुख और पदमुझको प्रिय है उसकी स्त्री कहतीथी
कि यह कमलके समान भुज मुझको कर्णफूल भूषणके समान प्रिय लगताहै कोई राक्षसकी स्त्री अपने
पतिको तृषासे कोपयुक्त देखकर मरेहुए योद्धाओंके चर्म्म मांससे गरम २ रुधिर निकासकर पिलाती
थी १४०।१४३कोई राक्षसकी स्त्री मरेहुए योद्धाको कुल्हाड़े से वृक्षके समान चीरती थी कोई यक्षहाथीके
चर्म्मको उखाड़कर मस्तकके रुधिर समेत मोतीको अपनी स्त्रीके अर्थ देताभया इसी प्रकारसे यक्ष
राक्षस अपनी २ स्त्रियों समेत मृतकोंके मांस और रुधिरको खाते और पीतेथे १४४।१४५ कोई २

सनागएषनोभयं दधातिमुक्तजीवितः। तदानतस्यशक्यते मयातदेकयाननम् १४८ इ
तिप्रियायवल्लभा वदन्तियक्षयोषितः। परेकपालपाणयः पिशाचयक्षराक्षसाः १४९ व
दन्तिदेहिमेमम ममातिभक्ष्यचारिणः । परेऽवतीर्यशोणितापगासुधौतमूर्तयः १५०
पितॄन्प्रतर्प्यदेवताःसमर्चयन्तिचामिषैः। गजोडुपेसुसंस्थितास्तरन्तिशोणितंह्रदम् १५१
इतिप्रगाढसङ्कटे सुरासुरेसुसङ्गरे। भयंसमुज्झ्यदुर्जया भटाःस्फुटन्तिमानिनः १५२ त
तःशक्रोधनेशश्च वरुणःपवनोऽनलः । यमोऽपिनिर्ऋतिश्चापि दिव्यास्त्राणिमहाबलाः
१५३ आकाशेमुमुचुःसर्वे दानवानभिसन्ध्यते । अस्त्राणिव्यर्थतांजग्मुर्देवानांदानवान्
प्रति १५४ संरम्भेणाप्ययुद्ध्यन्त संहतास्तुमुलेनच। गतिंनाविविदुश्चापि श्रान्तादैत्य
स्यदेवताः १५५ दैत्यास्त्राभिन्नसर्वाङ्गा ह्यकिञ्चित्करताङ्गताः। परस्परंव्यलीयन्त गावःशी
तार्दिताइव १५६ तदवस्थान्हरिर्दृष्ट्वा देवान्शक्रमुवाचह। ब्रह्मास्त्रंस्मरदेवेन्द्र ! यस्या
बध्योनविद्यते। विष्णुनाचोदितःशक्रः सस्माराऽस्त्रंमहौजसम् १५७ संपूजितंनित्यमराति
नाशनं समाहितंबाणममित्रघातने । धनुष्यजय्येविनियोज्यबुद्धिमान् अभूत्ततोमन्त्रस
माधिमानसः १५८ समन्त्रमुच्चार्ययतान्तराशयो बधायदैत्यस्यधियाभिसन्ध्यतु। विकृ
ष्यकर्णान्तमकुण्ठदीधितिं मुमोचवीक्ष्याम्बरमार्गमुन्मुखः १५९ अथासुरःप्रेक्ष्यमहास्त्रमा
हितं विहायमायामवनौव्यतिष्ठत । प्रवेपमानेनमुखेनशुष्यता बलेनगात्रेणचसम्भ्रमाकु

राक्षस मृतक योद्धाओं के बालोंको हाथों से पकड़कर रुधिर समेत रसको अपनी २ स्त्रीको पिलाते थे
और राक्षसोंकी स्त्रियांभी अपनेपतियोंसे कहतीथीं कि श्मशानमें गयेहुए मृतकका रुधिर हमकोगुणकारी
नहीं है यह मरा हुआ हाथीहम दोनोंको तृप्तकरदेगा क्योंकि इसकेएकमस्त कहीको मैंअकेली नहींभ-
क्षणकरसक्ती १४६।१४८ इसप्रकारसे यक्षोंकी स्त्रियां अपने२ पतियोंसे कहतीथीं कितनेही पिशाच
यक्ष और राक्षस हाथोंमेंकपाल धारणकरके यहशब्द कहतेथे कि हमको भक्षणकेलिये कुछदो कितनेही
राक्षस रुधिरकीनदीमें घुसगये १४९।१५० और उसनदीके रुधिरोंसे पितरोंको और मांससे देवता-
ओंको तृप्तकरतेथे कोई राक्षस हाथीरूपी नौकापर चढ़ेहुए रुधिरके तड़ागका स्मरणकरते थे १५१
जब ऐसे प्रकारका भयानकयुद्ध होनेलगा तब अभिमानी योद्धानिर्भय होकर युद्धमें प्रवृत्तहोते भये
१५२ इसके अनन्तर इन्द्र,कुबेर,वरुण,वायु,अग्नि,धर्मराज,और राक्षस यहसब महादिव्य अस्त्रोंको
छोड़तेभये वहसब देवतादिकों के अस्त्र आकाशमें जाकर व्यर्थहोजाते भये किसी देवतानेभी उस
जंभ दैत्यकी गतिकोनहीं जाना १५३।१५५ दैत्यके अस्त्रों से देवताओं के सबअंग टूटने लगे तब
परस्परमें ऐसे छुप जातेभये जैसेकि शीतसे पीड़ितहुईगौऐं आपसमें दबकजाती हैं १५६ ऐसीअव-
स्थाको देखकर विष्णुभगवान् इन्द्रसे बोलेकि हे इन्द्र ब्रह्मास्त्रका स्मरण करो वह अस्त्र अवध्यहै
विष्णुके इस वचन को सुनकर इन्द्र उस अस्त्रको स्मरणकर शत्रुओं के नाशके निमित्त पूजनकर
मन्त्रके उच्चारण पूर्वक बाणमें युक्त करताभया १५७।१५८ और कानपर्य्यन्त बाणको खैंचकर ऊर्ध्व
मुख से आकाश मार्गको देखताहुआ शत्रुके नाशका ध्यान करके अस्त्रको छोड़ताभया १५९ वह

ततस्तुतस्यास्त्रवराभिमन्त्रितः शरोऽर्द्धचन्द्रप्रतिमोमहारणे । पुरन्दरस्यास
लः १६० ततस्तुतस्यास्त्रवराभिमन्त्रितः शरोऽर्द्धचन्द्रप्रतिमोमहारणे
नबन्धुताङ्गतो नवार्कबिम्बंवपुषाविडम्बयन् १६१ किरीटकोटिस्फुटकान्तिसङ्कटंसुगन्धि
नानाकुसुमाधिवासितम् । प्रकीर्णधूमज्वलनाभमूर्द्धजं पपातजम्भस्यशिरःसकुण्डलम्
१६२ तस्मिन्विनिहतेजम्भे दानवेन्द्राःपराङ्मुखाः । ततस्तेभग्नसंकल्पाःप्रययुर्यत्रता
रकः १६३ तांस्तुत्रस्तान्समालोक्य श्रुत्वाशेषमगात्परम् । सजम्भदानवेन्द्रन्तु सुरैरण
मुखेहतम् १६४ सावलेपंससंरम्भं सगर्वंसपराक्रमम् । साविष्कारमनाकारंतारकोभाव
माविशत् १६५ सजैत्रंरथमास्थाय सहस्रेणगरुत्मताम् । सकोपाद्दानवेन्द्राणां सुरैरणमु
खेगतः १६६ सर्वायुधपरिष्कारःसर्वास्त्रपरिरक्षितः । त्रैलोक्यऋद्धिसंपन्नःसुविस्तृतमहा
ननः१६७रणायाभ्यपतत्तूर्णं सैन्येनमहतावृतः । जम्भास्त्रक्षतसर्वाङ्गंत्यक्तैरावतदन्तिनम्
१६८सज्जंमातलिनागुप्तं रथमिन्द्रस्यतेजसा।तप्तहेमपरिष्कारंमहारत्नसमन्वितम् १६९
चतुर्योजनविस्तीर्णं सिद्धसङ्घपरिष्कृतम् । गन्धर्वकिन्नरोद्गीतमप्सरोनृत्यसंकुलम् १७०
सर्वायुधमसम्बाधं विचित्ररचनोज्ज्वलम् । तंरथंदेवराजस्य परिवार्यसमन्ततः१७१दंशि
तालोकपालास्तुतस्थुः सगरुडध्वजाः । ततश्चचालवसुधा ततोरूक्षोमरुद्ववौ १७२ त
तोऽम्बुधयउद्भूतास्ततो नष्टारविप्रभा । ततस्तमःसमुद्भूतं नातोऽदृश्यन्ततारकाः १७३
ततोजज्वलुरस्त्राणि ततोऽकम्पतवाहिनी । एकतस्तारकोदैत्यःसुरसङ्घास्तुचैकतः १७४

दैत्य उस छोड़ेहुए अस्त्रको देख अपनी मायाकोत्याग कंपायमान शरीरसे दुःखितहोकर बैठगया
१६० इसके अनन्तर इन्द्रके उस अस्त्रका स्वरूप अर्द्धचन्द्रमाके समान लाल आकारवाला होगया
फिर मुकुटसे शोभित अनेकगन्धियोंसे सुगन्धित खिलेहुए बालों समेत कुंडलोंसे सुशोभित जंभका
शिरपृथ्वीमें गिरपड़ा १६१।१६२ जब जंभ दैत्यमारा गया तब सब दैत्य पराङ्मुख होकर भागगये
और तारकासुरके पासपहुंचे १६३ उससमय उनभगेहुए दैत्योंको आताहुआ देख और देवताओं के
युद्धमें मरेहुए जंभ दैत्यको सुनकर तारकासुर अत्यन्तक्रोधकरताभया १६४ औरसाभिमानहो महा-
पराक्रमी तारकासुर अपनेअभिप्रायको कहताहुआ १६५ महाक्रोधयुक्तहोकर जैत्रनामरथ परचढ़ ह-
ज़ारोंपक्षियोंसे संयुक्तहो देवदानवोंके युद्धमें प्राप्तहोताभया १६६ अर्थात् सबशस्त्रोंसे युक्त अनेकअस्त्रों
से रक्षित त्रिलोकीकी सम्पत्तियोंसे सम्पन्न वड़ेविस्तृत मुखवाला वह तारकासुर बड़ी शीघ्रतापूर्वक
बहुतसी सेनासमेत रथमें चढ़ाहुआ युद्धभूमिमें पहुंचा वहाँ जंभ दैत्यके अस्त्रोंसे कटेहुए अंगवाले
इन्द्रकेऐरावत हार्थीको पीड़ादेताभया १६७।१६८ और इन्द्रके तेजसे युक्त मातलिसारथीसे रक्षित
महारत्नोंसे शोभित चारयोजन विस्तार वाले सिद्ध गन्धर्व और किन्नरादिकों से समाकुल इन्द्रके
रथको चारोंओरसे घेरलेताभया १६९।१७० तब विष्णु भगवान्से युक्तहुए सबलोकपाल धनुषबाण
आदिक शस्त्रोंको धारणकियेहुए युद्धमें आकरखड़ेहोतेभये उससमय पृथ्वीकंपायमानहुई कठोरवायु
चली मेघछागये सूर्य्यकी कान्ति क्षीणहोगई अन्धकारहोगया और तारागणभी प्रकाशितनहीं रहे
१७१।१७३ इसके पीछे अस्त्रोंका प्रकाशहोताभया देवताओंकी सेनाकांपनेलगी उससमय एक

लोकावसादमेकत्र जगत्पालनमेकतः । चराचराणिभूतानि सुरासुरविभेदतः १७५ तद्
द्विधाप्येकतांयातं ददृशुःप्रेक्षकाइव । यद्वस्तुकिञ्चिल्लोकेषु त्रिषुसत्तास्वरूपकम् । तत्त्वत्रा
दृश्यदखिलं खिलीभूतविभूतिकम् १७६ अस्त्राणितेजांसिधनानि धैर्य्यसेनाबलंवीर्य्यपरा
क्रमौच । सत्त्वौजसांतन्निकरंबभूव सुरासुराणांतपसोबलेन १७७ अथाभिमुखमायान्तं
नवभिर्नतपर्वभिः । बाणैरनलकल्पाग्रैर्बिभिदुस्तारकंहृदि १७८ सतानचिन्त्यदैत्येन्द्रः सु
रबाणान्गतान्हृदि । नवभिर्नवाभिर्बाणैःसुरान् विव्याधदानवः १७९ जगद्धरणसम्भूतैः
शल्यैरिवपुरःसरैः । ततश्छिन्नंशरव्रातं संग्राममेमुमुचुःसुराः १८० अनन्तरंचकान्तानाम
श्रुपातमिवानिशम् । तदप्राप्तंवियत्येव नाशयामासदानवः १८१ शरैर्यथाकुचरितै प्र
ख्यातंपरमागतम् । सुनिर्मलंक्रमायातंकुपुत्रःस्वंमहाकुलम् १८२ततोनिवार्यतद्बाणजालं
सुरभुजेरितम् । बाणैर्व्योमदिशःपृथ्वीं पूरयामासदानवः १८३ चिच्छेदपुङ्खदेशेषु स्वकैः
स्थानेचलाघवात् । बाणजालैःसुतीक्ष्णाग्रैःकङ्कबर्हिणवाजितैः १८४ कर्णान्तकृष्टैर्विमलैः
सुवर्णरजतोज्ज्वलैः । शास्त्रार्थैःसंशयप्राप्तान् यथार्थान्वैविकल्पितैः १८५ ततःशतेन
बाणानां शक्रंविव्याधदानवः । नारायणंचसप्तत्या नवत्याचहुताशनम् १८६ दशभिमा
रुतंमूर्ध्नि यमंदशभिरेवच । धनदञ्चैवसप्तत्यावरुणञ्चतथाष्टभिः १८७ विंशत्यानिर्ऋतिं
दैत्यःपुनश्चाष्टाभिरेवच । विव्याधपुनरेकैकं दशभिर्दशभिःशरैः १८८ तथाचमातलिं

ओरतोतारकासुरहुआ और दूसरीओरको सबदेवताओंकी सेनाहुई एकस्थानपर सबलोकोंका संहार
इकट्ठाहुआ एक जगहसबलोकोंकीपालना स्थितहुई देवता और दैत्योंके रूपभेदसे त्रिलोकी के सब
चराचरजीव सब पदार्थ और विभूतियों समेत स्थितहोतेभये १७४।१७६ अस्त्रोंकातेज धन, धैर्य्य,
सेनाकाबल,बीर्य्य,और पराक्रम इनसबोंका समूह इकट्ठाहोकर देवता और दैत्योंकी सेनामें प्राप्तहो-
ताभया १७७ इसके अनन्तर इन्द्रभी सन्मुख आतेभये उससमय इन्द्रने तारकासुरको देखकर
उसके हृदयमें अग्निके समान कान्ति वाले तीक्ष्ण २नौ ९ बाणमारे १७८ परन्तु उस दैत्यने
उन प्रहारोंको जराभीनमाना और एक २ देवताकोनौ २ बाणोंसे बेधताभया १७९ उस दैत्यके
बाण ऐसेछूटे जैसेकि जगत्के नाशकारी बाणछूटते हैं उसके पीछे देवतालोगभी अपने२ बाणोंको छो-
ड़तेभये उनसब बाणोंको वहदैत्य आकाशही में छेदनकरडालताथा १८०।१८१ देवताओंके बाणोंसे
आच्छादित हुआ आकाश तारकासुर दैत्यके बाणोंसे ऐसानिर्मल और स्वच्छ होगया जैसे कि कुपुत्र
अपने बड़े उत्तमकुलका नाशकरदेताहै १८२ देवताओं के बाणों को निवारण करके उस दैत्यने अ-
पने बाणों करके आकाश और दिशाओं को पूरित करदिया १८३ बाणों को बड़े उत्तम प्रकार से
धनुषपरचढ़ा उज्ज्वल कानोंतकखैंच २ कर देवताओं की सेनामें फेंकताथा सौ १०० बाण इन्द्रके
मारे सत्तर विष्णुके मारे नब्बे ९० अग्निके दश १० वायुके मस्तकपर आठ ८कुबेरके राक्षसके बीस
२०बाण मारकरभी फिर अठारह बाणमारे और शेषरहे सबदेवताओंके दश२ बाण मारताभया१८४।
१८८ इसके पीछे वह तारकासुर दैत्य तीनबाणोंसे इन्द्रके सारथीको घायलकरके दशबाण गरुड़ के

दैत्यो विव्याधत्रिभिराशुगैः। गरुडंदशभिश्चैव सविव्याधपतत्रिभिः १८९ पुनश्चदैत्यो देवानांतिलशोनतपर्वभिः। चकारवर्मजातानिचिच्छेदचधनूंषितु। ततोविकवचादेवाविधानुष्काशरैःकृताः १९० अथान्यानि चापानितस्मिन्सरोषारणेलोकपालागृहीत्वासमन्तात्। शरैरक्षयैर्दानवेन्द्रंततस्तु तदादानवोऽमर्षसंरक्तनेत्रः १९१ शरानग्निकल्पान्ववर्षामराणां ततोबाणमादायकल्पानलाभम्। जघानोरसिक्षिप्रमिन्द्रंसुबाहुं महेन्द्रोऽप्यकम्पद्रथोपस्थएव १९२ विलोक्यान्तरिक्षेसहस्रार्कबिम्बं पुनर्दानवोविष्णुमुद्भूतवीर्यम्। शराभ्यांजघानांसमूलेसलीलं ततःकेशवस्यापतच्छार्ङ्गमग्रे १९३ ततस्तारकःप्रेतनाथंपृषत्कैर्वसुंतस्यसव्येस्मरन्क्षुद्रभावम्। शरैरग्निकल्पैर्जलेशस्यकायं रणेशोषयद्दुर्जयोदैत्यराजः १९४ शरैरग्निकल्पैश्चकाराशुदैत्यस्तथाराक्षसान्भीतभीतान्दिशासु। पृषत्कैश्चरूक्षैर्विकारप्रयुक्तं चकारानिलंलीलयैवासुरेशः १९५ क्षणाल्लुब्धचित्ताःस्वयंविष्णुशक्रानलाद्याःसुसंहत्यतीक्ष्णैःपृषत्कैः। प्रचक्रुःप्रचण्डेनदैत्येनसार्द्धं महासङ्गरंसङ्गरग्रासकल्पम् १९६ अथानम्यचापंहरिस्तीक्ष्णबाणैर्हनत्सारथिंदैत्यराजस्यहृद्यम्। ध्वजंधूमकेतुःकिरीटंमहेन्द्रो धनेशोधनुःकाञ्चनानद्धपृष्ठम्। यमोवाहुदण्डंरथाङ्गानिवायुर्निशाचारिणामीश्वरश्चापिवर्म्म १९७ दृष्ट्वातद्युद्धममरैरकृत्रिमपराक्रमम्। दैत्यनाथःकृतंसंख्ये स्वबाहुयुगबान्धवः १९८ मुमोचमुद्गरंभीमं सहस्राक्षायसङ्गरे। दृष्ट्वामुद्गरमायान्तमनिवार्यमथाम्बरे १९९ रथादाप्लुत्यधरणीमगमत्पाकशासनः। मुद्गरोऽपिरथोप

मारताभया तबवह दैत्य अपने बाणोंसे देवताओंके तूणीर और धनुषों को तोड़ताभया फिर सबदेवता तूणीर और धनुषसे रहितहोगये यहदशा देखकर देवतालोग लोकपालों समेत महाक्रोधितहो अन्यधनुषोंको ग्रहणकर करके आये और दैत्यके ऊपर अनन्त बाणोंकी वर्षा करनेलगे उस समय वह दैत्य लाल२ नेत्रकर क्रोधसे देवताओंके बाणोंके ऊपर और इन्द्रकेऊपर अग्निकेसमान बाणोंकोछोड़ताभया जब उसकेबाण इन्द्रकी छातीमेंलगे तबइन्द्र रथपरही बैठाहुआ कांपनेलगा १८९।१९२ इसके पीछे वह तारकासुर हज़ारों सूर्य्य के समान कान्तियुक्त अतुल बलवाले विष्णु भगवान के कन्धोंके स्थानमें बाणोंको मारताभया तब विष्णुका धनुष गिरपड़ा फिर विष्णुके वामओर स्थित हुए राक्षसको और वरुणको अग्निके समान बाणोंसे प्रहारकरनेलगा तदनन्तर वह तारकासुर डरते हुए राक्षसको सबदिशाओंमें भ्रमण कराके अपने मायावी बाणोंसे अग्निदेवको भी पीड़ा देताभया १९३।१९५ फिर विष्णु इन्द्र और अग्नियह तीनोंक्षण भरहीमें चेतकर बड़े तीक्ष्णबाणोंसे युद्धकरने लगे १९६ इसके पीछे विष्णु भगवान् धनुषको ग्रहणकर तीक्ष्ण २ बाणोंसे तारकासुरके सारथीको मारतेभये,इन्द्र उसकी ध्वजाको काटकर मुकुटोंको तोड़ताभया,कुबेर धनुषको तोड़ताभया धर्मराजने उस दैत्यके भुजपर प्रहारकिया, वायुने रथके पहिये तोड़डाले राक्षसने उसके जुवेको तोड़ा १९७ वह तारकासुर दैत्य इसप्रकारके देवताओंके पराक्रमको देखकर युद्धमें भयंकर मुद्गरको इन्द्रके ऊपर फेंकताभया तब इन्द्र उसके फेंकेहुए मुद्गरको आकाशमें आताहुआ देखकर रथसेकूद पृथ्वी में खड़ा

रथे पपातपरुषस्वनः २०० सरथंचूर्णयामास नममारचमातलिः । गृहीत्वापट्टिशंदैत्यो
जघानोरसिकेशवम् २०१ स्कन्धेगरुत्मतःसोऽपि निषसादविचेतनः । खड्गेनराक्षसेन्द्र
श्च चक्र्तेनरवाहनम् २०२ यमञ्चपातयामास भूमौदैत्योभुशुण्डिना । वह्निञ्चभिन्दिपा
लेन ताडयामासमूर्द्धनि २०३ वायुञ्चदोर्भ्यामुत्क्षिप्य पातयामासभूतले । जलेशञ्चधनु
ष्कोट्या कुट्टयामासकोपनः २०४ ततोदेवनिकायानामेकैकंसमरेततः । जघानास्त्रैरसं
ख्येयैर्दैत्येन्द्रोऽमितविक्रमः २०५ लब्धसंज्ञःक्षणाद्विष्णुश्चक्रंजग्राहदुर्द्धरम् । दानवेन्द्र
वसासिक्तं पिशिताशनकोन्मुखम् २०६ मुमोचदानवेन्द्रस्य दृढंवक्षसिकेशवः । पपात
चक्रंदैत्यस्य हृदयेभास्करद्युति २०७ व्यशीर्यतततःकाये नीलोत्पलमिवाश्मनि ।
ततोवज्रंमहेन्द्रस्तु प्रमुमोचार्चितञ्चिरम् २०८ यस्मिन्जयाशाशक्रस्य दानवेन्द्ररणे
त्वभूत् । तारकस्यसुसंप्राप्य शरीरंशौर्यशालिनः २०९ व्यशीर्यताविकीर्णार्चिः शत
धाखण्डतातङ्गम् । विनाशमगमन्मुक्तं वायुनासुरवक्षसि २१० ज्वलितंज्वलनाभा
समंकुशंकुलिशंयथा । विनाशमागतंदृष्ट्वा वायुश्चांकुशमाहवे २११ रुष्टःशैलेन्द्रमु
त्पाट्य पुष्पितद्रुमकन्दरम् । चिक्षेपदानवेन्द्राय पञ्चयोजनविस्तृतम् २१२ महीध
रंतमायान्तं दैत्यःस्मितमुखस्तदा । जग्राहवामहस्तेन शैलंकन्दुकलीलया २१३ ततो
दण्डंसमुद्यम्य कृतान्तःक्रोधमूर्च्छितः । दैत्येन्द्रंमूर्ध्निचिक्षेप भ्राम्यवेगेनदुर्जयः २१४
सोऽसुरस्यापतन्मूर्ध्नि दैत्यस्तञ्चनबुद्धवान् । कल्पान्तदहनालोक्यामजय्यांज्वलनस्त
होगया और वहमुद्गर रथपरपड़ा उसके गिरतेही रथकाचूर्णहोगया परन्तु इन्द्रका मातलिसारथी न-
हींमरा इसके पीछे तारकासुर पट्टिश अस्त्रको विष्णुकी छातीमें मारताभया १९८। २०१ उस स-
मय विष्णु भगवान्‌को मूर्च्छाहोगई और जबगरुडके कन्धेपर चिपटगये तबराक्षसको तो वह खड्ग
से काटताभया धर्मराजको भुशुंडी शस्त्रसे पृथ्वी में गिराताभया वरुणको धनुषके अग्रभागसे गि-
राताभया इसके अनन्तर सब देवताओं को अनेक शस्त्रोंकरके पीड़ित करताभया २०२। २०५
फिर विष्णुजीको चेष्टाहुई और चैतन्य होकर दुर्धर चक्रको ग्रहण करतेभये और उसी चक्रको उस
तारकासुरकी छातीपर मारतेभये वह सूर्य्यकी समान कान्तिवाला चक्र दैत्यकी छातीपर पड़कर
ऐसेखिंडगया जैसे कि पत्थरपर लगकर नीलाकमल खिंडजाताहै इसकेपीछे इन्द्रउसपर उसवज्रको
छोड़ताभया जिसके बलसे कि तारकासुरके जीतने की इच्छा कर रहाथा वह महाकठोर वज्र भी
उस तारकासुर दैत्यके शरीर में प्राप्त होकर खिंडकर सैकड़ों टुकड़े होगया २०६।२१० फिर वायुने
दैत्यकी छातीमें अंकुश मारा उस अंकुशका भी नाशहोगया तब वायु वृक्षों समेत पांच योजनलंबे
पर्व्वतको उखाड़के उस दैत्यके ऊपर मारताभया दैत्य उस आते हुए पर्व्वतको देखकर गेंदलपकने
के समान क्रीड़ाको करके बायें हाथमें ग्रहण करलेताभया २११।२१३ इसके अनन्तर धर्मराज भी
क्रोधकरके दैत्यके मस्तक पर बड़े बेगसे भ्रमाकर अपने दंडको मारताभया २१४ वह दंड भी उस
दैत्यका नहीं मारताभया तब अग्नि देवता उस दैत्यके शरीरमें अपनी अजय्य शक्तिको मारताभया

तः २१५ शक्तिंचिक्षेपदुर्द्धर्षां दानवेन्द्रायसंयुगे । नवाशिरीषमालेव सास्यवक्षस्यराजत २१६ ततःखड्गंसमाकृष्य कोशादाकाशनिर्मलम् । भासितासितदिग्भागं लोकपालोऽपिनिर्ऋतिः २१७ चिक्षेपदानवेन्द्राय तस्यमूर्ध्निपपातच । पतितश्चागमत्खड्गः स शीघ्रंशतखण्डताम् २१८ जलेशस्तूग्रदुर्द्धर्षं विषपावकभैरवम् । मुमोचपाशंदैत्यस्य भुजबन्धाभिलाषकः २१९ सदैत्यभुजमासाद्य सर्पःसद्योऽव्यपद्यत । स्फुटितक्रूरविक्रूरदशनाहिमहाहनुः २२० ततोऽश्विनौसमरुतः ससाध्याःसमहोरगाः । यक्षराक्षसगन्धर्वा दिव्यनानास्त्रपाणयः २२१ जघ्नुर्दैत्येश्वरंसर्वे संभूयसुमहाबलाः । नचास्त्राण्यस्यसज्जन्त गात्रेवज्राचलोपमे २२२ ततोरथादवप्लुत्य तारकोदानवाधिपः । जघानकोटिशोदेवान् करपार्ष्णिभिरेवच २२३ हतशेषाणिसैन्यानि देवानांविप्रदुद्रुवुः । दिशोभीतानिसन्त्यज्य रणोपकरणानितु २२४ लोकपालांस्ततोदैत्यो बबन्धेन्द्रमुखान्रणे । सकेशवान्दृढैःपाशैः पशुभारःपशूनिव २२५ सभूयोरथमास्थाय जगामस्वकमालयम् । सिद्धगन्धर्वसंघुष्टविपुलाचलमस्तकम् २२६ स्तूयमानोदितिसुतैरप्सरोभिर्विनोदितः । त्रैलोक्यलक्ष्मीस्तद्देशे प्राविशत्स्वपुरंयथा २२७ निषसादासनेपद्मरागरत्नविनिर्मिते । ततःकिन्नरगन्धर्वनागनारीविनोदितैः । क्षणंविनोद्यमानस्तु प्रचलन्मणिकुण्डलः २२८ ॥ इति श्रीमत्स्यपुराणे देवासुरसंग्रामे तारकजयलाभोनामद्विपञ्चाशदधिकशततमोऽध्यायः १५२ ॥

वह शक्ति भी उसकी छातीमें जाकर शोभित होजाती भई परन्तु कुछ पीड़ानहीं देतीभयी तब दिक्पाल यक्ष,अपनी तीक्ष्ण तलवारको मियानसे निकाल कर उस दैत्यके मस्तकपर मारताभया उस तलवारके भी मस्तकऊपर लगतेही सैकड़ों टुकड़े होगये २१५।२१८ फिर वरुण देवता उग्र दुर्धर्ष विषाग्निसेभयंकर सर्पकी फांसीको दैत्यकीभुजाके बांधनेकेलिये छोड़ताभया २१९ वह क्रूरविषवाली फांसीका सर्प भी तारकासुरकी भुजामें प्राप्तहोकर शीघ्रही खंड२होगये २२० उस समय अश्विनीकुमार, मरुद्गण, साध्यदेवता, महोरग, यक्ष, राक्षस और गन्धर्व यह सब अनेक प्रकार के दिव्य अस्त्रोंको ग्रहणकर उस दैत्यको वारंवार मारतेभये तब भी उस दैत्यके शरीरमें शस्त्रनहीं लगते भये२२१।२२२इसके पीछे तारकासुर दैत्य रथसेनीचे उतरकर अपने हाथोंसे और पैरोंकी एड़ियों से किरोड़ों देवताओंको मारताभया २२३ फिर शेषबचीहुई देवताओंकी सेनाभयभीत होकर रणकोत्याग दिशादिशामें भागगई तब वह दैत्य रणके मध्यमें से इन्द्रादिक सब लोकपालों को बांधलेता भया और विष्णु आदिको भी ऐसे बांधताभया जैसे कि व्याध पुरुष पशुओं को बांधलेताहै २२४।२२५ इसके पीछे वह तारकसुर रथमें बैठकर अपने स्थानमें जाताभया–सिद्ध गन्धर्व दैत्य और अप्सरा इत्यादिक सब दैत्यकी स्तुति करतेभये इन सबसमेत प्रसन्नतापूर्व्वक वह दैत्य त्रिलोकी की सम्पत्तियों से युक्त हुए अपने पुरमें प्रवेश करताभया २२६।२२७ वहां जाकर पुखराज आदिक रत्नों से जटित हुए आसन पर बैठगया और किन्नर गन्धर्वादिकों की स्त्रियों से क्रीड़ा करते हुए उसके कुंडल और मुकुटोंकी महाशोभा होतीभई २२८ ॥ इति द्विपंचाशदधिकशततमोऽध्यायः १५२ ॥

(सूत उवाच) प्रादुरासीत्प्रतीहारः शुभ्रनीलांशुकाम्बरः । सजानुभ्यांमहींगत्वा
पिहितास्यःस्वपाणिना १ उवाचानाविलंवाक्यमल्पाक्षरपरिस्फुटम् । दैत्येन्द्रमर्कवृन्दानां
विभ्रन्तंभास्वरंवपुः २ कालनेमिःसुरान्बद्धंश्चादायद्वारितिष्ठति । सविज्ञापयतिस्थेयंक
वन्दिभिरितिप्रभो ! ३ तन्निशम्याब्रवीद्दैत्यः प्रतीहारस्यभाषितम् । यथेष्टंस्थीयतामे
भिर्गृहंमेभुवनत्रयम् ४ केवलंपाशबन्धेन विमुक्तैरविलम्बितम् । एवंकृतेततोदेवा दूयमा
नेनचेतसा ५ जग्मुर्जगद्गुरुंद्रष्टुं शरणंकमलोद्भवम् । निवेदितास्तेशक्राद्याः शिरोभिर्ध
रणिङ्गताः । तुष्टुवुःस्पष्टवर्णार्थैर्वचोभिः कमलासनम् ६ (देवा ऊचुः) त्वमोङ्कारोऽस्यंकु
रायप्रसूतो विश्वस्यात्मानन्तभेदस्यपूर्वम् । सम्भूतस्यानन्तरंसत्वमूर्त्ते ! संहारेच्छोस्तेन
मोरुद्रमूर्त्ते ! ७ व्यक्तिंनीत्वात्वंवपु.स्वंमहिम्ना तस्मादण्डात्स्वाभिधानाद्चिन्त्यः । द्या
वापृथिव्योरूर्ध्वखण्डावराभ्यां ह्यण्डादस्मात्त्वंविभागङ्करोषि ८ व्यक्तंमरौयज्जनायुस्त
वाभूदेवं विघ्नस्त्वत्प्रणीतश्चकास्ति । व्यक्तंदेवाजन्मनःशाश्वतस्य द्यौस्तेमूर्द्धालोचने
चन्द्रसूर्यौ ९ व्यालाःकेशाःश्रोत्ररन्ध्रादिशस्ते पादौभूमिर्नाभिरन्ध्रेसमुद्राः । मायाकारःका
रणस्त्वंप्रसिद्धो वेदैःशान्तोज्योतिषात्वंविमुक्तः १०वेदार्थेषुत्वांविवृण्वन्तिबुद्धा हृत्पद्मान्तः
सन्निविष्टंपुराणम् । त्वामात्मानंलब्धयोगागृणन्ति साङ्ख्यैर्यास्ताःसप्तसूक्ष्माःप्रणीताः ११
तासांहेतुर्याष्टमीचापिगीता तस्यांतस्याङ्गीयसेवैत्वमन्तम् । दृष्ट्वामूर्तिंस्थूलसूक्ष्माञ्चकार

सूतजी बोले कि इसके पीछे स्वच्छ और निर्मल नीले वस्त्र वाला द्वारपाल आके अपने हाथ
से मुखको ढककर पृथ्वीमें घोंटू टेककर बैठताभया १ प्रथम थोड़े२ अक्षर कहताहुआ गंभीर वचन
कहनेलगा और सूर्य के समान कान्तिवाले तारकासुर से यह वचन बोला कि कालनेमि दैत्य देव
ताओं को बांधेहुए द्वारपर खड़ाहै और कहताहै यह बँधे हुए देवता कहां पहुंचाने चाहियें २ । ३
तब तारकासुर ने आज्ञादी कि त्रिलोकीमात्र में मेरे जिस स्थानमें यह रहना चाहें वहांही इनकी
इच्छा के समान पहुंचादो ४ इनकी फांसीको शीघ्र खोलो ऐसे आधीन किये हुए देवता दुःखित
होकर ब्रह्माजी के दर्शन के निमित्त शरणमें जातेभये फिर इन्द्रादिक देवता भी अपने २ शिरों से
पृथ्वीमें प्रणाम करते हुए स्पष्ट वाणियोंसे कहने लगे ५।६ कि आप इस संसारके अंकुरके निमित्त
ओंकारस्वरूपी होतेहो रचना के पीछे सत्वमूर्त्ति होतेहो और संहार समय में रुद्रमूर्त्ति हो जाते हो
ऐसे जो आपहैं उसके अर्थ नमस्कारहै ७ तुम अपनी महिमासे मायाको ग्रहणकर अंडको उत्पन्न
करके उस अंडके दो विभागकर पृथ्वी और स्वर्गको रचते हो ८ मनुष्योंकी आयुको तुमही रचतेहो
सब देवताओंका जन्म भी तुमही से होताहै स्वर्ग तुम्हारा मस्तक है सूर्य्य और चन्द्रमा नेत्र हैं सर्प
बालहैं दिशा कानहैं पृथ्वी चरणहैं समुद्र नाभिहै तुमही मायाके रचने वाले प्रसिद्ध कारणहो वेदोंसे
शान्तहो ज्योति करके विमुक्तहो वेदोंमें और अर्थोंमें तुमको ढूंढ़ते हैं हृदय कमलमें प्रवेशहुए तुमको
योगीजन सांख्य शास्त्रसे पहचानते हैं ९ । ११ सांख्य शास्त्रवालोंने सातसूक्ष्म मूर्त्ति कही हैं उन
में तुम हेतुरूप आठवीं मूर्त्तिहो उन्हीं सब मूर्त्तियों में तुमको गावते हैं देवताओंने जो कई भावकारण

देवैर्भावाःकारणैःकैश्चिदुक्ताः १२ सम्भूतास्तेत्वत्तएवादिसर्गे भूयस्तांतांवासनान्तेऽभ्युपेयुः। त्वत्सङ्कल्पेनान्तमायाप्तिगूढः कालोमेघोध्वस्तसंख्याविकल्पः १३ भावाभावव्यक्तिसंहारहेतुस्त्वंसोऽनन्तस्तस्यकर्त्तासिचात्मन्!। येऽन्येसूक्ष्माःसन्तितेभ्योऽभिगीतःस्थूलाभावाश्चावृतारश्चतेषाम् १४ तेभ्यःस्थूलैस्तैःपुराणैःप्रतीतो भूतंभव्यंचैवमुद्भूतिभाजाम्। भावेभावेभावितंत्वायुनक्ति युक्तंयुक्तंव्यक्तिभावान्निरस्य । इत्थन्देवोभक्तिभाजांशरण्यस्त्रातागोप्तानोभवानन्तमूर्त्तिः १५ विरिञ्चिममराःस्तुत्वा ब्रह्माणमविकारिणम्। तस्थुर्मनोभिरिष्टार्थ सम्प्राप्तिप्रार्थनास्ततः १६ एवंस्तुतोविरिञ्चिस्तु प्रसादंपरमंगतः। अमरान्वरदेनाह वामहस्तेननिर्दिशन् १७ (ब्रह्मोवाच) नारीयाऽभर्तृकाऽकस्मात् तनुस्तेत्यक्तभूषणा। नराजतेतथाशक्र! म्लानवक्त्राशिरोरुहा १८ हुताशनविमुक्तोऽपि नधूमेनविराजसे। भस्मनेवप्रतिच्छन्नो दग्धदावश्चिरोषितः १९ यमामयमयेनैव शरीरे त्वंविराजसे। दण्डस्यालम्बनेनेव ह्यकृच्छुस्तुपदेपदे २० रजनीचरनाथोऽपि किंभीतइवभाषसे। राक्षसेन्द्रक्षतारातेत्वमरातिक्षतोयथा २१ तनुस्तेवरुणोच्छुष्का परीतस्येववह्निना। विमुक्तरुधिरंपाशं फणिभिःप्रविलोकयन् २२ वायो! भवान्विचेतस्कस्त्वंस्निग्धैरिवनिर्जितः। किन्त्वंबिभेषिधनद! संन्यस्यैवकुबेरताम् २३ रुद्रास्त्रिशूलिनःसन्तो वदध्वं बहुशूलताम्। भवन्तःकेनतत्क्षिप्तं तेजस्तुभवतामपि २४ अकिञ्चित्करतांयातः करस्तेनविभासते। अलंनीलोत्पलाभेन चक्रेणमधुसूदन! २५ किंत्वयानुदरालीन भुवनंप्रवि

कहे हैं वह आदि सर्ग में तुमही से उत्पन्न हुए हैं फिर अन्त कालमें तुमही में प्राप्त होजाते हैं तुम्हारेही संकल्पसे प्रलयकाल होताहै १२।१३ सब भाव पृथ्वी आदिक स्थूल व्यक्तियोंके संहारके हेतु हैं उन सब हेतुओंके कर्ता आपही हैं आपही सूक्ष्म और स्थूलभूतोंके रचनेवाले हो उन प्राचीन स्थूल भूतोंसे जो यह उत्पन्न हुआ जगत् प्रतीत होताहै वह सब आपकाही स्वरूप है तुमको पण्डितजन मायासे पृथक् देखते हैं ऐसे आप देवदेवके हम शरण आये हैं आप हमारी रक्षाकरो १४।१५ इस प्रकारसे देवता अविकारी ब्रह्माजीकी स्तुति करके प्रार्थना करते हुए स्थित होगये इसप्रकार से स्तुति किये हुए ब्रह्माजी परम प्रसन्न होकर देवताओंको वरदेने के निमित्त बोले १६।१७ ब्रह्माजी कहते हैं कि हेइन्द्र जिस प्रकार विधवा स्त्री आभूषणोंसे रहितहो स्नानकरके शिर गुँथाकर नहीं शोभितहोती है उसी प्रकार तूभी शोभित नहीं है यह अग्निदेव धुएंसे रहितहै तौ भी प्रकाशित नहीं है राखमें दबीहुई अग्निके समान होरहाहै-हे धर्मराज तुमभी अपने दण्ड से प्रकाशित होकरभी प्रकाशित नहीं हो पद पदमें कष्टहोताहै हे चन्द्रमा तुमभी भयभीतों के समान बोलतेहो और हे राक्षस तूभी लुटेहुए के समान दुखित होरहा है १८।२१ हे वरुण तेरा शरीर भी ऐसा सूखरहाहै मानो चारों को अग्नि लगगईहो तेरी फांसी तेरेपास नहीं दीखती है हे वायुदेव तुमभी अचेतसे विदित होतेहो हे कुबेर तुम किस हेतुसे डररहेहो हेरुद्रो तुम सब भी त्रिशूल धारीहो तुम्हारा तेज किसने हरलिया है ऐसा विदित होताहै मानो तुम्हारे हाथसे कुछ भी कार्य्य नहीं हुआ हे विष्णु क्या तुम्हारा चक्र पूरा

लोकनम्। क्रियतेस्तितामिताक्षेण भवताविश्वतोमुख ! २६ एवमुक्ताःसुरास्तेन ब्रह्मणाब्रह्ममूर्तिना । वाचांप्रधानभूतत्वान्मारुतंतमचोदयन् २७ अथविष्णुमुखैर्देवैः श्वसनःप्रतिबोधितः । चतुर्मुखंतदाप्राह चराचरगुरुंविभुम् २८ नतुवेत्सिचराचरभूतगतं भवभावमतीवमहानुच्छ्रितःप्रभवः। पुनरर्थिवचोविस्तृतश्रवणोपमकौतुकभावकृतः २९ त्वमनन्तकरोषिजगद्भवतां सचराचरगर्भविभिन्नगुणाम्। अमरासुरमेतदशेषमपि त्वयितुल्यमहोजनकोऽसियतः । पितुरस्तितथापिमनोविकृतिःसगुणो विगुणोबलवानबलः ३० भवतोवरलाभनिवृत्तभयः कुलिशाङ्गसुतोदितिजोऽतिबलः। सचराचरनिर्मथनेकिमितिकितवस्तुकृतोविहितोभवता ३१ किलदेवत्वयास्थितयेजगतां महदद्भुतचित्रविचित्रगुणाः। अपितुष्टिकृतःश्रुतकामफला विहिताद्विजनायकदेवगणाः ३२ अपिनाकमभूत्किलयज्ञभुजां भवतोविनियोगवशात्सततम् । अपहृत्यविमानगणंसकृतोदितिजेनमहामरुभूमिसमः३३ कृतवानसिसर्वगुणातिशयं यमशेषमहीधरराजतया। सममिङ्गितभावविधिःसचागिरिर्गगनेनसदोच्छ्रयतांहिगतः३४ अधिवासविहारविधावुचितोदितिजेन पविक्षतशृङ्गतटः। परिलुण्ठितरत्नगुहानिवहो बहुदैत्यसमाश्रयताङ्गमितः३५सुरराज ! सतस्यभयेनगतं व्यदधादशरीरइतोऽपिवृथा। उपयोग्यतयाविवृतंसुचिरं विमलद्युतिपूरितदिग्वदनम् ३६ भवतैवविनिर्मितमादियुगे सुरहेतिसमूहमनुत्थमिदम् । दितिजस्यशरीरमवाप्यगतं शतधामतिभेदमिवाल्पमनाः ३७ आसारधूलिध्वस्ताङ्गा द्वारस्थास्थकद

होगया अथवा क्या तुम आंखमीचकर त्रिलोकीको उलटा किया चाहतेहो २२ । २६ जब ब्रह्माजीने सब देवताओंके प्रति ऐसे वचन कहे तब अधिक बोलनेवाले वायुको विष्णु आदिक प्रेरणाकरतेभये तब वायु देवता देवदेव चराचरके गुरू ब्रह्माजीसे कहनेलगे २७। २८ हे ब्रह्मन् तुम चराचर भूतोंके प्रयोजनोंको जानतेहुए भी उनकी प्रार्थना पूरी करनेके निमित्त आश्चर्य्य पूर्व्वक उन भूतोंके वृत्तान्तको पूछतेहो तुम सब चराचर जगत् की सत्त्वादिक गुणोंके विभागके अनुसार देवताओं समेत रचना करतेहो आपसबके जनकहो ऐसे आपके भी मनमें क्या विकार होताहै २९। ३० आपसे वरदान लेकर तारकासुर दैत्य निर्भयहोकर त्रिलोकीको बाधा देरहाहै आपने क्या उसी छली दैत्यको उत्तम और योग्यबनादिया ३१ और हेदेव आपहीने जगत्की स्थितिके निमित्त विचित्रगुणवाले कामनाओंके पूर्ण करने वाले सब देवतालोग रचेहैं ३२ तुम्हारेही विनियोगसे यज्ञों के भोग करनेवाले देवताओंके निमित्त जो स्वर्गरचागया है वह स्वर्ग तारकासुर दैत्यने मरुस्थल देशके समान उजाड़ दियाहै जो पर्व्वत इन्द्र के वज्रसे टूटगयाथा वह पर्व्वत सब दैत्योंके वासकरने सेआकाशके समान उँचाई को प्राप्तहोरहाहै और रत्नसमूहोंसे भररहा है हेदेव वह स्वर्ग उसदैत्यके भयंसे नष्टहोगयाहै सब देवता मृतकोंके समानहोरहेहैं नंगेहुए देवताओं की कान्ति प्रकाशित होरही है हेदेव यह सब देवताओंका गण सृष्टिकी आदिमें आपहीने रचाहै सो इस दैत्यके आश्रयहोकर ऐसे नष्टहोरहाहै जैसे कि मूर्ख पुरुषकी बुद्धिके मानो सैकड़ोंभेद होगयेहों ३३।३७ उस दैत्यकी सेनाकी

लब्धप्रवेशाःकृच्छ्रेण वयंतस्यामरद्विषः ३८ सभायाममरादेव ! निकृष्टेऽप्युपवे
र्थिनः। लब्धप्रवेशाःकृच्छ्रेण वयंतस्यामरद्विषः ३८ सभायाममरादेव ! निकृष्टेऽप्युपवे
शिताः । वेत्रहस्तैरजल्पन्तस्ततोऽपहासितास्तुतैः ३९ महार्याःसिद्धसर्वार्था भवन्तः
स्वल्पभाषिणः । चाटुयुक्तमथोकर्म्मं ह्यमराबहुभाषत ४० सभयंदैत्यसिंहस्य सशक्र
स्यतुसंस्थिताः । वदतेतिचदैत्यस्य प्रेष्यैर्विहासिताबहु ४१ ऋतवोमूर्तिमन्तस्तमुपा
सन्तेह्यहर्निशम् । कृतापराधसन्त्रासं नत्यजन्तिकदाचन ४२ तन्त्रीत्रयलयोपेतं सि
द्धगन्धर्वकिन्नरैः । सुरागमुपधानित्यं गीयतेतस्यवेश्मसु ४३ हन्ताकृतोपकरणैर्मित्रा
णिगुरुलाघवैः । शरणागतसन्त्यागी त्यक्तसत्यपरिश्रयः ४४ इतिनिःशेषमथवा निः
शेषंवैनशक्यते । तस्याविनयमाख्यातुं स्रष्टातत्रपरायणम् ४५ इत्युक्तःस्वात्मभूर्देवः सु
रैर्दैत्यविचेष्टिते । सुरानुवाचभगवांस्ततः स्मितमुखाम्बुजः ४६ (ब्रह्मोवाच) अबध्य
स्तारकोदैत्यः सर्वैरपिसुरासुरैः । यस्यबध्यःसनाद्यापि जातस्त्रिभुवनेपुमान् ४७ मयास
वरदानेन छन्दयित्वानिवारितः । तपसःसाम्प्रतंराजा त्रैलोक्यदहनात्मकात् ४८ सचव
व्रेबधंदैत्यः शिशुतःसप्तवासरात् । ससप्तदिवसोवालः शङ्कराद्योभविष्यति ४९ तारक
स्यनिहन्तास भास्कराभोभविष्यति । साम्प्रतंचाप्यपत्नीकः शङ्करोभगवान्प्रभुः ५०
यच्चाहमुक्तवान्यस्या ह्युत्तानकरतासदा । उत्तानोवरदःपाणिरेष देव्याःसदैवतु ५१

धूलिसे टूटेअंगवाले हमसबदेवता उसदैत्यके द्वारपाल बनेरहतेहैं ३८ हे देव हम कुछ भी नहींबोल सक्ते हैं तिसपर भी वह दैत्य हमको सभामें नीचे आसनोंपर बैठाकर हाथमें बेत लेकर बहुतसा झिड़कताहै और यह हास्य करताहै ३९ कि हे देवताओ तुम बड़ेश्रेष्ठ हो सब अपना प्रयोजन सिद्ध करनेवाले हो अब बहुत बोलरहे हो ४० अबतुम इसतारकासुरसे क्यों भय करते हो तुम सबइन्द्रके समीप बैठे हो अब किसका भय है ऐसे २ अनेक प्रकारके हास्य कियाकरता है हे देव सब ऋतु भी मूर्तियां धारण करके उसदैत्यकी उपासना करती हैं वह यद्यपि अनेक अपराध भी करताहै तौ भी उसको नहींत्यागतीहैं ४१।४२ उसके घरमें सिद्ध गन्धर्व और किन्नरादिक अच्छेप्रकारसे रागोंकोगाते हैं ४३ भलाकरनेवाले और मित्रता करनेवालों का भी मारनेवाला है शरणागतका और सत्यका त्यागनेवाला है ४४ ऐसे २ अनेक असभ्य उसके व्यवहारोंको कोई भी कहनेको समर्थ नहीं है यह देवताओं के वचनसुनकर ब्रह्माजी हँसकर उनसे कहनेलगे ४५।४६ कि हे देवतालोगो यह तारकासुर दैत्य त्रिलोकी में किसी के भी हाथसे मरनेके योग्य नहीं है इसका मारनेवाला पुरुष अभीतक नहीं पैदाहुआहै ४७ वह दैत्य अपने तपके प्रभावसे मुझसे वरदानलेगयाहै सो मैंने छलकरके निवारण करदिया है वह दैत्य त्रिलोकी मात्रका भस्मकरनेवाला राजा होरहा है उसने अपनीमृत्यु सात दिनके बालकके हाथसे मांगी है सो उसका मारनेवाला बालक शिवजी से उत्पन्न होगा ४८ अर्थात् तारकासुरका मारनेवाला सूर्य्य की समान कान्तिवाला महादेवजी का पुत्र होगा अभी तो शिवजी स्त्रीसे रहित हैं ४९।५० उस दैत्यको वरदेने के समय जिस मूंदेहाथसे वर दियागयाथा वहीमूंदाहाथ देवीको वरदेनेवाला होगा वह देवी हिमाचलकी पुत्री होगी उसके गर्भसे जो पुत्र होगा उसीके हाथ

हिमाचलस्यदुहिता सातुदेवीभविष्यति । तस्याःसकाशाद्यःशर्वस्त्वरण्यांपावकोयथा ५२
जनयिष्यतितंप्राप्य तारकोऽभिभविष्यति । मयाप्युपायःसकृतो यथैवंहिभविष्यति ५३
शेषश्चाप्यस्यविभवो विनश्येत्तदनन्तरम् । स्तोककालंप्रतीक्षध्वन्निर्विशङ्केनचेतसा ५४
इत्युक्तास्त्रिदशास्तेन साक्षात्कमलजन्मना । जग्मुस्तंप्रणिपत्येशं यथायोगंदिवौकसः५५
ततोगतेषुदेवेषु ब्रह्मालोकपितामहः । निशांसस्मारभगवान् स्वतनोःपूर्वसम्भवाम् ५६
ततोभगवतीरात्रि रुपतस्थेपितामहम् । तांविविक्तेसमालोक्य ब्रह्मोवाचविभावरीम् ५७
(ब्रह्मोवाच) विभावरि ! महत्कार्यं विबुधानामुपस्थितम् । तत्कर्तव्यंत्वयादेवि ! शृणुका
र्य्यस्यनिश्चयम् ५८ तारकोनामदैत्येन्द्रः सुरकेतुरनिर्जितः । तस्याभावायभगवान् जनयि
ष्यतिचेश्वरः ५९ सुतंसभवितातस्य तारकस्यान्तकारकः । शङ्करस्याभवत्पत्नी सती
दक्षसुतातुया ६० साम्प्रताकुपितादेवी कस्मिंश्चित्कारणान्तरे । भविताहिमशैलस्य दुहि
तालोकभावनी ६१ विरहेणहरस्तस्या मत्वाशून्यंजगत्त्रयम् । तपस्यन्हिमशैलस्य कन्द
रे सिद्धसेविते ६२ प्रतीक्षमाणस्तज्जन्म कञ्चित्कालंनिवत्स्यति । तयोःसुतप्ततपसोर्भवि
तायोमहाबलः ६३ सभविष्यतिदैत्यस्य तारकस्यविनाशकः । जातमात्रातुसादेवी स्वल्प
संज्ञाचभामिनी ६४ विरहोत्कण्ठितागाढं हरसङ्गमलालसा । तयोःसुतप्ततपसोः संयोगः

से तारकासुर मरेगा वह उपाय मैंने कररक्खा है ५१ । ५३ थोड़ेसे ऐश्वर्य्यका भोग उसदैत्यका बाकी
रहगयाहै इसहेतुको जानकर तुम निश्शंक होके कुछ कालतक संतोषरक्खो ५४ जब ब्रह्माजीने दे·
वताओंसे यह बातकही तब सबदेवता अपने २ स्थानको जातेभये जब सबदेवता लोग अपने २
स्थानको चलेगये तब लोकों के पितामह ब्रह्माजी अपने शरीरसे प्रथम उत्पन्नहुई रात्रिको स्मरण
करतेभये उस समय भगवती रात्रि ब्रह्माजी के पास आती भयी उसको एकान्तमें देख ब्रह्माजी बोले
५५।५७ कि हेरात्रि अब देवताओंका महाकार्य्य उपस्थितहै सो हे देवी वहकार्य्य तेरेहीकरनेकेयोग्यहै
५८ यह तारकासुरदैत्य देवताओं से नहीं पराजय कियाजाताहै उसके मारने के निमित्त शिवजी पुत्र
उत्पन्नकरेंगे शिवजीकी स्त्री दक्षकीपुत्री सतीनाम थी वह सती क्रोधकरके किसी कारणसे भस्महोगई हैं
वह हिमाचलकेघर मेनास्त्री में जन्मलेंगी और शिवजी उस सतीकेविरहसे त्रिलोकी को शून्यमानकर
हिमाचलपर्व्वत की कन्दरामें तपकररहे हैं वहां उस सतीकी वाटदेखतेहुए कुछ काल पर्य्यन्त शिवजी
वासकरेंगे और वहांही उनदोनोंके प्रभावसे महाबली पुत्रउत्पन्नहोगा वह तारकासुरको अवश्यमारेगा
और हेशुभानने वह सती जन्मतेही कुछ समर्थहोकर शिवजीकी उत्कण्ठाकरके आवेगी तब उनकासंगम
होगा उस समय कुछभी उनका विरोध न होगा इसपर भी तारकासुरके मरनेका सन्देह दीखता है
इस हेतुसे उनके मैथुनकी आसक्तिमें तुमको यह विघ्न करदेना चाहिये कि उस सतीकी माताके
उदरमें तू प्राप्त होकर सतीको अपने रूपसे रंगदे अर्थात् काला रूपकरदे ऐसा कारण होने से जब
सती अर्थात् पार्वतीका और शिवजीका संगम होगा तब शिवजी पार्वतीको हास्यपूर्व्वक त्याग कर
अलग करदेंगे तब पार्वती क्रोध करके तपस्या करने चली जांयगी फिर शिवजी के सकाशसे जिस

स्याच्छुभानने ६५ ततस्ताभ्यान्तुजनितः स्वल्पोवाक्कलहोभवेत् । ततोऽपिसंशयोभूय
स्तारकंप्रतिदृश्यते ६६ तयोःसंयुक्तयोस्तस्मात् सुरताशक्तिकारणे । विघ्नस्त्वयाविधात
व्यो यथाताभ्यांतथाशृणु ६७ गर्भस्थानेचतन्मातुः स्वेनरूपेणरञ्जय । ततोविहायशर्वं
स्तां विश्रान्तोनर्मपूर्वकम् ६८ भर्त्सयिष्यतितांदेवीं ततःसाकुपितासती । प्रयास्यतितप
श्चर्तुंतत्तस्मात्तपसेपुनः ६९ जनयिष्यतियंशर्वादमितद्युतिमण्डितम्। सभविष्यतिहन्तावै
सुरारीणामसंशयम् ७० त्वयापिदानवादेवि! हंतव्यालोकदुर्जयाः। यावच्चनसतीदेहसंक्रान्त
गुणसञ्चया ७१ तत्सङ्गमेनतावत्त्वं दैत्यान्हन्तुंनशक्ष्यसे । एवंकृतेतपस्तप्त्वासृष्टिसंहार
कारिणी ७२ समाप्तनियमादेवीयदाचोमाभविष्यति । तदास्वमेवतद्रूपंशैलजाप्रतिपत्स्य
ते ७३ तनुस्तवापिसहजा सैकानंशाभविष्यति। रूपांशेनतुसंयुक्ता त्वमुमायांभविष्यसि
७४ एकानंशेतिलोकस्त्वां वरदे!पूजयिष्यति। भेदैर्बहुविधाकारैःसर्वगाकामसाधिनी ७५
ओङ्कारवक्त्रागायत्री त्वमितिब्रह्मवादिभिः । आक्रान्तिरूर्जिताकारा राजभिश्चमहाभु
जैः ७६ त्वंभूरितिविशांमाता शूद्रैःशैवीतिपूजिता । क्षान्तिर्मुनीनामक्षोभ्या दयानियमि
नामिति ७७ त्वंमहोपायसन्दोहा नीतिर्नयाविसर्पिणाम् । परिच्छित्तिस्त्वमर्थानां त्वंमही
प्राणिहृच्छया ७८ त्वंमुक्तिःसर्वभूतानां त्वंगतिःसर्वदेहिनाम्। त्वञ्चकीर्तिमतांकीर्तिस्त्वं
मूर्तिःसर्वदेहिनाम् ७९ रतिस्त्वंरक्तचित्तानां प्रीतिस्त्वंहृष्टदर्शिनाम् । त्वंकान्तिःकृतभूषा
णां त्वंशांतिर्दुःखकर्म्मणाम् ८० त्वंभ्रान्तिःसर्ववोधानां त्वंगतिःक्रतुयाजिनाम् । जलधी
नांमहावेला त्वञ्चलीलाविलासिनाम् ८१ सम्भूतिस्त्वंपदार्थानां स्थितिस्त्वंलोकपालि

पुत्र को जनेगी वह अवश्य दैत्यों का मारने वाला होवेगा ५९ । ७० हे देवि रात्रि इस लोक में
तुमको भी दुर्जय दैत्योंका मारना योग्यहै परन्तु जब तक तू पार्वतीके शरीरको स्पर्श न करेगी तब
तक दैत्योंको नहीं मार सकेगी सो तुझको जैसा मैंने कहाहै वैसाही करना योग्यहै अर्थात् उसको
वैसाही करदे इसके अनन्तर जब पार्वती तपस्या करचुकेगी और जब उसका नियम समाप्त होजा-
यगा तब वह फिर अपने गौर स्वरूपको प्राप्त होजायगी ७१।७३ तेरे भी स्वरूपको वह कई अंशों
में प्राप्त करदेगी एक अंशसे तू पार्वतीमें रहैगी-एक अंशसे तू लोकोंको वरदेने वाली होकर पूजीजा-
यगी और बहुतसे भेदोंसे सबकामनाओं की सिद्ध करने वाली होवेगी ७४।७५ तुम ॐकार मुख
वाली गायत्रीहो ऐसा ब्रह्मवादी वर्णन करते हैं और बड़े २ राजाओंसे बढ़ी हुई आक्रांति कहीजाती
हो ७६ वैश्यलोग भू अर्थात् भूमिके समान माता कहते हैं शूद्रलोग शैवी अर्थात् शिवकी भार्य्या
मानते हैं मुनि लोग तुझकोक्षमा और दयाकहतेहैं ७७ नीतिके जानने वालोंको तुम महा उपायकी
देने वालीहो सब अर्थोंमें रहने वाली होकर सिद्धि रूपहो सब प्राणियोंके रहने के निमित्त पृथ्वीरूप
हो तुम्हीं सब भूतोंकी मुक्तिहो और अखिल देहधारियोंकी गतिहो ७८।७९ विषयी लोगों को तुम
रति रूपहो प्रसन्न रहने वालोंके लिये प्रीतिहो आभूषण पहरने वालोंके लिये कान्तिहो दुःखकर्मोंकी
तुम शान्तिहो ८० सब बोधोंकी तुमभ्रान्तिहो यज्ञकरने वालोंकी गतिहो समुद्रोंकी वेलाहो विलासो

नी । त्वंकालरात्रिर्निःशेषभुवनावलिनाशिनी ८२ प्रियकण्ठग्रहानन्ददायिनीत्वंविभा
वरी । इत्यनेकविधैर्देवि ! रूपैर्लोकेत्वमर्चिता ८३ येत्वांस्तोष्यन्तिवरदे ! पूजयिष्यन्तिवा
पिये । तेसर्वकामानाप्स्यन्ति नियतानात्रसंशयः ८४ इत्युक्तातुनिशादेवी तथेत्युक्ताकृता
ञ्जलिः । जगामत्वरितातूर्णं गृहंहिमगिरेःपरम् ८५ तत्रासीनांमहाहर्म्ये रत्नभित्तिसमाश्र
याम् । ददर्शमेनामापाण्डुच्छविवक्त्रसरोरुहाम् ८६ किञ्चिच्छ्याममुखोदग्रस्तनभाराव
नामिताम् ।महौषधिगणाबद्धमन्त्रराजनिषेविताम् ८७ उद्वहत्कनकोन्नद्धजीवरक्षामहोरगा
म् ।मणिदीपगणज्योतिर्महालोकप्रकाशिते ८८ प्रकीर्णबहुसिद्धार्थेमनोजपरिवारके । शुचि
न्यंशुकसच्छन्नभूशय्यास्तरणोज्ज्वले ८९ धूपामोदमनोरम्ये सज्जसर्वोपयोगिके । ततः
क्रमेणदिवसे गतेदूरंविभावरी ९० व्यजृम्भतसुखोदर्के ततोमेनामहागृहे । प्रसुप्तप्रायपु
रुषे निद्राभूतोपचारिके ९१ स्फुटालोकेशशभृति भ्रान्तिरात्रिविहङ्गमे । रजनीचरभूता
नांसङ्घैरावृतचत्वरे ९२ गाढकण्ठग्रहालग्नसुभगेष्टजनेततः । किञ्चिदाकुलतांप्राप्ते मे
नानेत्राम्बुजद्वये ९३ आविवेशमुखेरात्रिः सुचिरस्फुटसङ्गमा । जन्मदायाजगन्मातुः
क्रमेणजठरान्तरे ९४ आविवेशान्तरंजन्म मन्यमानाक्षपातुवै । अरञ्जयच्छविन्देव्या
गुहारण्योविभावरी ९५ ततोजगत्पतिप्राणहेतुर्हिमगिरिप्रिया । ब्राह्मेमुहूर्तेसुभगेव्यसूय
तगुहारणिम् ९६ तस्यान्तुजायमानायां जन्तवःस्थाणुजङ्गमाः । अभवन्सुखिनःसर्वे

पुरुषोंकी तुम लीलाहो ८१ पदार्थों की तुम संभूतिहो लोकोंकी पालन करनेवाली तुमही स्थितिहो संपूर्ण लोकोंकी नाशकरनेवाली कालरात्रिहो प्रियजनोंके कण्ठसे मिलने में तुम आनन्ददायिनी हो हे देवि तुम इस प्रकार करके अनेक रूपोंके द्वारा जगत् में पूजी जातीहो ८२ । ८३ हे वरदे जो पुरुष तुम को पूजेंगे अथवा स्तुतिकरेंगे उनकी सब कामना निस्सन्देह सिद्ध होजायँगी ८४ इसप्रकारसे ब्रह्माजीसे स्तुति कीहुई रात्रिदेवी हाथ जोड़के ब्रह्माजीकी आज्ञाको ग्रहण कर शीघ्रही हिमाचल पर्व्वतपर चलीजातीभई वहां उत्तम स्थानमें रत्नोंकी दीवारके सहारे बैठीहुई गौरमुखवाली मेना स्त्रीको देखतीभयी ८५।८६ कुछेक काले वर्णके मुखवाले ऊंचे स्तनोंके भारसे नम्रहुई नतरूप महा ओषधियोंकी सेवनकरनेवाली जीवकी रक्षाके निमित्त स्वर्णमय सर्प यन्त्रको धारणकियेहुए वह मेनानामस्त्री मणिदीपकोंके प्रकाशसे शोभित व्यजनादिक सबवस्तुओंसे अलंकृत सुन्दरवस्त्रों से मंडित सुन्दर धूपादि सुगन्धियों से धूपित तकिये आदि उपयोगी वस्तुओं से युक्तहुई शय्यापर सायंकाल में स्थित होतीभई इसके पीछे जब सब पुरुष सोगये उसकाल में वह मेनाभी सुखपूर्व्वक सोगई ८७ । ९१ उस रात्रिमें चन्द्रमा प्रकाशितहुए भूत और निशाचर चौराहे पर घूमने लगे ९२ रसिक पुरुष स्त्रियोंके संगरमण करनेलगे ऐसी रात्रि के समयमें मेनास्त्री के भी नेत्र मिचनेलगं वह समय पाकर वह ब्रह्माकी प्रेरित रात्रि उस मेनाके मुख में प्रवेशकर गई और क्रमपूर्व्वक उनके उदरमें भी प्रविष्टहोगई ९३ । ९४ फिर जिस समय पार्वती के जन्मका समय हुआ तब रात्रि अपने कालेरूपसे पार्वतीको रंगदेती भई ९५ फिर जगत् के पति शिवजीकी प्राण-

सर्वलोकनिवासिनः ९७ नारकाणामपितदा सुखंस्वर्गसमंमहत् । अभवत्क्रूरसत्वानां
चेतःशान्तंचदेहिनाम् ९८ ज्योतिषामपितेजस्त्वमभवत्सुरतोन्नता।वनाश्रिताश्चौषधयः
स्वादुवन्तिफलानिच ९९ गन्धवन्तिचमाल्यानि विमलञ्चनभोऽभवत् । मारुतश्चसुख
स्पर्शो दिशश्चसुमनोहराः १००तेनचोद्भूतफलितपरिपाकगुणोज्ज्वलाः। अभवत्पृथिवी
देवी शालिमालाकुलापिच १०१ तपांसिदीर्घचीर्णानि मुनीनांभावितात्मनाम् । तस्मिन्
गतानिसाफल्यं कालेनिर्मलचेतसाम् १०२ विस्मृतानिचशास्त्राणि प्रादुर्भावंप्रपेदिरे । प्र
भावस्तीर्थमुख्यानां तदापुण्यतमोऽभवत् १०३ अन्तरिक्षेसुराश्चासन् विमानेषुसहस्रशः।
समहेन्द्रहरिब्रह्म वायुवह्निपुरोगमाः १०४पुष्पवृष्टिंप्रमुमुचुस्तस्मिंस्तुहिमभूधरे ।जगुर्गन्ध
र्वमुख्याश्च ननृतुश्चाप्सरोगणाः १०५मेरुप्रभृतयश्चापि मूर्तिमन्तोमहाबलाः। तस्मिन्म
होत्सवेप्राप्ते दिव्यप्रभृतपाणयः १०६सरितःसागराश्चैव समाजग्मुश्चसर्वशः ।हिमशैलो
ऽभवल्लोके तथासर्वैश्चराचरैः १०७सेव्यश्चाप्यभिगम्यश्चसश्रेयांश्चाचलोत्तमः । अनु
भूयोत्सवंदेवा जग्मुःस्वानालयान्मुदा १०८ देवगन्धर्वनागेन्द्रशैलशीलावनीगुणैः । हिम
शैलसुतादेवी स्वयंपूर्विकयाततः १०९ क्रमेणवृद्धिमानीता लक्ष्मींवानलसैर्बुधैः । क्रमेण
रूपसौभाग्यप्रबोधैर्भुवनत्रयम् ११० अजयद्भूषयच्चापि निःसाधारैर्नगात्मजा । एतस्मि

प्रिया पार्वती को मेना सुन्दर मुहूर्त्तमें जनती भई ९६ जब पार्वतीजीका जन्महुआ तब चराचर
सब लोकनिवासी जीवमात्र प्रसन्नहोते भये ९७ उनके जन्मतेही नरकके भी सबजीवों को स्व-
र्गके समानसुखहोताभया क्रूर स्वभाववाले जीव शान्तप्रकृतिवाले होगये तारागणों में तेजबढ़
गया देवताओंकी उन्नतिहोगई वनके फल और ओषधियां सब सुस्वादुहोगये पुष्प सुगन्धित होगये
अच्छी प्रिय त्रिविध अनुकूल वायुचलने लगी आकाश स्वच्छहोगया दिशानिर्मल होगईं और पार्व-
तीजीकेही प्रभावसे पृथ्वीकी सबखेती अन्न और फूलों से पूरित होगईं और निर्मल चित्तवाले मुनि
लोगों के बहुत कालतक के कियेहुए तप सफल होगये ९८।१०२ विस्मृतहुए शास्त्र स्मरण होकर
प्रकट होगये मुख्य २ तीर्थोंका प्रभाव बढ़गया १०३ आकाशमें हज़ारों विमानोंपर चढ़ेहुए देवता
विचरने लगे ब्रह्मा विष्णु इन्द्र वायु और अग्नि यह सब भी महाप्रसन्न हुए और निर्भय विचरने
लगे १०४ उस हिमाचलके ऊपर पुष्पों की वर्षाकरतेभये मुख्य २ गन्धर्व गावनेलगे और अप्सराओं
के गण नाचनेलगे १०५ सुमेरु आदिक पर्व्वत मूर्त्तिको धारणकर हिमाचलकी सेवामें आवते भये
और सबनदी समुद्रादिक भी इसीप्रकारसे रूपधारण करके हिमाचलके घरआतेभये १०६।१०७
वह हिमाचलपर्व्वत सबपुरुषों के सेवन करने के योग्य मंगलरूप होताभया उस पर्व्वतके दर्शन
करके सबदेवता अपने २ स्थानोंको आतेभये १०८ देवता गन्धर्व नागेन्द्र पर्व्वत इनके शीलस्व-
भावसे युक्त हुई हिमाचल की पुत्री पार्वतीजी आपही क्रम २ से बढ़तीहुई और अपनेरूप सौभा-
ग्यादिक गुणों से त्रिलोकी को भूषित करती भयी इसके अनन्तर इन्द्रने अपने कार्य्यकी सिद्धिके
निमित्त नारदमुनिका स्मरण किया और उसी समय नारदजी इन्द्रके भवनमें आतेभये उस

न्तरेशक्रो नारदंदेवसम्मतम् १११ देवर्षिमथसस्मार कार्य्यसाधनसत्वरम्। स्मृतिंश
क्रस्यविज्ञाय जातान्तुभगवांस्तदा ११२ आजगाममुदायुक्तो महेन्द्रस्यनिवेशनम्। तंसु
दृष्ट्वासहस्राक्षः समुत्थायमहासनात् ११३ यथार्हेणतुपाद्येन पूजयामासवासवः। शक्रप्रणी
तान्तांपूजां प्रतिगृह्ययथाविधि ११४ नारदःकुशलंदेवमपृच्छत्पाकशासनम्। पृष्टेच
कुशलेसक्तः प्रोवाचवचनंप्रभुः ११५ (इन्द्र उवाच) कुशलस्यांकुरेतावत् सम्भूतेभुवन
त्रये। तत्फलोद्भवसम्पत्तौ त्वंभवातन्द्रितोमुने! ११६ वेत्सिचैतत्समस्तंत्वं तथापिप
रिचोदकः। निर्वृतिंपरमांयाति निवेद्यार्थंसुहृज्जने ११७ तद्यथाशैलजादेवी योगंयायात्
पिनाकिना। शीघ्रंतदुद्यमःसर्वैरस्मत्पक्षैर्विधीयताम् ११८ अवगम्यार्थमखिलन्ततआ
मन्त्र्यनारदः। शक्रंजगाहभगवान् हिमशैलनिवेशनम् ११९ तत्रद्वारेसविप्रेन्द्रश्चित्र
वेत्रलताकुले। वन्दितोहिमशैलेन निर्गतेनपुरोमुनिः १२० सहप्रविश्यभवनं भुवोभूषण
ताङ्गतम्। निवेदितेस्वयंहैमे हिमशैलेनविस्तृते १२१ महासनेमुनिवरो निषसादातुल
द्युतिः। यथार्हंचार्घ्यपाद्यञ्च शैलस्तस्मैन्यवेदयत् १२२ मुनिस्तुप्रतिजग्राह तमर्घंविधिव
त्तदा। गृहीतार्घमुनिवरमपृच्छच्छ्लक्ष्णयागिरा १२३ कुशलंतपसःशैलः शनैःस्फुलान
नाम्बुजः। मुनिरप्यद्रिराजानमपृच्छत्कुशलन्तदा १२४ (नारद उवाच) अहोऽवता
रिताःसर्वे सन्निवेशेमहागिरे!। पृथुत्वंमनसातुल्यं कन्दराणांतथाचल! १२५ गुरुत्व
न्तेगुणौघानां स्थावरादतिरिच्यते। प्रसन्नताचतोयस्य मनसोऽप्यधिकाचते १२६ नल

काल इन्द्रने अपने सिंहासन से खड़ेहोकर पाद्यादि अर्घपूर्व्वक यथार्थरीति से नारदजी का पूजन
किया और नारदमुनि ने भी उसका पूजन यथार्थ विधिसे ग्रहण किया फिर इन्द्रकी कुशल
पूछी तब इन्द्रने कहा कि हेमुने अब हमारी कुशलका अंकुर उत्पन्न हुआ है सो आपहमारी कुशल
की सम्पत्तिके निमित्त आलस्यसे रहितहो १०९।११६ यद्यपि आपसब कुछ जानतेभी हैं तथापि हम
प्रार्थना करते हैं क्योंकि प्रियजन जब अपने कार्य्यका निवेदनकर चुकताहै तब परमानन्दको प्राप्त
होताहै ११७ जिसप्रकारसे हिमाचल की पुत्री शिवजीके सकाशसे शीघ्रही गर्भको धारणकरे उस
उद्यमको आपही कृपा करिके कहिये ११८ यहबात सुन नारदमुनि इन्द्रके वचनको ग्रहणकर
हिमाचलपर्व्वत पर जातेभये वहां वेत लता आदिकों से विभूषित द्वारपर स्थितहुए नारदमुनि को
हिमाचलपर्व्वत घरसे बाहर निकलकर प्रणाम करताभया और अपने स्थानमें लेजाकर सुवर्ण की
शिलाके आसनपर बैठाताभया ११९।१२० जब नारदजी आसनपर विराजमानहुए तब हिमाचल
पाद्य अर्घ देकर पूजन करताभया नारदमुनि भी उसके दियेहुए पाद्य अर्घको ग्रहण करते भये फिर
हिमाचलने बड़ी मधुरबाणी से नारदजी की कुशल पूछी और नारद ने भी उसकी कुशल पूछी
१२१।१२४ नारदजी ने कहा हे हिमाचल तेरे बिषे सबगुणोंका प्रादुर्भाव है तेरी कन्दराभी सब प-
र्व्वतों से भारी है तुम सब पर्व्वतों से भारी होकर अपने में जल भी महापवित्र धारण करते हो हे
हिमाचल तेरे घरके समान लक्ष्मी हमको कहीं भी नहीं दीखती है यहां तुम्हारे समान स्वर्ग में भी

क्षयामःशैलेन्द्र ! शिष्यतेकन्दरोदरात् । नचलक्ष्मीतथास्वर्गे कुत्राधिकतयास्थिता १२७
नानातपोभिर्मुनिभिः ज्वलनार्कसमप्रभैः । पावनैःपावितोनित्यंत्वत्कन्दरसमाश्रितैः १२८
अवमत्यविमानानि स्वर्गवासविरागिणः । पितुर्गृहइवासन्ना देवगन्धर्वकिन्नराः १२९ अ
हो ! धन्योऽसिशैलेन्द्र ! यस्यतेकन्दरंहरः । अध्यास्तेलोकनाथोऽपि समाधानपरायणः
१३० इत्युक्तवतिदेवर्षौ नारदेसादराङ्गिरा । हिमशैलस्यमहिषी मेनामुनिदिदृक्षया १३१
अनुयातादुहित्रातु स्वल्पालिपरिचारिका । लज्जाप्रणयनम्राङ्गीप्रविवेशनिवेशनम् १३२
तत्रस्थितोमुनिवरः शैलेनसहितोवशी । दृष्ट्वातुतेजसोराशिं मुनिंशैलप्रियातदा १३३ व
वन्देगूढवदना पाणिपद्मकृताञ्जलिः । तांविलोक्यमहाभागो महर्षिरमितद्युतिः १३४ आ
शीर्भिरमृतोद्गाररूपाभिस्तांव्यवर्धयत् । ततोविस्मितचित्तातुहिमवद्गिरिपुत्रिका १३५
उदैक्षन्नारदंदेवी मुनिमद्भुतरूपिणम् । एहिवत्सेतिचाप्युक्ताऋषिणास्निग्धयागिरा १३६
कण्ठेगृहीत्वापितरमुत्सङ्गेसमुपाविशत् । उवाचमातातां देवीमभिवन्द्यपुत्रिके ! १३७
भगवन्तंततोधन्यं पतिमाप्स्यसिसम्मतम् । इत्युक्तातुततोमात्रा वस्त्रान्तपिहितानना
१३८ किञ्चित्कम्पितमूर्द्धातु वाक्यंनोवाचकिञ्चन । ततःपुनरुवाचेदंवाक्यंमातासुतान्त
दा १३९ वत्से ! वन्दयदेवर्षिं ततोदास्यामितेशुभम् । रत्नक्रीडनकंरम्यं स्थापितंयच्चिरं
मया १४० इत्युक्तातुततोवेगादुद्धृत्यचरणौतदा । ववन्देमूर्ध्निसन्धाय करपङ्कजकुड्म
लम् १४१ कृतेतुवन्दनेतस्या मातासखिमुखेनतु । चोदयामासशनकैस्तस्याःसौभाग्य

शोभा नहीं है १२५।१२७ अनेक प्रकारके तप करनेवाले अग्निके समान प्रभाववाले मुनियों से
तुम नित्यही पवित्र रहते हो १२८ देवता, गन्धर्व और किन्नर यहसब विमानोंका अपमान करके
पिताके घरके समान तुममें वास करते हैं १२९ हे शैलेंद्र तू बड़ा धन्यहै क्योंकि तेरी गुफामें लोकों
के नाथ महादेवजी समाधि लगायेहुए तप करते हैं १३० जब इसप्रकारके वचन नारदजी कहचुके
तब हिमाचलकी स्त्री मेना भी इन मुनिके दर्शन को आई १३१ और अपनी पुत्री समेत मेनाजो
लज्जासे युक्तहुई नम्रतापूर्व्वक एकपीढ़ेपर बैठगई १३२ और हिमाचलके पास बैठेहुए तेजस्स्वरूपी
नारदमुनिको प्रणामके निमित्त मुखछुपाये हुए दोनों हाथों से अंजली बांधी उसको देखकर नारद
मुनि अमृतके समान आशीर्व्वादों के वचनोंसे उसके चित्तको प्रसन्न करतेभये फिर हिमाचल की
पुत्री नारद मुनिको देखकर आश्चर्य्य से गोदीमें चिपटजाती भई तब नारदमुनिने उसको पुचकार
कर कहा कि हे बच्ची हमारे पास आओ १३३।१३६ उससमय पार्व्वती अपने पिताकी गोदी में
जाकर कण्ठ पकड़कर बैठगई तब उसकी माताने कहा हे पुत्री इन मुनिको तू प्रणामकर इनकेही
प्रणाम करने से तू उत्तम ईश्वर धन्यवाद के योग्य पतिको पावेगी यह माता की बाणी सुनकर
हिमाचल की पुत्री वस्त्र से अपने मुखको ढकलेती भई १३७।१३८ और कुछेक मस्तक तो
कपाया परन्तु बोली नहीं तब इसकी माता फिर बोली हे पुत्री तू इनको प्रणाम करले मैं तुझको
बहुत दिनों का धराहुआ सुन्दर रत्नों का खिलौना देदूंगी यह वचन सुनकर शीघ्रही खड़ीहोके उस

शंसिनाम् १४२ शरीरलक्षणानांतु विज्ञानायतुकौतुकात्। स्त्रीस्वभावाद्यद्दुहितुश्चिंतांहृदि
समुद्वहन् १४३ ज्ञात्वातदिङ्गितंशैलोमहिष्याहृदयेनतु।अनुद्गीर्णोक्षतिर्मेनरम्यमेतदुपस्थि
तम् १४४ चोदितःशैलमहिषीसख्यामुनिवरस्तदा।स्मिताननोमहाभागोवाक्यंप्रोवाचना
रदः १४५ नजातोऽस्याःपतिर्भद्रे! लक्षणैश्चविवर्जिता। उत्तानहस्तासततंचरणैर्व्यभिचा
रिभिः १४६ स्वच्छायया भविष्येयंकिमन्यद्बहुभाष्यते।श्रुत्वैतत्सम्भ्रमाविष्टोध्वस्तधैर्योम
हाबलः १४७ नारदंप्रत्युवाचाथसाश्रुकण्ठोमहागिरिः(हिमवानुवाच)संसारस्यातिदोषस्य
दुर्विज्ञेयागतिर्यतः १४८ सृष्टयांचावश्यभाविन्यांकेनाप्यतिशयात्मना। कर्त्रांप्रणीतामर्या
दास्थितासंसारिणामियम् १४९ योजायतेहियद्बीजोजनितुःसह्यसार्थकः। जनिताचापि
जातस्य नकश्चिद्दितियत्स्फुटम् १५० स्वकर्मणैवजायन्तेविविधाभूतजातयः। अण्डजो
ह्यण्डजाज्जातः पुनर्जायेतमानवः १५१ मानुषाच्चसरीसृप्यां मनुष्यत्वेनजायते। तत्रा
पिजातौश्रेष्ठायां धर्म्मस्योत्कर्षणेनतु १५२ अपुत्रजन्मिनःशेषाः प्राणिनःसमवस्थिताः।
मनुजास्तत्रजायन्ते यतोनगृहधर्मिणः १५३ क्रमेणाश्रमसंप्राप्तिर्ब्रह्मचारिव्रतादनु। त
स्यकर्तुर्नियोगेन संसारोयेनवर्द्धितः १५४ संसारस्यकुतोवृद्धिः सर्वेस्युर्य्यदतिग्रहाः। अ
तःकर्त्रांतुशास्त्रेषु सुतलाभःप्रशंसितः १५५ प्राणिनांमोहनार्थाय नरकत्राणसंश्रयात्।

ने मुनिके चरणोंको छुआ और मस्तक नवाकर प्रणामको किया १३९। १४१ जब पार्वतीजी
प्रणाम करचुकीं तब इनकी मातामेना अपनी सखी के मुखसे नारदमुनिको शनैः सुनाकर इस
के शरीर के सौभाग्यके लक्षणोंको पूछती भई अपने स्त्रीपने के स्वभाव से पुत्रीकी चिंता हृदय
में धारणकर बड़े आश्चर्य्यसे उसके सबवृत्तान्त को पूछतीभयी १४२। १४३ और वह हिमाचल
पर्व्वत भी अपनी स्त्रीके पूछेहुए इसप्रश्नको योग्य समझताभया १४४ इसके अनन्तर हिमाचलकी
स्त्रीसे पूछेहुए नारदमुनि हँसकर यहवचन बोले १४५ हेभद्रे इसकापति नहीं जन्माहै यहलक्षणों से
रहितहै ईसके हाथ मुँदेहुएहैं इसके चरणभी अपनी छायाकरके स्वेच्छाचारी हैं अर्थात् अपनीइच्छा-
पूर्व्वक विचरने वालेहैं और अधिक क्याकहूं ऐसे वचनको सुनकर महाबली हिमाचलका चित्तभ्रंश
होगया धैर्य्य नहीं रहा अश्रुपात आगये ऐसी दशाको प्राप्तहोकर हिमाचल नारदजीसे बोला कि
संसारकी बड़ी कठिनगति है १४६। १४८ संसारी पुरुषोंकी अवश्यहोने वाली भावीकी स्थिति
विधाताकी रचीहुई है और जो जिसके बीजसे उत्पन्नहोताहै वह उसके समान नहीं होता जन्मे-
हुएको उत्पन्न करनेवालाभी कोई नहीं है यह प्रसिद्धि चली आती है क्योंकि अनेक प्रकारकी प्रजा
कर्मोंकेही द्वाराहोती है अंडेसे अंडजजाति उत्पन्नहोती है मनुष्यके मनुष्य उत्पन्नहोताहै सर्प बिच्छू
आदिकोंके सर्प बिच्छूही उत्पन्न होतेहैं मनुष्य नहीं होते परन्तु वहांभी श्रेष्ठजातिमें धर्म के प्रभाव से
जन्म होताहै १४९। १५२ बहुतसे प्राणियोंके पुत्रोंका जन्म नहीं होताहै उत्तम गृहस्थी पुरुषों के
भी कहीं २ पुत्रोंका जन्म नहीं होताहै किन्तु कोई भी प्रजानहीं होती है ब्रह्मचर्य्यादिक आश्रमोंकी
क्रमसे स्थितिहै इसी क्रमसे संसारकी वृद्धिहोती है जो सबही संन्यासी होजांय तो संसारकी वृद्धि

स्त्रियाविरहितासृष्टिर्जन्तूनांनोपपद्यते १५६ स्त्रीजातिस्तुप्रकृत्यैव कृपणादैन्यभाषिणी।
शास्त्रालोचनसामर्थ्यामुज्झितंतासुवेधसा १५७ शास्त्रेषूक्तमसन्दिग्धं बहुवारंमहाफल
म्। दशपुत्रसमाकन्या यानस्याच्छीलवर्जिता १५८ वाक्यमेतत्फलभ्रष्टं पुंसिग्लानिकर
म्। कन्याहिकृपणाऽशोच्या पितुर्दुःखविवर्द्धिनी १५९ यापिस्यात्पूर्णसर्वाढ्या पति
म्परम्। कन्याहिकृपणाऽशोच्या पितुर्दुःखविवर्द्धिनी
पुत्रधनादिभिः। किंपुनर्दुर्भगाहीना पतिपुत्रधनादिभिः १६० त्वंचोक्तवान्सुतायामेशरी
रेदोषसंग्रहम्। अहोमुह्यामिशुष्यामि ग्लामिसीदामिनारद! १६१ अयुक्तमथव
क्व्यमप्राप्यमपिसाम्प्रतम्। अनुग्रहेणमेछिन्धि दुःखंकन्याश्रयंमुने! १६२ परिच्छि
न्नेऽप्यसन्दिग्धे मनःपरिभवाश्रयम्। तृष्णामुष्णातिनिष्णाता फललोभाश्रयाशुभा १६३
स्त्रीणांहिपरमंजन्म कुलानामुभयात्मनाम्। इहामुत्रसुखायोक्तं सत्पतिप्राप्तिसंज्ञितम् १६४
दुर्लभःसत्पतिःस्त्रीणां विगुणोऽपिपतिःकिल। नप्राप्यतेविनापुण्यैः पतिर्नार्याकदाचन
१६५ यतोनिःसाधनोधर्म्मः परिमाणोज्झितारतिः। धनंजीवितपर्याप्तं पतौनार्याःप्रतिष्ठि
तम् १६६ निर्धनोदुर्भगोमूर्खः सर्वलक्षणवर्जितः। दैवतंपरमंनार्याः पतिरुक्तःसदैवहि
१६७ त्वयाचोक्तंहिदेवर्षे! नजातोऽस्याःपतिःकिल। एतद्दौर्भाग्यमतुलमसंख्यंगुरुदुःस
हम् १६८ चराचरेभूतसर्गेयदद्यापिचनोमुने। नसजातइतिब्रूषेतेनमेऽव्याकुलंमनः १६९

कैसे होय इसी हेतुसे विधाताने शास्त्रोंमें पुत्रकी उत्पत्ति करनी कही है १५३। १५५ प्राणियों के मोहके निमित्त नरककी रक्षाकरनेवाली सन्तान स्त्रीके विना नहीं होतीहै स्त्रीकी जाति, स्वभावसेही कृपण और दीनहै शास्त्रोंमें बहुधास्थानोंमें सन्देहयुक्त फलकहे हैं दशपुत्रों के समान कन्याकही है जो वह कन्याशील स्वभाववाली न होवे तो पुरुषोंको दुःखदेनेवाली है उसका कुछ भी फलनहीं है ऐसी पिता माताकी दुःखदेनेवाली कन्यासदैव शोचकरनेके योग्य है १५६।१५९ जिस स्त्रीकेपति पुत्रधन आदिकी सबसंपत्ति होती है वह पूर्ण भाग्यवाली कहाती है और जो पति पुत्र धनआदि से रहितहोय वह दुर्भगा कहाती है आपने मेरी पुत्रीके शरीरमें दोषका लक्षणकहा है इसीसे मैं आश्चर्य पूर्वक मोहको प्राप्तहोरहाहूं सूखाजाताहूं बड़ी ग्लानिहोनेसे दुःखपाताहूं १६०। १६१ हे मुने अबजो यह दुःख अयोग्य और असाध्यभी होय तो भी आप इसके दूरकरनेको योग्यहो फलके लोभ के आश्रयहुई तृष्णा मुझको ठगरही है जिन स्त्रियोंको श्रेष्ठ पतिकी प्राप्ति होती है वह इसलोक और परलोक दोनों लोकोंमें अपने दोनों कुलोंको सुखदेती हैं १६२। १६४ स्त्रियोंको प्रियपति मिलना दुर्लभ है पुण्यके विना थोड़े गुणवाला भी पति नहीं मिलताहै क्योंकि स्त्रियोंके तो जीवन पर्य्यन्त साधारण धर्म पतिके संगरमण करनेका है, निर्धन दुर्भगमूर्ख और सब लक्षणों से रहितभी पतिस्त्री का परमदैवत कहा है १६५। १६७ हे देवऋषिजी आपने जो कहा है कि इस के पतिका जन्म नहीं है यह बड़ाभारी निर्भागपना है हेमुने आपने यह भी कहा है कि चराचर जगत् में इसका पतिनहीं जन्मा है इसवार्त्ता से मेरा मन महाव्याकुल होगया है मनुष्य देवता आदिक जातियों के शुभा शुभ लक्षण हाथ पैरोंमें होते हैं सो आपने इसको मुँदे

मनुष्यदेवजातीनां शुभाशुभनिवेदकम्। लक्षणंहस्तपादादौ विहितैर्लक्षणैःकिल १७०
सेयमुत्तानहस्तेति त्वयोक्तामुनिपुङ्गव !। उत्तानहस्तताप्रोक्ता यावतामेवनित्यदा १७१
शुभोदयानांधन्यानां नकदाचित्प्रयच्छताम् । स्वच्छाययास्याश्चरणौ त्वयोक्तौव्यभि
चारिणौ १७२ तत्रापिश्रेयसांह्याशामुने ! तुप्रतिभातिनः । शरीरलक्षणाश्चान्ये पृथक्फ
लनिवेदिनः १७३ सौभाग्यधनपुत्रायुः पतिलाभानुशंसनम् । तैश्चसर्वैर्विहीनेयं त्वमा
त्थमुनिपुङ्गव ! १७४ त्वंमेसर्वंविजानासि सत्यवागसिचाप्यतः । मुह्यामिमुनिशार्दूल !
हृदयंदीर्यतीवमे १७५ इत्युक्त्वाविरतःशैलो महादुःखविचारणात् । श्रुत्वैतदखिलंतस्मा
च्छैलराजमुखाम्बुजात् १७६ स्मितपूर्वमुवाचेदं नारदोदेवचोदितः । (नारद उवाच)
हर्षस्थानेऽपिमहति त्वयादुःखंनिरूप्यते १७७ अपरिच्छिन्नवाक्यार्थे मोहंयासिमहागिरे!।
इमांशृणुगिरंमत्तो रहस्यपरिनिष्ठिताम् १७८ समाहितोमहाशैल ! मयोक्तस्यविचारणे।
नजातोऽस्याःपतिर्देव्या यन्मयोक्तंमहाबल ! १७९ नसजातोमहादेवो भूतभव्यभवोद्भ
वः । शरण्यःशाश्वतःशास्ता शङ्करःपरमेश्वरः १८० ब्रह्मविष्णिवन्द्रमुनयो जन्ममृत्युज
रार्दिताः । तस्यैतेपरमेशस्य सर्वेक्रीडनकागिरे ! १८१ आस्तेब्रह्मातदिच्छातः संभूतोभु
वनप्रभुः । विष्णुर्युगेयुगेजातो नानाजातिर्महातनुः १८२ मन्यसेमाययाजातं विष्णुञ्चा
पियुगेयुगे । आत्मनोनविनाशोऽस्तिस्थावरान्तेऽपिभूधर! १८३ संसारेजायमानस्यम्रिय

हाथवाली कहाहै और मुझको यह श्रेष्ठ मालूम होती है क्योंकि शुभभाग्यवाले धनवाले और प्रतिग्रहनहींलेनेवालों के ऐसे हाथ होतेहैं और इसके चरणोंको भी आप इच्छापूर्वक विचरनेवाले कहतेहो इसबातमें भी मुझको मंगल और कल्याणकी प्राप्ति दखिती है अन्यके शरीर लक्षणोंसे इसके लक्षण विलक्षणहैं अर्थात् सर्व शरीरी लोगोंके लक्षणोंसे रहितहै १६८ । १७३ हे मुनिश्रेष्ठ आपने इस पुत्रीको सौभाग्य आयु और पुत्र इनसब लक्षणोंसे रहित बतलायाहै सो आपमेरे सब अभिप्रायको जानतेहो मैं मोहको प्राप्त होरहाहूं मेरा हृदय फटाजाताहै ऐसे कहकर हिमाचल चुपका होरहा तब नारद मुनि इसवचनको सुनकर आश्चर्य्यपूर्वक हर्षकरके बोले कि हे हिमाचल तुम आनन्द स्थानमें भी शोचकरतेहो १७४ । १७७ हेमहागिरे तुमने अपरिच्छिन्नवाक्यमें मोह कियाहै अब तुम मुझसे रहस्य अर्थात् गुप्तवचनोंको सुनो हेमहाशैल मेरे कहेहुए के विचारकरने में तू सावधान हो जो मैंने कहाहै वह इसका पति जन्माहुआ नहीं है १७८ । १७९ भूत भविष्यत् और वर्त्तमान इन सबके ईश्वर शरण्य शाश्वत शास्ता शंकर महादेव परमेश्वरहैं यहकभी जन्मेनहीं हैं १८० ब्रह्मा विष्णु इन्द्र और मुनि यहतो जन्म मृत्यु और जरावस्था इनसे पीड़ित रहते हैं और महादेवजीके यह सब क्रीड़ाके स्थानहैं उन्हीं महादेवजीकी इच्छासे ब्रह्मा अपने भुवनके पति होरहेहैं विष्णु युग २ में अनेक जातियोंमें महान् शरीरोंको धारण करते हैं १८१ । १८२ मायाके वशीभूत युग २ में जन्मेहुए विष्णुकेभी आत्माकानाश नहीं होताहै हे हिमाचल मरनेवाले देहधारीका शरीर संसारमें नष्टहोजाताहै परन्तु आत्माका कभी भी नाश नहीं होता ब्रह्मासे लेकर स्थावर वृक्षादि पर्य्यन्त सब संसार

माणस्यदेहिनः। नश्यतेदेहएवात्र नात्मनोनाशउच्यते १८४ ब्रह्मादिस्थावरान्तोऽयंसं
सारोयःप्रकीर्तितः। सजन्ममृत्युदुःखार्तो ह्यवशःपरिवर्त्तते १८५ महादेवोऽचलःस्थाणु
र्नजातोजनकोऽजरः। भविष्यतिपतिःसोऽस्या जगन्नाथोनिरामयः १८६ यदुक्तश्चमया
देवी लक्षणैर्वर्जितातव। शृणुतस्यापिवाक्यस्य सम्यक्त्वेनविचारणम् १८७ लक्षणंदै
विकोह्यङ्गः शरीरावयवाश्रयः। सर्वायुर्द्धनसौभाग्यपरिमाणप्रकाशकः १८८ अनन्त
स्याप्रमेयस्य सौभाग्यस्यास्यभूधर!। नैवाङ्कोलक्षणाकारः शरीरेसंविधीयते १८९ अ
तोऽस्यालक्षणंगात्रे शैल! नास्तिमहामते!। यथाहमुक्तवानस्या ह्युत्तानकरतांसदा १९०
उत्तानोवरदःपाणिरेषदेव्याःसदैवतु। सुरासुरमुनिव्रातवरदेयंभविष्यति १९१ यथा
प्रोक्तंतदापादौ स्वच्छायाव्यभिचारिणी। अस्याःशृणुममात्रापि वाग्युक्तिंशैलसत्तम!
१९२ चरणौपद्मसङ्काशावस्याःस्वच्छनखोज्ज्वलौ। सुरासुराणांनमतां किरीटमणिका
न्तिभिः १९३ विचित्रवर्णैर्भासन्तौ स्वच्छायाप्रतिविम्बितौ। भार्याजगद्गुरोर्ह्येषा वृषा
ङ्कस्यमहीधर! १९४ जननीलोकधर्म्मस्य सम्भूताभूतभावनी। शिवेयंपावनायैव
त्वत्क्षेत्रेपावकद्युतिः १९५ तद्यथाशीघ्रमेवैषा योगंयायात्पिनाकिना। तथाविधेयंविधि
वत्त्वयाशैलेन्द्रसत्तम! १९६ अत्यन्तंहिमहत्कार्यं देवानांहिमभूधर!। (सूत उवाच)
एवंश्रुत्वातुशैलेन्द्रो नारदात्सर्वमेवहि १९७ आत्मानंसपुनर्जातं मेनेमेनापतिस्तदा।

जन्म मरण के दुःखसे पीड़ित है महादेवजी अचल हैं स्थाणुहैं कभी जन्म नहीं लेते हैं अजर और रोगों से भी रहित हैं ऐसे जगन्नाथ महादेवजी इसतेरी पुत्री के पति होवेंगे १८३। १८६ मैंने जो कहाथा कि यह लक्षणों से रहित है उसके भी विचारको श्रवण करो हे शैलेन्द्र शरीरों के अवयवों के आश्रय होनेवाला पूर्ण आयु धन और सौभाग्य का सूचक दैविक अंगका लक्षण होता है और इसके अनन्त और अतुल सौभाग्यहै इसहेतुसे इसका अंग लक्षणों से रहित है हे शैल मैंने जो इसके हाथसदैव मूंदे रहनेवाले कहे हैं सो यह देवी वरदान देनेके लिये मूंदे हाथ रक्खेगी यह देवी देवता दैत्य और मुनिगण लोगोंको वरदेनेवाली होगी १८७। १९१ मैंने जो कहा था कि इसके चरण अपनी छायाकरके स्वेच्छाचारी हैं इसवचनकी भी युक्तिको सुनो कि कमलके समान कान्तिवाले इसके पैरस्वच्छ नखोंकी कान्तिसे उज्ज्वल रहेंगे उनमें देवता और दानवों के नवेहुए मुकुट मणियों की कान्तिसे विचित्र वर्णों के द्वारा भासते हुओंके प्रतिविम्बरूप दीखेंगे और यहसब जगत्के गुरू श्री महादेवजी की भार्य्या होगी १९२। १९४ लोकोंके धर्मकी जननी होकर भूतों की उत्पन्न करनेवाली यह शिवा तेरे क्षेत्रमें अग्निके समान कान्तिवाली है १९५ इस हेतुसे यह जिसप्रकार से शीघ्रही महादेवजी के साथ नियोगको प्राप्तहोजाय वही विधान तुमको विधिपूर्वक करना योग्य है १९६ हे हिमाचल देवताओंका इससमय अत्यन्त बड़ा-कार्य्य होरहाहै सूतजी कहते हैं कि वह शैलेन्द्र नारदके मुखसे ऐसे सब वृत्तान्तको सुनकर अपने आत्माको फिर जन्मेहुए के समान मानताभया इसके अनन्तर महादेवको नमस्कारकर बड़ीप्रसन्न-

नमस्कृत्यवृषाङ्काय तदादेवायधीमते १९८ उवाचसोऽपिसंहृष्टो नारदन्तुहिमाचलः
(हिमवानुवाच) दुस्तरान्नरकात्घोरादुद्धृतोऽस्मित्वयामुने ! १९९ पातालादहमुद्धृत्य
सप्तलोकाधिपःकृतः । हिमाचलोऽस्मिविख्यातस्त्वयामुनिवराधुना २०० हिमाचलेच
लगुणां प्रापितोऽस्मिसमुन्नतिम् । आनन्ददिवसाहारि हृदयंमेऽधुनामुने ! २०१ ना
व्यवस्यतिकृत्यानां प्रविभागविचारणम् । यदिवाचामधीशः स्यात्त्वद्गुणानांविचारणे
२०२ भवद्विधानांनियतममोघंदर्शनंमुने !। तवास्मान्प्रतिचापल्यं व्यक्तंममहामुने !
२०३ भवद्भिरेवकृत्योऽहं निवासायात्मरूपिणम् । मुनीनांदेवतानांचस्वयंकर्तापिकल्म
षम् २०४ तथापिवस्तुन्येकस्मिन्नाज्ञामेसम्प्रदीयताम् । इत्युक्तवतिशैलेन्द्रेसतदाहर्ष
निर्भरे २०५ तथाचनारदोवाक्यं कृतंसर्वमितिप्रभो !। सुरकार्येयएवार्थस्तवापिसुम
हत्तरः २०६ इत्युक्त्वानारदःशीघ्रंजगामात्रिदिवंप्रति । सगत्वाशक्रभवनममरंसन्ददर्श
ह २०७ ततोऽभिरूपेसमुनिरुपविष्टोमहासने । पृष्टःशक्रेणप्रोवाच हिमजासंश्रयांक
थाम् २०८ (नारद उवाच) समूह्ययत्तुकर्तव्यं तन्मयाकृतमेवहि । किन्तुपञ्चशरस्यैव
समयोऽयमुपस्थितः २०९ इत्युक्तोदेवराजस्तु मुनिनाकार्यदर्शिना। चूतांकुरास्त्रंसस्मार
भगवान्पाकशासनः २१० संस्मृतस्तुतदाक्षिप्रं सहस्राक्षेणधीमता । उपतस्थेरतियुतः
सविलासोझषध्वजः २११ प्रादुर्भूतन्तुतंदृष्ट्वा शक्रःप्रोवाचसादरम्। (शक्र उवाच) उप
देशेनबहुना किन्त्वांप्रतिवदेप्रियम् २१२ मनोभवासितेनत्वं वेत्सिभूतिमनोगतम्। तद्य

तासे हिमाचल नारदमुनिसेंबोला कि हे मुने आपने महाघोर दुस्तर नरकसे मेरा उद्धार करदिया
१९७।१९९ आपने मुझको पातालसे उठाकर सातोंलोकोंका आधिपति बनादिया हे मुनिवर अब
आपने मुझको हिमाचल नामसे विख्यात करदिया अब मुझमें अचलगुण प्राप्तहोगये हैं अब मेरा
हृदय आनन्दके दिनका आहार करनेवालाहोगयाहै २००।२०१ कृत्योंके विभागका विचार नहीं
कियाजाताहै आपके गुणोंके विचारोंको बृहस्पतिभी वर्णन नहीं करसके हैं हे मुने आपके सदृश
मुनियोंके दर्शन बड़ेअमोघहैं तुम्हारी चपलता हमारे प्रतिमहासुखदायीहै आपके प्रतापसे मैं कृतकृत्यहूं
मैं मुनि और देवताओंके भी अपराधोंको करताहूं तौभी मुझे अपना किंकरही समझकर कुछ
आज्ञादीजिये जब हर्षपूर्वक इसप्रकारकी बातें हिमाचलने कहीं तब नारदजी ने कहा कि तुमने सब
कुछ कियाहै देवताओंका जो कार्य्य है वह भी तुमसेही सिद्धहोगा २०२।२०६ ऐसाकहकर नारद
मुनि शीघ्रही स्वर्गको चलेजातेभये वहां इन्द्रके भवनमें जाकर इन्द्रको देखते भये जब नारदमुनि
आसनपर बैठगये तबइन्द्रने पूछा कि कहिये क्यावृत्तान्तहै उससमय नारदजी हिमाचल की पुत्री
की कथा कहतेभये २०७। २०८ नारदजी ने कहा कि हे इन्द्र जो कुछ कि कर्त्तव्य कार्य्य था
वह सब मैंने करदियाहै अब कामदेवका अवसर आने वालाहै अर्थात् अब कामदेवकाकामहै २०९
ऐसे कहतेही इन्द्रने कामदेवका स्मरणकिया वह कामदेव इन्द्रके स्मरण करतेही अपनी रतिनामस्त्री
समेत आकर प्रकटहोताभया उसप्रकटहुए कामदेवको देखकर इन्द्र बड़े आदरपूर्वक बोला कि हे

थार्थकमेवत्वंकुरुनाकसदाम्प्रियम् २१३ शङ्करंयोजयाक्षिप्रं गिरिपुत्र्यामनोभव !। संयु
तोमधुनाचैव ऋतुराजेनदुर्जय! २१४ इत्युक्तोमदनस्तेन शक्रेणस्वार्थसिद्धये । (काम
उवाच)अनयादेवसामग्र्यामुनिदानवभीमया २१५ दुःसाध्यःशङ्करोदेवःकिन्नवेत्सिजग
त्प्रभो !। तस्यदेवस्यवेत्थत्वंकरणन्तुयदव्ययम् २१६ प्रायःप्रसादःकोपोऽपिसर्वोहिमह
तांमहान् । सर्वोपभोगसाराहि सुन्दर्यःस्वर्गसम्भवाः २१७ अध्याश्रितञ्चयत्सौख्यं भव
तानष्टचेष्टितम् । प्रमादादथविभ्रश्येदीशम्प्रातिविचिन्त्यताम् २१८ प्रागेवचेहदृश्यन्तेभू
तानांकार्यसम्भवाः । विशेषंकांक्षतांशक्र ! सामान्याद्भ्रंशनंफलम् २१९ श्रुत्वैतद्वचनं श
क्रस्तमुवाचामरैर्युतः।(शक्र उवाच) वयंप्रमाणास्तेह्यत्ररतिकान्त !नसंशयः २२० सन्दे
शेनविनाशक्तिरपकारस्यनेष्यते । कस्याचिच्चक्वाचिद्दृष्टं सामर्थ्यंनतुसर्वतः २२१ इत्युक्तः
प्रययौकामःसखायंमधुमाश्रितः । रतियुक्तोजगामाशु प्रस्थन्तुहिमभूभृतः २२२ सतुतत्रा
करोच्चिन्तांकार्यस्योपायपूर्विकाम् । महार्था येहिनिष्कम्पामनस्तेषांसुदुर्जयम् २२३ तदादा
वेवसंक्षोभ्य नियतंसुजयोभवेत् । संसिद्धिंप्राप्नुयुश्चैवपूर्वेसंशोध्यमानसम् २२४ कथञ्चवि
विधैर्भावैर्द्वेषानुगमनंविना । क्रोधःक्रूरतरासङ्गाद्द्रावणेर्ष्यांमहासखीम् २२५ चापल्यमूर्घ्नि
विध्वस्तधैर्याधारांमहाबलाम् । तामस्याविनियोक्ष्यामि मनसोविकृतिम्पराम् २२६ पि

मनोभव हम आपको विशेष क्या उपदेशकरैं क्योंकि तुमतो मनहीसे उत्पन्नहोतेहो इसहेतुसे सबके
मनकी जाननेवालेहो अत्र आपयथार्थ रीतिसे स्वर्गकेहितकी वार्त्ताकरनेको योग्यहो शिवजीको बड़ी
शीघ्रता पूर्वक पार्वतीजीसे संयुक्तकरदो और अपनी वसन्तऋतुसे युक्तहोजाओ २१०। २१४ जब
जब इन्द्रने अपने प्रयोजन की सिद्धिके निमित्त कामदेव से ऐसे वचनकहे तबकामदेव कहनेलगा हे
जगत्प्रभो इस मेरीसामग्री से शिवजी दुस्साध्यहैं इसबातको क्या आपनहींजानते हो उन शिवजी
के सब कारणोंको आप अच्छीरीतिसे जानतेहो २१५।२१६ विशेषकरके शिवजीका कोप भी प्रस-
न्नताहै बड़ों में बड़प्पनही रहताहै और तुमने जो उनके चित्त बिगड़ने में अपनासुख विचार कियाहै
सो हे इन्द्र ईश्वरके प्रति ऐसाविचार करने से सर्वस्व नष्ट होजाता है यहां प्रथमही भूतों के कार्य्य
की उत्पत्ति दीखजाती है उसमें जो विशेष चिन्तवनकरते हैं उस्से फलकानाश होजाताहै २१७।२१९
यह वचन सुनकर इन्द्र कामदेव से कहनेलगा कि हे रतिके पति यहां हमही प्रमाण हैं यह वार्त्ता
निस्सन्देहहै कि कुछ समाचार पहुंचने विना तिरस्कार करनेकी शक्तिनहीं होती है प्रत्येकमें यत्रकुत्र
समय परही सामर्थ्य होती है सर्वत्र नहीं होतो है २२० । २२१ यह वचन सुनतेही कामदेव
वसन्तऋतु और अपनी स्त्री रति से भी युक्तहो शीघ्रही हिमाचल के शिखर पर जाताभया २२२
वहां जाकर कार्य्य के उपायकी चिन्ताकरनेलगा कि जो अचल महात्मा होतेहैं उनका मनबड़ा दुर्जय
होताहै २२३ इस्से प्रथम उनके मनकोही चलायमान करनायोग्यहै ऐसा करने के पीछे जयहोतीहै
क्योंकि प्रथम मनकेही शोधनेसे सिद्धिकी प्राप्तिहोतीहै २२४ धैर्य्यकी नाशकारी चपल स्वभाववाली
धाराको अनेक प्रकारके द्वेषों प्रभाव से क्रोध ईर्षा से रहित इनके मनकी विकृति के निमित्त कैसे

धायधैर्यद्वाराणि सन्तोषमपकृष्यच । अवगन्तुंहिमांतत्र नकंश्चिदातिपण्डितः २२७ वि
कल्पमात्रावस्थाने वैरूप्यंमनसोभवेत् । पश्चान्मूलक्रियारम्भ गम्भीरावर्तदुस्तरः २२८
हरिष्यामिहरस्याहं तपस्तस्यस्थिरात्मनः । इन्द्रियग्राममावृत्य रम्यसाधनसंविधिः २२९
चिन्तयित्वेतिमदनोभूतभर्तुस्तदाश्रमम् । जगामजगतीसारं सरलद्रुमवेदिकम् २३०
शान्तसत्वसमाकीर्णमचलप्राणसंकुलम् । नानापुष्पलताजालं गगनस्थगणेश्वरम् २३१
निर्व्यग्रवृषभाध्युष्टनीलशाद्वलसानुकम् । तत्रापश्यत्त्रिनेत्रस्य रम्यंकञ्चिद् द्वितीयकम्
२३२ वीरकंलोकवीरेशमीशानसदृशद्युतिम् । यक्षकुंकुमकिञ्जल्कपुञ्जपिङ्गजटासटम्
२३३ वेत्रपाणिनमव्यग्र मुग्रभोगीन्द्रभूषणम् । ततोनिमीलितोन्निद्रपद्मपत्राभलोचन
म् २३४ प्रेक्षमाणमृजुस्थानस्थितनासाग्रलोचनम् । अवस्तरससिंहेन्द्रचर्मलम्बोत्तरी
यकम् २३५ श्रवणाहिफलन्मुक्तनिःश्वासानलपिङ्गलम् । प्रेङ्खत्कपालपर्य्यन्ततुम्बिलं
विजटाचयम् २३६ कृतवासुकिपर्यङ्कनाभिमूलनिवेशितम् । ब्रह्माञ्जलिस्थपुच्छाग्रनि
बद्धोरगभूषणम् २३७ ददर्शशङ्करंकामः क्रमप्राप्तान्तिकंशनैः । ततोभ्रमरझङ्कारमाल
म्बिद्रुमसानुकम् २३८ प्रविष्टःकर्णरन्ध्रेण भवस्यमदनोमनः । शङ्करस्तमथाकर्ण्य मधुरं
मदनाश्रयम् २३९ सस्मारदक्षदुहितान्दयितांरक्तमानसः । ततःसातस्यशनकैस्तिरोभू
यातिनिर्मला २४० समाधिभावनातस्थौ लक्ष्यप्रत्यक्षरूपिणी । ततस्तन्मयतांयाता

छोड़ूंगा धैर्य्यके द्वारों को रोककर सन्तोषको पृथक् हटाके जो कोई मुझको शिवजी के मनमें प्राप्त करदे ऐसाकोई भी चतुर नहीं है २२५। २२७ विकल्पमात्रा के विचारने में मनकी विकृति होती है फिर मूल क्रियाके आरंभों में दुस्तर भौंरी गिरती है इसलिये मैं उस स्थिर आत्मावाले शिवजी के तप को हरूंगा रमणीक साधनकी विधिसे मैं शिवजी के इन्द्रियगणोंको आच्छादित करूंगा ऐसा चिन्तवनकरके कामदेव शिवजी के आश्रममें जाताभया २२८। २३० संपूर्ण पृथ्वीकासार अनेकप्रकार की मणियों से युक्त नानापुष्पलता औरजालीसे शोभितशिखरपरखड़े विराजमान गणेश्वरसे युक्त हरित तृणोंपर स्थित सावधाननन्दीसमेत उस शिवजीके रमणीक आश्रमको और शिवजी के समान कान्तिवाले शूरवीरोंके स्वामी वीरभद्रको देखताहुआ यक्षों की केशरसे रंगीहुई पीतजटावाले हाथमें वेत लिये सर्पोंके भूषणधारी प्रफुल्लित कमलके समान नेत्रोंवाले सरलस्थानको देखतेहुए नासिकाके आगे दृष्टि कियेहुए सिंहके चर्मको धारणकिये अग्निके समान श्वासलेने वाले वासुकि सर्प की शय्यापर विराजमान नाभि पर्य्यन्त उसमें घुसेहुएबंधीहुई ब्रह्मांजलीसे शोभिततेजमूर्ति शिवजीको वह कामदेव देखताभया २३१। २३७ और शनैः २ उनके समीपजा भ्रमरों के झंकार से शोभित वृक्षोंवाले पर्वत पर स्थित हुए महादेवजी के कान में वह कामदेव प्रवेश करगया इसके पीछे कामदेवके आश्रयहुए शिवजी भ्रमरों के मधुर शब्दोंको सुनकर मनसे आसक्तहो दक्षकी पुत्री पार्वतीको स्मरण करतेभये और उनके स्मरण करतेही वह पार्वतीशनैः अन्तर्द्धानहोके समाधि भावना में स्थितहोकर लक्ष्यके प्रत्यक्ष रूपवाली होजातीभई फिर अपनेको कामके वशीभूत जान अन्तः

प्रत्यूहपिहिताशयः २४१ वशित्वेनबुबोधेशो विकृतिंमदनात्मिकम् । ईषत्कोपसमावि
ष्टोधैर्यमालम्ब्यधूर्ज्जटिः २४२ निरासेमदनस्थित्या योगमायासमावृतः । सतयामा
यथाविष्टो जज्वालमदनस्ततः २४३ इच्छाशरीरोदुर्जेयो रोषदोषमहाश्रयः । हृदया
न्निर्गतःसोऽथ वासनाव्यसनात्मकः २४४ बहिस्थलंसमालम्ब्य ह्युपतस्थौझषध्वजः ।
अनुयातोऽथहृद्येन मित्रेणमधुनासह २४५ सहकारतरौदृष्ट्वा मृदुमारुतनिर्धुतम् । स्तब
कंमदनोरम्यं हरवक्षसिसत्वरम् २४६ मुमोचमोहनंनाम मार्गणंमकरध्वजः । शिवस्यहृ
दयेशुद्धे नाशशालीमहाशरः २४७ पपातपरुषप्रांशुः पुष्पबाणोविमोहनः । ततःकरणस
न्देहो विद्धस्तुहृदयेभवः २४८ बभूवभूधरौपम्य धैर्योऽपिमदनोन्मुखः । ततःप्रभुत्वाद्भा
वानां संक्षोभंसमपद्यत २४९ बाह्यंबहुसमासाद्य प्रत्यूहप्रसवात्मकम् । ततःकोपानलो
द्भूतघोरहुङ्कारभीषणे २५० बभूववदनेनेत्रं तृतीयमनलाकुलम् । रुद्रस्यरौद्रवपुषो ज
गत्संहारभैरवम् २५१ तदन्तिकस्थेमदने व्यस्फारयतधूर्जटिः । तंनेत्रविस्फुलिङ्गेन क्रो
शतान्नाकवासिनाम् २५२ गमितोभस्मसाच्चूर्णं कन्दर्पःकामिदर्पकः । सतुतंभस्मसात्कृ
त्वा हरनेत्रोद्भवोऽनलः २५३ व्यजृम्भतजगत्दग्धुं ज्वालाहुङ्कारघस्मरः । ततोभवोजग
द्धेतोर्व्यभजज्जातवेदसम् २५४ सहकारेमधौचन्द्रसुमनःसुपरेष्वपि । भृङ्गेषुकोकिला
स्येषु विभागेनस्मरानलम् २५५ सबाह्यान्तरविद्धेन हरेणस्मरमार्गणः । रागस्नेहसमि
द्धान्तर्धावन्तीव्रहुताशनः २५६ विभक्तलोकसंक्षोभकरोदुर्वारजृम्भितः । संप्राप्यस्नेह
संपृक्तंकामिनांहृदयंकिल २५७ ज्वलत्यहर्निशंभीमो दुश्चिकित्स्यमुखात्मकः । विलोक्य

करण आच्छादित होनेमें कामदेवकी विकृतिमें प्राप्तहोके शिवजी बड़े क्रोधपूर्व्वक धैर्य्यकोधारण करते भये और कामदेवका निरादर करके अपनी योगमायासे युक्तहोते भये फिर उसमायासे आच्छादित हुआ कामदेव भस्महोनेलगा फिर कामदेवकी इच्छाका शरीर व्यसनकी वासनासे युक्तहो हृदयसे वाहर निकलताभया २३८।२४४ फिर अपने मित्रवसन्तऋतुसहित कामदेव बाहरखड़ाहोकर सुगन्धित वृक्षके ऊपर कोमलवायुके चलनेकेद्वारा सुगन्धिवाले पुष्पके गुच्छेको मोहनबाण बनाकर शिवजीके हृदयमें मारताभया जबशिवजीके शुद्धहृदयमें पुष्पोंका बाणलगा तब शिवका हृदय बिंधगया उससमय शिवजीके अन्तःकरणमें सन्देहहोगया और पर्व्वतके समानधैर्य्यको धारणकरतेभये इसके पीछे शिवजीके क्षोभ उत्पन्नहोनेसे क्रोधकी अग्नि प्रकटहुई शिवजीका तीसरा नेत्रभी उस अग्निसे व्याकुलहोकर जगत्के संहारकरनेके समान भयंकर शरीरवालाहोगया २४५।२५१ उसनेत्रके खुलनेसे अग्निके कण झड़नेलगे तब वड़ी शीघ्रतासे उस शिवजी के तीसरे नेत्रकी अग्निने कामदेवको भस्म करदिया फिर जगत्के संहारकरनेवाले शिवजीने जंभाई लेकर उस कामदेवकी अग्निको आम्रके वृक्ष चैत्रके महीने चन्द्रमा- पुष्प-भ्रमर और कोकिला इनसबको मुखमें विभागपूर्व्वक बांट दिया २५२।२५५ और वाहरसे छोड़ेहुए कामदेवके बाणको भी अपनी तीव्रअग्निसे जलादिया जिन २ स्थानोंमें शिवजीने कामदेवकी अग्निको बांटाहै उन २ स्थानोंको प्राप्तहोकर कामी पुरुषों

हरहुङ्कारज्वालाभस्मकृतंस्मरम् २५८ विललापरतिःक्रूरं बन्धुनामधुनासह। ततोविलप्यबहुशो मधुनापरिसान्त्विता २५९ जगामशरणंदेव विन्दुमौलिंत्रिलोचनम्। भृङ्गानुयातांसंगृह्य पुष्पितांसहकारजाम् २६० लतांपवित्रकस्थाने पाणौपरभृतांसखीम्। निर्बध्यतुजटाजूटं कुटिलैरलकैरतिः २६१ उद्धूल्यगात्रंशुभ्रेण हृद्येनस्मरभस्मना। जानुभ्यामवनीङ्कृत्वा प्रोवाचेन्दुविभूषणम् २६२ (रतिरुवाच) नमःशिवायास्तुनिरामयाय नमःशिवायास्तुमनोमयाय। नमःशिवायास्तुसुरार्चिताय तुभ्यंसदाभक्तकृपापराय २६३ नमोभवायास्तुभवोद्भवाय नमोऽस्तुतेध्वस्तमनोभवाय। नमोऽस्तुतेगूढमहाव्रताय नमोऽस्तुमायागहनाश्रयाय २६४ नमोऽस्तुशर्वायनमःशिवाय नमोऽस्तुसिद्धायपुरातनाय। नमोऽस्तुकालायनमःकलाय नमोस्तुतेज्ञानवरप्रदाय २६५ नमोऽस्तुतेकालकलातिगाय नमोनिसर्गामलभूषणाय। नमोऽस्त्वमेयान्धकमर्दकाय नमःशरण्यायनमोऽगुणाय २६६ नमोऽस्तुतेभीमगणानुगाय नमोऽस्तुनानाभुवनादिकर्त्रे। नमोऽस्तुनानाजगतांविधात्रे नमोऽस्तुतेचित्रफलप्रयोक्त्रे २६७ सर्वावसानेह्यविनाशनेत्रे नमोऽस्तुचित्राध्वरभागभोक्त्रे। नमोऽस्तुभक्ताभिमतप्रदात्रे नमःसदातेभवसङ्गहर्त्रे २६८ अनन्तरूपायसदैवतुभ्यमसह्यकोपायनमोऽस्तुतुभ्यम्। शशाङ्कचिह्नायसदैवतुभ्यममेयमानायनमःस्तुताय २६९ वृषेन्द्रयानायपुरान्तकाय नमःप्रसिद्धायमहौषधाय। नमोऽस्तुभक्त्याभिमतप्रदाय नमोऽस्तुसर्वार्तिहरायतुभ्यम् २७० चराचराचारविचारवर्यमाचार्यमुत्प्रेक्षितभूतसर्गम्। त्वामिन्दुमौलिंशरणंप्रपन्ना प्रियाप्रमेयंमहतांमहेशम् २७१ प्रयच्छमेकामयशःसमृद्धिं पुनः

का हृदय अहर्निश जलताहै २५६। २५७ फिर शिवजीके हुंकार शब्दसे भस्म हुए कामदेवको देखकर उसकी स्त्रीरति उसके भाई चैत्र समेत विलापको करतीभई जब बहुतसा विलापकरचुकी तबचैत्र के समझाने से शिवजीकेही शरणमें जातीभई फिर खिलीहुई बेल और आंबके वृक्षको ग्रहणकर अपने पति कामदेवकी भस्मको शरीर पर लगा पृथ्वीमें घोंटूनवाकर चन्द्रभूषण शिवजीसे बोली २५८। २६२ कि हे रोगादिसे रहित शिवजी आपके अर्थ नमस्कारहै मनोमय शिवको नमस्कारहै देवताओंसे पूजित भक्तोंपैसदैव कृपाकरनेवाले आपको नमस्कारहै २६३ भव भवोद्भव मनोभव अर्थात् कामदेवके भस्मकरनेवाले आपको नमस्कारहै गूढ़ महाव्रतवाले मायासे रहित २६४ शर्व शिव, सिद्ध, पुरातन, काल, कल और ज्ञानवरप्रद आपके अर्थ नमस्कारहै २६५ कालकी कलाके उल्लंघन करनेवाले संहाररूप आभूषणधारी अन्धक दैत्यके मारनेवाले शरण्य और अगुण ऐसे आपके अर्थनमस्कारहै २६६।२६८ अनन्तरूप अतुल क्रोधवाले चन्द्रमाके चिह्नवाले बड़ेमानवाले आपकोनमस्कारहै २६९ बैलकीसवारी करनेवाले त्रिपुरका नाशकरनेवाले प्रसिद्धमहाऔषध भक्तके प्रयोजनके सिद्धकरनेवाले सबकी पीड़ा दूरकरनेवाले ऐसे तुमको नमस्कार है चराचर भूतों के आचारके आचार्य्यमहतोंकेभी महान् ऐसे आपकी मैंशरणमेंहूं २७०।२७१ हे प्रभो मुझको कामकी

प्रभो ! जीवतुकामदेवः । प्रियंविनात्वांप्रियजीवितेषु त्वत्तोऽपरःकोभुवनेष्विहास्ति २७२ प्रभुःप्रियायाःप्रसवःप्रियाणां प्रणीतपर्यायपरापरार्थः । त्वमेवमेकोभुवनस्यनाथो दयालुरुन्मूलितभक्तभीतिः २७३ इत्थंस्तुतःशङ्करईड्यईशो वृषाकपिर्मन्मथकान्तयातु । तुतोषदोषाकरखण्डधारी उवाचचैनांमधुरंनिरीक्ष्य २७४ (शङ्करउवाच) भवितेतिचकामोऽयं कालात्कान्तोऽचिरादपि । अनङ्गइतिलोकेषु साविख्यातिंगमिष्यति २७५ इत्युक्ता शिरसावन्द्य गिरिशङ्कामवल्लभा । जगामोपवनंरम्यं रतिस्तुहिमभूभृतः २७६ रुरोदचापिबहुशो दीनारम्येस्थलेतुसा । मरणव्यवसायात्तु निवृत्तासाहराज्ञया २७७ अथनारदवाक्येन चोदितोहिमभूधरः । कृताभरणसंस्कारां कृतकौतुकमङ्गलाम् २७८ स्वर्गपुष्पकृतापीडां शुभ्रचीनांशुकांबराम् । सखीभ्यांसंयुतांशैलो गृहीत्वास्वसुतान्ततः २७९ जगामशुभयोगेन तदासंपूर्णमानसः । सकाननान्युपाक्रम्य वनान्युपवनानिच २८० ददर्शरुदतींनारीमप्रतर्क्यमहौजसम् । रूपेणासदृशींलोके रम्येषुवनसानुषु २८१ कौतुकेनपरामृश्य तांदृष्ट्वारुदतींगिरिः । उपसर्प्यततस्तस्या निकटेसोऽभ्यगच्छत २८२ (हिमवानुवाच) कासिकस्यासिकल्याणि ! किमर्थञ्चापिरोदिषि । नैतदल्पंमहासत्वेकारणंलोकसुन्दरि! २८३ सातस्यवचनंश्रुत्वा उवाचमधुनासह । रुदतीशोकजननं श्वसतीदैन्यवर्द्धनम् २८४ (रतिरुवाच) कामस्यदयितांभार्यां रतिंमांविद्धिसुव्रत !। गिरावस्मिन्महाभाग ! गिरिशस्तपसिस्थितः २८५ तेनप्रत्यूहदृष्टेन विस्फार्यालोक्यलोचनम्। दग्धो

समृद्धिदीजिये इस कामदेवको जीवदानदो तुम्हारे विना. त्रिलोकी में मेरे पतिको जीवदान देने वाला औरकोई नहीं है २७२ वहकामदेव मेरे प्राणोंका पतिहै मुझे आपही एक दयालु दीखतेहो तुमात्रिभुवनके नाथ हो भक्तोंके भयकोदूरकरतेहो २७३ इस प्रकारसे जबकामदेव की स्त्री रतिने कल्याणकारी महादेवजी की स्तुतिकरी तब दोषोंके नाश करने वाले शिवजी इस रतिको देखकर मधुर वाणीसे बोले २७४ कि यह तेरापति बहुतसे कालमें उत्पन्नहोवेगा उससमय इसकामदेवका नाम अनंगहोगा इस वचनको सुनकररति शिवजीको शिरसे दण्डवत्कर हिमाचल पर्व्वत के बगीचों में जातीभई २७५।२७६ वहाँरमणीकस्थल में अपने पतिके मरने के शोचसे बहुतसा रुदनकरती भयी औरशिवजीने आज्ञाकरी तबरोने से निवृत्तहुई २७७ इसके अनन्तर नारद मुनि के वचनसे प्रेरितहुआ हिमाचल पर्व्वत अपनी पुत्री को आभूषण पहराकर मंगलकर पुष्पोंसेशिरगुंथवा नवीन वस्त्र पहराय सखियोंसे युक्त कर सुन्दरमुहूर्त्तमें प्रसन्नहोके शिवजीके पासलेजाता भया फिर मार्गके गह्वरवनोंको उल्लंघनकर वनके बगीचोंमें जाकर रोवतीहुई स्त्रीको देखताभया असाधारण महारूपवती उस रोवतीहुई स्त्रीको देख आश्चर्य्यसे विचारकरताहुआ उसके समीपमें गया २७८।२८२ वहाँ जाकर हिमाचलने कहा हेकल्याणिनि तूकौन है किसकी भार्य्या है और किस निमित्त रोती है हेसुन्दरि यह तुम्हाराथोड़ा अल्पसा शोकनहीं है २८३ ऐसे हिमाचलके कहेहुए वचनको सुनकर रोतीहुई रति अपनेदीनपन औरशोकके सब वृत्तान्तको कहती भई २८४ हे सुव्रत

ऽसौझषकेतुस्तु ममकान्तोऽतिवल्लभः २८६ अहन्तुशरणंयाता तंदेवंभयविह्वला । स्तु
तवत्यथसंस्तुत्या ततोमांगिरिशोऽब्रवीत् २८७ तुष्टोऽहंकामदयिते ! कामोऽयन्तेभविष्य
ति । त्वत्स्तुतिंचाप्यधीयानो नरोभक्त्यामदाश्रयः २८८ लप्स्यतेकांक्षितंकामं निवर्त्यं
मरणादितः । प्रतीक्ष्यतीचतद्वाक्यमाशावेशादिभिर्ह्यहम् २८९ शरीरंपरिरक्षिष्ये क
ञ्चित्कालंमहाद्युते !। इत्युक्तस्तुतदारत्या शैलःसम्भ्रमभीषितः २९० पाणावादायहिसु
तां गन्तुमैच्छत्स्वकम्पुरम् । भाविनोऽवश्यभावित्वाद्भवित्रीभूतभाविनी २९१ लज्जमा
नासखीमुखैरुवाचपितराङ्गिरिम् । (शैलदुहितोवाच) दुर्भाग्येनशरीरेण किंममानेनका
रणम् २९२ कथंचतादृशंप्राप्तं सुखंमेसपतिर्भवेत् । तपोभिःप्राप्यतेऽभीष्टं नासाध्यंहितप
स्यतः २९३ दुर्भगत्वंवृथालोको वहतेसतिसाधने । जीवितात्दुर्भगाच्छ्रेयो मरणंह्यतप
स्यतः २९४ भविष्यामिनसन्देहो नियमैःशोषयेतनुम् । तपसिभ्रष्टसन्देहे उद्यमोऽर्थजि
गीषया २९५ साहन्तपःकरिष्यामि यदहंप्राप्यदुर्लभा । इत्युक्तःशैलराजस्तु दुहित्रास्नेह
विह्वलः २९६ उवाचवाचाशैलेन्द्रो स्नेहगद्गदवर्णया । (हिमवानुवाच) उमेतिचपले !
पुत्रि ! नक्षमंतावकंवपुः २९७ ततःसचिन्तयाविष्टो दुहितांप्रशशंसच । ततोऽन्तरिक्षेदि
व्यावागभूद्भुवनभूतले २९८ उमेतिचपले ! पुत्रि ! त्वयोक्तातनयाततः । उमेतिनामते

मैं कामदेवकी भार्य्याहूं हेमहाभाग इस पर्व्वतमें स्थितहुए महादेव तप कर रहे हैं उसने क्रोधपूर्व्वक
अपने नेत्रको खोलकर मेरेपातिको भस्मकरडाला २८५ । २८६ तबभयसे विह्वलहुई मैं उनकी
शरणमें जाकर स्तुति करतीभई तब मुझसे महादेवजी बोले कि हे दयिते मैं तुझपर प्रसन्नहूं यह
तेरापाति कामदेव उत्पन्नहोजायगा औरतेरीकीहुई स्तुतिको जोपुरुषभक्तिसे करेगा वह मेरे आश्रय
होकर मनोवांछित फलको प्राप्तहोकर जन्म मरणसे निवृत्तहोगा सो उनके वचनकी आशा करती
हुई मैं कितनेही कालतक अपने शरीरकी रक्षाकरूंगी इसप्रकारके रतिके सब वचनोंको सुनकर
हिमाचल संभ्रमपूर्व्वक भयसे संयुक्त होगया २८७ । २९० फिरअपनी पुत्रीको हाथोंमें लेके अपने
पुरमें लौट जानेकी इच्छाकरी तबतो अवश्य भावीके होनेसेयह पार्वतीलज्जाकरके सखियोंके मुखसे
वचन कहलाती भई अर्थात् उनके मुखके द्वारा पार्व्वतीने कहा कि मैंने इस दुर्भग शरीरसे
कौनसासुकर्म रूपकारण कियाहै जो कि ऐसेपातिका सुखदेगा तपकरनेसे मनोवांछित फलकी प्राप्ति
होतीहै तपस्याकरनेवाले को कुछभी असाध्यनहीं है २९१।२९३ साधन होतेहुए भी संसारवृथा
दुःखों को भोगताहै जीवते हुए दुर्भगमनुष्यसे और तपनहीं करने वाले से मरनाही श्रेष्ठ है २९४
मैं अवश्यही नियम व्रतादिकों से अपने शरीरको सुखाऊंगी भ्रष्टहोजाने में उद्यमभीनष्ट होजाताहै
२९५ मैं अवश्यतपकरूंगी पार्वती के इस वचनको सुनकर पुत्रीके स्नेहसे विकलहुआ हिमाचल
गद्गदवाणीसे बोला कि हे पुत्री हे उमे और हेचपले तेराशरीर तपस्याकरने को समर्थनहींहै ऐसा
कह चिन्तासे युक्तहो अपनी पुत्रीकी सराहना करता भया उस समय आकाश से देववाणीहुई कि
हे हिमाचल जोतुमने इसपार्वतीको उमा चपला यहदो नामसे संबोधनकियाहै यही इसके नाम

नास्या भुवनेषुभविष्यति २९९ सिद्धिंचमूर्तिमत्येषा साधयिष्यतिचिन्तिताम्। इतिश्रुत्वा तुवचनमाकाशात्काशपाण्डुरः ३०० अनुज्ञायसुतांशैलो जगामाशुस्वमन्दिरम्। (सूत उवाच) शैलजापियर्यौशैलमगम्यमपिदैवतैः ३०१ सखीभ्यामनुयातानु नियतानगराजजा। शृङ्गंहिमवतःपुण्यं नानाधातुविभूषितम् ३०२ दिव्यपुष्पलताकीर्णं सिद्धगन्धर्वसेवितम्। नानामृगगणाकीर्णं भ्रमराध्युष्टपादपम् ३०३ दिव्यप्रस्रवणोपेतं दीर्घिकाभिरलंकृतम्। नानापक्षिगणाकीर्णं चक्रवाकोपशोभितम् ३०४ जलजस्थलजैःपुष्पैः प्रोत्फुल्लैरुपशोभितम्। चित्रकन्दरसंस्थानंगुहागृहमनोहरम् ३०५ विहङ्गसङ्घसंजुष्टं कल्पपादपसङ्कटम्। तत्रापश्यन्महाशाखं शाखिनंहरितच्छदम् ३०६ सर्वर्तुकुसुमोपेतं मनोरथशतोज्ज्वलम्। नानापुष्पसमाकीर्णंनानाविधफलान्वितम् ३०७ नतंसूर्यस्यरुचिभिर्भिन्नसंहतपल्लवम्। तत्राम्बराणिसन्त्यज्य भूषणानिचशैलजा ३०८ संवीतावल्कलैर्दिव्यैर्दर्भैर्निर्मितमेखला। त्रिःस्नातपाटलाहारा बभूवशरदांशतम् ३०९ शतमेकेनशीर्णेन पर्णेनावर्त्तयत्तदा। निराहाराशतंसाभूत् सानानातपसान्निधिः ३१० ततउद्वेजिताःसर्व्वे प्राणिनस्तत्तपोऽग्निना। ततःसस्मारभगवान् मुनीन्सप्तशतक्रतुः ३११ तेसमागम्य मुनय :सर्वेसमुदितास्ततः। पूजिताश्चमहेन्द्रेण पप्रच्छुस्तंप्रयोजनम् ३१२ किमर्थन्तु सुरश्रेष्ठ! संस्मृतास्तुवयन्त्वया। शक्रःप्रोवाचशृण्वन्तु भगवन्तः! प्रयोजनम् ३१३

त्रिलोकी में प्रसिद्धहोंगे २९६।२९९ यह तुम्हारी पुत्री चिन्तवनकीहुई वार्ताको सिद्ध करेगी इस आकाशवाणीको सुनकर हिमाचल अपनी पुत्रीकी आज्ञा लेकर अपने स्थानको आताभया सूतजी बोले कि इसके अनन्तर पार्वती भी देवताओंसे भी अगम्य पर्व्वतपर तपकरने को जातभई ३००।३०१ सखियों से युक्तहुई पार्वती हिमालय पर्व्वतके उस पवित्र शिखरमें जातभई जो अनेक प्रकारकी धातुओंसे विभूषित दिव्य पुष्पलता आदिसे शोभित सिद्धगन्धर्वोंसे सेवित अनेक मृगगणोंसे आकीर्ण भ्रमरोंसे गुंजायमान वृक्षोंसे युक्त दिव्य जलोंके झिरने और वापियोंसे सुशोभित अनेक प्रकारके पक्षियोंसे व्याप्त चक्रवाकोंसे सुन्दर जल स्थलवाले पुष्पोंसे सुगन्धित विचित्र कन्दराओंके स्थान और गुफाओंसे शोभित ३०२।३०५ पक्षियोंके समूहोंके शब्दोंसे शब्दायमान कल्पतरु वृक्षोंसे शोभित बहुशाखावाले वृक्षोंसे निविड़सब ऋतुओंके पुष्पोंसे पुष्पित अनेक प्रकारके फलोंसे आढय सूर्य्यकी किरणोंसे प्रकाशित और अनेक प्रकारके जीवजन्तुओंसे आनन्दकारी था ऐसे पवित्रतम शिखरपर जाकर वह पार्वती अपने आभूषण वस्त्रोंको त्याग बक्कलके वस्त्रधारण करके डाभकी क्षुद्रघंटिका बांधलेतीभई प्रतिदिन तीनवार स्नानकरती पाटल वृक्षके बक्कलोंके आहारसे सौ १०० वर्ष व्यतीत करतीभई फिर सौ १०० वर्षतक पृथ्वीमें गिरेहुए पत्तोंकोही खाया फिर सौ १०० वर्षतक निराहारहीरही ऐसे २ प्रकारसे और नियमोंसे पूर्ण तपकरतीभई ३०६। ३१० फिर उसके तपकी अग्निसे सबप्रजा कंपायमानहुई तब इन्द्र सप्तऋषियोंका स्मरणकरता भया उससमय वह सप्तऋषिबड़ी प्रसन्नतासे इन्द्रके समीपआये इन्द्रने उनका पूजन किया तब उन्होंने इन्द्र

हिमाचलेतपोघोरं तप्यतेभूधरात्मजा । तस्याह्यभिमतंकामं भवन्तःकर्तुमर्हथ ३१४ ततःसमापतन्देव्या जगदर्थंत्वरान्विताः । तथेत्युक्तातुशैलेन्द्रं सिद्धसङ्घातसेवितम् ३१५ ऊचुरागत्यमुनयस्तामथोमधुराक्षरम् । पुत्रि!किन्तेऽव्यवसितः कामःकमललोचने! ३१६ तानुवाचततोदेवी सलज्जाचित्रवाङ्मुखी । तपस्यतोमहाभागाः प्राप्यमौनंभवादृशान् ३१७वन्दनायनियुक्ताधीः पावयत्यविकल्पितम्॥प्रश्नोन्मुखत्वाद्भवतां युक्तमासनमादितः ३१८ उपविष्टाःश्रमोन्मुक्तास्ततःप्रक्ष्यथमामतः इत्युक्तासाततश्चक्रे कृतासनपरिग्रहान् ३१९ सातुतान्विधिवत्पूज्यान् पूजयित्वाविधानतः । उवाचादित्यसंकाशान् मुनीन् सप्तसतीशनैः ३२० त्यक्त्वाव्रतात्मकंमौनं मौनंजग्राहह्रीमयम् । भावंतस्यास्तुमौनान्तं तस्याःसप्तर्षयोयथा ३२१ गौरवाधीनतांप्राप्ताः पप्रच्छुस्तांपुनस्तथा । सापिगौरवगर्भेण मनसाचारुहासिनी ३२२ मुनीन्शान्तकथालापान् प्रोवाचप्रोज्झ्यवाग्यमम् । भगवन्तोविजानन्ति प्राणिनांमानसंहितम् ३२३ मनोवागभिरत्यर्थं कन्दर्पंतेहिदेहिनः । केचित्तुनिपुणास्तत्र घटन्तेविबुधोद्यमैः ३२४ उपायैर्दुर्लभान्भावान् प्राप्नुवन्तिह्यतन्द्रिताः । अपरेतुपरिच्छिन्ना नानाकाराभ्युपक्रमाः ३२५ देहान्तरार्थमारम्भमापतन्तिहितप्रदम् । ममत्वाकाशसम्भूतपुष्पदामविभूषितम् ३२६ बन्ध्यासुतंप्राप्तुकामा मनःप्रसरतेमुहुः । अहंकिलभवंदेवं पतिंप्राप्तुंसमुद्यता ३२७ प्रकृत्यैवदुराधर्षं तपस्यन्तंतुसंप्रति । सुरासु

से पूछा कि हे सुरश्रेष्ठ आपने हमको किस निमित्त स्मरण कियाहै इन्द्रने कहा हे महर्षिलोगो आप मेरे प्रयोजनको सुनिये कि हिमाचल पर्व्वतके शिखरपर पार्वती घोरतपस्या कररही है उसके मनोरथको आप सिद्धकीजिये यह सुनतेही वह सप्तऋषि शीघ्रही उससिद्धोंसे सेवित पार्वतीजीके स्थान में जातेभये ३११ । ३१५ और जाकर उससेबोले कि हे पुत्रीतेरा क्यामनोरथ है तब लज्जाकरती हुई पार्वती उनऋषियोंसे यह वचनबोली कि तपस्या करनेवाले आपसरीखे मुनियोंको प्राप्तहोके जिसकी बुद्धि प्रणामआदि सत्कारकरनेमें युक्त होतीहै उसको आप पवित्रकर देतेहो और मेरे तो आपसन्मुखहोके प्रश्नकरतेहो और प्रत्यक्षमेंही आगयेहो ऐसा कहकर उनको आसनदेती भई ३१६ । ३१९ फिर वह पार्वती उनका विधिपूर्व्वक पूजनकरतीभई पूजन करनेके पीछे उमासूर्य्यके समान कान्तिवाले सप्तऋषियोंसे ३२० व्रतकी मौनताको त्यागकरबोली और फिर लज्जाकी मौनताको धारण करतीभई जब सप्तऋषि उसके भावको पूछनेलगे तब हँसतीहुईसी हांकरमन्द २ वार्णीसे यह वचनबोली कि आप सब प्राणियोंके मनकी वार्त्ताको जानतेहो कितनेही पुरुष तो मनवाणी आदि अनेक उद्यमोंसे कामदेवकी चेष्टाको विचारते हैं और अनेक उपायों करके दुर्लभ मनोरथोंको प्राप्तहोजाते हैं कितनेही अनेक कार्य्योंका उपाय किया करतेहैं ३२१ । ३२५ बहुत से अपने हितके निमित्त दूसरे शरीरकेलिये कर्मका आरंभकरते हैं परन्तु मेरा मनोरथ ऐसाहै जैसा कि कोई आकाशमें उत्पन्नहुए पुष्पोंकी इच्छा करताहो अथवा बंध्यास्त्री पुत्रकी कामनाकरतीहो जैसे कि यह असंभव बातोंकी इच्छाकरते हैं उसी प्रकार मैं शिवजी महाराजको अपने पतिबनानेकी

रैरनिर्णीतपरमार्थक्रियाश्रयम् ३२८ साम्प्रतंचापिनिर्दग्धमदनंवीतरागिणम्। कथमारा
धयेदीशंमादृशीतादृशंशिवम् ३२९ इत्युक्तामुनयस्तेतु स्थिरतांमनसस्ततः। ज्ञातुमस्या
वचःप्रोचुःप्रक्रमात्प्रकृतार्थकम् ३३० (मुनय ऊचुः) द्विविधन्तुसुखन्तावत्पुत्रि!लोकेषुभा
व्यते। शरीरस्यास्यसंभोगैश्चेतसश्चापिनिर्वृतिः ३३१ प्रकृत्यासतुदिग्वासाभीमःपितृव
नेशयः। कपालीभिक्षुकोनग्नो विरूपाक्षःस्थिरक्रियः ३३२ प्रमत्तोन्मत्तकाकारोबीभत्सकृत
संग्रहः। यतिनानेनकःस्वार्थो मूर्त्तानर्थेनकांक्षितः ३३३ यदिह्यस्यशरीरस्यभोगमिच्छसि
साम्प्रतम्। तत्कथन्तेमहादेवात्भयभाजोजुगुप्सितात् ३३४ स्रवद्रक्तवसाभ्यक्तकपालकृ
तभूषणात्। श्वसदुग्रभुजङ्गेंद्रकृतभूषणभीषणात् ३३५ श्मशानवासिनोरौद्रप्रमथानुगतात्
सति!। सुरेंद्रमुकुटव्रातनिघृष्टचरणोऽरिहा ३३६ हरिरस्तिजगद्धाताश्रीकान्तोऽनन्तमूर्त्ति
मान्। नाथोयज्ञभुजामस्ति तथेन्द्रःपाकशासनः ३३७ देवतानांनिधिश्चास्तिज्वलनःसर्व
कामकृत्। वायुरस्तिजगद्धाता यःप्राणःसर्वदेहिनाम् ३३८ तथावैश्रवणोराजा सर्वार्थम
तिमान्विभुः। एभ्यएकतमंकस्मात् नत्वंसम्प्राप्तुमिच्छसि ३३९ उत्तानदेहसंप्राप्त्या
सुखंतुमनसेप्सितम्। एवमेतत्तवाप्यत्र प्रभवोनाकसम्पदाम् ३४० अस्मिन्नेहपरत्रापि
कल्याणप्राप्तयस्तव। पितुरेवास्तितत्सर्वं सुरेभ्योयन्नविद्यते ३४१ अतस्तत्प्राप्तयेक्लेश
सवाप्यत्राफलस्तव। प्रायेणप्रार्थितोभद्रे! सुस्वल्पोह्यतिदुर्लभः ३४२ अस्यतेविधियोग

इच्छा करतीहूं ३२६। ३२७ सो यहबात बड़ी दुर्लभहै क्यों कि तपकरतेहुए देवता और दैत्योंसे भी अज्ञात कर्मवाले अभी कामदेवके दग्ध करने वाले रागमोहादिकसे रहित ऐसे शिवजीको मुझसरी की स्त्री कैसे प्राप्तकरसक्ती है यहवचन सुनकर सप्तऋषि अपने मनको स्थितकर उसके मनोरथको जानकर यहवचन बोले कि हेपुत्री संसारमें दोप्रकार के सुख हैं उनमेंसे पहला सुखतो शरीरके संभोग करनेसे चित्तकी वृत्तिका निवृत्तहोनाहै सो वह शिवजी स्वभावहीसे नंगे दिगम्बर भयंकर श्मशानवासी कपाली भिक्षुकरूप विरूपाक्ष और स्थिर क्रियावाले हैं ३२८। ३३२ प्रमत्त मदोन्मत्तके सदृश और भयंकर आकारवाले हैं ऐसे पतिके करने से तेराकौनसा प्रयोजन सिद्धहोगा जो कदाचित् उनके शरीरसे भोगकी इच्छा करतीहो तो इनभयंकर महादेव से तुझको भोगकी प्राप्ति कैसेहोवेगी ३३३। ३३४ रुधिर झिरतेहुए कपालोंके धारण करनेवाले उच्चश्वास लेनेवाले सर्पोंका भूषण धारण करनेवाले श्मशानवासी भयंकरगणों समेत विचरनेवाले शिवजी से कैसे सुखकी प्राप्तिहोगी देखो देवताओंसे वन्दित जगद्धाता लक्ष्मीके पति विष्णु भगवान् देवताओं का पति इन्द्र देवताओंके निधि अग्नि सब कार्य्योंकाकरने वाला वायु जो कि सब देहधारियों का प्राणहै इसीप्रकार सबधनोंका पाति कुबेरहै इनमें से किसी एकसे तुम क्यों नहीं विवाह करलेतीहो ३३५।३३९ तुम्हारे शरीरमें उत्तान हस्तका लक्षणहै इस हेतुसे मनोवाञ्छित सुखकी प्राप्तिहोवेगी और स्वर्गकी संपत्तियोंकी भी प्राप्तिहोगी इसशरीरमें तुझको कल्याणकी प्राप्तिहोगी तेरेपतिकेही घर में ऐसीसंपत्तिहै जो किसी देवताके पास नहीं है ३४०। ३४१ इस हेतुसे उनशिवजीकी प्राप्तिके

स्यधाताकर्तात्रचैवहि (सूत उवाच) इत्युक्तासातुकुपिता मुनिवर्य्यैषुशैलजा ३४३ उवाचकोपरक्ताक्षी स्फुरद्भिर्दशनच्छदैः (देव्युवाच) असद्ग्रहस्यकाप्रीतिर्व्यसनस्य क्यन्त्रणा ३४४ विपरीतार्थबोद्धारः सत्पथेकेनयोजिताः । एवंमांवेत्थदुष्प्रज्ञां ह्यस्थाना सद्ग्रहप्रियाम् ३४५ नमांप्रतिविचारोऽस्ति यत्रेहासद्ग्रहाचितौ । प्रजापतिसमाःसर्वे भवन्तःसर्वदर्शिनः ३४६ नूनंनवेत्थतंदेवं शाश्वतंजगतःप्रभुम् । अजमीशानमव्यक्त ममेयमहिमोदयम् ३४७ आस्तान्तद्धर्म्मसद्भावसम्बोधस्तावदद्भुतः । विदुर्यन्नहरिब्रह्म प्रमुखाहि सुरेश्वराः ३४८ यत्तस्यविभवात्स्वोत्थंभुववेषुविजृम्भितम् । प्रकटंसर्वभूतानां तदप्यत्रनवेत्थकिम् ३४९ कस्यैतद्गगनंमूर्तिः कस्याग्निःकस्यमारुतः । कस्यभूःकस्य वरुणः कश्चन्द्रार्कविलोचनः ३५० कस्यार्चयन्तिलोकेषु लिङ्गभक्त्यासुरासुराः । यंब्रुवन्तीश्वरंदेवा विधीन्द्राद्यामहर्षयः ३५१ प्रभावंप्रभवञ्चैव तेषामपिनवेत्थकिम् । अदितिः कस्यमातेयं कस्माज्जातोजनार्दनः ३५२ अदितेःकश्यपाज्जाता देवानारायणादयः । मरीचेःकश्यपःपुत्रो ह्यदितिर्दक्षपुत्रिका ३५३ मरीचिश्चापिदक्षश्च पुत्रौतौब्रह्मणःकिल । ब्रह्माहिरण्मयात्त्वण्डाद्दिव्यसिद्धिविभूषितात् ३५४ कस्यप्रादुरभूद्ध्यानात् प्रक्षुब्धाःप्राकृतांशकाः । प्रकृतौतुतृतीयायां मधुद्विड्जननक्रिया ३५५ जाताससर्जषड्वर्गान् बुद्धि

निमित्त तुझको क्लेशहीहोगा और श्रेष्ठफलभी नहीं मिलेगा विशेषकरके प्रार्थित कियाहुआ स्वल्प भी प्रयोजन दुर्लभहोजाता है इसतेरे विचार कियेहुए योग का करनेवाला विधाताही है सूतजी कहते हैं कि इसप्रकारके ऋषियों के वचनोंको सुनकर पार्वतीजी उन सप्तऋषियोंपर क्रोध करती भई और कहनेलगीं कि असत्वस्तुके ग्रहण करनेवाले व्यसनी पुरुषको श्रेष्ठ देवताकी क्या प्रीति होती है विपरीत अर्थके जाननेवाले ऋषि सन्मार्ग में किसको युक्तकरसक्ते हैं इसीप्रकार आप सब ऋषि मुझको भी नष्टबुद्धिवाली जानतेहो जहां ऐसे असत्कार्य्यको विचारनेवाले हैं वहां मेरे सम्बन्धी विचारको आप नहीं करसक्ते तुमसब ब्रह्माजी के समानहो परन्तु जगत्के प्रभु शाश्वत अज ईशान अव्यक्त और अतुलमहिमावाले ऐसेमहादेवको तुमनहीं जानतेहो ३४२ । ३४७ चाहे विष्णु आदिक देवताओं के धर्मका विचारहोय परन्तु वहभी महादेवजी के विभवको नहींजान सक्ते सबभूतोंकी उत्पत्ति महादेवकेही ऐश्वर्य्य से होतीहै इसबातको क्या तुमनहीं जानते हो ३४८ । ३४९ ऐसी मूर्त्ति किसकी है ऐसा अग्नि ऐसा भूमि और ऐसा जल भी किसकेहै जैसाकि महादेवजी के पासहै किसके सूर्य्य और चन्द्रमा नेत्रहैं देवता और दैत्य भक्तिपूर्व्वक किसके लिंगको पूजतेहैं ब्रह्मा इन्द्र आदिक जिनको देवता कहतेहैं उनकेप्रभावको और उत्पत्तिको क्यातुम नहींजानते हो अदिति किसकी माताहै विष्णु किससे उत्पन्न हुएहैं ३५० । ३५२ अदितिमें कश्यपके सकाशसे नारायण आदिक सबदेवता उत्पन्न भये हैं मरीचिके सकाशसे कश्यप उत्पन्न भये हैं दक्षकी पुत्री अदितिहै मरीचि और दक्ष यह दोनों ब्रह्माजी सुवर्णमय अंडकोशमें से किसके ध्यानसे उत्पन्न हुएहैं मायाके अंशने किसको क्षोभकियाहै तीसरी प्रकृतिमें विष्णुकी उत्पत्ति हुई है फिर विष्णुसे युक्त

पूर्वान्स्वकर्म्मजान् । अजातकोऽभवद्द्वेधा ब्रह्मणोऽव्यक्तजन्मनः ३५६ यःस्वयोगेन संक्षोभ्य प्राकृतंकृतवानिदम् । ब्रह्मणःसिद्धसर्वार्थमैश्वर्यलोककर्तृताम् ३५७ विदुर्विष्णादयो यत्रस्वमहिम्नासदैवहि । कृत्वान्यंदेहमन्यादृक् तादृक्कृत्वापुनर्हरिः ३५८ कुरुतेजगतः कृत्यमुत्तमाधममध्यमम् । एवमेवहिसंसारो योजन्ममरणात्मकः ३५९ कर्म्मणश्चफलं ह्येतत् नानारूपसमुद्भवम् । अथनारायणोदेवः स्वकाञ्छायांसमाश्रयत् ३६० तत्प्रेरितःप्रकुरुते जन्मनानाप्रकारकम् । सापिकर्म्मणएवोक्ताप्रेरणी विवशात्मनाम् ३६१ यथोन्मादादिजुष्टस्य मतिरेवहिसाभवेत् । इष्टान्येवयथार्थानि विपरीतानिमन्यते ३६२ लोकस्यव्यवहारेषु सृष्टेषुसहतेसदा । धर्माधर्म्मफलावाप्तौ विष्णुरेवनिबोधितः ३६३ अथानादित्वमस्यास्ति सामान्यात्तुतदात्मना । नह्यस्यजीवितंदीर्घं दृष्टंदेहेतुकुत्रचित् ३६४ भवद्भिर्यस्यनोदृष्ट मन्तमग्रमथापिवा । देहिनांधर्म्मएवैष क्वचिज्जायेत्क्वचिन्म्रियेत् ३६५ क्वचिद्गर्भगतोनश्येत् क्वचिज्जीवेज्जरामयः । क्वचित्समाःशतंजीवेत् क्वचिद्बाल्येविपद्यते ३६६ शतायुःपुरुषोयस्तु सोऽनन्तःस्वल्पजन्मनः । जीवितोनम्रियत्यग्रे तस्मात्सोऽमरउच्यते ३६७ अदृष्टजन्मनिधना ह्येवंविष्णवादयोमताः । एतत्संशुद्धमैश्वर्यं संसारे कोलभेदिह ३६८ तत्रक्षयादियोगात्तु नानाश्चर्य्यस्वरूपिणि । तस्माद्दिवश्चरान्सर्व्वा

हुई प्रकृतिसे अपने कर्मों से उत्पन्न होनेवाले बुद्धि आदिक षड्वर्गादिक उत्पन्न हुए हैं अव्यक्तजन्म वाले ब्रह्मके सकाशसे विष्णुके दो भेदहोतेभये ३५३।३५६ जो अपने योगकरके माया सहित होकर जगत्को उत्पन्न करताहै वही माया सहित ब्रह्मलोकका कर्त्ता ईश्वर होजाताहै ३५७ और विष्णु आदिक देवता अपनी महिमा करके उसब्रह्मको पहचानते हैं विष्णुभगवान् अन्य शरीर में भी अपनी मायाकेद्वारा प्रवेशकरजाते हैं और जगत्के उत्तम मध्यम और अधमकार्य्य को करते हैं इसीप्रकार जन्ममरणात्मक संसारहै इसमें अनेकरूपों की उत्पत्तिका होनाही कर्मोंकाफल है, इसके पीछे नारायण देव अपनीमायाके आश्रयहोके और उसीमायाके प्रेरणे से अनेकप्रकार के जन्मोंको करताहै और वह मायाभी कर्मों के वशीभूत होनेवालोंको प्रेरती है ३५८।३६१ जैसे कि उन्माद आदिकमें रहने वालों के वहमाया बुद्धिहोजाती है और उसबुद्धिकेद्वारा पुरुष विपरीत कर्मोंको अच्छे मानलेते हैं ३६२ लोकोंके व्यवहारों में धर्म अधर्मकी प्राप्तिकराने के निमित्त विष्णुभगवानही मुख्यकहेजातेहैंसामान्यता सेब्रह्मस्वरूप होजानेके कारण विष्णुको अनादि कहतेहैं शरीरमें तो विष्णुकाजीना बहुतकालतक कहीं नहीं देखाहै ३६३।३६४आपलोगोंनेभी जिसके आदि अन्तको नहीं देखाहै उसको तो कहो देहधारियों का यही धर्म है कि कहीं जन्मतेहैं और कहीं मरतेहैं ३६५ कहीं गर्भमेंही मरजातेहैं कहीं वृद्धावस्थातक जीतेहैं कहीं सौ वर्षतक जीतेहैं कहीं बालकपनेहीमें मरजाते हैं ३६६ जो सौ१००वर्षकी आयुवालाहै वह पूर्ण आयुवाला कहाताहै जो जीवताहुआ कभी नहीं मरताहै वह अमर कहाता है इसप्रकारसे विष्णुआदिक देवता दैवके अनुसार मृत्युवाले हैं इस संसारमें शुद्ध ऐश्वर्य्यको कौन प्राप्तहोसक्ताहै इस हेतुसे मलिन सत्वप्रधान आदि स्वल्प ऐश्वर्य्यवाले देवताओंके वरनेकी में कभी इच्छा नहीं

म् मलिमान्स्वल्पभूतिकान् ३६९ नाहंभद्राः! किलेच्छामि ऋतेसर्व्वात्पिनाकिनः। स्थितंचताश्तम्येन प्राणिनांपरमन्त्विदम् ३७० धीबलैश्वर्यकार्य्यादि प्रमाणंमहतांमहत्। यस्मान्नकिञ्चिदपरं सर्वंयस्मात्प्रवर्त्तते ३७१ यस्यैश्वर्यमनाद्यन्तं तमहंशरणङ्गता। एष मेव्यवसायश्च दीर्घोऽतिविपरीतकः ३७२ यातवातिष्ठतैवाथ मुनयो! मद्विधायकाः!। एवंनिशम्यवचनं देव्यामुनिवरास्तदा ३७३ आनन्दाश्रुपरीताक्षाः सस्वजुस्तांतपस्विनीम्। ऊचुश्चपरमप्रीताः शैलजांमधुरंवचः ३७४ (ऋषय ऊचुः) अत्यद्भुतास्यहोदेवि! ज्ञानमूर्तिरिवामला। प्रसादयतिनोभावं भवभावप्रतिश्रयात् ३७५ नतुविद्मोवयन्तस्य देवस्यैश्वर्यमद्भुतम्। त्वन्निश्चयस्यदृढ़तांवेत्तुंवयमिहागताः ३७६ अचिरादेवतन्वङ्गि। कामस्तेऽयंभविष्यति। क्वादित्यस्यप्रभायाति रत्नेभ्यःक्वद्युतिःपृथक् ३७७ कोऽर्थोवर्णालिकाव्यक्तः कथंत्वंगिरिशंविना। यामोनैकाभ्युपायेन तमभ्यर्थयितुंवयम् ३७८ अस्माकमपिवैसोऽर्थः सुतरांहृदिवर्त्तते। अतस्त्वमेवसाबुद्धिर्यतोनीतिस्त्वमेवाहि ३७९ अतोनिःसंशयंकार्यं शङ्करोऽपिविधास्यति। इत्युक्ताःपूजितायाता मुनयोगिरिकन्यया ३८० प्रययुर्गिरिशंद्रष्टुं प्रस्थंहिमवतोमहत्। गङ्गाम्बुप्लावितात्मानं पिङ्गबद्धजटासटम् ३८१ भृङ्गानुयातपाणिस्थ मन्दारकुसुमस्रजम्। गिरेःसंप्राप्यतेप्रस्थं ददृशुःशङ्कराश्रमम् ३८२ प्रशान्ताशेषसत्वौघं नवस्तिमितकाननम्। निःशब्दाक्षोभसलिल प्रपा

रखती मैं तो शिवजीकोही वरूंगी वह सब प्राणियों में और देवताओं में भी सबसे बड़े हैं महान् पुरुषोंके बुद्धिबल और ऐश्वर्यादिकों का प्रमाणभी महत् होताहै जिस्से भिन्न कुछ नहीं है जिससे कि सब कुछ प्रवर्त्तहोताहै और जो ऐश्वर्यादिकों से रहितहै उन महादेवजीकी मैं शरणहूं यह इस प्रकार का मेरा परम निश्चयहै ३६७।३७२ मुझको शिक्षादेनेवाले मुनिजांय अथवा ठहरें इसप्रकारके पार्वतीजीके वचनोंको सुनकर वह सप्तऋषि आनन्दके अश्रुओंसे युक्त होकर उस तपस्विनी पार्वतीजी से बड़ी प्रसन्नता पूर्वक मिलकर यह वचन बोले ३७३।३७४कि हे देवि बड़ा आश्चर्य्य है तू ज्ञान की मूर्त्तिहै हमारे ऊपर प्रसन्नहो हम उन महादेवजी के ऐश्वर्य्य को तो जानतेही हैं परन्तु तेरे निश्चयके देखने के निमित्त यहां आये हैं ३७५।३७६ हे तन्वंगि यह तेरा मनोरथ शीघ्रही हो जायगा जैसे कि सूर्य्यकी प्रभासूर्य्यसे अलग कहां जासक्ती है रत्नोंकी कांति रत्नसे पृथक् कहां जासक्ती है अक्षरोंकी पंक्तिसे अर्थ पृथक् नहीं है इसी प्रकार तू भी शिवजीसे रहित कभी नहीं है हम तो अनेक उपायों करके भी उन महादेवजी को प्राप्त नहीं होसक्ते हमारे भी हृदयमें यही प्रयोजन है इस कारण तुम्हीं हमारी बुद्धिरूपहोकर नीति स्वरूपहो ३७७। ३७९ शिवजी महाराज भी निश्चय तुम्हारे कार्य्यको करेंगे जब ऐसे उन सप्तऋषियोंने कहा तब पार्वतीजीने उनका फिर पूजनकिया तदनन्तर वह मुनि शिवजी के दर्शनके निमित्त जातेभये और वहां जाकर गंगा जलसे आत्माको पवित्रकियेहुए पीतजटा धारण कियेहुए कल्पवृक्षके पुष्पोंकी माला और भ्रमरोंसे शोभायमान शिवजीको देखतेभये ३८०। ३८२ उस स्थानपर शिवजीके आश्रममें सबजीवोंको शान्तरूप देखा

तंसर्वतोदिशम् ३८३ तत्रापश्यंस्ततोद्वारि वीरकंवेत्रपाणिनम्। सप्ततेमुनयःपूज्या विनी।
ताःकार्य्यगौरवात् ३८४ ऊचुर्मधुरभाषिण्या वाचांतेवाग्मिनांवराः। द्रष्टुंवयमिहायाताः
शरण्यंगणनायकम् ३८५ त्रिलोचनंविजानीहि सुरकार्य्यप्रचोदिताः।त्वमेवनोगतिस्तत्त्वं
यथाकालानतिक्रमः ३८६ सत्कारितैषप्रायेण प्रतीहारमयःप्रभुः। इत्युक्तोमुनिभिःसोऽथगौ
रवात्तानुवाचस· ३८७ समन्वास्यापरांसन्ध्यां स्नातुंमन्दाकिनीजले। क्षणेनभविताविप्रा
स्तत्र द्रक्ष्यथशूलिनम् ३८८इत्युक्तामुनयस्तस्थुस्ते तत्कालप्रतीक्षिणः। गम्भीराम्बुधरं
प्रावृट् तृषिताश्चातकायथा ३८९ ततःक्षणेनानिष्पन्न समाधानक्रियाविधिः। वीरासनंविभे
देशोमृगचर्मनिवासितम् ३९० ततोविनीतोजानुभ्या मवलम्ब्यमहीस्थितिम्। उवाचवी
रकोदेवं प्रणामैकसमाश्रयः ३९१ संप्राप्तामुनयःसप्त त्वांद्रष्टुंदीप्ततेजसः। विभो! समादिश
द्रष्टुमवगन्तुमिहार्हसि ३९२ इत्युक्तोधुर्जटिस्तेन वीरकेणमहात्मना। भ्रूभङ्गसंज्ञयातेषांप्र
वेशाज्ञांददौतदा ३९३ मूर्द्धकम्पेनतान्सर्वान् वीरकोऽपिमहामुनीन्।आजुहावविदूरस्थान्
दर्शनायपिनाकिनः ३९४ त्वराबद्धार्द्धचूडास्ते लम्बमानाजिनाम्बराः। विविशुर्वेदिकां
सिद्धां गिरिशस्यविभूतिभिः ३९५ बद्धपाणिपुटाक्षिप्त नाकपुष्पोत्करास्ततः। पिनाकिप
दयुगलं यथानाकनिवासिनः ३९६ ततःस्निग्धेक्षिताःशान्ता मुनयःशूलपाणिना। मन्म
थारिंततोहृष्टाः सम्यक्तुष्टुवुरादृताः ३९७ अहोकृतार्थावयमेवसाम्प्रतं सुरेश्वरोऽप्यत्रपु

झिरनोंसे गिरतेहुए जलके शब्दकोभी क्षोभित नहींदेखा शिवजीके द्वारके आगे हाथमें बेतलिये हुए वीरकनाम गणकोदेखा वह शिवजीका वीरकनाम पार्षद उन सप्तऋषियोंका पूजन करताभया तब वह सप्तऋषिबोले कि हम शिवजी महाराजके दर्शनकरनेके निमित्त आयेहैं ३८३। ३८५ हम देवताओंके कार्य्यके निमित्त शिवजीका दर्शन करनाचाहते हैं सो तुम हमारी गतिहो उन महादेवजी कोबताओ यहवचन सुनकर वह वीरकबोला हे ब्राह्मण लोगो सायंकालमें इसमंदाकिनी गंगामें स्नानकरनेको जबजाँयगे तब आपलोग शिवजीके दर्शनकरना ऐसे कहेहुए सप्तऋषि संध्याकालकी बाटदेखतेहुए उसी स्थानपर ऐसे स्थितहोगये जैसे कि वर्षाऋतुमें गंभीरमेघकीबाट देखताहुआ चातक पक्षी स्थितहोता है ३८६।३८९ फिर क्षणमात्रहीमें शिवजीमहाराज अपने वीरआसनकी समाधि से उठतेभये तब बीरभद्रपार्षद नम्रतापूर्व्वक शिवजीसेबोला कि हे महाराज आपके दर्शनकेवास्ते देदीप्ततेजवाले सप्तऋषि आयेहैं वह यहाँआया चाहतेहैं जब ऐसे वीरभद्रने कहा तबशिवजी अपनी भृकुटीसे उनके आनेकी आज्ञादेतेभये ३९०। ३९३ तब वीरभद्र दूरखड़ेहुए उन सप्तऋषियोंको शिवजीके दर्शनके निमित्त बुलाताभया ३९४ फिर लम्बी लटकतीहुई मृगछाला वाले वहऋषि हाथजोड़कर शिवजीके समीप प्राप्तहोतेभये और निकटजाकर चरणोंको स्पर्श करतेभये जैसे कि स्वर्ग में देवतालोग इन्द्रकेचरणोंको छूतेहुए उसकी प्रशंसाकरते हैं उसी प्रकार शिवजी से अच्छी सुदृष्टिसे देखेहुए वह शान्तरूपऋषि प्रसन्नहोकर चरण स्पर्शकरके आदरसे यहस्तुति करतेभये ३९५। ३९७ हे शिवजी महाराज अब हम कृतार्थहुए और हमसेभी प्रथम इन्द्र कृतार्थ

रोमविष्यति। भवत्प्रसादामलवारिसेकतः फलेनकाचित्तपसानियुज्यते ३९८ जयत्यसौ
धन्यतरोहिमाचलस्तदाश्रयंयस्यसुतातपस्यति। सदैत्यराजोऽपिमहाफलोदयो विमूलि
ताशेषसुरोहितारकः ३९९ त्वदीयमंशम्प्रविलोक्यकल्मषात् स्वकंशरीरंपरिमोक्ष्यतेहि
यः। सधन्यधीर्लोकपिताचतुर्मुखो हरिश्चयत्सम्भ्रमवाह्निदीपितः ४०० त्वदङ्घ्रियुग्मंहृ
दयेनविभ्रतो महाभितापप्रशमैकहेतुकम्। त्वमेवचैकोविविधकृताक्रियः किलेतिवाचावि
धुरैर्विभाष्यते ४०१ अथाद्यएकस्त्वमवैषिनान्यथा जगत्तथानिर्घृणतान्तवस्पृशेत्। न
वेत्सिवादुःखमिदंभवात्मकं विहन्यतेतेखलुसर्वनिष्क्रिया ४०२ उपेक्षसेचेज्जगतामुपद्रवं
दयामयत्वंतवकेनकथ्यते । स्वयोगमायामहिमागुहाश्रयं नविद्यतेनिर्मलभूतिगौरवम्
४०३ वयंचतेधन्यतराःशरीरिणां यदीदृशंत्वांप्रविलोकयामहे। अदर्शनंतेनमनोरथोयथा
प्रयातिसाफल्यतयामनोगतम् ४०४ जगद्विधानैकविधौजगन्मुखे करिष्यसेतोवल्लभिन्न
रावयम्। विनेमुरित्थंमुनयोविसृज्यतां गिरंगिरीशश्रुतिभूमिसन्निधौ। उत्कृष्टकेदारइवा
वनीतले सुबीजमष्टिंसुफलायकर्षकाः ४०५ तेषांश्रुत्वाततोरम्यां प्रक्रमोपक्रमक्रियाम्।
वाचंवाचस्पतिरिवप्रोवाचस्मितसुन्दरः ४०६ (शङ्करउवाच) जानेलोकविधानस्य कन्यास
त्कार्य्यमुत्तमम्। जाताप्रलयशैलस्य सङ्केतकनिरूपणाः ४०७ सत्यमुत्कण्ठिताःसर्वे देव
कार्यार्थमुद्यताः। तेषांत्वरन्तिचेतांसि किन्तुकार्यविवक्षितम् ४०८ लोकयात्रानुगन्तव्या
विशेषेणविचक्षणैः। सेवन्तेतेयतोधर्मं तत्प्रामाण्यात्परेस्थिताः ४०९ इत्युक्तामुनयोजग्मु

होजायगा प्रसन्नहोने वाले आपका जलसिंचन किसी बड़े तपकाफलहै ३९८ इस हिमाचल को
धन्यहै जिसकी कि पुत्री उसके आश्रयहोकर उग्र तपकररहीहै और सबदेवताओंका नाशकरनेवाला
वह तारकासुरभी धन्यहै क्योंकि तुम्हारे अंशसे उत्पन्नहुए को देखकर अपने शरीरको छोड़ेगा ब्रह्मा
भी धन्यहै विष्णुभी धन्यहैं जोकि महासंतापोंके दूरकरनेवाले तुमको अपने हृदयमें ध्यावते हैं तुम
अकेलेही अनेकक्रियाओंके करनेवालेहो ऐसे वर्णन कियेजातेहो ३९९। ४०१ तुम एकही आद्यहो
तुमसंसारके दुःखोंको दूरकरतेहो तुम्हारी निष्क्रिया नष्टहोजाती है और जो तुम जगतका संहार करने
वाले कहेजाओ तो आपको दयावान् कैसे कहतेहैं इसहेतुसे आर अपनी योगमायाके आश्रयहोकर
निर्मल विभूतिवाले रहतेहो ४०२ । ४०३ शरीरधारियोंमें हमलोगभी धन्यहैं क्योंकि धन्यनहोते
तो आपका दर्शन कैसेहोता आपके दर्शनहोनेसे मनोरथ सफल होजाताहै आपजगत्के विधानकरनेमें
तत्परहैं इसीहेतुसे हमतुमको नमस्कार करते हैं इसरीतिकी स्तुति करनेसे वह सप्तऋषि अपनी
वाणीको ऐसे कहतेभये जैसेकि खेतीकरनेवाला किसान अच्छी सुधरीहुई भूमिमें बीजोंको बोताहै
४०४। ४०५ उनऋषियोंकी वाणीकोसुनकर शिवजी बृहस्पतिकेसमान हँसकर यहवचनबोले ४०६ कि
हमजानतेहैं कि संसारके सुखकेनिमित्त हिमाचलकेघरमें पुत्रीजन्मीहै और तुमभी देवताओंकेकार्य्यके
निमित्त उद्यम कररहेहो यहसत्यहै कि बुद्धिमान् पुरुषोंको विशेषकरके लोकोंकी यात्रा करनीचाहिये
और श्रेष्ठ पुरुष जिसधर्मका आचरण करतेहैं उसीको अन्य लोगभी कियाकरतेहैं ४०७। ४०९ यह

स्त्वरितास्तुहिमाचलम्। तत्रतेपूजितास्तेनाहिमशैलेनसादरम्४१०ऊचुर्मुनिवराःप्रीताःस्वल्पवर्णैस्त्वरान्विताः।(मुनयऊचुः) देवोदुहितरंसाक्षात्पिनाकीतवमार्गते ४११ तच्छीघ्रंपावयात्मानमाहुत्यैवानलार्पणात्। कार्यमेतच्चदेवानां सुचिरंपरिवर्तते ४१२ जगदुद्धरणायैष क्रियतांवैसमुद्यमः। इत्युक्तस्तैस्तदाशैलो हर्षाविष्टोऽवदन्मुनीन् ४१३ असमर्थोऽभवद्वक्तुमुत्तरंप्रार्थयञ्छिवम्।ततोमेनामुनीन्वन्द्य प्रोवाचस्नेहविक्लवा४१४ दुहितुस्तान्मुनींश्चैव चरणाश्रयमर्थवित्। (मेनोवाच) यदर्थंदुहितुर्जन्म नेच्छन्त्यपिमहाफलम् ४१५ तदेवोपस्थितंसर्वं प्रक्रमेणैवसाम्प्रतम्। कुलजन्मवयोरूपविभूत्यर्द्धियुतोऽपियः ४१६ वरस्तस्यापिचाहूय सुतादेवाह्ययाचतः। तत्समस्ततपोघोरं कथंपुत्रीप्रयास्यति ४१७ पुत्रीवाक्याद्यदत्रास्ति विधेयंतद्विधीयताम्। इत्युक्तामुनयस्तेतु प्रियर्याहिमभूभृतः ४१८ ऊचुःपुनरुदारार्थं नारीचित्तप्रसादकम्। (मुनय ऊचुः) ऐश्वर्यमवगच्छस्व शङ्करस्यसुरासुरैः४१९ आराध्यमानपादाब्ज युगलत्वात्सुनिर्वृतैः।यस्योपयोगियद्रूपं साचतत्प्राप्तयेचिरम् ४२० घोरंतपस्यतेबाला तेनरूपेणनिर्वृतिः। यस्तद्व्रतानिदिव्यानि नयिष्यतिसमापनम् ४२१ तत्रसावहितातावत्तस्मात्सैवभाविष्यति। इत्युक्त्वागिरिणासार्द्धन्तेययुर्यत्रशैलजा ४२२ जितार्कज्वलनज्वाला तपस्तेजोमयीह्युमा। प्रोचुस्तांमुनयःस्निग्धं सन्मान्यपथमागतम् ४२३ रम्यंप्रियंमनोहारि मारूपंतपसा

शिवजीके वचनसुनतेही वहमुनि बड़ीशीघ्रतासे शिवजीको नमस्कारकर हिमाचल पर्व्वतके पासजाते भये वहाँ हिमाचलने उनको आदर भावसे पूजा तब वहमुनि थोड़ेही अक्षरोंको शीघ्रतासे कहते भये ४१० कि हे हिमाचल साक्षात् ईश्वर महादेवजी तेरी कन्याको मांगते हैं इसनिमित्त तू शीघ्रही अपनी आत्माको पवित्र करले यह देवताओं का कार्य प्राप्तहोरहाहै जगत्के उद्धार करने के निमित्त तुझको यहकार्य्य करना उचितहै यह वचन सुनकर वह हिमाचल बड़ा प्रसन्नहोकर बोला और शिवजी की प्रार्थना करताहुआहोकर अच्छे प्रकारसे उत्तर न देसका तब स्नेहसे विह्वलहुई मेना स्त्रीमुनियोंको प्रणाम करके बोली ४११।४१४ अर्थात् अपनी पुत्रीके हितसे मेनाकहनेलगी कि जिस प्रयोजनकेलिये मेरी पुत्रीका जन्महै वही प्रयोजन अब आपही प्राप्तहोरहा है मेरीपुत्रीका वर प्रथम देवताभी मांगतेथे औरमेरी पुत्री तपकररही है सो उसके तपकी समाप्ति कैसेहोवेगी जोकुछमेरी पुत्री को करनायोग्यहै सो आपकहिये ऐसे कहेहुए वह सप्तऋषि उस हिमाचलकी स्त्री को प्रसन्नकरने के निमित्त यह वचन बोले कि शिवजीका ऐश्वर्य्य अतुलहै शिवजी के चरणोंको सबमुनि आराधन करते हैं जिसका उपयोगी जो रूप होता है वह उसी रूपको प्राप्त होजाता है ४१५।४२० तेरी पुत्री बालक है तो भी घोरतपको करती है और उसका व्रत भी दिव्यहै इसलिये वह जिस जगह चित्त लगारही है उसका वही मनोरथ सिद्ध होजायगा ऐसा कहकर वहसप्तऋषि हिमाचलको साथलेकर पार्वतीके पासजातेभये ४२१।४२२ तब सूर्य्यके समान कान्तिवाली तपकी पुंजवाली पार्वतीको वह मुनि मधुर २ वचन कहनेलगे कि हेपुत्री रमणीक प्रिय और मनो-

दह । प्रातस्तेशङ्करःपाणिमेषपुत्रि ! गृहीष्यति ४२४ वयमर्थितवन्तस्ते पितरंपूर्वमाग
ताः । पित्रासहगृहङ्गच्छ वयंयामस्वमन्दिरम् ४२५ इत्युक्तातपसःसत्यं फलमस्तीति
चिन्त्यसा । त्वरमाणाययौवेश्म पितुर्दिव्यार्थशोभितम् ४२६ सातत्ररजनींमेने वर्षा
युतसमांसतीम् । हरदर्शनसञ्जात महोत्कण्ठाहिमाद्रिजा ४२७ ततोमुहूर्तेब्राह्मेतु त
स्याश्चक्रुःसुरस्त्रियः । नानामङ्गलसन्दोहान्यथावत्क्रमपूर्वकम् ४२८ दिव्यमण्डनमङ्ग
नां मन्दिरेबहुमङ्गले । उपासतागिरिंमूर्ता ऋतवःसार्वकामिकाः ४२९ वायवोवारिदा
श्चासन् संमार्जनविधौगिरेः । हर्म्येषुश्रीःस्वयंदेवी कृतनानाप्रसाधना ४३० कान्तिः
सर्वेषुभावेषु ऋद्धिश्चाभवदाकुला । चिन्तामणिप्रभृतयो रत्नाःशैलंसमन्ततः ४३१
उपतस्थुर्नगाश्चापि कल्पकाममहाद्रुमाः । ओषध्योमूर्तिमत्यश्च दिव्यौषधिसमन्वि
ताः ४३२ रसाश्चधातवश्चैव सर्वेशैलस्यकिङ्कराः । किङ्करास्तस्यशैलस्य व्यग्रा
श्चाज्ञानुवर्तिनः ४३३ नद्यःसमुद्रानिखिलाः स्थावरंजङ्गमञ्चयत् । तत्सर्वंहिमशैलस्य
महिमानमवर्द्धयत् ४३४ अभवन्मुनयोनागा यक्षगन्धर्वकिन्नराः । शङ्करस्यापिविबुधा
गन्धमादनपर्वते ४३५ सर्वेमण्डनसम्भारास्तस्थुर्निर्मलमूर्तयः । शर्वस्यापिजटाजूटे च
न्द्रखण्डंपितामहः ४३६ बबन्धप्रणयोदार विस्फारितविलोचनः । कपालमालांविपुलां
चामुण्डामूर्ध्न्यबन्धत ४३७ उवाचचापिवचनं पुत्रंजनयशङ्कर ! । योदैत्येन्द्रकुलंहत्वा

हर ऐसे अपने रूपको तपसे दग्धमतकरे प्रातःकाल तेरेहस्तकमलको शिवजी ग्रहणकरेंगे४२३।४२४
हम प्रार्थना करने के निमित्त प्रथम तेरे पिता के पास आयेथे सो तू अपने पिता के साथ अपने
घरकोचल यह वचन सुनकर पार्वती अपने तपको सफल जानके शीघ्रही पिताके घरमें जातीभई
४२५।४२६ वहां अपने पिताके घरमें जाकर पार्वती एकरात्रिको दशहज़ार वर्षके समान मानती
भई और शिवजीके दर्शनकी परमलालसा करतीभई ४२७ इसके अनन्तर प्रातःकाल ब्राह्ममुहूर्त्तमें
देवताओं की स्त्रियां तपस्या करतीहुई और अनेकप्रकार के मंगल भी करतीभई और उसीमंगलरूपी
गृहमें सबकामनाओं से पूर्णऋतु हिमाचलपर्व्वत की स्तुति करती भई ४२८।४२९ मेघों समेत
वायु आकर उसपर्व्वतका मार्जनकरताभया सबस्थानोंपर लक्ष्मीजी आपआकर विराजमान होतीभई
४३० सब प्रयोजनों में कान्ति और ऋद्धि प्राप्तहोती भई चिन्तामणि आदिक सबरत्न भी उस हिमाचलपर्व्वतमें
आकर प्राप्तहोगये सबपर्व्वत और दिव्य २ औषधी मूर्त्तियोंको धारणकरके उसपर्व्वत
में प्राप्तहोगईं रस और धातु आदिक सबपदार्थ उसपर्व्वतके अनुचर होतेभये सबसमुद्र और नदियां
भी अपनी २ मूर्त्ति धारण करके उसीपर्व्वत को सेवतीभई और सबस्थावर जंगम जगत् उस हिमाचलपर्व्वत
की महिमाको बढ़ाताभया ४३१।४३४ गन्धमादन पर्व्वतके मुनि नाग यक्ष गन्धर्व किन्नर
और देवता यह सब शिवजीके अनुचर होतेभये और निर्मल मूर्त्तिधारण करके मंडपकी सामग्रीकी
रचना करतेभये ब्रह्माजी शिवजीके जटाजूटमें चन्द्रमाको बांधतेभये और तीसरे नेत्रकी
अग्निमें प्रणय और उदारताको प्राप्तकरतेभये औरबहुतसी कपालोंकी मालाओंको चामुंडादेवीअपने

मारक्तैस्तर्पयिष्यति ४३८ सौरिर्ज्वलच्छिरोरत्नमुकुटञ्चानलोल्वणम् । भुजगाभरणंगृह्य सज्जंशम्भोःपुरोऽभवत् ४३९ शक्रोगजाजिनंतस्य वसाभ्यक्ताग्रपल्लवम् । दध्रेसरभसंस्विद्याद्विस्तीर्णमुखपङ्कजम् ४४० वायुश्चविपुलंतीक्ष्णश्रृङ्गंहिमगिरिप्रभम् । वृषंविभूषयामास हरयानंमहौजसम् ४४१ वितेनुर्नयनान्तस्थाः शम्भोःसूर्यानलेन्दवः । स्वान्धुतिंलोकनाथस्य जगतःकर्म्मसाक्षिणः ४४२ चिताभस्मसमाधाय कपालंरजतप्रभम् । मनुजास्थिमयींमालामाबबन्धचपाणिना ४४३ प्रेताधिपःपुरोद्वारे सगदःसमवर्तत । नानाकारमहारत्नभूषणंधनदाहृतम् ४४४ विहायोदग्रसर्पेन्द्रकटकेनस्वपाणिना । कर्णोत्तंसञ्चकारेशो वासुकिन्तक्षकंस्वयम् ४४५ जलाधीशाहृतांस्थास्नुप्रसूनावेष्टितांपृथक् । ततस्तुतेगणाधीशा विनयात्तत्रवीरकम् ४४६ प्रोचुर्व्यग्राकृते ! त्वन्नो समावेदयशूलिने। निष्पन्नाभरणंदेवं प्रसाध्येशम्प्रसाधनः ४४७ सप्तवारिधयस्तस्थुः कर्तुंदर्पणविभ्रमम् । ततोविलोकितात्मानं महाम्बुधिजलोदरे ४४८ धरामालिङ्ग्यजानुभ्यां स्थाणुं प्रोवाचकेशवः । शोभसेदेव ! रूपेण जगदानन्ददायिना ४४९ मातरःप्रेरयाकांमबधूं वैधव्यचिह्निताम् । कालोऽयमितिचालक्ष्य प्रकारेङ्गितसंज्ञया ४५० ततस्ताश्चोदितादेवमूचुःप्रहसिताननाः । रतिःपुरस्तवप्राप्ता नाभातिमदनोज्झिता ४५१ ततस्तां

मस्तकपर धारण करती भई और शिवजी से कहती भई कि तुम तारकासुर दैत्यके मारनेवाले पुत्रको उत्पन्न करो वह तुम्हारा पुत्र दैत्यकुलका नाशकरके उन के रुधिरसे मुझको तृप्तकरेगा ४३५।४३८ शनैश्चर शिवजी के मुकुट और उल्वण अग्निको ग्रहणकर सर्पोंके आभूषणों को लिये हुए शिवजीके आगे खड़ा होताभया ४३९ बसासमेत गजचर्मको इन्द्र ग्रहण करताभया वायु देवता तीक्ष्ण शृंगवाले शिवजीके वाहननन्दीश्वरको अच्छे प्रकारसे शृंगार करताभया और शिवजी के नेत्रोंमें स्थित हुए सूर्य्य अग्नि और चन्द्रमा यह सब अपनी २ कान्तिको लोकोंके पति शिवजी के शरीरमें बढ़ातेभये ४४०।४४२ प्रेतोंका अधिपति राक्षस कपाल और चिताकी भस्मको ग्रहण करके मुंडोंकी मालाहाथमें लेकर स्थितहोताभया कुबेरअनेक प्रकारके रत्नोंके आभूषणोंको ग्रहणकर शिवजीके पास आताभया वासुकी सर्प शिवजीके हाथ औरकानके आभूषणों को बनाताभया वरुण देवता पुष्पोंसे लिपटीहुई सुन्दरयष्टीको शिवजीके निमित्तलाया इसप्रकारसे यहसबदेवतालोगआकर विनयपूर्व्वक वीरभद्रसे बोले कि तुम हमारे आने के समाचार शिवजीसे निवेदन करदो इसके पीछे सातों समुद्र अपने जलके प्रभावसे उत्पन्न हुए दर्पणको शिवजीके निमित्तलाये तब विष्णुभगवान् उस दर्पणमें शिवजीके मुखको दिखवाकर बोले कि हेदेव आप जगत्के आनन्द देनेवाले अपने स्वरूपसे शोभित होरहेहो ४४३।४४९ इसके पीछे सब देवता षोड़श मातृकाओं को कामदेव की स्त्री रतिके पास भेजतेभये तब वह सब मातृका कामदेवकी स्त्री रतिको शिवजीके आगे लाकर यह वचन बोली कि हेदेव कामसे त्यागीहुई यह रति आपके आगे खड़ी है उसको क्या आपनहीं देखते हैं ४५०।४५१ यह वचन सुनकर शिवजीने उस रतिको क्रीड़ापूर्व्वक वामहाथ से अलग करके

सन्निवार्याह वामहस्ताग्रसंज्ञया । प्रयाणेगिरिजावक्त्रदर्शनोत्सुकमानसः ४५२ ततो हरोहिमगिरिकन्दराकृतिं समुन्नतंमृदुगतिभिःप्रचोदयन् । महावृषङ्गणतुमुलाहितेक्षणं सभूधरानशनिरिवप्रकम्पयन् ४५३ ततोहरिर्द्रुतपदपद्धतिःपुरःसरःश्रमात्द्रुमनिकरेषु विभ्रमन् । धरारजःशबलितभूषणोऽब्रवीत् प्रयातमाकुरुतपथोऽस्यसंकटम् ४५४ प्रभोःपुनःप्रथमनियोगमूर्जयन् सुतोऽब्रवीद्भ्रुकुटिमुखोऽपिवीरकः । वियच्चरावियतिकिमस्तिकान्तकं प्रयातनोधरणिधराऽविदूरतः ४५५ महार्णवाःकुरुतशिलोपमम्पयः सुरद्विषागमनमहातिकर्दमान् । गणेश्वराश्चपलतयानगम्यतां सुरेश्वरैःस्थिरमतिभिश्च गम्यताम् ४५६ नभृङ्गिणास्वतनुमवेक्ष्यनीयते पिनाकिनःपृथुमुखमण्डमग्रतः । वृथा यमप्रकटितदन्तकोटरं त्वमायुधंवहसिविहायपञ्जरम् ४५७ पदन्नयद्रथतुरगैःपुरद्विषा प्रमुच्यतेबहुतरमातृसंकुलम् । अमीसुराःपृथगनुयायिभिर्वृताः पदातयोद्विगुणपथान्हरप्रियाः ४५८ स्ववाहनैःपवनविधूतचामरैश्चलध्वजैर्व्रजतविहारशालिभिः । सुराःस्वकं किमितिनरागमूर्जितं विचार्यतेनियतलयत्रयानुगम् ४५९ नकिन्नरैरभिभवितुंहिशक्यते विभूषणप्रचयसमुद्भवोध्वनिः।स्वजातिकाःकिमितिनषड्जमध्यमपृथुस्वरंबहुतरमत्रवक्ष्यते४६०नतानतानतनतनताङ्गताःपृथक्तयासमयकृताविभिन्नताम्। विशङ्किताभवदतिभेदशीलिनःप्रयान्त्यमीद्रुतपदमेवगौडकाः४६१विसंहताःकिमितिनषाड्गवादयःस्वगीतकैर्ललितपदप्रयोगजैः।प्रभोःपुरोभवतिहियस्यचाक्षतंसमुद्गतार्थकमितितत्प्रतीयते ४६२ अमीपृथग्विरचितरम्यरासकं विलासिनोबहुगमकस्वभावकम्। प्रयुञ्जतेगिरिशयशोवि

पार्वतीजीके मुखके देखनेकी इच्छाकरी ४५२ फिरहिमालय पर्व्वतकी कन्दराके समान उच्चवृषभ पर चढ़कर मन्द२ गतिसे प्रेरणा करते हुए शिवजी हिमालयके स्थानकी ओर गमनकरतेभये ४५३ तब विष्णुभगवान् उनके आगे खड़े होकर बोले कि तुम शीघ्रतासे गमनकरो मार्गमें विलंब मतकरो उस समय शिवका पुत्र वीरभद्र बोला कि हे महादेव आकाशमें दैत्य दानव आदि विचरते हैं इसलिये इनके समीपमें गमन मतकरो हे समुद्रो तुम आकाशमें शिलाके समानबादलोंको पूरितकरदो हेगणेश्वर लोगो तुम चपलता मतकरो हे देवतालोगो तुम भी स्थिरबुद्धिसे चलो हे भ्रमर तू शिवजीके महान् मुखमंडलको देखकर क्यों वृथा मोहको प्राप्त होरहाहै यह शिवजीके संग चलने वाले देवता रथ घोड़ोंपर सवारहोरहेहैं पदाती भी शिवजीके संगमें चलतेहैं हेदेवताओ तुमवायुसे फहराती हुई ध्वजावाले बाहनोंपर क्यों नहीं चढ़कर चलते हो और बढ़ेहुए रागका विचार क्यों नहीं करतेहो यह किन्नर भी अपनेआभूषणोंकी ध्वनिकररहे हैं इस निमित्त तुमभी अपने षड्ज मध्यमआदि स्वर में बहुत से रागोंको क्यों नहीं गातेहो ४५४।४६० हेदेवताओ तुमसे शंका करतेहुए किन्नर नीतिके घर होकर शीघ्रतापूर्व्वक चलते हैं ४६१ तुम सब इकट्ठे होकर उत्तमस्वर और लयसे शिवजी के आगे स्थित होकर रागोंको गाओ यह विलासी किन्नर रमणीक पदोंवाले शिवजीके यशयुक्त उत्तम

सारिणंप्रकीर्णकंबहुतरनागजातयः ४६३ अमीकथंककुभिकथाःप्रतिक्षणं ध्वनन्तितेवि
विधवधूविमिश्रिताः । नजातयोध्वनिमुरजासमीरिता नमूर्च्छिताःकिमितिचमूर्च्छनात्मि
काः ४६४ श्रुतिप्रियक्रमगतिभेदसाधनं ततादिकंकिमितिनतुम्बरेरितम् । नहन्यतेबहुवि
धवाद्यडम्बरं प्रकीर्णवीणामुरजादिनामयत् ४६५ इतीरितोगिरिमवधानशालिनःसुरा
सुराःसपदितुवीरकाज्ञया । नियामिताःप्रययुरतीवहर्षिताश्चराचरंजगदखिलंह्यपूरयन्
४६६ इतिस्तनत्ककुभिरसन्महार्णवे स्तनद्घनेविदलितशैलकन्दरे । जगत्यभूत्तुमुलह्
वाकुलीकृतः पिनाकिनात्वरितगतेनभूधरः ४६७ परिज्वलत्कनकसहस्रतोरणं क्वचिन्
मिलन्मरकतवेश्मवेदिकम् । क्वचित्क्वचिद्विमलवैदूर्यभूमिकं क्वचिद्गलज्जलधररम्यनि
र्झरम् ४६८ चलध्वजप्रवरसहस्रमण्डितंसुरद्रुमस्तवकाविकीर्णचत्वरम् । सितासितारु
णरुचिधातुवर्णकंश्रियोज्ज्वलंप्रविततमार्गगोपुरम् ४६९ विजृम्भिताप्रतिमध्वनिवारिदं
सुगन्धिभिःपुरपवनैर्मनोहरम् । हरोमहागिरिनगरंसमासदत् क्षणादिवप्रवरसुरासुरस्तुतः
४७०तंप्रविशन्तमगात्प्रविलोक्यव्याकुलतांनगरंगिरिभर्त्तुः । व्यग्रपुरन्ध्रिजनञ्जवियानं
धावितमार्गजनाकुलरथ्यम् ४७१ हर्म्यगवाक्षगतामरनारी लोचननीलसरोरुहमालम् ।
सुप्रकटासमदृश्यतकाचित् स्वाभरणांशुवितानविगूढा ४७२ काप्यखिलीकृतमण्डनभूषा
त्यक्तसखीप्रणयाहरमैक्षत् । काचिदुवाचकलङ्गतमानाकातरतांसखि ! माकुरुमूढे ! ४७३

रागोंको गाते हैं और यह किन्नर अनेक २ प्रकारकी अपनी सुन्दर स्त्रियों समेत अच्छी ध्वनियों
से गारहे हैं हे देवताओ तुमने मृदंगादिक बाजेनहीं बजाये और वीणामें मूर्च्छनादिवाकर रागोंको
नहीं गाया ४६२ । ४६४ तुंबर गन्धर्व से प्रेरेहुए बीन आदिक बाजोंको बजवाओ अनेक प्रकारके
मृदंग बजवाओ यह वचन सुन देवतालोग वीरभद्रकी आज्ञासे बड़ेहर्षके साथ अपने बाजे और
गानादि से चराचर जगत् को व्याप्त करतेभये समुद्र और मेघ दोनों गर्जने लगे उस समय
महादेव के शीघ्र चलने से वह हिमाचल व्याकुल होताभया ४६५ । ४६७ इसकेअनन्तर प्रकाशित
स्वर्णमयी हज़ारों तोरणोंवाला मणियोंसे जटित घरोंवाला वैदूर्यमणियों से शोभित भूमि
वाला जहां तहां मेघों के बरसने और झिरनोंसे जलवाला फहराती हुई अनेक ध्वजावाला कल्पवृक्षोंके
चतुष्पथ स्थानों से शोभित श्वेत कृष्ण और रक्तवर्णकी धातुओं से सुन्दर वर्णवाला
लक्ष्मी से उज्ज्वल सड़क और द्वारोंवाला और नगरकी सुगंधित वायु से मनोहर ऐसे हिमाचलके
नगरमें जब महादेवजी प्राप्तहोते भये उसी क्षणमें सब देवताभी प्राप्तहोजाते भये ४६८ । ४७०
नगरमें प्रवेशकरतेहुए महादेवजीको देखकर सब जन विह्वलहोगये और भयभीत होकरभागे उन
भाजतेहुए नगरनिवासियों से मार्ग भरगया ४७१ स्थानों के झरोखोंमें बैठीहुई देवताओंकी
स्त्रियां नीले कमलोंकी मालाओंसे महाशोभित दीखतीथीं कोई स्त्री तो अपने भूषणोंकी शोभादिखाती
थी ४७२ कोई सब शृंगारकरके सखियोंके संगको त्यागकर शिवजीको देखतीथी कोई सखी
दूसरी सखी से कहतीथी कि हे मूर्ख बुद्धिवाली तू दर्शन करनेमें चंचलपना मतकरे यह शिवजी

दग्धमनोभवएवपिनाकी कामयतेस्वयमेवविहर्त्तुम्। काचिदपिस्वयमेवपतन्ती प्राहपरां विरहस्खलितांगीम्४७४ माचपलेमदनव्यतिषंगं शंकरजंस्खलनेनवदत्वम्। कापिकृतव्यवधानमदृष्टा युक्तिवशाद्गिरिशोह्ययमूचे ४७५ एषसयत्रसहस्रमखाद्या नाकसदामाधिपाःस्वयमुक्तैः। नामभिरिन्दुजटंनिजसेवा प्राप्तिफलायनतास्तुघटन्ते४७६ एषनचैषसएष यदग्रेघर्मपरीततनुःशशिमौली। धावतिवज्रधरोऽमरराजो मार्गममुंविवृतीकरणाय ४७७ एषसपद्मभवोऽयमुपेत्य प्रांशुजटामृगचर्मनिगूढः। सप्रणयङ्करघाट्टितचक्रं किञ्चिदुवाचमितंश्रुतिमूले ४७८ एवमभूत्सुरनारिकुलानां चित्तविसंष्ठुलतागुरुरागात्। शङ्करसंश्रयणाद्गिरिजाया जन्मफलंपरमन्त्वितिचोचुः ४७९ ततोहिमागेरे वेश्म विश्वकर्मानिवेदितम्। महानीलमयस्तम्भंज्वलत्काञ्चनकुट्टिमम् ४८० मुक्ताजालपरिष्कारं ज्वलितौषधिदीपितम्। क्रीड़ोद्यानसहस्राढ्यं काञ्चनाबद्धदीर्घिकम् ४८१ महेन्द्रप्रमुखाःसर्वे सुराद्दष्ट्वातदद्भुतम्। नेत्राणिसफलान्यद्य मनोभिरितितेदधुः४८२ विमर्दकीर्णकेयूराहारिणाद्वारिरोधितः। कथञ्चित्प्रमुखास्तत्र विविशुर्नाकवासिनः ४८३ प्रणतेनाचलेन्द्रेण पूजितोऽथचतुर्मुखः। चकारविधिनासर्वं विधिमन्त्रपुरःसरम् ४८४ शर्वेणपाणिग्रहणमग्निसाक्षिकमक्षतम्। दातामहीभृतान्नाथो होतादेवश्चतुर्मुखः ४८५ वरःपशुपतिःसाक्षात् कन्याविश्वारणिस्तथा। चराचराणिभूतानि सुरासुरवराणिच ४८६ तत्राप्येतेनियमतो ह्यभवन्व्यग्रमूर्त

कामदेवको आपही दग्ध करतेभये और आपही मैथुनकरने की इच्छाभी करते हैं कोई आप गिरी हुई स्त्री विरहसे गिरीहुई दूसरी स्त्रीसेबोली कि हे चपले तू शिवजीके उत्पन्नहुए कामदेवके काम को क्या देखती है कोई स्त्री अपने वस्त्रका घूंघटकाढ़कर युक्तिपूर्व्वक बोली कि यह शिवजी स्वर्ग के पतिदेवताओंसे युक्तहोरहे हैं और सब देवता इनके नामोंका स्मरण करते हैं यह शिवजी की सेवा फलकी प्राप्ति करनेवाली है ४७३।४७६ चन्द्रमा जिनके मस्तकमें हैं ऐसे वह शिवजी घामसे व्याकुलहोरहे हैं देवताओंका राजा इन्द्र शिवजी के आगे २ मार्गको साफकरताहुआ भागताजाता है ४७७ यह ब्रह्माजीभी इनशिवजीके समीपमें प्राप्तहोकर कानमें कुछबातें कहताहै जब हिमालयमें शिवजी पहुंचे तब देवताओंकी स्त्रियोंका घोष इसवर्णन किये हुए प्रकारोंसे होताभया वह स्त्रियां यह कहरहीथीं कि शिवजीके आश्रयसे इसपार्वतीका जन्म सफल होगया ४७८।४७९ इसके पीछे विश्वकर्मासे रचेहुए महानील मणिके स्तंभोंसे उज्ज्वल सुवर्णकी कुरसियोंवाले मोतियों की जालियोंसे पूरित दीप्त ओषधियोंसे प्रकाशित और क्रीड़ाके हज़ारों बगीचोंसे शोभितहुए हिमालय पर्व्वतके गृहको सब देवता देखकर अपने नेत्रों समेत चित्तको सफल करतेभये और विष्णु भगवान् उसके द्वारहीपर स्थितहोतेभये फिर सब देवता उस घरमें प्रवेशकरते भये ४८० । ४८३ तब नम्रतापूर्व्वक हिमाचलने विधिपूर्व्वक ब्रह्माका पूजन किया और अग्निदेवको साक्षीकरके शिवजीने पार्वतीजीका पाणिग्रहण किया उस समय महादानी पर्व्वतों का पति राजा हिमाचल दान करने वाला हुआ और चतुर्मुख ब्रह्मा हवन करनेवाला होताभया शिवजी साक्षात् वर हुए और चराचर

मुमोचाभिनवान्सर्वान् सस्यशालीन्रसौषधीः ४८७ व्यग्रातुपृथिवीदेवी सर्वभावयः । गृहीत्वावरुणःसर्वरत्नान्याभरणानिच ४८८ पुण्यानिचपवित्राणि नानारत्नमयानितु । तस्थौस्त्राभरणोदेवो हर्षदःसर्वदेहिनाम् ४८९ धनदश्चापिदिव्यानिहैमान्याभरणानिच । जातरूपविचित्राणि प्रयतःसमुपस्थितः ४९० वायुर्ववौसुसुरभिः सुखसंस्पर्शनोविभुः । छत्रमिन्दुकरोद्गारं सुसितञ्चशतक्रतुः ४९१ जग्राहमुदितःस्रग्वी बाहुभिर्बहुभूषणैः । जगुर्गन्धर्वमुख्याश्च ननृतश्चाप्सरोगणाः ४९२ वादयन्तोऽतिमधुरं जगुर्गन्धर्वकिन्नराः । मूर्त्ताश्चऋतवस्तत्र जगुश्चननृतुश्चवै ४९३ चपलाश्चगणास्तस्थुर्लौलयन्तोहिमाचलम् । उत्तिष्ठन्क्रमशश्चात्र विश्वभुग्भगनेत्रहा ४९४ चकारौद्वाहिकंकृत्यंपत्न्यासहयथोचितम् । दत्तार्घोगिरिराजेन सुरवृन्दैर्विनोदितः ४९५ अवसत्तांक्षपान्तत्र पत्न्यासहपुरान्तकः । ततोगन्धर्वगीतेन नृत्येनाप्सरसामपि ४९६ स्तुतिभिर्दैवदैत्यानां विबुधोविबुधाधिपः । आमन्त्र्यहिमशैलेन्द्रं प्रभातेचोमयासह । जगाममन्दिरगिरिं वायुवेगेनशृङ्गिणा ४९७ ततोगतेभगवतिनीललोहिते सहोमयारतिमलभन्नभूधरः । सबान्धवोभवतिचकस्यनोमनो विह्वलञ्चजगतिहिकन्यकापितुः ४९८ ज्वलन्मणिस्फटिकहाटकोत्कटं स्फुटद्युतिस्फटिकगोपुरंपुरम् । हरोगिरौचिरमनुकल्पितन्तदा विसर्जितामरनिवहोऽविशत्स्वकम् ४९९ तदोमासहितोदेवो विजहारभगाक्षिहा । पुरोद्यानेषुरम्ये

सब भूत देवता और राक्षस यह सब नियम करके स्थित होते भये उससमय में पृथ्वीभी उत्तम नवीन २ खेतियोंको और मनोहर ओषधियोंको उत्पन्न करतीभई वरुण देवता सबरत्नोंको ग्रहणकरके शिवजीके आगे स्थित होतेभये कुबेरभी सबदेहधारियोंके हर्षदायक शिवजी महाराजके निमित्त सुवर्ण के आभूषणोंको लाताभया वायुदेवता सुख स्पर्शपूर्व्वक अनुकूल चलनेलगा इन्द्रचन्द्रमाकी किरणोंके समान श्वेतछत्रको शिवजीकेऊपर लगाताभया ४८४ । ४९१ उत्तम २ गन्धर्वगानकरतेभये अप्सरा नृत्य करनेलगीं गन्धर्व औरकिन्नर अत्यन्तमधुर २ बाजेबजाकर गाने औरनाचनेलगे छओंऋतु अपनी २ मूर्त्तिको धारणकरके नाचती औरगातीभईं शिवजीके चपलगण हिमाचलपर चंचलपनाकरके स्थितहोतेभये ऐसेसमयमें महादेवजी अपनीपत्नी समेतहोविवाहके सबकर्मोंकोकरतेभये ४९२।४९५ विवाहहोनेके पीछे उसरात्रिमें अपनीपत्नी सहितहोकर शिवजी हिमाचलहीके घरमें स्थितहोते भये उससमय गन्धर्वोंने गानकिया अप्सराओंने नृत्यकिया ४९६ फिरप्रातःकालहोतेही महादेवजी हिमाचलपर्व्वतकी आज्ञालेकर पार्वती समेत वायुके समान वेगवाले नादियेपै चढ़कर मन्दराचल पर्व्वतपर जातेभये ४९७ जब महादेवजी चलेगये तब उस पार्वतीके विना हिमाचलका चित्तनहीं लगा क्योंकि कन्याके पिताका चित्त इस संसारमें सर्वत्र विह्वलहोजाताहै ४९८ इसके पश्चात् प्रकाशमानमणियों से शोभितऔरहीरे आदिरत्नोंसेजटित द्वारवाले उसपर्व्वतके बड़ेसुन्दर रमणिक स्थानमें महादेवजी वासकरतेभये औरसब देवताओं को अपने २ स्थानोंको भेजतेभये ४९९ फिर पार्वतीसे संयुक्तहुए महादेव अनेक प्रकारके रमणीक बगीचोंमें और बनों में कामदेवसे युक्तहोकर

षुविविक्तेषुवनेषुच ५०० सुरक्तहृदयोदेव्या मकराङ्कपुरःसरः। ततोबहुतिथेकालेसुतकामा गिरेःसुता ५०१ सखीभिःसहिताक्रीडां चक्रेकृत्रिमपुत्रकैः। कदाचिद् गन्धतैलेन गात्रमभ्यज्यशैलजा ५०२ चूर्णैरुद्वर्तयामास मलिनांतरितान्तनुम्। तदुद्वर्तनकंगृह्य नरंचक्रेगजाननम् ५०३ पुत्रकंक्रीडतींदेवी तंचाक्षिपयदम्भसि। जाह्नव्यास्तुशिवासख्यास्ततःसोऽभूद्बृहत्वपुः ५०४ कायेनातिविशालेनजगदापूरयत्तदा। पुत्रेत्युवाचतंदेवीपुत्रेत्यूचेचजाह्नवी ५०५ गाङ्गेयइतिदेवैस्तु पूजितोऽभूद् गजाननः। विनायकाधिपत्यञ्च ददावस्यपितामहः ५०६ पुनःसाक्रीडनंचक्रे पुत्रार्थंवरवर्णिनी। मनोज्ञमंकुरंरूढ मशोकस्यशुभानना ५०७ वर्द्धयामासतंचापि कृतसंस्कारमङ्गला। बृहस्पतिमुखैर्विप्रैर्दिवस्पतिपुरोगमैः ५०८ ततोदेवैश्चमुनिभिः प्रोक्तादेवीत्विदंवचः। भवानिभवतीभव्या संभूतालोकभूयते ५०९ प्रायः सुतफलोलोकः पुत्रपौत्रैश्चलभ्यते। अपुत्राश्चप्रजाःप्रायो दृश्यन्तेदैवहेतवः ५१० अधुनादर्शितेमार्गे मर्यादांकर्तुमर्हसि। फलंकिम्भवितादेवि ! काल्पितैस्तरुपुत्रकैः ५११ इत्युक्ताहर्षपूर्णाङ्गी प्रोवाचोमाशुभाङ्गिरम्। (देव्युवाच) एवंनिरुदकेदेशेयःकूपंकारयेद्बुधः ५१२ बिन्दौबिन्दौचतोयस्य वसेत्संवत्सरन्दिवि। दशकूपसमावापी दशवापीसमोह्रदः ५१३ दशह्रदसमःपुत्रो दशपुत्रसमोद्रुमः। एषैवममर्यादानियतालोकभाविनी ५१४ इत्युक्तास्तुततोविप्रा बृहस्पतिपुरोगमाः। जग्मुःस्वमन्दिराण्येव भवानींवन्द्य

विचरतेभये इसकेलिही में पार्वती पुत्रकी इच्छाकरके कृत्रिमपुत्र बनायेहुए सखियों के संगखेलती भयी किसीसमयपर पार्वती गंधयुक्त तैलकामर्द्दनकरके चूनका उबटनाकर अपनेमैलको उतार उस मैलयुक्त उबटनेका एकहाथीके मुखवाला मनुष्य बनातीभई फिर खेलतीहुई पार्वतीदेवी उसपुत्रको गंगाजीमेंडालतीभई फिर गंगाजीमें पड़ेहुए उसपुत्रकाशरीर बहुत बड़ा होगया ५०० । ५०४ और अपने महानसुन्दर शरीरसे वहपुत्र जगत्कोपूर्ण करताभया तब पार्वती उसको देखकर हेपुत्र ऐसा कहकर बोलतीभई उसी समय गंगाजीनेभी उसको हेपुत्र ऐसा उच्चारणकिया तबतो देवताओंने इसकापूजन किया और ब्रह्माजीने इसका विनायकनामरक्खा और इसीको सब गणों का अधिपति भीबनादिया इसप्रकार करके पार्वतीजीसे गणेशकी उत्पत्तिहुई है ५०५।५०६ इसके अनन्तरवह पार्वती खेलनेके निमित्त अशोक वृक्षके जमतेहुए अंकुरको पुत्रके निमित्त पालतीहुई सींचनेलगी और संस्कार मंगल करके उस अंकुरको बढ़ावतीभई तब बृहस्पति आदिक देवता ब्राह्मण और मुनि यहसब पार्वतीजीसे कहतेभये किहेभवानी तुम संसारके कल्याण करनेके निमित्त उत्पन्नहुईहो और विशेषकरके संसारको पुत्रकाफल अच्छाहोताहै औरबहुतसी प्रजा दैवकेप्रतापसे प्रजारहितही दिखाई पड़तीहै हेदेवि कल्पित कियेहुए वृक्षोंके पुत्रोंसे कौनसाफल सिद्धहोताहै उसको आपकहिये ऐसेकही हुई पार्वती प्रसन्नहोकर शुभवाणीसे बोलतीभई कि जोकोई इसीप्रकारसे निर्जल देशमें कूपबनवा देताहै वह एक २ बिन्दुजलसे एक२ वर्षके हिसाबसे स्वर्गमें वास करताहै एक बावड़ी दशकुओं के समानहै दश तड़ागोंके समान उद्धारकरनेवाला एकपुत्रहै दशपुत्रों के समान एक वृक्षहै यह मेरी

गतेषुतेषुदेवोऽपि शङ्करःपर्वतात्मजाम् । पाणिनालम्बमानेन शनैःप्रावेश
सादरम् ५१५ चित्तप्रसादजननं प्रासादमनुगोपुरम् । लम्बमौक्तिकदामानं मालिका
यच्छुभाम् ५१६ निर्धौतकलधौतंच क्रीडागृहमनोरमम् । प्रकीर्णकुसुमोद्दाम मत्तालि
कुलवेदिकम् ५१७ किन्नरोद्गीतसङ्गीत गृहान्तारिताभित्तिकम् । सुगन्धिधूपसङ्घातमनःप्रा
कुलकूजितम् ५१८ क्रीडन्मयूरनारीभिर्वृतं वैततवादिभिः । हंससङ्घातसंघुष्टं स्फाटिकस्त
र्थ्यमलंहितम् ५१९ अनारतमतिप्रीत्या बहुशःकिन्नराकुलम् । शुकैर्यत्राभिहन्यन्तेपद्मराग
म्भवेदिकम् ५२० भित्तयोदाडिमभ्रान्त्या प्रतिबिम्बितमौक्तिकाः । तत्राक्षक्रीडयादेवो विह
विनिर्मिताः ५२१ स्वच्छेन्द्रनीलभूभागे क्रीडनेयत्राधिष्ठितौ । वपुःसहायतांप्राप्तौविनोदर
र्तुमुपचक्रमे ५२२ एवंप्रक्रीडतोस्तत्र देवीशङ्करयोस्तदा । प्रादुर्भवन्महाशब्दस्तद्गृहोदर
सनिर्वृतौ ५२३ तच्छ्रुत्वाकौतुकाद्देवी किमेतदितिशङ्करम् । पप्रच्छतंशुभतनुर्हरं विस्मयपूर्व
गोचरः५२४ उवाचदेवींनैतत्ते दृष्टपूर्वंसुविस्मिते ! । एतेगणेशाःक्रीडन्ते शैलेऽस्मिन्मत्प्रियाः
कम्५२५ तपसाब्रह्मचर्येण नियमैःक्षेत्रसेवनैः । यैरहंतोषितःपूर्वं त एतेमनुजोत्तमाः५२७
सदा५२६ कामरूपामहोत्साहा महारूपगुणान्विताः ५२८
मत्समीपमनुप्राप्ता ममहृद्याःशुभानने ! । सामरस्यास्यजगतः सृष्टिसंहरणक्षमाः ५२९
कर्मभिर्विस्मयंतेषां प्रयामिबलशालिनाम् । विवर्जितोऽप्यहं नित्यन्नैभिर्विरहितोरमे ५३०
ब्रह्मविष्णिन्द्रगन्धर्वैः सकिन्नरमहोरगैः ।

मर्यादा है इसीमर्य्यादासे मैं संसारके पालनेमें स्थितहूं ५०७।५१४ ऐसीबात सुनकर वहबृहस्पति
आदिक ब्राह्मण पार्वती को प्रणामकरके अपने २ स्थानोंको जातेभये ५१५ जबवहसब ब्राह्मण
अपने २ स्थानों को चलेगये तब महादेवजी अपने हाथसे पार्वती को शनैः उसस्थान के भीतर
बुलाते भये ५१६ जो चित्तका प्रसन्नकरने वाला मोतियों की मालाओं के लटकने से शोभित
द्वारवाला सुवर्णकी भित्तियों से शोभित क्रीड़ा के स्थानोंसे आनन्ददायक था और जो कि पुष्पों
की मालाओंके ऊपरगुंजार करने वाले भ्रमरों से अतिही सुहावना विदित होताथा ५१७।५१८
उसस्थानके भीतर किन्नर रागोंकोगाते मोर और मोरनी क्रीड़ाकरते हंसोंके समूह घोषकररहे मणि-
योंके स्तंभ जगमगारहे पुखराजकी भीतोंपर बैठे तोते क्रीड़ाकररहे ऐसे रमणीक स्थानके भीतर शिव-
जीके बुलानेसे पार्वतीजी प्राप्तहोकर शिवजीके साथ अक्ष अर्थात् पासोंसे खेलतीभईं शिवजी और
पार्वतीजी दोनों विनोदरसमें पूरितहोके जब खेलनेलगे उस समय उसीस्थानके समीप महान् श-
ब्द होताभया उसशब्दको सुनकर पार्वतीजी बड़ाआश्चर्य्य करके शिवजीसे पूछनेलगीं कियह कैसा
शब्द हुआहै ५१९।५२५ पार्वतीके इस वचनको सुनके शिवजीबोले कि इस पर्व्वतमें मेरे प्रियग-
णेश्वर क्रीड़ाकररहेहैं तप व्रत ब्रह्मचर्य्य और तीर्थसेवा इत्यादि नियमों करके इन गणेश्वरोंने मुझ
को प्रसन्नकर रक्खाहै यहसब मनुष्यों में उत्तमहैं अपने रूपको इच्छापूर्व्वक बनासक्ते हैं बड़े उत्साह
और गुणोंसे संयुक्तहैं ५२६।५२८ इनके कर्मका मुझकोभी आश्चर्य्यहै यहदेवता समेत सब सृष्टि
के नाशकरनेको समर्थ हैं ५२९ ब्रह्मा विष्णु इन्द्र गन्धर्व किन्नर और दिव्य सर्प इनसबको चाहै मैं

हृद्यामेचारुसर्वाङ्गास्त एतेक्रीडतेगिरौ। इत्युक्तातुततोदेवी त्यक्तातद्विस्मयाकुला ५३१
गवाक्षान्तरमासाद्य प्रेक्षतेविस्मितानना । यावन्तस्तेकृशादीर्घा ह्रस्वास्थूलामहोदराः
५३२ व्याघ्रेभवदनाःकेचित् केचिन्मेषाजरूपिणः । अनेकप्राणिरूपाश्च ज्वालास्याःकृ
ष्णपिङ्गलाः ५३३ सौम्याभीमाःस्मितमुखाः कृष्णपिङ्गजटासटाः । नानाविहङ्गवदना ना
नाविधमृगाननाः ५३४ कौशेयचर्म्मवसनानग्नाश्चान्येविरूपिणः । गोकर्णागजकर्णा
श्च बहुवक्त्रेक्षणोदराः ५३५ बहुपादाबहुभुजादिव्यनानास्त्रपाणयः । अनेककुसुमापी
डा नानाव्यालविभूषणाः ५३६ वृत्ताननायुधधरा नानाकवचभूषणाः। विचित्रवाहनारू
ढा दिव्यरूपावियच्चराः ५३७ वीणावाद्यरवाघुष्टा नानास्थानकनर्तकाः । गणेशांस्तांस्त
थादृष्ट्वा देवीप्रोवाचशङ्करम् ५३८ (देव्युवाच) गणेशाःकतिसङ्ख्याताः किंनामानःकि
मात्मकाः । एकैकशोममब्रूहिधिष्ठितायेपृथक्पृथक् ५३९ (शङ्कर उवाच) कोटिसङ्ख्या
ह्यसङ्ख्याता नानाविख्यातपौरुषाः । जगदापूरितंसर्वैरेभिर्भीमैर्महाबलैः ५४० सिद्धक्षे
त्रेषुरथ्यासु जीर्णोद्यानेषुवेश्मसु । दानवानांशरीरेषु बालेषून्मत्तकेषुच ५४१ एतेविश
न्तिमुदिता नानाहारविहारिणः । ऊष्मपाःफेनपाश्चैव धूमपामधुपायिनः ५४२ रक्तपाः
सर्वभक्षाश्च वायुपाह्यम्बुभोजनाः । गेयनृत्योपहाराश्च नानावाद्यरवप्रियाः ५४३ नह्ये
षांवैअनन्तत्वाद्गुणान्वक्तुंहिशक्यते । (देव्युवाच) मार्गेत्वगुंत्तरासङ्गः शुद्धाङ्गोमुञ्ज

त्यागकरदूं परन्तु इनगणोंके विना मुझसेनहीं रहाजाताहै ५३० यहसब मेरे हृदयमें वसतेहैं यहसु·
नकर पार्वतीजी आश्चर्य्ययुक्त होगईं और झरोखोंमें बैठकर उनसबको देखनेलगीं वहसव गणेश्वर
ऐसेथे मोटे २ लंबे २ छोटे २ स्थूल महा उदरवाले सिंह और हाथीके समान मुखवाले कोई मेढ़के
रूपवाले कोई बकरेके समान मुखवाले कोई अनेक प्राणियोंके समान रूपवाले कोई अग्निके समा·
न रूपवाले काले पीले वर्णवाले सौम्य भयानक और हंसते हुए मुखवाले कृष्णपीत जटावाले अने·
क पक्षियोंके समान शरीरवाले अनेक प्रकारके मृगोंके समान मुखवाले कुशा और चर्मके वस्त्रयुक्त
नंगे विरूपगौके समान कान हस्तीकेसे कानबड़े २ मुख छोटापेट बहुतसे पैर बहुतसे हाथ और अ·
नेक प्रकारके दिव्य शस्त्रोंको लियेहुए अनेक पुष्प और सर्पोंके आभूषणवाले अनेक प्रकारकी वस्तु
वाले विचित्र वाहनोंपर चढ़ेहुए दिव्य रूपोंसे आकाशमें गमन करनेवाले बीनके बजानेवाले अनेक
स्थानोंमें नाचनेवाले ऐसेउन गणेश्वरोंको पार्वतीजी देखकर शिवजीसे बोलीं ५३१ । ५३८ हे देव
देव आपके गण कितनेहैं क्या २ नामहै एक २ कोमेरेआगे वर्णनकीजिये ५३९ शिवजीबोले कि मेरे
अनेक नामोंवाले गण असंख्यहैं औरमहाबलवाले हैं इनसबोंने जगत्को पूर्णकररक्खाहै ५४० सिद्ध
क्षेत्रोंमें बीथियोंमें बगीचोंमें प्राचीन स्थानोंमें दानवोंके शरीरोंमें बालकों में बावलोंमें और श्मशाना·
दि स्थानोंमें इनसबोंमें यहगण प्रसन्नहोकर प्रवेश करजाते हैं अनेक प्रकारकी क्रीड़ाकरते हैं भाफ झाग
धुंआ और शहद इनकोपीते हैं और सबवस्तुओंको भक्षण करते हैं वायु जलकोभी भक्षणकर गाने व·
जाने और नाचनेमें आसक्तरहते हैं ५४१ । ५४३ यह असंख्यात गणहैं इसहेतुसे इनकी संख्यानहीं

वामस्थेनचशिक्येन चपलोरञ्जिताननः। मृगदंष्ट्रोह्युत्पलानां स्रग्दामो मेखली ५४४ पाषाणशकलोत्तान कांस्यतालप्रवर्तकः। असौगणेश्वरोदेव ! किन्नामधुराकृतिः ५४५ यएषगणगीतेषु दत्तकर्णोमुहुर्मुहुः। (शर्वउवाच) सएषवीरकोमाकिन्नरानुगः ५४६ नानाश्चर्य्यगुणाधारो गणेश्वरगणार्चितः। (देव्युवाच) ईदृशस्यसुतस्यास्ति ममोत्कण्ठापुरान्तक ! ५४८ कदाहमीदृशंपुत्रं द्रक्ष्याम्यानन्द दायिनम् (शर्वउवाच) एषएवसुतस्तेऽस्तु नयनानन्दहेतुकः ५४९ त्वयामात्राकृतार्थस्तु वीरकोऽपिसुमध्यमे !। इत्युक्ताप्रेषयामास विजयांहर्षणोत्सुका ५५० वीरकानयनायाशु दुहिताहिमभूभृतः। सावरुह्यत्वरायुक्ता प्रासादादम्बरस्पृशः ५५१ विजयोवाचगणपङ्क्तमध्येप्रवर्तिता। (विजयोवाच) एहिवीरक! चापल्यात् त्वयादेवः प्रकोपितः ५५२ किमुत्तरंवदत्यर्थे नृत्यरङ्गेतुशैलजा। इत्युक्तस्त्यक्तपाषाण शकलोमार्जिताननः ५५३ आहूतस्तुतयोद्भूतमूलप्रस्तावशंसकः। देव्याःसमीपमागच्छज्जययानुगतःशनैः ५५४ प्रासादशिखरोत्फुल्लरक्ताम्बुजनिभद्युतिः। तंदृष्ट्वाप्रस्रुतानल्पस्वादुक्षीरपयोधरा। गिरिजोवाचसस्नेहं गिरामधुरवर्णया ५५५ अथ गद्यानि (उमोवाच) एह्येहियातोऽसिमेपुत्रतान्देव देवेनदत्तोऽधुनावीरक ! ५५६ इत्येवमङ्केनिधायाथतंपर्यष्वजत् कपोलेकलवादिनम् ५५७ मूर्ध्नुपाघ्रायसंमार्ज्यगात्राणिभूषयामासदिव्यैः। स्वयंभूषणैः

कहसक्के ऐसे सुनकर पार्वतीजी पूछने लगीं कि हे महादेवजी मृगछालाको ओढ़ेहुए शुद्धांग मूंजकी मेखलावाला बायींओर छींकेको करके चपलता करताहुआ पत्थरों की मालावाला मनोहर आकार युक्त पत्थर के टुकड़े से तालवजाने वाला किन्नरों के पीछे २ चलनेवाला ऐसा वह गणेश्वर है उसका नाम क्याहै ५४४। ५४६ यह अन्य गणोंके गीतोंमें बारंबार कानलगाताहै शिवजीने कहा हेदेवि यह वीरक अर्थात् वीरभद्रहै इसमें अनेक आश्चर्य्य के गुणभरे हैं मुझको सदैव प्रियहै पार्वतीजी ने कहा हे शिवजी ऐसेही पुत्रकी मुझको भी लालसाहै ऐसे आनन्दके देनेवाले पुत्रको मैं कबप्राप्तहोऊंगी-शिवजीने कहा कि यही पुत्रतेरे नेत्रोंको आनन्द देनेवालाहै हे सुन्दर कटिवाली यह वीरभद्रभी तुझको माता कहकर कृतार्थ हो जायगा यह वचन सुनकर पार्वतीने विजया सखीको वीरभद्रके बुलानेके निमित्त भेजा तब वह विजया सखी बड़ी शीघ्रतासे ऊंचे स्थानसे नीचे उतरकर यह वचन बोली कि हेवीरभद्र यहाँ आओ तैंने चपलपनेसे महादेवको वशीभूत करलियाहै यह बात सुनतेही वीरभद्र पत्थरके टुकड़ेको हाथसे पटक मुखकोपोंछकर मूल वार्त्ताके प्रस्तावको कहताहुआ उस विजया सखी के संगमें शनैः आकर पार्वती के पास बैठजाताभया ५४७। ५५४ लाल कमलके समान कान्तिवाले उस वीरभद्रको देखकर पार्वती के स्तनों से दूधटपकनेलगा और बड़ेस्नेहकरके पार्वती मधुरवाणीसे बोली ५५५ हेवीरभद्र तू आया अब तुझको महादेवजीने मुझे दियाहै इसप्रकार से कहकर उसको अपनी गोदीमें बैठाकर कपोल चुंबनकरतीभई और उस मीठी २ बाणी बोलनेवाले के मस्तकको सूंघकर पुचकारतीभई फिर उसके शरीरको दिव्य आभूषण क्षुद्रघंटिका मणियों

किङ्किणीमेखलानूपुरैर्माणिक्य केयूरहारोरुमूलगुणैः ५५८ कामलैःपल्लवैश्चित्रितैश्चा
रुभिर्दिव्यमन्त्रोद्भवैस्तस्यशुभैस्ततो भूरिभिश्चाकरोन्मिश्र सिद्धार्थकैरङ्गरक्षाविधिः
५५९ एवमादायचोवाचकृत्वासंमूर्ध्नि गोरोचनांपत्रभङ्गोज्ज्वलैः ५६० गच्छगच्छाधु
नाक्रीडसार्द्धङ्गणैरप्रमत्तोवसंश्चभ्रवर्जीशनै र्व्यालमालाकुलाशैलसानुद्रुमदन्तिभिर्भिन्न
साराःपरेसङ्गिनः ५६१ जाह्नवीयंजलंक्षुब्धतोयाकुलंकूलंमा विशेथाबहुव्याघ्रदुष्टेवने
५६२ वत्सासंख्येषुदुर्गागणेशेष्वेतस्मिन्वीरकेपुत्रभावोपतुष्टान्तःकरणातिष्ठतु ५६३
स्वस्यपितृजनप्रार्थितं भव्यमायातिभाविन्यसौभव्यता ५६४ सोऽपिनिभृत्यसर्वगणैःस
स्मयमहाबालत्वलीलारसाविष्टधीः ५६५ एषमात्रास्वयंमेकृतभूषणोऽत्र एषपटःपटलै
र्बिन्दुभिःसिन्दुवारस्यपुष्पैरियं मालतीमिश्रितामालिकामेशिरस्याहिता ५६६ कोऽयमा
तोद्यधारीगणस्तस्य दास्यामिहस्तादिदंक्रीडनम् ५६७ दक्षिणात्पश्चिमंपश्चिमादुत्तर
मुत्तरात्पूर्वमभ्येत्यसख्यायुता प्रेक्षतीतंगवाक्षान्तराद्वीरकं शैलपुत्रीबहिःक्रीडनंयज्जग
न्मातुरेषचित्तभ्रमः ५६८ पुत्रलुब्धोजनस्तत्रकोमोहमायातिन स्वल्पचेताजडोमांसवि
ण्मूत्रसङ्घातदेहः ५६९ द्रष्टुमभ्यन्तरन्नाकवासेश्वरैरिन्दुमौलिंप्रविष्टेषुकक्षान्तरम् ५७०
वाहनात्यावरोहागणास्तैर्युतालोकपालास्त्वमूर्त्तोह्ययंखड्गो विखड्गकरोनिर्ममःकृतान्तःक
स्यकेनाहतोब्रूतमौनेभवन्तोऽस्त्रदण्डेनकिंदुस्पृहा ५७१ भीममूर्त्यानतेनास्तिकृत्यङ्गिरौ

के बाजूबन्द और हार इन सब वस्तुओं से शृंगारकर विचित्र पत्र फूल दिव्य औषधी श्वेत सरसों इ-
त्यादिक वस्तुओं से उसकी रक्षाकी विधिकरी ५५६।५५९ इसके अनन्तर उसके मस्तकमें गोरोचन
का टीका करके यह वचन कहतीभई कि अब जाओ अपने संगके गणोंके साथ धीरे २ खेलो चपल
पना मतकरना तेरे संगके अन्यगणतो सर्पोंकी मालापहररहे हैं और पर्व्वत शिखर वृक्ष और हाथियों
के दाँत इन सबसे खंडित होरहे हैं तू कभी बड़े वेगसे बहतीहुई गंगाके प्रवाहमें प्रवेश मतकरियो
सिंहोंके वनमें मतजइयो ५६०।५६२ हेपुत्र असंख्यात सब गणोंमें प्रसन्नहोकर मैंने तेरेही विषयमें
पुत्र भावकियाहै इसके पीछे वीरभद्र अपने पिताकी मायाके प्रभावसे सब गणोंमें ऐसे कहनेलगा कि
मेरी माताने मुझको यह आभूषण, वस्त्र, संभालू और मालतीके पुष्पोंकी माला पहराई है ५६३।५६६
ऐसा उत्तम बाजा बजानेवाला कौनसा गणहै जिसको मैं अपने हाथसे इस मालाको दूं इसके पीछे
सखी से मिलीहुई पार्वती दक्षिणसे पश्चिमको पश्चिमसे उत्तरको उत्तर से पूर्वको चारोंओर झरो-
खोंमें से बाहर खेलतेहुए वीरभद्रको देखतीभयी सूतजी कहते हैं कि बड़े आश्चर्य्यकी बातहै जब ज-
गत्की माता पार्वतीजी को भी इतना मोह आगया तो अल्प बुद्धिवाले विष्ठा मूत्रसे उत्पन्नशरीरवाले
अन्य कौनसा पुरुष पुत्रके मोहमें नहीं फँसेगा ५६७।५६९ इसके पीछे पर्व्वतकी किसी कन्दरा में
देव देव शिवजी के दर्शन करनेके निमित्त देवतालोग प्रवेश करतेभये तब वाहनों पर चढ़े अन्य गण
और लोकपाल भी उसी पर्व्वतमें प्रवेश करते भये उस समय किसी का खड्ग किसीने तोड़डाला
उस समय वह वीरभद्र बोला किं यहकिसने तोड़ा है बताओ उस समय देवता कहने लगे कि

य एषोऽस्त्रज्ञेनाकिंबध्यते ५७२ मावृथालोकपालानुगाचित्तता एवमेवैतदित्यूचुरस्मैतदा
देवताः ५७३ देवदेवानुगंवीरकंलक्षणाप्राहदेवी वनंपर्वतानिर्भराण्यग्निदव्यान्यथो
भूतपानिर्भराम्भोनिपातेषुनिमज्जत ५७४ पुष्पजालावनद्धेषुधामस्वपिशेतप्रत्तुङ्गनाना
द्रिकुञ्जेष्वनुगर्जन्तुहेमारुतांस्फोटसंक्षेपणान्कामतः ५७५ काञ्चनोत्तुङ्गश्रृङ्गावरोहाक्षि
तौ हेमरेणूत्करासङ्गद्युतिम् । खेचराणांवनाधायिनिरम्येबहुरूपसम्पत् प्रकरेगणान्वा
सितं मन्दरकन्दरेसन्दरमन्दार पुष्पप्रवालाम्बुजेसिद्धनारीभिरापीतरूपामृतं विस्तृते
र्नैत्रपात्रैरनुन्मेषिभिर्वीरकं शैलपुत्रीनिमेषान्तरादस्मरत् पुत्रगृध्नीविनोदार्थिनी ५७६
सो ऽपिताद्दक्क्षणादात्तपुण्योदयोयोऽपिजन्मान्तरस्यात्मजत्वङ्गतः ५७७ क्रीडतस्त
स्यतृप्तिःकथं जायतेयोऽपिभाविजगद्वेधसातेजसः कल्पितः प्रतिक्षणं दिव्यगीतक्षणो
नृत्यलोलोगणेशैः स्वप्रणत्यक्षणःसिंहनादाकुले गण्डशैलेऽसृजद्दलजाले वृहत्साल
तालेक्षणेफुल्लनाना तमालालिकालेक्षणंवृक्षमुले विलोलोमरालेक्षणेस्वल्पपङ्के जले
पङ्कजाढ्येक्षणंमातुरंकेशुभेनिष्कलंके ५७८ परिक्रीडतेबाललीलाविहारी गणेशाधि
पोदेवतानन्दकारी निकुञ्जेषुविद्याधरैर्गीतशीलः पिनाकीवलीलाविलासैःसलीलः
५७९ प्रकाश्यभुवनाभोगी ततोदिनकरेगते । देशान्तरंतदापश्चादूरमस्तावनीध
रम् ५८० उदयास्तेपुरोभावी योहिचास्तेऽवनीधरः । मित्रत्वमस्यसुदृढं हृदयेपरिचिन्त्य
ताम् ५८१ नित्यमाराधितःश्रीमान् पृथुमूलःसमुन्नतः । नाकरोत्सेवितुंमेरु रुपहारंपति
ष्यतः ५८२ यतिष्येमाव्यवस्थेति संश्रयेणाखिलंबुधः । दिनान्तानुगतोभानुः स्वजनत्व

इस भयंकर मुखवालेका इस पर्व्वतमें कुछ काम नहीं है यहअस्त्र शस्त्रोंको क्या जानताहै लोकपालों के साथ वृथा काहेको चलताहै तब देवताओं के पीछे २ चलने वाले वीरभद्र से लक्षणादेवी बोली कि इस बनमें अग्निकी प्रबलता होरही है इस निमित्त सबगण पर्वत के झिरनों के जलों में प्रवेश करजाओ और पुष्पोंकी जालीवाले बगीचोंमें सोजाओ अथवा पर्व्वतकी ऊंचीकुंजमें खेलो फिर सिद्धोंकी स्त्रियां वीरभद्रके रूपको देखती भईं वह वीरभद्र रमणीक सुवर्णके पर्व्वतमें क्रीड़ा करताभया तबपुत्रकी लालसावाली पार्वती आंखमीचकर वीरभद्रको स्मरणकरतीभई ५७०।५७६ उस समय पूर्वजन्मके पुण्यके प्रभावसे वह पार्वतीका पुत्र हुआ वीरभद्र भी अपने भाग्यको सफल करताभया और क्रीड़ा करता हुआ तृप्तिको नहीं प्राप्त हुआ क्योंकि इसको ब्रह्माजीने अपने तेजसे कल्पित कियाहै किसी समय यह वीरभद्र गीतोंको सुनाकरता कभी अन्यगणोंके साथ सिंहके समान नाद करता कभी पर्व्वतमें कभी खिलेहुए पुष्पोंमें और कभी वृक्षोंकी जड़ोंमें क्रीड़ा करताथा कभी यह देवताओंका आनन्द देने वाला वीरभद्र अपनी माताकी गोदी में क्रीड़ा करताथा इसी प्रकार यह गणोंका अधिपति वीरभद्र शिवजीके समान अनेक लीला करताभया ५७७।५७९ इसके अनन्तर संसारका प्रकाश करने वाला सूर्य्य पश्चिम दिशामें बड़ी दूर अस्ताचल पर्व्वत पर चलागया

ऽपूरयत् ५८३ सन्ध्याबद्धाञ्जलिपुटा मुनंयोऽभिमुखारविम् । याचन्त्यांगमनंशीघ्रं निवार्यात्मनिभाविताम् ५८४ व्यजृम्भदथलोकेऽस्मिन्क्रमाद्वैभावरन्तमः । कुटिलस्येवहृदये कालुष्यन्दूषयन्मनः ५८५ ज्वलत्फणिफणारत्न दीपोद्योतितभित्तिके । शयनंशशिसङ्घात शुभ्रवस्त्रोत्तरच्छदम् ५८६ नानारत्नद्युतिलसच्छक्रचापविडम्बकम् । रत्नकिंकिणिकाजालं लम्बमुक्ताकलापकम् ५८७ कमनीयचलक्लोलवितानाच्छादिताम्बरम् । मन्दिरेमन्दसञ्चारः शनैर्गिरिसुतायुतः ५८८ तस्थौगिरिसुताबाहु लतामीलितकन्धरः । शशिमौलिसितज्योत्स्नाशुचिपूरितगोचरः ५८९ गिरिजाप्यसितापांगी नीलोत्पलदलच्छविः । विभावर्याचसंपृक्ता बभूवातितमोमयी । तामुवाचततोदेवः क्रीडाकेलिकलायुतम् ५९० ॥

इतिश्रीमत्स्यपुराणे त्रिपञ्चाशदधिकशततमोऽध्यायः १५३ ॥

(शर्व उवाच) शरीरेममतन्वंगि! सितेभास्यसितद्युतिः । भुजंगीवासिताशुद्धासंश्लिष्टाचन्दनेतरौ १ चन्द्रातपेनसंपृक्ता रुचिराम्बरयातथा । रजनीवासितेपक्षे दृष्टिदोषंददासिमे २ इत्युक्तागिरिजातेन मुक्तकण्ठापिनाकिना । उवाचकोपरक्ताक्षी भ्रुकुटीकुटिलानना ३ (देव्युवाच) स्वकृतेनजनःसर्वो जाड्येनपरिभूयते । अवश्यमर्थात्प्राप्नोति ख

तब सुमेरु पर्व्वत अपने चित्तमें यह विचार करने लगा कि इस सूर्य्य की दृढ़ मित्रता उदयाचल पर्व्वत से है इसी विचारसे सुमेरु पर्वतमें छिपतेहुए सूर्य्य की सेवा नहीं की ५८०।५८२ दिनके अन्तमें सूर्य्य स्वजन पुरुषोंकोपूर्ण करताभया सायंकालमें मुनिलोग सूर्य्यके सन्मुख अंजली बांधकर खड़ेहोतेभये इसकेपीछे क्रम२से शनैःशनैः रात्रिका अंधकार संसारमें ऐसाफैलताभया जैसे कि कुटिल पुरुषके हृदयमें मनकी कालिमा फैल जाती है ५८३।५८५ फिर प्रकाशित हुए रत्नोंकी भीतोंवाले स्थानमें चन्द्रमाके समान श्वेत वस्त्रसे शोभित हुई अनेक प्रकारके रत्नोंकी किंकिणी और मोतियोंकी जालीसे जड़ी हुई कान्तिवाली सुन्दर चांदनी जिसके ऊपर तनीहुई ऐसी उत्तमशय्या पर शिवजी महाराज पार्वतीको साथ लेके शयन करतेभये ५८६।५८८ जब पार्वतीकी भुजाओंमें अपनी ग्रीवालगाकर शयन करतेभये तब शिवजीकी श्वेत कान्ति अत्यन्त सुन्दर लगती भई और नीले कमलके समान कान्तिवाली पार्वती भी रात्रिके अन्धकारमें अतिकाली विदित होतीभई उस समय शिवजी पार्वती से हास्यके वचन बोले ५८९।५९० ॥

इति श्रीमत्स्यपुराणभाषाटीकायांत्रिपञ्चाशदधिकशततमोऽध्यायः १५३ ॥

शिवजी कहतेहैं कि हेतन्वंगि मेरेशरीरमें श्वेतकान्ति झलकरहीहै और तू ऐसे मुझसे लिपटरही है जैसे कि चन्दनके वृक्षमें सर्पिणी लिपटरहीहो १ चन्द्रमाकी किरणों के समान सुन्दर वस्त्रोंसे युक्तहुई ऐसी विदितहोतीहुई जैसे कि कृष्णपक्षमें रात्रि दिखाईदेतीहै २ ऐसे कहीहुई पार्वती शिवजीके कण्ठको छोड़कर क्रोधसे लालनेत्रकर भ्रुकुटी चढ़ाकर बोली ३ कि अपनेही अवगुणों से सब लोगोंका तिरस्कारहोताहै प्रयोजन होनेसे चन्द्रमाका मण्डलभी ग्रहणके समयमें अवश्यखंडि-

ण्डनंशशिमण्डलम् ४ तपोभिर्दीर्घचरितैर्यच्च प्रार्थितवत्यहम् । तस्यामेनियतस्त्वेषह्य
वमानःपदेपदे ५ नैवास्मिकुटिलाशर्व ! विषमानैवधूर्जटे ! । सविषस्त्वंगतःख्यातिं व्यक्तं
दोषाकराश्रयात् ६ नाहंपूष्णोऽपिदशना नेत्रेचास्मिभगस्यहि । आदित्यश्चविजानाति
भगवान्द्वादशात्मकः ७ मूर्ध्निशूलंजनयसिस्वैर्दोषैर्मामाधिक्षिपन् । यस्त्वंमामाहकृष्णेति
महाकालेतिविश्रुतः ८ यास्याम्यहंपरित्यक्ता चात्मानंतपसागिरिम् । जीवन्त्यानास्तिमे
कृत्यंधूर्त्तेनपरिभूतया ९ निशम्यतस्यावचनं कोपतीक्ष्णाक्षरम्भवः । उवाचाधिकसंभ्रांतः
प्रणयेनेंदुमौलिना १० (शर्वउवाच) अगात्मजासिगिरिजे ! नाहंनिंदापरस्तव । त्वद्भ
क्तिबुद्ध्याकृतवांस्तवाहंनामसंश्रयम् ११ विकल्पःस्वस्थाचित्तेऽपिगिरिजे ! नैवकल्पना ।
यद्येवंकुपिताभीरु ! त्वन्तवाहन्नवैपुनः १२ नर्मवादीभविष्यामि जहिकोपंशुचिस्मिते !
शिरसाप्रणतश्चाहं रचितस्तेमयाञ्जलिः १३ स्नेहेनाप्यवमानेन निन्दितेनैतिविक्रिया
म् । तस्मान्नजातुरुष्टस्यनर्मस्पृष्टोजनःकिल १४ अनेकैःस्वादुभिर्देवीदेवेनप्रतिबोधिता ।
कोपन्तीव्रन्नतत्याज सतीमर्मणिघट्टिता १५ अवष्टब्धमथास्फाल्य वासःशङ्करपाणिना ।
विपर्यस्तालकावेगाद्यातुमैच्छतशैलजा १६ तस्याव्रजन्त्याःकोपेन पुनराहपुरांतकः ।
सत्यंसर्वैरवयवैः सुतासिसदृशीपितुः १७ हिमाचलस्यशृङ्गैस्तैर्मेघजालाकुलैर्नभः । तथा
दुरवगाह्येभ्यो हृदयेभ्यस्तवाशयः १८ काठिन्याङ्गस्त्वमस्मभ्यं वनेभ्योबहुधागता । कुटि

तहोजाता है ४ बहुतसी तपस्याओं से जो मैंने तुम्हारी प्रार्थनाकरी तो उसका मुझको यह फल
प्राप्तहुआ कि पद २ में मेरा तिरस्कार होताहै ५ हे शिवजी मैं विषम और कुटिल नहीं हूं हे धूर्जटे
दोषोंके सेवनकरने वालेके आश्रयहोकर मुझमें विषउत्पन्न होगया है ६ हेशिव मैं पूषाके दांत नहीं
हूं इन्द्र नहीं हूं मुझको सूर्य्य भगवान् देखताहै मेरा तिरस्कार करनेवाला पुरुष अपने दोषों करके
अपनेही मस्तक में शूलचुभोताहै जो तुममुझको कृष्णा और महाकाला यह जो कहतेहो इसलिये
मैं अपने आत्माको त्यागकर पर्व्वतमें तपकरने जातीहूं धूर्त्तके साथलगकर मुझजीवतीहुईका क्या
प्रयोजन है ७ । ९ पार्वतीके ऐसे वचनोंको सुनकर शिवजी संभ्रमको प्राप्तहोकर बड़ी विनयसे यह
वचनबोले १० हे पार्वती तू मेरी प्यारी है मैंने तेरी निन्दा नहीं करी है मैंने तो तेरी बुद्धि जानकर
कृष्णाकालका यह तेरे नाम निकालेहैं हे गिरिजे स्वस्थ चित्तवालों के विकल्प नहीं होताहै हेभीरु
जो तू ऐसी कुपितहोतीहै तो तेरा हास्य मैं फिर अबकभी न करूंगा अबतो कोपको दूरकर हे सुन्दर
हास्यवाली मैं तुझको शिरसे प्रणामकरताहूं और सूर्य्यकी ओर हाथजोड़ताहूं ११ । १३ स्नेह से
अपमानसे अथवा निन्दा करनेसे जो रूसजाताहै उसके साथ हास्यकभी न करनाचाहिये १४ इस
प्रकारके अनेक बिनयके बचनोंसे शिवजीने पार्वतीको समझाया परन्तु मर्म में भिंदीहुई पार्वती
अपने महाक्रोधको नहीं त्यागतीभई १५ शिवजीके हाथसे अपनेवस्त्रको छुटाकर शीघ्रही गमनकरनेकी
तैयारी करतीभई १६ तब उसके गमनही के बिचार को देखकर शिवजी क्रोध पूर्व्वक फिर
बोले कि सत्यहै तूसब प्रकारसे अपने पिताकेही समान है १७ हिमाचलके शिखरों परजैसे मेघोंसे

लत्वञ्चवर्त्मभ्यो दुःसेव्यत्वंहिमादपि १९ संक्रान्तिसर्वदैवेति तन्वङ्गि ! हिमशैलराट्।
इत्युक्तासापुनःप्राह गिरिशंशैलजातदा २० कोपकम्पितमूर्द्धाच प्रस्फुरद्दशनच्छदा। (उमो
वाच) मासर्वान्दोषदानेन निंदान्यान्गुणिनोजनान् २१ तवापिदुष्टसम्पर्कात् संक्रांतस
र्वैमेवहि। व्यालेभ्योऽधिकजिह्वात्वं भस्मनास्नेहबंधनम् २२ हृत्कालुष्यंशशाङ्कात्तु दुर्बो
धित्वंवृषादपि। तथाबहुकिमुक्तेन अलंवाचाश्रमेणते २३ श्मशानवासान्निर्भीत्वं नग्न
त्वान्नतवत्रपा। निर्घृणत्वंकपालित्वाद्दयातेविगताचिरम् २४ इत्युक्तामन्दिरात्तस्मान्निर्ज
गामहिमाद्रिजा। तस्यांव्रजन्त्यांदेवेश गणैःकिलकिलोध्वनिः २५ क्वमातर्गच्छसित्युक्त्वा
रुदन्तोधाविताःपुनः। विष्टभ्यचरणौदेव्या वीरकोवाष्पगद्गदम् २६ प्रोवाचमातः!
किन्त्वेतत् क्वयासिकुपितान्तरा। अहंत्वामनुयास्यामि व्रजन्तींस्नेहवर्जिताम् २७
सोऽहंपतिष्येशिखरात्तपोनिष्ठेत्वयोज्झितः। उन्नाम्यवदनंदेवी दक्षिणेनतुपाणिना २८
उवाचवीरकंमाता माशोकंपुत्र ! भावय। शैलाग्रात्पतितुंनैव नचागन्तुंमयासह २९
युक्तन्तेपुत्र ! वक्ष्यामियेनकार्येणतच्छृणु। कृष्णेत्युक्ताहरेणाहं निन्दिताचाप्यनिन्दिता
३० साहंतपःकरिष्यामि येनगौरीत्वमाप्नुयाम्। एषस्त्रीलम्पटोदेवो यातायांमय्यनन्तर
म् ३१ द्वाररक्षात्वयाकार्य्या नित्यंरन्ध्रान्ववेक्षिणा। यथानकाचित्प्रविशेद्योषिदत्रहरान्ति

व्याकुल हुआ आकाश दुर्लभहोजाता है इसी प्रकारतेराभी हृदय कठिनहै तूऐसी कठिनहै तभीतौ
हमको छोड़कर बनोंमें जाती है पर्व्वतमें जैसेकि भयंकर मार्ग रहतेहैं उनसेभी तू कुटिलहै औरतेरा
सेवन करना हिमाचल से भी कठिन है ऐसे कहीहुई पार्वती क्रोधकरके मस्तकको कंपा और
दांतोंको चबाकर फिर बोली कि आप अन्य गुणी लोगोंको दोषलगाकर उनकी निन्दामत करो
१८। २१ आपकेभी दुष्टोंके संपर्कसे सबदोष है तुम सर्पसेभी कठिनहो भस्मके समान स्नेह नहीं
करते चन्द्रमा के कलंकसेभी बुरा तुम्हारा हृदय है इसवृषभसेभी कम निर्बुद्धीहो इस्से अधिक
बकझक करने से क्याप्रयोजनहै २२। २३ श्मशानमें वासकरने से तुमभय नहीं करते नंगेरहनेसे
तुमको लज्जा नहीं है कपाल धारण करनेसे तुम्हारी दयाचलीगईहै ऐसा कहकर पार्वती उसस्थानसे
चलतीभई तब चलने के समय शिवके गणों का किल किल शब्द हुआ और बीरभद्र रोकर
उस देवीकेसंग भाग२ कर यह कहनेलगा कि हेमाता तू मुझको छोड़कर कहाँजातीहै ऐसे कहकर
पैरोंमें लोटगया और कहनेलगा कि मैं स्नेहको त्यागकर तुझ जानेवाली के संगचलूंगा २४। २७
और जिस पर्व्वतमें तू तपकरेगी वहाँसे तुझसे त्यागाहुआ मैं पर्व्वतके शिखरपर चढ़कर गिरूंगा
जब उसने ऐसी बातेंकहीं तब पार्वती दक्षिण हाथसे उसके मुखको प्यारकरके बोली हे पुत्र तू
आचमतकर पर्व्वतसे नहीं गिरनाचाहिये और मेरे साथभी तुझको नहीं चलनाचाहिये २८। २९
हपुत्र तेरे करनेके योग्य कामको मैंबतातीहूं सो तू सुन शिवजीने मुझको कृष्णाबताकर मेरी बड़ी
निन्दाकरीहै सोमैं ऐसातपकरूंगी जिस्सेकि गौरवर्ण होजाऊं यह शिवजी स्त्री के लालची हैं जबमैं
चलीजाऊं उस समयतू इस स्थानके द्वारपर रक्षाकरियो कि कोई अन्यस्त्री इनके पास नआने पावे

कम् ३२ दृष्ट्वापरास्त्रियश्चात्र वदेथाममपुत्रक !। शीघ्रमेवकरिष्यामि यथायुक्तमनन्तरम्
३३ एवमस्त्वितिदेवींस वीरकःप्राहसाम्प्रतम्। मातुराज्ञामृताह्लादप्लाविताङ्गोगतज्वरः
३४ जगामकक्ष्यांसंद्रष्टुं प्रणिपत्यचमातरम् ३५ ॥

इति श्रीमत्स्यपुराणेचतुःपञ्चाशदधिकशततमोऽध्यायः १५४ ॥

(सूत उवाच) देवींसापश्यदायान्तीं सतींमातुर्विभूषिताम्। कुसुमामोदिनींनाम त
स्यशैलस्यदेवताम् १ सापिदृष्ट्वागिरिसुतां स्नेहविक्लवमानसा। क्वपुत्रि! गच्छसीत्युच्चै
रालिङ्ग्योवाचदेवता २ साचास्यैसर्वमाचख्यौ शङ्करात्कोपकारणम्। पुनश्चोवाच
गिरिजा देवतांमातृसम्मताम् ३ (उमोवाच) नित्यंशैलाधिराजस्य देवतात्वमनिन्दि
ते!। सर्वतःसन्निधानन्ते ममचातीववत्सला ४ अतस्तुतेप्रवक्ष्यामि यद्विधेयंतदाधिया।
अन्यस्त्रीसंप्रवेशस्तु त्वयारक्ष्यःप्रयत्नतः ५ रहस्यत्रप्रयत्नेन चेतसासततंगिरौ। पिना
किनःप्रविष्टायां वक्तव्यंमेत्वयानघे! ६ ततोऽहंसंविधास्यामि यत्कृत्यंतदनन्तरम्। इ
त्युक्तासातथेत्युक्त्वा जगामस्वगिरिंशुभम् ७ उमापिपितुरुद्यानं जगामाद्रिसुताद्रुतम्।
अन्तरिक्षंसमाविश्य मेघमालामिवप्रभा ८ ततोविभूषणान्यस्य वृक्षवल्कलधारिणी।
ग्रीष्मेपञ्चाग्निसन्तप्ता वर्षासुचजलोषिता ९ वन्याहारानिराहारा शुष्कास्थण्डिलशायि
नी। एवंसाधयतीतत्र तपसासंव्यवस्थिता १० ज्ञात्वातुतांगिरिसुतां दैत्यस्तत्रान्तरेव

हेपुत्र जो अन्यकोई स्त्रीइनके समीप आतीहुई देखे तो अवश्यमुझसे कहदीजो मैं शीघ्रही उसका प्रबन्ध करदूंगी ३०।३३ यहबातसुनकर वीरभद्र बोला कि ऐसाहीकरूंगा यह कहकर माताकी आज्ञा करने में आनन्द युक्तहोताभया और अपनी माताको प्रणामकरके पर्व्वत की कक्षामें चलाजाता भया ३४।३५ इतिश्रीमत्स्यपुराणभाषाटीकायां चतुःपंचाशदधिकशततमोऽध्यायः १५४ ॥

सूतजीबोले इसके अनन्तर वह पार्वती कुसुमामोदिनी नामवाली उस पर्व्वतकी देवता सतीको सन्मुख आतीहुई देखतीभई १ वह सती देवताभी पार्वतीको देखकर स्नेहपूर्व्वक बोली कि हेपुत्री तूकहाँजातीहै २ तब पार्वती उस अपने शिवजीके प्रभावसे उत्पन्नहुए अपने क्रोध रूप कारणको कहतीभई और अपनी माताकेही समान उस सतीको मानकर यह वचन बोली ३ हेअनिन्दिते तूइस पर्वतकी देवताहै सदैवयहाँरहतीहै औरमेरी बड़ीप्यारी है इसहेतुसे मैं तेरे आगे जो कहतीहूं वहतुझको करनाचाहिये इस पर्व्वतमें जोअन्यकोई स्त्रीआवे अथवा शिवजी एकान्तमें किसी अन्य स्त्रीसे बतरावें तो तूमुझको अवश्यखबरदीजो उसके पीछे मैं प्रबन्धकरलूंगी ऐसाकहकर पार्वती अपने हिमालय पर्व्वतमें जातीभई ४।७ पार्वती अपने पिताके बगीचेमें ऐसे जातीभई जैसे कि आकाशमें मेघमालाचलीजाती है ऐसे प्रकार से आकाशमार्ग होकर उसने गमनकिया और वहाँ जाकर वृक्षोंके वल्कलशरीर परधारणाकिये ग्रीष्मऋतुमें पंचाग्नितपी बर्षाऋतुमें जलमें निवासकिया कभी वनके फलोंका आहार किया कभी निराहाररही और पृथ्वीपर शयनकिया ऐसे प्रकारोंसे तपस्या करतीभई ८।१० इसकेपीछे अन्धक दैत्यकापुत्र उस पार्वतीको जानकर अपने पिताकेबधकास्मरण

शी। अन्धकस्यसुतोदृप्तः पितुर्बधमनुस्मरन् ११ देवान्सर्वान्विजित्याजौ वकत्रातारणोत्कटः। आडिर्नामान्तरप्रेक्षी सततंचन्द्रमौलिनः १२ आजगामामररिपुः पुरन्त्रिपुरघातिनः। सतत्रागत्यददृशे वीरकंद्वार्यवस्थितम् १३ विचिन्त्यासीद्वरंदत्तं सपुरापद्मजन्मना। हतेतदान्धकेदैत्ये गिरिशेनामरद्विषि १४ आडिश्चकारविपुलं तपःपरमदारुणम्। तमागत्याब्रवीद्ब्रह्मा तपसापरितोषितः १५ किमाडे ! दानवश्रेष्ठ ! तपसाप्राप्तुमिच्छसि। ब्रह्माणमाहदैत्यस्तु निर्मृत्युत्वमहंवृणे १६ (ब्रह्मोवाच) नकश्चिच्चविनामृत्युं नरो दानव ! विद्यते। यतस्ततोऽपिदैत्येन्द्र ! मृत्युःप्राप्यःशरीरिणा १७ इत्युक्तोदैत्यसिंहस्तु प्रोवाचाम्बुजसम्भवम्। रूपस्यपरिवर्तोमेयदास्यात्पद्मसम्भव ! १८ तदामृत्युर्ममभवेदन्यथात्वमरोह्यहम्। इत्युक्तस्तुतदोवाच तुष्टःकमलसम्भवः १९ यदाद्वितीयोरूपस्यविवर्तस्तेभविष्यति। तदातेभवितामृत्युरन्यथानभविष्यति २० इत्युक्तोऽमरतांमेने दैत्यसूनुर्महाबलः। तस्मिन्कालेत्वसंस्मृत्य तद्बधोपायमात्मनः २१ परिहर्तुंदृष्टिपथं वीरकस्याभवत्तदा। भुजङ्गरूपीरन्ध्रेण प्रविवेशदृशःपथम् २२ परिहृत्यगणेशस्य दानवोऽसौसुदुर्जयः। अलक्षितोगणेशेन प्रविष्टोऽथपुरान्तकम् २३ भुजङ्गरूपंसन्त्यज्य बभूवाथमहासुरः। उमारूपंच्छलयितुं गिरिशंमूढचेतनः २४ कृत्वामायान्ततोरूप मप्रतर्क्यमनोहरम्। सर्वावयवसंपूर्णं सर्वाभिज्ञानसंवृतम् २५ कृत्वामुखान्तरेदन्तान् दैत्योवज्रोपमान्दृढान्। तीक्ष्णाग्रान्बुद्धिमोहेन गिरिशंहन्तुमुद्यतः २६ कृत्वोमारूपसंस्थानं गतोदैत्योहरान्तिकम्। पापोरम्याकृतिश्चित्रभूषणाम्बरभूषितः २७ तंदृष्ट्वागिरिशस्तुष्ट

कर बदलालेने का उपायकरताभया वह अन्धकका पुत्र आडि नाम दैत्य रणमें देवताओंको जीतकर शिवजीके समीप आताभया वहाँ आकर द्वारपर खड़ेहुए वीरभद्रको देखप्रथम ब्रह्माजीके दियेहुए वरका चिन्तवनकर वहाँ बहुतसातप करताभया तब तपसे प्रसन्नहुए ब्रह्माजी उस आडि दैत्यके समीप आकरबोले कि हे दानव इस तपकरके तू किस बातकी इच्छा करताहै यह सुनकर वह दैत्य बोला कि मैं कभी न मरूं यहवर मांगताहूं ११। १६ ब्रह्माजीने कहा हेदानव मृत्युके बिनातो कोई भी नहींहै इसहेतुसे तू किसी कारणसे अपनी मृत्युको मांगले १७ यह सुनकर वहदानव ब्रह्माजी से बोला कि जबमेरा रूप बदलजावे तभी मेरीमृत्युहो अन्यथा अमरहीरहूं यहसुन ब्रह्माजी प्रसन्नहोकर बोले कि जब तेरा दूसरारूप बदलेगा उसीसमय तेरी मृत्युहोगी १८। २० यहवर पाकर वह दैत्य अपनी आत्माको अमर मानताभया इसके अनन्तर बीरभद्रकी दृष्टिचुरानेके निमित्त सर्पका रूप धारणकर बीरभद्रके विनादेखे शिवजीके पास जाताभया फिर वह मूढ़चित्तवाला दैत्य शिवजीके छलनेके निमित्त पार्वतीजीकारूप बनालेताभया २१। २४ मायासे मनोहर संपूर्ण अंगोंकी शोभासे युक्त ऐसे रूपको बनाकर मुखमें बड़े २ तीक्ष्ण वज्रके समान दाँतोंको लगाके अपनी बुद्धिके मोहसे शिवजीके मारनेका उद्योग करताभया २५। २६ पार्वतीका रूपधारणकर सुन्दर अंगोंमें आभूषण और कृत्रिम बस्त्रोंको पहर शिवजीके समीप जाताभया २७ तब उस महाअसुरको देखकर

स्तदालिङ्ग्यमहासुरम् । मन्यमानोगिरिसुतां सर्वैरवयवान्तरैः २८ अपृच्छत्साधुतेभा
वो गिरिपुत्रि ! नकृत्रिमः । यात्वंमदाशयंज्ञात्वा प्राप्तेहवरवर्णिनि ! २९ त्वयाविरहितंशू
न्यं मन्यमानोजगत्त्रयम् । प्राप्ताप्रसन्नवदना युक्तमेवंविधन्त्वयि ३० इत्युक्तोदानवेन्द्रस्तु
तदाभाषत्स्मयञ्छनैः । नचाबुध्यदभिज्ञानं प्रायस्त्रिपुरघातिनः ३१ (दे०युवाच) याता
स्म्यहंतपश्चर्तुं वल्लभ्यायतवातुलम् । रतिश्चतत्रमेनाभूत्ततः प्राप्तात्वदन्तिकम् ३२
इत्युक्तःशङ्करःशङ्कां काञ्चित्प्राप्यावधारयत् । हृदयेनसमाधाय देवःप्रहसिताननः ३३
कुपितामयितन्वङ्गी प्रकृत्याचदृढव्रता । अप्राप्तकामासंप्राप्ता किमेतत्संशयोमम ३४ इ
तिचिन्त्यहरस्तस्य अभिज्ञानंविधारयन् । नापश्यद्वामपार्श्वेतु तदङ्गेपद्मलक्षणम् ३५
लोमावर्तन्तुरचितं ततोदेवःपिनाकधृक् । अबुध्यद्दानवींमाया माकारंगूहयंस्ततः ३६
मेढ्रेवज्रास्त्रमादाय दानवंतमशातयत् । अबुध्यद्वीरकोनैव दानवेन्द्रंनिषूदितम् ३७ हरेण
सूदितंदृष्ट्वास्त्रीरूपंदानवेश्वरम् । अपरिच्छिन्नतत्त्वार्था शैलपुत्र्यैन्यवेदयत् ३८ दूतेनमा
रुतेनाशुगामिनानगदेवता । श्रुत्वावायुमुखाद्देवी क्रोधरक्तविलोचना । अशपद्वीरकंपुत्रं
हृदयेनविदूयता ३९ ॥ इति श्रीमत्स्यपुराणेपञ्चपञ्चाशदधिकशततमोऽध्यायः १५५ ॥

(दे०युवाच) मातरंमांपरित्यज्य यस्मात्त्वंस्नेहविक्लवात् । विहितावसरःस्त्रीणां शङ्कर
स्यरहोविधौ १ तस्मात्तेपुरुषारूक्षा जडाहृदयवर्जितः । गणेशक्षारसदृशी शिलामाता

शिवजी प्रसन्नहोकर पार्वती समझकर यह वचनबोले कि हे पार्वती तेरा स्वभाव अच्छाहै कुछ छल
तोनहीं है क्या तू मेरा मनोरथ जानकर मेरे पास आई है तेरे विरहसे मैंने सब जगत् शून्यमान
रक्खाहै अब तू मेरे पासआगई यह तैंने बहुत अच्छाकिया २८ । ३० ऐसे कहाहुआ वहदैत्य हँस
कर शिवजीके प्रभावको नहीं जानताहुआ शनैः शनैः यह वचनबोला ३१ अर्थात् वहपार्वतीरूप दैत्य
बोला कि मैं तपकरनेके निमित्तगईथी वहाँ तुम्हारे बिना मेराचित्त नहींलगा इसकारण तुम्हारे पास
आईहूं ३२ ऐसेवचन सुनकर शिवजी कुछेकशंका विचारकर हृदयमें समाधान कर हंसकरबोले
३३ हे तन्वंगि तू मेरे ऊपरक्रोधित होगईथी और दृढ विचारकरके चलीथी अब विना प्रयोजन
सिद्धकिये हुए कैसे चलीआई यहमुझको सन्देह है ३४ यह कहतेहुए शिवजी उसके लक्षणोंको
देखतेभये तब उसकी बाईंपांशूमें कमलका चिह्न नहींपाया ३५ उससमय महादेवजी उसदानवी
मायाको जानकर अपने लिंगपर वज्रास्त्रको रखकर उसके संगरमण करके उसको मारतेभये इस
प्रकारसे उस मारेहुए दानवको वीरभद्रने नहींजाना और वहपर्व्वतकी देवतास्त्री उसस्त्री रूपवाले
दानवको शिवजीसे माराहुआ देखउस प्रयोजनको अच्छेप्रकारसे विना समझेही वायुको दूतबना
करपार्वती के पास भेजतीभई तब पार्वती वायुके द्वारा उस वृत्तान्तको सुन क्रोधसे लाल नेत्र
कर बड़े दुःखितहुए हृदयसे वीरभद्रको शाप देतीभई ३६ । ३९ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांपंचपंचाशदधिकशततमोऽध्यायः १५५॥

पार्वती कहती हैं हे वीरभद्र तू स्नेह रहितहो मुझमाताको त्यागकर शिवजी के और अन्य स्त्रियों

भविष्यति २ निमित्तमेतद्विख्यातं वीरकस्यशिलोदये । सोऽभवत्प्रक्रमेणैव विचित्राख्यानसंश्रयः ३ एवमुत्सृष्टशापाया गिरिपुत्र्यास्त्वनन्तरम् । निर्जगाममुखात्क्रोधः सिंहरूपीमहाबलः ४ सतुसिंहःकरालास्यो जटाजटिलकन्धरः । प्रोद्भूतलम्बलांगूलो दंष्ट्रोत्कटमुखातटः ५ व्यावृत्तास्योललज्जिह्वः क्षामकुक्षिःशिरादिषु । तस्याशुवर्तितुंदेवी व्यवस्यतसतीतदा ६ ज्ञात्वामनोगतंतस्या भगवांश्चतुराननः । आगम्योवाचदेवेशो गिरिजांस्पष्टयागिरा ७ (ब्रह्मोवाच) किंपुत्रि ! प्राप्तुकामासि किमलभ्यंददामिते ८ विरम्यतामतिक्लेशात्तपसोऽस्मान्मदाज्ञया । तच्छ्रुत्वोवाचगिरिजा गुरुगौरवगर्भितम् ९ वाक्यंवाचाचिरोद्गीर्णवर्णनिर्णीतवाञ्छितम् । (देव्युवाच) तपसादुष्करेणाप्तः पतित्वेशङ्करोमया १० समांश्यामलवर्णेति बहुशःप्रोक्तवान्भवः । स्यामहंकाञ्चनाकारा वाल्लभ्येनचसंयुता ११ भर्तुर्भूतपतेरङ्गमेकतोनिर्विशेऽङ्कवत् । तस्यास्तद्भाषितंश्रुत्वा प्रोवाचकमलासनः १२ एवंभवत्वंभूयश्च भर्तृदेहार्द्धधारिणी । ततस्तस्याजभृङ्गाङ्गं फुल्लनीलोत्पलत्वचम् १३ त्वचासाचाभवद्दीप्ता घण्टाहस्ताविलोचना । नानाभरणपूर्णाङ्गी पीतकौशेयधारिणी १४ तामब्रवीत्ततोब्रह्मा देवींनीलाम्बुजत्विषम् । निशेभूधरजादेहसम्पर्कात्त्वंममाज्ञया १५ सम्प्राप्ताकृतकृत्यत्वमेकानंशापुराह्यसि । यएषसिंहःप्रोद्भूतो देव्याः क्रोधाद्वरानने ! १६ सतेऽस्तुवाहनंदेवि ! केतौचास्तुमहाबलः । गच्छविन्ध्याचलंतत्र

के एकान्तसमय में सावधान नहीं रहा इसहेतुसे तेरीमाता रूखीजड़ हृदयसे वर्जित कालीशिलाके समान होजायगी इसप्रकारसे यह वीरभद्रके शिलामें से उदयहोनेका निमित्त होताभया तब वह वीरभद्र विचित्र२ कथाओंको सुनरहाथा और पार्वतीने ऐसा शापदेदिया उससमय पार्वतीके मुखसे सिंहरूप होकर क्रोध निकलताभया १।४ उस विकरालमुख जटाधारी लंबीपूंछयुक्त कराल डाढ़ों समेत मुखफाड़े जिह्वा निकाले और पतलीकटिवाले सिंहको देखकर उसकी वार्त्ताको पार्वती जब चिन्तवन करनेलगी तब उसपार्वतीके मनकी वार्त्ताको जानकर ब्रह्माजी आये और बड़ी स्पष्टबाणी से बोले कि हे पुत्री तू क्याचाहतीहै मैं कौनसी अलभ्यवस्तु तुझकोदूं ५।८ तू इस बड़े क्लेशवाले तपको समाप्तकर और मेरीआज्ञाको मानले यह सुनकर पार्वती बहुतदिनके विचारेहुए मनोरथ के वचनको बोली कि मैंने बड़े दुर्लभव्रत और तपोंसे महादेवजीको प्राप्त कियाथा उन्होंने मुझको बहुतबार काली २ ऐसाशब्द कहा सो मैं चाहती हूं कि मेराशरीर कांचन के समान वर्णवाला होजाय जिस्से कि अपनेपति की गोदीमें सुशोभित रहूं यह उसके वचनको सुनकर ब्रह्माजी बोले कि तेराशरीर ऐसाही होजायगा और अपने भर्त्ता के आधेशरीर की धारण करनेवाली भी होजायगी इस के अनन्तर नीलेकमलके समान पार्वती की त्वचा कांचनके वर्ण समान तत्काल होगई और जो उसकी नीलीत्वचा थी वह देवी रात्रीका स्वरूप पीत और कसूमे वस्त्रों से युक्त होकर अलगहोगया तब ब्रह्माजी नीलेकमलके सदृश वर्णवाली उसरात्रीसे बोले हे रात्री तू मेरीआज्ञासे पार्वती के शरीरके स्पर्श करने से कृतकृत्य होगई और हे वरानने इस पार्वती के क्रोधसे जो सिंह निकलाहै

सुरकार्यंकरिष्यासि १७ पञ्चालोनामयक्षोऽयं यक्षलक्षपदानुगः। दत्तस्तेकिङ्करोदेवि ! मयामायाशतैर्युतः १८ इत्युक्ताकौशिकीदेवी विन्ध्यशैलंजगामह । उमापिप्राप्तसङ्कल्पा जगामगिरिशान्तिकम् १९ प्रविशन्तीतितांद्वारि ह्यपकृष्यसमाहितः। रुरोधवीरकोदेवीं हेमवेत्रलताधरः २० तामुवाचचकोपेन रूपात्तुव्यभिचारिणीम्। प्रयोजनंनतेऽस्तीहगच्छयावन्नभेत्स्यसि २१ देव्यारूपधरोदैत्यो देवंवञ्चयितुंत्विह। प्रविष्टोनचदृष्टोऽसौसवैंदेवेनघातितः २२ घातितेचाहमाज्ञप्तो नीलकण्ठेनकोपिना। द्वारेषुनावधानंते यस्मात्पश्यामिवैततः २३ भविष्यसिनमद्द्वारस्थो वर्षपूगान्यनेकशः। अतस्तेऽत्रनदास्यामि प्रवेशंगम्यतांद्रुतम् २४ ॥

इति श्रीमत्स्यपुराणेषट्पञ्चाशदधिकशततमोऽध्यायः १५६ ॥

(वीरक उवाच) एवमुक्तागिरिसुता मातामेस्नेहवत्सला। प्रवेशंलभतेनान्या नारि कमललोचने ! १ इत्युक्तातुतदादेवी चिन्तयामासचेतसा। नसानारीतिदैत्योऽसौ वायुर्मेयामभाषत २ वृथैववीरकःशप्तो मायाक्रोधपरीतया। अकार्यंक्रियतेमूढैः प्रायःक्रोधसमीरितैः ३ क्रोधेननश्यतेकीर्तिः क्रोधोहन्तिस्थिरांश्रियम्। अपरिच्छिन्नतत्त्वार्था पुत्रंशापितवत्यहम् ४ विपरीतार्थबुद्धीनां सुलभोविपदोदयः। सञ्चिन्त्यैवमुवाचेदं वीरकंप्र

वही तेरा वाहन होगा और तेरीध्वजामें भी यही सिंह रहैगा तू विन्ध्याचलमें चलीजा वहां जाकर तू देवताओंके कार्य्योंको करेगी ९। १७ और हेदेवी यहपांचाल नाम यक्ष तेरेनिमित्त अनुचर देताहूं इस यक्षको हज़ारों माया आती हैं १८ ऐसे कहीहुई कौशिकी देवी विन्ध्याचलपर्व्वतमें जातीभई और पार्वती भी अपने मनोरथको सिद्ध करके शिवजी के समीप जाती भई तब उस भीतर जाती हुई को द्वारपर सावधानहो हाथमें बेतले खड़ा होकर वीरभद्र रोकताभया और व्यभिचारिणी का रूप जानकर उस्से क्रोधपूर्व्वक बोला कि यहां तेरा कुछप्रयोजन नहीं जोतूनहीं डरतीहै तोचलीजा यहाँ पार्वतीजीका रूपधरके महादेवके छलने के निमित्त एक दैत्य आयाथा उसको भीतर जातेहुए मैंने नहीं देखाथा वहशिवजीने मारडाला १९। २२ उसको मारकर मुझसे क्रोधपूर्व्वक कहनेलगे कि तुम द्वारपर सावधान नहीं रहतेहो इसहेतुसे मैं अबसबकी चौकसी करताहूं सो तुझको भीतर नहीं जानेदूंगा तू शीघ्रही उलटी चलीजा २३। २४ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांषट्पंचाशदधिक शततमोऽध्यायः १५६ ॥

वीरभद्रनेकहा हेकमललोचने मेरीस्नेहकरनेवाली मातानेभी मुझसे यहीआज्ञाकरी है औरकहगईहै कि किसी अन्यस्त्रीको भीतरमतजाने देना १ यह सुनकर पार्वती देवी चिन्तवन करने लगी कि अहो जोवायु मुझसे कहआयाथा वहतो दैत्यथा स्त्री नहींथी मुझक्रोधयुक्तने वीरभद्रको वृथाही शापदिया विशेषकरके क्रोधसे भरेहुए मूर्ख बुराकार्य्य करडालते हैं २। ३ क्रोधसे कीर्त्ति नष्टहोजाती है क्रोधसे स्थिर लक्ष्मीकानाश होजाताहै मैंने बिनाही बिचारेहुए पुत्रको शाप देदिया विपरीति बुद्धिवालोंको सहजहीमें बिपत्ति प्राप्तहोजात्ती है ऐसे चिंतवनकरके वह पार्वती लज्जापूर्वकवीरभद्रसे कह

तिशैलजा ५ लज्जासज्जविकारेण वदनेनाम्बुजत्विषा । (देव्युवाच) अहंवीरक ! ते
माता मातेऽस्तुमनसोभ्रमः ६ शङ्करस्यास्मिदयिता सुतातुहिमभूभृतः। ममगात्रच्छविभ्रा
न्त्या माशङ्कांपुत्र ! भावय ७ तुष्टेनगौरतादत्ता ममेयंपद्मजन्मना । मयाशप्तोऽस्यविदि
ते वृत्तान्तेदैत्यनिर्मिते ८ ज्ञात्वानारीप्रवेशन्तु शङ्करेरहसिस्थिते । ननिवर्तयितुंशक्यः
शापःकिन्तुब्रवीमिते ६ शीघ्रमेष्यसिमानुष्यात् सत्वंकामसमन्वितः। शिरसातुततोवन्द्य
मातरंपूर्णमानसः । उवाचार्चितपूर्णेन्दु द्युतिश्चहिमशैलजाम् १० (वीरक उवाच) नत
सुरासुरमौलिमिलन्मणि प्रचयकान्तिकरालनखाङ्किते । नगसुते ! शरणागतवत्सले !
तवनतोऽस्मिनतार्तिविनाशिनि ११ तपनमण्डलमण्डितकन्धरे ! पृथुसुवर्णसुवर्णनगद्यु
ते !। विषभुजङ्गनिषंगविभूषिते ! गिरिसुते ! भवतीमहमाश्रये १२ जगतिकःप्रणताभिम
तन्ददौ झटितिसिद्धनुतेभवतीयथा। जगतिकाञ्चनवाञ्छतिशङ्करो भुवनधृतनये! भवतीं
यथा १३ विमलयोगविनिर्मितदुर्जय स्वतनुतुल्यमहेश्वरमण्डले ! । विदलितान्धकबा
न्धवसंहतिः सुरवरैःप्रथमन्त्वमभिष्टुता १४ सितसटापटलोद्धतकन्धरा भरमहामृगराजर
थास्थिता। विमलशक्तिमुखानलपिंगलायतभुजौघविपिष्टमहासुरा १५ निगदिताभुवनैरि
तिचण्डिकाजननि! शुम्भनिशुम्भनिषूदनी। प्रणतचिन्तितदानवदानवप्रमथनैकरतिस्त
रसाभुवि १६ वियतिवायुपथेज्वलनोज्ज्वलेऽवनितलेतवदेवि! चयद्वपुः। तदजितेऽप्रतिमे
प्रणमाम्यहंभुवनभाविनि ! तेभववल्लभे १७ जलधयोललितोद्धतवीचयो हुतवहद्युतयश्च

नेलगी ४।५ हेबीरभद्रमैं तेरीमाताहूं तूचित्तमें सन्देहमतकरे मैंशिवजीकीप्यारीस्त्रीहूं हिमाचलकी पुत्री
हूं हेपुत्रमेरे शरीरकीकान्तिकरके तूशंकामतकरे मुझको ब्रह्माजीने प्रसन्नहोकर गौरवर्ण देदियाहै हेपुत्र
उस दैत्यके वृत्तान्तसे मैंने तुझको बिना समझेहुए शापदेदियाहै वहतोदूरनहीं होसकेगा परन्तुयह
कहेदेतीहूंकि तुम मनुष्यके प्रभावसे शापसे निवृत्तहोकर शीघ्रही आओगे इसके पीछे बीरभद्र पूर्ण
चन्द्रमाके समान कान्तिवाली अपनी माता पार्वतीको शिरसे प्रणामकर स्तुतिकरनेलगा ६।१०
वीरभद्र कहताहै हे शरणागतवत्सले देवता दैत्योंके प्रणाम करतेहुए मुकुटोंकी मणियोंसे शोभित
चरणारविन्दवाली मैं तुझको प्रणामकरताहूं ११ हेसूर्य्य मंडलके समान शोभित शिरवाली सुवर्ण
के पर्व्वतके समान कान्तिवाली सर्पाकार टेढ़ीभृकुटियोंवाली ऐसी जो आपहैं उनकेही मैं आश्र-
यहूं हे पार्वती प्रणामकरते हुएको जैसे तुमशीघ्रही वरदेतीहो ऐसादूसराबर देनेवाला तेरे सिवाय
कौनहै और शिवजीभी तेरेबिना जगत्में किसीकी इच्छानहीं करते हैं १२।१३ हेनिर्मल योगकेद्वारा अ-
पने शरीरको महादेवजीके शरीरमंडलके समान करनेवाली और दैत्योंकानाश करनेवाली तुझको
सब देवतालोगभी शिरसे प्रणामकरतेहैं हेजननी तुमश्वेतकेश और बड़े मुखवाले सिंहपर सवारी
करके अपनी निर्मल शक्तिसे जब असुरोंको मारतीहो तब संसार तुमको चंडिका कहताहै तुमहीं
शुंभ निशुंभको मारती और भक्तजनोंके मनोरथोंको सिद्ध करतीहो १४।१६ हेदेवि आकाशमें वायु
के मार्गमें जलतीहुई अग्निमें और पृथ्वीतलमें ज्योतेरारूपहै उसको मैं नमस्कार करताहूं और ल-

चराचरम्।फणसहस्रभृतश्चभुजङ्गमास्त्वदभिधास्यतिमय्यभयङ्कराः १८ भगवति!स्थि
रभक्तजनाश्रये! प्रतिगतोभवतीचरणाश्रयम्। करणजातमिहास्तुममाचलन्नुतिलवाप्ति
फलाशयहेतुतः। प्रशममेहिममात्मजवत्सले! नमोऽस्तुतेदेवि!जगत्त्रयाश्रये! १९ (सूत
उवाच) प्रसन्नातुततोदेवीवीरकस्येतिसंस्तुता। प्रविवेशशुभंभर्तुर्भवनंभूधरात्मजा २०
द्वारस्थोवीरकोदेवान् हरदर्शनकांक्षिणः । व्यसर्जयत्स्वकान्येव गृहाण्यादरपूर्वकः २१
नास्त्यत्रावसरोदेवा देव्यासहवृषाकपिः । निर्भृतःक्रीडतीत्युक्ता ययुस्तेचयथागतम् २२
गतेवर्षसहस्रेतुदेवास्त्वरितमानसः। ज्वलनंचोदयामासुर्ज्ञातुं शङ्करचेष्टितम् २३ प्रवि
श्यजालरन्ध्रेण शुकरूपीहुताशनः । ददर्शशयनेशर्वंरतं गिरिजयासह २४ ददर्शतञ्च
देवेशोहुताशंशुकरूपिणम्। तमुवाचमहादेवः किञ्चित्कोपसमन्वितः २५ यस्मात्तुत्वत्
कृतोविघ्नस्तस्मात्त्वय्युपपद्यते। इत्युक्तःप्राञ्जलिर्वह्नि रपिबद्वीर्यमाहितम् २६ तेनापूर्य
ततान्देवांस्तत्तत्कायविभेदतः। विपाट्यजठरन्तेषां वीर्यंमाहेश्वरन्ततः २७ निष्क्रान्तं
तप्तहेमाभं विततेशङ्कराश्रमे। तस्मिन्सरोमहज्जातं विमलंबहुयोजनम् २८ प्रोत्फुल्ल
हेमकमलं नानाविहगनादितम्। तच्छ्रुत्वातुततोदेवी हेमद्रुममहाजलम् २९ तत्रकृत्वा
जलक्रीड़ां तदब्जकृतशेखरा। उपविष्टाततस्तस्यतीरे देवीसखीयुता ३० पातुकामाच
तत्तोयं स्वादुनिर्मलपङ्कजम्। अपश्यन्कृत्तिकाःस्नाताःषडर्कद्युतिसन्निभम् ३१ पद्मपत्रे

लिततरंगोंवाले समुद्र अग्नि और हज़ारों सर्प यह सबतेरे प्रभावसे मुझको भयनहीं देसक्ते हैं मैं
आपके चरणोंके आश्रय होगयाहूं अब किसी फलकी इच्छानहीं करताहूं हे देवि मुझपर शान्तहोकर
कृपाकरो मैं आपको प्रणामकरताहूं १७।१९ सूतजी कहतेहैं जबवीरभद्रने इस प्रकारसे स्तुतिकरी
तव प्रसन्नहोकर पार्वतीजी अपने पति शिवजीके मंदिरमें प्रवेशकरतीभईं २० फिर द्वारपर खड़ाहु-
आवीरभद्र शिवजीके दर्शनकरनेकेलिये आयेहुए देवताओंको अपने२ घरोंको भेजताभया यहकहने
लगा हे देवताओ अबदर्शन करनेका अवसरनहींहै शिवजी पार्वतीके संगरमण कररहेहैं ऐसेवचनों
को सुनकर देवता स्थानोंको चलेगये २१।२२ जबहज़ारबर्ष व्यतीतहोचुके तब देवता शीघ्रताकरके
शिवजीके समाचारलेने के निमित्त अग्नि देवताको भेजतेभये २३ अग्नितोतेका रूपधारण करके
स्थानके किसी छिद्रके द्वारा स्थान में प्रवेशकरके पार्वतीके संग रमण करतेहुए महादेवजीको देख
ताभया तवकुछेक क्रोधकरके महादेवजी उस तोतेसेबोले कि तेरा कियाहुआ यहविघ्नहै इसलिये
यह विघ्नतुझीमें प्राप्तहोगा ऐसाकहाहुआ अग्नि अंजली बाँधकर महादेवजीके वीर्य्यको पीताभया
२४।२६ फिर उस वीर्य्यसेतृप्तहुआ अग्नि देवताओंको तृप्त करताभया उस समय वह शिवजीका
वीर्य्य उन देवताओंके उदरको फाड़कर बाहरनिकलताभया और शिवजी के आश्रमकेसमीप प्राप्त
होताभया वहाँ एकसरोवर बनगया बड़ास्वच्छ और बहुत योजन बिस्तृत सुवर्णकीसी कान्तिवाला
फूलेहुए कमलोंसे शोभित उस सरोवरको सुनकर पार्वती देवी सखियों से युक्तहो उसके जलमें
क्रीड़ाकरतीहुई तीरपर स्थितहो गऐ और उसजलके पीनेकीभी इच्छाकरी उस समयस्नान करती

तुतद्वारिग्टहीत्वोपस्थिताग्रहम् । हर्षादुवाचपश्यामि पद्मपत्रेस्थितंपयः ३२ ततस्ताऊचुरखिलंकृत्तिकाहिमशैलजम् । (कृत्तिका ऊचुः) दास्यामोयदिते गर्भःसम्भूतोयोभविष्यति ३३ सोऽस्माकमपिपुत्रः स्यादस्मन्नाम्नाचवर्ततताम् । भवेल्लोकेषुविख्यातः सर्वेष्वपिशुभानने ! ३४ इत्युक्तोवाचगिरिजा कथंमद्गात्रसम्भवः । सर्वैरवयवैर्युक्तोभवतीभ्यः सुतोभवेत् ३५ ततस्तांकृत्तिकाऊचु र्विधास्यामोऽस्यवैवयम् । उत्तमान्युत्तमाङ्गानि यद्येवन्तुभविष्यति ३६ उक्तावैशैलजाप्राह भवत्वेवमनिन्दिताः । ततस्ताहर्षसम्पूर्णाः पद्मपत्रस्थितंपयः ३७ तस्यैददुस्तयाचापि तत्प्रीतंक्रमशोजलम् । पीतेतुसलिलेतस्मिंस्ततस्तस्मिन्सरोवरे ३८ विपाट्यदेव्याश्चततो दक्षिणांकुक्षिमुद्गतः । निश्चक्रामाद्भुतोवालः सर्वलोकविभासकः ३९ प्रभाकरप्रभाकारः प्रकाशकनकप्रभः । गृहीतनिर्मलोदग्रशक्तिशूलःषडाननः ४० दीप्तोमारयितुंदैत्यान् कुत्सितान्कनकच्छविः । एतस्मात्कारणाद्देवः कुमारश्चापिसोऽभवत् ४१ ॥

इति श्रीमत्स्यपुराणेसप्तपञ्चाशदधिकशततमोऽध्यायः १५७ ॥

(सूत उवाच) वामंविदार्यनिष्क्रान्तः सुतोदेव्याःपुनःशिशुः । स्कन्दाच्चवदनेवह्नेः शुक्रात्सुवदनोऽरिहा १ कृत्तिकामेलनादेव शाखाभिःसविशेषतः । शाखाभिधाःसमाख्याताः षट्सुव क्त्रेषुविस्तृताः २ यतस्ततोविशाखोऽसौ ख्यातोलोकेषुषण्मुखः । स्कन्दोवि

हुई कृत्तिकाभी छः २ सूर्य्योंके समान उस जलको देखती भई तबपार्वती कमलके पत्तेपर स्थितहुए उस जलको ग्रहण करके आनन्दसेबोली कि कमल पत्रपर स्थितहुए इस जलको मैंदेखतीहूं २७।३२ऐसे पार्वतीके वचनको सुनकर कृत्तिका पार्वतीसे बोली कि हेशुभानने इसजलसे जोतुम्हारे गर्भ रहजावे तो वहहमारे नामसे प्रसिद्ध हमाराही पुत्रसंसारमें प्रसिद्ध होवे ऐसीप्रतिज्ञाकरे तो हम इसजलको देवें यहसुनकर पार्वतीजी बोलीकिमेरे अवयवों से युक्तहुआबालक तुम्हारापुत्र होवेगा ३३।३५ जब पार्वतीने यह वचनकहा तब कृत्तिकाबोली कि हमइसके उत्तम २ अंगोंका विधानकर देवेंगी यहबात सुनकर पार्वतजिीने कहाकि अच्छा इसी प्रकारहोजायगा तब वह कृत्तिकाप्रसन्नहोकर उसजलको पार्वतीके निमित्त देतीभई तब पार्वतीनेभी वहजल पीलिया इसके अनन्तर उस जलकागर्भ पार्वतीकी दाहिनी कोखको फाड़कर बाहर निकला और उसमें से सबलोकोंको प्रकाशितकरने वाला अद्भुत बालकनिकला सूर्य्यके समानतेजस्वी कंचनके समान देदीप्य शक्ति और शूलको ग्रहणकियेहुए छः मुखवाला वह अद्भुतबालकहोताभया सुवर्ण कीसी कान्ति वाला यह बालकदुष्ट दैत्योंका मारनेवालाहोताभया इस प्रकारसे स्वामिकार्त्तिककी उत्पत्तिहुईहै ३६।४१ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांसप्तपंचाशदधिकशततमोऽध्यायः १५७ ॥

सूतजी बोले इसके अनन्तर अग्निके वीर्य्यके प्रभावसे पार्वती देवीके बायेंकन्धेको फाड़के दूसरा बालक निकला तब कृत्तिकाने उन दोनों बालकोंको संधि और शाखाओंमें मिलादिया तभीसे इस के नाम विशाख, षण्मुख, स्कन्द, और कार्त्तिकेय आदिक संसारमें प्रसिद्ध होतेभये चैत्रशुक्लापंचमी

शाखःषड्वक्रोकार्त्तिकेयश्चविश्रुतः ३ चैत्रस्यबहुलेपक्षे पञ्चदश्यांमहाबलौ । संभूतावर्कसदृशौ विशालेशरकानने ४ चैत्रस्यैवासितपक्षे पञ्चम्यांपाकशासनः । बालकाभ्याञ्चकारैकं मत्वाचामरभूतये ५ तस्यामेवततःषष्ठ्यामभिषिक्तोगुहःप्रभुः । सर्वैरमरसङ्घातैर्ब्रह्मेन्द्रोपेन्द्रभास्करैः ६ गन्धमाल्यैःशुभैर्धूपैस्तथाक्रीडनकैरपि । छत्रैश्चामरजालैश्च भूषणैश्चविलेपनैः ७ अभ्यर्चितोविधानेन यथावत्षण्मुखःप्रभुः । सुतामस्मैददौशक्रो देवसेनेतिविश्रुताम् ८ पत्न्यर्थंदेवदेवस्य ददौविष्णुस्तदायुधान् । यक्षाणांदशलक्षाणि ददावस्मैधनाधिपः ९ ददौहुताशनस्तेजो ददौवायुश्चवाहनम् । ददौक्रीडनकन्त्वष्टा कुक्कुटंकामरूपिणम् १० एवंसुरास्तुतेसर्वे परिवारमनुत्तमम् । ददुर्मुदितचेतस्काः स्कन्दायादित्यवर्चसे ११ जानुभ्यामवनौस्थित्वा सुरसङ्घास्तमस्तुवन् । स्तोत्रेणानेनवरदं षण्मुखंमुख्यशःसुराः १२ (देवा ऊचुः) नमःकुमारायमहाप्रभाय स्कन्दायचस्कन्दितदानवाय । नवार्कविद्युद्द्युतयेनमोऽस्तु नमोस्तुतेषण्मुखकामरूप ! १३ पिनद्धनानाभरणायभर्त्रे नमोरणेदारुणदारुणाय । नमोऽस्तुतेऽर्कप्रतिमप्रभाय नमोऽस्तुगुह्यायगुहायतुभ्यम् १४ नमोऽस्तुत्रैलोक्यभयापहाय नमोऽस्तुतेबाल ! कृपापराय । नमोविशालामललोचनाय नमोविशाखायमहाव्रताय १५ नमोनमस्तेऽस्तुमनोहराय नमोनमस्तेऽस्तुरणोत्कटाय । नमोमयूरोज्ज्वलवाहनाय नमोऽस्तुकेयूरवरायतुभ्यम् १६ नमोधृतोदग्रपताकिनेनमो नमःप्रभावप्रणतायतेऽस्तु । नमोनमस्तेवरवीर्यशालिने क्रियापराणांभवभव्यमूर्तये १७ क्रियापरायज्ञपतिश्चस्तुत्वा विरेमुरेवत्वमराधिपाद्याः । एवंतदाषड्वदनन्तु

के दिन शरोंके वनमें सूर्य्यके समान कान्तिवाले दो बालक उत्पन्न हुए उसी पंचमीके दिन उन दोनों बालकोंको एककरदिया और उसीमहीने की षष्ठी६को ब्रह्मा इन्द्र और सूर्य इत्यादिकदेवताओं नेस्वामिकार्त्तिक का अभिषेक करदिया १।६ फिर गन्ध, पुष्प, सुगन्धितधूप, छत्र, चमर और आभूषण आदिकोंसे पूजित कियेहुए इस स्वामिकार्त्तिकके निमित्त इन्द्र विधिपूर्वक देवसेना नाम अपनी पुत्रीको विवाह देताभया विष्णुभगवान्ने उसको शस्त्रदिये कुबेर दशलाख यक्ष देताभया अग्नि अपने तेजको देताभया वायु वाहन देताभया त्वष्टादेवता कामस्वरूपी मुरगा उसके खेलनेको देता भया ७।१० इस प्रकारसे सब देवता लोग स्वामिकार्त्तिक के निमित्त बहुत प्रसन्न होकर भेटें देते भये और पृथ्वीमें घोंटू नवाकर इस आगे लिखे हुए स्तोत्रसे स्तुति करतेभये ११।१२ देवाऊचुः देवता कहते हैं कि हेमहाकान्तिवाले नवीन सूर्य्य के समान कान्तिवाले षण्मुख आपके अर्थ नमस्कार है १३ अनेक प्रकारके आभूषण धारण करनेवाले रणमें भयकारी और गुह्य और गुह अर्थात् रक्षक ऐसे आपके अर्थ नमस्कारहै १४ हेत्रिलोकीके भयनाशक बालकोंपर दयाकरने वाले बिशाल और स्वच्छ नेत्रोंवाले महाव्रत युक्त आपको नमस्कार है १५ मनके हरने वाले सुन्दर रणमें भयानक मयूरकी सवारी करनेवाले ऐसे आपको नमस्कार है १६ ऊंची ध्वजा रखनेवाले वरदानियों

सेन्द्रा मुदासुतुष्टश्चगुहस्ततस्तान्। निरीक्ष्यनेत्रैरमरैःसुरेशान् शत्रून्हनिष्यामिगतज्वराःस्थ १८ (कुमार उवाच) कंवःकामंप्रयच्छामि देवता! ब्रूतनिर्वृताः । यद्यप्यसाध्यं हृद्यंवो हृदयेचिन्तितम्परम् १९ इत्युक्तास्तुसुरास्तेनस्तुत्वाप्रणतमौलयः । सर्वएवमहात्मानं गुहंतद्गतमानसाः २० दैत्येन्द्रस्तारकोनाम सर्वामरकुलान्तकृत्। बलवान्दुर्जयो दुष्टो दुराचारोऽतिकोपनः २१ तमेवजहिहृद्योऽर्थ एषोऽस्माकंभयापह!। एवमुक्तस्तथेत्युक्त्वा सर्वामरपदानुगः २२ जगामजगतांनाथ स्तूयमानोऽमरेश्वरैः । तारकस्यवधार्थाय जगतःकण्टकस्यवै २३ ततश्चप्रेषयामास शक्रोलब्धसमाश्रयः। दूतंदानवसिंहस्य परुषाक्षरवादिनम् २४ सतुगत्वाब्रवीद्दैत्यं निर्भयोभीमदर्शनः। (दूत उवाच) शक्रस्त्वामाहदेवेशो दैत्यकेतो!दिवस्पतिः २५ तारकासुर! तच्छ्रुत्वा घटशक्त्यायथेच्छया। यज्जगद्दलनादाप्तं किल्बिषंदानव! त्वया २६ तस्याहंशासकस्तेऽद्य राजास्मिभुवनत्रये। श्रुत्वैतद् दूतवचनं कोपसंरक्तलोचनः २७ उवाचदूतंदुष्टात्मा नष्टप्रायविभूतिकः। (तारक उवाच) दृष्टंतेपौरुषंशक्र! रणेषुशतशोमया २८ निस्त्रपत्वान्नतेलज्जा विद्यतेशक्र! दुर्मते!। एवमुक्तेगतेदूते चिन्तयामासदानवः २९ नालब्धसंश्रयःशक्रो वक्तुमेवंहिचार्हति। जितःसशक्रोनोऽकस्माज्जायतेसंश्रयाश्रयः ३० निमित्तानिचदुष्टा

में श्रेष्ठ उत्तम क्रियावानोंके कार्य्योंके सिद्धकरने वाले आपके अर्थनमस्कार है १७ इस रीतिसे जब इन्द्रादिक देवता स्वामिकार्तिककी स्तुति करतेभये तब स्वामिकार्त्तिकजी देवताओंको अपने नेत्रोंसे देखकर बोले कि हे देवता लोगो मैं तुम्हारे शत्रुओं को मारूंगा तुम किसी बातका भी भयमत करो १८ और हे देवता लोगो तुम यहभी कहो कि तुम्हारे कौनसे मनोरथको करूं जो तुम्हारे हृदय में कोई असाध्य भी कार्य्यहोगा उसको भी मैं करूंगा ऐसे कहेहुए देवता अपने२ मस्तकोंको नवाकर उन महात्मा स्वामिकार्त्तिकजीसे बोले १९।२० हेषड़ाननजी तारकासुरनाम दानवने सब देवताओंका नाश करदिया है वह दैत्य बड़ा बलवान् और दुर्जय है दुष्ट है और अत्यन्त क्रोध करने वालाहै उसको आप मारिये वही हम सबको महाभयकारी है यह वचन सुनकर स्वामिकार्त्तिकजी उसीसमय सबदेवताओंकेसंग गमनकरतेभये और तारकासुरदैत्यकेबधका उपायकरतेभये २१।२३ इसके अनन्तर इन्द्रने तारकासुरकेपास कठोर वचन कहनेवाले अपने दूतको भेजा वहदूत निर्भय होकर उस दैत्यके पास जाकर कहनेलगा किहे तारकासुर इन्द्रने तुझसे कहाहै कि मैं स्वर्गका पतिहूं और हे दैत्य मैं उसीका दूतहूं जो उसने कहाथा सो तुमसे कहदिया है इसके विशेष इन्द्र ने यहभी कहाहै कि मैंही त्रिलोकीकाराजाहूं इस वचनको सुनकर वहदानव क्रोधसे रक्त नेत्रकरके इन्द्रके दूतसे यह बचन कहने लगा कि हे दूत तू इन्द्रसे कहदीजो कि मैंने तेरा पराक्रम रणमें सैकड़ों बार देखाहै २४। २८ हे दुर्मतिवाले इन्द्र तुझको लज्जा नहीं है यह वचन जब दैत्यके सुने तब दूत चलाआया फिर तारकासुर दैत्य चिन्तवनकरने लगा कि वह इन्द्र किसी के आश्रयालिये विना ऐसे कहनेको समर्थ नहींहै क्योंकि मैंने उसको युद्धमें कई बार जीतलिया है २९।३० फिर वह

नि सोऽपश्यद्दुष्टचेष्टितः । पांसुवर्षमसृक्पातं गगनादवनीतले ३१ भुजनेत्रप्रकम्पंच
वक्त्रशोषमनोभ्रमम् । स्वकान्तावक्त्रपद्मानां म्लानताञ्चभ्यलोकयत् ३२ दुष्टांश्चप्राणि
नोरौद्रान्सोऽपश्यद्दुष्टवेदिनः । तदाचिन्त्वैवदितिजोन्यस्तचिन्तोऽभवत्क्षणात् ३३
यावद्गजघटाघण्टा रणत्काररवोत्कटाम् । तद्वत्तुरगसंघातक्षुण्णभूरेणुपिञ्जराम् ३४ च
ञ्चलस्यन्दनोदग्र ध्वजराजिविराजिताम् । विमानैश्चाद्भुताकारैश्चलितामरचामरैः ३५
तांभूषणनिबद्धाङ्ग किन्नरोद्गीतनादिताम् । नानानाकतरूत्फुल्ल कुसुमापीडधारिणीम् ३६
विकोशास्त्रपरिष्कारां वर्म्मनिर्म्मलदर्शनाम् । वन्द्युद्घुष्टस्तुतिरवां नानावाद्यनिनादि
ताम् ३७ सेनांनाकसदांदैत्यः प्रासादस्थोऽभ्यलोकयत् । चिन्तयामाससतदा किञ्चिदुद्
भ्रान्तमानसः ३८ अपूर्वःकोभवेद्योद्धा योमयानविनिर्जितः । ततश्चिन्ताकुलोदैत्यः शु
श्रावकटुकाक्षरम् ३९ सिद्धवन्दिभिरुद्घुष्ट मिदंहृदयदारणम् । अथगाथा । जयअतु
लशक्तिदीधितिपिञ्जर ! भुजदण्डचण्डरणरभस !। सुखद ! कुमुदकाननविकासनेन्दो!
कुमार ! जयदितिजकुलमहोदधिवडवानल ४० षण्मुख ! मधुररवमयूररथ ! सुरमुकुट
कोटिघट्टित चरणनवांकुरमहासन !। जयललितचूडाकलापनवविमलदल ! कमलका
न्त ! दैत्यवंशदुःसहदानवानल ! ४१ जय विशाख ! विभो ! जयसकललोकतारक ! स्क
न्द ! जयगौरीनन्दन ! घण्टाप्रिय !। प्रिय ! विशाख ! विभो ! धृतपताकप्रकीर्णपटल !
कनकभूषणभासुरदिनकरच्छाय! ४२ जय जनितसंभ्रमलीलालूनाखिलाराते ! जयसक
ललोकतारक ! दितिजासुरवरतारकान्तक !। स्कन्द ! जय बाल ! सप्तवासर ! जय भुव

तारकासुर दैत्य इन विपरीत लक्षणोंको देखताभया कि धूलिकी वर्षा, आकाशसे पृथ्वीमें रक्त गिरना, वामनेत्रका फड़कना, मुखकासूखना, चित्तभ्रमहोना, अपनी स्त्रियोंके कमल समान मुखों को मलिन देखना भयंकर प्राणी देखना इत्यादि लक्षणोंको देखकर तारकासुर चिन्ताकरने लगा और इसी चिन्ताके करतेही घंटोंसे युक्त चिंघाड़तेहुए हाथियोंसमेत कालीदीखतीभई फिर चंचल ध्वजावाले रथोंसे और चमरोंसेशोभित अनेक विमानोंवाली किन्नरोंके गानयुक्त अनेकप्रकारके स्वर्गकेपुष्पों को धारण किये हुए उत्तम अस्त्र और कवचोंको पहरेहुए अनेक प्रकारके बाजोंवाली ऐसी देवताओंकी सेनाको वह दैत्य अपने स्थानके ऊपर स्थितहोकर देखताभया फिर कुछ भ्रमकरके चिन्ता करके ऐसा विचार करनेलगा कि ऐसा अपूर्व योद्धा कौनहै जिसको कि मैंने पूर्व्वनहीं हरायाहै इसके पीछे वह दैत्य इसकठोर वचनको भी सुनताभया ३१ । ३९ अर्थात् देवताओंके बन्दीजनोंके मुखसे ऐसे वचन सुने कि हे सुख देनेवाले चन्द्रमाके समान कान्तिवाले कुमार हे दैत्य कुलके नाश करनेमें अग्निके समान षण्मुख हे मधुर शब्द करनेवाले मयूरके रथवाले स्वामिकार्तिक आपके चरणोंके नख देवताओंके मुकुटों से घिसे जाते हैं हे बिशाख हे सकल लोकतारक तुम्हारी जय होय हे स्कन्द हे गौरीनन्दन हे घंटाप्रिय हे बिभो हे सुवर्ण भूषणधारी जय करो हे स्कन्द हे बाल हे स-

नावलिशोकविनाशन!४३॥इतिश्रीमत्स्यपुराणेऽष्टपञ्चाशदधिकशततमोऽध्यायः १५८॥

(सूत उवाच) श्रुत्वैतत्तारकःसर्वमुद्घुष्टंदेववन्दिभिः। सस्मारब्रह्मणोवाक्यं बधं
बालादुपस्थितम् १ स्मृत्वाधर्मेह्यवर्माङ्गः पदातिरपदानुगः। मन्दिरान्निर्जगामाशु शोक
ग्रस्तेनचेतसा २ कालनेमिमुखादैत्याः संरम्भाद्भ्रान्तचेतसः। योधा! धावतगृह्णीत
योजयध्वंवरूथिनीम् ३ कुमारंतारकोदृष्ट्वा बभाषेभीषणाकृतिः। किं बाल! योद्धुकामोऽ
सि क्रीडकन्दुकलीलया ४ त्वयानदानवादृष्टा यत्सङ्गरविभीषकाः। बालत्वादथतेबुद्धि
रेवं स्वल्पार्थदर्शिनी ५ कुमारोऽपितमग्रस्थं बभाषेहर्षयन्सुरान्। शृणुतारक! शास्त्रार्थ
स्तवचैवनिरूप्यते ६ शास्त्रैरर्थानदृश्यन्ते समयेनिर्भयेभटैः। शिशुत्वंमावमंस्थामे शि
शुःकालभुजङ्गमः ७ दुष्प्रेक्ष्योभास्करोबाल स्तथाहंदुर्जयःशिशुः। अल्पाक्षरोनमन्त्रःकिं
सुस्फुरोदैत्य! दृश्यते ८ कुमारेप्रोक्तवत्येवं दैत्यश्चिक्षेपमुद्गरम्। कुमारस्तंनिरस्याथ व
ज्रेणामोघवर्चसा ९ ततश्चिक्षेपदैत्येन्द्रो भिन्दिपालमयोमयम्। करेणतच्चजग्राह कार्ति
केयोऽमरारिहा १० गदांमुमोचदैत्याय षण्मुखोऽपिखरस्वनाम्। तयाहतस्ततोदैत्यश्च
कम्पेऽचलराडिव ११ मेनेचदुर्जयंदैत्य स्तदाषड्वदनंरणे। चिन्तयामासबुद्ध्यावै प्राप्तः
कालोनसंशयः १२ कुपितन्तुतमालोक्य कालनेमिपुरोगमाः। सर्वेदैत्येश्वराजघ्नुः कुमा

नवासर हे त्रिभुवन शोक बिनाशी तुमजय करो ४०।४३॥ इतिश्रीमत्स्यपुराणभाषाटीकायामष्ट
पंचाशदधिकशततमोऽध्यायः १५८॥

सूतजीबोले कि इससब वृत्तान्तको तारकासुर सुनकर ब्रह्माजीके कहेहुए बालककेहाथसे अपने वधहोनेको स्मरण करताभया १ फिर पैदल दैत्योंको साथ लेकर शोकसे दुःखितहो अपनेस्थानसे बाहर निकलताभयाः तब कालनेमिआदि दैत्य बेगकरके अपनीसेनाको साथलिये भगकर रणमें आते भये २।३ वह तारकासुर दैत्य स्वामिकार्तिकको देखकर बोला हे बालक तू क्या युद्ध करनेकी इच्छा करता है मुझसे गेंद लीला खेलेगा तैंने कभी भयंकर दानव नहींदेखे हैं क्या तू बालकहै इस हेतुसे तेरी बुद्धि थोड़ी है ४।५ यहसुनकर वह कुमार भी देवताओंको प्रसन्न करताहुआ बोला कि हे तारकासुर तेरे शास्त्रार्थको पीछेसे कहूंगा ६ ऐसे अनिर्भय समय में पंडित लोगोंको शास्त्रोंके अर्थ नहीं बिचारने चाहिये तू मुझको बालकमत जाने मैं काले सर्पका बालकहूं दुष्प्रेक्ष्य और दुर्जयहूं हे दैत्य क्या अल्पअक्षरोंवाला मंत्रफल नहींदेता है ७।८ इस प्रकारसे जब कुमार कहचुका उसी समय दैत्यने अपने मुद्गरको उसकेऊपरछोड़ा तब कुमारस्वामिकार्त्तिकने अपने बज्रसे उस मुद्गरका नाश करदिया ९ इसके अनन्तर वह दैत्य गोफिया यंत्र में लोहेके गोलेको डालकर स्वामिकार्त्तिकके मारताभया उस गोलेको स्वामिकार्त्तिक अपने हाथमेंही ग्रहण करतेभये और तारकासुरदैत्यके अपनी गदा मारतेभये उस गदाके लगतेही तारकासुर कांपनेलगा और स्वामिकार्तिकको रणमें दुर्जयमानताभया फिर अपनी बुद्धिसे चिन्तवन करनेलगा कि अबमेरा काल आगया है तब क्रोधहुए स्वामिकार्त्तिकको देखकर कालनेमि आदिक दैत्य स्वामिकार्त्तिकको अपने शस्त्रों से प्रहार

रंरणदारुणम् १३ सतैःप्रहारैरस्पृष्टो वृथाक्लेशोमहाद्युतिः । रणशौण्डास्तुदैत्येन्द्राः पुनः
प्रासैःशिलीमुखैः १४ कुमारंसामरञ्जघ्नुर्बलिनोदेवकण्टकाः । कुमारस्यव्यथानाभूद्दैत्या
स्त्रनिहतस्यतु १५ प्राणान्तकरणोजातो देवानांदानवाहवः । देवान्निपीडितान्दृष्ट्वा कुमारः
कोपमाविशत् १६ ततोऽस्त्रैर्वारयामास दानवानामनीकिनीम् । तैरस्त्रैर्निष्प्रतीकारै स्ताडि
ताःसुरकण्टकाः १७ कालनेमिमुखाःसर्वेरणादासन्पराङ्मुखाः । विद्रुतेष्वथदैत्येषुहतेषुच
समन्ततः १८ ततःक्रुद्धोमहादैत्यस्तारकोऽसुरनायकः । जग्राहचगदांदिव्यांहेमजालपरि
ष्कृताम् १९ जघ्नेकुमारंगदयानिष्टप्तकनकाङ्गदः । शरैर्मयूरंचित्रैश्च चकारविमुखंरणे २०
दृष्ट्वापराङ्मुखंदेवोमुक्तरक्तंस्ववाहनम् । जग्राहशक्तिंविमलां रणेकनकभूषणाम् २१ बा
हुनाहेमकेयूररुचिरेणषडाननः । ततोजवान्महासेनस्तारकंदानवाधिपम् २२ तिष्ठ
तिष्ठसुदुर्बुद्धे ! जीवलोकंविलोकय । हतोऽस्यद्यमयाशक्त्या स्मरशस्त्रंसुशिक्षितम् २३
इत्युक्त्वाचततःशक्तिं मुमोचदितिजम्प्रति । सकुमारभुजोत्सृष्टा तत्केयूररवानुगा २४
विभेददैत्यहृदयं वज्रशैलेन्द्रकर्कशम् । गतासुःसपपातोर्व्यां प्रलयेभूधरोयथा २५ विकी
र्णमुकुटोष्णीषो विस्रस्ताखिलभूषणः । तस्मिन्विनिहतेदैत्ये त्रिदशानांमहोत्सवे २६
नाभूत्कश्चित्तदादुःखी नरकेष्वपिपापकृत् । स्तुवन्तःषण्मुखंदेवाः क्रीडन्तश्चाङ्गनायु
ताः २७ जग्मुःस्वानेवभवनान् भूरिधामानउत्सुकाः । ददृशुश्चापिवरंसर्वे देवाःस्कन्दमुखं
प्रति २८ तुष्टाःसंप्राप्तसर्वेच्छाः सहसिद्धैस्तपोधनैः । (देवा ऊचुः) यःपठेत्स्कन्दसंब

करनेलगे १० । १३ उन प्रहारों से स्वामिकार्त्तिक कुछभी पीड़ितनहींहुए फिर रणमें प्रवीणहुए दैत्य
स्वामिकार्त्तिकको बाणों से बींधतेभये उनबाणों से भी स्वामिकार्त्तिकको पीड़ानहींहुई वह दैत्यों
का युद्ध देवताओं के प्राणोंका नाशकरनेवाला हुआ जब पीड़ितहुए देवताओंको देखकर स्वामिकार्त्तिक
क्रोधकरके अपने शस्त्रोंसे दानवोंकी सेनाको पीड़ित करतेभये तब उन अस्त्रोंसे पीड़ितहुए
कालनेमिआदिक दैत्य रणसे मुखोंको फेरकर भागगये उस समय तारकासुर दैत्य क्रोधकरके सुवर्ण
की जाली से शोभितकीहुई गदाको ग्रहण करके आया १४ । १९ और उस गदा से स्वामिकार्त्तिक
को पीड़ादेने लगा और उनके बाहन मयूरको बाणोंकी मारसे रणसे बिमुखकर देताभया २०
रणसे विमुख रुधिर गेरतेहुए अपने बाहनको देखकर स्वामिकार्त्तिक अपनी सुबर्णके समान भुजा
में शक्तिको ग्रहणकर तारकासुर दैत्यके सन्मुख भागे और यह कहते भये कि हे दुर्बुद्धे ठहर २ इस
शक्तिको देख अब तू अपने को मराहुआही जान यहकहकर अपनी उत्तम शक्तिको छोड़ते भये
फिर वह स्वामिकार्त्तिक के हाथसे छूटीहुई शक्ति उस दैत्यके कठोर हृदयको फाड़डालतीभई तब
फटेहुए हृदयवाला वह दैत्यमरकर ऐसे गिरताभया मानों प्रलयकालके वज्रपातसे पर्व्वतही गिर
पड़ाहो २१।२५ मरेहुए दैत्यके शिरका मुकुट गिरपड़ा पगड़ी बिखरगई सब आभूषण बिखरपड़े
ऐसे हतहुए दैत्यको देखकर देवताओं के महान् उत्सव होताभया उस समय कोईभी दुःखनहींरहा
नरकमें भी कोई पापी न रहा देवतालाग अपनी २ स्त्रियोंसहितहोकर स्वामिकार्त्तिककी स्तुतिकरते

त्वां कथंसमर्त्योमहामतिः २९ शृणुयाच्छ्रावयेद्वापि सभवेत्कीर्तिमान्नरः । बह्वायुःसुभगः
श्रीमान्कान्तिमान्शुभदर्शनः ३० भूतेभ्योनिर्भयश्चापि सर्वदुःखविवर्जितः । सन्ध्यामु
पास्यवैपूर्वां स्कन्दस्यचरितंपठेत् ३१ समुक्तःकिल्बिषैःसर्वैर्महाधनपतिर्भवेत् ! बाला
नांव्याधिजुष्टानां राजद्वारश्चसेवताम् ३२ इदंतत्परमन्दिव्यं सर्वदासर्वकामदम् । तनु
क्षयेचसायुज्यं षण्मुखस्यव्रजेन्नरः ३३ ॥

इति श्रीमत्स्यपुराणेएकोनषष्ट्यधिकशततमोऽध्यायः १५९ ॥

(ऋषय ऊचुः) इदानींश्रोतुमिच्छामो हिरण्यकशिपोर्वधम् । नरसिंहस्यमाहात्म्यं
तथापापविनाशनम् १ (सूत उवाच) पुराकृतयुगेविप्रा हिरण्यकशिपुःप्रभुः। दैत्याना
मादिपुरुषश्चकार समहत्तपः २ दशवर्षसहस्राणि दशवर्षशतानिच । जलवासीसमभ
वत् स्नानमौनधृतव्रतः ३ ततःशमदमाभ्याञ्च ब्रह्मचर्येणचैवहि । ब्रह्माप्रीतोऽभवत्तस्य
तपसानियमेनच ४ ततःस्वयम्भूर्भगवान् स्वयमागम्यतत्रह । विमानेनार्कवर्णेन हंसयु
क्तेनभास्वता ५ आदित्यैर्वसुभिस्साध्यैर्मरुद्भिर्दैवतैस्तथा। रुद्रैर्विश्वसहायैश्च यक्षराक्ष
सपन्नगैः ६ दिग्भिश्चैवविदिग्भिश्च नदीभिःसागरैस्तथा। नक्षत्रैश्चमुहूर्तैश्च खेचरै
श्चमहाग्रहैः ७ देवैर्ब्रह्मर्षिभिःसार्द्धं सिद्धैःसप्तर्षिभिस्तथा । राजर्षिभिःपुण्यकृद्भिर्गन्ध
र्वाप्सरसाङ्गणैः ८ चराचरगुरुःश्रीमान् वृतःसर्वैर्दिवौकसैः । ब्रह्माब्रह्मविदांश्रेष्ठो दैत्यं

भये और स्वामिकार्त्तिकको वरदेकर देवता अपने २ स्थानोंको जातेभये २६।२८ फिर देवतालोग
प्रसन्न होकर ऐसा वचनकहतेभये कि जो बुद्धिमान् पुरुष इस स्वामिकार्त्तिक की कथाको सुनेगा
अथवा किसीको सुनावेगा वह कीर्तिमान् होगा और बहुतसी आयुवाला सुन्दर ऐश्वर्यों से युक्त
कान्तिवाला होकर सुन्दरदर्शन वाला होवेगा २९।३० इसके विशेष वह पुरुष सबभूतोंसे निर्भय
होकर सबदुःखों से भी रहितहोगा प्रथम प्रातःकालकी संध्याकरके जो इस चरितका पाठकरेगा
वह सबपापोंसे छुटकर महाधनपति होजायगा और व्याधिसे पीड़ित बालक तथा राज्यमें प्रवृत्त
विषयवाले पुरुषोंको इस चरितकापाठ सदैवकरना योग्यहै उसपाठकरनेवाले को अन्तकालके समय
स्वामिकार्त्तिकके साथ सायुज्य मोक्षप्राप्त होजातीहै ३१ । ३३ ॥

इति श्रीमत्स्यपुराणभाषाटीकायामेकोनषष्ट्यधिकशततमोऽध्यायः १५९ ॥

ऋषियोंनेकहा हे सूतजी अबहम हिरण्यकशिपु दैत्यके बधको सुनाचाहतेहैं और महापापनाशक
नरसिंहजीके माहात्म्यकोभी सुननाचाहतेहैं १ सूतजीबोले हेविप्रो प्रथम सत्ययुगमें हिरण्यकशिपु
नाम दैत्य महाबलवान् और समर्थ होताभया उसने बड़ाघोर तपकिया अर्थात् ग्यारह ११०००
हज़ार वर्षतकतो जलमें वासकिया फिर बहुत कालतक स्नानकरके मौनधारणकिया फिर शम दम
ब्रह्मचर्य्य और नियमोंको बहुत दिनोंतक करनेसे ब्रह्माजी प्रसन्न होतेभये २।४ और सूर्य्यके समान
कान्तिवाले हंसपर चढ़े आदित्य,वसु,साध्य,मरुद्गण,देवता रुद्र,यक्ष,राक्षस,पन्नग,दिशा, विदिशा,नदी,
समुद्र,नक्षत्र,मुहूर्त्त,महाग्रह, सिद्ध,सप्तऋषि, राजऋषि, गंधर्व और अप्सरा इनसबोंसे युक्त चराचर

वचनमब्रवीत् ९ प्रीतोऽस्मितवभक्तस्य तपसाऽनेनसुव्रत ! । वरंवरयभद्रंतेयथेष्टंकाम
माप्नुहि १० (हिरण्यकशिपुरुवाच) नदेवासुरगन्धर्वा नयक्षोरगराक्षसाः । नमानुषाः
पिशाचावा हन्युर्मान्देवसत्तम ! ११ ऋषयोवानमांशापैः शंपेयुःप्रपितामह ! । यदिमेभ
गवान्प्रीतो वरएषवृतोमया १२ नचास्त्रेणनशस्त्रेण गिरिणापादपेनच । नशुष्केणनचा
र्द्रेण नदिवाननिशाथवा १३ भवेयमहमेवार्कः सोमोवायुर्हुताशनः । सलिलञ्चान्तरिक्षञ्च
नक्षत्राणिदिशोदश १४ अहंक्रोधश्चकामश्चवरुणोवासवोयमः । धनदश्चधनाध्यक्षोयक्षः
किंपुरुषाधिपः १५ (ब्रह्मोवाच) एतेदिव्यावरास्तात ! मयादत्तास्तवाद्भुताः । सर्वान्
कामान्सदावत्स ! प्राप्स्यसेत्वंनसंशयः १६ एवमुक्त्वासभगवान् जगामाकाशएवहि ।
वैराजंब्रह्मसदनं ब्रह्मर्षिगणसेवितम् १७ ततोदेवाश्चनागाश्च गन्धर्वाऋषिभिःसह । वर
प्रदानंश्रुत्वैव पितामहमुपस्थिताः १८ (देवा ऊचुः) वरप्रदानाद्भगवन् ! बधिष्यतिस
नोऽसुरः । तत्प्रसीदाशुभगवन् ! बधोऽप्यस्यविचिन्त्यताम् १९ भगवन् ! सर्वभूतानामा
दिकर्त्तास्वयंप्रभुः । स्रष्टात्वंहव्यकव्यानामव्यक्तप्रकृतिर्बुधः २० सर्वलोकहितंवाक्यं श्रु
त्वादेवःप्रजापतिः । आश्वासयामाससुरान् सुशीतैर्वचनाम्बुभिः २१ अवश्यंत्रिदशास्ते
न प्राप्तव्यंतपसःफलम् । तपसोऽन्तेऽस्यभगवान् बधंविष्णुःकरिष्यति २२ तच्छ्रुत्वावि
बुधावाक्यं सर्वेपङ्कजजन्मनः । स्वानिस्थानानिदिव्यानि विप्राजग्मुर्मुदान्विताः २३ ल

के गुरू ब्रह्माजी उस दैत्यके पास आकर यह वचन बोले ५।९ हेसुव्रत इसतेरे तपकरनेसे मैं प्रसन्न
होगयाहूं तू अपनी इच्छाके समान वरको मांग मेरी कृपासे तू अपनीसब कामनाओंको प्राप्त होजायगा
१० हिरण्यकशिपु बोला हेश्रेष्ठदेव मुझको देवता असुर गन्धर्व यक्ष उरग राक्षस मनुष्य और
पिशाच इनमेंसे कोईभी नहीं मारसके ऋषियोंका शापभी मुझे नहीं लगसके इसके विशेष मेरेऊपर
जो आप प्रसन्नहैं तो यहभी वरदो कि शस्त्रसे अस्त्रसे पर्व्वतसे वृक्षसे सूखे गीले आदिसे भी न मरूं दिन
में नहीं मरूं रात्रिमें नहीं मरूं मैं सूर्य्य और चन्द्रमाभी होजाऊं वायु अग्नि जल आकाश नक्षत्र दशो
दिशा इन सबके कार्योंको करनेवाला मैंहीहोजाऊं क्रोध काम इन्द्र बरुण यम धनपति कुबेर यक्ष और
किंपुरुषोंका पतिइन सबकाभी स्वरूप मैंहीहोजाऊं ११।१५ ब्रह्माजीने कहा हेपुत्र मैंने यह दिव्य अद्भुत
वरतेरे निमित्तदिये इनसबोंको तू निस्सन्देह प्राप्तहोजावेगा १६ ऐसे कहकर ब्रह्माजी देवऋषियों
से सेवित कियेहुए अपने वैराज स्थानको आकाश मार्गके द्वाराजातेभये १७ इसके अनन्तर देवता
नाग गन्धर्व और ऋषि यह सब ब्रह्माजी से दियेहुए इस वरको सुनकर ब्रह्माजी के समीप आतेभये
१८ और कहनेलगे कि हेब्रह्मन् वरदेनेके प्रभावसे यह दैत्यहमको सता सताकर मारेगा सो आप
इस दैत्यके मरनेका उपाय विचार कीजिये १९ हे भगवन् आपही सबभूतों के आदि कर्त्ताहो आपही
समर्थहो देवता और पितरोंके रचनेवाले हो अव्यक्त मायासे युक्तहो चतुरहो २० ब्रह्माजी देवताओं
के ऐसे वचनोंको सुनकर देवताओंको ऐसे शीतल जलरूपी वचनों से शान्तकरतेभये कि हे देवताओ
तपके फलका अन्त अवश्य होजायगा इस दैत्यका बध विष्णुभगवान् करेंगे २१।२२ इस वचनको

ब्धमात्रेवरेचाथ सर्वाःसोऽबाधतप्रजाः । हिरण्यकशिपुर्दैत्यो वरदानेनदर्पितः २४ आश्रमेषुमहाभागान् समुनीन्शंसितव्रतान् । सत्यधर्म्मपरान्दान्तान् धर्षयामासदानवः २५ देवांस्त्रिभुवनस्थांश्च पराजित्यमहासुरः । त्रैलोक्यंवशमानीय स्वर्गेवसतिदानवः २६ यदावरमदोत्सिक्तश्चोदितःकालधर्म्मतः । यज्ञियानकरोद्दैत्यानयाज्ञियाश्चदेवताः २७ तदादित्याश्चसाध्याश्च विश्वेचवसवस्तथा । सेन्द्रादेवगणायक्षाः सिद्धाद्विजमहर्षयः २८ शरण्यंशरणंविष्णुमुपतस्थुर्महाबलम् । देवदेवंयज्ञमयं वासुदेवंसनातनम् २९ (देवा ऊचुः) नारायण ! महाभाग ! देवास्त्वांशरणङ्गताः । त्रायस्वजहिदैत्येन्द्रं हिरण्यकशिपुंप्रभो ! ३० त्वंहिनःपरमोधाता त्वंहिनःपरमोगुरुः । त्वंहिनःपरमोदेवो ब्रह्मादीनांसुरोत्तम ! ३१ (विष्णुरुवाच) भयन्त्यजध्वममरा ! अभयंवोददाम्यहम् । तथैवात्रिदिवंदेवाः प्रतिपद्यतमाचिरम् ३२ एषोऽहंसगणंदैत्यं वरदानेनदर्पितम् । अबध्यममरेन्द्राणां दानवेन्द्रंनिहन्म्यहम् ३३ एवमुक्तातुभगवान् विसृज्यत्रिदशेश्वरान् । बधंसङ्कल्पयामास हिरण्यकशिपोःप्रभुः ३४ सहायञ्चमहाबाहुरोङ्कारंगृह्यसत्वरम् । अथोङ्कारसहायस्तु भगवान्विष्णुरव्ययः ३५ हिरण्यकशिपुस्थानं जगामहरिरीश्वरः । तेजसाभास्कराकारः शशीकान्त्येवचापरः ३६ नरस्यकृत्वार्द्धतनुं सिंहस्यार्द्धतनुंतथा । नारसिंहेनवपुषा पाणिंसंस्पृश्यपाणिना ३७ ततोऽपश्यतविस्तीर्णां दिव्यांरम्यांमनोरमाम् । सर्वकामयुतां

सुनकर देवता प्रसन्नहोकर अपने २ स्थानोंको चलेगये इसके पीछे जब इसदैत्यको वरदान मिलचुका तब वह हिरण्यकशिपु दैत्य वरके अभिमानसे सब प्रजाको दुःखदेनेलगा २३। २४ स्वर्गवासी देवताओंको जीतकर त्रिलोकी को अपने वशमें करताभया फिर वरके मदसे विकलहुआ हिरण्यकशिपु अपने कालके वशीभूत होकर आश्रमों में वसनेवाले मुनियोंको दुःखदेनेलगा और सत्यधर्म दयाआदिकों में रहनेवालों को त्रासदेताभया और स्वर्गमें बासकरके देवताओं के भागोंको आप भोजनकरनेलगा २५। २७ आदित्य, साध्य, विश्वेदेवा, बसु, इन्द्र,देवता यक्ष, सिद्ध, द्विज, और महर्षि यह सब मिलकर विष्णुभगवान् की शरणमें जातेभये और देवताओंके देवयज्ञभी मूर्त्तिको धारणकरके गये और सबोंने मिलकर विष्णुकी यह स्तुतिकरी २८। २९ हे नारायण हे महाभाग आपकी शरण में हम देवतालोग आये हैं हेप्रभो इस हिरण्यकशिपु दैत्यको मारो ३० आपही हमारे परम पालक हो गुरू हो हेसुरश्रेष्ठ आप ब्रह्मादिक देवताओं के परम पूज्य देवहो ३१ यह स्तुति सुनकर विष्णुजी बोले कि हे देवताओ तुम भयको त्यागदो तुमको मैं अभय देताहूं तुम स्वर्ग को जाओ विलम्ब मतकरो मैं इस अभिमानी दैत्यको इसके सबगणों समेत मारूंगा इस प्रकारके वचन कहकर विष्णु भगवान् हिरण्यकशिपु दैत्यके बधकरनेकी प्रतिज्ञाकरतेभये ३२। ३४ फिर विष्णुभगवान् ओंकारको अपना सहायक और सेवा करनेवाला बनाकर हिरण्यकशिपु दैत्यके स्थान में जाते भये सूर्य्य के समान तेजस्वी चन्द्रमाके समान कान्तिवाले आधे मनुष्य और आधे सिंह ऐसे रूपको धारण कर अपने हाथों से उस दैत्यके हाथको पकड़ते भये ३५। ३७ उस समय नृसिंहजी उस दैत्य

शुभ्रां हिरण्यकशिपोःसभाम् ३८ विस्तीर्णांयोजनशतं शतमध्यर्द्धमायताम्। वैहायसीं
क्कामगमां पञ्चयोजनविस्तृताम् ३९ जराशोकक्लमापेतां निष्प्रकम्पांशिवांसुखाम्। वेश्म
हर्म्यवतींरम्यां ज्वलन्तीमिवतेजसा ४० अन्तःसलिलसंयुक्तां विहितांविश्वकर्मणा। दि
व्यरत्नमयैर्वृक्षैः फलपुष्पप्रदैर्युताम् ४१ नीलपीतसितश्यामैः कृष्णैर्लोहितकैरपि। अव
तानैस्तथागुल्मैर्मञ्जरीशतधारिभिः ४२ सिताभ्रघनसङ्काशा प्लवन्तीवव्यदृश्यत। रश्मि
वतीभास्वराच दिव्यगन्धमनोरमा ४३ सुसुखानचदुःखासा नशीतानचधर्मदा। नक्षुत्
पिपासेग्लानिंवा प्राप्यतांप्राप्नुवन्तिते ४४ नानारूपैरुपकृतां विचित्रैरतिभास्वरैः। स्त
म्भैर्नविभृतासावै शाश्वतीचाक्षयासदा ४५ अतिचन्द्रञ्चसूर्यञ्च शिखिनञ्चस्वयंप्रभा।
सर्वेचकामाःप्रचुरा येदिव्यायेचमानुषाः ४६ रसयुक्तंप्रभूतञ्च भक्ष्यभोज्यमनन्तकम् ४७
पुण्यगंधस्रजश्चात्रनित्यपुष्पफलद्रुमाः। उष्णेशीतानितोयानि शीतेचोष्णानिसंतिच ४८
पुष्पिताग्रामहाशाखाः प्रवालाङ्कुरधारिणः। लतावितानसञ्छन्नानदीषुचसरःसुच ४९
वृक्षान्बहुविधांस्तत्र मृगेन्द्रोदृदृशेप्रभुः। गन्धवन्तिचपुष्पाणि रसवन्तिफलानिच ५०
नातिशीतानिनोष्णानितत्रतत्रसरांसिच। अपश्यत्सर्वतीर्थानि सभायांतस्यसोविभुः ५१
नलिनैःपुण्डरीकैश्च शतपत्रैःसुगन्धिभिः। रक्तैःकुवलयैर्नीलैः कुमुदैःसंवृतानिच ५२ सु

की बड़ी मनोहर और दिव्य सभाको देखतेभये जो सब कामनाओं से युक्त श्वेतवर्ण सौयोजन विस्तृत और पचास योजन चौड़ीथी और आकाशमें चलनेवाली स्वेच्छाचारी सभाभी पांचयोजनकी देखी वह सभा जराशोक ग्लानिसे रहित मंगलयुक्त महा सुखकारी रमणीक स्थान बगीचे आदिकों से शोभित तेजसे प्रकाशमान ऐसी देखने में आई कि उसके भीतर विश्वकर्माके रचेहुए जलाशयों में सुन्दर विहार स्थान बनरहेथे उन सब स्थानों से और रत्नजटित पुष्पों वाले वृक्षोंसे वह सभा शोभायमानथी इसके सिवाय नीले पीले श्वेत और कृष्ण इन वर्णों वाली बेलें और मंजरियों वाले गुच्छे और श्वेत बादलोंसे सुन्दर कान्तिवाली होरहीथी उस दिव्य किरणोंवाली दिव्यगंधियों से सुगन्धित और मनोहर सभामें सुखकी प्राप्ति और दुःखोंका अभावथा वहां घाम शीत क्षुधा तृषा और ग्लानि भी किसी प्रकारकी नथी उसमें दैत्य बैठे हुएथे ३८।४४ आशय यह है कि अनेक रूपों से युक्त विचित्र स्तंभोंवाली चन्द्रमा सूर्य्यादिकोंको अपनी कान्तिसे तिरस्कार करने वाली उत्तम सभा देखी उसी सभामें देवता और मनुष्योंके सब कामसिद्ध होतेभये उस सभामें सुन्दर रसयुक्त भक्ष्य भोज्य पदार्थ भी वर्त्तमान थे ४५।४७ वह सुन्दर सुगन्धित मालाओंसे युक्त नित्यफलने फूलने वाले वृक्षोंसे संकीर्ण भी थी जहाँ गरमीमें शीतल जल और शीतकालमें उष्णजल रहा करता था अंकुर फूल फल पत्ते बेल और गुच्छे इन सबसे आच्छादित हुए अनेक वृक्षभी नदी और सरोवरोंपर स्थित होरहेथे इस प्रकारके अनेक प्रकारके पदार्थों को वह नृसिंहजी देखतेभये सुगंधित पुष्प, रसवाले फल मनोहर अनुकूल जलोंसे युक्तसरोवर और तीर्थभी उससभामें देखेगये ४८।५१ सुगन्धित उत्तम कमलोंके नीले और लालवर्णके पुष्पोंसे आच्छादित सुन्दर कान्तिवाले हंसों स

कान्तैर्धार्तराष्ट्रैश्च राजहंसैश्चसुप्रियः। कारण्डवैश्चक्रवाकैः सारसःकुररैरपि ५३ विमलैः स्फाटिकाभैश्च पाण्डुरैश्चन्दनैर्द्विजैः। बहुहंसोपगीतानि सारसाभिरुतानिच ५४ गन्धवत्यःशुभास्तत्र पुष्टमञ्जरिधारिणीः। दृष्टवान्पर्वताग्रेषु नागपुष्पधरालताः ५५ केतक्यशोकसरलाः पुन्नागतिलकार्जुनाः। चूतानीपाःप्रस्थपुष्पाः कदम्बाबकुलाधवाः ५६ प्रियंगुपाटलावृक्षाःशाल्मल्यःसहरिद्रकाः। सालास्तालास्तमालाश्चपञ्चकाश्चमनोरमाः५७ तथैवान्येऽव्यराजन्त सभायांपुष्पिताद्रुमाः। विद्रुमाश्चद्रुमाश्चैव ज्वलिताग्निसमप्रभाः ५८ स्कन्धवन्तःसुशाखाश्च बहुतालसमुच्छ्रयाः। अर्जुनाशोकवर्णाश्च बहवश्चित्रकाद्रुमाः ५९ वरुणोवत्सनाभश्च पनसाःसहचन्दनैः।नीलाःसुमनसश्चैव निम्बाश्वत्थतिन्दुकाः ६० पारिजाताश्चलोध्राश्च मल्लिकाभद्रदारवः। आमलक्यस्तथाजम्बुलकुचाःशैलबालुकाः ६१ कालीयकाद्रुकालाश्च हिङ्गवःपारियात्रकाः। मन्दारकुन्दलक्काश्च पतङ्गाःकुटजास्तथा ६२ रक्ताःकुरण्टकाश्चैव नीलाश्चागरुभिःसह। कदम्बाश्चैव भव्याश्च दाडिमाबीजपूरकाः ६३ सप्तपर्णाश्चबिल्वाश्च मधुपैरावतास्तथा। अशोकाश्चतमालाश्च नानागुल्मलतावृताः ६४ मधूकाःसप्तपर्णाश्च बहवस्तीरगाद्रुमाः। लताश्चविविधाकाराः पत्रपुष्पफलोपगाः ६५ एतेचान्येचबहवस्तत्र काननजाद्रुमाः। नानापुष्पफलोपेता व्यराजन्तसमन्ततः ६६ चकोराःशतपत्राश्च मत्तकोकिलसारिकाः। पुष्पिताःपुष्पिताग्रैश्च सम्पतन्तिमहाद्रुमाः ६७ रक्तपीतारुणास्तत्र पादपाग्रगताःखगाः। परस्परमवेक्षन्ते प्रहृष्टाजीवजीवकाः ६८ तस्यांसभायांदैत्येन्द्रो हिरण्यकशिपुस्त

शोभित कारंडव चक्रवाक सारस और कुरैया इनसब पक्षियोंसे शोभित श्वेत और नील वर्णवाले अनेक पक्षियोंसे सेवित बहुतसे हंस और सारसोंके शब्दोंसे मनोहर वहां सरोवर देखे इनके विशेष सुन्दरसुगन्धित उत्तम मंजरीवाली पुष्पोंसे भरीहुई लताओंको पर्वतके शिखरोंपर देखतेभये५४।५५ केतकी, अशोक वृक्ष, सरल, पुन्नाग, तिलक, अर्जुन, आम, कदंबराज छोटेकदंब, बकायन, धवमाल, कागिनी;पाटलवृक्ष,संभालू,हल्दी, साल,ताल, और तमाल इनमनोहर वृक्षोंकोभी देखतेभये५६।५७ इसीप्रकार उस सभामें पुष्पोंवाले अनेक वृक्षोंकी और अग्निकी समान प्रज्वलित रत्नोंकी अत्यन्त कांति भी देखतेभये ५८ फालसा, चन्दन, नींब, टेटूवृक्ष,कल्पवृक्ष, लोध, मल्लिका, देवदारु,आंवला, जमालगोटा, एलुआ, पारिजातक,आक, कुंद, पतंग, कूड़ा, रक्त कोरटा, अगर,कदंब,अनार,बिजौरा, सातला,बेलगिरी. अशोकवृक्ष तमाल,अनेकप्रकारके गुच्छेलता, महुआ और अन्यबहुत प्रकारके वृक्ष उससभाके बनमें प्रकाशित होरहेथे और फूलेहुए वृक्षोंके ऊपर बैठेहुए चकोरमदोन्मत्त कोकिल और सारिका यहपक्षी उत्तम २ बोलियां बोलरहेथे वृक्षोंकी डालियोंपर बैठेहुए लालपीले आदि अनेक बर्णके जीवजीवक पक्षी परस्पर प्रसन्न कलोल करतेहुए देखते भये ५९। ६८ उस सभामें बैठाहुआ हिरण्यकशिपु दैत्य सैकड़ों स्त्रियोंके साथ विहार करताथा और विचित्रवस्त्राभूषणोंसे शोभित मणि

दा। स्त्रीसहस्रैःपरिवृतो विचित्राभरणाम्बरः ६९ अनर्घ्यमणिवज्रार्चिशिखाज्वलितकु
ण्डलः। आसीनश्चासनेचित्रे दशनल्वप्रमाणतः ७० दिवाकरनिभेदिव्ये दिव्यास्तर
णसंस्तृते। दिव्यगन्धवहस्तत्र मारुतःसुसुखोववौ ७१ हिरण्यकशिपुर्दैत्य आस्तेज्व
लितकुण्डलः। उपचेरुर्महादैत्यं हिरण्यकशिपुंतदा ७२ दिव्यताननेनगीतानि जगुर्ग
न्धर्वसत्तमाः। विश्वाचीसहजन्याच प्रम्लोचेत्यभिविश्रुता ७३ दिव्याथसौरभेयीच स
मीचीपुञ्जिकस्थली। मिश्रकेशीचरम्भाच चित्रलेखाशुचिस्मिता ७४ चारुकेशीघृता
चीच मेनकाचोर्वशीतथा। एताःसहस्रशश्चान्या नृत्यगीतविशारदाः ७५ उपतिष्ठन्त
राजानं हिरण्यकशिपुंप्रभुम्। तत्रासीनंमहाबाहुं हिरण्यकशिपुंप्रभुम् ७६ उपासन्तदि
तेःपुत्राः सर्वेलब्धवरास्तथा। तमप्रतिमकर्माणं शतशोऽथसहस्रशः ७७ बलिर्विरोचन
स्तत्र नरकःपृथिवीसुतः। प्रह्लादोविप्रचित्तिश्च गविष्ठश्चमहासुरः ७८ सुरहन्तादुःख
हन्ता सुनामासुमतिर्वरः। घटोदरोमहापार्श्वः क्रथनःकठिनस्तथा ७९ विश्वरूपःसुरू
पश्च स्वबलश्चमहाबलः। दशग्रीवश्चबालीच मेघवासामहासुरः ८० घटास्यःकम्पन
श्चैव प्रजनश्चेन्द्रतापनः । दैत्यदानवसंघास्ते सर्वेज्वलितकुण्डलाः ८१ स्रग्विणोवा
ग्मिनःसर्वे सदैवचरितव्रताः। सर्वेलब्धवराःशूराः सर्वेविगतमृत्यवः ८२ एतेचान्येचब
हवो हिरण्यकशिपुंप्रभुम्। उपासन्तिमहात्मानं सर्वेदिव्यपरिच्छदाः ८३ विमानैर्विवि
धाकारैर्भ्राजमानैरिवाग्निभिः। महेन्द्रवपुषःसर्वे विचित्राङ्गदबाहवः ८४ भूषिताङ्गादितेः

हीरे आदिसे प्रकाशित कुंडलों समेत वह हिरण्यकशिपु दैत्य चारसौ हाथ प्रमाण के विचित्र सूर्य्य की समान कान्तिवाले सुन्दर बिछौने बिछेहुए आसनपर जहाँ बैठताथा वहाँ दिव्यसुगन्धि की बहानेवाली सुखस्पर्शयुक्त सुन्दरवायु चलरहीथी ६९।७१ उस स्थानपर प्रकाशित कुंडलधारी हिरण्यकशिपु दैत्य विराजमानथा उस दैत्यके पाससेवाकरतेहुए अनेक गंधर्व गीतोंको गातेथे और विश्वाची, सहजन्या, प्रम्लोचा, सौरभेयी, समीची,पुंजिकस्थली,मिश्रकेशी,रंभा चित्रलेखा,शुचिस्मिता,चारुकेशी,घृताची, मेनका और उर्वशी यहहज़ारों नाचने और गानेवाली अप्सरा उस हिरण्यकशिपु राजाकी उपासना करतीथीं ७२। ७६ और वरोंको प्राप्तकियेहुए हज़ारों दैत्यभी उस हिरण्य कशिपु दानवकी उपासना करतेथे ७७ बालि, विरोचन, नरकासुर,प्रह्लाद, विप्रचित्ति, महान गविष्ठनाम दैत्य, सुरहंता, दुःखहंता, सुनामा, सुमति, घटोदर, महापार्श्व, क्रथन, कठिन, विश्वरूप सुरूप, स्वबल, महाबल, दशग्रीव, बाली, मेघवासा घटास्य, कंपन,प्रजन,इन्द्रतापन,उज्ज्वल कुंडलोंवाले यहसब दानव उससभामें जथा बनाकर बैठतेथे ७८। ८१ यहसब दानव माला पहरेहुए बैठतेथे और सबोंने वरलब्धकर रक्खेथे सब शूर बीर मृत्युसे रहितथे यह और अन्य बहुतसे दानव उस हिरण्यकशिपुकी उपासना करतेथे ८२। ८३ यहसब दैत्य अनेक २ प्रकारके विचित्र विमानोंमें बैठकर प्रकाशित होतेभये उससभामें बैठेहुए पर्व्वतके समान दैत्योंकेरूप कंचनके समान प्रकाशितथे ऐसे २ यहसब दानव हिरण्यकशिपुकी सेवाकरतेथे इसं प्रकारसे स्थितहोनेवाले सोने

पुत्रास्त मुपासन्तसर्वशः । तस्यांसभायान्दिव्यायामसुराःपर्वतोपमाः ८५ हिरण्यवपुषः सर्वे दिवाकरसमप्रभाः । नश्रुतन्नैवदृष्टंहि हिरण्यकशिपोर्यथा ८६ ऐश्वर्यंदैत्यसिंहस्य यथातस्यमहात्मनः । कनकरजतचित्रवेदिकायां परिहृतरत्नविचित्रवीथिकायाम् । सददर्शमृगाधिपःसभायां सुरचितरत्नगवाक्षशोभितायाम् ८७ कनकविमलहारविभूषिताङ्गं दितितनयंसमृगाधिपोददर्श । दिवसकरमहाप्रभालसंतन्दितिजसहस्रशतैर्निषेव्यमाणम् ८८ ॥ इति श्रीमत्स्यपुराणेषष्ट्यधिकशततमोऽध्यायः १६० ॥

(सूत उवाच) ततोदृष्ट्वामहात्मानं कालचक्रमिवागतम् । नरसिंहवपुच्छन्नं भस्मच्छन्नमिवानलम् १ हिरण्यकशिपोःपुत्रः प्रह्लादोनामवीर्यवान् । दिव्येनचक्षुषासिंहमपश्यद्देवमागतम् २ तंदृष्ट्वारुक्मशैलाभमपूर्वान्तनुमाश्रितम् । विस्मितादानवाःसर्वे हिरण्यकशिपुश्चसः ३ (प्रह्लाद उवाच) महाबाहो ! महाराज ! दैत्यानामादिसम्भव ! । न श्रुतंनचनोदृष्टं नारसिंहमिदंवपुः ४ अव्यक्तप्रभवन्दिव्यं किमिदंरूपमागतम् । दैत्यान्तकरणंघोरं संशतीवमनोमम ५ अस्यदेवाःशरीरस्थाः सागराःसरितश्चयाः । हिमवान्पारियात्रश्च येचान्येकुलपर्वताः ६ चन्द्रमाश्चसनक्षत्रैरादित्यैर्वसुभिःसह । धनदोवरुणश्चैव यमःशक्रःशचीपतिः ७ मरुतोदेवगन्धर्वा ऋषयश्चतपोधनाः । नागायक्षाःपिशाचाश्च राक्षसाभीमविक्रमाः ८ ब्रह्मादेवःपशुपतिर्ललाटस्थाभ्रमन्तिवै । स्थावराणिचसर्वाणि जङ्गमानितथैवच ९ भवांश्चसहितोऽस्माभिः सर्वैर्दैवगणैर्वृतः । विमानशतसङ्कीर्णा तथैवभवतःसभा १० सर्वंत्रिभुवनंराजन् ! लोकधर्माश्चशाश्वताः । दृश्यन्तेनारसिंहेऽ

चाँदीके तख़्तोंपर बैठेहुए हिरण्यकशिपुको रत्नोंकी झरोखोंवाली सभामें वह नृसिंहजी देखते भये ८४ । ८७ अर्थात् उत्तम स्वर्णहारोंसे भूषित अंग सूर्य्यकी समान कान्तिवाले हज़ारों दैत्योंसे सेवित हुए हिरण्यकशिपुको नृसिंहजी देखतेभये ८८ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांषष्ट्यधिकशततमोऽध्यायः १६० ॥

सूतजी कहते हैं कि इसके अनन्तर हिरण्यकशिपु दैत्यकापुत्र प्रह्लादमहात्मा कालचक्रके समान आयेहुए नृसिंहशरीरमें ऐसे छुपाहुआथा जैसेकि राखमें अग्नि छिपीहुई रहती है वही उस आयेहुए नृसिंह शरीरधारी विष्णु भगवान्को देखताभया १ । २ और उसनृसिंह शरीरमें प्राप्तहुए विष्णु भगवान्को सब दानवलोग देखकर आश्चर्य्यको प्राप्तहोतेभये यह देखकरप्रह्लाद अपनेपिता हिरण्यकाशिपुसे कहताभया ३ हे महावाहो हे महाराज हमने यह नृसिंहशरीर कभी देखा है न सुनाहै यह अव्यक्त उत्पत्ति वाला कैसादिव्यरूपहै मुझको यह घोररूप दैत्योंका नाशकरनेवाला दीखताहै ४।५ इसके शरीरमें देवतास्थित रहतेहैं समुद्र और नदियांभी इसके शरीरमें स्थितहैं हिमवान् पारियात्र आदिक बड़े २ पर्व्वत, चन्द्रमा, नक्षत्र, आदित्य, वसु, कुवेर, बरुण, यम, इन्द्र, मरुद्गण, देवता, गन्धर्व, ऋषि, नाग, यक्ष, पिशाच, राक्षस, ब्रह्मा और शिव यह सब देवता इसके मस्तकमें स्थितहुए भ्रमत

स्मिंस्तथेदमखिलंजगत् ११ प्रजापतिश्चात्रमनुर्महात्मा ग्रहाश्चयोगश्चमहीरुहाश्च।
उत्पातकालश्चधृतिर्मतिश्च रतिश्चसत्यञ्चतपोदमश्च १२ सनत्कुमारश्चमहानुभावो
विश्वेचदेवाऋषयश्चसर्वे। क्रोधश्चकामश्चतथैवहर्षो धर्म्मश्चमोहःपितरश्चसर्वे १३
प्रह्लादस्यवचःश्रुत्वा हिरण्यकशिपुःप्रभुः। उवाचदानवान्सर्वान् गणांश्चसगणाधिपः
१४ मृगेन्द्रोगृह्यतामेष अपूर्वसत्वमास्थितः। यदिवासंशयःकश्चिद् बध्यतांवनगोचरः
१५ तेदानवगणाःसर्वे मृगेन्द्रंभीमविक्रमम्। परिक्षिपन्तोमुदितास्त्रासयामासुरोजसा १६
सिंहनादंविमुच्याथ नरसिंहोमहाबलः। बभञ्जतांसभांसर्वां व्यादितास्यइवान्तकः १७
सभायांभज्यमानायां हिरण्यकशिपुःस्वयम्। चिक्षेपास्त्राणिसिंहस्य रोषाद्व्याकुललोच
नः १८ सर्वास्त्राणामथज्येष्ठं दण्डमस्त्रंसुदारुणम्। कालचक्रंतथाघोरं विष्णुचक्रंतथाप
रम् १९ पैतामहंतथात्युग्रं त्रैलोक्यदहनंमहत्। विचित्रामशनीञ्चैव शुष्कार्द्रंचाशनिद्व
यम् २० रौद्रंतथोग्रंशूलञ्च कङ्कालंमुसलंतथा। मोहनंशोषणंचैव सन्तापनविलापनम्
२१ वायव्यंमथनंचैव कापालमथकैङ्करम्। तथाप्रतिहतांशक्तिं क्रौञ्चमस्त्रंतथैवच २२
अस्त्रंब्रह्मशिरश्चैव सोमास्त्रंशिशिरंतथा। कम्पनंशतनञ्चैव त्वाष्ट्रञ्चैवसुभैरवम् २३
कालमुद्गरमक्षोभ्यं तपनञ्चमहाबलम्। संवर्तनंमादनञ्च तथामायाधरंपरम् २४ गान्ध
र्वमस्त्रंदयितमसिरत्नंचनन्दकम्। प्रस्वापनंप्रमथनं वारुणंचास्त्रमुत्तमम्। अस्त्रंपाशुपत
ञ्चैव यस्याप्रतिहतागतिः २५ अस्त्रंहयशिरश्चैव ब्राह्ममस्त्रंतथैवच। नारायणास्त्रमैन्द्र

हैं और स्थावर जंगम भूत तुम हम और अन्य सब देवता और सैकड़ों विमानोंवाली आपकी सभा
इसप्रकारसे सब त्रिलोकीभर मुझको इस नृसिंहशरीरमें देखपड़तीहै ६। ११ और प्रजापति मनु
ग्रह योग उत्पात काल धृति मति रति सत्य तप दम सनत्कुमार विश्वेदेवा सबऋषि काम क्रोध हर्ष
धर्म मोह और पितर यह सब इसके शरीरमें स्थितहैं १२। १३ हिरण्यकशिपु दैत्य प्रह्लादके इस
वचनको सुनकर सब दानवों से बोला कि इसअपूर्व सिंहको पकड़नाचाहिये और पकड़ेजानेमें कुछ
सन्देहहोय तो इसको मारडालो १४। १५ यह सुनकर वह महाबली दानव उन नृसिंह रूपको अपने
बल और शस्त्रोंकरके त्रास देतेभये १६ तब महाबलवाले नृसिंहजी सिंहनादकरके उससभाको फाड़
डालतेभये जब वह सभा फटकर सब ओरसे फूट टूटगई तब क्रोधसे व्याकुल नेत्रवाला वह हिरण्यकशिपु
दैत्य नृसिंहजीपर अपने शस्त्रोंको छोड़ताभया १७। १८ प्रथम सब अस्त्रोंमें श्रेष्ठ दारुण दण्ड
अस्त्र छोड़ा, कालचक्रछोड़ा, विष्णुअस्त्रछोड़ा त्रिलोकीके दग्धकरनेमें समर्थ ब्राह्मअस्त्रछोड़ा शुष्क और
आर्द्र दोनों प्रकारके वज्रअस्त्रोंको छोड़ा भयंकर शूल मूसल मोहन शोषण अस्त्र, संतापन, विलापन,
वायव्य, कापाल, और कैंकर इननामोंवाले बहुतसे अस्त्रछोड़े शक्तिछोड़ी क्रौंच अस्त्रछोड़ा १९। २२
ब्रह्मशिरअस्त्र, सोमास्त्र, शिशिरअस्त्र, कंपनअस्त्र, त्वाष्ट्रअस्त्र कालमुद्गरअस्त्र, तपनअस्त्र, सम्बर्त्तन
अस्त्र, मादनअस्त्र, मायाधारी गान्धर्व अस्त्र २३। २४ प्रस्वापन और प्रमथनअस्त्र नहीं हतहोनेवाला
पाशुपत अस्त्र हयशिरअस्त्र, ब्राह्मअस्त्र, नारायणअस्त्र, ऐन्द्रअस्त्र, सार्पअस्त्र, पैशाचअस्त्र, शोषदअस्त्र,

ञ्च सार्पमस्त्रंतथाद्भुतम् २६ पैशाचमस्त्रमाजितं शोषदंशामनंतथा । महाबलंभावनंच
प्रस्थापनविकम्पने २७ एतान्यस्त्राणिदिव्यानि हिरण्यकशिपुस्तदा । असृजन्नरसिंह
स्य दीप्तस्याग्नेरिवाहुतिम् २८ अस्त्रैःप्रज्वलितैःसिंहमावृणोदसुरोत्तमाः। विवस्वान्धर्म्म
समये हिमवन्तमिवांशुभिः २९ सह्यमर्षानिलोद्धूतो दैत्यानांसैन्यसागरः । क्षणेनप्लावया
मास मैनाकमिवसागरः ३० प्रासैःपाशैश्चखड्गैश्च गदाभिर्मुसलैस्तथा । वज्रैरशनिभि
श्चैव साग्निभिश्चमहाद्रुमैः ३१ मुद्गरैर्भिन्दिपालैश्च शिलोलूखलपर्वतैः। शतघ्नीभिश्च
दीप्ताभिर्दण्डैरपिसुदारुणैः ३२ तेदानवाःपाशगृहीतहस्ता महेन्द्रतुल्याशनिवज्रवेगाः।
समन्ततोऽभ्युद्यतबाहुकायाः स्थितास्त्रिशीर्षाइवनागपाशाः ३३ सुवर्णमालाकुलभूषिता
ङ्गाः पीतांशुकाभोगविभाविताङ्गाः । मुक्तावलीदामसनाथकक्षा हंसाइवाभान्तिविशालप
क्षाः ३४ तेषांतुवायुप्रतिमौजसांवै केयूरमौलीवलयोत्कटानाम् । तान्युत्तमाङ्गान्यभितो
विभान्ति प्रभातसूर्यांशुसमप्रभाणि ३५ क्षिपद्भिरुग्रैर्ज्वलितैर्महाबलैर्महास्त्रपूगैःसुसमा
वृतोबभौ । गिरिर्यथासन्ततवर्षिभिर्घनैः कृतान्धकारान्तरकन्दरोद्रुमैः ३६ तैर्हन्यमानो
ऽपिमहास्त्रजालैर्महाबलैर्दैत्यगणैःसमेतैः । नाकम्पताजौभगवान्प्रतापस्थितप्रकृत्याहि
मवानिवाचलः ३७ सन्त्रासितास्तेननृसिंहरूपिणा दितेःसुताःपावकतुल्यतेजसा । भग्ना
द्विचेलुःपवनोद्धुताङ्गा यथोर्मयःसागरवारिसम्भवाः ३८ ॥

इति श्रीमत्स्यपुराणे एकषष्ट्यधिकशततमोऽध्यायः १६१ ॥

शामनअस्त्र महाबलवाला भावनअस्त्र प्रस्थापन अस्त्र, और विकंपन अस्त्र इन सब अस्त्रोंको हिरण्यकशिपु
दैत्य नृसिंहजी के ऊपर ऐसे छोड़ताभया जैसेकि देदीप्तअग्निमें आहुति छोड़ीजाती हैं
२५ । २८ और जैसे गरमीके समयमें सूर्य्य अपनी किरणोंसे चन्द्रमाको आच्छादित करदेताहै इसी
प्रकार यहसब महाबली दैत्य अपनेअस्त्रोंसे नृसिंहजीको आच्छादित करदेतेभये क्रोधसेयुक्त वह दैत्यों
की सेनारूपी समुद्र नृसिंहजीको क्षणभर में ऐसे आच्छादित करदेताभया जैसे कि मैनाक पर्व्वतको
समुद्र डुबोदेताहै २९।३० भाले फांसी खड्ग गदा मूसल वज्र अशनि बड़े२ वृक्ष मुग्दर गोफियायंत्र,
शिला ऊखलके पत्थर, भुशुंडी, दारुणदंडआदि अनेक प्रकारके अस्त्रशस्त्रों से नृसिंहजीको आच्छादित
करते भये ३१ । ३२ हाथों में फांसी लियेहुए महाकठोर वज्रोंको हाथों में लेके नृसिंहजी के
चारोंओर वह दैत्य ऐसे खड़े होजातेभये जैसे कि नाग फाँस फैल रहेहों ३३ सुवर्णकी मालाओं से
विभूषित अङ्ग पीतरक्त वर्णयुक्त मोतियों की विस्तृत मालावाले वह दैत्य ऐसे शोभितहुए जैसे कि
बिशाल पंखोंवाले हंसोंके समूह फैलेहों वायुके समान बेगवाले उन दैत्योंके बाजूबन्द और मुकुट
आदि आभूषण ऐसे शोभित होतेभये जैसेकि प्रातःकालके सूर्य्यकी किरणें शोभित होती हैं ३४ । ३५
महाबलवाले उन दैत्योंके फेंकेहुए उज्ज्वल२ अस्त्रोंसे नृसिंहजी ऐसेआच्छादित होगये जैसेकि निरन्तर
बर्षाकरनेवाले मेघोंसे पर्व्वतमें अन्धकार छारहाहो ३६ उनमहाबली दानवोंके तीक्ष्ण अस्त्रों
से हन्यमानहुए नृसिंहजी हिमवान् पर्व्वतके समान कुछेकभी चलायमान नहींहुए ३७ तबअग्नि

(सूत उवाच) खराःखरमुखाश्चैव मकराशीविषाननाः । ईहामृगमुखाश्चान्ये वराहमुखसंस्थिताः १ बालसूर्यमुखाश्चान्ये धूमकेतुमुखास्तथा । अर्द्धचन्द्रार्द्धवक्त्राश्च अग्निदीप्तमुखास्तथा २ हंसकुक्कुटवक्त्राश्चव्याधितास्याभयावहाः। सिंहास्यालेलिहानाश्च काकगृध्रमुखास्तथा ३ द्विजिह्वकावक्त्रशीर्षास्तथोल्कामुखसंस्थिताः । महाग्राहमुखाश्चान्ये दानवाबलदर्पिताः ४ शैलसंवर्ष्मणस्तस्यशरीरेशरवृष्टिभिः । अबध्यस्यमृगेन्द्रस्य नव्यथाञ्चक्रुराहवे ५ एवंभूयोऽपरान्घोरानसृजन्दानवेश्वराः।मृगेन्द्रस्योपरिक्रुद्धाः निश्वसन्तइवोरगाः ६ तेदानवशराघोरा दानवेन्द्रसमीरिताः । विलयंजग्मुराकाशे खद्योताइवपर्वते ७ ततश्चक्राणिदिव्यानि दैत्याःक्रोधसमन्विताः । मृगेन्द्रायासृजन्नाशु ज्वलितानिसमन्ततः ८ तैरासीद्गगनंचक्रैः सम्पतद्भिरितस्ततः । युगान्तेसम्प्रकाशद्भिश्चन्द्रादित्यग्रहैरिव ९ तानिसर्वाणिचक्राणि मृगेन्द्रेणाशमात्मना । ग्रस्तान्युदीर्णानितदा पावकार्चिःसमानिवै १० तानिचक्राणिवदनं विशमानानिभान्तिवै । मेघोदरदरीष्वेव चन्द्रसूर्यग्रहाइव ११ हिरण्यकशिपुर्दैत्यो भूयःप्रासृजदूर्जिताम् । शक्तिंप्रज्वलितांघोरां धौतशस्त्रतडित्प्रभाम् १२ तामापतन्तींसंप्रेक्ष्य मृगेन्द्रःशक्तिमुज्ज्वलाम् । हुङ्कारेणैवरौद्रेण बभञ्जभगवांस्तदा १३ रराजभग्नासाशक्तिर्मृगेन्द्रेणमहीतले । सविष्फुलिङ्गाज्वलिता महोल्केवदिवश्च्युता १४ नाराचपङ्क्तिःसिंहस्य प्राप्तारेजेविदूरतः । नीलोत्पलपलाशानांमालेवोज्ज्वलदर्शना १५ सगर्जित्वायथान्यायं विक्रम्यचयथासुखम् । तत्सैन्यमप्ता

के समान तेजवाले नृसिंहजी से दुःखित हुए दानव भयसे ऐसे काँपते भये जैसे कि वायुसे समुद्र की लहरें हिलती हैं ३८ ॥ इति श्रीमत्स्यपुराणभाषाटीकायामेकषष्ट्यधिकशततमोऽध्यायः १६१ ॥

सूतजीबोले कि गधेके समान मुखवाले मकर मत्स्य सर्प मृग शूकर धुएं, अर्द्धचन्द्रमा, ज्वलित अग्नि, हंस, मुर्गा फटेहुए मुखवाले सिंह, काक, गिद्ध, और शृगाल इनसबके समान बिकरालमुख वाले इनमें कोई दोमुखे कोई चौमुखे ऐसे बलके अभिमानी दानव उननृसिंहजीके शरीर पर पाषाणोंकी वर्षा करनेलगे और बाणोंकी भी वर्षाकरी परन्तु उनपाषाणादिकोंसे नृसिंहजी को कुछभी पीड़ा न हुई १ । ५ इसके पीछे वह दानव सर्प के समान क्रोधकरके नृसिंहजी पर नानाप्रकारके अन्यबाणोंकी वर्षाकरते भये वह सब बाणआकाशहीमें ऐसे नष्टहोगये जैसे कि पर्व्वतपर पटबीजना पक्षी नहीं दिखाई देता ६।७ फिर क्रोधसे मूर्च्छितहुए दानव नृसिंहजी के सन्मुख जलतेहुए चक्रोंको फेंकतेभये उन गिरतेहुए चक्रोंसे आकाश ऐसा ददीप्त विदितहुआ जैसे कि प्रलयकालमें चन्द्रमा और सूर्य्य देदीप्त होजाते हैं ८ । ९ फिर अग्निके समान ज्वलितहुए वह चक्र नृसिंहजीने ऐसे ग्रसलिये जैसे कि सूर्य्य और चन्द्रमाको बादलढकलेते हैं इसके पीछे हिरण्यकशिपुदैत्य बिजलीके समान महाघोर शक्तिको नृसिंहजीके ऊपर फेंकताभया १० । १२ उस आतीहुई शक्तिको देखकर नृसिंहजीने अपनी हुंकारही से तोड़डाला १३ नृसिंहजीसे टूटीहुई वह शक्ति पृथ्वीमें गिरकर ऐसी शोभितहुई जैसे कि स्वर्गसे टूटकर कोई तारागिराहो १४ और वह नृसिंहजी के शरीर

रितवान् तृणाग्राणिवमारुतः १६ ततोऽश्मवर्षंदैत्येन्द्रा व्यसृजन्तनभोगताः। नगमात्रैः
शिलाखण्डैर्गिरिशृङ्गैर्महाप्रभैः १७ तदश्मवर्षंसिंहस्य महन्मूर्द्धनिपातितम् । दिशोदश
विकीर्णावै खद्योतप्रकराइव १८ तदाश्मौघैर्दैत्यगणाः पुनःसिंहमरिन्दमम् । छादयांच
क्रिरेमेघा धाराभिरिवपर्वतम् १९ नचतंचालयामासुर्दैत्यौघादेवसत्तमम् । भीमवेगोऽच
लश्चेष्टं समुद्रइवमन्दरम् २० ततोऽश्मवर्षेविहते जलवर्षमनन्तरम् । धाराभिरक्षमात्रा
भिःप्रादुरासीत्समन्ततः २१ नभसःप्रच्युताधारास्तिग्मवेगाःसमन्ततः । आवृत्यसर्वतो
व्योम दिशश्चोपदिशस्तथा २२ धारादिविचसर्वत्र वसुधायाञ्चसर्वशः । नस्पृशन्तिच
तादेवं निपतन्तोऽनिशंभुवि २३ बाह्यतोववृषुर्वर्षं नोपरिष्टाच्चववृषुः । मृगेन्द्रप्रतिरूपस्य
स्थितस्ययुधिमायया २४ हतेऽश्मवर्षेतुमुले जलवर्षेचशोषिते । सोऽसृजद्दानवोमायाम
ग्निवायुसमीरिताम् २५ महेन्द्रस्तोयदैःसार्द्धं सहस्राक्षोमहाद्युतिः। महतातोयवर्षेण शम
यामासपावकम् २६ तस्यांप्रतिहतायांतु मायायांयुधिदानवः । असृजत्घोरसङ्काशंतम
स्तीव्रंसमन्ततः २७ तमसासंवृतेलोके दैत्येष्वात्तायुधेषुच । स्वतेजसापरिवृतो दिवाक
रइवाबभौ २८ त्रिशाखांभ्रुकुटीञ्चास्य ददृशुर्दानवारणे । ललाटस्थांत्रिशूलाङ्कां गङ्गां
त्रिपथगामिव २९ ततःसर्वासुमायासु हतासुदितिनन्दनाः । हिरण्यकशिपुंदैत्यं विवर्णाः

में लगीहुई बाणों की पंक्ति दूरसे ऐसी शोभायमानहुई जैसे कि नीलेकमलके पत्तोंकीमाला शोभित
होरही हो १५ इन सबबातोंके पीछे अच्छेप्रकारसे गर्जकर दानवोंकीसेनाको सुखपूर्व्वक फाड़डालते
भये तब सब दैत्य आकाशमें खड़ेहोकर बड़े२ पत्थरोंको फेंकतेभये उससमय नृसिंहजीके मस्तकपर
पड़ेहुए पत्थरोंके द्वारा दशोंदिशा पूरितहोगईं और वह पत्थर पटबीजनों के समान शोभितहोगये
१६।१८ फिर दैत्योंने पत्थरोंकी वर्षासे नृसिंहजीको ऐसा आच्छादित करदिया जैसेकि बर्षाकी धाराओंसे
पर्व्वत आच्छादित होजाताहै १९ तात्पर्य्य यहहै कि वह दैत्य नृसिंहजीको चलायमान ऐसे
नहीं करसके जैसेकि बेगवान् समुद्र मंदराचल पर्व्वतको नहीं चलायमान करसक्ताहै २० इसप्रकार
से जब पर्व्वत और पाषाणादि की वर्षाहोचुकी तब नृसिंहजी के मारनेके निमित्त चारोंओर जलों की
धारा वर्षती भई २१ उनआकाशसे गिरतीहुई जलोंकी धाराओंसे सब दिशाओं समेत आकाशपूरित
होगया वह आकाशसे पृथ्वीमें गिरतीहुई जलकी धारा युद्धमें मायाके प्रभावसे नृसिंहजीको स्पर्श
भी नहीं करसकीं जब इसप्रकारसे रणमें पत्थरोंकी वर्षा नष्टहुई और जलोंकी धारभी शोखीगईं
तब हिरण्यकशिपु दैत्य बायुसे मिलीहुई मायाकी अग्निको छोड़ता भया तब इन्द्र उस अग्निको
बड़े जलोंकी वर्षासे शान्तकर देताभया जब युद्धमें वह मायाभी नष्टहोगई तब वह दैत्य महाघोर
और तीक्ष्ण अन्धकार को छोड़ताभया २२।२७ उस अन्धकारसे सब जगत् व्याप्तहोगया दैत्य लोग
अपने हाथोंमें शस्त्रोंको ग्रहणकरनेलगे उस समयनृसिंहजी अपने तेजसे सूर्य्यके समान प्रकाशित
होतेभये २८ और नृसिंहजीकी तीन भृकुटियोंको सब दानव देखतेभये और मस्तक त्रिशूलके चिह्न
वाली गंगाके तुल्य देखते भये २९ जब सब माया नष्टहोगई उससमय सबदैत्यदुःखितहोकर हिरण्य

शरणंययुः ३० ततःप्रज्वलितःक्रोधात् प्रदहन्निवतेजसा । तस्मिन्क्रुद्धेतुदैत्येन्द्र तमोभूत
मभूज्जगत् ३१ आवहःप्रवहश्चैव विवहोऽथह्युदावहः । परावहःसंवहश्च महाबलपरा
क्रमाः ३२ तथापरिवहःश्रीमानुत्पातभयशंसनाः । इत्येवंक्षुभिताःसप्त मरुतोगगनेचराः
३३ येग्रहाःसर्वलोकस्य क्षयेप्रादुर्भवन्तिवै । तेसर्वेगगनेदृष्टा व्यचरन्तयथासुखम् ३४
अन्यङ्गतेचाप्यचरन्मार्गोनिशिनिशाचरः । सग्रहःसहनक्षत्रैराकापतिररिन्दमः ३५ विवर्णं
तांचभगवान् गतोदिविदिवाकरः । कृष्णंकबन्धंचतथालक्ष्यतेसुमहद्दिवि ३६ अमुञ्चच्चा
र्चिषांवृन्दं भूमिवृत्तिर्विभावसुः । गगनस्थश्चभगवानभीक्ष्णंपरिदृश्यते ३७सप्तधूम्रनिभा
घोराः सूर्य्यादिविसमुत्थिताः । सोमस्यगगनस्थस्य ग्रहास्तिष्ठन्तिशृङ्गगाः ३८ वामेनदक्षि
णेचैव स्थितौशुक्रबृहस्पती । शनैश्चरोलोहिताङ्गो ज्वलनाङ्गसमद्युती ३९ समंसमधिरोहं
तः सर्वेतेगगनेचराः । शृङ्गाणिशनकैर्घोरा युगांतावर्तिनोग्रहाः ४० चंद्रमाश्चसनक्षत्रैर्ग्रहैः
सहतमोनुदः । चराचरविनाशाय रोहिणींनाभ्यनंदतः ४१ गृह्यतेराहुणाचंद्र उल्काभिरभि
हन्यते । उल्काःप्रज्वलिताश्चंद्रे विचरंतियथासुखम् ४२ देवानामपियोदेवःसोऽप्यवर्षतशो
णितम् । अपतन्गगनादुल्का विद्युद्रूपामहास्वनाः ४३ अकालेचद्रुमाःसर्वे पुष्पंतिचफलं
तिच । लताश्चसफलाःसर्वा येचाहुर्दैत्यनाशनम् ४४ फलैःफलान्यजायंत पुष्पैःपुष्पंतथै
वच । उन्मीलंतिनिमीलंति हसंतिचरुदंतिच ४५ विक्रोशंतिचगम्भीरा धूमयंतिज्वलं
तिच । प्रतिमाःसर्वदेवानां वेदयन्तिमहद्भयम् ४६ आरण्यैःसहसंसृष्टा ग्राम्याश्चमृगप

कशिपुकी शरणमें जातेभये तब क्रोधसे ज्वलितहुआ हिरण्यकशिपु अपने तेजसे सबको दग्धकरने
के समानहोता[illegible] उस समयपरभी सब जगत्में अन्धकार होजाताभया ३१ और आवह १ प्रवह २
विवह ३ उदावह ४ परावह ५ संवह ६ और परिवह, इननामोंवाले उत्पातके भयके सूचक सातों
वायु महाक्षुभितहोकर आकाशमें चलतेभये ३२ । ३३ और जो ग्रहवलय प्रलयकालमें देखते हैं
वह सब ग्रहआकाशमें सुखपूर्वक विचरते भये ३४ रात्रिमें भूतप्रेतादिक बिचरनेलगे आकाशमें
नक्षत्रों समेत चन्द्रमाका ग्रहण होताभया ३५ सूर्य्य भगवान्का तेजहतहोगया और हिरण्यकशिपु
को बिनाशिरवाला कालापुरुष आकाशमें दीखताभया ३६ सूर्यका वर्णधूलके समान धूसरहोता
भया और धुएंके समान घोरआकारवाले सातसूर्य्य आकाशमें दीखतेभये शुक्र और बृहस्पति यह
दोनों बाएंसे दक्षिण ओरको आकर स्थितहोते भये शनैश्चर और मंगल यह दोनों एकही स्थानमें
स्थितहोते भये अर्थात्शनैश्चर और मंगलका योगहो जाताभया सबग्रह दारुण और क्रूरदृष्टिसे
ऐसे विपरीत होजातेभये जैसे कि प्रलयके समयमें होजाते हैं चन्द्रमाभी अन्य २ नक्षत्र और ग्रहों
के संगस्थितहोता भया और रोहिणीके संग आनन्द नहीं करताभया राहुके साथ चन्द्रमाका ग्रहण
होनेलगा प्रज्वलितहुई उल्का चन्द्रमामें दीखनेलगीं देवेन्द्र रुधिरकी वर्षाकरनेलगा आकाशसे विद्यु-
त्पातहोनेलगा बड़ा भारी कड़कड़ाहटका शब्दहोनेलगा ३७ । ४३ बिनाऋतुके सबवृक्षफूलते और
फलतेभये दैत्योंके नाशकी सूचक लताफूलती और फलती भईं ४४ फलोंसे फल उत्पन्नहुए और

क्षिणः। चक्रुःसुभैरवंतत्र महायुद्धमुपस्थितम् ४७ नद्यश्चप्रतिकूलानि वहन्तिकलुषोद
काः। नप्रकाशन्तिचदिशो रक्तरेणुसमाकुलाः ४८ वानस्पत्योनपूज्यन्ते पूजनार्हाःकथञ्च
न। वायुवेगेनहन्यन्ते भज्यन्तेप्रणमन्तिच ४९ यदाचसर्वभूतानां छायानपरिवर्तते। अ
पराह्णगतेसूर्ये लोकानांयुगसंक्षये ५० तदाहिरण्यकशिपोर्दैत्यस्योपरि वेश्मनः। भाण्डा
गारेयुधागारे निविष्टमभवन्मधु ५१ असुराणांविनाशाय सुराणांविजयायच। दृश्यन्तेवि
विधोत्पाता घोराघोरनिदर्शनाः ५२ एतेचान्येचबहवो घोरोत्पाताःसमुत्थिताः। दैत्येन्द्र
स्यविनाशाय दृश्यन्तेकालनिर्मिताः ५३ मेदिन्यांकम्पमानायां दैत्येन्द्रेणमहात्मना। म
हीधरानागगणा निपेतुरमितौजसः ५४ विषज्वालाकुलैर्वक्त्रैर्विमुञ्चन्तोहुताशनम्। चतुः
शीर्षाःपञ्चशीर्षाः सप्तशीर्षाश्चपन्नगाः ५५ वासुकिस्तक्षकश्चैव कर्कोटकधनञ्जयौ। ए
लामुखःकालिकश्च महापद्मश्चवीर्यवान् ५६ सहस्रशीर्षानागोवै हेमतालध्वजःप्रभुः।
शेषोऽनन्तोमहाभागो दुष्प्रकम्प्यःप्रकम्पितः ५७ दीप्तान्यन्तर्जलस्थानि पृथिवीधरणा
निच। तदाक्रुद्धेनमहता कम्पितानिसमन्ततः ५८ नागास्तेजोधराश्चापि पातालतल
चारिणः। हिरण्यकशिपुर्दैत्यस्तदासंस्पृष्टवान्महीम् ५९ सन्दष्टौष्ठपुटःक्रोधाद्वाराहइव
पूर्वजः। नदीभागीरथीचैव सरयूःकौशिकीतथा ६० यमुनात्वथकावेरी कृष्णवेणीचनिम्न
गा। सुवेणाचमहाभागा नदीगोदावरीतथा ६१ चर्मण्वतीचासिन्धुश्चतथानदनदीपतिः।

पुष्पोंसे पुष्पउत्पन्न होतेभये देवताओंकी मूर्त्ति आंखोंको खोलने मूंदनेलगीं हँसने रोने और गंभीर
शब्दको भी करनेलगीं सब मूर्त्तियोंमें धुंआ निकलताभया और जलनेभी लगीं यह सब महाउत्पात
होतेभये ४५। ४६ वनके मृगपक्षियोंके साथ ग्रामवासी मृगपक्षी आदिक मिलकर परस्परमें महान्
युद्ध करतेभये ४७ नदियोंके जलमलिनहोकर बहनेलगे रक्तधूलिसे आच्छादितहुईं सब दिशाप्रका-
शितहोती भईं ४८ पूजने के योग्य वृक्षोंकी पूजा नहीं होतीभई बड़े २ वृक्षवायुके वेगसे टूट २ कर
गिरतेभये ४९ जिस समय सब भूतमात्रकी छायाढलगई ऐसे तीसरे पहरके समय विष्णु भगवान्
हिरण्यकशिपुके ऊपरके वरतनके और शस्त्रोंके मकानोंमें प्रवेश करतेभये तब देवताओंकी विजय
और दैत्योंके नाशके अर्थघोर दारुण उत्पात दीखतेभये कालके रचेहुए यह कहेहुए उत्पात और
अन्यबहुतसे उत्पात हिरण्यकशिपु दैत्यके नाशके निमित्त दीखतेभये ५०। ५३ परन्तु जिससमय
उसमहात्मा दैत्यने सब पृथ्वी कंपाई उससमय अतुलपराक्रमी नागोंके गणकांपनेलगे चार शिर-
वाले पांचशिरवाले और सातशिरोंवाले सर्प ज्वालासे व्याकुल मुखोंकरके अपनी विष अग्निको
छोड़ते भये ५४। ५५ और वासुकि, तक्षक, कर्कोटक, धनंजय, एलामुख, कालिक, महापद्म और
हज़ारों मुखवाले महाप्रभु शेषनाग यह सब सर्प कांपतेहुए जलके भीतर स्थितहोते भये पर्वतज्व-
लितहुए उससमय क्रोधयुक्त महातेजवाले हिरण्यकशिपु दैत्यने पातालवासी महातेजस्वी सर्पोंको
भी कंपादिया फिर वह दैत्य क्रोधसे ओष्ठचबाकर पृथ्वीको स्पर्शकरताभया इसकेपीछे गंगा, सरयू,
कौशिकी, यमुना, कावेरी, कृष्णवेणी, सुवेणा, गोदावरी, चर्मण्वती, सिन्धु, समुद्र, शोणतीर्थ, सन्दर

कमलप्रभवश्चैव शोणोमणिनिभोदकः ६२ नर्मदाशुभतोयाच तथावेत्रवतीनदी । गोमतीगोकुलाकीर्णा तथापूर्वसरस्वती ६३ महीकालमहीचैव तमसापुष्पवाहिनी । जम्बुद्वीपंरत्नबटं सर्वरत्नोपशोभितम् ६४ सुवर्णप्रकटञ्चैव सुवर्णाकरमण्डितम् । महानदश्चलौहित्यं शैलकाननशोभितम् ६५ पत्तनंकोशकरणं ऋषिवीरजनाकरम् । मागधाश्चमहाग्रामा मुण्डाःशुङ्गास्तथैवच ६६ सुह्ममल्लाविदेहाश्च मालवाकाशिकोसलाः । भवनंवैनतेयस्य दैत्येन्द्रेणाभिकम्पितम् ६७ कैलासशिखराकारं यत्कृतंविश्वकर्मणा । रक्ततोयोमहाभीभो लौहित्योनामसागरः ६८ उदयश्चमहाशैल उच्छ्रितःशतयोजनम् । सुवर्णवेदिकः श्रीमान् मेघपङ्क्तिनिषेवितः ६९ भ्राजमानोऽर्कसदृशैर्जातरूपमयैर्द्रुमैः । शालैस्तालैस्तमालैश्च कर्णिकारैश्चपुष्पितैः ७० अयोमुखश्चविख्यातः सर्वतोधातुमण्डितः । तमालवनगन्धश्च पर्वतोमलयःशुभः ७१ सुराष्ट्राश्चसबाह्लीकाः शूराभीरास्तथैवच । भोजाः पाण्ड्याश्चवङ्गाश्च कलिङ्गास्ताम्रलिप्तकाः ७२ तथैवोड्राश्चपौण्ड्राश्च वामचूडाःसकेरलाः । क्षोभितास्तेनदैत्येन सदेवाश्चाप्सरोगणाः ७३ अगस्त्यभवनञ्चैव यदगम्यङ्कृतंपुरा । सिद्धचारणसङ्घैश्च विप्रकीर्णमनोहरम् ७४ विचित्रनानाविहगं सुपुष्पितमहाद्रुमम् । जातरूपमयैःशृङ्गैर्गगनंविलिखन्निव ७५ चन्द्रसूर्यांशुसङ्काशैः सागराम्बुसमावृतैः । विद्युत्वान्सर्वतःश्रीमानायतःशतयोजनम् ७६ विद्युतांयत्रसङ्घाता निपात्यन्तेनगोत्तमे । ऋषभःपर्वतश्चैव श्रीमान्वृषभसंज्ञितः ७७ कुंजरःपर्वतःश्रीमानगस्त्यस्यगृहंशुभम् । विशालाक्षश्चदुर्धर्षः सर्पाणामालयःपुरी ७८ तथाभोगवतीचापि दैत्येन्द्रेणाभिकम्पिताः । महासेनोगिरिश्चैव पारियात्रश्चपर्वतः ७९ चक्रवांश्चगिरिश्रेष्ठो वाराहश्चैवप

जलवाली नर्मदानदी, वेत्रवती, गोमती, सरस्वती, कालमही, पुष्पबाहिनीनदी, जंबूद्वीप रत्नबटु सुवर्ण प्रकटकरने वालाद्वीप, लौहित्यपर्व्वत, बहुतसे ऋषि, बहुतसे शूरवीर जनोंवाला नगर, मगध देशके ग्राम, मुण्डी देश, विदेह, मालवा, काशिकोसल और गरुड़का भुवन यह सब देश और नदी पर्व्वतादिकभी उस महाबली दैत्यने कंपितकरादिये ५६।६७ विश्वकर्माने कैलासके शिखरके समान आकारवाला रक्त जलसे पूर्ण लौहित्यनाम सागररचाथा वह समुद्र और शिलाओंवाला सौ १०० योजन ऊंचामेघ की पंक्तियोंसे शोभित सूर्य्य चन्द्रमाकी समानकान्तिवाले वृक्षोंसे सेवित शालतमाल और प्रफुल्लित अमलतास इन वृक्षोंसे युक्त उदयाचल पर्व्वत ६८।७० सब धातुमय अधोमुख पर्व्वत बड़ी सुगन्धवाला मलयाचल पर्व्वत ७१ सौराष्ट्रदेश, वाह्लीक, शूर, आभीर, भोज, पाण्ड्य, कंक, कलिंग, ताम्रलिप्तक, उड़िया, पौण्ड्र, बामचूड़ बंगाला और केरल, यह सबदेशभी उसदैत्यने क्षुभितकर दिये और देवताओं समेत अप्सराओंके गण, अगम्य सिद्धचारणोंसे सेवित बड़ा मनोहर अगस्त्यजी का भुवन ७२।७४ बड़ा विचित्र अनेक पुष्पपक्षी और वृक्षोंसे युक्त सुवर्ण के उन्नत शिखरों वाला चन्द्र सूर्य्यकीसी कान्तिवाले समुद्रके जलोंसे आवृत सौ१००योजन ऊंचा विद्युत्समूहोंवाला श्रीमान्ऋषभ पर्व्वत जो वृषभ नामसे प्रसिद्धहै ७५।७७ कुंजर पर्व्वत, दुर्धर्ष विशालाक्षपर्व्वत, भो-

र्वतः। प्राग्ज्योतिषपुरञ्चापि जातरूपमयंशुभम् ८० यस्मिन्वसतिदुष्टात्मा नरकोनाम दानवः। विशालाक्षश्चदुर्द्धर्षो मेघगम्भीरनिस्वनः ८१ षष्टिस्तत्रसहस्राणि पर्वतानांद्विजोत्तमाः। तरुणादित्यसङ्काशो मेरुस्तत्रमहागिरिः ८२ यक्षराक्षसगन्धर्वैर्नित्यंसेवितकन्दरः। हेमगर्भोमहाशैलस्तथा हेमसखोगिरिः ८३ कैलासश्चैवशैलेन्द्रो दानवेन्द्रेणकम्पिताः। हेमपुष्परसक्षेत्रं तेनवैखानसंसरः ८४ कम्पितंमानसञ्चैव हंसकारण्डवाकुलम्। त्रिशृङ्गपर्वतश्चैव कुमारीचसरिद्वरा ८५ तुषारचयसञ्छन्ना मन्दरश्चापिपर्वतः। उशीरबिन्दुश्चगिरिश्चन्द्रप्रस्थस्तथाद्रिराट् ८६ प्रजापतिगिरिश्चैव तथापुष्करपर्वतः। देवाभ्रपर्वतश्चैव यथावैरेणुकोगिरिः ८७ क्रौञ्चःसप्तर्षिशैलश्च धूम्रवर्णश्चपर्वतः। एते चान्येचगिरयो देशाजनपदास्तथा ८८ नद्यःससागराःसर्वाः सोऽकम्पयतदानवः। कपिलश्चमहीपुत्रो व्याघ्रवांश्चैवकम्पितः ८९ खेचराश्चसतीपुत्राः पातालतलवासिनः। गणस्तथापरोरौद्रो मेघनामाङ्कुशायुधः ९० ऊर्ध्वगोभीमवेगश्च सर्वएवाभिकम्पिताः। गदीशूलीकरालश्च हिरण्यकशिपुस्तदा ९१ जीमूतघनसङ्काशो जीमूतघननिस्वनः। जीमूतघननिर्घोषो जीमूतइववेगवान् ९२ देवारिर्दितिजोवीरो नृसिंहंसमुपाद्रवत्। समुत्पत्यततस्तीक्ष्णैर्मृगेन्द्रेणमहानखैः ९३ तदोङ्कारसहायेन विदार्यनिहतोयुधि। महीचकालश्चशशिनभश्च ग्रहाश्चसूर्यश्चादिशश्चसर्वाः। नद्यश्चशैलाश्चमहार्णवाश्च गताः प्रसादन्दितिपुत्रनाशात् ९४ ततःप्रमुदितादेवा ऋषयश्चतपोधनाः। तुष्टुवुर्नामभिर्दि

गवती नाम दैत्यों की पुरी, महासेन पर्व्वत, पारियात्र पर्व्वत, चक्रवान् पर्व्वत, उत्तमवाराह पर्व्वत- और सुवर्णका प्राग्ज्योतिषपुर यहसब भी उसने कंपादिये ७८।८० और जहां दुष्टात्मा नरकासुर दानव रहताथा वह दुर्धर्ष विशालाक्ष पर्व्वत कहाताहै ८१ वहां साठ अन्यभी पर्व्वतहैं सूर्य्यकी समान कान्तिवाला सुमेरुपर्व्वत है जिसकी कन्दराओंको यक्ष राक्षस और गन्धर्व यह प्रतिदिन सेवते हैं हेमगर्भपर्व्वत, हेमसख पर्व्वत, और कैलास यहसब पर्व्वत उस हिरण्यकशिपु दानवने कंपायमान किये वैखानस सरोवर, हंस और कारंडव पक्षियों से सेवित मानस समुद्र, त्रिशृंग पर्व्वत, कुमारीनदी, मंदराचल पर्व्वत, उशीरविन्दु सरोवर, चन्द्रप्रस्थ पर्व्वत, प्रजापतिपर्व्वत, पुष्कर पर्व्वत, देवाभ्र पर्व्वत, रेणुकपर्वत, क्रौंचपर्व्वत, सप्तऋषियों का पर्व्वत, धूम्रवर्ण पर्व्वत, यहसब पर्व्वत अन्य देश नदी समुद्र और सबलोक भी उसने कँपाये और आकाशमें विचरनेवाले सती के पुत्र पातालबासी जन ऊर्ध्वग और भीमवेग इत्यादिक शिवजीके गणभी उसने कंपित किये इसके अनन्तर हिरण्यकशिपु दैत्यगदा और त्रिशूलकोधारण करताभया८२।९१ दोनों शस्त्रोंको लेकर मेघकीसी कान्तियुक्त मेघकेही समान गर्जनेवाला मेघही के समान वेगवाला देवताओंका शत्रु वह दैत्य नृसिंहजी के सन्मुख दौड़ताभया फिर ॐकारकी सहायवाले नृसिंहजी कूदके अपने पैने २ नखोंकरके उस हिरण्यकशिपु दैत्य के शरीरको फाड़कर उसको मारडालतेभये उस हिरण्यकशिपु दैत्यके नाशहोजानेके समयमें पृथ्वीकाल चन्द्रमा आकाश ग्रह सूर्य्य सबदिशा नदी पर्व्वत और सबसमुद्र यह सबप्रसन्न

व्यैरादिदेवंसनातनम् ९५ यत्त्वयाविहितंदेव ! नारसिंहमिदंवपुः । एतदेवार्चयिष्यन्ति
परावरविदोजनाः ९६ (ब्रह्मोवाच) भवान्ब्रह्माचरुद्रश्च महेन्द्रोदेवसत्तमाः ! । भवान्
कर्ताविकर्ताच लोकानांप्रभवाप्ययः ९७ पराञ्चसिद्धाञ्चपरञ्चदेवंपरञ्चमन्त्रंपरमंहविश्च ।
परञ्चधर्मंपरमञ्चविश्वं त्वामाहुरग्र्यंपुरुषंपुराणम् ९८ परंशरीरंपरमञ्चब्रह्म परञ्चयोगंपर
माञ्चवाणीम् । परंरहस्यंपरमाङ्गतिञ्च त्वामाहुरग्र्यंपुरुषंपुराणम् ९९ एवंपरस्यापिपरंप
दंयत् परंपरस्यापिपरञ्चदेवम् । परंपरस्यापिपरञ्चभूतन्त्वामाहुरग्र्यंपुरुषंपुराणम् १००
परंपरस्यापिपरंनिधानं परंपरस्यापिपरंपवित्रम् । परंपरस्यापिपरंचदान्तन्त्वामाहुरग्र्यं
पुरुषंपुराणम् १०१ एवमुक्त्वातुभगवान् सर्वलोकपितामहः । स्तुत्वानारायणंदेवं ब्रह्म
लोकंगतःप्रभुः १०२ ततोनदत्सुतूर्येषु नृत्यन्तीष्वप्सरःसुच । क्षीरोदस्योत्तरंकूलं जगा
महरिरीश्वरः १०३ नारसिंहंवपुर्देवः स्थापयित्वासुदीप्तिमत् । पौराणंरूपमास्थाय प्रय
यौगरुडध्वजः १०४ अष्टचक्रेणयानेन भूतयुक्तेनभास्वता । अव्यक्तप्रकृतिर्देवः स्वस्था
नंगतवान्प्रभुः १०५ ॥ इति श्रीमत्स्यपुराणेद्विषष्ट्यधिकशततमोऽध्यायः १६२ ॥
(ऋषय ऊचुः) कथितंनरसिंहस्य माहात्म्यंविस्तरेणच । पुनस्तस्यैवमाहात्म्यमन्य
द्विस्तरतोवद १ पद्मरूपमभूदेतत् कथंहेममयंजगत् । कथञ्चवैष्णवीसृष्टिःपद्ममध्येऽभव
त्पुरा २ (सूत उवाच) श्रुत्वाचनरसिंहस्य माहात्म्यंरविनन्दनः । विस्मयोत्फुल्लनयनः

होतेभये ९३।९४ इसके पीछेप्रसन्नहुए देवता ऋषि और गन्धर्वादिक सब मिलकर उस सनातनदेव विष्णु भगवान् की इन दिव्यनामोंकरके स्तुतिकरतेभये ९५ हे देव आपने जो यह नृसिंह शरीर धारण कियाहै इसको परावरके ज्ञाता विद्वान्लोग पूजते हैं ९६ ब्रह्माजीबोले-तुम्हीं ब्रह्माहोरुद्रहो,महेन्द्रहो, देवताओं में उत्तमहो कर्त्ता और विकर्त्ता भी आपहो लोकों के उत्पन्न करनेवालेहो आपहीको परमसिद्ध और परमदेव कहते हैं आपहीको परममंत्र और परमहवि कहते हैं परमधर्म परमयोग और पुराण पुरुषभी कहते हैं९७।९८आपको परमशरीर परब्रह्म परमवाणी परमरहस्य और परमगतिभी कहते हैं तुम परम्पद के भी परमपदहो परमके भी परमदेव हो इसी से आपको पुराणपुरुष कहते हैं ९९।१०० परमपरानिधानहो परमपवित्रहो और परमश्रेष्ठहो १०१ ब्रह्माजी तो इसप्रकारसे स्तुतिको करके ब्रह्मलोकको प्राप्त होतेभये १०२ फिर अनेकप्रकारके बाजे बजनेलगे अप्सरा नृत्य करनेलगीं तब विष्णु भगवान क्षीरसागर के उत्तरतटपर जातेभये वहां अपने नृसिंह शरीरको स्थापित करके अपने पुराणपुरुषपने का रूप धारण करके गरुड़गामी विष्णु भगवान् अष्टचक्रयुक्त बड़ी कान्तिवाले उत्तमरथमें बैठकर अपने स्थानको जातेभये १०३।१०५ ॥

इति श्रीमत्स्यपुराणभाषाटीकायां द्विषष्ट्यधिकशततमोऽध्यायः १६२ ॥

ऋषियों ने पूछा हे सूतजी आपने नृसिंहजीका जो माहात्म्यकहा उस्से अभी हमारी तृप्तिनहींहुई इसी हेतुसे उसी भगवान् के अन्य माहात्म्यको विस्तारपूर्वक कहिये १ प्रथम यह जगत् सुवर्ण के कमलमें कैसे उत्पन्नहुआ कमलके मध्यमें विष्णुभगवान् की सृष्टि कैसेहोतीभई इसको आप हमको

पुनःपप्रच्छकेशवम् ३ (मनुरुवाच) कथंपाद्मेमहाकल्पे तवपद्ममयंजगत् । जलार्णवगतस्येह नाभौजातंजनार्दन ! ४ प्रभावात्पद्मनाभस्य स्वपतःसागराम्भसि । पुष्करेच कथंभूता देवाःसर्षिगणाःपुरा ५ एनमाख्याहिनिखिलं योगंयोगविदाम्पते ! । शृण्वतस्तस्यमेकीर्तिंनतृप्तिरुपजायते ६ कियताचैवकालेन शेतेवैपुरुषोत्तमः । कियन्तंवास्वपितिच कोऽस्यकालस्यसम्भवः ७ कियताचाथकालेन ह्युत्तिष्ठतिमहायशाः । कथञ्चोत्थाय भगवान् सृजतेनिखिलंजगत् ८ केप्रजापतयस्तावदासन्पूर्वंमहामुने ! । कथंनिर्मितवांश्चैव चित्रंलोकंसनातनम् ९ प्रथमेकार्णवेशून्ये नष्टस्थावरजङ्गमे । दग्धदेवासुरनरे प्रनष्टोरगराक्षसे १० नष्टानिलानलेलोके नष्टाकाशमहीतले । केवलंगह्वरीभूते महाभूतविपर्यये ११ विभुर्महाभूतपतिर्महातेजामहाकृतिः । आस्तेसुरवरश्रेष्ठो विधिमास्थाययोगवित् १२ शृणुयांपरयाभक्त्या ब्रह्मन्नेतदशेषतः । वक्तुमर्हसिधर्मिष्ठ ! यशोनारायणात्मकम् १३ श्रद्धयाचोपविष्टानां भगवन् ! वक्तुमर्हसि । (मत्स्य उवाच) नारायणस्ययशसः श्रवणेयातवस्पृहा १४ तद्वंश्यान्वयभूतस्य न्याय्यंरविकुलर्षभ ! । शृणुष्वादिपुराणेषु वेदेभ्यश्चयथाश्रुतम् १५ ब्राह्मणानाञ्चवदतां श्रुत्वावैसुमहात्मनाम् । तथाचतपसादृष्ट्वा बृहस्पतिसमद्युतिः १६ पराशरसुतःश्रीमान् गुरुर्द्वैपायनोऽब्रवीत् । तत्तेऽहंकथयिष्यामि यथाशक्तियथाश्रुति १७ यद्विज्ञातुंमयाशक्यमृषिमात्रेणसत्तमाः । कःसमु

समझकर कहो-सूतजीबोले वहसूर्य्यकापुत्रमनु नृसिंहजीके माहात्म्यको सुनकर अत्यन्त आश्चर्य्य करके विष्णुभगवान्से फिर पूछनेलगा अर्थात् २।३ मनुनेकहा हेजनार्दनजी जलार्णवमें प्राप्तहुए आपकी नाभिमें प्रथम पाद्मकल्पके मध्य कमलसे कैसे जगत् उत्पन्नहुआ ४ प्रथम समुद्रमें शयनकरने वाले पद्मनाभ विष्णुभगवान्से उत्पन्नहुए कमलमें देवता और ऋषियों के गण कैसे उत्पन्नहुए ५ हे योगविदाम्पते इस संपूर्ण योगको आप वर्णनकीजिये आपकी कीर्त्तिके सुननेसे मेरी तृप्तिनहींहोतींहै ६ कितने कालमें विष्णुभगवान् शयन करते हैं और कितने कालतक निद्रामें सोते हैं इनके कालकी उत्पत्ति कौनसी है ७ कितने कालमें विष्णुभगवान् शयनसे उठते हैं और उठकर किस प्रकारसे इस जगत्को रचते हैं ८ रचनाके समय प्रजापति कौनहोताहै विचित्र सनातन लोकको कैसे रचतेभये ९ जब स्थावर जंगम जीवनष्टहोगये तब एकार्णव जलही जल रहजाताहै देवता दैत्य और मनुष्य यह सब भस्महोजाते हैं पृथ्वी अप् तेज वायु और आकाश यह पांचों महाभूत विपर्य्यय होजाते हैं उस समय महाभूतपति महातेजस्वी और वड़ी आकृतिवाले योगवित् विष्णुभगवान्ही अपनी क्रियाको प्राप्तहोकर शेष रहजाते हैं इससब कथाको मैं सुनना चाहताहूं आप इस नारायण के यशको कहनेके योग्य हैं १०।१३ हे भगवन् मुझे सुननेकी बड़ी श्रद्धा पूर्व्वक इच्छा है मनुजी के इस श्रद्धायुक्त वचनको सुनकर मत्स्यजीबोले हे सूर्य्यवंशावतंसमनुजी तेरी इच्छा नारायण के यशके सुननेमें हुईहै यहवड़ी योग्यहै आदि पुराणोंमें जैसाकि वेदोंसे श्रवण हुआ है उसको सुनो १४।१५ बड़े २ उत्तममहात्मा ब्राह्मणोंसे तपके प्रभाववाले पराशरके पुत्र बृहस्पतिके समान ते-

त्सहतेज्ञातुं परंनारायणात्मकम् १८ विश्वायनस्ययद्ब्रह्मा नवेदयतितत्त्वतः । तत्कर्म्मे
विश्ववेदानां तद्रहस्यंमहर्षिणाम् १९ तमीज्यंसर्वयज्ञानां तत्तत्त्वंसर्वदर्शिनाम् । तदध्या
त्मविदांचिन्त्यं नरकंचविकर्मिणाम् २० अधिदैवञ्चयद्दैवमधियज्ञंसुसंज्ञितम् । तद्भूतम
धिभूतञ्च तत्परंपरमर्षिणाम् २१ सयज्ञोवेदनिर्दिष्टस्तत्तपःकवयोविदुः । यःकर्ताकारको
बुद्धिर्मनःक्षेत्रज्ञएवच २२ प्रणवःपुरुषःशास्ता एकश्चेतिविभाव्यते । प्राणःपञ्चविधश्चै
व ध्रुवअक्षरएवच २३ कालःशाकश्चयन्ताच द्रष्टास्वाध्यायएवच । उच्यतेविविधैर्देवः स
एवायंनतत्परम् २४ सएवभगवान्सर्वं करोतिविकरोतिच । सोऽस्मान्कारयतेसर्वान्
सोऽत्येतिव्याकुलीकृतान् २५ यतामहेतमेवाद्यन्तमेवेच्छामनिर्वृताः । योवक्तायच्चवक्तव्यं
यच्चाहन्तद्ब्रवीमिवः २६ श्रूयतेयच्चवैश्राव्यं यच्चान्यत्परिजल्प्यते । याःकथाश्चैववर्तन्ते
श्रुतयोवाथतत्पराः २७ विश्वंविश्वपतिर्यश्च सतुनारायणःस्मृतः । यत्सत्यंयदमृतमक्ष
रंपरंयत् यद्भूतंपरममिदंचयद्भविष्यत् । तत्किञ्चिच्चरमचरंयदस्ति चान्यत् तत्सर्वंपुरुष
वरःप्रभुःपुराणः २८ ॥ इति श्रीमत्स्यपुराणेत्रिषष्ट्यधिकशततमोऽध्यायः १६३ ॥

(मत्स्य उवाच) चत्वार्याहुःसहस्राणि वर्षाणान्तुकृतंयुगम् । तस्यतावच्छतीसन्ध्याद्वि
गुणारविनन्दन १ यत्रधर्मश्चतुष्पादस्त्वधर्मःपादविग्रहःस्वधर्मनिरताःसन्तो जायन्तेयत्र
मानवाः २ विप्राःस्थिताधर्मपरा राजवृत्तौस्थितान्नृपाः । कृष्यामभिरतावैश्याः शूद्राःशुश्रूष

जस्वी वेद व्यासजीने वर्णन किया है वही मैंभी अपनी शक्तिके अनुसार तेरे आगे कहताहूं १६ । १७
प्रथम वेदव्यासजीने ऋषियोंसे कहाकि हेऋषिलोगो उसनारायणके जानने को तो कोईभी समर्थ नहीं
है परन्तु जैसाकि अपनी बुद्धिके अनुसार मैंने जानरक्खा है वहतुमसे कहताहूं १८ विश्वका रचने
वाला ब्रह्माभी उसके तत्त्वको नहीं जानता है क्योंकि वही सब वेदोंका कर्मोंका सर्वदर्शी ऋषियों
का तत्त्व महर्षियोंका रहस्य सबयज्ञोंकापूज्य आत्मज्ञानियोंका चिन्त्य दुष्टकर्मियों का नरक अधिदैव
अधियज्ञ अधिभूत और परम ऋषियोंका परमज्ञान है १९ । २१ वही वेद में कहाहुआ यज्ञ है कवि-
जन उसीको तपकहते हैं वही कर्त्ता कारक और बुद्धि मन क्षेत्रादिका ज्ञाताहै २२ ओंकारहै शिक्षादेने
वाला पुरुष है सदाएक है पांचों प्रकारका प्राणहै ध्रुव अक्षर है २३ कालहै शाकाहै यन्ताहै द्रष्टाहै
स्वाध्यायहै वही देवहै उससे परे कुछ नहीं है २४ वही भगवान् सबकुछ करताहै वही नष्ट करदेताहै
हम सबका करनेवाला है और व्याकुलहुए हमसबोंसे पृथक् रहता है उसीका अब हमसब यत्न
कररहे हैं उसीकी इच्छा करतेहैं २५ । २६ जो सुनाजाता है सुनने के योग्यहै जो कहाजाताहै जो
कथाहै जो श्रुतिहै यह सब उसीमें तत्पर हैं वही विश्व है वही विश्वकापति नारायण कहाजाता
है जो सत्य है परम अमृत है अक्षरहै भूत भविष्य वर्त्तमान है चराचर जगत् है और पुराण
पुरुषब्रह्म है २७ । २८ ॥ इति श्रीमत्स्यपुराणभाषाटीकायांत्रिषष्ट्यधिकशततमोऽध्यायः १६३ ॥

मत्स्यजी कहते हैं कि हे मनु सत्ययुग की संख्या चारहज़ार दिव्यवर्षोंकी है और दिव्य चार २ सौ
वर्षकी संध्या और संध्यांश रहते हैं १ जहां सत्ययुगमें चतुष्पाद धर्मरहताहै और अधम का एकपाद

वःस्थिताः ३ तदासत्यञ्चशौचञ्च धर्मश्चैवविवर्धते। सद्भिराचरितंकर्म क्रियतेख्यायते
चवै ४ एतत्कार्तयुगंवृत्तं सर्वेषामपिपार्थिव ! । प्राणिनांधर्मसञ्ज्ञानामपिवैनीचजन्मना
म् ५ त्रीणिवर्षसहस्राणि त्रेतायुगमिहोच्यते । तस्यतावच्छतीसन्ध्या द्विगुणापरिकीर्त्य
ते ६ द्वाभ्यामधर्मःपादाभ्यां त्रिभिर्धर्मोव्यवस्थितः । यत्रसत्यञ्चसत्वञ्च त्रेताधर्मोविधी
यते ७ त्रेतायांविकृतिंयान्ति वर्णास्त्वेतेनसंशयः । चतुर्वर्णस्यवैकृत्याद्यान्तिदौर्बल्यमा
श्रमाः ८ एषात्रेतायुगगतिर्विचित्रादेवनिर्मिता । द्वापरस्यतुयाचेष्टा तामपिश्रोतुमर्हसि ९
द्वापरन्द्वेसहस्रेतु वर्षाणांरविनन्दन ! । तस्यतावच्छतीसन्ध्या द्विगुणायुगमुच्यते १० त
त्रचार्थपराःसर्वे प्राणिनोरजसाहताः । सर्वेनैष्कृतिकाःक्षुद्रा जायन्तेरविनन्दन ! ११ द्वा
भ्यांधर्मःस्थितःपद्भ्यामधर्मस्त्रिभिरुत्थितः । विपर्ययाच्छनैर्धर्मः क्षयमेतिकलौयुगे १२
ब्राह्मण्यभावस्यततो तथौत्सुक्यंव्यशीर्यते ! व्रतोपवासास्त्यज्यन्ते द्वापरेयुगपर्यये १३
तथावर्षसहस्रन्तु वर्षाणांद्वेशतेअपि । सन्ध्ययासहसंख्यातं क्रूरङ्कलियुगंस्मृतम् १४
यत्राधर्मश्चतुष्पादःस्यात्धर्मःपादविग्रहः।कामिनस्तपसाच्छन्ना जायन्तेतत्रमानवाः १५
नैवातिसात्विकःकश्चिन्नसाधुर्नचसत्यवाक् । नास्तिकाब्रह्मभक्तावा जायन्तेतत्रमानवाः
१६ अहङ्कारगृहीताश्च प्रक्षीणस्नेहबन्धनाः । विप्राःशूद्रसमाचाराः सन्तिसर्वेकलौ

रहताहै वहां सबलोग अपने धर्म में तत्पर सन्तजन उत्पन्न होते हैं २ सब ब्राह्मण उत्तमधर्मोंमें प्रवृत्त
रहते हैं क्षत्रिय राज्यकार्य्य में तत्परहोते हैं शूद्र सेवाकर्ममें आसक्त रहते हैं ३ उसयुगमें सत्य शौच
और धर्म यह बढ़ते हैं और सबलोग श्रेष्ठोंके कियेहुए धर्मोंका आचरण करते हैं और सदैव उसीको
प्रसिद्ध करते हैं ४ हे राजन् यह सत्ययुगका वृत्तान्त सब मनुष्यों के इसीप्रकारका रहता है और नीच
जातियोंके भी अपने धर्मका आचरण होताहै ५ तीनहज़ार दिव्य वर्षोंतक त्रेतायुग रहता है और
छःसौ ६०० वर्षतक उस त्रेताकी संध्या रहती है ६ त्रेतामें अधर्मके दो पाद रहते हैं धर्मके तीनपाद
स्थित रहते हैं उस धर्ममें सत्य और सत्वगुण रहताहै त्रेतायुगमें सबवर्ण विकृतिताको प्राप्तहोजाते
वहां वर्णोंकी विकृति होने से आश्रम महा दुर्बल होजाते हैं ७।८ इसप्रकारकी दैव से रचीहुई त्रेतायुग
की गति वर्णन की है अब हम द्वापरकी चेष्टा वर्णन करते हैं उसको तुम सुनो ९ हेरविनन्दन द्वापर
युगकी संख्यादिव्य दोहज़ार वर्षोंतक रहती है और चारसौ वर्ष तक संध्या रहती है १० इसद्वापर
युगमें सब प्राणी रजोगुण से हत रहते हैं और क्षुद्र होकर तुच्छ होते हैं धर्मके दोपादस्थिर रहते हैं
अधर्मके तीन पाद रहते हैं फिर कलियुगमें शनैः धर्मनष्ट होजाताहै ११।१२ उस द्वापर युगके अन्त
में ब्राह्मणोंका भाव शिथिल होजाता है व्रतोंके उपवास नष्ट होजाते हैं १३ और दिव्य एकहज़ार
वर्षतक क्रूर कलियुग रहताहै और दोसौ २०० वर्षतक उसकी संध्या रहती है १४ उसमें अधर्मके
चार पद रहते हैं और धर्मका एकपाद रहताहै उस युगमें कामीपुरुष उत्पन्न होते हैं १५ उनपुरुषों
में कोई भी अत्यन्त सत्वगुणी नहीं होताहै कोई सत्यवक्ता नहीं होता नास्तिक होकर ब्रह्मकी भक्ति
वाले अहंकारसे युक्तस्नेह न रखने वाले और शूद्रों के आचरण करने वाले ऐसे ब्राह्मण कलियुगमें

युगे १७ आश्रमाणांविपर्यासः कलौसंपरिवर्तते । वर्णानाञ्चैवसन्देहो युगान्तेरविनन्द
न! १८ विद्याद्द्वादशसाहस्त्रीं युगाख्यांपूर्वनिर्मिताम्। एवंसहस्त्रपर्यन्तं तदहोब्राह्ममुच्य
ते १९ ततोऽहनिगतेतस्मिन्सर्वेषामेवजीविनाम्। शरीरनिर्वृत्तिंदृष्ट्वा लोकसंहारबुद्धितः
२० देवतानाञ्चसर्वासां ब्रह्मादीनांमहीपते !। दैत्यानांदानवानाञ्च यक्षराक्षसपक्षिणा
म् २१ गन्धर्वाणामप्सरसां भुजङ्गानाञ्चपार्थिव ! । पर्वतानांनदीनाञ्च पशूनाञ्चैवस
त्तम!२२ तिर्यग्योनिगतानाञ्च सत्वानांकृमिणान्तथा। महाभूतपतिःपञ्च हत्वाभूतानि
भूतकृत् २३ जगत्संहरणार्थाय कुरुतेवैशसंमहत्। भूत्वासूर्यश्चचक्षुषींचाददानो भूत्वावा
युःप्राणिनांप्राणजालम् । भूत्वावह्निर्निर्दहन्सर्वलोकान् भूत्वामेघोभूयउग्रोऽप्यवर्षत् २४

इतिश्रीमत्स्यपुराणेचतुःषष्ट्यधिकशततमोऽध्यायः १६४॥

(मत्स्य उवाच) भूत्वानारायणोयोगी सत्वमूर्तिर्विभावसुः । गभस्तिभिःप्रदीप्ताभिः
संशोषयतिसागरान् १ ततःपीत्वार्णवान्सर्वान् नदीःकूपांश्चसर्वशः । पर्वतानाञ्चसलि
लं सर्वमादायरश्मिभिः २ भित्वागभस्तिभिश्चैव महींङ्गत्वारसातलात्। पातालजलमा
दाय पिबन्नुरसमुत्तमम् ३ मूत्रासृक्क्लेदमन्यच्च यदस्तिप्राणिषुध्रुवम् । तत्सर्वमरविन्दा
क्षमादत्तेपुरुषोत्तमः ४ वायुश्चभगवान्भूत्वा विधुन्वानोऽखिलंजगत्। प्राणापानसमा
नाद्यात् वायुनाकर्षतेहरिः ५ ततोदेवगणाःसर्वे भूतान्येवचयानितु। गन्धोघ्राणंशरीरञ्च
पृथिवींसंश्रितागुणाः ६ जिह्वारसश्चस्नेहश्च संश्रिताःसलिलेगुणाः । रूपंचक्षुर्विपाक

होते हैं १६।१७ कलियुगमें आश्रमोंका विपर्य्यय होकर युगों के अन्तमें वर्णोंकाभी सन्देह होजाता
है १८ प्रथम रची हुई यहद्वादश साहस्री है अर्थात् बारह हज़ार दिव्य वर्षोंमें जब चारो युगव्यतीत
होजाते हैं तब ब्रह्माजीका एकदिन होताहै १९ जब ब्रह्माजी का दिन व्यतीत होजाता है तब सब
प्राणियोंके शरीरकी निवृत्तिको देख ईश्वर संहार करने की इच्छा करता है ब्रह्मादिक सब देवता
दैत्य दानव यक्ष राक्षस पक्षी गन्धर्व अप्सरा सर्प पर्व्वत नदी पशु तिर्य्यग् योनि अर्थात् पशु बिच्छू और
अनेक प्रकारके कृमि इनसबका संहारकर पंचमहाभूतों का भी संहार करदता है २०। २३ इस
प्रकारसे प्रलयहोतीहै तब सबप्राणियोंके नेत्रोंको विष्णुभगवान् सूर्य्यहोकरग्रहणकरलेते हैं वायुहो
कर सबके प्राणोंको शोषणकरलेतेहैं अग्निहोकर सबलोकोंको दग्ध करदेतेहैं और मेघहोकर दारुण
वर्षा करते हैं २४॥ इतिश्रीमत्स्यपुराणभाषाटीकायांचतुःषष्ट्यधिकशततमोऽध्यायः १६४॥

मत्स्यजीकहतेहैं कि योगीश्वरनारायण सूर्य्यहोकर अपनी दीप्तकिरणोंकेद्वारा समुद्रों को शोषलेते
हैं १ फिर सब समुद्र नदी कूप वापी तड़ागादिकोंके जलोंको शोषकर अपनी किरणोंसे पर्व्वतोंके भी
जलोंको ग्रहण करलेतेहैं २ फिर अपनीकिरणोंहीसे पृथ्वीकोफोड़ पातालमें जाकर पातालकेभी रस
कोग्रहण करलेतेहैं और सब प्राणियोंके मूत्र रुधिर और बसा इनसबको शोषण करलेतेहैं ३।४ इस
केपीछे विष्णुभगवान् वायुहोके सबजगत्को कँपाकर प्राण अपान समानादिक सब वायुओं को भी
खैंचलेते हैं ५ और देवतागण भूत गंध नासिका और शरीर यहसब पृथ्वीके आश्रयहोजाते हैं ६ और जिह्वा

श्च ज्योतिरेवाश्रितागुणाः ७ स्पर्शःप्राणश्चचेष्टाच पवनेसंश्रितागुणाः । शब्दःश्रोत्रञ्च
खान्येव गगनेसंश्रितागुणाः ८ लोकमायाभगवता मुहूर्त्तेनविनाशिता । मनोबुद्धिश्चसर्वे
षां क्षेत्रज्ञश्चेतियःश्रुतः ९ तंवरेण्यंपरमेष्ठि हृषीकेशमुपाश्रिताः । ततोभगवतस्तस्य र
श्मिभिःपरिवारितः १० वायुनाक्रम्यमाणासु द्रुमशाखासुचाश्रितः । तेषांसङ्घर्षणोद्भूतः पा
वकःशतधाज्वलन् ११ अदहच्चतदासर्वं वृतःसम्बर्तकोऽनलः । सपर्वतद्रुमान्गुल्मान् ल
तावल्लीस्तृणानिच १२ विमानानिचदिव्यानि पुराणिविविधानिच । यानिचाश्रयणीया
नि तानिसर्वाणिसोऽदहत् १३ भस्मीकृत्वाततःसर्वान् लोकान्लोकगुरुर्हरिः । भूयोनि
र्वापयामास युगान्तेनचकर्म्मणा १४ सहस्रवृष्टिःशतधा भूत्वाकृष्णोमहाबलः । दिव्यतो
येनहविषा तर्पयामासमेदिनीम् १५ ततःक्षीरनिकायेन स्वादुनापरमाम्भसा । शिवेनपु
ण्येनमहीनिर्वाणमगमत्परम् १६ तेनरोधेनसञ्छन्ना पयसांवर्षतोधरा । एकार्णवजली
भूता सर्वसत्वविवर्जिता १७ महासत्वान्यपिविभुं प्रनष्टान्यमितौजसम् । नष्टार्कपवनाका
शे सूक्ष्मेजगतिसंवृते १८ संशोषमात्मनाकृत्वा समुद्रानपिदेहिनः । दग्ध्वासंप्लाव्यचत
थास्वपित्येकःसनातनः १९ पौराणंरूपमास्थाय स्वपित्यमितविक्रमः । एकार्णवजलव्या
पी योगीयोगमुपाश्रितः २० अनेकानिसहस्राणि युगान्येकार्णवाम्भसि । नचैनंकश्चिद
व्यक्तं व्यक्तंवेदितुमर्हति २१ कश्चैवपुरुषोनाम किंयोगःकश्चयोगवान् । असौकियन्तं

रस और स्नेह यहसवगुण जलमें संस्थितहोजाते हैं और रूप चक्षु और विपाक यहसबगुण अग्निके
आश्रयहोजातेहैं ७ और स्पर्श प्राण औरचेष्टा यहगुण वायुके आश्रय होजातेहैं और शब्द श्रोत्र और इ-
न्द्रिय यह आकाशमें स्थितहोजातेहैं ८ भगवान् इसलोकमायाको मुहूर्त्तमात्रमें नष्टकरदेतेहैं तवसब
प्राणियोंके मन बुद्धि और क्षेत्रज्ञ यह सब उस वरेण्यपरमेष्ठी और हृषीकेश विष्णुभगवान्में प्राप्तहो
जाते हैं इसके अनन्तर सूर्य्यनारायणकी किरणोंसे देदीप्त वायुसेहिलतीहुई शाखाके वृक्षोंके आश्रि-
तहुआ अग्नि संकर्षण नामसे और संवर्त्तकनामसे प्रसिद्ध होकर उस प्रलयकालमें सब जगत्को
दग्धकरदेताहै अर्थात् पर्वत वृक्ष गुल्मलता वेल तृण और अनेकप्रकारके दिव्य २ पुरातन विमान
इनसब आश्रयस्थानोंको वह अग्नि दग्ध कर देताहै ९ । १३ लोकोंकेगुरु विष्णुभगवान् सबलोकों
कोदग्धकरके फिरयुगके अन्तमें महाबली विष्णुहोकर अपने सैकड़ों रूपोंसे वर्षाकरके दिव्य अमृत
जलसे पृथ्वीको तृप्तकरदेतेहैं १४ । १५ फिर दूधके समान स्वादुयुक्त जलसे पृथ्वी भरजातीहै उसी
जलकी वर्षासे पृथ्वी आच्छादितहोजाती है और पृथ्वीपरकोईभी जीवशेषनहीं रहताहै सर्वत्र एकार्ण-
वरूप जलही जलहोजाताहै १६ । १७ सबजीव नष्टहोजातेहैं सूर्य्य वायु और आकाश यहसब सूक्ष्म
होकर जगत्मेंही लीनहोजाते हैं उस समय विष्णु भगवान समुद्रोंको भी अपने प्रभावसे शोषणक-
रके अकेलेही सोजाते हैं अर्थात् वह अतुल पराक्रमी महायोगी विष्णु भगवान् उसएकार्णव जलमें
अनेक हज़ार वर्षोंतक शयनकरते हैं तब इस अव्यक्त विष्णुभगवान्को व्यक्तरूपसे अर्थात् प्रकटतासे
कोई भी नहीं जानसक्ताहै १८ । २१ उससमय ऐसा कोई भी नहीं जान सक्ताहै कि यहां कौनपुरुष

कालश्च एकार्णवविधिंप्रभुः २२ करिष्यतीतिभगवानितिकश्चिन्नबुध्यते । नद्रष्टानैवगमितानज्ञातानवपार्श्वगः २३ तस्यनज्ञायतेकिञ्चित्तमृतेदेवसत्तमम् । नमःक्षितिंपवनमपःप्रकाशं प्रजापतिंभुवनधरंसुरेश्वरम् । पितामहंश्रुतिनिलयमहामुनिं प्रशाम्यभूयःशयनंह्यरोचयत् २४ ॥ इति श्रीमत्स्यपुराणे पञ्चषष्ट्यधिकशततमोऽध्यायः १६५ ॥

(मत्स्य उवाच) एवमेकार्णवीभूते शेतेलोकेमहाद्युतिः । प्रच्छाद्यसलिलेनोर्वीं हंसोनारायणस्तदा १ महतोरजसोमध्ये महार्णवसरःसुवै । विरजस्कंमहाबाहुमक्षयंब्रह्मयंविदुः २ आत्मरूपप्रकाशेन तमसासंवृतःप्रभुः । मनःसात्त्विकमाधाय यत्रतत्सत्यमासत ३ याथातथ्यंपरंज्ञानं भूतन्तद्ब्रह्मणापुरा । रहस्यारण्यकोद्दिष्टं यच्चौपनिषदंस्मृतम् ४ पुरुषोयज्ञइत्येतत् यत्परंपरिकीर्तितम् । यश्चान्यःपुरुषाख्यःस्यात्सएषपुरुषोत्तमः ५ येचयज्ञकराविप्रा येचर्त्विजइतिस्मृताः । अस्मादेवपुराभूता यज्ञेभ्यःश्रूयतांतथा ६ ब्रह्माणंप्रथमंवक्त्रादुद्गातारञ्चसामगम् । होतारमपिचाध्वर्युं बाहुभ्यामसृजत्प्रभुः ७ ब्रह्मणोब्राह्मणाच्छंसि प्रस्तोतारञ्चसर्वशः । तौमित्रावरुणौपृष्ठात् प्रतिप्रस्तारमेवच ८ उदरात्प्रतिहर्त्तारं पोतारञ्चैवपार्थिव ! । अच्छावाकमथोरुभ्यान्नेष्टारञ्चैवपार्थिव ! ९ पाणिभ्यामथचाग्नीध्रं सुब्रह्मण्यञ्चजानुतः । ग्रावस्तुतन्तुपादाभ्या मुन्नेतारञ्चयाजुषम् १० एवमेवैषभगवान् षोडशैवजगत्पतिः । प्रवक्तॄन्सर्वयज्ञानामृत्विजोऽसृजदुत्तमान् ११ त

है कौन योगहै कौन योगवान्है यहविष्णुभगवान् कितनेकालतक एकार्णवमें शयनकरेंगे इसबातका द्रष्टा कोई नहीं रहताहै उसी विष्णु भगवान्के विना उनके प्रभावको कोई नहीं जानता है और पृथ्वी जल अग्नि वायु और भुवनोंके अधिपति प्रजापति ब्रह्माजी इन सबोंको नष्टकरके जोशयन करनेकी इच्छाकरता है उस विष्णु भगवान्के अर्थ मेरा नमस्कार है २२ । २४ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांपंचषष्ट्यधिकशततमोऽध्यायः १६५ ॥

मत्स्यजीबोले जब एकार्णवजल होजाताहै उससमय हंसनारायण विष्णु भगवान् उसमें शयन करते हैं १ जो महान् रजोगुणके मध्यमें और महान् जलोंके मध्यमें सोताहै उसको अक्षयब्रह्मकहतेहैं २ वह प्रभु विष्णु भगवान उस तमोगुणको अपने आत्मप्रकाशसे दूरकरतेहैं सत्त्वगुणी मनको प्राप्तहोके सत्यके आश्रयहोजाता है प्रथम ब्रह्माजी ने जो याथातथ्यरहस्य औपनिषदज्ञान और पुरुषयज्ञ वर्णन कियाहै वही यह पुरुषोत्तम भगवान् शयनकरते हैं ३ । ५ और यज्ञों के करने करानेवाले ऋत्विक् ब्राह्मण प्रथम इन्हीं विष्णु भगवान् से उत्पन्नहुए हैं ६ प्रथम सामके जाननेवाले उद्गाता ब्राह्मणको विष्णु भगवान ने उत्पन्न किया फिर होता अध्वर्यु ब्राह्मणोंको अपनी भुजाओं से रचा, प्रस्तोता ब्राह्मणको अपने सब उत्तम अंगोंसे उत्पन्नकिया मित्र और वरुण इन देवताओं को पीठसे उत्पन्नकिया ७ । ८ प्रतिहर्त्ता ब्राह्मणको और पोता ब्राह्मणको उदरसे उत्पन्न किया अच्छावाक और नेष्टा इन ब्राह्मणोंको जांघोंसे उत्पन्न किया, अग्नीध्र ब्राह्मणको हाथों से,सुब्रह्मण्य ब्राह्मणको घोटुओंसे,ग्रावस्तुत ब्राह्मणको चरणों से, यजुर्वेदके ज्ञाता उन्नेता ब्राह्मणको पैरोंकेतले से उ-

देषवैवेदमयः पुरुषोयज्ञसंस्थितः। वेदाश्चैतन्मयाःसर्वे साङ्गोपनिषदक्रियाः १२ स्वपि
त्येकार्णवेचैव यदाश्चर्यमभूत्पुरा। श्रूयन्तांतद्यथाविप्रा ! मार्कण्डेयकुतूहलम् १३ गीर्णो
भगवतस्तस्य कुक्षावेवमहामुनिः। बहुवर्षसहस्रायुस्तस्यैववरतेजसा १४ अटंस्तीर्थप्र
सङ्गेन पृथिवीतीर्थगोचरान्। आश्रमाणिचपुण्यानि देवतायतनानिच १५ देशान्राष्ट्रा
णिचित्राणि पुराणिविविधानिच। जपहोमपरःशान्तस्तपोघोरंसमास्थितः १६ मार्कण्डे
यस्ततस्तस्य शनैर्वक्त्राद्विनिःसृतः। सनिष्क्रामन्नचात्मानं जानीतेदेवमायया १७ निष्क्र
म्याप्यस्यवदनादेकार्णवमथोजगत्। सर्वतस्तमसाच्छन्नं मार्कण्डेयोऽन्ववैक्षत १८ त
स्योत्पन्नंभयन्तीव्रं संशयश्चात्मजीविते। देवदर्शनसंहृष्टो विस्मयंपरमङ्गतः १९ चिन्त
यन्जलमध्यस्थो मार्कण्डेयोऽन्ववैक्षत। किन्तुस्यान्ममचिन्तेयं मोहःस्वप्नोऽनुभूयते २०
व्यक्तमन्यतमोभावस्तेषांसम्भावितोमम। नहीदृशंजगत्क्लेशमयुक्तंसत्यमर्हति २१ न
ष्टचन्द्रार्कपवने नष्टपर्वतभूतले। कतमःस्यादयंलोक इतिचिन्तामवास्थितः २२ ददर्श
चापिपुरुषं स्वपन्तंपर्वतोपमम्। सलिलेऽर्द्धमथोमग्नं जीमूतमिवसागरे २३ ज्वलन्त
मिवतेजोभिर्गोयुक्तमिवभास्करम्। शर्वर्यांजाग्रतमिव भासन्तंस्वेनतेजसा २४ देवन्द्र
ष्टुमिहायातः कोभवानितिविस्मयात्। तथैवसमुनिःकुक्षिं पुनरेवप्रवेशितः २५ सम्प्रवि

त्पन्नकरते भये इस प्रकारसे विष्णु भगवान् सब यज्ञोंके प्रवक्ता सोलह १६ ऋत्विजोंको रचते भये
९। ११ सो यह यज्ञमूर्त्ति विष्णु भगवान् वेदमय हैं और उपनिषदों सहित चारोंवेद इन विष्णु भ-
गवान् में तत्पररहते हैं १२ जिससमय विष्णु भगवान् एकाकीही एकार्णव जलमें शयनकरते भये
उससमय मार्कण्डेयजीने जो आश्चर्यदेखा उसको हमकहते हैं १३ विष्णु भगवान् के भीतरलीन
हुए अर्थात् विष्णुजीसे निगलेहुए मार्कण्डेय मुनि विष्णु भगवान् की कुक्षिमें प्राप्तहो वरके तेजसे
हज़ारोंवर्षतक उसीमें विचरतेभये१४और तीर्थके प्रसंगसे सब पृथ्वीमें विचरतेहुए पवित्रआश्रम और
देवताओंके स्थानोंमें प्राप्तहोताभया १५ फिर विचित्र २ देश राज्य और अनेक प्रकारके नगर इन
सबको देख जपहोम घोरतपादिकों में प्रवृत्तहोकर मार्कण्डेयमुनि शनैः विष्णु भगवान् के मुखसे बा-
हर निकलताभया तब दैवकी मायासे मोहितहो मुखसे बाहर निकलतेही अपनी आत्माको नहीं
जानता भया १६। १७ फिर उस एकार्णव जलमें वह मुनि सब जगत् को तमोगुणसे व्याप्त देख-
ताभया १८ तबतो मार्कण्डेयजीको बड़ाभारी भयउत्पन्न होताभया और अपने जीवनेका भी स-
न्देह होगया जब विष्णु देवके दर्शन करने से परमआश्चर्य को प्राप्तहोगये तब जलके मध्यमें स्थित
हुए मुनि चिन्तवन करनेलगे कि यह मुझको मोहहै अथवा मैं स्वप्न देखरहाहूं १९। २० मैंने यह
क्या आश्चर्य देखाहै यहजगत् ऐसा क्लेशसे युक्त नहीं होवेगा इसप्रकारसे चिन्ताकरतेहुए मार्कण्डेय
मुनि चन्द्रमा सूर्य्य वायु पर्व्वत और पृथ्वी इनसबके नाशकर्त्ता विष्णुभगवान्को उसएकार्णव जल
में देखकर विचारकरनेलगे कि पर्व्वतके समान आधाडूबाहुआ यहकौनहै यह विचारकर उससे कहने
लगे कि अग्नि और सूर्य्यके तेजके समान तेजस्वीरूप तू कौनहै क्यातूभी यहां विष्णुदेवके दर्शन

ष्टःपुनःकुक्षिं मार्कण्डेयोऽतिविस्मयः। तथैवचपुनर्भूयो विजानन्स्वप्नदर्शनम् २६ सतथै
वयथापूर्वं योधरामटतेपुरा। पुण्यतीर्थजलोपेतां विविधान्याश्रमाणिच २७ क्रतुभिर्यज
मानांश्च समाप्तवरदक्षिणान्। अपश्यद्देवकुक्षिस्थान् याजकाञ्छतशोद्विजान् २८ सद्वृ
त्तमास्थिताःसर्वे वर्णाब्राह्मणपूर्वकाः। चत्वारश्चाश्रमाःसम्यग्यथोद्दिष्टामयातव २९ एवं
वर्षशतंसाग्रं मार्कण्डेयस्यधीमतः। चरतःपृथिवींसर्वान्नकुक्ष्यन्तःसमीक्षितः ३० ततः
कदाचिदथवै पुनर्वक्त्राद्विनिःसृतः। गुप्तंन्यग्रोधशाखायां बालमेकंनिरैक्षत ३१ तथैवैका
र्णवजले नीहारेणावृताम्बरे। अव्यग्रःक्रीडतेलोके सर्वभूतविवर्जिते ३२ समुनिर्विस्मया
विष्टः कौतूहलसमन्वितः। बालमादित्यसङ्काशं नाशक्नोदभिवीक्षितुम् ३३ सचिन्तयंस्त
थैकान्ते स्थित्वासलिलसन्निधौ। पूर्वदृष्टमिदंमन्ये शङ्कितोदेवमायया ३४ अगाधसलिले
तस्मिन् मार्कण्डेयःसुविस्मयः। प्लवंस्तथार्त्तिमगमत् भयात्सन्त्रस्तलोचनः ३५ सतस्मै
भगवानाह स्वागतंबालयोगवान्। बभाषेमेघतुल्येन स्वरेणपुरुषोत्तमः ३६ माभैर्वत्स !
नभेतव्यमिहैवायाहिमेऽन्तिकम्। मार्कण्डेयोमुनिस्त्वाह बालन्तंश्रमपीडितः ३७ (मार्क
ण्डेय उवाच) कोमान्नाम्नाकीर्तयति तपःपरिभवन्मम। दिव्यंवर्षसहस्राख्यं धर्षयन्निव
मेवयः ३८ नह्येषवःसमाचारो देवेष्वपिममोचितः। मांब्रह्मापिहिदेवेशो दीर्घायुरितिभा
षते ३९ कस्तपोघोरमासाद्य मामद्यत्यक्तजीवितः। मार्कण्डेयेतिमामुक्त्वा मृत्युमीक्षितुम

करनेको आयाहै ऐसा कहते आश्चर्य्य में भरेहुए वह मुनि फिर विष्णुभगवान्की कुक्षिमें प्रवेशकरगये
२१।२५ तब कुक्षिमें प्रविष्टहुए मार्कण्डेयजी बाहरके दर्शनको आश्चर्य्य से स्वप्नसा मानते
भये और विष्णुके उदरमें पूर्वकेही समान सबपृथ्वीपर विचरतेहुए पवित्र तीर्थों के जलों से युक्त अनेक
उत्तम आश्रमोंमें जातेभये २६। २७ और उसी कुक्षिमें स्थित होतेहुएही यज्ञकरतेहुए यजमानों
को और सैकडों द्विजोंको देखताभया सब ब्राह्मणादिक वर्ण उत्तम वृत्तिमें लगेहुए देखे और चारों
आश्रमोंको भी अपने २ कर्मों में लगाहुआ देखा इसप्रकारसे दिव्य सौ वर्ष पर्य्यन्त मार्कण्डेयजी
विष्णुके उदरहीमें पृथ्वीपर विचरतेभये २८। ३० फिर किसीसमयमें विष्णुके उदरसे निकलकर
एक वटवृक्षकी शाखापर किसी बालकको देखतेभये ३१ सबभूतों से रहित लोकमें अकेलाहुआ वह
बालक एकार्णव जलमें खेलताहुआ दीखनेलगा ३२ तब वह मुनि आश्चर्य्ययुक्त होकर सूर्य्यके समान
कान्तिवाले उसबालकको कुछ अच्छीरीतिसे नहीं देखसके फिर जलके समीपमें स्थितहुएमार्कण्डेयजी
ऐसाविचार करतेभये कि मैंने यहपहलेभी देखाहै परन्तु दैवकीमायासे मैं शंकाकररहाहूं तब
आश्चर्य्ययुक्त होकर वहमुनि भयसे महादुःखितहो जलमें पैरतेहुए उसबालकके समीपपहुंचे तब बालकके
योगयुक्त विष्णुभगवान् मेघके समान शब्दकोकरके मार्कण्डेयसे बोले कि हेपुत्रभय मतकरेयहां
मेरे समीपमें आजा यहसुनतेही श्रमसे थकेहुए मार्कण्डेयमुनि उसबालकसे यहबचन बोले ३३। ३७
कि मेरे तपका तिरस्कार करताहुआ कौनसा पुरुष मुझको नाम लेकर बोलसक्ताहै मेरी दिव्य हज़ार
वर्षोंकी अवस्थाको कौन तिरस्कृत करताहै देवताओं में भी यह मेरेसमाचार नहीं विदित हैं ब्रह्माभी

र्हति ४० एवमाभाष्यतंक्रोधान्मार्कण्डेयोमहामुनिः । तथैवभगवान्भूयो बभाषेमधुसूदनः ४१ (भगवानुवाच) अहंतेजनकोवत्स ! हर्षीकेशःपितागुरुः । आयुःप्रदातापौराणः किंमान्त्वन्नोपसर्पसि ४२ मांपुत्रकामःप्रथमं पितातेऽङ्गिरसोमुनिः । पूर्वमाराधयामास तपस्तीव्रंसमाश्रितः ४३ ततस्त्वांघोरतपसा प्रापणोदमितौजसम् ! उक्तवानहमात्मस्थं महर्षिममितौजसम् ४४ कःसमुत्सहतेचान्यो योनभूतात्मकात्मजः । द्रष्टुमेकार्णवगतंक्रीडन्तंयोगवर्त्मना ४५ ततःप्रहृष्टवदनो विस्मयोत्फुल्ललोचनः । मूर्द्ध्निबद्धाञ्जलिपुटो मार्कण्डेयोमहातपाः ४६ नामगोत्रेततःप्रोच्य दीर्घायुर्लोकपूजितः । तस्मैभगवतेभक्त्या नमस्कारमथाकरोत् ४७ (मार्कण्डेय उवाच) इच्छेयंतत्त्वतोमाया मिमांज्ञातुन्तवानघ !। यदेकार्णवमध्यस्थः शेषेत्वंबालरूपवान् ४८ किंसंज्ञश्चैवभगवन् ! लोकेविज्ञायसेप्रभो !। तर्कयेत्वांमहात्मानं कोह्यन्यःस्थातुमर्हति ४९ (श्रीभगवानुवाच) अहंनारायणोब्रह्मन् ! सर्वभूःसर्वनाशनः । अहंसहस्रशीर्षाख्यैर्यैःपदैरभिसंज्ञितः ५० आदित्यवर्णःपुरुषो मखेब्रह्ममयोमखः । अहमग्निर्हव्यवाहो यादसांपतिरव्ययः ५१ अहमिन्द्रपदेशक्रो वर्षाणांपरिवत्सरः । अहंयोगीयुगाख्यश्च युगान्तावर्तएव च ५२ अहंसर्वाणिसत्वानि दैवतान्यखिलानितु । भुजङ्गानामहंशेषो तार्क्ष्योवैसर्वपक्षिणाम् ५३ कृतान्तःसर्वभूतानां विश्वेषांकालसंज्ञितः । अहंधर्म्मस्तपश्चाहं सर्वाश्रमनिवासिनाम् ५४ अहंचैवसरिद्दिव्या क्षीरोदश्चमहार्णवः । यत्तत्सत्यंचपरम महमेकःप्रजा

मुझको दीर्घायुवालाकहतेहैं ३८।३९ घोरतपकोप्राप्तहो अपने जीवनेकी इच्छात्यागकर मुझको मार्कंडेय ऐसाकहकर मृत्युके देखनेको कौनसमर्थहै ४० जब मार्कण्डेयमुनि ऐसेकहचुके तबमधुसूदन भगवान् फिरबोले ४१ कि हेपुत्र मैं तेराउत्पन्नकरनेवाला होकर तेरा पिताहूं मैं पुराणपुरुष विष्णुभगवान्हूं तू मेरे समीप क्यों नहींआताहै ४२ पुत्रकी इच्छाकरनेवाला तेरापिता अंगिरामुनि पूर्व्वमें अत्यन्ततपकरके मेराआराधनकरताभया ४३ फिरघोरतपकरके अतुलपराक्रमवाले पुत्रकेहोनेकावर मांगताभया तबमैंनेही उसको वैसाहीवरदिया ४४ तब तूउसकापुत्रहुआ हेमार्कण्डेय मेरेविनाअन्य कौनसा पुरुष योगमाया से क्रीडाकरताहुआ प्रलयकालमें मुझको देखसक्ताहै ४५ इसकेपीछे दीर्घायुवाले मार्कण्डेयमहामुनि मस्तकमें अंजलीबाँधकर अपने नामगोत्रका उच्चारणकर उन विष्णुजीको बड़ीभक्तिसे नमस्कारकरतेभये ४६।४७ मार्कण्डेयमुनिनेकहा हेभगवन् मैं तत्त्वसे आपकीइस मायाके जानने की इच्छा करताहूं आपजो इस एकार्णव जलमें शयनकररहेहो और बालक के रूपको प्राप्तहोगयेहो सो इस लोकमें आपकी क्यासंज्ञाहै यह सबबातें मैं जाननाचाहताहूं ४८।४९ श्रीभगवान् बोले हेब्रह्मन् मैं नारायणहूं सबका उत्पन्न करनेवालाहूं सबकानाश करताहूं और मैंही अनन्त शेष सहस्रशीर्षा इत्यादिक नामोंसे प्रसिद्धहूं ५० मैं सूर्य्यके समान वर्णवाला पुरुषहूं यज्ञों में ब्रह्ममय यज्ञहूं मैंही हव्यवाह अग्निहूं जलोंकापतिहूं इन्द्रके स्थान में इन्द्रहूं वर्षोंकापरिवत्सरहूं युगाख्ययोगीहूं ५१।५२ सबजीवमात्र मेरेहीरूपहैं सर्पोंमें शेषहूं सबपक्षियोंमें गरुड़हूं ५३ सबभूतों

पतिः ५५ अहंसांख्यमहंयोगो ऽप्यहंतत्परमम्पदम् । अहमिज्याक्रियाचाहमहंविद्या
धिपःस्मृतः ५६ अहंज्योतिरहंवायु रहंभूमिरहंनभः । अहमापःसमुद्राश्च नक्षत्राणिदि
शोदश ५७ अहंवर्षमहंसोमः पर्जन्योऽहमहंरविः । क्षीरोदसागरेचाहं समुद्रेवडवामुखः
५८ वह्निःसंवर्तकोभूत्वा पिबंस्तोयमयंहविः । अहंपुराणःपरमं तथैवाहंपरायणम् ५९ अ
हंभूतस्यभव्यस्य वर्तमानस्यसम्भवः । यत्किञ्चित्पश्यसेविप्र! यच्छृणोषिचकिञ्चन ६०
यल्लोकेचानुभवसि तत्सर्वमामनुस्मर । विश्वंसृष्टंमयापूर्वं सृज्यंचाद्यापिपश्यमाम् ६१
युगेयुगेचस्रक्ष्यामि मार्कण्डेयाखिलंजगत् । तदेतदखिलंसर्वं मार्कण्डेयावधारय ६२
शुश्रूषुर्ममधर्मांश्च कुक्षौचरसुखंमम । ममब्रह्माशरीरस्थो देवैश्चऋषिभिःसह ६३ व्य
क्तमव्यक्तयोगंमामवगच्छासुरद्विषम् । अहमेकाक्षरोमन्त्रस्त्र्यक्षरश्चैवतारकः ६४ प
रस्त्रिवर्गादोङ्कारस्त्रिवर्गार्थनिदर्शनः । एवमादिपुराणेशो वदन्नेवमहामतिः ६५ वक्त्रमा
हृतवानाशु मार्कण्डेयंमहामुनिम् । ततोभगवतःकुक्षिं प्रविष्टोमुनिसत्तमः ६६ सतस्मिन्
सुखमेकान्ते शुश्रूषुर्हंसमव्ययम् ६७ योऽहमेवविविधतनुं परिश्रितोमहार्णवेव्यपगतच
न्द्रभास्करे । शनैश्चरन्प्रभुरपिहंससंज्ञितोऽसृजंजगद्विरहितकालपर्यये ६८ ॥

इति श्रीमत्स्यपुराणेषट्षष्ट्यधिकशततमोऽध्यायः १६६ ॥

का कालसंज्ञक धर्मराजहूं मैंही धर्महूं सब आश्रम निवासियोंकातपहूं मैंही दिव्यनदीहूं क्षीरोदसमुद्रहूं परमसत्यहूं एक प्रजापतिहूं ५४।५५ मैंही सांख्य और योगहूं परमपदहूं यज्ञहूं क्रियाहूं विद्याका अधिपतिहूं सूर्य्यहूं वायुहूं भूमि आकाश और जलहूं समुद्रहूं नक्षत्रहूं दशों दिशाहूं ५६ । ५७ वर्षहूं सोमहूं मेघहूं सूर्य्यहूं क्षीरोद समुद्रमें बडवानल अग्नि हूं ५८ संवर्त्तक अग्नि होकर सबजलों को शोषलेताहूं परम पुराणहूं भूत भविष्य और वर्त्तमान इनका उत्पन्न करनेवालाहूं हेविप्र तू जो कुछ देखताहै अथवा जोकुछ सुनता है और जो लोकमें किसीबात का अनुभव करता है उन सब स्थानों में मेराही स्मरण करना चाहिये प्रथम इस जगत्को मैंनेही रचाहै अबभी इस को मैं ही रचूंगा ५९।६१ हे मार्कण्डेय मुनि मैं युग २ के प्रति इस संपूर्ण जगत् को रचताहूं और पालन करताहूं मेरी कुक्षि में तू सुखपूर्व्वक विचरताहुआ मेरे धर्मोंको सुन देवता और ऋषियों समेत ब्रह्मा भी मेरे शरीरमें स्थितहै मैं दैत्योंका शत्रुहूं ऐसे मुझको तू प्राप्तहोजा मैं उद्धार करने वाला एकाक्षरमंत्रहूं ६२। ६४ त्रिवर्गके अर्थको कहनेवाला ओंकारहूं जब इस प्रकारसे उस आदि पुरुष विष्णुभगवान्ने मार्कण्डेय मुनिसे कहा तब वह श्रेष्ठमुनि विष्णुभगवान्के उदरमें प्रवेश करजातेभये ६५।६६ उस उदरमें अविनाशी हंसकी गतिके सुननेकी इच्छा करते हुए मुनि सुखपूर्व्वक विचरतेभये उस समय श्रीनारायण ने मुनिसे कहा कि जो मैं चन्द्र सूर्य्यसे रहित इसएकार्णव जल में शनैः विचरताहूं वही मैं सब से प्रथम इस जगत्को रचताहूं ६७। ६८ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांषट्षष्ट्यधिकशततमोऽध्यायः १६६ ॥

(मत्स्य उवाच) आपवःसविभुर्भूत्वा चारयामासवैतपः । छादयित्वात्मनोदेहं याद
सांकुलसम्भवम् १ ततोमहात्मातिबलो मतिंलोकस्यसर्जने । महतांपञ्चभूतानां विश्वो
विश्वमचिन्तयत् २ तस्यचिन्तयमानस्य निर्वातेसंस्थितेऽर्णवे । निराकाशेतोयमयेसू
क्ष्मे जगतिगह्वरे ३ ईषत्संक्षोभयामास सोऽर्णवंसलिलाश्रयः । अनन्तरोर्मिभिःसूक्ष्म
मथच्छिद्रमभूत्पुरा ४ शब्दंप्रतितदोद्भूतो मारुतश्छिद्रसम्भवः । सलब्ध्वान्तरमक्षोभ्यो
व्यवर्धतसमीरणः ५ विवर्द्धताबलवता वेगाद्विक्षोभितोऽर्णवः । तस्यार्णवस्यक्षुब्धस्य त
स्मिन्नम्भसिमन्थिते ६ कृष्णवर्त्मासमभवत् प्रभुर्वैश्वानरोमहान् । ततःसशोषयामासपा
वकःसलिलंबहु ७ क्षयाज्जलनिधेश्छिद्रमभवद्विस्तृतंनभः । आत्मतेजोद्भवाःपुण्या आ
पोऽमृतरसोपमाः ८ आकाशंच्छिद्रसम्भूतं वायुराकाशसम्भवः । आभ्यांसङ्घर्षणोद्भूतं
पावकंवायुसम्भवम् ९ दृष्ट्वाप्रीतोमहादेवो महाभूतविभावनः । दृष्ट्वाभूतानिभगवांल्लोक
सृष्ट्यर्थमुत्तमम् १० ब्रह्मणोजन्मसहितं बहुरूपोव्यचिन्तयत् । चतुर्युगाभिसंख्याते सह
स्रयुगपर्यये ११ बहुजन्मविशुद्धात्मब्रह्मणेहानिरुच्यते । यत्पृथिव्यांद्विजेन्द्राणां तपसा
भवितात्मना १२ ज्ञानंदृष्टन्तुविश्वार्थे योगिनांयातिमुख्यताम् । तंयोगवन्तंविज्ञाय स
म्पूर्णैश्वर्यमुत्तमम् १३ पदेब्रह्मणिविश्वेशं न्ययोजयतयोगवित् । ततस्तस्मिन्महातोये
महीशोहरिरच्युतः १४ स्वयंक्रीडंश्चविधिवन्मोदतेसर्वलोककृत् । पद्मंनाभ्युद्भवंचैकं स
मुत्पादितवांस्तदा १५ सहस्रपर्णंविरजं भास्कराभंहिरण्मयम् । हुताशनज्वलितशिखो

सूतजी बोले कि जलहीं अपने कुल से उत्पन्न हुए आत्माको आच्छादित कर सूर्य्य रूप होकर
तपकरताभया १ इसके पीछे महत्तत्त्व जब संसारके रचने में अपनी मति करताहै तब पांचों महा
भूतोंकी चिन्ता करता है २ उसी चिन्तवन करने में वायु और आकाश रहित उस एकार्णव जलमें
वह समुद्र कुछेक क्षोभको प्राप्त होजाताभया और अनन्तलहरोंके क्षोभसे उसमें कुछछिद्र उत्पन्न
होताभया उसीमें शब्द उत्पन्नहुआ उस शब्दसे वायु उत्पन्न हुआ फिर वहवायु बढ़ताभया ३।५
उस बढ़ते हुए बलवान् वायुने क्षोभकिया उस्से आकाश मथितहुआ उसीसे महान् अग्नि उत्पन्न
होताभया तब वह महान् अग्नि उस जलको शोषलेताभया ६।७ जलके क्षय होने से आकाशका
विस्तार फैलजाताभया फिर अपने तेजसे उत्पन्न हुए जल अमृतके समान होजातेभये उस छिद्रसे
आकाशहुआ आकाशसे वायुहुआ फिर इनदोनोंके संघर्षण होनेसे वायुके संयोगसे अग्नि उत्पन्न भया
है ८।९ फिर सब भूतोंका उत्पन्न करने वाला भगवान् इन पांचों भूतोंको देखकर प्रसन्न होताभया
और ब्रह्माके जन्म सहित बहुतसे अपने रूपोंको चिन्तवन करताभया इन चारों युगोंकी संख्याकी
चौकड़ी जितने समयमें हज़ार वार व्यतीत होजाती है उतने समय तक सगुण ब्रह्म उत्तमयोगियों
के तपका आचरण करताभया फिर तपके प्रभावसे सगुण ब्रह्म अर्थात् विष्णु को सृष्टि रचने का
ज्ञान होताभया तब सृष्टि रचने में उसको समर्थ जानकर विष्णुभगवान् उसको अपने स्थानपर
नियुक्त करतेभये और आप अनेक प्रकारकी क्रीड़ा करतेभये इसकेपीछे उस विष्णुभगवान्की नाभि

ज्ज्वलत्प्रभमुपस्थितंशरदमलार्कतेजसम् । विराजतेकमलमुदारवर्चसं महात्मनस्तनु
रुहचारुदर्शनम् १६ ॥ इति श्रीमत्स्यपुराणेसप्तषष्ट्यधिकशततमोऽध्यायः १६७ ॥
(मत्स्य उवाच) अथयोगवतांश्रेष्ठमसृजत्भूरितेजसम् । स्रष्टारंसर्वलोकानां ब्रह्मा
णंसर्वतोमुखम् १ यस्मिन्हिरण्मयेपद्मे बहुयोजनविस्तृते । सर्वतेजोगुणमयं पार्थिवै
र्लक्षणैर्वृतम् २ तच्चपद्मंपुराणज्ञाः पृथिवीरूपमुत्तमम् । नारायणसमुद्भूतं प्रवदन्तिमह
र्षयः ३ यापद्मासारसादेवी पृथिवीपरिचक्षते । येपद्मसारगुरवस्तान् दिव्यान्पर्वतान्
विदुः ४ हिमवन्तंचमेरुंच लीलंनिषधमेवच । कैलासमुञ्जवन्तंच तथान्यंगन्धमा
दनम् ५ पुण्यंत्रिशिखरञ्चैव कान्तंमन्दरमेवच । उदयंपिञ्जरंचैव विन्ध्यवन्तंचपर्वतम् ६
एतेदेवगणानाञ्च सिद्धानाञ्चमहात्मनाम् । आश्रयःपुण्यशीलानां सर्वकामफलप्रदाः ७
एतेषामन्तरेदेशो जम्बुद्वीपइतिस्मृतः । जम्बुद्वीपस्यसंस्थानं यज्ञियायत्रवैक्रिया ८ ए
भ्योयत्स्रवतेतोयंदिव्यामृतरसोपमम् । दिव्यास्तीर्थशताधाराःसुरम्याःसरितःस्मृताः ९
स्मृतानियानिपद्मस्य केसराणिसमन्ततः । असंख्येयाःपृथिव्यास्तेविश्वेवैधातुपर्वताः १०
यानिपद्मस्यपर्णानि भूरीणितुनराधिप । तेदुर्गमाःशैलचिताम्लेच्छदेशाविकल्पिताः ११
यान्यधोभागपर्णानि तेनिवासास्तुभागशः । दैत्यानामुरगाणाञ्चपतङ्गानाञ्चपार्थिव ! १२
तेषांमहार्णवोयत्र तद्रसेत्यभिसंज्ञितम् । महापातककर्माणो मज्जन्तेयत्रमानवाः १३
पद्मस्यान्तरतोयत्तदेकार्णवगतामही । प्रोक्ताथदिक्षुसर्वासुचत्वारःसलिलाकराः १४

में से एक ऐसा कमल उत्पन्न होताभया जिसमें हज़ार पत्ते शरदृऋतुके सूर्य्यकी समान कान्ति सुवर्णके समान दीप्त ज्वलित अग्निके समान तेजस्वी इत्यादिक गुणों से युक्त वह कमल शोभित होताभया १०।१६ ॥ इतिश्रीमत्स्यपुराणभाषाटीकायांसप्तषष्ट्यधिकशततमोऽध्यायः १६७ ॥

मत्स्यजी कहते हैं कि इसके अनन्तर उस स्वर्णमय कमलमें योगियों में श्रेष्ठ बड़े तेजस्वी सब लोकोंके रचनेवाले ब्रह्माजीको विष्णु भगवान् उत्पन्न करतेभये १।२ पुराणवेत्ता विद्वान्लोग उस कमलहीको पृथ्वीतल कहते हैं महर्षिजन नारायणसे उत्पन्नहुआ कमल कहते हैं जो रसानाम पद्मा देवी है वही पृथ्वी कहातीहै उसकमलमें जो भारीपनहै वही पर्व्वतहैं ३।४ हिमवान्, सुमेरु, नील, निषद,कैलाश,मुंजवन्त,गन्धमादन,त्रिशिखर,मंदराचल,उदयाचल,पिंजर,विन्ध्याचल यह सबपर्वत देवताओं के गण, सिद्धोंकेगण, और महात्मागण इन्हींके आश्रय सब कामना देनेवाले होते हैं ५।७ इनपर्व्वतोंके अन्तरमें जो देशहै उसको जंबूद्वीप कहतेहैं जंबूद्वीपकी स्थितिका उत्तम लक्षण वहांही जानना जहां यज्ञ होते हैं ८ इन पूर्वोक्त पर्व्वतोंसे जो जल झिरताहै वह दिव्य अमृतके समानहै उसीजलसे सैकड़ों हजारों दिव्य २ नदियां बहती हैं ९ और उस कमलकी जो केशरहै वही असंख्यात धातुओं के पर्व्वतहैं और जितने कि उसकमलके पत्तेहोते हैं वही उनदुर्गम पर्व्वतोंमें म्लेच्छों के देशहैं १०।११ और उनपत्तोंका जो नीचेका भागथा वहीं दैत्य सर्प और पक्षियों के स्थानहैं १२ उन कमलके पत्तोंका जो रसहै उसीका महार्णव समुद्र होजाताभया उसीमें महापातक करनेवाले

एवंनारायणस्यार्थे महीपुष्करसम्भवा। प्रादुर्भावोऽप्ययंतस्मान्नाम्नापुष्करसंज्ञितः १५
एतस्मात्कारणात्तज्ज्ञैः पुराणैःपरमर्षिभिः। याज्ञियैर्वेददृष्टान्तैर्यज्ञेपद्मविधिःस्मृतः १६
एवंभगवतातेन विश्वयाधरयाविधिः। पर्वतानांनदीनाञ्च ह्रदानांचैवनिर्मितः १७ विभु
स्तथैवाप्रतिमप्रभावः प्रभाकराभोवरुणासितद्युतिः। शनैःस्वयम्भूःशयनंसृजत्तदाजग
न्मयंपद्मविधिंमहार्णवे १८ ॥

इति श्रीमत्स्यपुराणेऽष्टषष्ट्यधिकशततमोऽध्यायः १६८ ॥

(मत्स्यउवाच) विघ्नस्तपसिसम्भूतोमधुर्नाममहासुरः। तेनैवचसहोद्भूतोरजसाकैटभ
स्ततः १ तौरजस्तमसौविघ्नसम्भूतौतामसौगणौ। एकार्णवेजगत्सर्वंक्षोभयन्तौमहाबलौ२
दिव्यरक्ताम्बरधरौश्वेतदीप्ताग्रदंष्ट्रिणौ। किरीटकुण्डलोदग्रौ केयूरबलयोज्ज्वलौ ३ महा
विक्रमताम्राक्षौ पीनोरस्कौमहाभुजौ। महागिरेःसंहननौ जङ्गमाविवपर्वतौ ४ नगमेघप्र
तीकाशावादित्यसदृशाननौ। विद्युदाभोगदाग्राभ्यां कराभ्यामतिभीषणौ ५ तौपादयोस्तु
विन्यासादुत्क्षिपन्ताविवार्णवम्। कम्पयन्ताविवहरिंशयानंमधुसूदनम् ६ तौतत्रविचर
न्तौस्मपुष्करेविश्वतोमुखम्। योगिनांश्रेष्ठमासाद्यदीप्तंददृशतुस्तदा ७ नारायणसमाज्ञातं
सृजन्तमखिलाःप्रजाः। दैवतानिचविश्वानि मानसानसुरानृषीन् ८ ततस्तावूचतुस्तत्र

पुरुष डूबते हैं १३ उस कमलके भीतर जो जलगत पृथ्वी थी वहां चारोंदिशाओं में जलके समूहों
के समुद्र होतेभये इसप्रकारसे नारायणके नाभिकमलसे पृथ्वी उत्पन्न होतीभई इसीहेतुसे कमलको
पुष्कर कहते हैं और पुराणकेज्ञाता परमऋषियों ने भी इसीहेतुसे यज्ञमें पद्मकी विधिकरना कहाहै
१४। १६ इसीविधिसे उन विष्णुभगवान्ने सम्पूर्ण पृथ्वी पर्व्वत नदी और ह्रद रचे हैं इसके पीछे
अतुलपराक्रमी सूर्यकीसी कान्तिवाले विष्णुभगवान् उसकमलको रचकर शयनकरतेभये १७।१८ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांअष्टषष्ट्यधिकशततमोऽध्यायः १६८ ॥

मत्स्यजी कहनेलगे कि जब ब्रह्माजी कमलमेंही तपकरतेथे उससमय मधुदैत्य विघ्नकरनेको
उत्पन्न होताभया और रजोगुणसे युक्तहुआ कैटभदैत्यभी प्रकट होताभया १ तबवह रजोगुण तमोगुणसे
भरेहुए विघ्नकरनेवाले महाबली दानव सम्पूर्ण जगत्को त्रासदेनेलगे २ दिव्य रक्तवस्त्रों के
धारण करनेवाले श्वेतउग्र और भयंकर दंष्ट्रावाले मुकुट कुंडल बाजूबन्द आदिक भूषणों से शोभित
बड़ेभारी पराक्रमसे रक्तनेत्रयुक्त उन्नतछाती और महाभुजावाले पर्व्वतके समान आकारवाले
मेघके समान कान्तिवाले सूर्य्य के समानमुखयुक्त बिजली के सदृशगदाको लिये महाभयंकर अपने
पैरोंसे समुद्रको चलायमान करके सोतेहुए विष्णुभगवान्को कंपाकर जगाने के निमित्त क्षोभकरतेभये
३। ६ तबउस कमलमें बिचरतेहुए वहदोनों दैत्य चतुर्मुखी ब्रह्माजीको देखतेभये ७ वहब्रह्माजी
नारायणकी आज्ञासे संपूर्ण प्रजाको और देव दानव यक्ष मनुष्य ऋषि और ब्रह्माके मनसेउत्पन्नहुए
ऋषि इनसबको रचरहेथे इसरचनेही के समय वहदोनों पराक्रमी दैत्य क्रोधसे व्याकुल

ब्रह्माणमसुरोत्तमौ। दीप्तौमुमूर्षसंक्रुद्धौरोषव्याकुलितेक्षणौ ९ कस्त्वंपुष्करमध्यस्थःसितो
ष्णीषश्चतुर्भुजः। आधायानियमंमोहादास्तेत्वंविगतज्वरः १० एह्यागच्छावयोर्युद्धंदेहित्वं
कमलोद्भव!। आवाभ्यांपरमीशाभ्यामशक्तस्त्वमिहार्णवे ११ तत्रकश्चोद्भवस्तुभ्यंकेनवासि
नियोजितः। कःस्रष्टाकश्चतेगोप्ताकेननाम्नाविधीयसे १२ (ब्रह्मोवाच) एकइत्युच्यतेलोके
रावीचिन्त्यःसहस्रदृक्। तत्संयोगेनभवतोःकर्मनामावगच्छताम् १३ (मधुकैटभावूचतुः)
नावयोःपरमंलोके किञ्चिदस्तिमहामते!। आवाभ्यांछाद्यतेविश्वंतमसारजसाथवै १४ र
जस्तमोमयावावामृषीणामवलम्बितौ। छाद्यमानौधर्म्मशीलौ दुस्तरौसर्वदेहिनाम् १५
आवाभ्यामुह्यतेलोको दुष्कराभ्यांयुगेयुगे। आवामर्थश्चकामश्च यज्ञःस्वर्गपरिग्रहः १६
सुखंयत्रमुदायुक्तं यत्रश्रीःकीर्ति रेवच। येषांयत्कांक्षितंचैव तत्तदावांविचिन्तय १७ (ब्र
ह्मोवाच) यत्नाद्योगवतोदृष्ट्वा योगःपूर्वमयार्जितः। तंसमाधायगुणवत् सत्वंचास्मिसमा
श्रितः १८ यःपरोयोगमतिमान् योगाख्यःसत्वमेवच। रजसस्तमसश्चैव यःस्रष्टाविश्व
सम्भवः १९ ततोभूतानिजायन्ते सात्विकानीतराणिच। सएवहियुवानाशे वशीदेवोहनि
ष्यति २० स्वपन्नेवततःश्रीमान् बहुयोजनविस्तृतम्। बाहुंनारायणोब्रह्म कृतवानात्म
मायया २१ कृष्यमाणौततस्तस्य वाहुनाबाहुशालिनः। चेरतुस्तौविगलितौ शकुनाविव
पीवरौ २२ ततस्तावाहतुर्गत्वा तदादेवंसनातनम्। पद्मनाभंहृषीकेशं प्रणिपत्यस्थितावु

नेत्र और मरनेकी इच्छावाले होकर ब्रह्माजीसे यहकठोर वचनबोले ८। ९कि श्वेत वेष्टन धारण
किये चतुर्भुजहो खेदसे रहितहो तू इस कमलमें कैसे चुपकाबैठा है वहांसे बाहर निकलकर तूहम
से युद्धकर और जो तू हमसे युद्धनहीं करसक्ता है तोइस कमलसे बाहर निकल तेरी उत्पत्तिकरने
वाला कौन है यहाँ तुझे किसने नियुक्तकियाहै कौन तेरा रक्षकहै और तेरा क्यानामहै १०। १२ ब्रह्माजीनेकहा
कि सबसंसार जिसको एककहता है और जिसको सबध्यावते हैं जो हजारों दृष्टिवाला
है उस परमेश्वरके योग नाम और कर्म तुमको जाननाचाहिये १३ मधुकैटभ दैत्योंने कहा— हेमहामते
संसारमें हमसे उपरान्त कोईनहीं है हमहींतमोगुण और रजोगुणसे सब संसारको आच्छादित
करदेतेहैं १४ हमदोनों रजोगुण और तमोगुणसे युक्त हैं हम सब धर्मवाले ऋषियोंको आच्छादित
करतेहैं इसीसे सबप्राणियोंसे दुस्तरहैं १५ सबसंसार हमसे डरता है युग २ में हमहीं यज्ञके
अर्थ कामको और स्वर्गको देनेवाले हैं जिनको सुख आनन्द लक्ष्मीकी प्राप्ति और कीर्त्तिकी प्राप्ति है
वहसब हमाराही चिन्तवन करतेहैं १६। १७ ब्रह्माजीने कहा कि मैंने यत्न से योगिजनोंकी रीति
से योग संचितकिया है सो मैंतो सत्त्वगुण के आश्रय होरहाहूं १८ परन्तु जो अत्यन्त योगवाला
सत्त्वरज औरतम इनतीनों गुणोंका रचनेवाला विश्वका कर्त्ता जिस्सेकि सत्त्वगुणी भूत उत्पन्न होतेहैं
और अन्य नहीं होते इसलिये वही देव तुम्हारा नाशकरेगा १९। २० उससमय सोतेहुएही
विष्णु भगवान अपनी भुजाओंको बिस्तार पूर्वक फैलातेभये तब विष्णु भगवान्‌की लंबी भुजाओं
में वह दोनों दैत्य खिंचकर आजातेभये उन भुजाओंमें वह दोनों प्रबल दैत्य ऐसे लटकतेहुए चले

भौ २३ जानीवस्त्वांविश्वयोनिं त्वामेकंपुरुषोत्तमम् । त्वामावाम्पाहि हेत्वर्थमिदंनौबुद्धिकारणम् २४ अमोघदर्शनःसत्वं यतस्त्वांविद्मशाश्वतम् । ततस्त्वामागतावावामभितः प्रसमीक्षितुम् २५ तदिच्छामोवरंदेव ! त्वत्तोऽद्भुतमरिन्दम !। अमोघदर्शनोऽसित्वं नमस्तेसमितिञ्जय ! २६ (श्रीभगवानुवाच) किमर्थमद्भुतंब्रूथ वरंह्यसुरसत्तमौ !। दत्तायुष्कौपुनर्भूयो रहोजीवितुमिच्छथः २७ (मधुकैटभावूचतुः) यस्मिन्नकश्चिन्मृतवान् देव ! तस्मिन्प्रभो ! बधम् । तमिच्छावोबधंचैव त्वत्तोनोऽस्तुमहाव्रत ! २८ (श्रीभगवानुवाच) वाढंयुवान्तुप्रवरौ भविष्यत्कालसम्भवे । भविष्यतोनसन्देहः सत्यमेतद्ब्रवीमिवाम् २९ वरंप्रदायाथमहासुराभ्यां सनातनोविश्ववरःसुरोत्तमः। रजस्तमोवर्गभवायनौयमौ ममन्थतावूरुतलेनवैप्रभुः ३० ॥

इति श्री मत्स्यपुराणेएकोनसप्तत्यधिकशततमोऽध्यायः १६९ ॥

(मत्स्य उवाच) स्थित्वाचतस्मिंस्तुमुले ब्रह्माब्रह्मविदाम्बरः । ऊर्ध्वबाहुर्महातेजास्तपोघोरंसमाश्रितः १ प्रज्वलन्निवतेजोभिर्भाभिः स्वाभिस्तमोनुदः । वभासेसर्वधर्म्मस्थः सहस्रांशुरिवांशुभिः २ अथान्यद्रूपमास्थाय शम्भुर्नारायणोऽव्ययः । आजगाम महातेजा योगाचार्योमहायशाः ३ सांख्याचार्योहिमतिमान् कपिलोब्राह्मणोवरः।उभावपिमहात्मानौ स्तुवन्तौक्षेत्रतत्परौ ४ तौप्राप्तावूचतुस्तत्र ब्रह्माणममितौजसम् । परावरविशेषज्ञौ पूजितौचमहर्षिभिः ५ ब्रह्मात्मदृढबन्धश्च विशालोजगदास्थितः । ग्रामणीः

आये जैसेकि हाथोंमें मोटे२ पक्षी लटकते चलेआतेहैं २१।२२ तब वहदोनों दैत्य स्थितहोकर विष्णु भगवानको प्रणाम करतेभये और यह कहनेलगे कि हम तुमको विश्वकी योनि जानतेहैं आप पुरुषोत्तमहो हमारी रक्षाकरो हम अज्ञानी हैं आपका अमोघ दर्शनहै आप सत्त्वगुणकी मूर्त्तिहो हम आपके दर्शनके निमित्त आयेहैं २३ । २५ हे देव आपका अमोघ दर्शन निष्फल नहीं है आपसे हम बर माँगनाचाहतेहैं और तुमको नमस्कार करतेहैं २६ श्रीभगवान्ने कहा हे दैत्यो तुम वर किस निमित्त मांगतेहो तुमने तो अपनी आयुपूरी करडालीहै क्या अब औरभी जीवनेकी इच्छा है २७ तब मधु कैटभ दैत्य बोले कि हे देव जब कभी हम मरें तब तुम्हारेही हाथसे मरें यह वर हमचाहतेहैं– श्री भगवान् बोले तुम दोनों भविष्यत् कालमें अर्थात् अगले जन्ममें उत्तमहोगे यह सत्यसत्यही है इस में सन्देह नहीं है २८। २९ इसप्रकारसे उनदानवोंको वरदेकर विष्णु भगवान् उनदोनोंको अपनी जाँघों पर स्थितकरके मारतेभये ३० ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांएकोनसप्तत्यधिकशततमोऽध्यायः १६९ ॥

मत्स्यजी कहते हैं कि ब्रह्मवेत्ताओं में श्रेष्ठ ब्रह्माजी ऊपरको भुजाकरके महाघोर तपकरतेभये १ और अपने तेजोंकरके सब अन्धकारको दूरकर सूर्य्य के समान प्रकाशित होतेभये २ इसके अनन्तर विष्णुभगवान् अन्यरूपको बनाकर योगके आचार्य्यहो ब्रह्माजी के समीप आवतेभये और सांख्यके आचार्य्य कपिलमुनिभी ब्रह्माजी के पासआये इस रीतिसे यह दोनों महात्मा ब्रह्माजी की स्तुतिको

सर्वभूतानां ब्रह्मात्रैलोक्यपूजितः ६ तयोस्तद्वचनंश्रुत्वा विप्रोऽभ्याहृतयोगवित् । त्रीनि
मान्कृतवान्लोकान्यथेयंब्रह्मणःश्रुतिः ७ पुत्रञ्चसम्भवेचैकं समुत्पादितवानृषिः । तस्या
ग्रेवाग्यतस्तस्थौ ब्रह्माणमजमव्ययम् ८ सोत्पन्नमात्रोब्रह्माणमुक्तवान्मानसःसुतः । किं
कुर्मस्तवसाहाय्यं ब्रवीतुभगवानृषिः ९ (ब्रह्मोवाच) यएषकपिलोब्रह्म नारायणमयस्तथा ।
वदतेभवतस्तत्त्वं तत्कुरुष्वमहामते ! १० ब्रह्मणस्तुतदर्थंतु तदाभूयःसमुत्थितः । शुश्रूषु
रस्मियुवयोः किंकरोमिकृताञ्जलिः ११ (श्रीभगवानुवाच) यत्सत्यमक्षरंब्रह्मन् ! अष्टा
दशविधन्तुतत् । यत्सत्यंयदृतंतत्तु परंपदमनुस्मर १२ एतद्वचोनिशम्यैवययौसदिशमुत्त
राम् । गत्वाचतत्रब्रह्मत्वमगमत्ज्ञानतेजसा १३ ततोब्रह्माभुवन्नामद्वितीयमसृजत्प्रभुः ।
सङ्कल्पयित्वामनसा तमेवचमहात्मना १४ ततःसोऽथब्रवीद्वाक्यं किंकरोमिपितामह !
पितामहसमाज्ञातो ब्रह्माणंसमुपस्थितः १५ ब्रह्माभ्यासन्तुकृतवान् भुवश्चपृथिवींगतः ।
प्राप्तश्चपरमंस्थानं सतयोःपार्श्वमागतः १६ तस्मिन्नपिगतेपुत्रे तृतीयमसृजत्प्रभुः । सां
ख्यप्रवृत्तिकुशलं भूर्भुवंनामतोविभुम् १७ गोपतित्वंसमासाद्य तयोरेवागमद्गतिम् । एवं
पुत्रास्त्रयोऽप्येते उक्ताःशम्भोर्महात्मनः १८ तान्गृहीत्वासुतांस्तस्य प्रयातःस्वार्जिताङ्ग
तिम् । नारायणश्चभगवान् कपिलश्चयतीश्वरः १९ यङ्कालन्तौगतौमुक्तौ ब्रह्मातंकाल
मेवहि । ततोघोरतमम्भूयः संश्रितःपरमंव्रतम् २० नरेमेऽथततोब्रह्माप्रभुरेकस्तपश्चरन् ।

करतेहीहुए आये फिर महर्षियों से पूजित परावर ज्ञानके ज्ञाता यह दोनों महात्मा ब्रह्माजी से बोले
तब आत्मसमाधिमें दृढस्थितहुए सबलोकों के पूज्य ब्रह्माजी उनके वचनको सुनकर व्याहृति के
ज्ञाताहोकर श्रुतिके अनुसार इन तीनोंलोकों को रचतेभये ३।७ ब्रह्माने अपने मनसे एक पुत्र उत्पन्न
किया वह पुत्र जन्मतेही ब्रह्माके समीप आकर यह कहताभया कि मैं आपकी कौनसी सहायताकरूं
८।९ ब्रह्माजी बोले कि यह नारायण स्वरूपी कपिलाचार्य्य ब्राह्मण जो तुमको शिक्षाकरे
वही तुमभीकरो १० फिर वह ब्रह्माका पुत्र अंजली बाँध उन दोनों ब्राह्मणों के आगे खड़ाहोकर कहनेलगा
कि मुझको कुछ आज्ञादीजिये ११ तब श्रीभगवान् कहतेभये कि जो सत्यहै और अठारह
प्रकारका अक्षरहै उस परमपदको स्मरणकर १२ यह वचनसुनतेही वह ब्रह्माका पुत्र उत्तर दिशामें
जाताभया वहाँ जाकर अपने ज्ञानके तेजसे ब्रह्मभावको प्राप्त होताभया १३ तब ब्रह्माजी भुवनाम
वाले दूसरे पुत्रको अपने मनसे रचतेभये वह पुत्रभी ब्रह्माजी से बोला कि मैं क्याकरूं ब्रह्माजी ने
कहा कि इन दोनों ब्राह्मणों से पूछो यह सुनकर वह उन ब्राह्मणों के पासजाकर उनकी आज्ञासे
पृथ्वी में प्राप्तहोकर परमस्थानको प्राप्तहोगया फिर ब्रह्माजीने भूर्भुवः नामवाले सांख्यशास्त्रके ज्ञाता
तीसरे पुत्रको रचा वहभी ब्रह्माजी से पूछ उन्हीं दोनोंके समीप जाताभया इस प्रकारसे यह तीन
पुत्र ब्रह्माजी के कहे हैं १४।१८ नारायण भगवान् और कपिलमुनि यह दोनों ब्रह्माजी के तीनों पुत्रों
को ग्रहणकरके अपने स्थानमें आतेभये १९ जिस कालमें वह नारायण और कपिलमुनि गमनकरतेभये
उसी समय ब्रह्माजी घोर तपकरने का प्रारंभकरतेभये जब तपकरतेहुए अकेले ब्रह्माजी प्रसन्न

शरीरात्तांततोभार्यां समुत्पादितवान्शुभाम् २१ तपसातेजसाचैव वर्चसानियमेनच।
सदृशीमात्मनोदेवीं समर्थांलोकसर्जने २२ ततोजगादत्रिपदाङ्गायत्रींवेदपूजिताम्। सृ
जन्प्रजानांपतयः सागरांश्चासृजद्विभुः २३ ततोजगादत्रिपदाङ्गायत्रींवेदपूजिताम्।
अपरांश्चैवचतुरोवेदान् गायत्रिसम्भवान् २४ आत्मनःसदृशान्पुत्रानसृजद्वैपितामहः।
विश्वेप्रजानांपतयो येभ्योलोकाविनिःसृताः २५ विश्वेशंप्रथमंतावन्महातापसमात्मज
म्। सर्वमन्त्रहितंपुण्यं नाम्नाधर्मंससृष्टवान् २६ दक्षंमरीचिमत्रिञ्च पुलस्त्यंपुलहंक्र
तुम्। वसिष्ठंगौतमञ्चैव भृगुमङ्गिरसम्मनुम् २७ अथैवाद्भुतमित्येते ज्ञेयाःपैतामहर्षयः।
त्रयोदशगुणंधर्ममालभन्तमहर्षयः २८ अदितिर्दितिर्दनुःकाला अनायुःसिंहिकामुनिः।
ताम्राक्रोधाथसुरसा विनताकद्रुरेवच २९ दक्षस्यापत्यमेतावै कन्याद्वादशपार्थिव!। म
रीचेःकश्यपःपुत्रस्तपसानिर्मितःकिल ३० तस्मैकन्याद्वादशान्या दक्षस्ताःप्रददौतदा। न
क्षत्राणिचसोमाय तदावैदत्तवानृषिः ३१ रोहिण्यादीनिसर्वाणि पुण्यानिरविनन्दन!।
लक्ष्मीमरुत्वतीसाध्या विश्वेशाचमताशुभा ३२ देवीसरस्वतीचैव ब्रह्मणानिर्मिताःपुरा।
एताःपञ्चवरिष्ठावै सुरश्रेष्ठायपार्थिव! ३३ दत्ताभद्रायधर्माय ब्रह्मणादृष्टकर्मणा। यारूपा
र्द्धवतीपत्नी ब्रह्मणःकामरूपिणी ३४ सुरभिःसाहिताभूत्वा ब्रह्माणंसमुपस्थिता। ततस्ता
मगमद्ब्रह्मा मैथुनंलोकपूजितः ३५ लोकसर्जनहेतुज्ञो गवामर्थायसत्तमः। जज्ञिरेचसु
तास्तस्यां विपुलाधूमसन्निभाः ३६ नक्तसन्ध्याभ्रसङ्काशाःप्रादहंस्तिग्मतेजसः। तेरुद

चित्तसे नहीं रहे तब अपने शरीरसे एक उत्तमस्त्रीको रचतेभये २०।२१ वह देवी स्त्री अपने तपतेज
और नियमोंकरके ब्रह्माजीके समानहोकर संसाररचनेमें समर्थहोतीभई तब उस त्रिपदागायत्रीको
बोलकर ब्रह्माजी प्रजापतियों और समुद्रोंको रचतेभये २२।२३ और उसी त्रिपदा गायत्रीको बो-
लकर चारों वेदोंकोभी रचतेभये इसके पीछे ब्रह्माजी अपनेसमान उनप्रजापति पुत्रोंकोरचतेभयेजिन
से कि यहलोक उत्पन्नहुएहैं २४।२५ प्रथम तो महा तपस्वी विश्वेश नामवाले प्रजापतिको रचा फिर
सबमंत्रोंमें निपुणपवित्र धर्मनाम पुत्रकोरचा इसकेअनन्तर ब्रह्माजी दक्ष, मरीचि, अत्रि, पुलस्त्य, पुलह,
क्रतु, वसिष्ठ, गौतम, भृगु, अंगिरा और मनु इनसबको उत्पन्न करतेभये श्रेष्ठ ऋषिलोगोंने धर्म के तेरह
गुण कहेहैं २६।२८ और अदिति, दिति, दनु, काला, अनायु, सिंहिका, मुनि, ताम्रा, क्रोधा, सुरसा, विनता,
और कद्रू यह बारहकन्या दक्षके उत्पन्न हुईहैं मरीचि ऋषिने अपने तेजसे कश्यपनाम पुत्र उत्पन्न
किया उन कश्यपजी के अर्थ दक्ष अपनी बारहपुत्रियोंको विवाहकरके देताभया और रोहिणी आदि
सत्ताईस नक्षत्र नाम कन्याओंको चन्द्रमाके अर्थ देताभया और लक्ष्मी, मरुत्वती, साध्या, विश्वेशा, स-
रस्वती देवी यह पांचकन्या ब्रह्माजी ने रचीं इनपांचोंको उत्तमकर्मवाले धर्मराजके अर्थ विवाहकरके
दिया और जो रूपार्द्धवती नाम उत्तम ब्रह्माजीकी पत्नी है वह सुरभि गौका रूप धारणकरके ब्रह्मा
के समीप में खड़ीहोतीभई तब लोकोंसे पूजितहुए ब्रह्माजी संसाररचनेके निमित्त गौओं के उपका-
रार्थ उस सुरभिसे मैथुन करतेभये फिर उस सुरभिसे धूम्रवर्णवाले बहुतसे पुत्र उत्पन्न होते भये

न्तोद्रवन्तश्च गर्हयन्तःपितामहम् ३७ रोदनाद्द्रवणाच्चैव रुद्राइतिततःस्मृताः । निर्ऋ
तिश्चैवशम्भुर्वै तृतीयश्चापराजितः ३८ मृगव्याधःकपर्दीच दहनोऽथखरश्चवै। अहिर्बु
ध्न्यश्चभगवान् कपालीचापिपिङ्गलः ३९ सेनानीश्चमहातेजा रुद्रास्त्वेकादशस्मृताः।
तस्यामेवसुरभ्यांच गावोयज्ञेश्वराश्चवै ४० प्रकृष्टाश्चतथामायाः सुरभ्याःपशवोऽक्षराः।
अजाश्चैवतुहंसाश्चतथैवामृतमुत्तमम् ४१ ओषध्यःप्रवरायाश्चसुरभ्यास्ताःसमुत्थिताः।
धर्माल्लक्ष्मीस्तथाकामंसाध्यासाध्यान्व्यजायत४२भवञ्चप्रभवञ्चैवहीशञ्चासुरहंतथा।
अरुण्यंचारुणिञ्चैव विश्वावसुबलध्रुवौ ४३ हविष्यञ्चवितानञ्चविधानशमितावपि ।
वत्सरञ्चैवभूतिञ्च सर्वासुरनिषूदनम् ४४ सुपर्वाणंबृहत्कान्तिःसाध्यालोकनमस्कृता।
तमेवानुगतादेवी जनयामासवैसुरान् ४५ वरंवैप्रथमन्देवं द्वितीयंध्रुवमव्ययम्। विश्वा
वसुंतृतीयञ्च चतुर्थंसोममीश्वरम् ४६ ततोऽनुरूपमायञ्च यमस्तस्मादनन्तरम्। सप्तम
ञ्चतथावायु मष्टमन्निर्ऋतिंवसुम् ४७ धर्मस्यापत्यमेतद्वै सुदेव्यांसमजायत। विश्वेदेवा
श्चविश्वायां धर्माज्जाताइतिश्रुतिः ४८ दक्षश्चैवमहाबाहुः पुष्करस्वनएवच। चाक्षुष
स्तुमनुश्चैव तथामधुमहोरगौ ४९ विश्वान्तश्चवसुर्बाल्ला विष्कम्भश्चमहायशाः। गरु
डश्चातिसत्वौजा भास्करप्रतिमद्युतिः ५० विश्वान्देवान्देवमाता विश्वेशाजनयत्सुता
न्। मरुत्वतीमरुत्वतो देवानजनयत्सुतान् ५१ अग्निंचक्षूरविर्ज्योतिः सावित्रंमित्रमे
वच। अमरंशरद्वृष्टिञ्च सुकर्षञ्चमहाभुजम् ५२ विराजञ्चैववाचञ्च विश्वावसुमतिंतथा।

२९।३६ रात्रि और संध्यासमय के बादलोंके समान वर्णयुक्त तेजवाले वहसब पुत्र रोतेहुए ब्रह्माजी की निन्दा करतेभाजे इसीसे रोदनकरने और भाजने से उनको रुद्रकहते भये उनके नामयह हैं निर्ऋति १ शंभु २ अपराजित ३ मृगव्याध ४ कपर्द्दी ५ दहन ६ खर ७ अहिर्बुध्न्य ८ कपाली ९ पिंगल १० और महातेजयुक्त सेनानी यह ग्यारह ११ रुद्रकहे हैं और उसी सुरभि गौ में यज्ञेश्वरी गौ उत्पन्न होतीभई प्रकृष्टमाया पशु बकरी हंस और उत्तम २ औषधी यहसबभी उसी सुरभि गौ से उत्पन्न होतीभईं और धर्म से लक्ष्मी स्त्री में कामनाम पुत्र उत्पन्न होताभया साध्य स्त्री साध्य नाम देवताओंको उत्पन्न करतीभई ३७।४२ भव, प्रभव, अहीश, असुरहन्ता, अरुण्य, अरुणि, विश्वावसु, बल ध्रुव, हविष्य, वितान, विधान शमित, वत्सर भूति, और सुपर्वा इनसबको सांध्यास्त्री धर्म के सकाश से उत्पन्न करती भई और धर्मकेही सकाशसे सरस्वती देवी देवताओंको जनतीभई वर १ ध्रुव २ विश्वावसु ३ सोम ४ ईश्वर ५ और महामायासेयुक्त अपने समानरूपवाले छठेपुत्र धर्मको सातवेंवायुको और आठवें नैर्ऋतिवसु को धर्म उत्पन्न करतेभये यह सबतो धर्मकी संतानहुईं और विश्वास्त्रीमें धर्म के सकाशसे विश्वेदेवा उत्पन्न भये हैं यह सुनाजाताहै ४३।४८ महाभुजावाला दक्ष पुष्कर स्वन मधुमहोरग चाक्षुषमुनि विश्वन्त, वसु, विष्कंभ, महायशा, अतुलपराक्रमी सूर्य्य के समान कान्तिवाले गरुड़ इत्यादिनामोंसे प्रसिद्धहुए विश्वेदेवोंको विश्वेशा जनतीभई मरत्वती मरुद्गण संज्ञक देवताओंको जनती भई ४९।५१ अग्नि, चक्षु, रवि, ज्योति, सावित्र, मित्र, अमर, शरद्वृष्टि, सुकर्ष, महाभुज, ५२

अश्वमित्रंचित्ररश्मिन्तथानिषधनंनृप ! ५३ हूयन्तंवाडवञ्चैव चारित्रंमन्दपन्नगम् । वृ
हन्तंवैवृहद्रूपं तथावैपूतनानुगम् ५४ मरुत्वतीपुराजज्ञे एतान्वैमरुताङ्गणान् । अदितिः
कश्यपाज्जज्ञे आदित्यान्द्वादशैवहि ५५ इन्द्रोविष्णुर्भगस्त्वष्टा वरुणोह्यर्यमारविः । पू
षामित्रश्चधनदो धातापर्जन्यएवच ५६ इत्येतेद्वादशादित्या वरिष्ठास्त्रिदिवौकसः । आ
दित्यस्यसरस्वत्यां जज्ञातेद्वौसुतौवरौ ५७ तपःश्रेष्ठौगुणिश्रेष्ठौ त्रिदिवस्यापिसम्मतौ ।
दनुस्तुदानवान्जज्ञे दितिर्दैत्यान्व्यजायत ५८ कालातुवैकालकेया नसुरान्राक्षसांस्तु
वै । अनायुषायास्तनया व्याधयःसुमहाबलाः ५९ सिंहिकाग्रहमातावै गन्धर्वजननीमुनिः।
ताम्रात्वप्सरसांमाता पुण्यानांभारतोद्भव ! ६० क्रोधायाःसर्वभूतानि पिशाचाश्चैवपार्थि
व ! । जज्ञेयक्षगणांश्चैव राक्षसांश्चविशाम्पते ! ६१ चतुष्पदानिसत्वानि तथागावस्तुसौ
रसाः । सुपर्णान्पक्षिणश्चैव विनताचाप्यजायत ६२ महीधरान्सर्वनागान् देवीकद्रूर्व्य
जायत । एवंवृद्धिंसमगमन् विश्वेलोकाःपरन्तप ! ६३ तदावैपौष्करोराजन् ! प्रादुर्भावो
महात्मनः । प्रादुर्भावःपौष्करस्ते मयाद्वैपायनेरितः ६४ पुराणःपुरुषश्चैव मयाविष्णुर्ह
रिः प्रभुः । कथितस्तेऽनुपूर्वेण संस्तुतःपरमर्षिभिः ६५ यश्चेदमग्र्यंशृणुयात्पुराणं सदा
नरःपर्वसुगौरवेण । अवाप्यलोकान्सहिवीतरागः परत्रचस्वर्गफलानिभुङ्क्ते ६६ चक्षु
षामनसावाचा कर्म्मणाचचतुर्विधम् । प्रसादयातियःकृष्णं तंकृष्णोऽनुप्रसीदति ६७

विराजवाच,विश्वावसु,मति,अश्वमित्र,चित्ररश्मि,निषधन५३हूयन्त,वाडव,चारित्र,मन्दपन्नग,वृहन्त,
वृहद्रूप और पूतनानुग ५४ इन नामोंवाले मरुद्गण हैं और कश्यपके सकाशसे अदिति बारह
आदित्यों को जनतीं भईं ५५ इन्द्र, विष्णु, भग, त्वष्टा, वरुण, अर्य्यमा, रवि, पूषा, मित्र, धनद,
धाता, पर्जन्य यह बारह आदित्य स्वर्गवासियों में उत्तम हैं आदित्य के सरस्वती के प्रभाव से दो
पुत्र उत्पन्न होतेभये वह दोनों श्रेष्ठतपवाले और उत्तमगुणवाले होतेभये दनुके कश्यपके प्रभाव से
दानव होतेभये दितिके दैत्यहुए ५६।५८ कालास्त्री कालकेय संज्ञक दैत्योंको और राक्षसोंको जनती
भई अनायुषास्त्रीके महाबल वाली व्याधि होतीभई सिंहिकास्त्री ग्रहमाता और पूतना इनकोजनती
भई मुनि नाम स्त्रीके गन्धर्व उत्पन्न होतेभये ताम्रास्त्री के अप्सरा उत्पन्नहुईं क्रोधास्त्री के प्रेतपिशाच
यक्ष और राक्षस भी उत्पन्न होतेभये ५९।६१ सुरसा स्त्री के चतुष्पदपशु और गौ होतीभईं विनता
स्त्रीके गरुड और सब पक्षी होतेभये ६२ कद्रूस्त्रीके सब पर्व्वत और सर्प यह उत्पन्न होतेभये इस
प्रकारसे यह सब लोक वृद्धिको प्राप्त होताभया ६३ हे राजन् इसप्रकार विष्णुभगवान्से पुष्कर नाम
कमल उत्पन्न हुआ है उस कमलमें जो सृष्टि हुई है उसको पद्मसृष्टि कहते हैं यह मैंने तेरे आगे
पुराण पुरुष विष्णुभगवान्का वर्णन कर दियाहै इसरीतिसे सब ऋषि इस आदि पुराण
विष्णुभगवान्की स्तुति करते हैं ६४।६५ जो पुरुष इस उत्तम पुराणको विशेषकरके पर्व्वसम्बन्धी दिनोंमें
सुनता है वह इस संसारमें सब सुखोंको भोगकर अन्त समय स्वर्गमें प्राप्त होता है ६६ जो पुरुष
नेत्र मन और बाणी करके श्रीकृष्णजीको प्रसन्न करताहै उसके ऊपर श्रीकृष्ण भगवान् कृपा करते

राजाचलभतेराज्यमधनश्चोत्तमन्धनम् । क्षीणायुर्लभतेचायुः पुत्रकामःसुतन्तथा ६८ य
ज्ञावेदास्तथाकामास्तपांसिविविधानिच । प्राप्नोतिविविधंपुण्यं विष्णुभक्तोधनानिच ६९
यद्यत्कामयतेकिञ्चित् तत्तल्लोकेश्वराद्भवेत् । सर्वंविहाययइमं पठेत्पौष्करकंहरेः७० प्रादु
र्भावंनृपश्रेष्ठ! नतस्यह्यशुभंभवेत् । एषपौष्करकोनाम प्रादुर्भावोमहात्मनः । कीर्तितस्ते
महाभाग ! व्यासश्रुतिनिदर्शनात् ७१ ॥

इति श्रीमत्स्यपुराणेसप्तत्यधिकशततमोऽध्यायः १७० ॥

(मत्स्य उवाच) विष्णुत्वंशृणुविष्णोश्च हरित्वञ्चकृतेयुगे । वैकुण्ठत्वञ्चदेवेषु कृष्ण
त्वंमानुषेषुच १ ईश्वरस्यहितस्यैषा कर्म्मणांगहनागतिः । संप्रत्यतीतान्भव्यांश्च शृणु
राजन्! यथातथम् २ अव्यक्तोव्यक्तलिङ्गस्थो यएषभगवान्प्रभुः । नारायणोह्यनन्ता
त्मा प्रभवोऽव्ययएवच ३ एषनारायणोभूत्वा हरिरासीत्सनातनः । ब्रह्मावायुश्चसोम
श्च धर्म्मःशक्रोबृहस्पतिः ४ अदितेरपिपुत्रत्वं समेत्यरविनन्दन!। एषविष्णुरितिख्यात
इन्द्रस्यावरजोविभुः ५ प्रसादजंह्यस्यविभोरदित्याःपुत्रकारणम् । बधार्थंसुरशत्रूणां दैत्य
दानवरक्षसाम् ६ प्रधानात्मापुराह्येष ब्रह्माणमसृजत्प्रभुः । सोऽसृजन्पूर्वपुरुषः पुराक
ल्पेप्रजापतीन् ७ असृजन्मानवांस्तत्र ब्रह्मवंशाननुत्तमान् । तेभ्योऽभवन्महात्मभ्यो बहु
धाब्रह्मशाश्वतम् ८ एतदाश्चर्यभूतस्य विष्णोःकर्मानुकीर्तनम् । कीर्तनीयस्यलोकेषु की

हैं ६७ राजा तो राज्यको प्राप्त होताहै निर्धनको धनकी प्राप्तिहोती है क्षीण आयुवाला दीर्घायुको
प्राप्त होताहै और पुत्रकी इच्छावाले के पुत्र उत्पन्न होताहै ६८ यज्ञ वेद काम तप अनेक प्रकारके
धन, अनेक प्रकारके पुण्य इन सब पदार्थोंकी प्राप्ति विष्णुके भक्तको होजाती है ६९ जो २ मनसे
विचारता है वही उसको प्राप्त होजाताहै-हेराजन् जो पुरुष सब वस्तुओंको त्यागकर इस कमल की
उत्पत्तिको सुनता है उसके कभी दुःख नहीं होताहै हेमहाभाग इस प्रकार करके विष्णुजी से कमल
की उत्पत्ति हुई है सोवे दव्यासजीकी श्रुतिके अनुसार तेरे आगे वर्णन करदी है ७०।७१ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांसप्तत्यधिकशततमोऽध्यायः १७० ॥

मत्स्यजी बोले कि विष्णुभगवान्को सत्ययुगमें हरि कहते हैं देवताओंमें वैकुंठ कहते हैं मनुष्यों
में श्रीकृष्ण कहते हैं १ ईश्वरके हितके निमित्त कर्मोंकी गह्वरगति कही है हे राजन् अब बीते हुए
और आगे होने वाले विष्णुके अवतारोंको सुन २ अव्यक्त विष्णुभगवान् व्यक्तलिंगमें स्थित होकर
नारायणनामसे प्रसिद्धहोतेहैं और अनंतात्मा अविनाशीप्रभु कहातेहैं ३ फिरनारायणहोके वायु सोम
इन्द्र धर्म और बृहस्पति इनअपनेरूपोंकोबनाताहै और अदिति केभी पुत्र विष्णुहुएहैं इसीसे उनको
इन्द्रके छोटेभाईउपेन्द्र और वामनकहते हैं वही देवताओंकेशत्रु दैत्यदानव और राक्षसादिके मारनेके
निमित्त अवतारहुएहैं ४।६प्रथमयह प्रधानात्मानारायण ब्रह्माको रचतेभये ब्रह्माजीने उत्तमप्रजापतियोंको
और मनुओं को रचा इन्हीं महात्माओं से बहुत प्रकारका संसार फैलतागया इस प्रकारसे
आश्चर्य्यसे उत्पन्नहुए विष्णुके इनकर्मोंका वर्णनकियाहै अबलोकमेंजो कीर्त्तन करनेके योग्य माहा-

र्त्यमानंनिबोधमे ९ वृत्तेवृत्रबधेतत्र वर्तमानेकृतेयुगे । आसीत्त्रैलोक्यविख्यातः संग्राम
स्तारकामयः १० यत्रतेदानवाघोराः सर्वेसंग्रामदुर्जयाः । घ्नन्तिदेवगणान्सर्वान् सयक्षो
रगराक्षसान् ११ तेबध्यमानाविमुखाः क्षीणप्रहरणारणे । त्रातारंमनसाजग्मुर्देवंनाराय
णंप्रभुम् १२ एतस्मिन्नन्तरेमेघा निर्वाणाङ्गारवर्चसः । सार्कचन्द्रग्रहगणञ्छादयन्तोन
भस्तलम् १३ वेणुविद्युद्गणोपेता घोरनिह्लादकारिणः । अन्योन्यवेगाभिहताः प्रववुःसप्त
मारुताः १४ दीप्ततोयाशनिघनैर्वज्रवेगानलानिलैः । रवैःसुघोरैरुत्पातैर्दह्यमानमिवा
म्बरम् १५ ततउल्कासहस्राणि निपेतुःखगतान्यपि । दिव्यानिचविमानानि प्रपतन्त्यु
त्पतन्तिच १६ चतुर्युगान्तेपर्याये लोकानांयद्भयंभवेत्। अरूपवन्तिरूपाणि तस्मिन्नुत्पा
तलक्षणे १७ जातञ्चनिष्प्रभंसर्वं नप्राज्ञायतकिञ्चन । तिमिरौघपरिक्षिप्तानरेजुश्चदिशो
दश १८ विवेशरूपिणीकाली कालमेघावगुण्ठिता । द्यौर्नभात्यभिभूतार्का घोरेणतमसा
वृता १९ तान्घनौघान्सतिमिरान् दोर्भ्यामाक्षिप्यसप्रभुः । वपुःस्वन्दर्शयामास दिव्यंकृ
ष्णवपुर्हरिः २० बलाहकाञ्जननिभं बलाहकतनूरुहम् । तेजसावपुषाचैव कृष्णंकृष्ण
मिवाचलम् २१ दीप्तपीताम्बरधरं तप्तकाञ्चनभूषणम् । धूमान्धकारवपुषं युगान्ताग्नि
मिवोत्थितम् २२ चतुर्द्विगुणपीनांसङ्किरीटच्छन्नमूर्द्धजम् । बभौचामीकरप्रख्यैरायुधैरु

त्म्यहै उसकोभी मुझसे श्रवण कर ७।९ सत्ययुगमें त्रिलोकी में विख्यात वृत्रासुरके बधके विषयमें
तारकामयनाम युद्ध होताभया उस युद्धमें सब दानवलोग महाघोर पराक्रमी और दुर्जय होतेभये
और देवताओं के गणों समेत सब यक्ष राक्षसादिकों के मारने वाले होते भये १० । ११ फिर यह
सब देवता यक्षराक्षसादिक दानवोंसे पराजित होकर विमुखहो अपनेमनसे हारमान प्रभुनारायण-
जीकी शरणमें जातेभये और वहबुझेहुए अँगारके समान शरीरधारी दानव मेघ चन्द्रमा और सू-
र्य्यादिक सबग्रहोंको आच्छादित करतेहुए आकाशकोभी व्याप्तकरलेतेभये १२।१३ और बिजलियों
सेयुक्त घोरशब्दोंके करनेवाले बडे२ मेघ बर्षाकरनेलगे तब परस्परके वेगोंसे हतहुए सब वायुचलने
लगे १४ उस समय दीप्तहुई बिजली मेघ और वायु इनसबके घोरशब्दोंसे ऐसा उत्पात होताभया
मानों आकाशभर भस्महोजायगा १५ फिर हज़ारों तारे टूटनेलगे और दिव्य२ विमानभी आकाश
में उछल२ कर पृथ्वीपर गिरतेभये उस समय ऐसा भयहोताभया मानो प्रलय कालही होरहाहो
और उस भयंकर उत्पात में सबके रूपोंकी कान्ति दूरहोगई कुछभी नहीं दखिताभया अन्धकारके
समूहसे आच्छादितहुई दशोंदिशाभी नहींदिखाई देनेलगीं १६।१८ उस कालके समान रूपधारण
करनेवाली काली देवी आकाशमें प्रवेशकरतीभई तब आकाशके घोर अन्धकारसे सूर्य्यभी आच्छा-
दितहोजातेभये १९ उससमय विष्णुभगवान् उन अन्धकारोंकेसमूहोंको अपनी भुजाओंसे दूरकर-
के अपने दिव्यरूपको प्रकटकरतेभये २० मेघ और अंजनकेसमान कान्तिवाले पर्व्वतकेसमान वर्ण
वाले अपने रूपको तेजसे प्रकाशित करतेभये २१ देदीप्त पीताम्बरधारी तप्त सुवर्ण के समान दिव्य
आभूषणोंसे युक्त प्रलयकालीन अग्निसे उत्पन्नहुए धूम्रवर्ण बहुत बड़ेस्थूल स्कन्ध मुकुटसे आच्छा-

पशोभितम् २३ चन्द्रार्ककिरणोद्योतं गिरिकूटमिवोच्छ्रितम् । नन्दकानन्दितकरं शरा
शीविषधारिणम् २४ शक्तिचित्रफलोदग्रशङ्खचक्रगदाधरम् । विष्णुशैलंक्षमामूलं श्रीवृ
क्षंशार्ङ्गधन्विनम् २५ त्रिदशोदारफलदं स्वर्गस्त्रीचारुपल्लवम् । सर्वलोकमनःकान्तं स
र्वसत्वमनोहरम् २६ नानाविमानविटपन्तोयदाम्बुमधुस्रवम् । विद्याहङ्कारसाराढ्यं महा
भूतप्ररोहणम् २७ विशेषपत्रैर्निचितं ग्रहनक्षत्रपुष्पितम् । दैत्यलोकमहास्कन्धं मर्त्यलो
कप्रकाशितम् २८ सागराकारनिर्ह्रादं रसातलमहाश्रयम् । मृगेन्द्रपाशैर्विततं पक्षजन्तु
निषेवितम् २९ शीलार्थचारुगन्धाढ्यं सर्वलोकमहाद्रुमम् । अव्यक्तानन्तसलिलं व्य
क्ताहङ्कारफेनिलम् ३० महाभूततरङ्गौघं ग्रहनक्षत्रबुद्बुदम् । विमानगरुतव्याप्तं तोय
दाडम्बराकुलम् ३१ जन्तुमत्स्यजनाकीर्णं शैलशङ्खकुलैर्युतम् । त्रैगुण्यविषयावर्तं सर्व
लोकतिमिङ्गिलम् ३२ वीरवृक्षलतागुल्मं भुजगोत्कृष्टशैवलम् । द्वादशार्कमहाद्वीपं रुद्रै
कादशपत्तनम् ३३ वस्वष्टपर्वतोपेतं त्रैलोक्याम्भोमहोदधिम् । सन्ध्यासङ्ख्योर्मिसलिलं
सुपर्णानिलसेवितम् ३४ दैत्यरक्षोगणग्राहं यक्षोरगझषाकुलम् । पितामहमहावीर्य्यं सर्व
स्त्रीरत्नशोभितम् ३५ श्रीकीर्तिकान्तिलक्ष्मीभिर्नदीभिरुपशोभितम् । कालयोगीमहापर्व प्र
लयोत्पत्तिवेगिनम् ३६ तन्तुयोगमहापारं नारायणमहार्णवम् । देवाधिदेवंवरदं भक्तानां

दितकेश उत्तम२ शस्त्रोंसे शोभित चन्द्रमा और सूर्य्यकी किरणों से युक्त उन्नतपर्व्वतके शिखर समान
आकार सर्पाकारवाणोंको धारण कियेहुए और शक्ति शंख चक्र औरगदाको धारणकिये विष्णुशैल अर्थात्
भगवान्स्वरूपी पर्वत विदित होताभया उसी पर्वतमें श्रीवृक्षहुआ उस श्रीवृक्षमें देवताओंकाफलदेने
वाला शार्ङ्गधनुषहोताभया २२।२५ स्वर्गकीस्त्रियां उसके उत्तमपत्तेवनीं इसप्रकारसे वह सबलोकों के
मनका प्रकाशकरनेवाला और चित्तका आनंददेनेवाला होताभया २६ जिसमें अनेकप्रकारके विमान
गुहेहुए मेघोंकेजल मदजल झिरनेकेस्रोतहुए विद्या और अहंकारादिक गोंदहोतेभये और सबप्रकार
केभूतही उसपर अंकुरहोजातेभये २७ सर्वधर्मपत्रहुए ग्रहनक्षत्रादिक पुष्पहुए दैत्यलोग बड़े२स्कंध
हुए ऐसा वह विष्णुशैल इसमर्त्यलोकमें प्रकाशित होताभया २८ समुद्र बिजली और रसातल इन
सबको आश्रय होताहुआ सिंहरूप डालियोंसे विस्तृत यक्षरूप पक्षियोंसे सेवित शीलरूपी गन्धयुक्त
नानावृक्षोंसे व्याप्त मायारूपी जलहोताभया और उस जलमें अहंकार झागहोताभया २९ । ३०
महाभूत तरंगहुए ग्रहनक्षत्र बुलबुलेहुए विमानपक्षीभये और उत्तम मनुष्यही उसके जीवजन्तु
मत्स्य और शंखहुए त्रिगुण विषयिक भ्रमर अर्थात् जलका आवर्त्त सब लोक मकर मत्स्यहुए वृक्ष
लता और गुच्छे इनके स्थानापन्न शूरवीरहुए सर्प सिवारहुए और बारहसूर्य्य महाद्वीप होतेभये
ग्यारहरुद्र नगरहोतेभये अष्टवसु पर्व्वतहुए त्रिलोकी का जल महासमुद्रहुआ संध्यारूप लहरों से
युक्त जलमें दैत्य और राक्षस ग्राहहुए यक्ष उरग बड़े२मत्स्यहुए ब्रह्माजी महापराक्रमहुए सब स्त्रियां
रत्नहुईं श्री, कीर्ति, कान्ति, और लक्ष्मी यह सब नदियांहुईं महापर्व्वही उत्तम वेगवाले होतेभये
इसप्रकारके सर्वांगोंसे वह विष्णु भगवान् महायोगी होतेभये ३१ । ३६ फिर योगके पारगामी ना-

भक्तिवत्सलम् ३७ अनुग्रहकरंदेवं प्रशान्तिकरणंशुभम् । हयैश्वरथसंयुक्ते सुपर्णध्वजसे
विते ३८ ग्रहचन्द्रार्करचिते मन्दराक्षवरावृते । अनन्तरश्मिभिर्युक्ते विस्तीर्णेमेरुगह्व
रे ३९ तारकाचित्रकुसुमे ग्रहनक्षत्रबन्धुरे । भयेष्वभयदंव्योम्नि देवादैत्यपराचिताः ४०
ददृशुस्तेस्थितंदेवं दिव्येलोकमयेरथे । तेकृताञ्जलयःसर्वे देवाःशक्रपुरोगमाः ४१ जय
शब्दंपुरस्कृत्य शरण्यंशरणङ्गताः । सतेषांताङ्गिरंश्रुत्वा विष्णुर्दैवतदैवतम् ४२ मनश्च
क्रेविनाशाय दानवानांमहामृधे । आकाशेतुस्थितोविष्णुरुत्तमंवपुरास्थितः ४३ उवाच
देवताःसर्वाः सप्रतिज्ञमिदंवचः । शान्तिंव्रजतभद्रंवोमाभैष्टमरुताङ्गणाः ! ४४ जितामे
दानवाःसर्वे त्रैलोक्यंपरिगृह्यताम् । तेतस्यसत्यसन्धस्य विष्णोर्वाक्येनतोषिताः ४५ दे
वाःप्रीतिंसमाजग्मुः प्राश्यामृतमनुत्तमम् । ततस्तमःसंहतंतद्विनेशुश्चबलाहकाः ४६
प्रववुश्चशिवावाताः प्रशान्ताश्चदिशोदश । शुद्धप्रभाणिज्योतींषि सोमञ्चक्रुःप्रदक्षिणम्
४७ नविग्रहंग्रहाश्चक्रुः प्रशान्ताश्चापिसिन्धवः । विरजस्काभवन्मार्गा नाकवर्गादयस्त्र
यः ४८ यथार्थमूहुःसरितो नापिचुक्षुभिरेऽर्णवाः । आसंश्शुभानीन्द्रियाणि नराणामन्तरा
त्मसु ४९ महर्षयोवीतशोका वेदानुच्चैरधीयत । यज्ञेषुचहविःपाकं शिवमापचपावकः ५०
प्रवृत्तधर्माःसंवृत्ता लोकामुदितमानसाः । विष्णोर्दत्तप्रतिज्ञस्य श्रुत्वारिनिधनेगिरम् ५१ ॥

इति श्रीमत्स्यपुराणे एकसप्तत्यधिकशततमोऽध्यायः १७१ ॥

रायणस्वरूपी महार्णव देवदेव वरदायी भक्तोंपर दयालु अनुग्रहपूर्व्वक शान्तिकर्त्ता और रथमें विराजमान गरुड़की ध्वजासे शोभितहुए विष्णु भगवान्को देखतेभये ३७। ३८ अर्थात् ग्रह चन्द्रमा और सूर्य्यकी अनेक विस्तृत किरणोंसे शोभायमान सुमेरु पर्व्वत के समान गह्वर तारेरूपी पुष्पोंसे अलंकृत अभय देनेवाले दिव्य रथमें बैठेहुए आकाशमार्ग में इन्द्रादिक देवताओंको विष्णु भगवान् दीखतेभये ३९।४१ उनको देखकर सब देवता अञ्जलीबाँधकर जयशब्दपूर्व्वक सब वृत्तान्त वर्णन करतेभये तब उनके वचनोंको सुनकर विष्णु भगवान् महायुद्धमें दानवोंके मारनेकी इच्छा करतेभये और आकाशमेंही स्थितहुए दिव्यशरीरको धारणकर प्रतिज्ञाकरके देवताओंसे यह वचन बोलतेभये कि हे देवताओ तुम शान्तिरक्खो चित्तसे भयकोत्यागो ४२। ४४ अबमैं इनदानवोंको विजय करताहूं तुम्हीं लोग इसत्रिलोकीके राज्यके भोगोंको भोगना ऐसे विष्णु भगवान्के वचनोंको सुनकर देवतालोग महाप्रसन्नहो अपने २ स्थानोंपर आकर अमृतपान करतेभये इसके अनन्तर वह सब अन्धकार भी नष्टहोगया मेघ विलीयमानहुए ४५। ४६ सुन्दर वायु चलनेलगी दशोंदिशा शान्त होगईं और सब तारागण शुद्ध कान्ति वालेहोकर चन्द्रमाकी प्रदक्षिणा करतेभये ४७ ग्रहोंका युद्ध होना बन्दहुआ समुद्र शान्तहुए मार्गोंमेंसे धूलिका उड़ना बन्दहुआ और स्वर्ग्गादिक तीनों लोकोंमें शान्तिहोजातीभई ४८ नदियोंमें क्षोभ न रहा नारायणके भक्तोंकी इन्द्रियां निर्मलहुईं उत्तम महर्षिजन बड़े उन्नत स्वरोंसे वेदोंका पाठकरनेलगे और यज्ञादिकोंमें अग्नि देवता साकल्यादिहव्य पदार्थोंको अच्छी रीतिसे ग्रहण करतेभये सब संसार शान्तहोगये श्रेष्ठधर्म कर्मादिक प्रवृत्तहोगये और सब

(मत्स्य उवाच) ततोभयंविष्णुवचः श्रुत्वादैत्याश्चदानवाः । उद्योगविपुलंचक्रुर्यु
द्धायविजयायच १ मयस्तुकाञ्चनमयं त्रिनल्वायतमक्षयम्। चतुश्चक्रंसुविपुलं सुकल्पि
तमहायुगम् २ किङ्किणीजालनिर्घोषं द्वीपिचर्मपरिष्कृतम्। रुचिरंरत्नजालैश्च हेमजा
लैश्चशोभितम् ३ ईहामृगगणाकीर्णं पक्षिपङ्क्तिविराजितम्। दिव्यास्त्रतूणिरधरं पयो
धरविनादितम् ४ स्वक्षंरथवरोदारं सूपस्थंगगनोपमम्। गदापरिघसंपूर्णं मूर्तिमन्तमि
वार्णवम् ५ हेमकेयूरवलयं स्वर्णमण्डलकूवरम्। सपताकध्वजोपेतं सादित्यमिवमन्दर
म् ६ गजेन्द्राभोगवपुषं क्वचित्केसरिवर्चसम्। युक्तमृक्षसहस्रेण समृद्धाम्बुदनादितम् ७
दीप्तमाकाशगंदिव्यं रथंपररथारुजम्। अध्यतिष्ठद्रणाकाङ्क्षी मेरुंदीप्तमिवांशुमान् ८
तारमुत्क्रोशविस्तारं सर्वहेममयंरथम्। शैलाकारमसम्बाधं नीलाञ्जनचयोपमम् ९ का
र्ष्णायसमयंदिव्यं लोहेषाबद्धकूवरम्। तिमिरोद्गारिकिरणं गर्जन्तमिवतोयदम् १० लो
हजालेनमहता सगवाक्षेणदंशितम्। आयसैःपरिघैःपूर्णं क्षेपणीयैश्चमुद्गरैः ११ प्रासैः
पाशैश्चविततैर्नरसंयुक्तकण्टकैः। शोभितंत्रासयानैश्च तोमरैश्चपरश्वधैः १२ उद्यन्तं
द्विषतांहेतोर्द्वितीयमिवमन्दरम्। युक्तंखरसहस्रेण सोऽध्यारोहद्रथोत्तमम् १३ विरोचन
स्तुसंक्रुद्धो गदापाणिरवस्थितः। प्रमुखेतस्यसैन्यस्य दीप्तग्रहइवाचलः १४ युक्तंरथस

जीवमात्र प्रसन्नमन वालेहोगये इसरीतिसे विष्णु भगवान्के मुखसे शत्रुओंके नाशकरनेकीप्रतिज्ञा को सुनकर सब देवता चित्तसे परमानन्दको प्राप्तहोतेभये ४९ । ५१ ॥

इति श्रीमत्स्यपुराणभाषाटीकायामेकसप्तत्यधिकशततमोऽध्यायः १७१ ॥

मत्स्यजी बोले कि दैत्य और दानवलोग उस महाभयकारी विष्णुके वचनको सुनकर युद्धमें जीतनेके निमित्त बहुतसा उद्योग करतेभये १ उस समय मयनामदैत्य बारहसौ हाथ विस्तृत चारचक्र विस्तृतजुआ किंकिणी आदिक जालियों के शब्दोंसे युक्त गैंडके चर्मसे मढ़ा सुन्दर रत्नोंसे भूषित सुवर्ण जालों से खचित पक्षियोंकी पंक्ति महासुशोभित दिव्य अस्त्रशस्त्रों से पूर्ण मेघकेसमान गर्जनेवाला आकाश पर्यन्त उन्नतबुजियोंसे अलंकृत गदा मुसलों समेत मूर्त्तिमान समुद्रके समान सुवर्णके मंडलवाला सुवर्णही की ध्वजापताकासे दिव्यरूप सूर्य्य समेत मन्दराचलकेसमान कान्तिवाला कालेसर्प सिंहादिके समान वर्णवाला और मेघकेसमान गर्जनेवाले बड़े २ जुड़ेहुए रीछोंसे युक्त ऐसे शत्रुओं के रथों के तोड़नेवाले देदीप्त उत्तमरथमें सवार होताभया ऐसे रथमें बैठाहुआ वह मयनाम दैत्य ऐसा विदित होताथा मानो सुमेरुपर्व्वतपर सूर्य्यही उदयहुआ है २ । ८ और तारकासुरदैत्य एककोश ऊंचे ऐसे अति विस्तृत सुवर्णके रथमें बैठताभया जो कि नीले अंजनके समान लोहेसे जटित लोहेकेही चक्र अन्धकारको दूरकरनेवाली कान्तिसे युक्त मेघके समान शब्दायमान दृढलोहे की जालियों से शोभित लोहेकेही मूसल मुद्गर भाले फाँसी कंटक कुल्हाड़े और फरसे इनसब शस्त्रों से पूर्ण शत्रुओंको दूसरेसूर्य्य के समान प्रतीत होनेवाला और हज़ारगधों से जुताहुआथा ९ । १३ और विरोचन दैत्य क्रोधकरके हाथमें गदाको धारणकरके आताभया और वह विरोचन उसदैत्यकी सेना-

हस्तेण हयग्रीवस्तुदानवः। स्यन्दनंवाहयामास सपत्नानीकमर्दनः १५ व्यायतंकिष्कुसाहस्रं धनुर्विस्फारयन्महत्। वाराहःप्रमुखेतस्थौ सप्ररोहइवाचलः १६ खरस्तुविक्षरन्दर्पान्नेत्राभ्यांरोषजंजलम्। स्फुरद्दन्तोष्ठनयनं संग्रामंसोऽभ्यकांक्षत १७ त्वष्टात्वष्टगजंघोरं यानमास्थायदानवः। व्यूहितुंदानवव्यूहं परिचक्रामवीर्यवान् १८ विप्रचित्तिवपुश्चैव श्वेतकुण्डलभूषणः। श्वेतःश्वेतप्रतीकाशो युद्धायाभिमुखेस्थितः १९ अरिष्टोबलिपुत्रश्च वरिष्ठाद्रिशिलायुधः। युद्धायाभिमुखस्तस्थौ धराधरविकम्पनः २० किशोरस्त्वभिसंहर्षात् किशोरइतिचोदितः। सब्बलादानवाश्चैव सन्नह्यन्तेयथाक्रमम् २१ अभवद्दैत्यसैन्यस्य मध्येरविरिवोदितः। लम्बस्तुनवमेघाभः प्रलम्बाम्बरभूषणः २२ दैत्यव्यूहगतोभाति सनीहारइवांशुमान्। स्वर्भानुरास्ययोधीतु दशनौष्ठेक्षणायुधः २३ हसंस्तिष्ठतिदैत्यानां प्रमुखेसमहाग्रहः। अन्येहयगतास्तत्र गजस्कन्धगताःपरे २४ सिंहव्याघ्रगताश्चान्ये वराहर्क्षेषुचापरे। केचित्खरोष्ट्रयातारः केचिच्छ्वापदवाहनाः २५ पतिनस्त्वपरेदैत्या भीषणाविकृताननाः। एकपादार्द्धपादाश्च ननृतुर्युद्धकाङ्क्षिणः २६ आस्फोटयन्तोबहवः क्ष्वेडन्तश्चतथापरे। हृष्टशार्दूलनिर्घोषा नेदुर्दानवपुङ्गवाः २७ तेगदापरिघैरुग्रैः शिलामुसलपाणयः। बाहुभिःपरिघाकारैस्तर्जयन्तिस्मदेवताः २८ पाशैःप्रा

में अचलपर्व्वतके समान शोभित होताभया १४ हयग्रीवदैत्य हज़ारों दैत्योंको साथलेकरआया और हज़ारों हाथकी विस्तृत देहवाला वाराहदैत्य धनुषको चढ़ाये रथको हाँकता पर्व्वतकी समान युद्धमें स्थित होताभया खरदैत्य अभिमानके क्रोधपूर्व्वक नेत्रों से जल झाड़ता दाँत ओष्ठ और नेत्रोंको फड़काताहुआ युद्धमें प्राप्त होताभया १५।१७ त्वष्टादैत्य घोर मतवाले हाथीपर चढ़ाहुआ दानवों के समूहों में चक्रदेकर सब दानवोंको इकट्ठा करता भया श्वेतकुंडलों से विभूषितांग होकर विप्रचित्ति दैत्य भी युद्धमें आया बलिकापुत्र अरिष्टदैत्य पर्व्वतकी शिलाओंको ग्रहण कियेआया और वहां आकर पर्व्वतकी शिलाओंको फेंकताभया १८।२० और लंबनाम दैत्य सबसेना में ऐसे शोभितहुआ जैसे मेघों के समूहों में उदयहुआ सूर्य्य होताहै किशोरदैत्य भी युद्धमेंआया अन्य २ बहुत से दैत्यभी कवचोंको धारणकरके युद्धमें आतेभये मेघके समान वर्णवाला वह लंबदैत्य भी सबसेना में ऐसा शोभितहुआ जैसे कुहरके समूहमें सूर्य्य प्रकाशित होरहाहो राहुदैत्यभी दाँत ओष्ठको चबाता आंखोंको चढ़ाताहुआ युद्धमेंआया २१। २३ यह महाग्रह राहुनाम दैत्य हँसकर सबदैत्यों के सन्मुख खड़ा होताभया और अन्यबहुतसे दैत्य घोड़ोंपर चढ़कर आतेभये कितनेही दैत्य हाथियोंपर सवारहोकर आये २४ कितनेहीसिंह और भेड़ियोंपर कितनेहीरीछों पर कितनेहीगधे ऊंट और स्वापदनाम पशुपर चढ़कर आये कोईविकराल मुखवाले भयंकर दैत्य पैदलही चलेआये उस समय एकपाद अर्द्धपाद वाले दैत्य युद्धकी इच्छाकरके नाचतेभये २५। २६ कितनेही प्रसन्न शार्दूलके समान शब्दकरतेहुए दैत्य अपनी भुजाओंको फड़कातेहुए युद्धमें आये २७ यह मूसल और शिलाधारी दैत्य अपनी महाकठोर भुजाओंसे ताड़नाकरतेभये २८ फांसी, भाला,

सैश्चपरिघैस्तोमरांकुशपाट्टिशैः । चिक्रीडुस्तेशतघ्नीभिः शतधारैश्चमुद्गरैः २९ गण्डशै-
लैश्चशैलैश्च परिघैश्चोत्तमायसैः। चक्रैश्चदैत्यप्रवराश्चक्रुरानन्दितंबलम् ३० एतद्दा-
नवसैन्यंतत्सर्वंयुद्धमदोत्कटम् । देवानभिमुखेतस्थौ मेघानीकमिवोद्धतम् ३१ तदद्भुतं
दैत्यसहस्रगाढं वाय्वग्निशैलाम्बुदतोयकल्पम् । बलंरणौघाभ्युदयेऽभ्युदीर्णं युयुत्सयो
न्मत्तमिवावभासे ३२ ॥

इति श्रीमत्स्यपुराणेद्विसप्तत्याधिकशततमोऽध्यायः १७२ ॥

(मत्स्य उवाच) श्रुतस्तेदैत्यसैन्यस्य विस्तरोरविनन्दन ! । सुराणामपिसैन्यस्य वि
स्तरंवैष्णवंशृणु १ आदित्यावसवोरुद्रा अश्विनौचमहाबलौ । सबलाःसानुगाश्चैव स
न्नह्यन्तयथाक्रमम् २ पुरुहूतस्तुपुरतो लोकपालःसहस्रदृक् । ग्रामणीःसर्वदेवानामारु
रोहसुरद्विपम् ३ मध्येचास्यरथःसर्वपक्षिप्रवररंहसः । सुचारुचक्रचरणोहेमवज्रपरिष्कृ
तः ४ देवगन्धर्वयक्षौघैरनुयातःसहस्रशः । दीप्तिमद्भिःसदस्यैश्च ब्रह्मर्षिभिरभिष्टुतः ५
वज्रविस्फूर्जितोद्भूतैर्विद्युदिन्द्रायुधोदितैः । युक्तोवलाहकगणैः पर्वतैरिवकामगैः ६ यमा
रूढःसभगवान् पर्येतिसकलंजगत् । हविर्धानेषुगायन्ति विप्रामखमुखेस्थिताः ७ स्वर्गे
शक्रानुयातेषु देवतूर्यनिनादिषु । सुन्दर्यःपरिनृत्यन्ति शतशोऽप्सरसाङ्गणे ८ केतुनानां
गराजेन राजमानोयथारविः । युक्तोहयसहस्रेण मनोमारुततरंहसा ९. सस्यन्दनवरोभा

मूसल, तोमर, अंकुश, पट्टिश, अस्त्र, बरछी, और मुद्गर इनसब अस्त्र शस्त्रोंसे देवताओंको ताड़ना देतेभये २९ पर्व्वतकी शिला लोहेके मुद्गर औरचक्र इनशस्त्रोंको फेंकतेहुए सबदानव अपने२ बल कोबढ़ातेभये ३० यह सबदानवोंकी सेनायुद्ध में उत्साह और मदोंको प्रकट करके मेघोंके समूहों के समान इकट्ठीहोकर देवताओंके आगे स्थितहोतीभई ३१ इन हज़ारों दैत्योंकी यह अद्भुतसेना वायु अग्नि पर्व्वत जल औरमेघ इनसबके समान प्रकाशितहोतीभई यह संपूर्ण दैत्य युद्धमें मदोन्मत्तोंके समान आवतेभये ३२ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांद्विसप्तत्यधिकशततमोऽध्यायः १७२ ॥

मत्स्यजी बोले हेरविनन्दनतैंने दैत्योंकी सेनाका विस्तारसुना अबदेवताओंकीभी सेनाका विस्तार श्रवण करो १ बारह१२ आदित्य अष्ट८ वसु ग्यारह११ रुद्र औरदो२ अश्विनीकुमार यहसब अपने२ अनुचरों समेत कवचधारण करके युद्धमें आवतेभये २ और सब देवताओं का अधिपति सहस्राक्ष इन्द्र अपने ऐरावत हाथी परचढ़कर आया और इन्द्रका रथभी सबसेनाकेमध्यमें स्थित होताभया उस सुन्दर चक्र युक्त सुवर्ण वज्रादिसे खचित देवयक्ष और गन्धर्वोंसे व्याप्त ब्रह्मऋषियोंसे स्तुतिमान पर्व्वताकार विद्युत मेघों से संयुक्त रथपर वह इन्द्र विराजमान होताभया उस समय यज्ञोंके मुख में स्थितहुए ब्राह्मण उसकी स्तुति करतेभये ३ । ७ स्वर्ग में अनेक प्रकारके बाजेबजे सैकड़ों अप्सरानाचीं तबउन सबके मध्यमें वहरथ ऐसा शोभितहुआ जैसे कि पर्व्वतपर सूर्य्यका उदयहोताह उस रथमें मन और वायुके समान वेगवाले हज़ार घोड़े जुततेभये उस समय मातलि सारथी

ति गुप्तोमातलिनातदा । कृत्स्नःपरिवृतोमेरुर्भास्करस्येवतेजसा १० यमस्तुदण्डमुद्यम्य कालयुक्तश्चमुद्गरम् । तस्थौसुरगणानीके दैत्यान्नादेनभीषयन् ११ चतुर्भिस्सागरैर्युक्तो लेलिहानैश्चपन्नगैः । शङ्खमुक्ताङ्गदधरो बिभ्रत्तोयमयंवपुः १२ कालपाशान्समाविध्यन् हयैःशशिकरोपमैः । वाय्वीरितैर्जलाकारैः कुर्वन्लीलाःसहस्रशः १३ पाण्डुरोद्धूतवसनः प्रचलन्रुचिराङ्गदः । मणिश्यामोत्तमवपुर्हरिभारार्पितोवरः १४ वरुणःपाशधृङ्मध्य देवानीकस्यतस्थिवान् । युद्धवेलामभिलषन् भिन्नवेलइवार्णवः १५ यक्षराक्षससैन्येन गुह्यकानांगणैरपि । युक्तश्चशङ्खपद्माभ्यां निधानामधिपःप्रभुः १६ राजराजेश्वरःश्रीमान् गदापाणिरदृश्यत । विमानयोधीधनदो विमानेपुष्पकेस्थितः १७ सराजराजःशुशुभे युद्धार्थीनरवाहनः । उक्षाणमास्थितःसंख्ये साक्षादिवाशवःस्वयम् १८ पूर्वपक्षःसहस्राक्षः पितृराजस्तुदक्षिणः । वरुणःपश्चिमंपक्षमुत्तरंनरवाहनः १९ चतुर्षुयुक्ताश्चत्वारो लोकपालामहाबलाः । स्वासुदिक्षुस्वरक्षन्त तस्यदेवबलस्यते २० सूर्यःसप्ताश्वयुक्तेन रथेनामितगामिना । श्रियाजाज्वल्यमानेन दीप्यमानैश्चरश्मिभिः २१ उदयास्तगचक्रेण मेरुपर्वतगामिना । त्रिदिवद्वारचक्रेण तपतालोकमव्ययम् २२ सहस्ररश्मियुक्तेन भ्राजमानेनतेजसा । चचारमध्येलोकानां द्वादशात्मादिनेश्वरः २३ सोमःश्वेतहयेभाति स्यन्दनेशीतरश्मिवान् । हिमवत्तोयपूर्णाभिर्भाभिराह्लादयन्जगत् २४ तमृक्षपूगानुगतं शिशि

से रक्षित कियाहुआवहरथ ऐसा शोभायमानहुआ जैसा कि सूर्य्यके तेजसे सुमेरुपर्वत चारोंओर को प्रकाशित होता है ८। १० धर्मराज कालको साथलिये दंडमुसलधारीहो अपने शब्दों से दैत्योंको भयभीत करके देवताओं की सेनाके मध्यमें खड़ा होताभया ११ और चारोंसमुद्रों समेत जिह्वा लटकाते सर्पोंसे युक्त रत्नोंके आभूषण धारी कालपाशधरे चन्द्रकान्ति घोड़ेपर चढ़ाहुआ हजारों जलक्रीड़ा करता हुआ बहुत वर्णके वस्त्रोंको पहरे उत्तम शरिरधारी बरुण भी देवताओंकी सेनाके मध्यमें प्राप्तहोताभया और वहाँ आकर युद्ध करनेके समयकी बाट देखताहुआ समुद्रके समान शोभित होताभया १२। १५ और यक्ष राक्षस और किन्नरोंसमेत द्रव्योंका अधिपति कुबेरभी हाथमें गदालिये पुष्पक बिमान में बैठकर आवताभया वह युद्धकरने की लालसा करनेवाला कुबेर साक्षात् शिवजीकेही समान वहाँ शोभित हुआ १६। १८ इन्द्रतो पूर्वदिशामें स्थित होताभया धर्मराज दक्षिण दिशामें, बरुण पश्चिम दिशामें और कुबेर उत्तरकी दिशामें स्थित होताभया १९ चारों दिशाओंमें महाबली दिग्पाल स्थितहोकर अपनी २ दिशाओंकी रक्षा करतेहुए देवताओंकी सेनाकीभी रक्षाकरते भये २० और अतिशीघ्र गामी सातघोड़ोंवाले रथमें विराजमान होकर वह सूर्य्य देवता भी आतेभये जिनके घोड़ोंकी उत्तम बागडोरिथी वह उदयाचल और अस्ताचल पर प्रकाशित स्वर्गके द्वारचक्रसे सबलोकोंको प्रकाशकरते हज़ारों किरणोंसे युक्त अपनेही तेजसे प्रकाशमान बारह सूर्य्योंके अधिपति उस देव सेनाके मध्यमें प्राप्तहोतेभये २१। २३ और शीत किरणयुक्त शीतल किरणोंसे सबजगत् के आनन्द दायक द्विजोंका ईश्वर शशाङ्क रात्रिके अन्धकारका दूरकरनेवाला ज्योति

रांशुंद्विजेश्वरम्। शशच्छायाङ्कितनुं नैशस्यतमसःक्षयम् २५ ज्योतिषामीश्वरंव्योम्नि रसानांरसदंप्रभुम्। ओषधीनांसहस्राणां निधानममृतस्यच २६ जगतःप्रथमंभागं सौम्यंसत्यमयंरथम्। ददृशुर्दानवाःसोमं हिमप्रहरणंस्थितम् २७ यःप्राणःसर्वभूतानां पञ्चधाभिद्यतेनृषु। सप्तधातुगतोलोकांस्त्रीन्दधारचचारच २८ यमाहुरग्निकर्तारं सर्वप्रभवमीश्वरम्। सप्तस्वरगतोयश्च नित्यङ्गीर्भिरुदीयते २९ यंवदन्त्युत्तमंभूतं यंवदन्त्यशरीरिणम्। यमाहुराकाशगमं शीघ्रगंशब्दयोगिनम् ३० सवायुःसर्वभूतायुरुद्धूतःस्वेनतेजसा। ववौप्रव्यथयन्दैत्यान् प्रतिलोमंसतोयदः ३१ मरुतोदिव्यगन्धर्वैर्विद्याधरगणैःसह। चिक्रीडुरसिभिःशुभ्रैर्निर्मुक्तैरिवपन्नगैः ३२ सृजन्तःसर्पपतयस्तीव्रतोयमयंविषम्। शरभूतादिवीन्द्राणाञ्चेरुर्व्यात्ताननादिवि ३३ पर्वतैश्चशिलाशृङ्गैः शतशश्चैवपादपैः। उपतस्थुःसुरगणाःप्रहर्त्तुंदानवेबले ३४ यःसदेवोहृषीकेशः पद्मनाभस्त्रिविक्रमः। युगान्तेकृष्णवर्णाभो विश्वस्यजगतःप्रभुः ३५ सर्वयोनिःसमधुहा हव्यभुक्क्रतुसंस्थितः। भूम्यपोव्योमभूतात्मा श्यामःशान्तिकरोऽरिहा ३६ अरिघ्नममरादीनाञ्चक्रंगृह्यगदाधरः। अर्कैनगादिवोद्यन्तमुद्यम्योत्तमतेजसा ३७ सव्येनालम्ब्यमहतीं सर्वासुरविनाशिनीम्। करेणकालींवपुषाशत्रुकालप्रदाङ्गदाम् ३८ अन्यैर्भुजैःप्रदीप्ताभैर्भुजगारिध्वजःप्रभुः। दधारायुधजातानि शार्ङ्गादीनिमहाबलः ३९ सकश्यपस्यात्मभुवन्द्विजंभुजगभोजनम्। पवनाधिकसम्पातं गगनक्षोभणंखगम् ४० भुजगेन्द्रेणवदने निविष्टेनविराजितम्। अमृ-

गणेश्वर रस हज़ारों औषधी और अमृतका स्थान जगत्का प्रथमभाग महासौम्य चन्द्रमा श्वेत घोड़ोंपर आरूढ़होकरआया इसप्रकारके उसचन्द्रमाको सबदानव देखतेभये २४। २७ और सब भूतमात्रोंके पांचप्रकारके प्राणभेद करनेवाला सप्तधातुओंमें प्राप्तहोकर तीनों लोकोंको धारणकरनेवाला अग्निका उत्पादक सातों स्वरों में और वाणीमें प्राप्तहोनेवाला जो शरीररहित उत्तमभूत आकाशमें शीघ्रगामी और शब्दकी योनि कहाता है ऐसा वायुभी अपने तेज से उस देवताओं की सेनामें प्राप्तहोताभया और आतेही वह दैत्योंको दुःख देताहुआ चलनेलगा २८। ३१ और दिव्य गन्धर्व विद्याधर आदिकों समेत क्रीड़ाकरताभया इनसबके विशेप सर्पों के अधिपति बड़े २ सर्प अपने दारुण विपोंको निकाल२कर देवताओंके वाणों में प्राप्त करतेभये और कितनेही सर्प अपने शरीरों समेत देवताओंके वाणोंमें प्रवेशकरजातेभये वहुतसे देवता पर्व्वत शिला और वृक्षोंको धारण करके दैत्योंकी सेनामें प्राप्तहोतेभये ३२।३४ जो पद्मनाभ विष्णुभगवान् जगत्के नाशकरनेके निमित्त कृष्णवर्ण धारण करते हैं वह सर्वयोनि हव्यभुक् यज्ञमें स्थितहोने वाले पंचभूतात्मक श्याम शान्तिकर शत्रुनाशक गदाधर नारायणहैं वह भी पर्व्वतपर उदयहोनेवाले सूर्य्यके समान प्रकाशित होकर आतेभये ३५।३७ वह विष्णुभगवान् सब दैत्योंकी नाश करने वाली महाकाली रूप गदाको बायें हाथमें धारण करतेभये ३८ और अन्य भुजाओंमें शार्ङ्ग धनुष आदिक शस्त्रोंको ग्रहण करतेभये ३९ अर्थात् नारायण भगवान् सर्पभुक् पवनभुक् आकाशगामी मन्दराचल पर्व्वतके समान ऊंचे देव

तारम्भनिर्मुक्तं मन्दराद्रिमिवोच्छ्रितम् ४१ देवासुरविमर्देषु बहुशोदृढविक्रमम्। महेन्द्रेणामृतस्यार्थे वज्रेणकृतलक्षणम् ४२ शिखिनंबलिनञ्चैव तप्तकुण्डलभूषणम्। विचित्रपत्रवसनन्धातुमन्तमिवाचलम् ४३ स्फीतक्रोडावलम्बेन शीतांशुसमतेजसा । भोगिभोगावसिक्तेन मणिरत्नेनभास्वता ४४ पक्षाभ्याञ्चारुपत्राभ्यामावृत्यादिविलीलया । युगान्तेसेन्द्रचापाभ्यान्तोयदाभ्यामिवाम्बरम् ४५ नीललोहितपीताभिः पताकाभिरलंकृतम्। केतुवेषप्रतिच्छन्नं महाकायनिकेतनम् ४६ अरुणावरजंश्रीमानारुह्यसमरेविभुः। सुवर्णस्वर्णवपुषा सुपर्णखेचरोत्तमम् ४७ तमन्वयुर्देवगणा मुनयश्चसमाहिताः। गीर्भिःपरममन्त्राभिस्तुष्टुवुश्चजनार्दनम् ४८ तद्वैश्रवणसंश्लिष्टं वैवस्वतपुरःसरम्। द्विजराजपतिक्षिप्तं देवराजविराजितम् ४९ चन्द्रप्रभाभिर्विपुलं युद्धायसमवर्त्तत। स्वस्त्यस्तुदेवेभ्यइति बृहस्पतिरभाषत। स्वस्त्यस्तुदानवानीके उशनावाक्यमाददे ५० ॥

इति श्रीमत्स्यपुराणेत्रिसप्तत्यधिकशततमोऽध्यायः १७३ ॥

(मत्स्य उवाच) ताभ्यांबलाभ्यांसंजज्ञे तुमुलोविग्रहस्तदा। सुराणामसुराणाञ्च परस्परजयैषिणाम् १ दानवादैवतैःसार्द्धं नानाप्रहरणोद्यताः। समीयुर्युध्यमानावै पर्वताइवपर्वतैः २ तत्सुरासुरसंयुक्तं युद्धमत्यद्भुतंबभौ। धर्माधर्मसमायुक्तं दर्पेणविनयेनच ३ ततोरथैर्विप्रयुक्तैर्वारणैश्चप्रचोदितैः। उत्पतद्भिश्चगगनमासिहस्तैःसमन्ततः ४ क्षिप्यमाणैश्चमुसलैः सम्पतद्भिश्चसायकैः। चापैर्विस्फार्यमाणैश्च पात्यमानैश्चमुद्गरैः ५ तद्युद्ध

दानवोंके अमृत मथन समय बहुत पराक्रम करने वाले अमृतकेही निमित्त इन्द्रके वज्रसे चिह्नित किये हुए शिखा युक्त महाबली कुंडलों समेत विचित्र धातुमय पर्वतके समान चन्द्र और मणियों की समान कान्तिवाले ४०।४४ और महातेजस्वी ऐसे गरुड पर सवार होकर देवताओंकी सेनामें आतेभये उनके आनेकी ऐसी शोभा होतीभई जैसे कि मेघों समेत दो इन्द्रधनुषों करके आकाशकी शोभा होती है उन पचरंगी ध्वजाओंसे अलंकृत महाशरीर वाले गरुड़पर चढ़े विष्णुभगवान्के आते ही सबदेवता और मुनिगण लोग उनके पीछे चलतेभये और परम उत्तम वचनोंकरके उनकी स्तुति भी करतेभये ४५।४८ उनके आगे धर्मराज और इन्द्रसे प्रेरित चन्द्रमा यह दोनों चले उस समय बृहस्पतिजी सब देवताओं को स्वस्तिवचन पूर्वक आशीर्वाद देनेलगे और शुक्राचार्य्यजी दैत्यों की सेनामें आशीर्वाद देतेभये ४९।५० ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांत्रिसप्तत्यधिकशततमोऽध्यायः १७३ ॥

मत्स्यजी बोले कि उन दोनों सेनाओंका ऐसे महायुद्ध होताभया कि परस्पर जीतने की इच्छा करतेहुए देवता और दानव अनेकप्रकारके शस्त्रोंको उठाकर पर्वतों के समान खड़ेहोहोकर युद्धकरने को आवतेभये १।२ और अभिमान समेत धर्माधर्मसे युक्त परस्पर अत्यन्त अद्भुत युद्धप्रवृत्त हुआ ३ इसकेपीछे, रथ, प्रेरित हाथी, और हाथमेंखड्गलिये आकाशमें उछलतेहुएयोद्धा इनसबसे आकाश चारोंओरसे व्याप्तहोगया ४ गिरतेहुए बाण मुसल मुद्गर और चढ़ायेहुएधनुष इनसबसे देवदानवों का

अभवद् घोरं देवदानवसंकुलम्। जगतस्त्रासजननं युगसम्वर्तकोपमम् ६ हस्तमुक्तैश्चपरिघैर्विप्रयुक्तैश्चपर्वतैः। दानवाःसमरेजघ्नुर्देवानिन्द्रपुरोगमान् ७ तेबध्यमानाबलिभिर्दानवैर्जयकाशिभिः। विषण्णवदनादेवा जग्मुरार्तिंपरांमृधे ८ तेऽस्त्रशूलप्रमथिताः परिघैर्भिन्नमस्तकाः। भिन्नोरस्कादितिसुतैर्वमूरक्तंव्रणैर्बहु ९ वेष्टिताःशरजालैश्च निर्यत्नाश्चासुरैःकृताः। प्रविष्टादानवींमायान्नशेकुस्तेविचेष्टितुम् १० अस्तंगतमिवाभाति निष्प्राणसदृशाकृति। बलंसुराणामसुरैर्निष्प्रयत्नायुधंकृतम् ११ दैत्यचापच्युतान्घोरांश्छित्त्वावज्रेण ताञ्छरान्। शक्रोदैत्यबलंघोरं विवेशबहुलोचनः १२ सदैत्यप्रमुखान्हत्वा तद्दानवबलं महत्। तामसेनास्त्रजालेन तमोभूतमथाकरोत् १३ तेऽन्योन्यंनावबुध्यन्त देवानांवाहनानिच। घोरेणतमसाविष्टाः पुरुहूतस्यतेजसा १४ मायापाशैर्विमुक्तास्तु यत्नवन्तःसुरोत्तमाः। वपूंषिदैत्यसिंहानान्तमोभूतान्यपातयन् १५ अपध्वस्ताविसंज्ञाश्च तमसानीलवर्चसा। पेतुस्तेदानवगणाश्छिन्नपक्षाइवाद्रयः १६ तद् घनीभूतदैत्येन्द्रमन्धकारइवार्णवे। दानवन्देवकदनन्तमोभूतमिवाभवत् १७ तदासृजन्महामायां मयस्तांतामसीन्दहन्। युगान्तोद्योतजननीं सृष्टामौर्वेणवह्निना १८ साददाहततःसर्वान् मायामयविकल्पिता। दैत्याश्चादित्यवपुषः सद्यउत्तस्थुराहवे १९ मायामौर्वींसमासाद्य दह्यमानादिवौकसः।

महाघोर युद्ध जगत्को त्रासदेनेवाला प्रलय कालके मेघोंके समान होताभया ५।६ इसके अनन्तर दैत्यलोग हाथसे फेंकेहुए मूसल और पर्व्वतों करके देवताओंको प्रहारकरतेभये ७ तब बलवाले और विजय करनेकी इच्छावाले दैत्यों से पीड़ितहुए देवता महादुःखीहोकर पीड़ाको प्राप्तहोतेभये उससमय अस्त्रोंकीचोटसे दुःखित मूसलोंसे फूटेहुए मस्तक और दैत्योंसे तोड़ीहुई छातीवाले देवतालोग मुखसे रुधिर थूकनेलगे ८।९ जब बाणोंके जालमें लपेटेहुए देवताओंको दैत्यलोगोंनेरोका उससमय दैत्योंकी मायामें फंसेहुए देवता कुछभी नहीं करसके १० फिर दैत्योंसे पीड़ितहुए देवता हारमान कर मरे हुओंके समान होजातेभये और शस्त्र नहीं चलासके ११ इसके अनन्तर सहस्राक्ष इन्द्र अपने वज्रसे दैत्यों के उनघोर बाणोंको छेदनकरके दैत्योंकी सेनामें प्रवेश करताभया १२ और सबदैत्योंकी सेनाका नाशकरके अपने तामस अस्त्र जालके द्वारा दैत्योंकी सेनामें अन्धकार करदेताभया तब वह दैत्य परस्परमें किसीकोभी नजानतेभये और देवताओंकेभी वाहनघोर अन्धकारसे व्याप्तहो गये उस समय इन्द्रने अपने तेजसे देवताओंकी सेनाका अन्धकार दूरकरदिया फिर मायाके अन्धकारसे छूटेहुए देवता यत्नपूर्व्वक अन्धकारसे युक्तहुए दैत्यों के शरीरोंको शस्त्रोंसे गिरातेभये १३।१५ तब नीलकान्तिवाले अन्धकारसे दुःखितहुए दानव युद्धमें कट२कर ऐसे गिरतेभये जैसे कि पक्षकटे हुए पर्व्वत गिरते हैं १६ जबवह महाघोर अन्धकार दैत्योंकी सेनाका नाशकरनेलगा तब मय दैत्य उस तामसी मायाको दग्धकरके अपनी मायाकी रचनासे प्रलय कालकीसी अग्नि रचताभया १७।१८ फिर मयदैत्य से कल्पितकीहुई वहमाया सब देवताओंको नष्टकरतीभयी और सब दैत्य युद्धमें खड़े होजातेभये १९ उस दैत्यकीमायासे जलतेहुए देवता जलदायी शीतल किरणवाले च-

भेजिरेचेन्द्रविषयं शीतांशुंसलिलप्रदम् २० तेदह्यमानाह्यौर्वेण वह्निनानष्टचेतसः। शशं
सुर्वज्रिणंदेवाः सन्तप्ताःशरणैषिणः २१ सन्तप्तेमाययासैन्ये हन्यमानेचदानवैः। चोदितो
देवराजेन वरुणोवाक्यमब्रवीत् २२ औवोंब्रह्मर्षिजःशक्र! तपस्तेपेसुदारुणम्। और्वःस
पूर्वतेजस्वी सदृशोब्रह्मणोगुणैः २३ तंतपन्तमिवादित्यं तपसाजगदव्ययम्। उपतस्थुर्मु
निगणा दिव्यादेवर्षिभिःसह २४ हिरण्यकशिपुश्चैव दानवोदानवेश्वरः। ऋषिंविज्ञापया
मासुः पुरापरमतेजसम् २५ ऊचुर्ब्रह्मर्षयस्तंतु वचनंधर्म्मसंहितम्। ऋषिवंशेषुभगवं
श्छिन्नमूलमिदंपदम् २६ एकस्त्वमनपत्यश्च गोत्रायान्योनवर्तते। कौमारंव्रतमास्थाय
क्लेशमेवानुवर्त्तसे २७ बहूनिविप्र! गोत्राणि मुनीनांभावितात्मनाम्। एकदेहानितिष्ठन्ति
विविक्तानिविनाप्रजाः २८ एवमुच्छिन्नमूलैश्च पुत्रैर्नोनास्तिकारणम्। भवांस्तुतपसाश्रे
ष्ठः प्रजापतिसमद्युतिः२९ तत्रवर्तस्ववंशाय वर्द्धयात्मानमात्मना। त्वयाधर्मोऽर्जितस्तेन
द्वितीयांकुरुवैतनुम् ३० सएवमुक्तोमुनिभिर्ह्यौर्वोमर्मसुताडितः। जगर्हेतान् ऋषिगणान्
वचनंचेदमब्रवीत् ३१ यथायंविहितोधर्मो मुनीनांशाश्वतस्तुसः। आर्षंवैसेवतःकर्म्म
वन्यमूलफलाशिनः ३२ ब्रह्मयोनौप्रसूतस्य ब्राह्मणस्यात्मदर्शिनः। ब्रह्मचर्यंसुचरितंब्र
ह्माणमपिचालयेत् ३३ जनानांवृत्तयस्तिस्रो यद्गृहाश्रमवासिनाम्। अस्माकन्तुवरंवृ
त्तिर्वनाश्रमनिवासिनाम् ३४ अब्भक्षावायुभक्षाश्च दन्तोलूखलिनस्तथा। अश्मकुट्टादश

न्द्रमाको भजतेभये और वड़वानलसे दग्धहुए देवता महासंतप्तहोकर इन्द्रकी शरणमें जाके स्तुति करते भये २०। २१ जबमाया करके देवताओंकी सेना संतप्तहोकर मरनेलगी तब इन्द्रसे प्रेरितहुए बरुण देवता इन्द्रसे यह वचनबोले २२ कि हे इन्द्र और्व अर्थात् बड़वानल ब्रह्मर्षिसे उत्पन्न भया है अर्थात् पूर्व्वकालमें ऊर्वनाम एकऋषि तपस्या करतेभये और गुणोंकरके ब्रह्माके समान होजाते भये २३ तब सूर्य्यके समान तपतेहुए उस ऊर्व ऋषिकी देवर्षि और मुनिगण लोग मिलकर स्तुतिकरतेभये २४ प्रथम तो उस महातेजस्वी ऋषिसे हिरण्यकशिपु दैत्य विज्ञापन करताभया अर्थात् उस हिरण्यकशिपुने उनसे यह धर्मपूर्व्वक वचन कहे कि हे भगवन् यहऋषियों का वंश तो छिन्न मूल अर्थात् कटीहुई जड़वाला होगयाहै केवल आपही एकऋषि हैं सो आपके गोत्रका दूसरा कोई नहीं है तुम कुमार अवस्थाही में व्रतोंको धारणकरके क्लेशोंको भोगतेहो हे महाराज बहुतसे मुनिजनोंके शरीर प्रजाके विना अकेले हैं इसीप्रकार पुत्रोंके विना मुनियोंके वंश नष्टहोगये हैं तुमतो तपस्या करके श्रेष्ठहोकर प्रजापति के समान कान्तिवाले होगयेहो २५। २९ इस हेतुसे आपभी अपनें वंशकी वृद्धिके लिये पुत्रकी उत्पत्तिकरो अपने आत्मासे आत्माको बढ़ाकर दूसरा शरीर उत्पन्न करो ३० यह हिरण्यकशिपु के वचन सुनकर मर्ममें ताड़ित हुए वह ऊर्व ऋषि उनऋषियोंकी निन्दाकरके यह वचनबोले कि जिस प्रकारसे मुनियोंको इस आर्ष धर्मके द्वारा वनकरना और वनके मूलफलादिक खानेका कर्म कहाहै यही परमधर्महै क्योंकि ब्रह्मयोनिमें उत्पन्न होनेवाले आत्मदर्शी ब्राह्मणको ब्रह्मचर्य्यहीका आचरण करनायोग्यहै ३१।३३ गृहस्थवासियोंके तीनप्रकारकेकर्महैं उनमेंसे

तथा पञ्चातपसहाश्चये ३५ एतेतपासितिष्ठन्ति व्रतैरपिसुदुष्करैः। ब्रह्मचर्य्यंपुरस्कृत्यप्रा
र्थयन्तिपराङ्गतिम् ३६ ब्रह्मचर्याद्ब्राह्मणस्य ब्राह्मणत्वंविधीयते। एवमाहुःपरेलोकेब्रह्म
चर्य्यविदोजनाः ३७ ब्रह्मचर्य्येस्थितंधैर्य्यं ब्रह्मचर्य्येस्थितंतपः। येस्थिताब्रह्मचर्य्येषु ब्राह्मणा
दिविसंस्थिताः ३८ नास्तियोगंविनासिद्धिर्नवासिद्धिंविनायशः। नास्तिलोकेयशोमूलं
ब्रह्मचर्य्यात्परन्तपः ३९ योनिगृह्येन्द्रियग्रामंभूतग्रामंचपञ्चकम्। ब्रह्मचर्य्यंसमाधत्ते
किमतःपरमन्तपः ४० अयोगेकेशधरणमसङ्कल्पव्रतक्रिया। अब्रह्मचर्य्येचर्य्याच त्रयं
स्याद्दम्भसंज्ञकम् ४१ क्वदाराःक्वचसंयोगः क्वचभावविपर्य्ययः। नन्वियंब्रह्मणासृष्टा
मनसामानसीप्रजा ४२ यद्यस्तितपसोवीर्य्यं युष्माकंविदितात्मनाम्। सृजध्वंमानसान्
पुत्रान् प्राजापत्येनकर्म्मणा ४३ मनसानिर्म्मितायोनिराधातव्यातपस्विभिः। नदार
योगोबीजंवा व्रतमुक्तंतपस्विनाम् ४४ यदिदंलुप्तधर्म्मार्त्थं युष्माभिरिहनिर्भयैः। व्या-
हृतंसद्भिरत्यर्थमसद्भिरिवमेमतम् ४५ वपुर्दीप्तान्तरात्मानमेतत्कृत्वामनोमयम्। दारयो-
गंविनास्रक्ष्ये पुत्रमात्मतनूरुहम् ४६ एवमात्मानमात्मामे द्वितीयंजनयिष्यति। वन्ये
नानेनविधिना दिधिक्षन्तमिवप्रजाः ४७ और्वस्तुतपसाविष्टो निवेश्योरुंहुताशने। मम
न्थैकेनदर्भेण सुतस्यप्रभवारणिम् ४८ तस्योरुंसहसाभित्वा ज्वालामालीह्यनिन्धनः।

जो वनमें वास करते हैं उनको हमारीही वृत्तिमें रहना श्रेष्ठ है ३४ जल पीनेवाले वायुभक्षी दाने चाबनेवाले पत्थरोंपर तप करनेवाले और पंचाग्नि के तपनेवाले यहऐसे २ ऋषि दारुण व्रतकरके तपोंमें स्थित होते हैं और ब्रह्मचर्य्यपूर्व्वक परमगतिकी प्रार्थना करते हैं ३५। ३६ ब्रह्मचर्य्यही करनेसे ब्राह्मणमें ब्राह्मणपना कहाजाताहै ब्रह्मचर्य्यके जाननेवाले अन्य जनभी ऐसा कहते हैं कि ब्रह्मचर्य्यमें धैर्य्य स्थितहै जो २ ब्राह्मण अपने तपमें स्थित हैं वह स्वर्गहीमें स्थितहैं ३७। ३८ योगके विना सिद्धिनहीं है सिद्धिके विना यशनहीं है यशके विना लोकनहीं है इस हेतुसे मूल सबका ब्रह्मचर्य्यही परमतप है ३९ जो इन्द्रियोंके समूहोंको और पंचभूतोंको रोककर ब्रह्मचर्य्यको धारण करता है उससे अधिक कोई तपनहीं है ४० योगके बिना बालोंका बढ़ाना संकल्प के विना व्रतकी क्रियाओंका करना और ब्रह्मचर्य्यके विना कोई आचरण करना यहतीनों दंभ अर्थात् पाखंड कहाते हैं ४१ कहाँ स्त्री है कहाँ उसका संयोग है कहाँ उसके भावकी विपरीतता है निश्चयकरके ब्रह्माजी के मनही करके यह सृष्टि रचीहुईहै ४२ जो तुममें तपका वीर्य्यहै तो प्राजापत्य कर्मकरके अपने मनहीसे प्रजाको उत्पन्नकरो ४३ तपस्वियोंको तो अपने मनसेही उत्पन्न कीहुई योनिमें गर्भाधान करना योग्यहै और जो कि तुमने धर्मका लोपकरके ऐसाकहाहै तो यह तुम्हारा कहना मेरे चित्तसे दुष्ट जनोंके कहनेके समानहै ४४। ४५ मैं इस अपने अन्तरात्माको देदीप्त मनोमय शरीर करके स्त्रीके विनाही पुत्रकोरचूंगा ४६ इसप्रकारसे अपने आत्मासे दूसरे शरीरको उत्पन्न करूंगा मैं इसवनकी विधिसे ऐसे पुत्रकोरचूंगा जो कि प्रजामात्रको दग्धकरेगा ४७ इसके अनन्तर वह ऊर्वऋषि तपसे युक्तहो अग्निमें जंघाओंको प्रवेशकर एकडाभकरके पुत्रकी उत्पन्न करनेवाली अरणीकाष्ठको मथता

जगतोदहनाकांक्षी पुत्रोऽग्निःसमपद्यत ४९ ऊर्वस्योरुंविनिर्भिद्य औौर्वोनामान्तकोऽन
लः । दिधक्षन्निवलोकांस्त्रीन् जज्ञेपरमकोपनः ५० उत्पन्नमात्रश्चोवाच पितरंक्षीणया
गिरा । क्षुधामेबाधतेतात ! जगद्भक्ष्येत्यजस्त्रमाम् ५१ त्रिदिवारोहिभिर्ज्वालैर्जृम्भमाणो
दिशोदश । निर्दयन्सर्वभूतानि ववृधेसोऽन्तकोऽनलः ५२ एतस्मिन्नन्तरेब्रह्मा मुनिमूर्वं
सभाजयन् । उवाचवार्यतांपुत्रो जगतश्चदयांकुरु ५३ अस्यापत्यस्यतेविप्र ! करिष्ये
स्थानमुत्तमम् । तथ्यमेतद्वचःपुत्र ! शृणुत्वंवदतांवर ! ५४ (ऊर्व उवाच) धन्योऽस्म्यनु
गृहीतोऽस्मियन्मेऽद्यभगवांच्छिशोः । मतिमेतांददातीह परमानुग्रहायवै ५५ प्रभातका
लेसंप्राप्ते कांक्षितव्येसमागमे । भगवन् ! तर्पितःपुत्रः कैर्हव्यैःप्राप्स्यतेसुखम् ५६ कुत्र
चास्यनिवासःस्याद्भोजनंवाकिमात्मकम् । विधास्यतीहभगवान् वीर्यतुल्यंमहौजसः ५७
(ब्रह्मोवाच) वडवामुखेऽस्यवसतिः समुद्रेवैभविष्यति । ममयोनिर्जलंविप्र ! तस्यपी
तवतःसुखम् ५८ यत्राहमासनियतं पिबन्वारिमयंहविः । तद्धविस्तवपुत्रस्य विसृजाम्या
लयन्त्वतत् ५९ ततोयुगान्तेभूतानामेषचाहञ्चपुत्रक ! । सहितौविचरिष्यावो निष्पुत्राणा
मृणापहः ६० एषोऽग्निरन्तकालेतु सलिलाशीमयाकृतः । दहनःसर्वभूतानां सदेवासुर
रक्षसाम् ६१ एवमास्त्वितितंसोऽग्निः संवृतज्वालमण्डलः । प्रविवेशार्णवमुखं प्रक्षिप्य

भया तब उनकी जंघाको भेदन करके अपने बलसे इंधन के विनाही जगत्को दग्ध करनेकी इच्छा
करताहुआ पुत्ररूप अग्नि उत्पन्न होताभया ४८ । ४९ इस रीति से वह परमकोप करने वाला
औौर्व नाम अग्नि ऊर्वऋषिकी जंघाको भेदनकरके उत्पन्न होताभया ५० यह ऊर्वऋषि का पुत्र
उत्पन्न होतेही क्षीणवाणी से अपने पितासे यह वचन कहताभया कि हे तात मुझको क्षुधा बाधा
कररही है मुझको आप जगत् के भक्षण करने की आज्ञा दीजिये ५१ ऐसा कहकर वह औौर्वनाम
अग्नि स्वर्ग में जा अपनी झलों से दशों दिशाओं को व्याप्तकर सब भूतों के भस्म करने की इच्छा
रौद्रींचैवपरांमूर्त्तिंमहादेवःप्रदास्यति । युष्मन्मुख्यामहादेव्यस्तद्युक्तंपरिरक्षथ ८१
मयामातृगणःसृष्टो योऽयंविगतसाध्वसः । एषनित्यंविशालाक्ष्योमयैवसहरंस्यते ८२
मयासार्द्धंतथापूजांनरेभ्यश्चैवलप्स्यथ । पृथक्सुपूजितालोकैः सर्वान्कामान्प्रदास्यथ ८३
शुष्कांसंपूजयिष्यन्तियेचपुत्रार्थिनोजनाः । तेषांपुत्रप्रदादेवी भविष्यतिनसंशयः ८४
एवमुक्त्वातुभगवान् सहमातृगणेनतु । ज्वालामालाकुलवपुस्तत्रैवान्तरधीयत ८५
तत्रतीर्थंसमुत्पन्नं कृतशौचेतियज्जगुः । तत्रापिपूर्वजोदेवो जगदार्तिहरोहरः ८६ रौद्र
स्यमातृवर्गस्य दत्त्वारुद्रस्तुपार्थिव !। रौद्रांदिव्यांतनुंतत्र मातृमध्येव्यवस्थितः ८७
सप्ततामातरोदेव्यः सार्द्धनारीनरः शिवः । निवेश्यरौद्रंतत्स्थानं तत्रैवान्तरधीयत ८८

कहाती हैं ७०।७२ यहसब मातृका महाबलवाली हैं विष्णुके शरीरसे उत्पन्नहुई हैं सृष्टिके संहार करने में समर्थ हैं हे राजन् यह विष्णुसे रचीहुई मातृका उन शिवजीकी मातृकाओंको अपनेक्रोधसे भजादेतीभई क्योंकि इनका दारुणदृष्टिकातेज किसीसेभीनहीं सहाजाताहै इनको भगाकर सब बत्तीसों मातृका नृसिंहजीकी शरणमें प्राप्तहोगईं उस समय नृसिंहजी इनसबसे बोले कि जैसे मनुष्य औरपशुअपने पुत्रोंकोपालते हैं और देवता प्रजाकी रक्षाकरतेहैं इसीप्रकारतुमभीमेरी आज्ञासेलोकोंकीरक्षाकरो और मनुष्य तथादेवताओंसे शिवजीका पूजनकरवाओ ७३।७७ जो शिवजीकेभक्तहैं उनकोकभीबाधा नदेना चाहिये और मेरा स्मरण करते हैं उनकी सदैव रक्षा करनी चाहिये ७८ और जो मनुष्य सदैव तुम्हारे अर्थ बलिप्रदान करेंगे उनके सदैव वाञ्छित मनोरथ सिद्धहोंगे ७९ और जो मेरे कहेहुए स्तोत्रादिका पाठकरेंगे उनसब कीभी तुमको रक्षा करनी चाहिये और महादेवजी तुम्हारे अर्थ अपनी परम रौद्री मूर्त्तिको देंगे वहीमूर्त्ति तुमसबमें मुख्यहोगी उसमें युक्तहोकर तुम संसारकी रक्षाकरना और जो मैंने मातृगणरचेहैं वहमेरेसाथ विहार करेंगे और मेरेसंगही मनुष्योंकी कीहुई पूजाको प्राप्तहोंगी और जो उनकी पूजाजुदी करेंगे उनके सब मनोरथ पूर्णहोंगे ८०।८३ और जोपुत्रकी इच्छाकरने वाले जन शुष्कदेवताकापूजनकरेंगे उनको वह देवी निस्सन्देहपुत्रदेगी ८४ ऐसे कहकर वहविष्णुभगवान वहाँही अन्तर्द्धान होगये फिर वहाँ सुतशौचनाम वालातीर्थ उत्पन्नहोताभया वहाँ जगत्की पीड़ा हरनेवाले महादेवजी स्थितहैं ८५।८६ शिवजी रौद्रादेवीको इनमातृकाओं के अर्थदेकर उनसबोंके

र्यदायदायातिचतत्समीपे । देवेश्वरस्यापिनृसिंहमूर्तेः पूजांविध
समातृवर्गस्यहरस्यमूर्त्ति त्रिपुरान्धकारिः ८९ ॥ इति श्रीमत्स्यपुराणेऽष्टसप्तत्यधिकशततमोऽध्यायः १७८ ॥
त्ते

(ऋषय ऊचुः) श्रुतोऽन्धकबधःसूत ! यथावत्त्वदुदीरितः । वाराणस्यास्तुमाहात्म्यं
श्रोतुमिच्छामसाम्प्रतम् १ भगवान्पिंगलःकेन गणत्वंसमुपागतः । अन्नदत्वञ्चसम्प्राप्तो
वाराणस्यांमहाद्युतिः २ क्षेत्रपालःकथंजातः प्रियत्वञ्चकथङ्गतः । एतदिच्छामकथितं श्रोतुं
ब्रह्मसुत ! त्वया३ (सूत उवाच) शृणुध्वंवैयथालेभे गणेशत्वंसपिङ्गलः। अन्नदत्वंचलोका
नांस्थानंवाराणसीत्विह४पूर्णभद्रसुतःश्रीमानासीद्यज्ञःप्रतापवान्। हरिकेशइतिख्यातोब्र
ह्मण्योधार्मिकश्चह५तस्यजन्मप्रभृत्येव शर्वेभक्तिरनुत्तमा।तदासीत्तन्नमस्कारस्तन्निष्ठस्त
त्परायणः ६ आसीनश्चशयानश्च गच्छंस्तिष्ठन्ननुव्रजन् । भुञ्जानोऽथपिबन्वापि रुद्र
मेवान्वचिन्तयत्७तमेवंयुक्तमनसम्पूर्णभद्रःपिताब्रवीत् । नत्वांपुत्रमहंमन्ये दुर्जातोयस्त्व
मन्यथा ८नहियक्षकुलीनानामेतद्वृत्तंभवत्युत । गुह्यकावतयूयंवै स्वभावात्क्रूरचेतसः९क्र
व्यादाश्चैवकिंभक्षा हिंसाशीलाश्चपुत्रक ! । मैवंकार्षीर्नतेवृत्तिरेवंदृष्टामहात्मना १०स्व
यम्भुवायथादिष्टा त्यक्तव्यायदिनोभवेत् । आश्रमान्तरजंकर्म नकुर्युर्गृहिणस्तुतत् ११हि
त्वामनुष्यभावंच कर्मभिर्विविधैश्चर । यत्त्वमेवंविमार्गस्थो मनुष्याज्जातएवच१२ यथा
वद्विविधन्तेषां कर्मतज्जातिसंश्रयम् । मयापिविहितंपश्य कर्मैतन्नात्रसंशयः १३ (सूतउ-

मध्यमेंही स्थित होतेभये फिर वहाँही सप्तमातृका औरअर्द्धाङ्गी पार्वतीजी समेत शिवजीभी अन्तर्द्धानहोतेभये औरजिस२ समयमें मातृवर्गसे युक्तहोकर महादेवजी नृसिंहजीकी मूर्त्तिके समीपजाते हैं तवहीं नृसिंहजीका पूजन करतेहैं ८७।८९॥

इति श्रीमत्स्यपुराणभाषाटीकायामष्टसप्तत्यधिकशततमोऽध्यायः १७८॥

ऋषियोंने पूछा हे सूतजी आपकेकहेहुए अंधक दैत्यके वधको हमनेसुना अवहम काशीजीके माहात्म्यको सुनाचाहतेहैं १ पिंगलभगवान् गणेशपनेको कैसे प्राप्तहुएहैं काशीजीमें अन्नदाता कैसेकहायेहैं क्षेत्रपालकैसेभयेहैं और शिवजीके प्यारे कैसेहुएहैं यहसबहम सुनाचाहतेहैं २।३ सूतजीबोलेकि जैसे प्रकारसेकि पिंगलगणेशहुए और अन्नदाताहुए वह सवमुझसे सुनो ४ एक पूर्णभद्रकापुत्र यज्ञ नाम होताभया वहहरिकेश नामसे विख्यातहोताभया वहवड़ाब्रह्मण्य और धार्मिकथा५वह आजन्मसेही खातेपीते सोते बैठते चलते और फिरते सदैव सबकालमें शिवजीमें भक्तिपूर्वक ध्यानलगाये रहताथा ६।७ उस ऐसे आचरणयुक्त रहनेवालेके पिता पूर्णभद्रने कहा कि हेपुत्र तुझको मैं अपना पुत्रनहीं मानताहूं तूबुरे विलक्षण प्रकारसे उत्पन्नहुआहै यक्षोंके कुलमें ऐसा आचरणकरना योग्यनहींहै हम क्रूर स्वभाववाले होकर मांसभक्षी और हिंसा करनेवालेहैं हे पुत्र ऐसी तेरे सरीखी वृत्ति हमारी ब्रह्माजीने नहीं करी है सो अपनी वृत्तिको त्यागकर दूसरे आश्रमकी वृत्ति नहीं करनी चाहिये ८।११ इसलिये मनुष्यभावको त्यागकर अनेककर्मोंका आचरणकर--नहीं तो ऐसे कर्मकरनेवालातू अवश्य मनुष्यहीसे जन्माहै और अपनी इस जातिमें प्राप्तहोनेवाले मेरेभी कर्मको तू देख १२।१३ सूतजी

CC-0. Digitized by eGangotri and MIDI - Delhi

वाच)एवमुक्त्वासतंपुत्रं पूर्णभद्रःप्रतापवान्। उवाचनिष्क्रमन्क्षिप्रं गच्छपुत्रयथेच्छसि १४
ततःसनिर्गतस्त्यक्त्वा गृहंसम्बन्धिनस्तथा। वाराणसींसमासाद्य तपस्तेपेसुदुश्चरम् १५
स्थाणुभूतोह्यनिमिषः शुष्ककाष्ठोपलोपमः। सन्नियम्येन्द्रियग्राममवातिष्ठतनिश्चलः १६
अथतस्यैवमनिशन्तत्परस्यतदाशिषः । सहस्रमेकंवर्षाणां दिव्यमप्यभ्यवर्तत १७ व
ल्मीकेनसमाक्रान्तो भक्ष्यमाणःपिपीलिकैः। वज्रसूचीमुखैस्तीक्ष्णैर्विध्यमानस्तथैवच १८
निर्मांसरुधिरत्वक्च कुन्दशङ्खेन्दुसप्रभः। अस्थिशेषोऽभवच्छर्वं देवंवैचिन्तयन्नपि १९
एतस्मिन्नन्तरेदेवी विज्ञापयतशङ्करम्। (देव्युवाच) उद्यानंपुनरेवेह द्रष्टुमिच्छामिसर्व
दा २० क्षेत्रस्यदेवमाहात्म्यं श्रोतुंकौतूहलंहिमे । यतश्चप्रियमेतत्ते तथास्यफलमुत्तम।
२१ इतिविज्ञापितोदेवः शर्वाण्यापरमेश्वरः। शर्वःपृष्टोयथातथ्यमाख्यातुमुपचक्रमे २२
निर्जगामचदेवेशः पार्वत्यासहशङ्करः । उद्यानंदर्शयामास देव्यादेवःपिनाकधृक् २३
(देवदेव उवाच) प्रोत्फुल्लनानाविधगुल्मशोभितं लताप्रतानावनतंमनोहरम् । विरूढ
पुष्पैःपरितःप्रियंगुभिःसुपुष्पितैःकण्टकितैश्चकेतकैः २४ तमालगुल्मैर्निचितंसुगन्धिभिः
सकर्णिकारैर्वकुलैश्चसर्वशः।अशोकपुन्नागवरैःसुपुष्पितैर्द्विरेफमालाकुलपुष्पसञ्चयैः२५ क्व
चित्प्रफुल्लाम्बुजरेणुरूषितैर्विहङ्गमैश्चारुकलप्रणादिभिः। विनादितंसारसमण्डनादिभिः
प्रमत्तदात्यूहरुतैश्चवल्गुभिः २६ क्वचिच्चचक्राह्वरवोपनादितंक्वचिच्चकादंबकदंबकैर्युतम्।
क्वचिच्चकारण्डवनादनादितं क्वचिच्चमत्तालिकुलाकुलीकृतम् २७ मदाकुलाभिस्त्वमराङ्ग

कहतेहैं कि वह प्रतापीपूर्णभद्र अपने पुत्रको इसप्रकारसे समझाकर यह कहताभया कि हे पुत्र
तेरी जहांजानेकी इच्छाहो वहां घरसे निकलकर चलाजा १४ जब उसके पिताने ऐसाकहा तब
उसकापुत्र अपने घरकोत्याग काशीजीमें जाकर ऐसा दुश्चर तपकरनेलगा कि आंखोंकोमीच शुष्क
काष्ठके स्तंभके समान खड़ाहोकर इन्द्रियोंको रोकेहुए निश्चल होजाताभया १५। १६ इसप्रकारसे
जब वह दिव्य हज़ारों वर्षोंतक तपस्या करताभया तबउसके शरीरके चारोंओर सर्पोंकी बामीहोगई
कीड़ी और दीमक लगगईं इसप्रकार उसमहादेवजीके चिन्तवन करनेवालेके शरीरका सबमांस
और रुधिर सूखगया शंखके समान श्वेतहड्डियां चमकने लगगईं १७। १९ इसके पीछे देवीपार्वती
जी शिवजीसे यह प्रार्थना करतीभईं कि हे देव मैं बाग वन और बगीचोंके देखनेकी इच्छा करतीहूं
और इसकाशी क्षेत्रके माहात्म्यकोभी सुनाचाहतीहूं वह आपकहिये २० । २१ जब इसप्रकारसे पार्वतीजीने
शिवजीसे कहा तब शिवजी यथार्थ माहात्म्य कहनेके निमित्त पार्वतीजीके संग काशीसे बाहर
निकलकर पार्वतीजीको बनकीशोभा दिखातेभये २२।२३ महादेवजी बोले कि हे पार्वती अनेक
प्रकारके फूलेहुए पुष्पोंके गुच्छे वेल लता केतकीकेपुष्प तमाल अमलतास अशोक पुन्नाग और नाना
सुगन्धित पुष्पोंसे शोभित और भ्रमरोंसेयुक्त इसवनकोदेखो २४ । २५ इसवनमें कहींतो फूलेहुए
कमलोंपर श्रेष्ठवाणी बोलनेवाले पक्षियोंकी शोभाहोरही है कहीं सारस आदि पक्षी बोलते हैं कहीं
अनेकप्रकारके मदोन्मत्त चक्रबाकादि पक्षियोंकी शोभा कहीं उत्तमहंस कारंडव और मदोन्मत्त भौंरे

नाभिर्निषेवितञ्चारुसुगन्धिपुष्पम् । क्वचित्सुपुष्पैःसहकारवृक्षैर्लतोपगूढैस्तिलकद्रुमैश्च २८ प्रगीतविद्याधरसिद्धचारणं प्रवृत्तनृत्याप्सरसाङ्गणाकुलम्। प्रहृष्टनानाविधपक्षिसेवितं प्रमत्तहारीतकुलोपनादितम् २९ मृगेन्द्रनादाकुलसत्वमानसैः क्वचित्क्वचित्द्वन्द्वकदम्बकैर्मृगैः। प्रफुल्लनानाविधचारुपङ्कजैः सरस्तटाकैरुपशोभितंक्वचित् ३० निविडनिचुलनीलं नीलकण्ठाभिरामं मदमुदितविहङ्गव्रातनादाभिरामम् ॥ कुसुमिततरुशाखालीनमत्तद्विरेफं नवकिशलयशोभाशोभितप्रान्तशाखम् ३१ क्वचिद्वदन्तिक्षतचारुवीरुधं क्वचिल्लतालिङ्गितचारुवृक्षकम् । क्वचिद्विलासालसगामिबर्हिणं निषेवितंकिम्पुरुषव्रजैःक्वचित् ३२ पारावतध्वनिविकूजितचारुशृङ्गैरभ्रङ्कषैःसितमनोहरचारुरूपैः । आकीर्णपुष्पनिकुरम्बविमुक्तहासैर्विभ्राजितंत्रिदशदेवकुलैरनेकैः ३३ फुल्लोत्पलागुरुसहस्रवितानयुक्तै स्तोयावयैस्तमनुशोभितदेवमार्ग्गम् । मार्ग्गान्तरागलितपुष्पाविचित्रभक्तिसम्बद्धगुल्मविटपैर्विहगैरुपेतम् ३४ तुङ्गाग्रैर्नीलपुष्पस्तवकभरनतप्रान्तशाखैरशोकैर्म्मत्तालिव्रातगीतश्रुतिसुखजननैर्भासितान्तर्म्मनोज्ञैः । रात्रौ चन्द्रस्यभासाकुसुमिततिलकैरेकतांसम्प्रयातञ्छायासुप्तप्रबुद्धास्थितहरिणकुलालुप्तदर्भाङ्कुराग्रम् ३५ हंसानांपक्षपातप्रचालितकमलस्वच्छविस्तीर्णतोयं तोयानांतीरजातप्रविकचकदलीवाटनृत्यन्मयूरम् । मायूरैःपक्षचन्द्रैःक्वचिदपिपतितैरञ्जितक्ष्माप्रदेशं देशेदेशेविकीर्णप्रमुदितविलसन्मत्तहारीतवृक्षम् ३६ सारङ्गःक्वचिदपिसेवितप्रदे

बोलरहे हैं कहीं मदसे भरीहुई देवाङ्गनापुष्पोंको सूँघरहीं कहीं उत्तम सुगन्धि वाले आंबोंके ऊपर चढ़ीहुईलताओंकी शोभाहोरही है इसरीतिसे शिवजी पार्वतीजीको उसवनकी शोभाको दिखाते भये २६।२८ कहीं अनेकविद्याधर गंधर्व गीतगाते कहीं अप्सरानाचरहीं कहींप्रसन्नहुए पक्षीबोलरहे कहीं सिंहोंकी गर्जनासे भयभीत मृगभाजरहे कहीं अनेक प्रकारके प्रफुल्लितकमलोंसेयुक्त सरोवर शोभादेरहे कहीं जलवेतोंकीशोभा कहीं पुष्पितवृक्षोंपर भ्रमरगुंजारकरते कहीं नवीन अंकुरपत्तोंसे वृक्षोंकीडाली शोभित होरहीं २९।३१ कहींहाथियोंके चलनेसे सुन्दरवेलटूटरहीं कहीं लताओं से लिपटेहुए सुन्दरवृक्षदीखरहे कहींक्रीडाकरतेहुए मोरोंकेचलनेकी औरयक्षोंके चलनेकी शोभाहोरही कहीं कबूतरोंकीध्वनि होरही ऐसे श्वेतादिवर्णके पुष्पोंसमेत देवताओंके कुलोंसेशोभितहोरहे वनको पार्वतीको दिखातेभये ३२।३३ उसवनकेमार्गमें खिलेहुए वृक्षोंकी ऐसीशोभाहोरहीथी जैसी कि देवताओंके मार्गकीशोभाहोतीहै जहाँमार्गके वृक्षोंपरबैठेहुए अनेकप्रकारकेपक्षी शब्दकररहे पुष्पोंकेगुच्छोंसे नम्रहुई डालियोंवाले अशोकवृक्षोंकी अपूर्व शोभाहोरही मदोन्मत्त भ्रमरोंके गीतोंसे गुंजायमान होने से महा शोभायमान रात्रिके समय फूले हुए पुष्प और चन्द्रमाकी किरणोंकी एककान्ति होरही एक ओर वृक्षोंकी छायामें डाभके अंकुरोंमें खड़ेहुए मृगोंकी न्यारीही शोभादेरही हंसोंके परोंकेलगनेसे सरोवरके जलकी और पुष्पोंकी अधिक शोभा दिखाई पड़तीथी जलके सरोवरोंकेही समीपमोरोंके नृत्य करने में उनके परोंकी मोरचन्द्रिका जुदीचमकतीं कहीं सारंगपक्षियोंकी शोभा कहीं खिले

शं सच्छन्नंकुसुमचयैःक्वचिद्विचित्रैः। हृष्टाभिःक्वचिदपिकिन्नराङ्गनाभिः क्षीबाभिःसमधुरगीतवृक्षखण्डम् ३७ संसृष्टैःक्वचिदुपलिप्तकीर्णपुष्पैरावासैःपरिवृतपादपंमुनीनाम्। आमूलात्फलनिचितैःक्वचिद्विशालैरुत्तुङ्गैःपनसमहीरुहैरुपेतम् ३८ फुल्लातिमुक्तकलतागृहसिद्धलीलंसिद्धाङ्गनाकनकनूपुरनादरम्यम्। रम्याप्रियंगुतरुमञ्जरिसक्तभृङ्गं भृङ्गावलीषुस्खलिताम्बुकदम्बपुष्पम् ३९ पुष्पोत्करानिलविघूर्णितपादपाग्रमग्रेसरोभुविनिपातितवंशगुल्मम्। गुल्मान्तरप्रभृतिलीनमृगीसमूहं संमुह्यतान्तनुभृतामपवर्गदातृ४० चन्द्रांशुजालधवलैस्तिलकैर्मनोज्ञैःसिन्दूरकुंकुमकुसुम्भनिभैरशोकैः। चामीकराभनिचयैरथकर्णिकारैः फुल्लारविन्दरचितंसुविशालशाखैः ४१ क्वचिद्रजतपर्णाभैःक्वचिद्विद्रुमसन्निभैः। क्वचित्काञ्चनसङ्काशैः पुष्पैराचितभूतलम् ४२ पुन्नागेषुद्विजगणविरुतं रक्ताशोकस्तबकभरनमितम्। रम्योपान्तंश्रमहरपवनं फुल्लाब्जेषुभ्रमरविलसितम् ४३ सकलभुवनभर्तालोकनाथस्तदानीन्तुहिनशिखरिपुत्र्याः सार्द्धमिष्टैर्गणेशैः। विविधतरुविशालंमत्तहृष्टान्यपुष्टमुपवनतरुरम्यंदर्शयामासदेव्याः ४४(देव्युवाच)उद्यानंदर्शितंदेव! शोभयापरयायुतम्। क्षेत्रस्यतुगुणान्सर्वान् पुनर्वक्तुमिहार्हसि ४५ अस्यक्षेत्रस्यमाहात्म्यमविमुक्तस्यतत्तथा। श्रुत्वापिहिनमेतृप्तिरतोभूयोवदस्वमे४६(देवदेवउवाच)इदंगुह्यतमं क्षेत्रं सदावाराणसीमम। सर्वेषामेवभूतानांहेतुर्मोक्षस्यसर्वदा ४७अस्मिन्सिद्धाःसदादेवि! मदीयंव्रतमास्थिताः। नानालिङ्गधरानित्यं ममलोकाभिकांक्षिणः ४८ अभ्यसन्ति

हुए अनेक विचित्र पुष्पोंके समीप मदोन्मत्त यक्षोंकी स्त्रियोंके गानकी सुरीली वाणी कहीं पुष्पोंसे बिछी हुई पृथ्वीपर मुनियोंका वास कहीं फालसे आम आदिक उत्तम २ फलोंवाले वृक्ष शोभित होरहे कहीं फूलेहुए पुष्पोंके समीपमें चलती हुई सिद्ध चारणोंकी स्त्रियोंके नूपुरोंके शब्द कहीं कदंबके पुष्पों में लगे हुए भ्रमरोंकी श्यामता कहीं पुष्पोंवाले वृक्षोंसे स्पर्श कीहुई वायुकी सुगन्धि फैलरही कहीं वृक्षों के गुच्छों में लगीहुईं भृगियों की शोभाहोरही कहीं चन्द्रमाकी किरणों के समान श्वेत पुष्प कहीं सिंदूर केशर और कुसुम्भ इन वर्णोंके समान पुष्प कहीं फूलेहुए कमल और कहीं अशोकादिक वृक्षोंसे शोभितहुए वनकी शोभाको दिखातेहुए ३४। ४१ कहीं चाँदीके कहीं मूंगेके और कहीं सुवर्णके समान पुष्पोंवाले वृक्षोंसे भूमिकी शोभा होरही ४२ पुन्नागोंपर बैठे हुए पक्षी बोलरहे लाल अशोक वृक्षोंकी शोभामें सुगन्धित वायुचलरही फूलेकमलोंपर भौंरे भ्रमरहे ऐसे उसवनको सकल लोकोंके पति महादेवजी पार्वतीजीसे युक्तहोकर देखतेभये और पार्वतीको दर्शनभी करातेभये ४३। ४४ उस वनको देखकर पार्वतीजीबोलीं—हेदेव आपने इस वनकी परमशोभाको दिखाया अब इस काशीक्षेत्रके गुणोंकोभी वर्णनकीजिये क्योंकि इसक्षेत्रके माहात्म्य सुननेसे मेरी तृप्तिनहीं होतीहै इसीसेमैं फिर सुनना चाहतीहूं ४५।४६ महादेवजी बोले यह काशी जीमेरा उत्तमक्षेत्र है सबभूतमात्रोंकी सदैव मोक्षकाहेतु है ४७हेमहादेवि इसक्षेत्रमें अनेक लिंगोंका आचरण कियेहुए मेरे व्रतमें स्थितहोकर सिद्ध पुरुष रहतेहैं ४८ मुक्त आत्मावाले जितेन्द्रिय पुरुष इस

परंयोगं मुक्तात्मानोजितेन्द्रियाः। नानावृक्षसमाकीर्णे नानाविहगकूजिते ४९ कमलोत्पलपुष्पाढ्यैः सरोभिःसमलङ्कृते। अप्सरोगणगन्धर्वैः सदासंसेवितेशुभे ५० रोचतेमेसदावासोयेनकार्येणतच्छृणु। मन्मनाममभक्तश्च मयिसर्वार्पितक्रियः ५१ यथामोक्षमिहाप्नोति ह्यन्यत्रनतथाक्वचित्। एतन्ममपरंदिव्यं गुह्याद्गुह्यतरंमहत् ५२ ब्रह्मादयस्तुजानंतियेऽपि सिद्धामुमुक्षवः। अतःप्रियतमंक्षेत्रं तस्माच्चेहरतिर्मम ५३ विमुक्तंनमयायस्मान्मोक्ष्यतेवाकदाचन। महत्क्षेत्रमिदंतस्मादविमुक्तमिदंस्मृतम् ५४ नैमिषेथकुरुक्षेत्रे गङ्गाद्वारेचपुष्करे। स्नानात्संसेविताद्वापिनमोक्षःप्राप्यतेयतः ५५ इहसंप्राप्यतेयेनततएतद्विशिष्यते। प्रयागे चभवेन्मोक्ष इहवामत्परिग्रहात् ५६ प्रयागादपितीर्थाग्र्यादिदमेवमहत्स्मृतम्।जैगीषव्यः परांसिद्धिं योगतःसमहातपाः ५७ अस्यक्षेत्रस्यमाहात्म्याद्भक्त्याचममभावनात्। जैगीषव्योमहाश्रेष्ठो योगिनांस्थानमिष्यते ५८ ध्यायतस्तत्रमांनित्यं योगाग्निर्दीप्यतेभृशम्। कैवल्यंपरमंयाति देवानामापिदुर्लभम् ५९ अव्यक्तलिङ्गैर्मुनिभिःसर्वसिद्धान्तवेदिभिः।इह संप्राप्यतेमोक्षो दुर्लभोदेवदानवैः ६० तेभ्यश्चाहंप्रयच्छामि भोगैश्वर्यमनुत्तमम्। आत्मनश्चैवसायुज्यमीप्सितंस्थानमेवच ६१ कुवेरस्तुमहायक्षस्तथाशर्वार्पितक्रियः। क्षेत्रसंवसनादेव गणेशत्वमवापह ६२ सम्बर्तोभवितायश्च सोऽपिभक्त्याममैवतु। इहैवाराध्य मांदेवि ! सिद्धिंयास्यत्यनुत्तमाम् ६३ पराशरसुतोयोगी ऋषिर्व्यासोमहातपाः। धर्म्म

उत्तम क्षेत्रमें योगका अभ्यास करते हैं ४९ कमलादि पुष्पोंसे सुशोभित सरोवर अप्सरा गन्धर्वादिकोंसे सेवित इस सुन्दर क्षेत्रमें मेरावास जिसहेतुसे सदैव रहताहै उस कारणको मैं तुमको सुनाता हूं इस क्षेत्रमें मुझमें मन लगानेवाले और मेरेहीमें सबकर्म अर्पण करनेवाले भक्तलोग जैसे यहाँ मोक्षको प्राप्तहोजाते हैं वैसे अन्यत्रकहीं नहीं होसक्ते यहमेरामत परमदिव्य और दृढ़है ५०। ५२ ब्रह्मादिक देवता और मोक्षकी इच्छा करनेवाले सिद्धलोग यहसबभी इसीक्षेत्रको बड़ामानते हैं इस हेतुसे यहाँपर मेरी परमप्रीति है ५३ इसक्षेत्रकेविना मैंकभीभी मोक्षनहीं करताहूं इसकारणसे मोक्षकी इच्छा करने वालोंको यही महत्क्षेत्र है ५४ नैमिषारण्य, कुरुक्षेत्र, गंगाद्वार और पुष्कर इन सब में स्नानकरनेसे अथवा इनका सेवनकरनेसे भी जिसकी मोक्षनहीं होती है वहइसक्षेत्रमें आकर मोक्षको प्राप्त होजाता है इसीसे यहबड़ा क्षेत्र है ५५। ५६ मेरेही अनुग्रहसे यद्यपि प्रयागमें और इसक्षेत्रमें मोक्षहोती है परन्तु प्रयागजीसे भी यहक्षेत्र बड़ाकहाजाता है जो पुरुष योगाभ्याससे यहाँ परमसिद्धिकी इच्छा करता है वह महातपस्वी है ५७ इसक्षेत्रके माहात्म्यसे और मेरी भक्तिपूर्वक भावनासे योगियोंको परमस्थानकी प्राप्ति होती है ५८ इसक्षेत्रमें मेराध्यानकरनेसे योगकी अग्निदीप्त होजातीहै उसयोगाग्नि दीप्तहोजानेसे वह देवताओंसेभी दुर्लभ परममोक्षको प्राप्तहोजाताहै ५९ अव्यक्तचिह्नवाले शुद्धान्तःकरणयुक्त मुनियोंको यहाँ ऐसी मोक्षप्राप्तहोजाती है जो देवता और दानवोंकोभी महादुर्लभहै ६० मैं यहाँ अपने सब भक्तोंकी अपनेही साथ सायुज्यमोक्षकी इच्छाकरताहूं यहाँ महायक्षराज कुवेरभी मेरे विषय सब क्रियाओंको अर्पणकरके गणेशभावको प्राप्तहोगयाहै और

CC-0. Digitized by eGangotri and MIDI - Delhi

कर्त्ताभविष्यश्च वेदसंस्थाप्रवर्तकः ६४ रंस्यतेसोऽपिपद्माक्षि ! क्षेत्रेऽस्मिन् मुनिपुङ्गवः।
ब्रह्मादेवर्षिभिःसार्द्धं विष्णुर्वायुर्दिवाकरः ६५ देवराजस्तथाशक्रो येऽपिचान्येदिवौकसः ।
उपासंतेमहात्मानः सर्वेमामेवसुव्रते ! ६६ अन्येऽपियोगिनःसिद्धाच्छन्नरूपा
महाव्रताः । अनन्यमनसोभूत्वा मामिहोपासतेसदा ६७ अलर्कश्चपुरीमेतां मत्प्रसादादवाप्स्यति ।
सचैनांपूर्ववत्कृत्वा चातुर्वर्ण्याश्रमाकुलाम् ६८ स्फीतांजनसमाकीर्णां
भक्त्याचसुचिरंनृपः । मयिसर्वार्पितप्राणो मामेवप्रतिपत्स्यते ६९ ततःप्रभृति
चार्वङ्गि ! येऽपिक्षेत्रनिवासिनः । गृहिणोलिङ्गिनोवापिमद्भक्तामत्परायणाः ७० मत्प्रसादाद्गजिष्यंति
मोक्षंपरमदुर्लभम् । विषयासक्तचित्तोऽपि त्यक्तधर्म्मरतिर्नरः ७१
इहक्षेत्रेमृतःसोऽपि संसारंनपुनर्विशेत् । येपुनर्निर्ममाधीराः सत्वस्थाविजितेन्द्रियाः ७२
व्रतिनश्चनिरारम्भाः सर्वेतेमयिभाविताः । देहभङ्गंसमासाद्य धीमन्तःसङ्गवर्जिताः ।
गताएवपरंमोक्षं प्रसादान्ममसुव्रते ! ७३ जन्मान्तरसहस्रेषु युञ्जन्योगमवाप्नुयात् ।
तमिहैवपरंमोक्षं मरणादधिगच्छति ७४ एतत्संक्षेपतोदेवि ! क्षेत्रस्यास्यमहत्फलम् ।
अविमुक्तस्यकथितं मयातेगुह्यमुत्तमम् ७५ अतःपरतरंनास्ति सिद्धिगुह्यंमहेश्वरि !।
एतद्बुध्यन्तियोगज्ञा येचयोगेश्वराभुवि ७६ एतदेवपरंस्थानमेतदेवपरंशिवम् । एतदेवपरम्ब्रह्म
एतदेवपरम्पदम् ७७ वाराणसीतुभुवनत्रयसारभूता रम्यासदाममपुरीगिरिरा

हे देवि जो आगे संवर्त्तनाम एक भक्तहोवेगा वहभी इसीक्षेत्रमें मेरा आराधनकरके परमसिद्धिको प्राप्तहोवेगा
६१ । ६३ जो पराशरका पुत्र वेदव्यास योगीऋषि महातपस्वी और धर्मकर्त्ता होकर वेदों
की स्थितिकरेगा ६४ वहभी इसीक्षेत्रमें रमणकरेगा और देवऋषियों समेत ब्रह्मा विष्णु वायु सूर्य्य
और इन्द्र यह सबभी इसीक्षेत्रमें मेरीही उपासनाकिया करतेहैं ६५।६७ अलर्कराजाभी मेरीही कृपासे
इसपुरीको प्राप्तहोकर चारोंवर्णों समेत इसपुरीको पूर्व्वके समान अच्छे प्रकारसे बढ़ावेगा और पालनाकरेगा
इसके पीछे अपनी सबक्रियाओंको मेरेहीमें अर्पणकरके मुझकोही प्राप्तहोजावेगा ६८।६९
उससे आदिलेके इसक्षेत्रमें रहनेवाले सब गृहस्थी और संन्यासी आदिक मेरेहीमें तत्पररहेंगे ७०
और मेरी कृपासे परमदुर्लभ मोक्षको प्राप्तहोवेंगे और महाविषयासक्त धर्ममें प्रीति न रखनेवाले
पुरुषभी जो इसक्षेत्रमें मरेंगे वह सबभी इससंसारमें नहीं जन्मेंगे और जो ममतारहित धैर्य्य युक्त
सतोगुणी और जितेन्द्रिय संन्यासीजन मेरी भक्तिकरके यहाँ शरीरको छोड़ेंगे वहतो निस्सन्देह मेरे
प्रसादसे परममोक्षको अवश्यहीप्राप्तहोजांयगे ७१ । ७२ हज़ारों जन्मों में जो पुरुष योगकी प्राप्त
करके जिस मोक्षको प्राप्तकरतेहैं वह मोक्ष यहाँ सबको यहाँके मरनेसेही प्राप्तहोजातीहै ७३।७४ हे देवि
यह मैंने संक्षेपमात्रसेही इसक्षेत्रका महाफल तुमसे कहदियाहै परन्तु यह अत्यन्त गुह्यफलहै ७५
हे महेश्वरि इससे विशेष कोईभी क्षेत्र सिद्धिका देनेवालानहीं हैं पृथ्वीपर जो२ बड़े२ योगीश्वरहैं वह
सब इसीको परमसिद्धिदायक क्षेत्र कहते हैं यही परमस्थानहै मंगलहै परमब्रह्महै और परमपद
है ७६ । ७७ यह काशीजी त्रिलोकी भरमें सारहै मुझको सदैव रमणीकहै यहाँ आयेहुए अनेक पापी

जपुत्रि !। अत्रागताविविधदुष्कृतकारिणोऽपि पापक्षयाद्विरजसःप्रतिभान्तिमर्त्याः ७८
एतत्स्मृतंप्रियतमंममदेवि ! नित्यं क्षेत्रंविचित्रतरुगुल्मलतासुपुष्पम्। अस्मिन्मृतास्तनु
भृतःपदमाप्नुवन्ति मूर्खागमेनरहितापिनसंशयोऽत्र ७९ (सूत उवाच) एतस्मिन्नन्तरेदेवो
देवींप्राहगिरीन्द्रजा। दातुंप्रसादाद्यक्षाय वरंभक्तायभामिनि ! ८० भक्तोममवरारोहे !
तपसाहतकिल्बिषः। अहोवरमसौलब्धमस्मत्तोभुवनेश्वरि ! ८१ एवमुक्त्वाततोदेवः सह
देव्याजगत्पतिः। जगामयक्षोयत्रास्ते कृशोधमनिसन्ततः ८२ ततस्तंगुह्यकंदेवी दृष्टि
पातैर्निरीक्षती। श्वेतवर्णंविचर्माणं स्नायुबद्धास्थिपंजरम् ८३ देवीप्राहतदादेवं दर्शयंती
चगुह्यकम्। सत्यंनामभवानुग्रो देवैरुक्तस्तुशङ्कर ! ८४ ईदृशेचास्यतपसि नप्रयच्छसि
यद्वरम्। अत्रक्षेत्रेमहादेव!पुण्येसम्यगुपासिते ८५ कथमेवंपरिक्लेशं प्राप्तोयक्षकुमारकः।
शीघ्रमस्यवरंयच्छ प्रसादात्परमेश्वर ! ८६ एवंमन्वादयोदेव! वदन्तिपरमर्षयः। रुष्टाद्वा
चाथतुष्टाद्वा सिद्धिस्तूभयतोभवेत् ८७ भोगप्राप्तिस्तथाराज्यमन्तेमोक्षःसदाशिवात्।
एवमुक्तस्ततोदेवः सहदेव्याजगत्पतिः ८८ जगामयक्षोयत्रास्ते कृशोधमनिसन्ततः।
तंदृष्ट्वाप्रणतंभक्त्या हरिकेशंवृषध्वजः ८९ दिव्यञ्चक्षुरदात्तस्मै येनापश्यत्सशङ्करम्।
अथयक्षस्तदादेशाच्छनैरुन्मीलयचक्षुषी ९० अपश्यत्सगणंदेवं वृषध्वजमुपस्थितम्।
(देवदेव उवाच) वरंददामितेपूर्वं त्रैलोक्येदर्शनंतथा ९१ सावर्ण्यंचशरीरस्यपश्यमां

पुरुषभी पापोंसे छुटजातेहैं ७८ हे देवि यह क्षेत्रमुझको नित्यप्रियहै और विचित्र लता गुल्म और
पुष्पोंसे शोभितहै इसमें मरेहुए पुरुष परमपदको प्राप्तहोकर निस्सन्देह फिरउनका जन्मनहींहोता
७९ सूतजी कहतेहैं कि इसके अनन्तर महादेवजी पार्वतीजीसे उस पूर्वोक्त यक्षके वरदेनेकी वार्त्ता
कहतेभये ८० कि हे वरारोहे यह मेराभक्त तपस्यासे सबपापोंको दूरकरके स्थित होरहाहै इसको वर
देनामुझे अवश्यचाहिये ८१ जगत्पति महादेवजी ऐसा कहकर पार्वतीजी समेत वहींपहुंचे जहाँ कि
वह कृशशरीरहोकर निरन्तर तपकररहाथा ८२ वहाँ उसभक्तको श्वेतवर्णकी शेषरही हड्डियां और
नसोंसे बंधाहुआ महादुर्बल देखकर पार्वतीजीबोलीं कि हे प्राणनाथ आपको जो देवतालोग उग्र वर्णन
करतेहैं वह यथार्थही वर्णन करते हैं क्योंकि ऐसे तपमेंभी स्थितहुए अपने भक्तके निमित्त आप वरनहीं
देतेहो हे महादेवजी इसपवित्रक्षेत्रमें यह यक्षकापुत्र ऐसे क्लेश प्राप्तहोनेको योग्यनहींहै इसहेतुसे आप
कृपाकरके शीघ्रही इसकोवरदो ८३।८६हेदेव मनुआदिक परमऋषि ऐसावर्णनकरतेहैं किरुष्टहुए शिवजीसे
अथवा प्रसन्नहुए महादेवजी से अर्थात् दोनोंहीप्रकारसे सिद्धिहोतीहै ८७ सबभूतमात्रोंको इस
संसारमेंतो भोगकीप्राप्ति और मरेपीछे मोक्षकी इच्छाहुआकरतीहै पार्वती के ऐसेवचन सुनकर जगत्पति
महादेवजी उसयक्षके पासजाकर उसे प्रणामकरताहुआ देखकर उसके लिये दिव्यनेत्र दे
भये तब उननेत्रोंसे वहयक्षमहादेवजीको देखताभया और अपने समीपमें गणों समेत आयेहुए शिवजीको
अच्छेप्रकारसे देखकर बड़ाप्रसन्नहोताभया उससमय तब महादेवजी उससे कहतेभये कि मैं
तुझकोवरदेताहूं कितुझे त्रिलोकी का दर्शनहोगा और तेराशरीरभीमेरेही समान चेष्टावालाहोजायग

CC-0. Digitized by eGangotri and MIDP - Delhi

विगतज्वरः। (सूत उवाच) ततःसलब्ध्वातुवरं शरीरेणाक्षतेनच ९२ पादयोःप्रणतस्तस्थौकृत्वाशिरसिसाञ्जलिम्। उवाचाथतदातेन वरदोऽस्मीतिचोदितः ९३ भगवन्! भक्तिमव्यग्रां त्वय्यनन्यांविधत्स्वमे। अन्नदत्वंचलोकानां गाणपत्यंतथाक्षयम् ९४ अविमुक्तंचतेस्थानं पश्येयंसर्वदायथा॥ एतदिच्छामिदेवेश त्वत्तोवरमनुत्तमम् ९५ (देवदेव उवाच) जरामरणसन्त्यक्तः सर्वरोगविवर्जितः। भविष्यसिगणाध्यक्षो धनदःसर्वपूजितः ९६ अजेयश्चापिसर्वेषां योगैश्वर्यंसमाश्रितः। अन्नदश्चापिलोकेभ्यः क्षेत्रपालोभविष्यसि ९७ महाबलोमहासत्वो ब्रह्मण्योममचप्रियः। त्र्यक्षश्चदण्डपाणिश्च महायोगीतथैवच ९८ उद्भ्रमःसम्भ्रमश्चैव गणौतेपरिचारकौ। तवाज्ञाञ्चकरिष्येते लोकस्योद्भ्रमसम्भ्रमौ ९९ (सूत उवाच) एवंसभगवांस्तत्र यक्षंकृत्वागणेश्वरम्। जगाम वामदेवेशः सहतेनामरेश्वरः १००॥

इति श्रीमत्स्यपुराणेएकोनाशीत्यधिकशततमोऽध्यायः १७९॥

(सूत उवाच) इमांपुण्योद्भवांस्निग्धां कथांपापप्रणाशिनीम्। शृण्वन्तुऋषयःसर्वे सुविशुद्धास्तपोधनाः १ गणेश्वरपतिंदिव्यं रुद्रतुल्यपराक्रमम्। सनत्कुमारोभगवान पृच्छन्नन्दिकेश्वरम् २ ब्रूहिगुह्यंयथातत्त्वं यत्रनित्यंभवस्थितः। माहात्म्यंसर्वभूतानां परमात्मामहेश्वरः ३ घोररूपंसमास्थाय दुष्करंदेवदानवैः। आभूतसंप्लवंयावत् स्थाणु

तू खेदरहितहोकर मुझकोदेख सूतजी कहते हैं किजबवहयक्ष ऐसेवरकोप्राप्तहोगया तबअक्षत अर्थात् निर्विकार शरीरसे खड़ाहोकर शिवजीके चरणोंमें मस्तकटेक प्रणामकर अंजलीबाँधकर बोला कि हे स्वामीमेरे ऊपर कृपाकरिये तब महादेवजी ने कहाकि मैंनेतेरे निमित्तवरदे दियाहै ८८। ९३ यहसुनकर वहफिरबोला हे स्वामिन् आप ऐसावर दीजिये जिस्से आपके विषयमें मेरीनिरन्तरभक्ति बनीरहै और मैं लोकोंको अन्नदेनेवाला गणपति कहाऊं ९४ इसके विशेषयह उत्तमवरभीचाहताहूं कि आपके अविमुक्त स्थानको सदैवदेखूं ९५ महादेवजी कहतेहैं कि हेयक्ष तू जरामरण औररोगादिसे रहितशरीरीहोकेगणोंका पति धनकादेनेवाला सबसे पूजित किसीसे पराजित न होनेवाला होकर योग ऐश्वर्य्यवान्हो सबभूतोंको अन्नदेने वाला क्षेत्रपालहोगा ९६। ९७ इसके विशेष महावली सत्ववान् ब्रह्मण्य मेरा प्यारा त्रिनेत्रयुक्त हाथमें दंडधारण करनेवाला और महायोगीहोगा ९८ और उद्भ्रम संभ्रम दोगण तेरे अनुचर रहेंगे वह दोनों सदैव तेरी आज्ञाको करेंगे ९९ सूतजी कहते हैं इस प्रकारसे वह भगवान् महादेवजी उसयक्षको गणेश्वर बनाके उसीके साथ गमन करतेभये १००॥

इति श्रीमत्स्यपुराणभाषाटीकायामेकोनाशीत्यधिकशततमोऽध्यायः १७९॥

सूतजीबोले कि इस पुण्यकी उदय करनेवाली महापवित्र पापोंकी नाशकरनेवाली कथाको सुन्दर तपवाले आप सब ऋषि लोग श्रद्धापूर्वक श्रवणकरो १ एकसमय गणेश्वरों के पति महादिव्यरूपरुद्रके समान पराक्रमी शिवजी के बाहननन्दिकेश्वरसे सनत्कुमार पूछतेभये २ कि हे नन्दिकेश्वर जहाँ शिवजी महाराज नित्य स्थित रहतेहैं उस परमतत्त्वरूप गुह्य स्थानको आपहमारे आगे वर्णन

भूतोमहेश्वरः ४ (नन्दिकेश्वर उवाच) पुरादेवेनयत्प्रोक्तं पुराणंपुण्यमुत्तमम्।तत्सर्वंसंप्रवक्ष्यामि नमस्कृत्यमहेश्वरम् ५ ततोदेवेनतुष्टेन उमायाःप्रियकाम्यया । कथितंभुवि विख्यातं यत्रनित्यंस्वयंस्थितः ६ रुद्रस्यार्धासनगता मेरुशृङ्गेयशस्विनी । महादेवंततोदेवी प्रणतापरिपृच्छति ७ भगवन्! देवदेवेश! चन्द्रार्द्धकृतशेखर !। धर्मंप्रब्रूहिमर्त्यानां भुविचैवोर्ध्वरेतसाम् ८ जप्तंदत्तंहुतंचेष्टं तपस्तप्तंकृतञ्चयत् । ध्यानाध्ययनसम्पन्नंकथंभवतिचाक्षयम् ९ जन्मान्तरसहस्रेण यत्पापंपूर्वसञ्चितम् । कथंतत्क्षयमायाति तन्ममाचक्ष्वशङ्कर! १० यस्मिन्ऽयवस्थितोभक्त्या तुष्यसेपरमेश्वर!। व्रतानिनियमाश्चैवश्राचारोधर्म्मएवच ११ सर्वसिद्धिकरंयत्र ह्यक्षय्यगतिदायकम् । वक्तुमर्हसितत्सर्वं परंकौतूहलंहिमे १२ (महेश्वर उवाच) शृणुदेवि ! प्रवक्ष्यामि गुह्यानांगुह्यमुत्तमम् । सर्वक्षेत्रेषुविख्यातमविमुक्तंप्रियंमम १३ अष्टषष्टिःपुराप्रोक्ता स्थानानांस्थानमुत्तमम् । यत्रसाक्षात्स्वयंरुद्रःकृत्तिवासाःस्वयंस्थितः १४ यत्रसन्निहितोनित्यमविमुक्तेनिरन्तरम् । तत्क्षेत्रंनमयामुक्तमविमुक्तंततःस्मृतम् १५ अविमुक्तेपरासिद्धिरविमुक्तेपरागतिः । जप्तंदत्तंहुतंचेष्टं तपस्तप्तंकृतंचयत् १६ ध्यानमध्ययनंदानं सर्वंभवतिचाक्षयम् । जन्मान्तरसहस्रेण यत्पापंपूर्वसञ्चितम् १७ अविमुक्तंप्रविष्टस्य तत्सर्वंव्रजतिक्षयम् । अविमु

करों और वही सब भूतोंके पति शिवजी प्रलय कालतक स्थाणुरूप होकर घोर.रूपधारण करके जहाँस्थित रहते हैं उस स्थानकोभी विस्तारपूर्वक वर्णन कीजिये ३।४ नन्दिकेश्वरवोले किप्रथम श्रीमहादेवजीने जिस उत्तम पवित्रपुराणको कहाहै उस सबकोमैं तुम्हारे आगे वर्णन करताहूं ५ इस पुराणको सबसे प्रथम प्रसन्नहोकर शिवजीने श्रीपार्वतीजी से कहाहै फिर क्रमसे पृथ्वीपर विख्यात होगयाहै ६ वह इस प्रकारसे है कि किसी समय महायशस्विनी शिवजीकी अर्द्धाङ्गी श्री पार्वतीजी सुमेरु पर्व्वतपर स्थितहो महादेवजी को प्रणामकरके यहपूछती भईं ७ कि हे भगवन् हे देवदेवेश इस पृथ्वी के रहनेवाले जितेन्द्रिय पुरुषोंके जो २ धर्म हैं उनको आप वर्णन कीजिये ८ जप दान हवन अच्छे प्रकारसे कियेहुए तप ध्यान और अध्ययन यह सब कैसे अक्षयगुणवाले होते हैं ९ और हज़ारों जन्मोंसे संचित कियेहुए पाप कैसे नष्ट होते हैं और जिस रीतिकी भक्ति से भगवान् प्रसन्नहोते हैं वहव्रत नियम आचार धर्म और अक्षय गतिदेनेवाले यत्न इनसबको आप मेरे आगे वर्णनकीजिये क्योंकि मुझे परम आश्चर्य होताहै १०। १२ श्रीमहादेवजी बोले कि हे देवि तू श्रद्धापूर्व्वक श्रवणकर मैं गुह्योंमें भी गुह्य उस उत्तम तीर्थको तेरे आगेकहताहूं जो सब क्षेत्रों महा उत्तम विख्यात अविमुक्त नामक्षेत्र मुझको प्याराहै १३ प्रथम अड़सठ ६८ तीर्थोंके स्थान कहेहैं उनमेंसे जहाँ रुद्रजी महाराज अपनी स्थिति रखते हैं और कभीभी उसको नहीं त्यागते हैं इसी हेतुसे उस तीर्थकानाम अविमुक्त क्षेत्र विख्यातहै यहक्षेत्र उन पूर्व्वोक्त स्थानोंसे उत्तम है १४।१५ इस अविमुक्तक्षेत्रमें परमसिद्धि और परमगति है इसमें जप दान हवन तप ध्यान अध्ययन और अन्य२ जो २ सुकृत हैं सब अक्षयपुण्यकारी होते हैं हज़ारों जन्मोंकाभी संचित किया हुआ पाप इस

क्ताग्निनादग्धमग्नौतूलमिवाहितम् १८ ब्राह्मणाःक्षत्रियावैश्याः शूद्रावैवर्णसङ्कराः । कृमिम्लेच्छाश्चयेचान्ये सङ्कीर्णाःपापयोनयः १९ कीटाःपिपीलिकाश्चैव येचान्येमृगपक्षिणः । कालेननिधनंप्राप्ता अविमुक्तेशृणुप्रिये ! २० चन्द्रार्द्धमौलिनःसर्वे ललाटाक्षावृषध्वजाः । शिवेममपुरेदेवि ! जायन्तेतत्रमानवाः २१ अकामोवासकामोवा ह्यपितिर्यग्गतोऽपिवा । अविमुक्तेत्यजन्प्राणान् ममलोकेमहीयते २२ अविमुक्तंयदागच्छेत् कदाचित्कालपर्ययात् । अश्मनाचरणौबद्धा तत्रैवनिधनंव्रजेत् २३ अविमुक्तंगतोदेवि ! न निर्गच्छेत्ततःपुनः । सोऽपिमत्पदमाप्नोति नात्रकार्याविचारणा २४ वस्त्रप्रदंरुद्रकोटिं सिद्धेश्वरमहालयम् । गोकर्णंरुद्रकर्णञ्च सुवर्णाक्षंतथैवच २५ अमरञ्चमहाकालं तथाकायावरोहणम् । एतानिहिपवित्राणि सान्निध्यात्सन्ध्ययोर्द्वयोः २६ कालञ्जरवनञ्चैव शंकुकर्णंस्थलेश्वरम् । एतानिचपवित्राणि सान्निध्याद्धिममप्रिये । अविमुक्तेवरारोहे ! त्रिसन्ध्यंनात्रसंशयः २७ हरिश्चन्द्रंपरंगुह्यं गुह्यमाम्रातकेश्वरम् । जलेश्वरंपरंगुह्यं गुह्यंश्रीपर्वतंतथा २८ महालयंतथागुह्यं कृमिचण्डेश्वरंशुभम् । गुह्यातिगुह्यंकेदारं महाभैरवमेवच २९ अष्टावेतानिस्थानानि सान्निध्याद्धिममाप्रिये ! । अविमुक्तेवरारोहे ! त्रिसन्ध्यं नात्रसंशयः ३० यानिस्थानानिश्रूयन्ते त्रिषुलोकेषुसुव्रते ! । अविमुक्तस्यपादेषु नित्यं सन्निहितानिवै ३१ अथोत्तरांकथांदिव्यामविमुक्तस्यशोभने । स्कन्दोवक्ष्यतिमाहात्म्यमृषीणांभावितात्मनाम् ३२॥ इति श्रीमत्स्यपुराणेऽशीत्यधिकशततमोऽध्यायः १८०॥

अविमुक्त क्षेत्रमें प्रवेश होतेही नष्टहोजाताहै इस क्षेत्रमें पाप ऐसे दग्ध होजाते हैं जैसेकि अग्निमें रुई भस्महोजाती है १६। १८ और ब्राह्मण क्षत्रिय वैश्य शूद्र वर्णसंकर पातकी जीव कीट पतंग मृगपक्षी इनमेंसे कोई भीजो इस अविमुक्त तीर्थपर मरतेहैं वहसब हे देवि मेरे शिवलोकमें प्राप्तहोकर चन्द्रमाको मस्तकमें धारण करनेवाले रुद्रहोजातेहैं १९।२१ कामना विचारे अथवा विनाविचारेहुएही कोई मनुष्य अथवा पशुआदिकभी जो अविमुक्ततीर्थपर प्राणोंको त्यागताहै वहमेरेलोकमें अवश्य प्राप्त होता है २२ जो कोई अविमुक्त तीर्थ परजाकर पैरोंमें पत्थर बाँधकर मणिकर्णिका घाटपर विना लौटेहुए उसी स्थानपर प्राणोंको त्याग देताहै वह निस्सन्देह मेरेहीलोकमें प्राप्त होताहै २३। २४ वस्त्रप्रदनामक रुद्रकोटि, सिद्धेश्वरनामक महास्थान गोकर्ण, रुद्रकर्ण सुवर्णाक्ष, अमर, महाकाल और कायावरोहण यहसब महापवित्र तीर्थ हैं इनसब तीर्थोंमें दोनों संधियोंके समय मेरी स्थिति रहती है २५।२६ इनके विशेष कालंजर पर्वत शंकुकर्ण और स्थलेश्वर यहसब तीर्थभी मेरेही स्थिति होनेसे पवित्र हैं परन्तु हे प्रिये इस अविमुक्त क्षेत्रमेंतो मेरी स्थिति निस्सन्देह तीनोंही कालोंमें रहती है इसके सिवाय हरिश्चन्द्र तीर्थ परमगुप्त है आम्रातकेश्वर तीर्थ, जलेश्वर तीर्थ श्री पर्वत क्षेत्रभी महापवित्रहैं २७। २८ महालय तीर्थ, कृमिचंडेश्वर केदारनाथजी और महाभैरव क्षेत्र यहसबभी पवित्र हैं हे वरारोहे इनपूर्वकहे हुए आठों स्थानोंमें जैसी मेरी दोनों संधियोंमें स्थितिहै वैसीही स्थिति इस अविमुक्त तीर्थरूपी क्षेत्रमें मेरी तीनों संधियोंमें रहाकरतीहै २९। ३० और हे

(सूत उवाच) कैलासपृष्ठमासीनं स्कन्दंब्रह्मविदांवरम् । पृच्छन्तिऋषयःसर्वेसन
काद्यास्तपोधनाः १ तथाराजर्षयःसर्वे ऽभक्तास्तुमहेश्वरे । ब्रूहित्वंस्कन्द ! भूलोके यत्र
नित्यंभवास्थितः २ (स्कन्द उवाच) महात्मासर्वभूतात्मा देवदेवःसनातनः । घोररूपंस
मास्थाय दुष्करंदेवदानवैः ३ आभूतसंप्लवंयावत् स्थाणुभूतस्थितःप्रभुः । गुह्यानांपरमं
गुह्यमविमुक्तमितिस्मृतम् ४ अविमुक्तेसदासिद्धिर्यत्रानित्यंभवास्थितः । अस्यक्षेत्रस्य
माहात्म्यं यदुक्तंत्वीश्वरेणतु ५ स्थानान्तरंपवित्रञ्च तीर्थमायतनंतथा । श्मशानसंस्थितं
वेश्म दिव्यमन्तर्हितञ्चयत् ६ भूलोकेनैवसंयुक्त मन्तरिक्षेशिवालयम् । अयुक्तास्तुन
पश्यन्ति युक्ताःपश्यन्तिचेतसा ७ ब्रह्मचर्यव्रतोपेताःसिद्धावेदान्तकोविदाः । आदेहपत
नाद्यावत् तत्क्षेत्रंयोनमुञ्चति ८ ब्रह्मचर्यव्रतैःसम्यक् सम्यगिष्टंमुखैर्भवेत् । अपापा-
त्मागतिःसर्वा यातूक्ताचक्रियावताम् ९ यस्तत्रनिवसेद्विप्रो संयुक्तात्मासमाहितः । त्रि
कालमपिभुञ्जानो वायुभक्षसमोऽभवत् १० निमेषमात्रमपियोह्यविमुक्तेतुभक्तिमान् ।
ब्रह्मचर्यसमायुक्तः परमंप्राप्नुयात्तपः ११ यत्रमासंवसेद्धीरो लघ्वाहारोजितेन्द्रियः ! । स
म्यक्तेनव्रतंचीर्णं दिव्यंपाशुपतंमहत् १२ जन्ममृत्युभयन्तीर्त्वा सयातिपरमाङ्गतिम् ।

प्रिये जिन २ स्थानोंमें मेरी स्थिति सुनीजाती है वहसब तीर्थ इस अविमुक्त तीर्थके चरणों में नित्यही स्थितरहते हैं इस अविमुक्त तीर्थकी महाउत्तम कथाको आगेके समयमें स्वामिकार्तिक तुम्हारा पुत्र ऋषियोंसेकहेगा३१।३२ ॥ इतिश्रीमत्स्यपुराणभाषाटीकायामशीत्यधिकशततमोऽध्यायः१८०॥

सूतजीबोले कि बड़े ब्रह्मवेत्ताओंमें श्रेष्ठ कैलासपर बैठेहुए स्वामिकार्तिकजीसे सनकादिक ऋषि और सबराजर्षि लोग यह पूछनेलगे कि हेब्रह्मन् स्वामिकार्तिकजी इसभूलोकमें जहाँ शिवजी महाराज नित्य स्थितरहतेहैं उसस्थानको आप कृपाकरके हमें सुनाइये स्वामिकार्तिकजी बोले कि सब भूतोंके आत्मा महात्मा देवदेवजी तपके आश्रयहो प्रलय कालपर्य्यन्त स्थाणुरूप अर्थात् स्तंभके समान स्थितहोकर अविमुक्त तीर्थपर रहतेहैं१।४वहाँ नित्यही शिवजीकी स्थिति होनेसे सदैव सिद्धियोंका वासरहताहै शिवजीने जैसा कि इस क्षेत्रका माहात्म्य कहाहै वैसा अन्यकिसीभी क्षेत्रकानहीं कहाहै इस अविमुक्त क्षेत्रके समान पवित्रभीकोई स्थान नहीं है शिवजीकी स्थिति श्मशान आकाश और शिवालय आदि किसी स्थानमें ऐसीनहीं है जैसीकि इसमें सदैव स्थिति रहती है इनशिवजी महाराज को अयोग्यपुरुषनहीं देखसक्ते परन्तुयोगी जन लोग अपने चित्तसे ध्यानकरके उनको अविमुक्ततीर्थ पर देखते हैं ५।७ ब्रह्मचर्य्य व्रतमें स्थित सिद्धपुरुष और वेदान्ती लोग अपने शरीरके क्षय पर्य्यन्त इसक्षेत्रको नहींत्यागते हैं वहसब पुरुष यज्ञों के फलोंको प्राप्तहोकर सबपापों से छूट उत्तम सद्गतियोंको प्राप्तहोते हैं ८ और मुक्तात्मा होकर जो कोई ब्राह्मण सावधानतासे वहां वासकरता है वह तीनोंकालों में भी भोजन करनेवाला होके वायु भक्षणकरनेवाले के समान पुण्यको प्राप्तहोकर सद्गतिको प्राप्तहोजाताहै९।१०जो पुरुष पलमात्रभी भक्तिपूर्व्वक ब्रह्मचर्य्य धारणकर सावधानी से इसक्षेत्रमें रहताहै वह परमतपस्या के फलको प्राप्तहोताहै और जो धैर्य्यवान् पुरुष जितेन्द्रिय होके

नैश्रेयसींगतिंपुण्यां तथायोगगतिंव्रजेत् १३ नहियोगगतिर्दिव्या जन्मान्तरशतैरपि ।
प्राप्यतेक्षेत्रमाहात्म्यात् प्रभावाच्छङ्करस्यतु १४ ब्रह्महायोऽभिगच्छेत्तु अविमुक्तंकदाच
न । तस्यक्षेत्रस्यमाहात्म्याद् ब्रह्महत्यानिवर्तते १५ आदेहपतनाद्यावत् क्षेत्रंयोनविमुञ्च
ति । नकेवलंब्रह्महत्या प्राकृताचनिवर्तते १६ प्राप्यविश्वेश्वरंदेवं नसाभूयोऽभिजायते।
अनन्यमानसोभूत्वा योविमुक्तंनमुञ्चति १७ तस्यदेवःसदातुष्टा सर्वान्कामान्प्रयच्छ
ति । द्वारंयत्सांख्ययोगानां सतत्रवसतिप्रभुः १८ सगणोहिभवोदेवो भक्तानामनुकम्प
या । अविमुक्तंपरंक्षेत्रमविमुक्तेपरागतिः १९ अविमुक्तेपरासिद्धि रविमुक्तेपरंपदम् । अ
विमुक्तंनिषेवेत देवर्षिगणसेवितम् २० यदीच्छेन्मानवोधीमान् नपुनर्जायतेक्वचित् । मे
रोश्शक्तोगुणान्वक्तुं द्वीपानाञ्चतथैवच २१ समुद्राणाञ्चसर्वेषां नाविमुक्तस्यशक्यते। अन्त
कालेमनुष्याणां छिद्यमानेषुमर्मसु २२ वायुनाप्रेर्यमाणानां स्मृतिर्नैवोपजायते । अविमु
क्तेह्यन्तकाले भक्तानामीश्वरःस्वयम् २३ कर्मभिःप्रेर्यमाणानां कर्णजापंप्रयच्छति । म
णिकर्ण्यांत्यजन्देहं गतिमिष्टांव्रजेन्नरः २४ ईश्वरप्रेरितोयाति दुष्प्रापामकृतात्मभिः । अ
शाश्वतमिदंज्ञात्वा मानुष्यंबहुकिल्बिषम् २५ अविमुक्तंनिषेवेत संसारभयमोचनम् ।
योगक्षेमप्रदंदिव्यं बहुविघ्नविनाशनम् २६ विघ्नैश्चालोड्यमानोऽपि योविमुक्तंनमुञ्च

वहां एकमहीनेतक वासकरताहै उसको महादिव्य पाशुपतव्रत कियेहुएका पुण्यप्राप्तहोताहै ११।१२
अर्थात् जन्ममृत्युके भयको त्यागकर परमउत्तमगति मोक्षरूपी फलको पाताहै १३ शिवजीकी महिमासे
जो इसक्षेत्रमें फलप्राप्तहोताहै वह सैकड़ोंजन्मोंतक योगकरनेसेभी कहींनहीं पासक्ताहै १४
ब्राह्मणकी हत्या करनेवालाभी जो पुरुष इस अविमुक्त तीर्थपर जाताहै उसकी भी ब्रह्महत्या दूर
होजाती है १५जो आजन्म इस तीर्थको नहीं छोड़ताहै और एकाग्रचित्तसे इसमेंवासकरताहै उसकी
ब्रह्महत्यादूरहोजाती है और वह शिवलोक में प्राप्तहोकर महादेवजी की प्रसन्नतासे उसकी सबकामनाभी
सिद्धहोजातीहैं उसपुरुषकी वहीगतिहोती है जो सांख्ययोगवालों की होती है १६।१८
इस अविमुक्त तीर्थपर महादेवजी अपने गणोंसमेत वासकरते हैं इसीहेतुसे अविमुक्त तीर्थपर परम
सिद्धि और परमगति होती है इसतीर्थ के सेवनसे परमपद मिलताहै और जो बुद्धिमान् पुरुष अविमुक्त
तीर्थको सेवन करताहै वह इस संसारमें फिर जन्म नहीं लेता है और सुमेरुपर्वत के सातों
समुद्रों के और सातोंद्वीपों के भी गुणोंको चाहे कोई पुरुषकहदे परन्तु इस अविमुक्त तीर्थके गुण
किसी से भी नहीं कहेजासक्ते हैं अन्त समय जब मनुष्यों के मर्मछेदन होते हैं तबप्राण वायुके निकसने
के समय किसीको भी स्मृति नहींरहती है परन्तु इस अविमुक्त तीर्थपर भक्तों के अन्तकाल के
समय कर्मोंसे प्रेरेहुए आप महादेवजी उनके कानमें महामंत्र पढ़देतेहैं तब मणिकर्णिका आदिक
तीर्थोंपर शरीरको त्यागत हुआ भक्तपुरुष अपने मनोवांछित फलको प्राप्तहोताहै १९।२४ और शिवजीकी
आज्ञासे दुर्लभ उत्तमगतिको प्राप्तहोकर सदैव आनन्दकरता है इसमनुष्यको उचितहै कि शरीरको
सदैव अनित्य और पापात्मा जानकर इससंसारके क्लेशों से निवृत्तहोनेके निमित्त इस अवि-

ति। समुञ्चतिजरांमृत्युं जन्मचैतदशाश्वतम् ॥ अविमुक्तेप्रसादात्तु शिवसायुज्यमाप्नुयात् २७ ॥ इतिश्रीमत्स्यपुराणेएकाशीत्यधिकशततमोऽध्यायः १८१ ॥

(देव्युवाच) हिमवन्तंगिरिंत्यक्त्वामन्दरंगन्धमादनम्। कैलासंनिषधञ्चैव मेरुपृष्ठंमहाद्युति १ रम्यंत्रिशिखरञ्चैव मानसंसुमहागिरिम्। देवोद्यानानिरम्याणि नन्दनंवनमेवच २ सुरस्थानानिमुख्यानि तीर्थान्यायतनानिच। तानिसर्वाणिसन्त्यज्य अविमुक्तेरतिःकथम् ३ किमत्रसुमहत्पुण्यं परंगुह्यंवदस्वमे। येनत्वंरमसेनित्यं भूतसम्पद्गुणैर्युतः ४ क्षेत्रस्यप्रवरत्वञ्च येचतत्रनिवासिनः। तेषामनुग्रहःकश्चित्तत् सर्वंब्रूहिशङ्कर ! ५ (शङ्कर उवाच) अत्यद्भुतमिमंप्रश्नं यत्त्वंपृच्छसिभामिनि। तत्सर्वंसंप्रवक्ष्यामि तन्मेनिगदतःशृणु ६ वाराणस्यांनदीपुण्या सिद्धगन्धर्वसेविता। प्रविष्टात्रिपथागङ्गा तस्मिन्क्षेत्रेममप्रिये ! ७ मामेवप्रीतिसन्तुष्टा कृत्तिवासश्चसुन्दरि !। सर्वेषांचैवस्थानानां स्थानन्तत्तुयथाधिकम् ८ तेनकार्येणसुश्रोणि ! तस्मिन्स्थानेरतिर्मम। तस्मिन्लिङ्गेचसान्निध्यं ममदेवि ! सुरेश्वरि ! ९ क्षेत्रस्यचप्रवक्ष्यामि गुणान्गुणवतांवरे !। यान्श्रुत्वासर्वपापेभ्यो मुच्यतेनात्रसंशयः १० यदिपापोयदिशठो यदिवाधार्मिकोनरः। मुच्यतेसर्वपापेभ्यो ह्यविमुक्तंव्रजेद्यदि ११ प्रलयेसर्वभूतानां लोकेस्थावरजङ्गमे। नहित्यक्ष्यामितत्स्थानं

मुक्त तीर्थको सेवे यह दिव्यतीर्थयोग क्षेमका देनेवाला और विघ्नोंका नाश करने वालाहै २५। २६ जो पुरुष अनेकप्रकारके कष्टोंकोभी सहकर अविमुक्त तीर्थका सेवनकरताहै वह जरा जन्ममृत्यु आदि रोगोंसे छूट शिवजीके संग सायुज्य मोक्षको प्राप्त होताहै २७ ॥

इति श्रीमत्स्यपुराणभाषाटीकायामेकाशीत्यधिकशततमोऽध्यायः १८१ ॥

श्रीपार्वतीजी कहती हैं कि हे महादेवजी हिमवान् मन्दराचल, गन्धमादन, कैलास, निषध और सुमेरु इनसब उत्तम पर्व्वतोंको और रमणीक त्रिशिखर पर्व्वत मानस पर्व्वत देवताओंके रमणीक नन्दनादिकवन और देवताओंके मुख्य २ स्थान तीर्थ इनसबको त्यागकर केवल इस अविमुक्त तीर्थही पर आपको ऐसी रुचि किसकारणसेहै इस तीर्थपर क्या महत् गुह्य पुण्यहै जिस्से कि आप अपने सबगणों समेत आनन्दसे वासकरतेहो और इसक्षेत्रपर वासकरनेवाले मनुष्योंपर आपकौनसा अनुग्रह करतेहो यह सब मुझसे वर्णनकीजिये १। ५ महादेवजीबोले हे भामिनि यह तेराप्रश्न अत्यन्त अद्भुतहै मैं सबको वर्णन करताहूं तू सावधानहोकर सुन काशीपुरीमें सिद्ध गन्धर्वोंसे सेवितकी हुई महापवित्रनदीहै उसीमें यह त्रिपथा गंगाजी भी प्रवेशहोरहीहैं वह नदी मेरीही प्रीतिकरके प्रसन्न रहती है इसीसे यहस्थान अन्य सबस्थानोंसे बड़ा पुण्यकारी है हे सुश्रोणि इसीसे मेरीभी उस पर परमप्रीतिरहती है हे सुरेश्वरि उसी क्षेत्रके लिङ्गमें मेरी स्थिति रहतीहै ६। ९ अबमैं इसक्षेत्रकेउन गुणोंको वर्णनकरताहूं जिनके श्रवणमात्रहीसे मनुष्य निस्सन्देह सबपापोंसे छूटजाताहै १० जोपापी मूर्ख अथवा धर्मवाला इनमेंसे कोईभी जो इस अविमुक्त तीर्थपर जाताहै वह सब पापोंसे छूटजाताहै ११ और जब कि सब स्थावर जंगम जगत्की प्रलयहोजाती है उससमयमेंभी मैं इसस्थानको

CC-0. Digitized by eGangotri and MDT - Delhi

महागणशतैर्वृतः १२ यत्रदेवाःसगन्धर्वाः सयक्षोरगराक्षसाः। वक्त्रंममममहाभागे ! प्रवि
शन्तियुगक्षये १३ तेषांसाक्षादहंपूजां प्रतिगृह्णामिपार्वति ! । सर्वगुह्योत्तमंस्थानं
ममप्रियतमंशुभम् १४ धन्याःप्रविष्टाःसुश्रोणि ! ममभक्ताद्विजातयः। मद्भक्तिपरमानि
त्यं येमद्भक्तास्तुतेनराः १५ तस्मिन्प्राणान्परित्यज्य गच्छन्तिपरमाङ्गतिम्। सदायज
तिरुद्रेण सदादानंप्रयच्छति १६ सदातपस्वीभवति अविमुक्तस्थितोनरः। योमांपूजय
तेनित्यं तस्यतुष्याम्यहंप्रिये! १७ सर्वदानानियोदद्यात्सर्वयज्ञेषुदीक्षितः। सर्वतीर्थाभि
षिक्तश्चसप्रपद्येतमामिह १८ अविमुक्तंसदादेवि ! येव्रजन्तिसुनिश्चिताः। तेतिष्ठन्तीह
सुश्रोणि ! त्वद्भक्ताश्चात्रिविष्टपे १९ मत्प्रसादात्तुतेदेवि। दीव्यन्तिशुभलोचने !। दुर्द्ध
राश्चैवदुर्द्धर्षा भवन्तिविगतज्वराः २० अविमुक्तंशुभंप्राप्य मद्भक्ताःकृतनिश्चयाः। निर्धू
तपापविमला भवन्तिविगतज्वराः २१ (पार्वत्युवाच) दक्षयज्ञस्त्वयादेव ! मत्प्रियार्थे
निषूदितः। अविमुक्तगुणानान्तु नतृप्तिरिहजायते २२ (ईश्वरउवाच) क्रोधेनदक्षयज्ञस्तु
त्वत्प्रियार्थेविनाशितः। महाप्रिये ! महाभागे ! नाशितोऽयंवरानने २३ अविमुक्तेयज
न्तेतु मद्भक्ताःकृतनिश्चयाः। नतेषांपुनरावृत्तिः कल्पकोटिशतैरपि २४ (देव्युवाच) दु
र्लभास्तुगुणादेव ! अविमुक्तेतुकीर्तिताः। सर्वांस्तान्ममतत्त्वेन कथयस्वमहेश्वर ! २५

नहींत्यागता १२ और युगोंके अन्तमें इसी स्थानपर सब देवता गन्धर्व यक्ष उरग और राक्षसादिक
जीवमात्र मेरेमुखमें प्रवेश करजातेहैं और उनकी पूजाकोंमें साक्षात् ग्रहणकरताहूं यहमेरास्थान सब
स्थानोंसेउत्तमहै और मुझको परमप्रियहै १३।१४ इस मेरे तीर्थपर जो भक्तजनजातेहैं वह परमधन्यहैं
जो द्विज मेरी भक्तिकरके यहाँ बासकर अपने प्राणोंको त्यागतेहैं वह परमगतिको प्राप्तहोतेहैं इस
अविमुक्त तीर्थपर स्थितहुआ मनुष्य जो सदैव रुद्र समेत पूजाकरताहै रुद्रही समेत दानकरताहै
और तपस्यायुक्तहै अथवा मुझको पूजता है उसपर मैं सदैव प्रसन्न रहताहूं १५।१७ जो पुरुष
सर्वस्व दानकरताहै सबयज्ञोंमें दीक्षालेताहै और सब तीर्थोंके जलका अभिषेक करताहै वह मुझको
इस तीर्थपर प्राप्त होताहै १८ हे पार्व्वति अविमुक्त तीर्थपर बासकरनेवाले पुरुष और तेरे भक्तजन
स्वर्ग में प्राप्त होतेहैं और मेरी कृपासे वहाँ दुर्धर्ष होके क्रीड़ा करतेहुए भी सब पापों से रहित रहते
हैं १९।२० मेरे भक्तजन इस शुभ तीर्थपर प्राप्त होकर सब पापों से रहितहो निर्म्मल होजाते
हैं २१ पार्व्वतीजी पूछती हैं कि हे देव आपने मेरे प्यारके निमित्त दक्षके यज्ञका नाश करदियाथा
ऐसी आपकी मेरे ऊपर कृपा रहती है अब मेरी यह प्रार्थनाहै कि मेरी तृप्ति अभी इस अविमुक्त तीर्थ
के गुणोंसे नहींहुई इस्से औरभीगुण वर्णनकीजिये जिस्से कि मेरी तृप्तिहो २२ महादेवजी बोले कि
हे प्रिये हे महाभागे यह सत्यहै कि मैंने तेरीही प्रीतिके अर्थ अपने क्रोधसे दक्षका यज्ञ विध्वंश कर
दियाथा २३ इस अविमुक्त तीर्थपर मेरे भक्तजन जो निश्चयकरके मेरा पूजनकरतेहैं वह सैकड़ों
कल्पोंतकभी इससंसार में फिरनहीं जन्मलेते २४ पार्वतीजी बोलीं हे देव आपने जो इस अविमुक्त
तीर्थ के बड़े २ दुर्लभगुण वर्णनकियेहैं उनसबको आप तत्त्वपूर्व्वक अच्छी रीतिसे वर्णनकीजिये २५

कौतूहलंमहादेव ! हृदिस्थंममवर्तते । तत्सर्वंममतत्त्वेन आख्याहिपरमेश्वर ! २६ (ईश्वर उवाच) अक्षयाह्यमराश्चैव ह्यदेहाश्चभवन्तिते । मत्प्रसादाद्वरारोहे ! मामेवप्रविशन्तिवै २७ ब्रूहिब्रूहिविशालाक्षि ! किमन्यच्छ्रोतुमर्हसि । (देव्युवाच) अविमुक्तेमहाक्षेत्रे अहोपुण्यमहोगुणाः २८ नतृप्तिमधिगच्छामि ब्रूहिदेव ! पुनर्गुणान् । (ईश्वर उवाच) महेश्वरि ! वरारोहे ! शृणुतांस्तुममप्रिये ! २९ अविमुक्तेगुणायेतु तथान्यानपि तच्छृणु । शाकपर्णाशिनोदान्ताः संप्रक्षाल्यामरीचिपाः ३० दन्तोलूखलिनश्चान्ये अश्मकुट्टास्तथापरे । मासिमासिकुशाग्रेण जलमास्वादयन्तिवै ३१ वृक्षमूलनिकेताश्च शिलाशय्यास्तथापरे । आदित्यवपुषःसर्वे जितक्रोधाजितेन्द्रियाः ३२ एवंबहुविधैर्धर्मैरन्यत्रचरितव्रताः । त्रिकालमपिभुञ्जाना येऽविमुक्तनिवासिनः ३३ तपश्चरन्तिवान्यत्र कलांनार्हन्तिषोडशीम् । येऽविमुक्तेवसन्तीह स्वर्गेप्रतिवसन्तिते ३४ मत्समःपुरुषोनास्ति त्वत्समानास्तियोषिताम् । अविमुक्तसमंक्षेत्रं नभूतंनभविष्यति ३५ अविमुक्तेपरोयोगो ह्यविमुक्तेपरागतिः । अविमुक्तेपरोमोक्षः क्षेत्रंनैवास्तितादृशम् ३६ परंगुह्यंप्रवक्ष्यामि तत्त्वेनवरवर्णिनि ! । अविमुक्तेमहाक्षेत्रे यदुक्तंहिमयापुरा ३७ जन्मान्तरशतैर्देवि ! योगोऽयंयदिलभ्यते । मोक्षःशतसहस्रेण जन्मनालभ्यतेनवा ३८ अविमुक्तेनसन्देहो मद्भक्तःकृतनिश्चयः । एकेनजन्मनासोऽपि योगंमोक्षंचविन्दति ३९ अविमुक्तेनरा

हे देव मेरे हृदयमें जो बडाभारी आश्चर्य्य होरहाहै इसीसे मैं बारंबार उसके तत्त्व समेत गुणोंके सुननेकी इच्छाकरतीहूं महादेवजीबोले हे देवि अविमुक्त तीर्थकी सेवा करनेवाले पुरुषमेरी कृपासे अक्षय अमरताको प्राप्तहोकर मुझहीको प्राप्तहोजातेहैं हे विशालाक्षि इस्से अधिक और क्या सुननेकी इच्छाकरतीहो, पार्वतीजीबोलीं हे महादेवजी बडे आश्चर्य्यकी बातहै कि इसअविमुक्त क्षेत्रके बडे२ गुणहैं उनसे मेरी तृप्तिनहींहोती है इसहेतुसे फिर उनको वर्णनकीजिये यह सुनकर महादेवजीने कहा हे पार्वती तू मेरी परमप्यारीहै इस्से फिर उसके गुणोंको कहताहूं तू चित्तसेसुन २६।२९ इसके अनन्तगुणहैं जो शाकपत्रादिके भोजन करनेवाले जितेन्द्रिय दाँतोंसे कच्चे अन्नोंके खानेवाले प्रतिमास कुशाके अग्रभागमात्र जलके चाटनेवाले वृक्षोंकीजडों में वासकरनेवाले शिलापर सोनेवाले सूर्य्यके समान तेजस्वी शरीरवाले क्रोधसे रहित अनेक धर्मोंके आचरण करनेवाले ऋषिजो अन्यत्र बासकरतेहैं उनहींके समान वहपुरुषहैं जो इस अविमुक्त तीर्थपर त्रिकाल भोजनकरते हैं ३०।३३ आशययहहै कि जो अन्यत्रकहीं तपकरतेहैं वह इस अविमुक्त तीर्थकी सोलहवीं कलाकोभी नहीं प्राप्तहोतेहैं ३४ हे पार्वति जैसे न मेरे समान कोईपुरुषहै न तेरे समान कोई स्त्रीहै इसी प्रकार इस अविमुक्त तीर्थके समान कोई तीर्थभी नहै न होगा ३५ अविमुक्त तीर्थपर परमयोग परम गति और परममोक्षहै इसीसे इसके समान कोई क्षेत्रनहींहै ३६ हे वरबर्णिनि अबतत्त्वसे परम गुह्य माहात्म्यकोसुन कि सैकडों जन्मोंके योगके प्रभावसे इस अविमुक्त तीर्थ की प्राप्तिहोती है इस अविमुक्त तीर्थपर प्राप्तहुआ मेराभक्त एकही जन्मकरके मोक्ष और योगको प्राप्तहोजाताहै ३७।३९

देवि ! येव्रजन्तिसुनिश्चिताः । तेविशन्तिपरंस्थानं मोक्षंपरमदुर्लभम् ४० पृथिव्यामीदृशंक्षेत्रं नभूतंनभविष्यति । चतुर्मूर्त्तिःसदाधर्मो तस्मिन्सान्निहितःप्रिये ! ४१ चतुर्णामपिवर्णानां गतिस्तुपरमास्मृता । (देव्युवाच) श्रुतागुणास्तेक्षेत्रस्य इहचान्यत्र हेप्रभो ! ४२ वदस्वभुविविप्रेन्द्राः कंवायज्ञैर्यजन्तिते । (ईश्वर उवाच) दृष्ट्यावैवतुमन्त्रेण मामेवहियजन्तिये ४३ नतेषांभयमस्तीति भवंरुद्रंयजन्तियत् । अमन्त्रोमन्त्रकोदेवि ! द्विविधोविधिरुच्यते ४४ साङ्ख्यंचैवाथयोगश्च द्विविधोयोगउच्यते सर्वभूतस्थितंयोमां भजत्येकत्वमास्थितः ४५ सर्वथावर्तमानोऽपि सयोगीमयिवर्त्तते। आत्मौपम्येनसर्वत्र सर्वंचमयिपश्यति ४६ तस्याहंनप्रणश्यामि सचमेनप्रणश्यति। निर्गुणःसगुणोवापियोगश्चकथितोभुवि ४७ सगुणश्चैवविज्ञेयो निर्गुणोमनसःपरः। एतत्तेकथितंदेवि ! यन्मान्त्वंपरिपृच्छसि ४८ (देव्युवाच) याभक्तिस्त्रिविधाप्रोक्ता भक्तानां बहुधात्वया । तामहंश्रोतुमिच्छामि तत्त्वतःकथयस्वमे ४९ (ईश्वरउवाच) शृणुपार्वति! देवेशि ! भक्तानांभक्तिवत्सले । प्राप्यसाङ्ख्यञ्चयोगञ्च दुःखान्तञ्चनियच्छति ५० सदा यःसेवतेभिक्षां ततोभवतिरञ्जितः । रञ्जनात्तन्मयोभूत्वा लीयतेसतुभक्तिमान् ५१ शास्त्राणान्तुवरारोहे ! बहुकारणदर्शिनः । नमांपश्यन्तितेदेवि ! ज्ञानवाक्यविवादिनः ५२

हेदेवि जो मनुष्य निश्चय करके अविमुक्ततीर्थमें प्राप्त होते हैं वह परममोक्षपदके स्थानको पाते हैं ४० पृथ्वीपर इस क्षेत्रके समान कोई क्षेत्रनहै न कभी होगा इस क्षेत्रमेंधर्म अपनी चारमूर्त्तियों से सदैव प्राप्त रहताहै ४१ यहां चारोंवर्णोंकी परमगति होती है पार्वतीजी कहती हैं हेप्रभो आपके इस क्षेत्रके गुण तो मैंने अच्छे प्रकारसे सुने परन्तु अब यह भी कृपाकरके बताइये कि ब्राह्मणलोग इस पृथ्वीपर यज्ञोंकरके किसका पूजन करते हैं महादेवजीने कहा हेसुन्दरि यज्ञ करके और मंत्र करके सब लोग मेराही पूजन करते हैं ४२।४३ जो रुद्र और महादेवका पूजन करते हैं उनको इसलोकमें भयनहीं होता हेदेवि मंत्रवाली और विनामंत्रवाली दो प्रकारकी विधि होती हैं ४४ सांख्य और योग यह दो प्रकारके योग कहाते हैं, जो पुरुष सबभूतों में स्थित हुए मुझको एकरस मानताहै ४५ वह सब प्रकारसे वर्त्तमान हुआ पुरुष योगी कहाताहै जो पुरुष सबजीवोंमें आत्माके समान मुझहीको आत्मारूपदेखताहै और उसकी बुद्धिसे मैंकभी अलग नहीं हूं वहभी कभी नष्टनहीं होताहै निर्गुण और सगुण यह दो प्रकारके योग कहाते हैं उनदोनों में सगुणयोग तो जानाजाताहै और निर्गुण योग मनसे भी चिन्तवन नहीं किया जाताहै हेदेवि जो २ बातेंतैंने मुझसे पूछीं वहसब मैंने तेरे आगे वर्णनकीं ४६।४८ पार्वतीजी ने पूछा कि हेशिवजी आपने जो भक्तोंकी तीन प्रकारकी भक्ति वर्णनकी उसको भी आपसे मैं यत्नपूर्वक सुनना चाहती हूं—महादेवजी बोले हेभक्तोंकी भक्ति करने वाली पार्वती मनुष्य सांख्य और योगको प्राप्तहोकर अपने दुःखोंका नाशकर देताहै ४९।५० और जो सदैव भिक्षाका सेवन करताहुआ मुझमें अनुरक्त रहताहै वह भक्तिमान् पुरुष तन्मयहोकर मेरे बिषेही लीन होजाताहै ५१ और जो पुरुष शास्त्रोंके बहुत हेतु देखकर विवाद करनेवाले हैं वह

परमार्थज्ञानतृप्ता युक्ताजानन्तियोगिनः। विद्ययाविदितात्मानो योगस्यचाद्विजातयः ५३
प्रत्याहारेणशुद्धात्मा नान्यथाचिन्तयेच्चतत्। तुष्टिञ्चपरमांप्राप्य योगंमोक्षंपरंतथा ५४
त्रिभिर्गुणैःसमायुक्तो ज्ञानवान्पश्यतीहमाम्। एतत्तेकथितंदेवि ! किमन्यच्छ्रोतुमर्हसि
५५ भूयएववरारोहे ! कथयिष्यामिसुव्रते !। गुह्यंपवित्रमथवा यच्चापिहृदिवर्त्तते ५६
तत्सर्वंकथयिष्यामि शृणुष्वैकमनाःप्रिये ! (देव्युवाच) त्वद्रूपंकीदृशंदेव ! युक्ताःपश्य
न्तियोगिनः ५७ पश्यन्मेसंशयंब्रूहि नमस्तेसुरसत्तम !। (श्रीभगवानुवाच) अमूर्त्तं
चैवमूर्त्तञ्च ज्योतीरूपंहितत्स्मृतम् ५८ तस्योपलब्धिमन्विच्छन् यत्नःकार्योविजानता।
गुणैर्वियुक्तोभूतात्मा एवंवक्तुंनशक्यते ५९ शक्यतेयदिवक्तुंवै दिव्यैर्वर्षशतैर्नवा। (देव्यु
वाच) किंप्रमाणन्तुतत्क्षेत्रं समन्तात्सर्वतोदिशम् ६० यत्रनित्यंस्थितोदेवो महादेवो
गणैर्युतः। (ईश्वर उवाच) द्वियोजनन्तुतत्क्षेत्रं पूर्वपश्चिमतःस्मृतम् ६१ अर्द्धयोज
नविस्तीर्णं तत्क्षेत्रंदक्षिणोत्तरम्। वाराणसीतदीयाच यावच्छुक्लनदीतुवै ६२ भीष्मच
ण्डिकमारभ्य पर्वतेश्वरमन्तिके। गणायत्रावतिष्ठन्ति सन्नियुक्ताविनायकाः ६३ कूष्माण्ड
राजःशम्भोश्च जयन्तश्चमदोत्कटाः। सिंहव्याघ्रमुखाःकेचिद्विकटाःकुब्जवामनाः ६४
यत्रनन्दीमहाकालश्चण्डघण्टोमहेश्वरः। दण्डचण्डेश्वरश्चैव घण्टाकर्णोमहाबलः ६५

मुझको नहीं देखते हैं ५२ और जो परमार्थज्ञानमें युक्तहोके तृप्तरहते हैं और ब्रह्मविद्याकरके आत्माको
जानकर शुद्धात्मावाले हो मेरा अन्यथा चिन्तवन नहीं करते हैं वह परम तुष्टिको प्राप्तहोके योग
मोक्षको प्राप्त होजाते हैं ५३।५४ ज्ञानी पुरुष तीनों गुणोंसे युक्तहोकर मुझको देखताहै हेदेवि यह
सबतेरे आगे वर्णन किया अब क्या सुनना चाहती है ५५ हेवरारोहे मैं फिर भी तेरे मनकी इच्छाके
अनुसार परम गुह्यमाहात्म्यको कहताहूं ५६ उस उत्तम माहात्म्यको एकाग्रचित्तसे श्रवणकर यह
सुनकर पार्वतीजी बोलीं कि हेदेवदेव जिसको कि योगीजन देखा करते हैं वह आपका कौनसा और
कैसा स्वरूप है हेसुरश्रेष्ठ मैं आपको नमस्कार करती हूं आप मेरे इस सन्देहको दूर कीजिये महा-
देवजी बोले कि वह मेरा ज्योतिस्स्वरूप मूर्त्ति रहितहै और मूर्त्तिसहित भी है उसके जानने के लिये
ज्ञानी पुरुषको परमयत्न करना चाहिये गुणों से युक्त हुआ भूतात्मा पुरुष अच्छीरीति से उसस्वरूप
के कहने को समर्थ नहीं है उस स्वरूपको दिव्य सैकड़ों वर्षोंके यत्नसे कहसक्ताहै-पार्वतीजीने पूछाहै
महादेवजी जहां आप गुणोंसे युक्त होकर नित्य स्थित रहते हैं उस क्षेत्रका प्रमाणकितनाहै यहसब
मेरे आगे कहिये यह सुनकर महादेवजीने कहा कि पूर्व और पश्चिममें दो२ योजन विस्तारवाला
वह क्षेत्र है ५७।६१ उस सत्रमें आधेयोजनके प्रमाण में तो वह अविमुक्ततीर्थ प्रधानतासे वर्त्तमान
है और विस्तार उसका दक्षिणोत्तर है वहां पवित्र गंगानदी बहरही है ६२ और भीष्मचंडिक क्षेत्रसे
लेकर पर्वतेश्वर शिवजीकेस्थानतक विनायकों समेत शिवजीके वहगणरहते हैं जिनके कि मदोन्मत्त
सिंह और भेड़िये आदिकेसे मुखहैं उनमें कोई कुबड़े कोई बौने और टेढ़े ऐसे शिवजी के गणहैं
उसी स्थानमें महाकाल, चण्डघंट, दंडचंडेश्वर, और घंटाकर्ण इन नामोंवाले तथाबहुतसे अन्यनाम

CC-0. Digitized by eGangotri and MDF - Delhi

एतेचान्येचबहवो गणाश्चैवगणेश्वराः। महोदरामहाकाया वज्रशक्तिधरास्तथा ६६ रक्ष
न्तिसततंदेवि ! ह्यविमुक्तंतपोवनम्। द्वारेद्वारेचतिष्ठन्ति शूलमुद्गरपाणयः ६७ सुवर्णशृ
ङ्गींरौप्यखुराञ्चैलाजिनपर्यस्विनीम् । वाराणस्यान्तुयोदद्यात्त्रिवर्णांकञ्जलोचने ! ६८
गांदत्त्वातुवरारोहे ! ब्राह्मणेवेदपारगे । आसप्तमंकुलंतेन तारितंनात्रसंशयः ६९ योद
द्याद्ब्रह्मणेकिञ्चित् तस्मिन्क्षेत्रेवरानने ! । कनकंरजतंवस्त्रमन्नाद्यंबहुविस्तरम् ७०
अक्षयंचाव्ययंचैव स्यातांतस्यसुलोचने । शृणुतत्त्वेनतीर्थस्य विभूतिंव्युष्टिमेवच ७१
तत्रस्नात्वामहाभागे! भवन्तिनिरुजानराः। दशानामश्वमेधानां फलंप्राप्नोतिमानवः ७२
तदवाप्नोतिधर्मात्मा तत्रस्नात्वावरानने !। बहुस्वल्पेचयोदद्याद् ब्राह्मणेवेदपारगे ७३
शुभाङ्गतिमवाप्नोति अग्निवच्चैवदीप्यते । वाराणसीजाह्नवीभ्यांसङ्गमेलोकविश्रुते ७४
दत्त्वान्नंचविधानेनन सभूयोऽभिजायते । एतत्तेकथितंदेवि ! तीर्थस्यफलमुत्तमम् ७५
उपवासन्तुयःकृत्वा विप्रान्सन्तर्पयन्नरः । सौत्रामणेश्चयज्ञस्य फलंप्राप्नोतिमानवः ७६
एकाहारस्तुयस्तिष्ठेन्मासंतत्रवरानने !। यावज्जीवकृतंपापं सहसातस्यनश्यति ७७ अ
ग्निप्रवेशंयेकुर्यु रविमुक्तेविधानतः । प्रविशन्तिमुखन्तेमे निःसन्दिग्धंवरानने ७८ दश
सौवर्णिकंपुष्पं योऽविमुक्तेप्रयच्छति । अग्निहोत्रफलंधूपे गन्धदानेतथाशृणु ७९ भूमि

वाले महा उदर वाले महाकाया वाले वज्र शक्ति आदि शस्त्रोंके धारण करने वाले होकर उस अवि
मुक्त तपोवनकी रक्षा करते हैं और बहुतसे शूल मुद्गर आदि शस्त्र धारण कियेहुए द्वार २ परखड़े
रहते हैं ६३।६७ और हेपार्वति जो पुरुष सुवर्णकी सींगिड़ियों से युक्त रूपेके खुरों समेत अधिक
दूध देने वाली तीनरंगोंसे युक्त गौको काशीजीमें बाराणसी नदीके ऊपर वेदपारगामी ब्राह्मणकेअर्थ
देताहै वह निस्सन्देह अपनी सातपीढ़ियोंको उद्धार करताहै ६८। ६९ हे वरानने उस अविमुक्त तीर्थ
पर जो कोई सुवर्ण चाँदी वस्त्र और अन्नादिकका दान ब्राह्मणके अर्थ देताहै वह सब दान अक्षय
गुणवाले होजातेहैं अब इस तीर्थकी विभूतिके गुणकोसुनो ७० । ७१ हे महाभागे उस क्षेत्रपर स्ना-
नकरके सबमनुष्य रोगोंसे रहितहोजातेहैं और दश अश्वमेध यज्ञोंका फलहोताहै ७२ हे वराननेजो
धर्मात्मा पुरुष वहाँ स्नानकरके ब्राह्मणके अर्थ कुछभी दानकरताहै वह शुभगतिको प्राप्तहोकर अग्नि
के समान प्रकाशितहोताहै जहाँ वाराणसी और गंगाजीका संगमलोकमें प्रसिद्धहै वहाँ जो विधि
पूर्वक अन्नका दानकरताहै वह फिर जन्म नहीं लेताहै हे देवि ऐसे २ प्रकारसे मैंने इस तीर्थका
फल तेरे आगे वर्णनाकिया ७३ । ७५ जो इस तीर्थपर उपवास व्रतकरके ब्राह्मणोंको भोजनकरवा-
ताहै वह सौत्रामणि यज्ञके फलको प्राप्तहोताहै ७६ हे प्रिये वहाँ जो मनुष्य एकमास पर्य्यन्त दिनमें
एकबार भोजन करताहै उसके जन्मभरका सब पापनष्टहोजाताहै ७७ जो कोई इस अविमुक्त तीर्थ
पर विधि पूर्वक अग्निमें प्रवेशकरजाताहै वह निस्सन्देह मेरे मुखमें प्रवेश होजाताहै ७८ जो पुरुष
अविमुक्त तीर्थपर दशस्वर्णमयीमुद्रा (मुहर) दानकरताहै उसको अग्निहोत्र कियेकाफल प्राप्तहोताहै
और जो वहाँ धूप गंध आदिका दानकरता है वह भूमि दान कियेहुएका फल प्राप्तकरता है वहाँ जो

दानेनतत्तुल्यं गन्धदानफलंस्मृतम् । संमार्जनेपञ्चशतं सहस्रमनुलेपने ८० मालया
शतसाहस्रमनन्तंगीतवाद्यतः । (देव्युवाच) अत्यद्भुतमिदंदेव स्थानमेतत्प्रकीर्तित
म् ८१ रहस्यंश्रोतुमिच्छामि यदर्थन्त्वंनमुञ्चसि । (ईश्वर उवाच) आसीत्पूर्ववरारोहे !
ब्रह्मणस्तुशिरोवरम् ८२ पञ्चमंशृणुसुश्रोणि ! जातंकाञ्चनसप्रभम् । ज्वलत्तत्पञ्चमंशीर्षं
जातंतस्यमहात्मनः ८३ तदेवमब्रवीद्देवि ! जन्मजानामितेह्यहम् । ततःक्रोधपरीतेन सं
रक्तनयनेनच ८४ वामाङ्गुष्ठनखाग्रेण छिन्नंतस्यशिरोमया । (ब्रह्मोवाच) तदानिरपराध
स्य शिरश्छिन्नंत्वयामम ८५ तस्माच्छापसमायुक्तः कपालीत्वंभविष्यसि । ब्रह्महत्याकुलो
भूत्वा चरतीर्थानिभूतले ८६ ततोऽहंगतवान्देवि ! हिमवन्तंशिलोच्चयम् । तत्रनारायणः
श्रीमान्मयाभिक्षांप्रयाचितः । ८७ ततस्तेनस्वकंपार्श्वं नखाग्रेणविदारितम् । स्रवतोम
मुझको कैसे आनन्दहो ३९।४१ जिस व्रतके करनेसे वह मेरे वशीभूत होजाय उस व्रतको आपमेरे
आगे वर्णन कीजिये मैं आपकी दासी होजाऊंगी ४२ नारदजी बोले, हे शुभानने जो मैंने पहले तेरे
आगे व्रत कहाहै इसी व्रतके करने से श्रीपार्वतीजी देवी शिवजी के शरीरमें अर्द्धाङ्गनी होकर अतिप्रिया
होगईं और इसी व्रतके करनेसे श्रीलक्ष्मीजी भी विष्णुकी महाप्यारी प्रिया होगईं सरस्वतीजी
ब्रह्माकी प्यारीहुईं अरुन्धतीजी वसिष्ठजीकी प्रिया होजातीभईं ४३।४४ अबइसीव्रतके करनेसे तेरा
पति तेरेवशमें होजायगा और तेरेश्वशुर तथा सासुकीभी वाणी बन्दहोजायगी ४५ ऐसे नारदकेवचन
को सुनकर वहरानी यथेष्टव्रत करनेकेनिमित्त वचनबोलतीभई ४६ कि हे विप्रेंद्र आप मुझपरप्रसन्न
हूजिये मैं तुमको सुवर्ण मणि रत्न और वस्त्राभूषण इनसबका दानदूंगी सो आप मेरेदानको ग्रहणकरो
और मेरेऊपरविष्णुतथा महादेवजीप्रसन्नहोजांय ४७।४८ हे भद्रे जोदुर्बलआजीविकासेरहितब्राह्मणहो
उसके अर्थदान देनायोग्यहै मैंतो संपूर्ण संपत्तियोंसे युक्तहूं मेरीतो केवलभक्तिही करनी चाहिये ४९
इसरीतिसे नारदमुनि सबस्त्रियों के मनकोहरके अपने स्थानकोजातेभये इसके अनन्तर उनस्त्रियों
कामन अन्यत्रहो नारदमुनिमें चलायमान होगया तब बाणासुरके पुरमें छिद्र उत्पन्न होजाता
भया ५०।५१ ॥ इतिश्रीमत्स्यपुराणभाषाटीकायांषडशीत्यधिकशततमोऽध्यायः १८६ ॥

(मार्कण्डेय उवाच) यन्मांपृच्छसिकौन्तेय ! तन्मेकथयतःशृणु। एतस्मिन्नन्तरेरुद्रो
नर्मदातटमाश्रितः १ नाम्नामहेश्वरंस्थानं त्रिषुलोकेषुविश्रुतम् । तस्मिन्स्थानेमहा
देवोचिन्तयत्त्रिपुरेबधम् २ गाण्डीवंमन्दरंकृत्वा गुणंकृत्वाचवासुकिम् । स्थानंकृत्वातुवै
शाखं विष्णुंकृत्वाशरोत्तमम् ३ शल्येचाग्निंप्रतिष्ठाप्य मुखेवायुंसमर्पयन् । हयांश्चच
तुरोवेदान्सर्वदेवमयंरथम् ४ अभीषवोऽश्विनौदेवा वक्षोवज्रधरःस्वयम् । सतस्याज्ञां
समादाय तोरणेधनदःस्थितः ५ यमस्तुदक्षिणेहस्तेवामेकालस्तुदारुणः । चक्रेत्वमर
कोट्यस्तु गन्धर्वालोकविश्रुताः ६ प्रजापतीरथश्रेष्ठे ब्रह्माचैवतुसारथिः । एवंकृत्वातुदेवेशः
सर्वदेवमयंरथम् ७ सोऽतिष्ठत्स्थाणुभूतस्तु सहस्रपरिवत्सरान् । यदात्रीणिसमे
तानि अन्तरिक्षेस्थितानिवै ८ त्रिपर्वाणित्रिशल्येन तदातानिव्यभेदयत् । शरःप्रचोदि
तस्तेन रुद्रेणत्रिपुरंप्रति ९ अष्टतेजाःस्त्रियोजाता बलन्तासांव्यशीर्यत। उत्पाताश्चपुरे
तस्मिन् प्रादुर्भूताःसहस्रशः १० त्रिपुरस्यविनाशाय कालरूपाभवंस्तदा ! अट्टहासं
प्रमुञ्चन्ति हयाःकाष्ठमयास्तदा ११ निमेषोन्मेषणञ्चैव कुर्वन्तेचित्ररूपिणः ! स्वप्ने
पश्यन्तिचात्मानं रक्ताम्बरविभूषितम् १२ स्वप्नेतुसर्वेपश्यन्त विपरीतानियानितु। एता
न्पश्यन्तउत्पातांस्तत्रस्थानेतुयेजनाः १३ तेषांबलञ्चबुद्धिश्च हरकोपेननाशिते। ततः
साम्बर्तकोवायुर्युगान्तप्रतिमोमहान् १४ समीरितोऽनलस्तेन उत्तमाङ्गेनधावति । ज्वल

मार्कण्डेयजीबोले हे युधिष्ठिर आपने जोमुझसे पूछाहै उसको सुनोकि जिस स्थानमें नर्मदानदीकेतटपर श्रीमहादेवजी स्थितहुएथे वहां महेश्वर नाम त्रिलोकी में विख्यात स्थान होताभया उसी स्थानमें महादेवजी त्रिपुरके वधकरनेका उपाय चिन्तवन करतेभये १।२ वहांस्थितहुए महादेवजीने अपने गांडीव धनुषको मन्दराचलपर्व्वतके समान ऊँचाकरके उसमें वासुकि सर्पकी रस्सी स्वामिकार्त्तिकशरकास्थान विष्णुको उत्तमबाण बाणके अग्रभागमें अग्निको स्थापितकर बाणके मुखपर वायुका प्रवेशकरके चारों वेदोंको घोड़े और वेदमयही रथबनाकर घोड़ोंकीबाग अश्विनीकुमारको रथकीधुरी इन्द्रको और शिवजी ने अपनी आज्ञासे रथकी तोरण में कुबेरको स्थितकिया ३।५ शिवजीके दक्षिणहाथमें धर्मराज वामहाथमें दारुणकाल और रथकेचक्रमें देवता औरगन्धर्वों की कोटि स्थितहोतीभई ब्रह्माजी सारथीहुए इस प्रकार महादेव सब देवताओंका रथ बनाकरहज़ारोंवर्षपर्य्यन्त स्थितहोतेभये फिर जिससमय पुष्ययोगपाकर वहतीनोंपुरइकट्ठेहोगये उसी समय पर महादेवजी उस त्रिपुरपर बाणछोड़ते भये तब उसपुरकी स्त्रीतेजसे और बलसे रहितहोजाती भई और उस पुरमें हज़ारों उत्पातहोतेभये अर्थात् त्रिपुरके विनाशके अर्थकालरूप उपद्रवहोतेभये काष्ठके घोड़ोंकीमूर्त्ति अट्टहासकरनेलगीं और आंखों कोभी खोलने और मीचनेलगीं और वहसब दैत्यसुपनेमें अपने आत्माको लालवस्त्रों से विभूषित देखनेलगे जो पुरुष सुपनेमें विपरीत वस्तु देखता है उसके बल बुद्धि शिवजी के कोपसे नष्ट होजाते हैं इसके अनन्तर सांवर्त्तकनाम युगके अन्तवाला वायु चलताभया ६ । १४ उस वायुके चलने से अग्नि उत्पन्न हो त्रिपुर के वृक्ष दग्ध

न्तिपादपास्तत्र पतन्तिशिखराणिच १५ सर्वतोव्याकुलीभूतं हाहाकारमचेतनम्।भग्नोद्यानानिसर्वाणि क्षिप्रंतत्प्रत्यभज्यत १६ तेनैवपीडितंसर्वं ज्वलितंत्रिशिखैःशरैः। द्रुमाश्चारामखण्डानि गृहाणिविविधानिच १७ दशदिक्षुप्रवृत्तोऽयं समृद्धोहव्यवाहनः। मनःशिलानांपुञ्जानि दिशोदशविभागशः १८ शिखाशतैरनेकैस्तु प्रजज्वालहुताशनः। सर्वंकिंशुकवर्णाभं ज्वलितंदृश्यतेपुरम् १९ गृहाद्गृहान्तरंनैव गन्तुंधूमेनशक्यते।हरकोपानलैर्दग्धं क्रन्दमानंसुदुःखितम् २० प्रदीप्तंसर्वतोदिक्षु दह्यतेत्रिपुरंपुरम्।प्रासादशिखराग्राणि व्यशीर्यन्तसहस्रशः २१ नानामणिविचित्राणि विमानान्यप्यनेकधा।गृहाणिचैवरम्याणि दह्यन्तेदीप्तवह्निना २२ धावन्तिद्रुमखण्डेषु वलभीषुतथाजनाः।देवागारेषुसर्वेषु प्रज्वलन्तःप्रधाविताः २३ क्रन्दन्तिचानलस्पृष्टा रुदन्तिविविधैःस्वरैः।दह्यन्तेदानवास्तत्र शतशोऽथसहस्रशः २४ हंसकारण्डवाकीर्णा नलिन्यःसहपङ्कजाः। दृश्यन्तेऽनलदग्धानि पुरोद्यानानिदीर्घिकाः २५ अम्लानपङ्कजच्छन्नाविस्तीर्णायोजनायताः।गिरिकूटनिभास्तत्र प्रासादारत्नभूषिताः २६ पतन्त्यनलनिर्दग्धा निस्तोयाजलदाइव।वरस्त्रीबालवृद्धेषु गोषुपक्षिषुवाजिषु २७ निर्दयोव्यदहद्वह्निर्हरक्रोधेनप्रेरितः। सहस्रशःप्रबुद्धाश्च सुप्ताश्चबहवोजनाः २८ पुत्रमालिङ्ग्यतेगाढं दह्यन्तेत्रिपुराग्निना। अथतस्मिन्पुरेदीप्ते स्त्रियश्चाप्सरसोपमाः २९ अग्निज्वालाहतास्तत्र ह्यपतन्धरणी

होकर पृथ्वी परं गिरते भये सर्वत्र हाहाकार होताभया शीघ्रही उसके सब बगीचे नष्ट होजाते भये १५।१६ अग्निके कोपसे सब जलते हुए वृक्ष और घर उस वायुने क्षणमात्र में ही नष्ट कर दिये और अग्निका समूह दशों दिशाओं में अत्यन्त बढ़ताभया और उसकी ज्वलित ज्वालाओं से सम्पूर्ण पुर केशूके वर्ण के समान रक्त होकर प्रकाशित होताभया १७।१९ धूम के निविड़ अन्धकारके कारण वहसब दैत्य एकघरसे दूसरे घरको नहीं जासके इसप्रकार शिवजी के कोपरूपी अग्निसे दग्धहुआ वहसबपुर महादुःखित होताभया सब दिशाओं में हज़ारोंमहल जल२ कर पृथ्वीमें गिरपड़े २०।२१ उसीदीप्त अग्निसे अनेक प्रकारके चित्रविचित्र विमान और अनेकप्रकारके रमणीक स्थानभी भस्महोकर गिरपड़े वहांके सबजन उनघरों से निकल२ कर देवताओं के स्थानोंकीओर जातेभये और हज़ारों दानव अनेकस्वरों से रोदन करतेहुए दग्धहोजातेभये २२।२४ और हंस कारंडवआदि पक्षियों से युक्त कमलनी और कमलों सहित बगीचे जलकी बावड़ी यहसब अग्निसे दग्धहुए दीखतेभये उसपुरमें उत्तमकमलों से आच्छादित एक योजन के विस्तृत पर्वत के शिखरके समानऊंचे रत्नोंसे जटितहुए महल अग्निसे भस्महोकर ऐसे गिरतेभये जैसे कि थोथे बादल गिरते हैं उस शिवके कोपकी अग्निने दयारहित होके उत्तमस्त्री बालक गौ पक्षी और घोड़ों को दग्धकर हज़ारों सोते और जागते प्राणियोंको भी भस्मकर दिया २५।२८ त्रिपुरकी अप्सराओं के समान स्त्रियां अपने२ पुत्रोंको दृढ़तासे पकड़२कर अग्निकी ज्वालाओं से दग्धहोकर पृथ्वी में गिरपडती भईं २९ कोई स्त्रियां मोतियों की मालाओं से विभूषित सुवर्ण और नीलमणिकी मालाओं से

तले । काचिच्छ्यामाविशालाक्षी मुक्तावलिविभूषिता ३० धूमेनाकुलितासातु पतिताध
रणीतले । काचित्कनकवर्णाभा इन्द्रनीलविभूषिता ३१ भर्तारंपतितंदृष्ट्वा पतितातस्यचो
परि । काचिदादित्यसङ्काशा प्रमुक्ताचगृहेस्थिता ३२ अग्निज्वालाहतासातु पतिताग
तचेतना । उत्थितोदानवस्तत्र खड्गहस्तोमहाबलः ३३ वैश्वानरहतःसोऽपि पतिताध
रणीतले । मेघवर्णापरानारी हारकेयूरभूषिता ३४ श्वेतरूपधरानारी बालंस्तन्यंन्यधा
पयत् । दह्यन्तंबालकंदृष्ट्वा रुदतेमेघशब्दवत् ३५ एवंसतुदहन्नग्निर्हरक्रोधेनप्रेरितः ।
काचिच्चन्द्रप्रभासौम्या वज्रवैदूर्यभूषिता ३६ सुतमालिङ्ग्यवेपन्ती दग्धापततिभूतले ।
काचित्कुन्देन्दुवर्णाभा याशयानागृहेस्थिता ३७ गृहेप्रज्वलितेसातु प्रतिबुद्धासुदुःखिता ।
पश्यन्तीज्वलितंसर्वं स्वसुतोमेदिवङ्गतः ३८ सुतंसन्दग्धमालिङ्ग्य पतिताधरणीतले ।
काचित्सुवर्णवर्णाभा नीलरत्नैर्विभूषिता ३९ धूमेनाकुलितासातु प्रसुप्ताधरणीतले । अ
न्यागृहीतहस्तातु सखि! दह्यतिबालिकाम् ४० अनेकदिव्यरत्नाढ्या दृष्ट्वादहनमोहिता ।
शिरसिह्यञ्जलिंकृत्वा विज्ञापयतिपावकम् ४१ भगवन्! यदिवैरन्ते पुरुषेष्वपकारिषु ।
स्त्रियःकिमपराधन्ते गृहपञ्जरकोकिलाः ४२ पापनिर्दयनिर्लज्ज! कस्तेकोपस्त्रियःप्रति ।
नदाक्षिण्यंनतेलज्जा नसत्यंशौर्य्यवर्जित!४३ अनेनह्युपसर्गेणतूपालम्भंशिखिन्यदात् ।
किंत्वयानश्रुतंलोके ह्यवध्याःशत्रुयोषितः ४४ किन्तुतुभ्यंगुणाह्येते दहनोत्सादनंप्रति ।

अलंकृत धुएंसे व्याकुल अग्निकी ज्वालाओं से दग्धहोकर पृथ्वी में गिरतीभई ३०।३१कोई सूर्य्यके
समान कान्तिवाली स्त्री अपने पतिको गिराहुआ देखकर घरके ऊपरही से अपने पतिके ऊपर गिरती
भई और गिरतेही वह स्त्री अग्निसे भस्महोगई परन्तु वह उसकापति दानव हाथमें खड्गलेकर खड़ा
होगया और थोड़ेही समयमें वहभी अग्निके तेजसे दग्धहोकरपृथ्वीपर गिरपड़ा कोई मेघके समान
वर्णवाली हार तथा बाजूबन्दों से भूषित होकर कोई श्वेतवर्णवाली अपने बालकको स्तन पिलाती
हुई अग्निमें दग्धहोगई कोई अपनेबालकको दग्धहुआ देखकर मेघकेसमान उच्चस्वरसे रुदनकरती
भई तब शिवजीके क्रोधसे उत्पन्नहुई अग्नि उसबालकको भी दग्धकरदेती भई कोई हीरे पन्नेआदिके
भूषणोंसे भूषित चन्द्रमाकीसी कान्तिवाली स्त्री अपने बालकको गोदी में लियेहुए दग्धहोकर पृथ्वी
में गिरती भई कोई शशिवदना युवतीअपने घरमें सोईहुई और घरको जलताहुआ देखकर अपने दग्ध
हुएपुत्रका विलापकरती भई३२।३८कोई सुवर्ण भूषणों से अलंकृत स्त्री दग्धहुए बालकको गोदीमें
लेकर पृथ्वीमें गिरी कोई धुएंसेव्याकुलहुई सखीकाहाथ पकड़ पृथ्वी में गिरी ३९ । ४० कोई स्त्री
अग्निसे मोहितहो शिरकेऊपर हाथों की अंजली बाँधकर अग्निसे यह प्रार्थनाकरती भई ४१ कि हे
भगवन् अग्नि जो तुम्हाराकोप अपकारी पुरुषोंपर है तो घरमें रुकीहुई पिंजरे की कोकिलाओं
के समान स्त्रियोंका कौन अपराधहै ४२ हेपापीनिर्दयी निर्लज्ज स्त्रियोंकेऊपर तेराक्याक्रोधहै तूच-
तुरतासे रहित लज्जासेविहीन सत्य और शूरताकोत्यागरहाहै४३ऐसे २ बचनों से तिरस्कारकरतीभई
कि हेपापीतैंने संसारमें क्यायहनहीं सुनाहै किशत्रुओंकी स्त्रियोंकोनहीं मारना चाहिये ४४ दग्धकर-

नकारुण्यंदयावापिदाक्षिण्यंनास्त्रियःप्रति ४५ दयांकुर्वन्तिम्लेच्छापिदहन्तींवीक्ष्ययोषित
म्। म्लेच्छानामपिकष्टोऽसिदुर्निवारोह्यचेतनः ४६ एतेचैवगुणास्तुभ्यंदहनोत्सादनंप्रति।
असावपिदुराचारः स्त्रीणांकिंतेनिपातने ४७ दुष्टनिर्घृणनिर्लज्ज ! हुताशिन् ! मन्दभाग्य
क !। निराशत्वंदुरावासबलाद्दहसिनिर्दय!४८ एवंविलप्यमानास्ता जल्पन्त्यश्चबहून्य
पि । अन्याःक्रोशन्तिसंक्रुद्धा बालशोकेनमोहिताः ४९ दहतेनिर्दयोवह्निः संक्रुद्धःपूर्व
शत्रुवत् । पुष्करिण्यांजलंदग्धं कूपेष्वपितथैवच ५० अस्मान्सन्दह्यम्लेच्छ ! त्वंकाङ्क्ष
तिंप्रापयिष्यसि । एवंप्रलपतांतासां वह्निर्वचनमब्रवीत् ५१ (अग्निरुवाच) स्ववशेनै
वयुष्माकं विनाशन्तुकरोम्यहम् ! अहमादेशकर्तावै नाहंकर्तास्म्यनुग्रहम् ५२ रुद्रक्रो
धसमाविष्टो विविशामियथेच्छया । ततोबाणोमहातेजास्त्रिपुरंवीक्ष्यदीपितम् ५३ सिं
हासनस्थःप्रोवाच ह्यहंदेवैर्विनाशितः । अल्पसत्वैर्दुराचारैरीश्वरस्यनिवेदितम् ५४
अपरीक्ष्यत्वहंदग्धः शङ्करेणमहात्मना । नान्यःशक्तस्तुमाहन्तुं वर्जयित्वात्रिलोचनम्
५५ उत्थितःशिरसाकृत्वा लिङ्गंत्रिभुवनेश्वरम् । निर्गतःसपुरद्वारात् परित्यज्यसुहृत्सु
तान् ५६ रत्नानियान्यनर्घाणि स्त्रियोनानाविधास्तथा । गृहीत्वाशिरसालिङ्गं गच्छन्ग
गनमण्डलम् ५७ स्तुवंश्चदेवदेवेशंत्रिलोकाधिपतिंशिवम् । त्यक्तापुरीमयादेव ! यदि
बध्योऽस्मिशङ्कर ! ५८ त्वत्प्रसादान्महादेव ! मामेलिङ्गंविनश्यतु । अर्चितंहिमयादेव!

नातोतुझमें गुणहै परन्तु दयाकरुणा और चतुरता कुछभीनहींहै ४५ जलतीहुई स्त्रीको देखकर
म्लेच्छकोभीदया आजाती है अर्थात् उनकोभी दुर्निवार कष्टहोताहै ४६ यहजलाने का गुण भी तुझमें
व्यर्थहै यह केवलतेरादुराचारहै क्योंकि स्त्रियोंके मारनेसे तेरा कौनसाफलहै ४७ हे दुष्टनिर्लज्जनिर्दयमिन्दभाग्य
अग्नितू बड़ादुर्भाग्यहै हमकोबलसे जलाताहै ४८ ऐसा बहुत प्रकारका विलाप करती
हुई स्त्रीक्रुद्धहो बालकों का शोक करतीहुई मोहितहोगईं ४९ पूर्वजन्मके शत्रुके समान क्रोधितहुआ
अग्नि नदियोंके और कूपबापियोंके भी जलको भस्मकर देताभया ५० हे म्लेच्छ तू हमकोदग्ध
करके किसगतिको प्राप्तहोगा ऐसे २ वचन उनके सुनकर अग्नि बोला कि हे स्त्रियो मैं अपने वशसे
तुमको दग्धनहीं करता मैं तो नाशही करनेको पैदाहुआहूं मैं कभी अनुग्रह नहीं करसक्तामैं शिवजी
की इच्छासे अपनी इच्छापूर्व्वक प्रवेशहोताहूं इसके अनन्तरबाणासुरभी अपने त्रिपुरको जलताहुआ
देखताभया ५१।५३ और सिंहासनपरबैठ कर यह वचन बोलाकि थोड़े पराक्रमवाले दुराचारी
देवताओं ने मेरा नाशकियाहै यह निश्चय शिवजीकाही प्रभावहै ५४ शिवजीने परीक्षाकिये विनाही
मुझको दग्धकरादियाहै शिवजीके विना मुझकोकोई भी मारनेको समर्थनहीं है ५५ ऐसे कहकर वह
बाणासुर अपने पुत्रमित्रादिकोंको त्याग अपने शिर के ऊपर शिवके लिंगको स्थापितकर नगरके
बाहरनिकला और अनेकस्त्री तथानानाप्रकारके रत्नमणियोंको शिवजीके लिंगके आगे स्थापितकर
आकाशमार्गमें खड़ाहो त्रिलोकीके पतिमहादेवजी को नमस्कारकर ऐसे वचनकहताभया कि हेदेवमैंने
यहपुरी त्याग दी है आपको मेराबधनहीं करना चाहिये ५६।५८ हे देवजो मेराबध करतेहो तो यह

भक्त्यापरमयासदा ५९ त्वत्कोपाद्यदिवध्योऽहं तदिदंमाविनश्यतु । श्लाघ्यमेतन्महादेव। त्वत्कोपाद्दहनंमम ६० प्रतिजन्ममहादेव ! त्वत्पादनिरतोह्यहम् । त्रोटकच्छन्दसादेवं स्तौमित्वांपरमेश्वर ! ६१ शिवशङ्करशर्वहरायनमो भवभीममहेश्वरशर्वनमः । कुसुमायुधदेहविनाशकर त्रिपुरान्तकअन्धकशूलधर ६२ प्रमदाप्रियकान्तविभक्तनमः ससुरासुरसिद्धगणैर्नमित । हयवानरसिद्धगजेन्द्रमुखादतिभास्वददीर्घविशालमुख ६३ उपलब्धुमशक्यतरैरमरैरसुरैःप्रथितोऽस्मि चबाहुशतबहुभिः । प्रणतोऽस्मिभवंभव भक्तिरतो चलचन्द्रकलाकुलदेवनमः ६४ नचपुत्रकलत्रहयादिधनं ममतुत्वदनुस्मरणं शरणम् । व्यथितोऽस्मितुबाहुशतैर्बहुभिर्यमिताचमहानरकस्यगति ६५ ननिवर्ततेतिजन्मनपापमतिः शुचिकर्मनिवद्धमापित्यजति । अनुकम्पातिविभ्रमतिसति ममचैवकुकर्मनिवारयति ६६ यःपठेत्त्रोटकन्दिव्यं प्रयतःशुचिमानसः । बाणस्येवयथारुद्रस्तस्यापि वरदोभवेत् ६७ इमंस्तवंमहादिव्यं श्रुत्वादेवोमहेश्वरः । प्रसन्नस्तुतदातस्य स्वयंदेवो महेश्वरः ६८ (महेश्वर उवाच) नभेतव्यंत्वयावत्स ! सौवर्णेतिष्ठदानव ! । पुत्रपौत्रसुहृद्बंधुभार्याबन्धुजनैःसह ६९ अद्यप्रभृतिबाण ! त्वमवध्यस्त्रिदशैरपि । भूयस्तस्यवरो दत्तो देवदेवेनपाण्डव ! ७० अक्षयश्चाव्ययोलोके विचरस्वाकुतोभयः । ततोनिवारयामास रुद्रःसप्तशिखंतदा ७१ तृतीयंरक्षितंतस्य पुरंतेनमहात्मना । भ्रमत्तुगगनेदिव्यं

मेरे पूजनका लिंगनहीं भस्म होना चाहिये मैंने इस लिंगका परमभक्तिसे पूजनकियाहै इस हेतुसे यह आपकालिंगकभी दग्ध न होनाचाहिये ५९।६० हेदेव मैंतोजन्म २ में तुम्हारेचरणोंमेंहीरतरहताहूं अब आपकी स्तुति करताहूं— हेशिव शंकर शर्व हर भव भीम महेश्वर कामके शरीरके दग्धकरनेवाले त्रिपुरान्तक हे शूलधर आपकेअर्थ नमस्कारहै ६१।६२ हेप्रमदाप्रिय कान्त सुर असुरोंसे नमस्कृत घोड़े वानर सिद्ध और गजेन्द्र इन सबके मुखसेभी विलक्षण प्रकाशसहित विशालमुखवाले आप के अर्थ नमस्कार है ६३ मुझको बाधा देनेके अयोग्य देवता और दानव लोग पीड़ादेतेहैं हेदेव मैंतुम्हारी भक्तिमें युक्तहूं मेरे पुत्र स्त्री और अश्वादिक धननहीं है मैंतो केवल आपही का स्मरण करताहूं मैं महा पीड़ित होकर नरक की गतिमें प्राप्त होरहाहूं मेरी जन्मसहित पापकी मति निवृत्तनहीं होती है और मेरी बुद्धिभी शुद्ध कर्मको त्यागदेती है आपकी कृपाहीसे अनुग्रह होता है तभी कुकर्मोंका निवारण होता है ६४। ६६ जो कोई इस अर्थवाले त्रोटक छंदके स्तोत्रको पवित्र मन से पढ़ेगा उसको महादेवजी बाणासुरके वरदानके समान उत्तमवर देवेंगे ६७ इस महादिव्य स्तोत्रको महादेवजी सुनकर बड़ी प्रसन्नतासे बोले ६८ हे पुत्र भयकरना योग्य नहीं है तू इस सुवर्णके पुरमें प्रवेशकरजा और अपने पुत्र स्त्री और बन्धुआदिकोंको भी साथही साथलेजा ६९ हे बाणासुर अबसे लेकर जबतक तेरी अवधिहै तबतक तू देवताओंसे नहीं मरेगा इस प्रकारसे महादेवजीने फिर उस दैत्यको वरदेदिया ७० और उससेकहदिया कि अब निर्भय होकर तू इस पृथ्वीपर विचर इसकेअनन्तर अग्निको भी निवारण करदिया ७१ इसीसे कृपाकरके शिवजी ने उसका तीसरापुर दग्धनहींकिया

रुद्रतेजःप्रभावतः ७२ एवंतुत्रिपुरंदग्धं शङ्करेणमहात्मना। ज्वालामालाप्रदीप्तंतत् पतितंधरणीतले ७३ एकंनिपतितंतत्र श्रीशैलेत्रिपुरान्तके। द्वितीयंपतितंतस्मिन् पर्वतेऽमरकण्टके ७४ दग्धेषुतेषुराजेन्द्र ! रुद्रकोटिःप्रतिष्ठिता। ज्वलत्तदपतत्तत्र तेनज्वालेश्वरःस्मृतः ७५ ऊर्ध्वेनप्रस्थितास्तस्य दिव्यज्वालादिवङ्गताः। हाहाकारस्तदाजातो देवासुरकृतोमहान् ७६ शरमस्तंभयद्रुद्रो माहेश्वरपुरोत्तमे। एवंवृत्तंतदातस्मिन् पर्वतेऽमरकण्टके ७७ चतुर्दशाख्यंभुवनं सभुक्त्वापाण्डुनन्दन !। वर्षकोटिसहस्रन्तु त्रिंशत्कोट्यस्तथापराः ७८ ततोमहीतलंप्राप्य राजाभवतिधार्मिकः। पृथिवीमेकच्छत्रेणभुङ्क्ते सतुनसंशयः ७९ एवंपुण्योमहाराज ! पर्वतोऽमरकण्टके। चन्द्रसूर्योपरागेतुगच्छेद्योऽमरकण्टकम् ८० अश्वमेधाद्दशगुणं प्रवदन्तिमनीषिणः। स्वर्गलोकमवाप्नोति दृष्ट्वातत्र महेश्वरम् ८१ ब्रह्महत्यागमिष्यन्ति राहुग्रस्तेदिवाकरे। तदेवंनिखिलंपुण्यं पर्वतेऽमरकण्टके ८२ मनसापिस्मरेद्यस्तं गिरिंत्वमरकण्टकम्। चान्द्रायणशतंसाग्रं लभतेनात्र संशयः ८३ त्रयाणामपिलोकानां विख्यातोमरकण्टकः। एषपुण्योगिरिश्रेष्ठः सिद्धगन्धर्वसेवितः ८४ नानाद्रुमलताकीर्णो नानापुष्पोपशोभितः। मृगव्याघ्रसहस्रैस्तु सेव्यमानोमहागिरिः ८५ यत्रसन्निहितोदेवो देव्यासहमहेश्वरः। ब्रह्माविष्णुस्तथाचेन्द्रो वि

वहपुर शिवजी के प्रभावसे आकाशमें विचरताहै और वह भस्महुए दोपुर अग्निकी ज्वालाओं से व्याकुल होकर पृथ्वीतल में गिरजातेभये जहां पहलापुर गिरपड़ा वहांही श्रीशैलपर्व्वत होजाताभया और जहां दूसरापुर गिरा वहां अमरकंटक पर्व्वत होजाताभया ७२।७४ हे राजेन्द्र उन दग्धहुए पुरोंके ऊपर रुद्रोंकीकोटि २ प्रतिष्ठित होजातीभई जहां जलताहुआ पुर गिराथा इसीहितुसे वहां ज्वालेश्वर महादेव प्रसिद्धहैं उस जलतेहुए पुरकीझलें जब ऊपरकी ओर स्वर्गमें गईं उससमय देवता और असुरोंका हाहाकार होताभया उससमय महादेवजी अपनेबाणको धनुपसे उतारलेतेभये इस प्रकारसे यह सबवृत्तान्त माहेश्वरपुरमें अमरकंटक पर्व्वतपर होताभया ७५।७७ इस निमित्त अमरकंटक पर्व्वतपर उपवासआदि पुण्यकरनेवाला पुरुष चौदहभुवनों के भोगोंको भोगकर तीसकिरोड़ एकहज़ारवर्षपीछे इसपृथ्वीपर जन्मले धार्मिकराजाहोकर निस्सन्देह संपूर्ण पृथ्वीभरमें अकेलाही राज्यकरताहै ७८।७९ हे महाराज युधिष्ठिर इसप्रकारसे यहअमरकंटकतीर्थ बड़ा पवित्र है इसी हेतुसे चन्द्र और सूर्य्यग्रहणमें जो पुरुष अमरकंटक तीर्थपर प्राप्त होताहै वह अश्वमेधयज्ञ से भी दशगुणित पुण्यको प्राप्त होताहै और वहां महेश्वर शिवजी के दर्शन करने से स्वर्गलोककी प्राप्ति होती है सूर्य्यग्रहणमें इसतीर्थपर प्राप्तहोनेवाले पुरुषकी ब्रह्महत्या दूर होजाती है इसप्रकार से यह अमरकंटक पर्व्वतका संपूर्ण पुण्य कहा ८०।८२ जो पुरुष इस अमरकंटक पर्व्वतको मन करके भी स्मरण करता है वह भी निश्चय सौ १०० चान्द्रायण व्रतोंके पुण्यको प्राप्तहोताहै ८३ अमरकंटक तीर्थ तीनों लोकों में विख्यात है यह सर्व्वोत्तम पर्व्वत सिद्ध गन्धर्वादिकों से सेवित है ८४ और अनेकप्रकारके वृक्ष लता पुष्पादिकोंसे शोभितहै हजारों मृग और सिद्ध लोग उसमें

द्याधरगणैःसह ८६ ऋषिभिःकिन्नरैर्यक्षैर्नित्यमेव निषेवितः । वासुकिःसहितस्तत्र क्रीड
तेयन्नगोत्तमे ८७ प्रदक्षिणन्तुयःकुर्यात् पर्वतेऽमरकण्टके । पौण्डरीकस्ययज्ञस्य फलं प्र
प्नोतिमानवः ८८ तत्रज्वालेश्वरंनाम तीर्थंसिद्धनिषेवितम् । तत्रस्नात्वादिवंयान्ति येमृ
तास्तेपुनर्भवाः ८९ ज्वालेश्वरेमहाराज ! यस्तुप्राणान्परित्यजेत् । चन्द्रसूर्य्योपरागेषु
तस्यापिशृणुयत्फलम् ९० सर्वकर्म्मविनिर्मुक्ते ज्ञानविज्ञानसंयुतः । रुद्रलोकमवाप्नोति
यावदाभूतसंप्लवम् ९१ अमरेश्वरदेवस्य पर्वतस्यउभेतटे । तत्रताऋषिकोट्यस्तु तप
स्तप्यन्तिसुव्रत ! ९२ समन्ताद्योजनक्षेत्रो गिरिश्चामरकण्टकः । अकामोवासकामोवा
नर्मदायांशुभेजले ९३ स्नात्वामुच्यतितैःपापैरुद्रलोकंसगच्छति ९४ ॥

इति श्रीमत्स्यपुराणेसप्ताशीत्यधिकशततमोऽध्यायः १८७ ॥

(सूत उवाच) पृच्छन्तितेमहात्मानो मार्कण्डेयंमहामुनिम् । युधिष्ठिरपुरोगास्ते
ऋषयश्चतपोधनाः १ आख्याहिभगवन् ! तथ्यं कावेरीसङ्गमोमहान् । लोकानाञ्चहिता
र्थाय अस्माकञ्चविवृद्धये २ सदापापरतायेच नरादुष्कृतकारिणः । मुच्यंतेसर्वपापेभ्यो
गच्छन्तिपरमंपदम् । एतदिच्छामविज्ञातुं भगवन् ! वक्तुमर्हसि ३ (मार्कण्डेय उवाच)
शृण्वन्त्ववहिताः सर्वे युधिष्ठिरपुरोगमाः । आस्तवीरोमहायक्षः कुबेरःसत्यविक्रमः ४ इद
न्तीर्थमनुप्राप्य राजायक्षाधिपोऽभवत् । सिद्धिंप्राप्तोमहाराज ! तन्मेनिगदतःशृणु ५ का

बसते हैं उसपर्व्वतमें पार्वतीजी समेत महादेवजी विराजमानहैं ब्रह्मा विष्णु इन्द्र विद्याधर ऋषि
किन्नर और यक्ष इनसबसे व्याप्त जहां वासुकि सर्पक्रीड़ा करताहै ऐसे उस अमरकंटकतीर्थकी जो
प्रदक्षिणा करताहै वह पुण्डरीक यज्ञके फलको प्राप्तहोताहै ८५।८८ वहांही ज्वालेश्वर नाम महादेव
भी सिद्धोंसे सेवितहैं उस तीर्थपर स्नानकर मरनेवाले पुरुष स्वर्गलोकमें प्राप्त होते हैं हे महाराज
युधिष्ठिर जो पुरुष ज्वालेश्वर तीर्थपर चन्द्र वा सूर्य्य के ग्रहण में प्राण त्यागताहै वह जिस
पुण्यको प्राप्तहोताहै वह सुन ८९।९० सब कर्मोंसे छुट ज्ञान विज्ञानसे युक्तहो रुद्रलोकमें जाकर
प्रलयकालतक वास करताहै ९१ अमरेश्वरदेवके पर्व्वतके दोनों तटोंपर किरोड़ों ऋषि तप करते हैं
यह अमर कंटक क्षेत्ररूप पर्व्वत चारोंओर से एक २ योजन विस्तृत है इस स्थानपर कामना युक्त
अथवा निष्काम जो कोई पुरुष नर्मदानदी में स्नान करे है वह सब पापों से छुटकर रुद्रलोकमें प्राप्त
होताहै ९२।९४ ॥ इति श्रीमत्स्यपुराणभाषाटीकायांसप्ताशीत्यधिकशततमोऽध्यायः १८७ ॥

सूतजीबोले कि सब तपोधनऋषियों समेत राजा युधिष्ठिरने अपने समीपवर्त्ती मार्कण्डेयजीसे
पूंछा १ हे भगवन् आप सबके और हमारे हितके निमित्त इसकावेरी नदीके संगमकी कथाको विधि-
पूर्व्वक वर्णनकीजिये २ जोमनुष्य सदैव पापमें युक्त रहते हैं और बुरेही कर्मोंकोकरतेहैं वह मनुष्य
भी जिसके स्नानकरने से सबपापों से छुटजाते हैं ऐसी उस कावेरी नदी के उत्तम इतिहासको हम
आपसे श्रवण किया चाहते हैं ३ मार्कण्डेयजी बोले कि युधिष्ठिरसे आदिलेके तुमसब ऋषि लोग
सावधानी से श्रवणकरो कि सत्यपराक्रमी जो महायक्षराट् कुबेर है वहभी इसी तीर्थको प्राप्तहोकर

वेरीनर्मदायत्रसङ्गमोलोकविश्रुतः। तत्रस्नात्वाशुचिर्भूत्वा कुबेरःसत्यविक्रमः ६ तपोऽत
प्यत्तयक्षेन्द्रोदिव्यंवर्षशतंमहत्। तस्यतुष्टोमहादेवःप्रदातुंवरमुत्तमम् ७भोभोयक्ष! महा
सत्व! वरंब्रूहियथेप्सितम्। ब्रूहिकार्यंयथेष्टन्तु यद्वामनसिवर्तते ८ (कुबेर उवाच) यदि
तुष्टोऽसिमेदेव! यदिदेयोवरोमम । अद्यप्रभृतिसर्वेषां यक्षाणामधिपोभवेत् ९ कुबेरस्य
वचःश्रुत्वा परितुष्टोमहेश्वरः। एवमस्तुततोदेवस्तत्रैवान्तरधीयत १० सोऽपिलब्धवरो
यक्षः शीघ्रंलब्धफलोदयः। पूजितःसतुयक्षैश्च ह्यभिषिक्तस्तुपार्थिव! ११ कावेरीसङ्गमं
तत्र सर्वपापप्रणाशनम् । येनरानाभिजानन्ति वञ्चितास्तेनसंशयः १२ तस्मात्सर्वप्र
यत्नेन तत्रस्नायीतमानवः । कावेरीचमहापुण्या नर्मदाचमहानदी १३ तत्रस्नात्वातुरा
जेन्द्र! ह्यर्चयेद्वृषभध्वजम्। अश्वमेधफलंप्राप्य रुद्रलोकेमहीयते १४ अग्निप्रवेशंयः
कुर्याद्यश्चकुर्यादनाशकम्। अनिवर्त्यागतिस्तस्य यथामेशङ्करोऽब्रवीत् १५ सेव्यमानो
वरस्त्रीभिः क्रीडतेदिविरुद्रवत् । षष्टिवर्षसहस्राणि षष्टिकोट्यस्तथापराः १६ मोदतेरु
द्रलोकस्थो यत्रतत्रैवगच्छति। पुण्यक्षयात्परिभ्रष्टोराजाभवतिधार्मिकः १७ भोगवान्
दानशीलश्च महाकुलसमुद्भवः। तत्रपीत्वाजलंसम्यक् चांद्रायणफलंलभेत् १८ स्वर्गंग
च्छन्तितेमर्त्या येपिबन्तिशुभंजलम्। गङ्गायमुनयोर्मध्येयत्फलंप्राप्नुयान्नरःकावेरीसङ्गमे

यक्षोंका अधिपति राजाहोताभया जिस प्रकारसे उसको सिद्धि प्राप्तहुई वह सब मुझसे सुनो ४।५
जहां कावेरी और नर्मदा नदीका संगमहै वहां यक्ष कुबेर स्नानकर पवित्रतापूर्वक दिव्यसौ वर्षोंतक
तपस्या करता भया उसपर प्रसन्नहोकर महादेवजी यह वचन बोले कि हे यक्षकुबेर तू अपने मन
के अभीष्टको मांग अर्थात् जो तू चाहता है उसको मांग ६। ८ कुबेरने कहा हे देवदेव जो आप
मुझपर प्रसन्नहैं और कृपाकरके मुझे वर देना चाहतेहैं तो मेरी यह प्रार्थनाहै कि सब यक्षोंका राजा
होजाऊं ९ कुबेरके इस वचनको सुन तथास्तु अर्थात् ऐसाही होगा यह कहकर शिवजी वहीं अन्तर्द्धानहोगये
१० फिर वह यक्ष कुबेर वरको पाकर शीघ्रही सब यक्षों से पूजितहोकर यक्षोंके राज्य
पर प्राप्तहोजाता भया ११ ऐसा यह कावेरी नदीका संगम सब पापोंका नाश करनेवाला है जो
मनुष्य इस तीर्थको नहीं जानते हैं वह निश्चय ठगेहुए हैं १२ इसहेतुसे सब यत्नोंसे वहाँ स्नान
करना चाहिये यह कावेरी और नर्मदा दोनों नदियां महापुण्यदायी हैं वहाँ स्नानकरके जो पुरुष
महादेवजीका पूजनकरताहै वह अश्वमेध यज्ञके फलको प्राप्तहोकर रुद्रलोकमें प्राप्तहोताहै वहाँ जो
कोई पुरुष अग्निमें भस्महोताहै अथवा अनशन व्रत धारणकरताहै उसकी सर्वत्रजानेकी गतिहो
जातीहै यह महादेवजीका वचनहै १३। १५ कि वहपुरुष सर्वत्र गतिवालाहोकर रुद्रलोकमें उत्तम
स्त्रियोंसे सेवित साठकिरोड़ साठहज़ार ६०००६०००० वर्षोंतक वासकरताहै फिर जब पुण्यक्षीण
होजाता है तब पृथ्वी लोकमें जन्मलेकर महाभोगयुक्त उत्तमकुल समेत धार्मिकराजा होताहै और
जो पुरुष कावेरी और नर्मदानदीके संगमका जलपीताहै वह चान्द्रायणव्रतके फलको प्राप्त होताहै
१६।१८ उनके संगमका जलपीनेवाला गंगायमुना के संगमके पुण्यको प्राप्त होताहै और स्वर्गलोक

स्नात्वातत्फलंतस्यजायते १९ एवमादितुराजेन्द्र! कावेरीसङ्गमेमहत्। पुण्यंमहत्फलंतत्र सर्वपापप्रणाशनम् २० ॥ इति श्रीमत्स्यपुराणेऽष्टाशीत्यधिकशततमोऽध्यायः १८८ ॥

(मार्कण्डेय उवाच) नार्मदेचोत्तरेकूले तीर्थंयोजनविस्तृतम् । मन्त्रेश्वरेतिविख्यातं सर्वपापहरंपरम् १ तत्रस्नात्वानरोराजन् ! दैवतैःसहमोदते । पञ्चवर्षसहस्राणि क्रीडतेकामरूपधृक् २ गर्जनञ्चततोगच्छेद्यत्रमेघस्तथोत्थितः । इन्द्राजिन्नामसंप्राप्तस्तस्य तीर्थप्रभावतः ३ मेघनादंततोगच्छेद्यत्रमेघानुगर्जितम् । मेघनादोगणस्तत्र परमांगणताङ्गतः ४ ततोगच्छेत्तुराजेन्द्र ! तीर्थमाम्रातकेश्वरम् । तत्रस्नात्वानरोराजन् ! गोसहस्रफलंलभेत् ५ नर्मदोत्तरतीरेतु तीर्थन्तुविश्रुतंभवेत् । तस्मिंस्तीर्थेनरःस्नात्वा तर्पयेत् पितृदेवताः ६ सर्वान्कामानवाप्नोति मनसायेविचिन्तिताः । ततोगच्छेत्तुराजेन्द्र ! ब्रह्मावर्तमितिस्मृतम् ७ तत्रसन्निहितोब्रह्मा नित्यमेवयुधिष्ठिर ! । तत्रस्नात्वातुराजेन्द्र ! ब्रह्मलोकेमहीयते ८ ततोऽगारेश्वरंगच्छेन्नियतोनियताशनः । सर्वपापविनिर्मुक्तो रुद्रलोकंसगच्छति ९ ततोगच्छेच्चराजेन्द्र ! कपिलातीर्थमुत्तमम् । तत्रस्नात्वानरोराजन् ! कपिलादानमाप्नुयात् १० गच्छेत्करजतीर्थन्तु देवर्षिगणसेवितम् । तत्रस्नात्वानरोराजन् ! गोलोकंसमवाप्नुयात् ११ ततोगच्छेत्तुराजेन्द्र ! कुण्डलेश्वरमुत्तमम् । तत्रसन्निहितोरुद्रस्तिष्ठतेह्युमयासह १२ तत्रस्नात्वातुराजेन्द्र ! ह्यवध्यस्त्रिदशैरपि । पिप्पलेशन्ततोग

में भी वासकरताहै १९ हे राजेन्द्र इसप्रकार करके कावेरी और नर्मदानदी के संगमका महापुण्यहै यहांस्नान दानादि कर्मकरना सबपापोंका नाशकरनेवालाहै २० ॥

इतिश्रीमत्स्यपुराणभाषाटीकायामष्टाशीत्यधिकशततमोऽध्यायः १८८ ॥

मार्कण्डेयजी बोले—इस नर्मदानदीके उत्तरके किनारेपर एकयोजनके विस्तारवाला सबपापोंका नाशक मन्त्रेश्वर नाम तीर्थ है १ हे राजन् वहां स्नान करनेवाला पुरुष स्वर्ग में प्राप्तहोकर देवताओं के साथ पांचहज़ार वर्षोंतक वासकरताहै उसके पासही गर्जना नाम तीर्थ है यह गर्जना तीर्थ मेघके स्थानसे उत्पन्नहुआहै उसी तीर्थके प्रभावसे रावणकापुत्र इन्द्रजित् नामको प्राप्तहुआहै उसके समीप मेघनाद तीर्थ है जहां जानेसे मेघनाद बड़ीसिद्धिको प्राप्तहुआ २।४ वहांसेआगे आम्रातकतीर्थ है वहां स्नानकरनेवाला पुरुष हज़ार गोदानके पुण्यको प्राप्तहोता है ५ नर्मदानदीके उत्तर किनारे पर विश्रुतनाम तीर्थ है वहां स्नानकर पितर तथा देवताओं का तर्पण करनेसे मनोभीष्ट कामना सिद्ध होतीहै उसकेपीछे ब्रह्मावर्त्त तीर्थपर जाना योग्यहै ६ । ७ हे युधिष्ठिर यहां ब्रह्मावर्त्त तीर्थ पर प्रतिदिन ब्रह्माजी निवास करते हैं वहां स्नान करनेवाला पुरुष ब्रह्मलोक में प्राप्तहोता है ८ इसके अनन्तर नियम व्रत धारण करके अगारेश्वर तीर्थपर प्राप्त होनाचाहिये वहाँ प्राप्त होनेवाला पुरुष सबपापोंसे रहित होकर रुद्रलोकमें प्राप्त होताहै ९ इसके पीछे कपिलातीर्थपर जानाचाहिये वहाँ स्नान करनेवाला पुरुष कपिला गौके दानके पुण्यको प्राप्त होताहै १० जो पुरुष देवऋषि गणोंसे सेवित करंजनाम तीर्थ परजाकर स्नान करताहै वह गोलोकमें प्राप्त होताहै ११ इसके आगे

च्छेत् सर्वपापप्रणाशनम् १३ तत्रस्नात्वातुराजेन्द्र ! रुद्रलोकेमहीयते । ततोगच्छेत्तुराजेन्द्र ! विमलेश्वरमुत्तमम् १४ तत्रदेवाशिलारम्या चेश्वरेणविनिर्मिता । तत्रप्राणपरित्यागाद्रुद्रलोकमवाप्नुयात् १५ ततःपुष्करिणींगच्छेत् तत्रस्नानंसमाचरेत् । स्नातमात्रो नरस्तत्र हीन्द्रस्यार्द्धासनंलभेत् १६ नर्म्मदासरितांश्रेष्ठा रुद्रदेहाद्विनिःसृता । तारयेत् सर्वभूतानि स्थावराणिचराणिच १७ सर्वदेवाधिदेवेन त्वीश्वरेणमहात्मना । कथितात्रृषिसङ्घेभ्यो ह्यस्माकञ्चविशेषतः १८ मुनिभिःसंस्तुताह्येषा नर्म्मदाप्रवरानदी । रुद्रदेहाद्विनिष्क्रान्ता लोकानांहितकाम्यया १९ सर्वपापहरानित्यं सर्वदेवनमस्कृता । संस्तुतादेवगन्धर्वैरप्सरोभिस्तथैवच २० नमःपुण्यजलेह्याद्ये नमःसागरगामिनि ! । नमस्ते पापशमनि ! नमोदेवि ! वरानने २१ नमोऽस्तुतेऋषिगणासिद्धसेविते ! नमोऽस्तुतेशङ्करदेहनिःसृते ! । नमोऽस्तुतेधर्म्मभृतांवरप्रदे ! नमोऽस्तुतेसर्वपवित्रपावने ! २२ यस्त्विदं पठतेस्तोत्रं नित्यंश्रद्धासमन्वितः । ब्राह्मणोवेदमाप्नोति क्षत्रियोविजयीभवेत् २३ वैश्यस्तुलभतेलाभं शूद्रश्चैवशुभाङ्गतिम् । अर्थार्थीलभतेह्यर्थं स्मरणादेवनित्यशः २४ नर्म्मदांसेवतेनित्यं स्वयंदेवोमहेश्वरः । तेनपुण्यानदीज्ञेया ब्रह्महत्यापहारिणी २५ ॥

इति श्रीमत्स्यपुराणेएकोननवत्यधिकशततमोऽध्यायः १८९ ॥

(मार्कण्डेय उवाच) तदाप्रभृत्तिब्रह्माद्या ऋषयश्चतपोधनाः । सेवन्तेनर्म्मदांराजन् ! रागक्रोधविवर्जिताः १ (युधिष्ठिर उवाच) कस्मिन्निपतितंशूलं देवस्यतुमहीतले ।

कुंडेश्वर तीर्थपर जाना चाहिये वहाँ पार्वतीजी सहित महादेवजी स्थित हैं १२ वहाँ स्नानकरनेवाला पुरुष देवताओंसेभी नाशको प्राप्त नहींहोताहै इसके पीछे उत्तम विमलेश्वर तीर्थपर जहाँकि रमणीक देवशिला महादेवजीने रची है वहाँ प्राण त्यागनेसे रुद्रलोककी प्राप्तिहोती है १३।१५ इसके पीछे पुष्करणी नदीहै वहाँ स्नान करनेवाला पुरुष इन्द्रके अर्द्धासनका अधिकारी होताहै १६ इसीसे यह नर्मदा नदी शिवजीके शरीरसे निकलकर सब नदियोंमें श्रेष्ठहो अशेष स्थावर जंगमोंका उद्धार करती है १७ यह उत्तम नर्मदा नदी सब देवताओंके पति श्रीमहादेवजीने सब ऋषियोंके आगे श्रेष्ठबताई है सबलोगोंकी हितकारी है १८ यहनदी सब देवताओंसे पूजितहोकर सबपापोंकी हरनेवाली देवगन्धर्व और अप्सराओंसे स्तुति कीजातीहै इस पवित्र जलवाली पापोंकी शांतकरनेवाली समुद्रगामी नर्मदा नदीको नमस्कारहै १९।२१ हे ऋषिगण सिद्धादि से सेवित शंकरशरीरोद्भव धर्मात्मापुरुषोंको वरदेनेवाली नर्मदानदी तुमको नमस्कार है २२ इस स्तोत्रको जो पुरुष श्रद्धा भक्तियुक्त होकर पढ़ताहै वह ब्राह्मण होय तो वेदपारगहोताहै क्षत्री विजयी होताहै वैश्यधनी होताहै शूद्र उत्तमगतिको प्राप्त होताहै और धनार्थी धनको प्राप्त होता है इस नर्मदा नदीको नित्य महादेवजी सेवतेहैं इस हेतुसे नर्मदा नदी महापवित्र सबपापोंकी नाशकरनेवाली है २३।२५॥

इतिश्रीमत्स्यपुराणभाषाटीकायामेकोननवत्यधिकशततमोऽध्यायः १८९ ॥

मार्कण्डेयजीबोले हेराजन् इस नर्मदानदीको ब्रह्मादिक सव देवता और ऋषि मुनिलोग क्रोधरागा-

तत्रपुण्यंसमाख्याहि यथावन्मुनिसत्तम ! २ (मार्कण्डेय उवाच) शूलभेदेतिविख्यातं तीर्थपुण्यतमंमहत् । तत्रस्नात्वार्चयेद्देवं गोसहस्रफलंलभेत् ३ त्रिरात्रङ्कारयेद्यस्तु तस्मिंस्तीर्थेनराधिप ! । अर्चयित्वामहादेवं पुनर्जन्मनविद्यते ४ भीमेश्वरंततोगच्छेन्नारदेश्वरमुत्तमम् । आदित्येशंमहापुण्यं तथाघृतमधुस्रवम् ५ नन्दिकेशंपरिष्वज्य पर्य्याप्तंजन्मनःफलम् । वरुणेशंततःपश्येत् स्वतन्त्रेश्वरमेवच । सर्वतीर्थफलंतस्य पञ्चायतनदर्शनात् ६ ततोगच्छेत्तुराजेन्द्र ! युद्धंयत्रसुसाधितम् । कोटितीर्थन्तुविख्यातमसुरायत्रमोहिताः ७ यत्रैवनिहताराजन् ! दानवाबलदर्पिताः । तेषांशिरांस्यगृह्णन्तसर्वे देवाःसमागताः ८ तैस्तुसंस्थापितोदेवः शूलपाणिर्वृषध्वजः । कोटिर्विनिहतातत्र तेनकोटीश्वरःस्मृतः ९ दर्शनात्तस्यतीर्थस्य सदेहःस्वर्गमारुहेत् । यदात्विन्द्रेणक्षुद्रत्वाद्वज्रकीलेनयन्त्रितम् १० तदाप्रभृतिलोकानां स्वर्गमार्गोनिवारितः । सघृतं श्रीफलंजग्ध्वा कृत्वाचैवप्रदक्षिणम् ११ पार्वतंसहदीपन्तु शिरसाचैवधारयेत् । सर्वकामसुसम्पन्नो राजाभवतिपाण्डव ! १२ मृतोरुद्रत्वमाप्नोति ततोऽसौजायतेपुनः । स्वर्गादेत्यभवेद्राजा राज्यंकृत्वादिवंव्रजेत् १३ बहुनेत्रंततःपश्येत् त्रयोदश्यान्तुमानवः । स्नातमात्रोनरस्तत्र सर्वयज्ञफलंलभेत् १४ ततोगच्छेत्तुराजेन्द्र ! तीर्थंपरमशोभनम् । नरा

दिसे रहित होकर सेवन करते हैं १ युधिष्ठिरने पूछा कि हे मार्कण्डेयजी महादेवजी का त्रिशूल इस भूलोकमें कबगिरा और जहाँगिरा वहाँका क्या पुण्यहै यहहमसे वर्णनकीजिये २ मार्कण्डेयजी बोले कि जहाँ उनका त्रिशूल गिराहै वह शूल भेदनाम तीर्थ है वहाँ स्नानकर महादेवजीका पूजन करनेवाला पुरुप हज़ार गोदान के पुण्य को प्राप्त होता है ३ जो पुरुष वहाँ तीन दिनतक दास करता है और शिवार्चन करता है उसका पुनर्जन्म नहीं होताहै ४ इसके पीछे भीमेश्वर तीर्थ और नारदेश्वर तीर्थपर आदित्येश घृतमधुस्रव और नन्दिकेश इन सब महादेवों के दर्शन करने से जन्म सफल होजाता है फिर वरुणेश और स्वतन्त्रेश्वर शिवजी के दर्शन करनेचाहिये इन पांचों स्थानों के दर्शन करनेसे सब तीर्थों के दर्शनका फल प्राप्त होताहै ५।६ इसके पीछे जहाँ देवता और दैत्यों का युद्ध हुआहै वहाँ कोटि तीर्थपर सब दैत्य मोहे गये हैं ७ और जो बलवान् दैत्य मारे गये हैं उनके शिरोंको देवताओंने गिरायाहै और वहीं देवताओंने शूलपाणि महादेवजी स्थापित किये हैं और शिवजीने देवताओंकी कोटि हतकी है इसीसे उसको कोटीश्वर तीर्थ कहते हैं इन कोटिश्वर महादेवके दर्शन करनेसे इसी शरीरसे स्वर्गलोकमें चलाजाता है जबसे कि इन्द्रने वज्रकीलक मंत्रों से अवरोध करदियाहै तभीसे स्वर्गका मार्ग रुकगयाहै जो पुरुष घृत सहित नारियलको जलाके वहाँ महादेवजीके आगे अपने शिरपर धारण करलेताहै वह सम्पूर्ण समृद्धियों वाला राजाहोताहै और जो मरजाताहै वह रुद्रलोकमें प्राप्तहोताहै और दूसरे जन्ममें राजाहोताहै और फिरभी मरकर स्वर्ग लोकमें जाताहै ८।१३ त्रयोदशीके दिन बहु नेत्रवाले तीर्थपरजाके स्नानकरने वाला पुरुष सब यज्ञोंके फलोंको प्राप्तहोताहै १४ इसके पीछे परमसुन्दर अगस्त्येश्वर नाम उत्तम तीर्थपर जाकर

णांपापनाशाय ह्यगस्त्येश्वरमुत्तमम् १५ तत्रस्नात्वानरोराजन् ! ब्रह्मलोकेमहीयते। कार्तिकस्यतुमासस्य कृष्णपक्षेचतुर्दशी १६ घृतेनस्नापयेद्देवं समाधिस्थोजितेन्द्रियः। एकविंशकुलोपेतोनच्यवेदैश्वरात्पुरात् १७ धेनुमुपानहच्छत्रे दद्याच्चघृतकम्बलम्। भोजनंचैवविप्राणां सर्वकोटिगुणंभवेत् १८ ततोगच्छेच्चराजेन्द्र ! वलाकेश्वरमुत्तमम्। तत्रस्नात्वानरोराजन् ! सिंहासनपतिर्भवेत् १९ नर्मदादक्षिणेकूले तीर्थंशक्रस्यविश्रुतम्। उपोष्यरजनीमेकां स्नानंतत्रसमाचरेत् २० स्नानंकृत्वायथान्यायमर्चयेच्चजनार्दनम्। गोसहस्रफलंतस्य विष्णुलोकंसगच्छति २१ ऋषितीर्थंततोगच्छेत् सर्वपापहरंनृणाम्। स्नातमात्रोनरस्तत्र गोसहस्रफलंलभेत् २२ देवतीर्थंततोगच्छेद् ब्रह्मणानिर्मितंपुरा। तत्रस्नात्वानरोराजन् ! ब्रह्मलोकेमहीयते २३ अमरकण्टकंगच्छेदमरैःस्थापितंपुरा। स्नातमात्रोनरस्तत्र रुद्रलोकेमहीयते २४ ततोगच्छेच्चराजेन्द्र ! रावणेश्वरमुत्तमम्। तत्पञ्चायतनंदृष्ट्वा मुच्यतेब्रह्महत्यया २५ ऋणतीर्थंततोगच्छेदृणेभ्योमुच्यतेध्रुवम्। बटेश्वरंततोदृष्ट्वा पर्याप्तंजन्मनःफलम् २६ भीमेश्वरंततोगच्छेत् सर्वव्याधिविनाशनम्। स्नातमात्रोनरोराजन् ! सर्वदुःखैःप्रमुच्यते २७ ततोगच्छेत्तुराजेन्द्र ! तुरासङ्गमनुत्तमम्। तत्रस्नात्वामहादेवमर्चयन्सिद्धिमाप्नुयात् २८ सोमतीर्थंततोगच्छेत् पश्येच्चन्द्रमनुत्तमम्। तत्रस्नात्वानरोराजन् ! भक्त्यापरमयायुतः २९

स्नानकरने वाला पुरुष ब्रह्मलोकमें प्राप्तहोताहै और कार्तिकमहीनेके कृष्णपक्षकी चतुर्दशीको जो उनमहादेवजीको घृतसे स्नानकराताहै और जितेन्द्रियहोकर समाधिमें स्थितरहताहै वह अपनीइक्कीस पीढ़ियों समेत महादेवजीके लोकमें बासकरताहै और वहाँसे फिर पतित नहींहोता १५। १७ औरजो वहाँ गौ उपानह छत्र घृत और कम्बल इत्यादिक बस्तुओंका दानकरताहै और ब्राह्मणोंको भोजन करवाताहै उसका सबपुण्य कोटिगुणा होजाताहै १८ इसकेपीछे बिल्वकेश्वर तीर्थपर जाना योग्यहै वहाँ स्नानकरने वाला पुरुष सिंहासनका पतिहोताहै १९ नर्मदानदीके दक्षिण तटपर इन्द्रका तीर्थ प्रसिद्धहै वहाँ एकरात्रि उपवास व्रतकर स्नानकरके जो पुरुष जनार्दन भगवान्का पूजन करताहै उसको हज़ार गौओंके दानका पुण्यहोताहै और विष्णुलोककी प्राप्तिहोतीहै २०। २१ फिर ऋषि तीर्थपर जाकर स्नानमात्रकेही करनेसे हज़ार गौ दानका पुण्यहोताहै २२ फिर ब्रह्माजीके रचेहुए तीर्थपर जानाचाहिये वहाँ स्नानकरनेसे ब्रह्मलोककी प्राप्तिहोतीहै २३ फिर देवताओंके स्थापित कियेहुए अमरकंटक महादेवजीके स्थानमें प्राप्तहोकर स्नानमात्रहीके करनेसे रुद्रलोककी प्राप्ति होतीहै २४ फिर रावणेश्वर महादेवके दर्शन करनेचाहिये उन महादेवजीके दर्शन करनेसे ब्रह्महत्या दूरहोजातीहै २५ फिर ऋषि तीर्थपर जानाउचितहै वहाँ जानेसे सब ऋण दूर होजाताहै फिर बटेश्वर तीर्थके दर्शन करनेसे जन्म सफलहोजाताहै २६ इसकेपीछे संपूर्ण व्याधियोंके नष्टकरने वाले भीमेश्वर महादेवके दर्शन करनेचाहिये वहाँके स्नानही करनेसे सब दुःख दूरहोजातेहैं फिर तुरासंग तीर्थपर स्नानकर महादेवका पूजनकरनेसे परम सिद्धिकी प्राप्तिहोतीहै २७। २८ फिर सोमतीर्थपर

तत्क्षणाद्दिव्यदेहस्थः शिववन्मोदतेचिरम् । षष्टिवर्षसहस्राणि रुद्रलोकेमहीयते ३०
ततोगच्छेत्तुराजेन्द्र ! पिङ्गलेश्वरमुत्तमम् । अहोरात्रोपवासेन त्रिरात्रफलमाप्नुयात् ३१
तस्मिंस्तीर्थेतुराजेन्द्र कपिलांयःप्रयच्छति । यावन्तितस्यारोमाणि तत्प्रसूतिकुलेषुच
३२ तावद्वर्षसहस्राणि रुद्रलोकेमहीयते । यस्तुप्राणपरित्यागं कुर्यात्तत्रनराधिप ! ३३
अक्षयंमोदतेकालं यावच्चन्द्रदिवाकरौ । नर्म्मदातटमाश्रित्य तिष्ठेयुर्यत्रमानवाः ३४ ते
मृताःस्वर्गमायान्ति सन्तःसुकृतिनोयथा । सुरेश्वरंततोगच्छेन्नाम्नाकर्कोटकेश्वरम् ३५
गङ्गावतरतेतत्र दिनेपुण्येनसंशयः । नन्दितीर्थंततोगच्छेत् स्नानंतत्रसमाचरेत् ३६ तु
ष्यतेतस्यनन्दीशः सोमलोकेमहीयते । ततोदीपेश्वरंगच्छेद्व्यासतीर्थंतपोवनम् ३७ नि
वर्तितापुरातत्र व्यासभीतामहानदी । हुङ्कारितातुव्यासेन दक्षिणेनततोगता ३८ प्रद
क्षिणंतुयःकुर्यात् तस्मिंस्तीर्थेनराधिप !। अक्षयंमोदतेकालं यावच्चन्द्रदिवाकरौ ३९ व्या
सस्तस्यभवेत्प्रीतः प्राप्नुयादीप्सितंफलम् । सूत्रेणवेष्टयित्वातु दीपोदेयःसवेदिकः ४०
क्रीडन्तिह्यक्षयंकालं यथारुद्रस्तथैवच । ततोगच्छेच्चराजेन्द्र ! ऐरण्डीतीर्थमुत्तमम् ४१
सङ्गमेतुनरःस्नात्वा मुच्यतेसर्वपातकैः । ऐरण्डीत्रिषुलोकेषु विख्यातापापनाशिनी ४२
अथवाश्वयुजेमासि शुक्लपक्षेतुचाष्टमी । शुचिर्भूत्वानरःस्नात्वा सोपवासपरायणः ४३ ब्रा

जाकर उत्तम चन्द्रमाके दर्शन करनेयोग्यहैं वहां भक्तिकरके स्नान करनेवाला पुरुप तत्काल दिव्य शरीरी होकर बहुतकालतक शिवजीके समान आनन्द करताहै और साठहज़ार वर्षोंतक रुद्रलोकमें वासकरताहै इसके अनन्तर उत्तम पिंगलेश्वर महादेवके दर्शन करने चाहिये वहां एक दिनरात्रिके उपवासव्रत करनेसे तीनरात्रिका फलहोताहै हे राजन् उसतीर्थपर जो कपिलागौका दानकरता है वह गौके शरीरके रोमोंकी संख्यावाले वर्षोंतक रुद्रलोकमें वासकरताहै और जो वहां प्राणोंको त्यागता है वह अक्षयकालतक चन्द्रमा और सूर्य्य की स्थितितक रुद्रलोकमें आनन्द करताहै और नर्मदानदीके तटपर वासकरनेवाले पुरुष साधु सुकृती पुरुपोंके समान स्वर्गलोकमें बास करते हैं और सुरेश्वर तथा कर्कोटकेश्वर महादेवके भी दर्शन करने चाहिये २९। ३५ वहां पवित्र दिनमें निस्सन्देह श्रीगङ्गाजी प्रकटहोती हैं फिर नन्दीतीर्थपर जाकर स्नान करनेसे नन्दीश महादेवजी प्रसन्न होते हैं और चन्द्रलोककी प्राप्ति होती है इसके पीछे दीपेश्वर महादेवके दर्शन करने चाहिये वहां उत्तम तपोवनमें वेदव्यासजी का तीर्थ है पूर्वकालमें वहां वेदव्यासजीके भयसे नर्मदानदी उलटी बहने लगगई थीं जब वेदव्यासजीने हुंकारशब्द किया तब दक्षिणकीओर वहनेलगीं ३६। ३८ उस तीर्थकी जो प्रदक्षिणा करताहै वह अक्षयकालतक चन्द्रमा और सूर्य्य की स्थितितक शिवलोक में आनन्द करताहै ३९ वहां वेदव्यासजी प्रसन्न होकर मनोवाञ्छित फलोंको देतेहैं जो पुरुष सूत्रसे लपेटकर वेदिकाके ऊपर दीपक प्रकाश करताहै वह अक्षयकालतक रुद्रलोकमें बासकरताहै इसके पीछे उत्तम ऐरंडी तीर्थपरजाके नदीके संगममें स्नानकरनेवाला सबपापोंसे छुटजाताहै वह ऐरंडी नदी तीनोंलोकों में विख्यातहै और पापोंको नाशकरनेवाली है वहां आश्विनशुदीअष्टमीको स्नानसे

ह्मणंभोजयेदेकं कोटिर्भवतिभोजिता । मृत्तिकांशिरसिस्थाप्य ह्यवगाह्यचवैजलम् ४४
नर्मदोदकसंमिश्रं मुच्यतेसर्वकिल्बिषैः । प्रदक्षिणंतुयःकुर्यात् तस्मिंस्तीर्थेनराधिप ! ४५
प्रदक्षिणीकृतातेन सप्तद्वीपावसुन्धरा। ततःसुवर्णसलिले स्नात्वादत्त्वातुकाञ्चनम्४६ का
ञ्चनेनविमानेन रुद्रलोकेमहीयते । ततःस्वर्गाच्च्युतःकालाद्राजाभवतिवीर्यवान् ४७
ततोगच्छेच्चराजेन्द्र ! हीक्षुनद्यास्तुसङ्गमम्। त्रैलोक्यविश्रुतंदिव्यं तत्रसान्निहितःशिवः४८
तत्रस्नात्वानरोराजन् ! गाणपत्यमवाप्नुयात् । स्कन्दतीर्थंततोगच्छेत् सर्वपापप्रणाशन
म्४९तत्तीर्थंत्रिविधंपापं स्नानमात्राद्व्यपोहति। लिङ्गसारंततोगच्छेत् स्नानंतत्रसमाचरे
त्५०गोसहस्रफलंतस्य रुद्रलोकेमहीयते। भङ्गतीर्थंततोगच्छेत् सर्वपापप्रणाशनम्५१
तत्रगत्वातुराजेन्द्र ! स्नानंतत्रसमाचरेत् । सप्तजन्मकृतैःपापैर्मुच्यतेनात्रसंशयः ५२ वटे
श्वरंततोगच्छेत् सर्वतीर्थमनुत्तमम् । तत्रस्नात्वानरोराजन् ! गोसहस्रफलंलभेत् ५३
सङ्गमेशन्ततोगच्छेत् सर्वदेवनमस्कृतम् । स्नानमात्रान्नरस्तत्र चेन्द्रत्वंलभतेध्रुवम् ५४
कोटितीर्थंततोगच्छेत् सर्वपापहरंपरम् । तत्रस्नात्वानरोराज्यंलभतेनात्रसंशयः५५ तत्र
तीर्थंसमासाद्य दत्त्वादानंतुयोनरः । तस्यतीर्थप्रभावेणसर्वंकोटिगुणंभवेत् ५६ अथनारी
भवेत्काचित् तत्रस्नानंसमाचरेत् । गौरीतुल्याभवेत्सापि त्विन्द्रपत्नीनसंशयः ५७ अ

पवित्रहोकर निराहारव्रतकरे पीछे एक ब्राह्मणको भोजनकरवावे उसको किरोड़ ब्राह्मण जिमानेका
पुण्य होताहै और वहांकी मृत्तिका शिरपर लगाकर जलमें गोतामार फिर नदीके जलमें जो गोता
मारताहै वह पुरुष सब पापोंसे छुटजाताहै और जोकोई उसतीर्थकी प्रदक्षिणा करताहै उसकोसातों
समुद्रों सहित संपूर्ण पृथ्वीकी प्रदक्षिणाकरनेका फलमिलताहै इसकेपीछे सुवर्णके जलसे स्नान
करजो सुवर्णकाही दानकरताहै वह सुवर्णके बिमानमें स्थितहोकर रुद्रलोकमें वासकरताहै फिर
जब कालबशहोकर स्वर्गसे पतितहोताहै तब राजाहोताहै इसके अनन्तर हीक्षुनदीके संगमपर जाना
चाहिये. वह दिव्य तीर्थ त्रिलोकीमें विख्यातहै वहाँ शिवजीका निवासरहताहै ४०। ४८ वहाँस्नान
करनेवाला पुरुष शिवके गणोंका अधिपतिहोताहै इसके पीछे सब पापोंके नष्टकरनेवाले स्वामिका-
र्तिक तीर्थपर जानाचाहिये वह तीर्थ स्नानहीके करनेसे तीनप्रकारके पापोंको नष्टकरदेताहै फिर
लिंगसार तीर्थपर जाकर स्नानकरनाचाहिये वहाँ स्नानकरने वालेको हज़ार गौओंके दानकापुण्य
होताहै और रुद्रलोकमें बासकरताहै सब पापोंका नाशकभंगतीर्थ है वहाँ स्नानकरनेसे सात जन्मके
कियेहुए पापनष्टहोजातेहैं ४९। ५२ फिर सब तीर्थोंमें उत्तम बटेश्वर तीर्थपर जाना चाहिये वहाँ
स्नान करनेसे हज़ार गौकेदानका फल मिलता है ५३ फिर सबदेवताओंसे पूजित संगमेश तीर्थहै व-
हाँ स्नान करनेवाला पुरुष इन्द्रहोताहै ५४ फिर कोटि तीर्थपर जानायोग्यहै वहाँ स्नान करनेवाले
पुरुषको निस्सन्देह राज्यकी प्राप्ति होतीहै ५५ और उस तीर्थपर जो दानदेताहै वह कोटिगुणा फल-
दायी होजाताहै ५६ और जो कोई स्त्री उस तीर्थपर स्नान करतीहै वह पार्वतीजीके समान रूप
वाली होकर इन्द्रकी स्त्री होतीहै ५७ इसके पीछे अंगारेश तीर्थमें जाके स्नान करना चाहिये वहाँ

ङ्गारेशंततोगच्छेत् स्नानंतत्रसमाचरेत् । स्नातमात्रोनरस्तत्र रुद्रलोकेमहीयते ५८ अ
ङ्गारकचतुर्थ्यान्तु स्नानंतत्रसमाचरेत् । अक्षयंमोदतेकालं शुचिःप्रयतमानसः ५९ अयो
निसम्भवेस्नात्वा नपश्येद्योनिसङ्कटम् । पाण्डवेशन्तुतत्रैवस्नानंतत्रसमाचरेत् ६० अक्ष
यंमोदतेकालमबध्यैस्त्रिदशैरपि । विष्णुलोकंततोगत्वा क्रीडतेभोगसंयुतः ६१ तत्रभुक्त्वा
महाभोगान् मर्त्यराजोऽभिजायते । कठेश्वरंततोगच्छेत् तत्रस्नानंसमाचरेत् ६२ उत्तरा
यणसंप्राप्तोयदिच्छेत्ततस्यतद्भवेत् । चन्द्रभागांततोगच्छेत् तत्रस्नानंसमाचरेत्६३ स्ना
तमात्रोनरोराजन् ! सोमलोकेमहीयते । ततोगच्छेत्तुराजेन्द्र ! तीर्थंशक्रस्यविश्रुतम् ६४
पूजितंदेवराजेन देवैरपिनमस्कृतम्। तत्रस्नात्वानरोराजन् । दानंदत्त्वातुकाञ्चनम् ६५
अथवानीलवर्णाभं वृषभंयःसमुत्सृजेत् । वृषभस्यतुरोमाणि तत्प्रसूतिकुलेषुच ६६
तावद्वर्षसहस्राणि नरोहरपुरेवसेत् । ततःस्वर्गात्परिभ्रष्टो राजाभवतिवीर्यवान् ६७ अ
श्वानांश्वेतवर्णानां सहस्राणांनराधिप !। स्वामीभवतिमर्त्येषु तस्यतीर्थप्रभावतः ६८ त
तोगच्छेत्तुराजेन्द्र ब्रह्मावर्त्तमनुत्तमम्। तत्रस्नात्वानरोराजन् ! तर्पयेत्पितृदेवताः ६९
उपोष्यरजनीमेकां पिण्डंदत्त्वायथाविधि । कन्यागतेतथादित्ये अक्षयंस्यान्नराधिप ! ७०
ततोगच्छेच्चराजेन्द्र ! कपिलातीर्थमुत्तमम् । तत्रस्नात्वानरोराजन् ! कपिलांयःप्रयच्छति
७१ सम्पूर्णपृथिवींदत्त्वायत्फलंतदवाप्नुयात् । नर्मदेशंपरंतीर्थं नभूतंनभविष्यति ७२
तत्रस्नात्वानरोराजन्नश्वमेधफलंलभेत् । नर्मदादक्षिणेकूलेसङ्गमेश्वरमुत्तमम् ७३ तत्र

स्नान करनेवाला पुरुष अक्षयकाल पर्य्यन्त आनन्द करताहै ५८। ५९ जो पुरुष अयोनिसंभव नामतीर्थपर स्नान करताहै वह कभी योनि संकटोंको नहीं देखता है इसके पीछे पांडवेश तीर्थपर स्नान करना उचितहै ६० उस तीर्थपर स्नान करनेसे बहुत कालतक आनन्दकी प्राप्ति होकर देवताओं सेभी वधनहीं होताहै और विष्णुलोकमें प्राप्त होके विष्णुलोकमें अनेक भोगोंको भोगताहुआ पतित होकर मृत्युलोकमें जन्म लेकर राजाहोताहै फिर कठेश्वर तीर्थपर स्नानकरै और जब उत्तरायण सूर्य्यहो तब वहाँ वास करनेवाला पुरुष मनोवांछित फलको प्राप्त होताहै फिर चन्द्रभागानदी में स्नान करना चाहिये ६१। ६३ चन्द्रभागा नदीमें स्नान करनेवाला पुरुष चन्द्रलोकमें प्राप्त होताहै फिर इन्द्रके तीर्थपर जाना चाहिये जहाँ इन्द्रने पूजन कियाहै वहाँ स्नान करके जो सुवर्णका दान करता है अथवा नील वृषभका दान करताहै वह उस बैलके शरीरपै और उसके पुत्रोंके शरीरपै जितने रोमहोतेहैं उतनेहीं वर्षोंतक शिवजीके पुरमें वास करताहै फिर स्वर्गसे पतितहोकर बलवान् राजा होताहै उस तीर्थके प्रभावसे श्वेत वर्णवाले उत्तम हज़ारों अश्वोंका पति होताहै ६४। ६८ फिर ब्रह्मावर्त तीर्थपर स्नानकर पितृदेवताओंका तर्पणकरके एकरात्रि उपवास व्रतकरे और कन्याकीसंक्रान्तिमें यथार्थ विधिसे जोपुरुष पिंडदान करताहै वह पुरुष अक्षय गुणित फलको प्राप्तहोताहै ६९। ७० फिर उत्तम कपिला तीर्थपर स्नानकरके जोकपिला गौकादान करताहै वहसंपूर्ण पृथ्वीके दानकाफल पाताहै एकनर्मदेशनाम परम उत्तम तीर्थ है उस तीर्थके समान न कोई तीर्थ है न होगा ७१।७२ वहाँ

स्नात्वानरोराजन् ! सर्वयज्ञफलंलभेत् । तत्रसर्वोद्यतोराजा पृथिव्यामेवजायते ७४
सर्वलक्षणसम्पूर्णः सर्वव्याधिविवर्जितः । नार्मदेचोत्तरेकूले तीर्थंपरमशोभनम् ७५
आदित्यायतनंदिव्यमीश्वरेणतुभाषितम् । तस्यतीर्थप्रभावेण दत्तंभवतिचाक्षयम् ७६
हरिद्राव्याधिनोयेतु येचदुष्कृतकर्मिणः । मुच्यन्तेसर्वपापेभ्यःसूर्यलोकंतुयान्तिते७७माघ
मासेतुसंप्राप्ते शुक्लपक्षस्यसप्तमी । वसेदायतनेतत्र निराहारोजितेन्द्रियः ७८ नजराव्या
धितोमूको नचान्धोवधिरोऽथवा । सुभगोरूपसंपन्नः स्त्रीणांभवतिवल्लभः ७९ एवंतीर्थं
महापुण्यं मार्कण्डेयेनभाषितम् । येनजानन्तिराजेन्द्र ! वञ्चितास्तेनसंशयः ८० गर्गे
श्वरंततोगच्छेत् स्नानंतत्रसमाचरेत् । स्नातमात्रोनरस्तत्र स्वर्गलोकमवाप्नुयात् ८१
मोदतेस्वर्गलोकस्थो यावदिन्द्राश्चतुर्दश । समीपतःस्थितंतस्य नागेश्वरतपोवनम् ८२
तत्रस्नात्वातुराजेन्द्र ! नागलोकमवाप्नुयात् । वह्निभिर्नागकन्याभिः क्रीडतेकालमक्षयम्
८३ कुबेरभवनंगच्छेत् कुबेरोयत्रसंस्थितः । कालेश्वरंपरंतीर्थं कुबेरोयत्रतोषितः८४ तत्र
स्नात्वातुराजेन्द्र ! सर्वसम्पदमाप्नुयात् । ततःपश्चिमतोगच्छेत् मारुतालयमुत्तमम् ८५
तत्रस्नात्वातुराजेन्द्र ! शुचिर्भूत्वासमाहितः । काञ्चनंतुततोदद्याद्यथाशक्तिसुबुद्धिमान्
८६ पुष्पकेणविमानेन वायुलोकंसगच्छति । यमतीर्थंततोगच्छन् माघमासेयुधिष्ठिर !
८७ कृष्णपक्षेचतुर्दश्यां स्नानंतत्रसमाचरेत् । नक्तम्भोज्यंततःकुर्य्यान्नपश्येद्योनिसङ्कट

स्नानकरनेवाला पुरुष अश्वमेध यज्ञके फलको प्राप्तहोताहै नर्मदा नदीके उत्तरतटपर संगमेश्वरनाम
तीर्थहै वहाँ स्नान करनेवाला पुरुष सबयज्ञोंके फलको प्राप्तहोताहै वहाँ कुछभी धर्मका उद्योग करने
वाला पुरुष सब व्याधियोंसे रहित शुभ लक्षणोंसे सम्पन्न होकर राजा होताहै और नर्मदाके उत्तरही
तटपर परमशोभन तीर्थ है वह आदित्य सूर्य्यका उत्तम स्थान है यह शिवजीने कहाहै उस तीर्थ
केप्रभावसे दियाहुआ दान अक्षयगुणा होता है ७३ । ७६ जो खोटे कर्मवाले तथा पांडुरोगवाले
पुरुष वहाँ स्नान करते हैं वह संपूर्ण रोगोंसे छुटजातेहैं और सूर्य्यलोकमें प्राप्त होते हैं ७७ माघमही
नेके शुक्लपक्षकी सप्तमी के दिन उस स्थानमें निराहार व्रतकरके जो वास करता है वह जरा व्याधि
से रहित गूंगा अन्धा बहरा नहीं होता किन्तु सुन्दर रूपवाला और स्त्रियोंका प्रिय होताहै ७८ । ७९
इस रीति से यह महापवित्र तीर्थ है मार्कण्डेयजी कहते हैं कि जो पुरुष इस तीर्थको नहीं जान
तेहैं वहनिस्सन्देह ठगेहुएहैं८० इसके पीछे गर्गेश्वर तीर्थपर जाकर स्नान करनाचाहिये वहाँ स्नान
करनेसे स्वर्गलोककी प्राप्तिहोतीहै ८१ जबतक चौदह इन्द्रराज्यकरें तबतक स्वर्ग लोकमें आनन्दकरता
है उस तीर्थके समीप नागेश्वरनाम तपोवनहै वहाँ स्नानकरनेवाला पुरुष नागलोकमें प्राप्तहोकर
बहुत कालतक क्रीडाकरताहै ८२।८३ जहाँ कुबेर स्थितहैं उसकुबेरभवनमें जानाचाहिये वहाँकालेश्वर
शिवहैं वहाँही कुबेर प्रसन्नहुआहै उसस्थानमें स्नानकरनेवाला पुरुष संपूर्ण सम्पत्तियोंको प्राप्तहोताहै
फिर पश्चिमकी ओर मारुतालय तीर्थपर जानाचाहिये वहाँ स्नानसे पवित्रहो सावधानीसे शक्तिके
अनुसार जो सुवर्णका दानकरताहै वह पुष्पकविमानमें बैठकर वायुलोकमें प्राप्तहोताहै फिर माघ

मू ८८ अहल्यातीर्थंततोगच्छेत् स्नानंतत्रसमाचरेत् । स्नातमात्रोनरस्तत्र ह्यप्सरोभिः
प्रमोदते ८९ अहल्याचतपस्तप्त्वा तत्रमुक्तिमुपागता। चैत्रमासेतुसंप्राप्ते शुक्लपक्षेचतु
र्दशी ९० कामदेवदिनेतस्मिन्नहल्यांयस्तुपूजयेत् । यत्रयत्रनरोत्पन्नो वरस्तत्रप्रियोभवेत्
९१ स्त्रीवल्लभोभवेच्छ्रीमान् कामदेवइवापरः। अयोध्यांतुसमासाद्य तीर्थंरामस्यविश्रुतम्
९२ स्नातमात्रोनरस्तत्र सर्वपापैःप्रमुच्यते । सोमतीर्थंततोगच्छेत् स्नानंतत्रसमाचरेत्
९३स्नातमात्रोनरस्तत्र सर्वपापैःप्रमुच्यते। सोमग्रहेतुराजेन्द्र! पापक्षयकरंनृणाम् ९४त्रै
लोक्यविश्रुतंराजन्! सोमतीर्थंमहाफलम् । यस्तुचान्द्रायणंकुर्यात्तस्मिंस्तीर्थेनराधिप !
९५ सर्वपापविशुद्धात्मा सोमलोकंसगच्छति । अग्निप्रवेशेऽथजले अथवापिह्यनाशके
९६ सोमतीर्थेमृतोयस्तु नाऽसौमर्त्येऽभिजायते। शुभतीर्थंततोगच्छेत् स्नानंतत्रसमाच
रेत् ९७ स्नातमात्रोनरस्तत्र गोलोकेपुमहीयते। ततोगच्छेच्चराजेन्द्र ! विष्णुतीर्थमनुत्त
मम्९८योधनीपुरमाख्यातं विष्णुस्थानमनुत्तमम्। असुरायोधितास्तत्र वासुदेवेनकोटिशः
९९तत्रतीर्थंसमुत्पन्नं विष्णुःप्रीतोभवेदिह। अहोरात्रोपवासेन ब्रह्महत्यांव्यपोहति १००
ततोगच्छेत्तुराजेन्द्र ! तापसेश्वरमुत्तमम् । हरिणीव्याधसन्त्रस्ता पतितायत्रसामृगी
१०१ जलेप्रक्षिप्तगात्रातु अन्तरिक्षंगताचसा । व्याधोविस्मितचित्तस्तु परंविस्मयमा

महीनेमें पयतीर्थपर जानाचाहिये ८४ । ८७ फिर कृष्णपक्षकी चतुर्दशीको वहाँ स्नानकर रात्रिमें भोजनकरे ऐसा पुरुप जन्मके दुःखको नहीं देखताहै ८८ फिर अहल्या तीर्थपरजाके स्नानकरे वहाँ स्नानकरने वाला पुरुप अप्सराओंके साथ क्रीडाकरता है ८९ वहाँही अहल्या तपकरके मुक्तिकोप्राप्तहुईहै वहाँ जोकोई मनुष्य चैत्रशुक्ला चतुर्दशी के दिन अहल्याका पूजनकरताहै वह सब जन्मोंमें पुरुपहीहोताहै और सब स्त्रियोंका प्रिय होकर कामदेवके समान शोभायमानहोता है अयोध्यापुरीमें श्रीरामचन्द्रजीकातीर्थ है वहाँ स्नानमात्रकेहीकरनेसे सबपापदूरहोजातेहैं फिरसोमतीर्थपरजाकर स्नानकरनाचाहिये ९० । ९३ वहाँ स्नानकरनेसे सब पापदूरहोजातेहैं हे राजन् यह सोमग्रहनाम तीर्थ त्रिलोकीमें विख्यात सब पापोंका नष्टकरनेवालाहै इसका महाफलहै जोपुरुप इस तीर्थपर चान्द्रायण व्रतकरताहै वह सब पापोंसे छुटकर चन्द्रमाकेलोकमें प्राप्तहोताहै और जोकोई वहाँ अग्निमें प्रवेश करताहै वा जलमें प्रवेशकरताहै अथवा मरणपर्य्यन्त अनशन व्रतकरताहै वह सोमतीर्थपर मरनेवाला पुरुप इस मृत्युलोकमें फिर जन्म नहीं लेताहै फिर शुभतीर्थपर स्नानकरनाचाहिये वहाँ स्नानकरनेवाला पुरुप गोलोकमें प्राप्तहोताहै फिर उत्तम विष्णु तीर्थ पर जानाचाहिये ९४ । ९८ वहाँ विष्णुके स्थानमें योधनीपुर प्रसिद्धहै वहाँ विष्णु भगवान्ने किरोड़ों दैत्योंके साथ युद्धकियाहै ९९ शुकतीर्थपर एक दिनरात्र निराहार व्रतकरनेसे विष्णु भगवान् प्रसन्नहोते हैं और ब्रह्महत्या दूरहोजाती है १०० इसके अनन्तर तापसेश्वर तीर्थपर जानाचाहिये वहाँ व्याधसे भयभीतहुई एकहिरणी गिरपड़ीथी और उसजलमें शरीर छोड़नेसे वह स्वर्गलोकको चलीगई इस बातको देखकर वह व्याध अपने चित्तमें बड़ा आश्चर्य्य करताभया ऐसा वहतापेश्वर तीर्थहै उसके

गतः १०२ तेनतापेश्वरंतीर्थं नभूतंनभविष्यति । ततोगच्छेत्तुराजेन्द्र ! ब्रह्मतीर्थमनुत्तमम् १०३ अमोहकमितिख्यातं पितृंश्चैवात्रतर्पयेत् । पौर्णमास्याममायान्तु श्राद्धंकुर्याद्यथाविधि १०४ तत्रस्नात्वानरोराजन् ! पितृपिण्डन्तुदापयेत् । गजरूपाशिलातत्र तोयमध्येप्रतिष्ठिता १०५ तस्यान्तुदापयेत्पिण्डं वैशाख्यान्तुविशेषतः । तृप्यन्तिपितरस्तत्र यावत्तिष्ठतिमेदिनी १०६ ततोगच्छेत्तुराजेन्द्र ! सिद्धेश्वरमनुत्तमम् । तत्रस्नात्वा नरोराजन् ! गणगत्यन्तिकंव्रजेत् १०७ ततोगच्छेत्तुराजेन्द्र ! लिङ्गोयत्रजनार्दनः । तत्रस्नात्वातुराजेन्द्र ! विष्णुलोकेमहीयते १०८ नर्मदादक्षिणेकूले तीर्थंपरमशोभनम् । वामदेवःस्वयंतत्र तपोऽतप्यतवैमहत् १०९ दिव्यंवर्षसहस्रन्तु शङ्करंपर्युपासत । समाधिभङ्गदग्धास्तु शङ्करेणमहात्मना ११० श्वेतपर्वायमश्चैव हुताशःशुक्रपर्वणि । एतेदग्धास्तुतेसर्वे कुसुमेश्वरसंस्थिताः १११ दिव्यवर्षसहस्रेण तुष्टस्तेषांमहेश्वरः । उमयासहितोरुद्रस्तुष्टस्तेषांवरप्रदः ११२ मोक्षयित्वातुतान्सर्वान् नर्मदातटमास्थितः । ततस्तीर्थप्रभावेण पुनर्देवत्वमागताः ११३ त्वत्प्रसादान्महादेव ! तीर्थंभवतुचोत्तमम् । अर्द्धयोजनविस्तीर्णं क्षेत्रंदिक्षुसमन्ततः ११४ तस्मिंस्तीर्थेनरःस्नात्वा चोपवासपरायणः । कुसुमायुधरूपेण रुद्रलोकेमहीयते ११५ वैश्वानरोयमश्चैव कामदेवस्तथामरुत् । त

समान कोई तीर्थ नहीं है इसके पीछे उत्तम ब्रह्म तीर्थ पर जानाचाहिये १०१ । १०३ इसको अमोहक कहते हैं यहाँ पितरों का तर्पण करना चाहिये और पूर्णिमा वा अमावास्या के दिन श्राद्धकरनाचाहिये १०४ वहाँ जलमें हाथी के समान स्वरूप वाली शिलापड़ी है उसके ऊपर पिण्डदानकरना और वैशाखकी पूर्णिमाको पिण्ड देनेका अधिक पुण्य है उसपर पिण्डदेने से जब तक पृथ्वी रहती है तबतक उसके पितर तृप्त रहते हैं १०५ । १०६ फिर उत्तम सिद्धेश्वर तीर्थपर जाना चाहिये वहाँ स्नान करनेवाला पुरुष शिवजीके गणोंका अधिपति होताहै १०७ इसके पीछे जनार्द्दन लिंगके स्थानपर जाना चाहिये वहाँ स्नान करनेवाला पुरुष विष्णुलोकमें प्राप्त होताहै १०८ नर्मदाके दक्षिण तटपर शोभन कुसुमेश्वर तीर्थ है वहाँ वामदेव ऋषिने वड़ातप कियाथा अर्थात् देवताओंके हज़ार वर्षोंतक शिवजीकी उपासना करतेरहे और उसी स्थानमें शिवजीकी समाधिसे भंगहुए श्वेतपर्वा धर्मराज और अग्नि यहसब तप करतेभये और सबकामदेवके वाणमें स्थित होकर दग्ध होगयेथे तब इनसबने देवताओंके हज़ार वर्षोंतक तप कियाथा उससमय श्री पार्वतीजी समेत महादेवजी इनसबको प्रसन्न होकर वरदेतेभये और सबको तपस्यासे छुटवाकर महादेवजी नर्मदा के किनारे पर स्थित होतेभये तब उसी तीर्थके प्रभावसे यहसब लोग फिर देवता होगये १०९।११३ और देवताहोकर महादेवजी से बोले कि हे शिवजी आपकी प्रसन्नता से यह तीर्थ महाउत्तम होजाय यह हमको वर दीजिये इसके पीछे वह तीर्थ चारोओरको दोकोशके विस्तारमें होगया उस तीर्थपर स्नान करनेवाला और निराहार व्रतकरने वाला पुरुष कामदेवके रूपको धारण करके शिवलोकमें प्राप्त होताहै ११४।११५ हे राजन् इस कुसुमेश्वर तीर्थमें अग्नि धर्मराज और वायु यह तीनों

पस्तप्त्वातुराजेन्द्र ! परांसिद्धिमवाप्नुयुः ११६ अङ्कोलस्यसमीपेतु नातिदूरेतुतस्यवै ।
स्नानंदानञ्चतत्रैव भोजनंपिण्डमेवच ११७ अग्निप्रवेशेऽथजले अथवातुह्यनाशके ।
अनिवर्तिकागतिस्तस्य मृतस्यामुत्रजायते ११८ त्र्यम्बकेनतुतोयेनयश्चरुंश्रपयेन्नरः ।
अङ्कोलमूलेदत्त्वातु पिण्डंचैवयथाविधि ११९ तृप्यन्तिपितरस्तस्य यावच्चन्द्रदिवाकरौ ।
उत्तरेत्वयनेप्राप्ते घृतस्नानङ्करोतियः १२० पुरुषोवाथस्त्रीवापि वसेदायतनेशुचिः । सि
द्धेश्वरस्यदेवस्य प्रातःपूजांप्रकल्पयेत् १२१ सयाङ्गतिमवाप्नोति नतांसर्वैर्महामखैः ।
यदावतीर्णःकालेन रूपवाञ्छुभगोभवेत् १२२ मर्त्येभवतिराजाच त्वासमुद्रान्तगोचरे ।
क्षेत्रपालंनपश्येत्तु दण्डपाणिंमहाबलम् १२३ वृथातस्यभवेद्यात्रा ह्यदृष्ट्वाकर्णकुण्डलम् ।
एवंतीर्थफलंज्ञात्वा सर्वेदेवाःसमागताः । मुञ्चन्तिकुसुमैर्वृष्टिं तेनतत्कुसुमेश्वरम् १२४ ॥

इति श्रीमत्स्यपुराणेनवत्याधिकशततमोऽध्यायः १९० ॥

(मार्कण्डेय उवाच) भार्गवेशंततोगच्छेद्भग्नोयत्रजनार्दनः । असुरैस्तुमहायुद्धे म
हाबलपराक्रमैः १ हुङ्कारितास्तुदेवेनदानवाःप्रलयङ्गताः । तत्रस्नात्वातुराजेन्द्र ! सर्वपा
पैःप्रमुच्यते २ शुक्लतीर्थस्यचोत्पत्तिं शृणुत्वंपाण्डुनन्दन ! । हिमवच्छिखरेरम्ये नानाधा
तुविचित्रिते ३ तरुणादित्यसङ्काशे तप्तकाञ्चनसप्रभे । वज्रस्फाटिकसोपाने चित्रवेदीशि

तपकरके परमसिद्धिको प्राप्त होगये हैं ११६ वहाँ अंकोलका वृक्ष है उस अंकोल्ल तीर्थकेही समीप जो स्नान दान ब्राह्मणोंका भोजन पिण्ड़दान अग्नि प्रवेश अथवा अनशन व्रतकरके जो प्राणोंको त्यागताहै उस पुरुषकी मरे पीछे दूसरे जन्ममें सर्वत्र जानेकी गति होजातीहै और जो पुरुष अंकोल्ल की जड़में यथार्थ विधिसे पिंड दान करताहै और त्र्यंबक मन्त्र करके साकल्यका हवन करताहै उसके पितरोंकी तृप्ति चन्द्रमा और सूर्य्यकी स्थिति पर्य्यन्ततक रहतीहै और जो पुरुष वा स्त्री उत्तरायण सूर्य्यमें वहाँ स्नान करताहै वह पवित्रस्थानमें वास करता है और प्रातःकाल सिद्धेश्वर महादेव जीकी पूजा करने वाले मनुष्यको वह गति प्राप्त होती है जो संपूर्ण यज्ञोंसे भी नहीं प्राप्त होसक्ती है वह पुरुष जब समय पाकर पृथ्वी में जन्म लेताहै तब समुद्र पर्य्यन्त पृथ्वीका एकही महास्वरूपवान् प्रतापी राजा होताहै ११७।१२३ और कर्ण कुंडल्ल तीर्थके दर्शन किये बिना सब यात्रा वृथा रहती हैं इस प्रकारके फलवाले इस तीर्थको जानके देवताओं ने पुष्पोंकी वर्षाकी है इसी से यह कुसुमेश्वर तीर्थ कहाताहै १२४ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांनवत्यधिकशततमोऽध्यायः १९० ॥

मार्कण्डेयजी बोले हे राजेन्द्र फिर भार्गवेश तीर्थपर जानाचाहिये वहाँ जनार्दन भगवान्को जब महापराक्रम वाले दैत्यों ने पीड़ित कियाहै तब महादेवने हुंकार शब्दकरके उसीसमय सब दैत्योंका नाशकरदियाहै वहाँ स्नान करनेवाला पुरुष सब पापोंसे छुटजाताहै १।२ हे पांडुनन्दन अब मैं शुक्ल तीर्थकी उत्पत्तिको तुम्हें सुनाताहूं अनेक प्रकारकी धातुओंसे चित्रबिचित्र ३ रमणीक हिमवान् पर्व्वतके तरुण सूर्य्यके समान कान्तिवाले मणिरत्नों आदिकी सीढ़ीवाले सुन्दर शिलाओं से और

लातले ४ जाम्बूनदमयेदिव्ये नानापुष्पोपशोभिते । तत्रासीनंमहादेवं सर्वज्ञंप्रभुमव्ययम् ५ लोकानुग्रहदंशान्तङ्गणवृन्दैःसमावृतम् । स्कन्दनन्दिमहाकालैर्वीरभद्रगणादिभिः ६ उमयासहितंदेवं मार्कण्डःपर्यपृच्छत । देवदेवमहादेव ब्रह्मविष्ण्विन्द्रसंस्तुत ! ७ संसारभयभीतोऽहं सुखोपायंब्रवीहिमे । भगवन् ! भूतभव्येश ! सर्वपापप्रणाशनम् । तीर्थानां परमंतीर्थं तद्वदस्वमहेश्वर ! ८ (ईश्वर उवाच) शृणुविप्र ! महाप्राज्ञ ! सर्वशास्त्रविशारद ! । स्नानायगच्छसुभग ! ऋषिसङ्घैःसमावृतः ९ मन्वत्रिकश्यपाश्चैव याज्ञवल्क्योशनोऽङ्गिराः । यमापस्तम्बसंवर्ताः कात्यायनबृहस्पती १० नारदोगौतमश्चैव सेवन्तेधर्म्मकाङ्क्षिणः । गङ्गांकनखलंपुण्यं प्रयागंपुष्करंगयाम् ११ कुरुक्षेत्रंमहापुण्यं राहुग्रस्तेदिवाकरे । दिवावायदिवारात्रौ शुक्लतीर्थंमहाफलम् १२ दर्शनात्स्पर्शनाच्चैव स्नानाद्दानात्तपोजपात् । होमाच्चैवोपवासाच्च शुक्लतीर्थंमहाफलम् १३ शुक्लतीर्थंमहापुण्यं नर्म्मदायांव्यवस्थितम् । चाणक्योनामराजर्षिः सिद्धिंतत्रसमागतः १४ एतत्क्षेत्रंसुविपुलं योजनंवृत्तसंस्थितम् । शुक्लतीर्थंमहापुण्यं सर्वपापप्रणाशनम् १५ पादपाग्रेणदृष्टेन ब्रह्महत्यांव्यपोहति । जगतीदर्शनाच्चैव भ्रूणहत्यांव्यपोहति १६ अहंतत्रऋषिश्रेष्ठ ! तिष्ठामिह्युमयासह । वैशाखेचैत्रमासेतु कृष्णपक्षेचतुर्दशी १७ कैलासाच्चापिनिष्क्रम्य तत्रसन्निहितोह्यहम् । दैत्यदानवगन्धर्वाः सिद्धविद्याधरास्तथा १८ गणाश्चाप्सरसोनागाः सर्वेदेवाःसमागताः । गगनस्थास्तुतिष्ठन्ति विमानैःसार्वकामिकैः १९ शुक्लतीर्थंतुराजे

दिव्य सुवर्णके समान अनेक पुष्पोंसे शोभित शिखरपर लोकोंके अनुग्रह करनेवाले स्वामिकार्त्तिक और नंदी आदि गणोंसे युक्त पार्वती समेत सर्वज्ञ प्रभु शिवजीको बैठेहुए देखकर मैंने पूछा हेदेव २ महादेव ब्रह्मा विष्णु आदिसे पूजित मैं संसारके भयसे युक्तहूं मुझको कोई सुखका उपाय बताइये हेभगवन् भूत भव्येश और सर्वपापनाशक आप मुझको सबसे उत्तम तीर्थ बताइये ४। ८ शिवजी बोले हेमहाप्राज्ञ विप्र सुनो तुम सब ऋषियों समेत स्नान करने को चलो ९ और यह बात जानो कि मनु, अत्रि, कश्यप-याज्ञवल्क्य-शुक्र-अंगिरा-धर्मराज-आपस्तंब-संवर्त्त-कात्यायन-बृहस्पति-नारद और गौतमादिक धर्मकी इच्छा करनेवाले ऋषि गंगा, कनखल, प्रयाग, पुष्कर और गया आदि तीर्थोंका सेवन करते हैं और सूर्य्य ग्रहणमें महापुण्यवाले कुरुक्षेत्रको सेवते हैं परन्तु यह शुक्लतीर्थ अहर्निश सदैव पवित्र वर्णन किया है उसके दर्शन स्पर्श स्नान तथा दान तप जप होम उपवास और अन्य २ प्रकारके व्रतकरने से वह शुक्लतीर्थ सबसे उत्तम महाफल देनेवाला है १०।१३ नर्मदा नदीमें व्यवस्थित हुआ शुक्लतीर्थ महाफल वालाहै वहां चाणक्यनाम राजऋषि सिद्धिको प्राप्तहुआ है १४ यह क्षेत्र परमसुन्दर गोलाकार एक योजनमें विस्तृत होकर सब पापोंका नाश करनेवाला है १५ इस क्षेत्रके वृक्षोंकी डालियोंके दर्शन होने से ब्रह्महत्यादूर होजाती है और वहां की पृथ्वी के दर्शन होने से भ्रूणहत्या निवृत्त होती है १६ हेऋषिश्रेष्ठ पार्वती समेत मैं वैशाख और चैत्र कृष्ण चतुर्दशीको अपने कैलाश से भी निकसकर वहां स्थित होताहूं और दैत्य दानव सिद्ध गन्धर्व विद्या-

र्माकाङ्क्षिणः। रजकेनयथावस्त्रं शुक्लम्भवतिवारिणा २० आजन्मजनि
न्द्र! ह्यागताधर्मकाङ्क्षिणः। स्नानंदानंमहापुण्यं मार्कण्डेऋषिसत्तम! २१ शुक्लतीर्था
तंपापं शुक्लतीर्थंव्यपोहति। पूर्वेवयसिकर्माणि कृत्वापापानिमानवः २२ अहोरात्रो
त्परंतीर्थं नभूतंनभविष्यति। तपसाब्रह्मचर्येण यज्ञैर्दानेनवापुनः २३ देवार्चनेनयापुष्टि
पवासेन शुक्लतीर्थेव्यपोहति। कार्त्तिकस्यतुमासस्य कृष्णपक्षेचतुर्दशी २४ घृतेनस्नापयेद्देवमुपो
र्नसाक्रतुशतैरपि। एकविंशकुलोपेतो नच्यवेदीश्वरात्पदात् २५ शुक्लतीर्थंमहापुण्यमृषि
ष्यपरमेश्वरम्। तत्रस्नात्वानरोराजन्! नपुनर्जन्मभाक्भवेत् २६ स्नात्वावैशुक्लतीर्थे
सिद्धनिषेवितम्। कपालपूरणंकृत्वा तुष्यत्यत्रमहेश्वरः २७ अर्द्धनारीश्वरंदेवं प
तु ह्यर्चयेत्वृषभध्वजम्। शङ्खतूर्यनिनादैश्च ब्रह्मघोषैश्चसद्विजैः २८ जागरंकारयेत्तत्र
टेभक्त्यालिखापयेत्। प्रभातेशुक्लतीर्थेतु स्नानंवैदेवतार्चनम् २९ आचार्यान्भोजयेत्प
नृत्यगीतादिमङ्गलैः। दक्षिणाञ्चयथाशक्ति वित्तशाठ्यंविवर्जयेत् ३० प्रदक्षिणंततः
श्चाच्छिवव्रतपराङ्मुखान्। एवंवैकुरुतेयस्तु तस्यपुण्यफलंशृणु ३१ दिव्ययानंसमारू
कृत्वा शनैर्देवान्तिकंव्रजेत्। शिवतुल्यबलोपेतस्तिष्ठत्याभूतसंप्लवम् ३२ शुक्लतीर्थेतुया
ढो गीयमानोऽप्सरोगणैः। घृतेनस्नापयेद्देवं कुमारंचापिपूजयेत् ३३ एवंयाकुरुतेभक्त्या
नारी ददातिकनकंशुभम्।

धर अप्सरागण सब नाग और देवता यह सब अपनी २ कामनाओंके निमित्त विमानोंमें स्थित होकर
आकाश मार्गमें स्थित होजाते हैं १७।१९ हेराजेन्द्र धर्मकी इच्छासे उसशुक्लतीर्थ पर जानेवाले पुरुष
ऐसेशुद्ध होजाते हैं जैसे कि धोबीके आगे वस्त्र शुद्ध और श्वेत होजाताहै यह शुक्लतीर्थ जन्मसे लेकर
मरण पर्य्यन्तके पापोंको दूरकरदेताहै हेऋषिसत्तम मार्कण्डेय इसतीर्थपर स्नानदानका महापुण्य
होताहै शुक्लतीर्थके समान कोई तीर्थ है न होगा प्रथम अवस्थाके कियेहुए पाप शुक्लतीर्थपर एकदिन
रात्रिके निराहार व्रतकरनेसे दूरहोजातेहैं और वहां जप ब्रह्मभोज यज्ञ दान और देवार्चन करनेसे
जोपुण्य होताहै वह अन्यत्र सैकड़ोंतीर्थ स्थानोंकेभी करनेसे नहीं होताहै वहां कार्त्तिकमासकी कृष्ण
चतुर्दशीको जोकोई घृतसे महादेवजीका स्नान और पूजनकरताहै और एक रात्रि उपवासव्रतकरताहै
वह अपनी इक्कीसपीढ़ियों समेत शिवजीके लोकमें प्राप्तहोताहै और पुनर्जन्मसे रहित भीहोताहै
२०।२५ यह महापुण्यवाला शुक्लतीर्थ ऋषियोंसे सेवितहै वहाँ स्नान करने वालापुरुष संसारमें
नहींजन्मताहै २६ वहांस्नानकरके कपालभरकर महादेवकापूजन करनाचाहिये और पार्वतीकेअर्द्धांगवाले
शिवजीकीमूर्त्ति एक काष्ठपीठपरलिखकर शंख भेरी और वेदादिकोंके घोषसमेत उनका पूजनकरे
और रात्रिमें जागरण करताहुआ नृत्यगीतादि मंगलकरे फिरप्रातःकालहोनेपर शुक्लतीर्थपर
स्नानकरके शिवजीका पूजनकरे २७।२९ तदनन्तर शिवजीके व्रतधारी पवित्र आचार्य्योंकोभोजन
कराकर शक्तिके अनुसार वित्तशाठ्यरहित दक्षिणा देवे ३० फिर उस तीर्थकी प्रदक्षिणा करके महादेवजीके
पासजाय इसप्रकारसे करनेवाला पुरुष ३१ दिव्यबिमानोंमें स्थित अप्सरागणोंके गीतोंसमेत
महाशोभित शिवजी के समान बलसे युक्तहोके प्रलय कालतक स्वर्गमें स्थितहोताहै ३२ जो स्त्री

तस्याःपुण्यफलंशृणु। मोदतेशर्वलोकस्था यावदिन्द्राश्चतुर्दश ३४ पौर्णमास्यांचतुर्दश्यां संक्रान्तौविषुवेतथा। स्नात्वातुसोपवासःसन् विजितात्मासमाहितः ३५ दानंदद्याद्यथाशक्त्या प्रीयेतांहरिशङ्करौ। एवंतीर्थप्रभावेण सर्वंभवतिचाक्षयम् ३६ अनाथंदुर्गतंविप्रं नाथवन्तमथापिवा। उद्वाहयतियस्तीर्थे तस्यपुण्यफलंशृणु ३७ यावत्तद्रोमसंख्याच तत्प्रसूतिकुलेषुच। तावद्वर्षसहस्राणि शिवलोकेमहीयते ३८॥

इतिश्रीमत्स्यपुराणेएकनवत्यधिकशततमोऽध्यायः १९१॥

(मार्कण्डेयउवाच) ततस्त्वनरकंगच्छेत् स्नानंतत्रसमाचरेत्। स्नातमात्रोनरस्तत्र नरकञ्चनपश्यति १ तस्यतीर्थस्यमाहात्म्यं शृणुत्वंपाण्डुनन्दन!। तस्मिंस्तीर्थेतुराजेन्द्र! यस्यास्थीनिविनिक्षिपेत् २ विलयंयान्तिसर्वाणि रूपवान्जायतेनरः। गोतीर्थन्तुततोगत्वा सर्वपापात्प्रमुच्यते ३ ततोगच्छेत्तुराजेन्द्र! कपिलातीर्थमुत्तमम्। तत्रगत्वानरोराजन्! गोसहस्रफलंलभेत् ४ ज्येष्ठमासेतुसंप्राप्ते चतुर्दश्यांविशेषतः। तत्रोपोष्यनरोभक्त्या कपिलांयःप्रयच्छति ५ घृतेनदीपंप्रज्वाल्य घृतेनस्नापयेच्छिवम्। सघृतंश्रीफलंजग्ध्वा दत्त्वाचान्तेप्रदक्षिणम् ६ घण्टाभरणसंयुक्तां कपिलांयःप्रयच्छति। शिवतुल्यबलोभूत्वा नैवासौजायतेपुनः ७ अङ्गारकदिनेप्राप्ते चतुर्थ्यांतुविशेषतः। पूजयेत्तुशिवंभक्त्या

शुक्क तीर्थपर सुवर्णका दानकरती है और भक्तिपूर्वक घृतसे शिवजीको स्नानकराती है और स्वामिकार्त्तिककाभी पूजनकरती है वह जबतक चौदहइन्द्रराज्य करते हैं तबतक शिवलोकमें वासकरती है ३३।३४ और पूर्णिमा चतुर्दशी संक्रान्ति और समान अहोरात्र इनसब दिनोंमें जोस्नानकर जितेन्द्री हो शाक्तिके अनुसार दानदेताहै उसके ऊपर विष्णु और महादेव प्रसन्नहोते हैं इस प्रकार इसतीर्थके प्रभावसे सब दानादिक अक्षयगुणित होजाताहै ३५।३६ और अनाथ गरीब ब्राह्मण तथा धनाढय ब्राह्मणको जो इसतीर्थपर विवाह देताहै वहजितने उस ब्राह्मणके शरीरपर रोमहोते हैं और उसकी सन्तानपरभी जितनेरोमहोतेहैं उतनेही बर्षोंतक शिवलोकमें वासकरताहै ३७।३८॥

इतिश्रीमत्स्यपुराणभाषाटीकायांएकनवत्यधिकशततमोऽध्यायः १९१॥

मार्कण्डेयजी बोले कि अनरकनामएकतीर्थ है उसपर जाकर स्नान करनेवाला पुरुष नरकको नहीं देखताहै १ हे पाण्डुनन्दन उसतीर्थका यह माहात्म्यहै कि जिसपुरुषके अस्थि वहां गिरते हैं उसके सबपाप नष्ट होजाते हैं और उत्तम रूपवाला होजाता है फिर गोतीर्थपर जानेवाला पुरुष सबपापों से मुक्तहोताहै फिर उत्तम कपिलातीर्थपर जानेवाला पुरुष हज़ार गौदानके पुण्यको पाताहै २।४विशेषकरके जो कोई ज्येष्ठमासकी चतुर्दशी के दिन वहां निराहारव्रत करके भक्तिसे कपिलागौका दान करताहै और घृतका दीपक प्रकाश करता है और घृतहीसे महादेवजीको स्नानकरवाताहै और आप घृत सहित नारियलका भोजन करे फिर महादेवजी की प्रदक्षिणाकरे और घंटा आभूपणादिसे युक्तहुई कपिला गौ का दानकरे वह पुरुष शिवजीके समान बलवान्होके शिवलोकमें बासकरताहै और फिर जन्म नहीं लेताहै५।७ मंगलवारी चतुर्थी के दिन जो भक्तिपूर्वक शिवका पूजनकर ब्राह्मणों को

ब्राह्मणेभ्यश्चभोजनम् ८ अङ्गारकनवम्यांतु अमायाञ्चविशेषतः। स्नापयेत्तत्रयत्नेन रूपवान्सुभगोभवेत् ९ घृतेनस्नापयेल्लिङ्गं पूजयेद्भक्तितोद्विजान्। पुष्पकेणविमानेन स हंसैःपरिवारितः १० शैवंपदमवाप्नोति यत्रचाभिमतंभवेत्। अक्षयंमोदतेकालं यथारुद्रस्तथैवसः ११ यदातुकर्मसंयोगान् मर्त्यलोकमुपागतः। राजाभवतिधर्मिष्ठो रूपवान् जायतेकुले १२ ततोगच्छेच्चराजेन्द्र! ऋषितीर्थमनुत्तमम्। तृणविन्दुर्नामऋषिःपापदग्धोऽयवास्थितः १३ तत्तीर्थस्यप्रभावेण शापमुक्तोऽभवद्द्विजः। ततोगच्छेत्तुराजेन्द्र! गङ्गेश्वरमनुत्तमम् १४ श्रावणेमासिसंप्राप्ते कृष्णपक्षेचतुर्दशी। स्नातमात्रोनरस्तत्ररुद्रलोकेमहीयते १५ पितृणांतर्पणंकृत्वा मुच्यतेचऋणत्रयात्। गङ्गेश्वरसमीपेतु गङ्गावदनमुत्तमम् १६ अकामोवासकामोवा तत्रस्नात्वातुमानवः। आजन्मजनितैःपापैर्मुच्यतेनात्रसंशयः १७ तत्रतीर्थेनरःस्नात्वा व्रजेद्वैयत्रशङ्करः। सर्वदापर्वदिवसे स्नानंतत्रसमाचरेत् १८ पितृणांतर्पणंकृत्वा ह्यश्वमेधफलंलभेत्। प्रयागेयत्फलंदृष्टं शङ्करेणमहात्मना १९ तदेवनिखिलंदृष्टं गङ्गावदनसङ्गमे। तस्यैवपश्चिमेस्थाने समीपेनातिदूरतः २० दशाश्वमेधजननं त्रिषुलोकेषुविश्रुतम्। उपोष्यरजनीमेकां मासिभाद्रपदेतथा २१ अमायाञ्चनरःस्नात्वा व्रजतेयत्रशङ्करः। सर्वदापर्वदिवसे स्नानंतत्रसमाचरेत् २२ पितृणांतर्पणंकृत्वा चाश्वमेधफलंलभेत्। दशाश्वमेधात्पश्चिमतो भृगुर्ब्राह्मणसत्तमः २३ दिव्यंवर्षसह

भोजनकरवाताहै औरमंगलवारी नवमीके दिन तथा मंगलवारी अमावास्याके दिन घृतसे शिवजीका स्नानकरवावे और ब्रह्मभोजकरे वह पुरुष पुष्पक विमानमें बैठके शिवजीके पुरमें प्राप्तहोताहै वहां रुद्रके समान अक्षयकालतक आनन्द भोगताहुआ कर्मक्षीण होनेपर पतितहो पृथ्वी में आकर धर्मवान् रूपवान् और तेजस्वीराजा होताहै ऐसा यह गो तीर्थकाफलहै ८। १२ हे राजेन्द्र इसके अनन्तर वडेउत्तम ऋषि तीर्थपर जानाचाहिये पूर्वकालमें एक तृणविन्दु नाम ऋषि पापसे दग्धहोकर वहां स्थितहोताभया तब उस तीर्थ के प्रभावसे वहपाप और शाप दोनोंसे मुक्त होजाताभया हेराजन् फिर उत्तम गंगेश्वर तीर्थपर जाना चाहिये श्रावणमासकी कृष्णचतुर्दशीको वहां स्नान करनेवाला पुरुष रुद्रलोकमें प्राप्तहोताहै वहां पितरोंका तर्पण करनेवाला पुरुष तीनोंऋणों से छुटजाताहै, गंगेश्वर तीर्थके समीप महाउत्तम गंगावदननाम तीर्थ है वहां स्नान करनेवाला पुरुष निस्सन्देह सबपापोंसे छुटजाताहै १३। १७ वहां स्नान करनेवाला शिवजीके समीप प्राप्तहोताहै संपूर्ण पर्व्वों के दिन वहां स्नानकरके पितरोंका तर्पण करनेवाला पुरुष अश्वमेधयज्ञके फलको प्राप्तहोताहै जो प्रयागजी में शंकराचार्य्यने पुण्य कहाहै वही पुण्य इस गंगावदन तीर्थपरहोताहै और उसीतीर्थके समीप पश्चिम की ओर दशाश्वमेधजननतीर्थ है यह त्रिलोकी में विख्यातहै यहां भाद्रपद महीने में एक रात्रि उपवास करनेवाला और अमावास्याकें दिन स्नान करनेवाला पुरुष शिवलोक में प्राप्तहोताहै वहां सब पर्वोंमें स्नान करना चाहिये १८। २२ इसस्थानमें पितरोंका तर्पण करनेवाला पुरुष अश्वमेधयज्ञके फलको प्राप्तहोताहै और दशाश्वमेध तीर्थ के पश्चिम की ओर भृगुऋषिने दिव्य हज़ारवर्षोंतक शिवजी

स्त्वन्तु ईश्वरंपर्युपासत । वल्मीकवेष्टितश्चासौ पक्षिणाञ्चनिकेतनः २४ आश्चर्यंसुमहज्जातमुमायाःशङ्करस्यच । गौरीपप्रच्छदेवेशं कोऽयमेवन्तुसंस्थितः २५ देवोवादानवोवाथ कथयस्वमहेश्वर ! (महेश्वरउवाच) भृगुर्नामद्विजश्रेष्ठ ऋषीणांप्रवरोमुनिः २६ मान्ध्यायतेसमाधिस्थो वरंप्रार्थयतेप्रिये ! । ततःप्रहसितादेवी ईश्वरंप्रत्यभाषत २७ धूमवत्तच्छिखाजाता ततोऽद्यापिनतुष्यसे । दुराराध्योऽसितेनत्वं नात्रकार्याविचारणा २८ (महेश्वर उवाच) नजानासिमहादेवि ! ह्ययंक्रोधेनवेष्टितः । दर्शयामियथातथ्यं प्रत्ययंतेकरोम्यहम् २९ ततःस्मृतोऽथदेवेन धर्म्मरूपोवृषस्तदा । स्मरणात्तस्यदेवस्य वृषःशीघ्रमुपस्थितः ३० वदंस्तुमानुषींवाचमादेशोदीयतांप्रभो ! (भगवानुवाच) वल्मीकंत्वंखनस्वैनं विप्रंभूमौनिपातय ३१ योगस्थस्तुततोध्यायन् भृगुस्तेननिपातितः । तत्क्षणात् क्रोधसन्तप्तो हस्तमुत्क्षिप्यसोऽशपत् ३२ एवंसभाषमाणस्तु कुत्रगच्छसिभोवृष ! । अद्याहंसंप्रकोपेन प्रलयंत्वान्नयेवृष! ३३ धर्षितस्तुतदाविप्र श्चान्तरिक्षङ्गतोवृषम् । आकाशेप्रेक्षतेविप्र एतदद्भुतमुत्तमम् ३४ तत्रप्रहसितेरुद्र ऋषिरग्रेऽव्यवस्थितः । तृतीयलोचनंदृष्ट्वा वैलक्ष्यात्पतितोभुवि ३५ प्रणम्यदण्डवद्भूमौ तुष्टावपरमेश्वरम् । प्रणिपत्यभूतनाथं भवोद्भवंत्वामहंदिव्यरूपम् । भवातीतोभुवनपतेप्रभो ! तुविज्ञापयेकिञ्चित् ३६ त्वद्गुणनिकरान्वक्तुं कःशक्तोभवतिमानुषोनाम । वासुकिरपिहिकदाचिद्वदनसहस्रंभवे

की उपासनाकी थी उससमय उनके शरीर के ओर पासमें सर्पों की वामी और पक्षियों के घोसले होगये थे तब शिव और पार्वती को बडा आश्चर्य्यहुआ और पार्वतीजी ने शिवजी से पूछा किं इस प्रकारसे स्थित होने वाला यह कौन है २३।२५ यह देवहै अथवा दानव है यह सुनकर शिवजीने कहा कि हेप्रिये यह भृगुनाम उत्तम ऋषि समाधिमें स्थित होकर मेरा ध्यान करता है और प्रार्थना करताहै यह सुनकर पार्वतीजीने हंसकर महादेवजी से कहा २६।२७ कि इसकी शिखा धूमके समान होगई है अबभी आप इसपर प्रसन्न नहींहोते आप निस्सन्देह दुराराध्यहैं २८ शिवजी ने कहा हेदेवि तू नहीं जानती है यह ऋषि क्रोधसे युक्तहै मैं यह बात तुझको प्रत्यक्ष दिखादूंगा २९ तब महादेवजीने धर्मस्वरूपी वृषभका ध्यान किया स्मरण करतेही वह वृषभआया ३० वह आकर मनुष्यवाणी से यह वचन बोला हेप्रभो मुझे क्या आज्ञा होती है शिवजीने कहा कि इन वामी और पक्षियोंके घोसलोंको खोदडालो और इस ब्राह्मणको भूमिमें गिरादो ३१ इसके पीछे योगमें स्थित हुए भृगुऋषिको उस बैलने पटक दिया तब क्रोधमें भरेहुए भृगुऋषि हाथ उठाकर यह शाप देतेभये ३२ कि हेबैल अब तू कहाँ जाताहै मैं तुझको अपने क्रोधसे नष्ट करूंगा यह कहकर वह भृगुऋषि आकाशमें स्थित हुआ दिखाई पड़ा इस आश्चर्य्यको देखकर महादेवजी उस ऋषिके आगे खड़ेहोकर अपने तीसरे नेत्रकी दृष्टिसे उसको ऊपर से नीचे गिरा देतेभये ३३।३५ तब वह भृगुऋषि महादेवजीको दंडप्रणाम कर यह स्तुति करतेभये हेशिवजी आप दिव्यरूप हैं मैं आपकी शरणहूं हे अखिलभुवनपति प्रभुजी मैं यह प्रार्थनापूर्वक निवेदन करता हूं ३६ कि कौन मनुष्य तुम्हारे गुण वर्णन करने

घस्य ३७ भक्त्यातथापिशङ्कर भुवनपते ! त्वत्स्तुतौ मुखरः। वदतः क्षमस्वभगवन् ! प्रसीदमेतवचरणपतितस्य ३८ सत्वंरजस्तमस्त्वं स्थित्युत्पत्योर्विनाशनेदेव !। त्वांमुक्ता भुवनपते ! भुवनेश्वर ! नैवदैवतंकिञ्चित् ३९ यमनियमयज्ञदानवेदाभ्यासाश्चधारणायोगः। त्वद्भक्तेःसर्वमिदंनार्हतिहिकलासहस्रांशम् ४० उच्छिष्टरसरसायनखड्गांजनपादुकाविवरसिद्धिर्वा। चिह्नंभवव्रतानांदृश्यतिचेहजन्मनिप्रकटम् ४१ शाठ्येननमतियद्यपिददासित्वंभूतिमिच्छतोदेव ! भक्तिर्भवभेदकरीमोक्षायविनिर्मितानाथ ! ४२ परदारपरस्वरतंपरपरिभवदुःखशोकसन्तप्तम्। परवदनवीक्षणपरंपरमेश्वर ! मांपरित्राहि ४३ मिथ्याभिमानदग्धंक्षणभंगुरविभवविलसन्तम्। क्रूरंकुपथ्याभिमुखंपतितंमांपाहिदेवेश ! ४४ दीनेद्विजगणसार्थेबन्धुजनेनैवदूषिताह्याशा। तृष्णातथापिशङ्कर ! किंमूढंमांविडम्बयति ४५ तृष्णांहरस्वशीघ्रंलक्ष्मींप्रदस्वयावदासिनींनित्यम्। छिन्धिमदमोहपाशानुत्तारयमांमहादेव ! ४६ करुणाभ्युदयंनामस्तोत्रमिदंसर्वसिद्धिदंदिव्यम्। यःपठतिभक्तियुक्तस्तस्यतुष्येत्भृगोर्यथाचशिवः ४७ (ईश्वर उवाच) अहंतुष्टोऽस्मितेवत्स ! प्रार्थयस्वेप्सितंवरम्। उमयासहितोदेवोवरंतस्यह्यदापयत् ४८ (भृगुरुवाच) यदितुष्टोसिदेवेश !

को समर्थ है हज़ार मुखवाले शेषनाग भी आपकी महिमा नहीं वर्णन करसक्के ३७ इस हेतुसे हेशंकर यद्यपि आपकी स्तुति करने को मैं असमर्थ हूं तथापि मैं आपके चरणों में पड़ाहूं मुझपर आप कृपा करने को योग्यहैं हेदेवदेव आप स्थिति उत्पत्ति और संहारके समय सतोगुण रजोगुण और तमोगुण इन तीनोंगुणोंके रूपोंको धारणकरलेतेहो आपके सिवाय दूसरा कोई देव नहींहै ३८।३९ यम, नियम, यज्ञ, दान, वेदाभ्यास, धारणा और योग यह सब तुम्हारी भक्तिकी सोलहवीं कलाभी नहीं हैं ४० आपकी भक्ति करनेवाले पुरुषोंके इस जन्ममें तो रसायनआदि अनेक प्रकारके रसोंकी सिद्धिके चिह्न दीखते हैं ४१ यद्यपि मूर्खावस्थामें आपका भक्त नम्रनहीं होता है उसके भी निमित्त आप विभूति देतेहो इस संसार सागरसे पारउतारकर मोक्ष पदार्थकी देनेवाली आपकी भक्तिहै ४२ पर स्त्री, धनमेंरत, निरादर, दुःख और शोक इन सबसे संतप्तहुए पराये मुखके देखने वाले मुझ सेवककी आप रक्षा करो ४३ हे देवेश मिथ्या अभिमान से युक्त क्षणभंगुर विभूतिके विलासवाले मुझ क्रूर और कुमार्गीपर आप कृपाकरिये ४४ यह मेरी आशा दीनबन्धु जनोंमेंभी दूरनहीं होती हे शंकरजी मुझ मूढ़ अज्ञानी को यह तृष्णा महादुःखदेरही है ४५ इस मेरी तृष्णाको आप नित्यरहनेवाली लक्ष्मी देकर बड़ी शीघ्रता से निवृत्त करदो हे महादेव इस मदमोहरूपी फाँसी को काटकर मेरा उद्धारकरो ४६ यह करुणाभ्युदय नाम स्तोत्र सब सिद्धियों का देनेवालाहोकर महा दिव्य है इसस्तोत्र को जो कोई भक्तिसे पढ़ताहै उसके ऊपर महादेवजी ऐसे प्रसन्नहोते हैं जैसे कि भृगुपै प्रसन्नहुए हैं ४७ मार्कण्डेयजी कहते हैं कि इस स्तुतिको सुनकर महादेवजी ने कहा कि हे वत्स मैं तुझपर प्रसन्नहूं तू अपने मनका अभीष्टमांग इस प्रकारसे पार्वती समेत शिवजीने उस भृगु से कहा ४८ तब भृगुजी ने कहा हे देव जो आप मुझपर प्रसन्नहुए हैं और बरदान दिया

यदिदेयोवरोमम । रुद्रवेदीभवेदेवमेतत्सम्पादयस्वमे ४९ (ईश्वर उवाच) एवंभवतुवि
प्रेन्द्र ! क्रोधस्त्वानभविष्यति । नपितापुत्रयोश्चैवत्वैकमत्यंभविष्यति ५० तदाप्रभृति
ब्रह्माद्यास्सर्वदेवाःसकिन्नराः । उपासन्तेभृगोस्तीर्थंतुष्टोयत्रमहेश्वरः ५१ दर्शनात्तस्यतीर्थ
स्य सद्यःपापात्प्रमुच्यते । अवशाःस्ववशावापि म्रियन्तेयत्रमानवाः ५२ गुह्यातिगुह्यासु
गतिस्तेषांनिःसंशयंभवेत् । एतत्क्षेत्रंसुविपुलं सर्वपापप्रणाशनम् ५३ तत्रस्नात्वादिवंया
न्ति येमृतास्तेपुनर्भवाः । उपानहौचच्छत्रञ्च देयमन्नञ्चकाञ्चनम् ५४ भोजनञ्चयथाशक्त्या
ह्यक्षयञ्चतथाभवेत् । सूर्योपरागेयोदद्याद्दानंचैवयथेच्छया ५५ दीयमानन्तुतद्दानमक्षयंत
स्यतद्भवेत् । चन्द्रसूर्योपरागेषु यत्फलंत्वमरकण्टके ५६ तदेवानिखिलंपुण्यं भृगुतीर्थे
नसंशयः । क्षरन्तिसर्वदानानि यज्ञदानतपःक्रियाः ५७ नक्षरेत्तुतपस्तप्तं भृगुतीर्थेयुधि
ष्ठिर ! । यस्यवैतपसोग्रेण तुष्टेनैवतुशम्भुना ५८ सान्निध्यंतत्रकथितं भृगुतीर्थेनराधिप !
प्रख्यातंत्रिषुलोकेषु यत्रतुष्टोमहेश्वरः ५९ एवंतुवदतोदेवीं भृगुतीर्थमनुत्तमम् । नजान
न्तिनरामूढाविष्णुमायाविमोहिताः ६० नर्म्मदायांस्थितंदिव्यं भृगुतीर्थंनराधिप ! । भृगु
तीर्थस्यमाहात्म्यं यःशृणोतिनरःक्वचित् ६१ विमुक्तःसर्वपापेभ्योरुद्रलोकंसगच्छति । त
तोगच्छेत्तुराजेन्द्र ! गौतमेश्वरमुत्तमम् ६२ तत्रस्नात्वानरोराजन्नुपवासपरायणः । काञ्चने-

चाहते हैं तो मैं रुद्रवेदी अर्थात् रुद्रका जाननेवाला होजाऊं और इसस्थानपर मेरा तीर्थ भी होजाय
४९ यहसुनकर शिवजीने कहा कि ऐसाहीहोगा हेपुत्र अबतेरे क्रोधनहींरहैगा पिता और पुत्रादिकोंमेंतेरी
एकमति रहैगी ५० तबसेलेकर ब्रह्मादिक सब देवता और किन्नरादिक उस भृगुतीर्थ
की उपासना करतेहैं जहांकि महादेवजी ऋषिपर प्रसन्नहुए हैं ५१ उसतीर्थके दर्शनहोनेसे तत्काल
हीपापनष्ट होजातेहैं वहां जोपुरुष अवशहोकर अथवा स्ववशहोकर अपनेप्राणोंको त्यागते हैं उनकी
बहुत उत्तमगतिहोतीहै यहक्षेत्र बड़ा विस्तृत और पापोंका नष्टकरनेवाला है ५२।५३ वहां स्नान
करने वाले पुरुष स्वर्गमें जातेहैं और जोवहां प्राणोंकोत्यागतेहैं वह फिर जन्मनहीं पातेहैं और उपानह
छत्री और अन्नसमेत शक्तिके अनुसार सुवर्ण भोजनादिक के दान देते हैं वहसबवहां असंख्य
गुणेहोजाते हैं जो कोई वहां सूर्य्यग्रहणमें इच्छापूर्व्वक दान देते हैं वहभी अनन्त गुणे होजाते हैं
चन्द्र और सूर्य्य ग्रहणमें जोपुण्य अमर कंटक तीर्थपर होताहै वही पुण्य निस्सन्देह इस भृगुतीर्थ
परभीहोताहै हे युधिष्ठिर संपूर्ण दान यज्ञ तपतो क्षीणहो जातेहैं परन्तु भृगुतीर्थ पर कियाहुआ तप
कभीक्षीण नहीं होताहै हेराजन् भृगुऋषिके उग्रतपसे प्रसन्नहुए महादेवजी वहां भृगुतीर्थ में अपनी
स्थिति रखते हैं इस हेतुसे जहां महादेवजी भृगुजी पर प्रसन्न हुए हैं वह महाउत्तम तीर्थ त्रिलोकी
में विख्यातहै ५८।५९ हेदेवि ऐसे कहतेहुए भी मूढ़जन विष्णुकी मायासे मोहितहोकर अति उत्तम
भृगुतीर्थ को नहीं जानते हैं ६० हे युधिष्ठिर नर्मदानदीपर यह भृगुतीर्थ महाउत्तम है जो पुरुष
इस भृगुतीर्थ के माहात्म्यको श्रवण करता है वह सबपापों से छुटकर रुद्रलोकमें प्राप्तहोता है हे
पाण्डव इसके पीछे उत्तम गौतमेश्वर तीर्थपर जा स्नानपूर्व्वक निराहारव्रत करनेवाला पुरुष सु-

नविमानेन ब्रह्मलोकेमहीयते ६३ धौतपापंततोगच्छेत् क्षेत्रंयत्रवृषेणतु । नर्म्मदायांकृत्तं
राजन् ! सर्वपातकनाशनम् ६४ तत्रतीर्थेनरःस्नात्वाब्रह्महत्यांविमुञ्चति । तस्मिंस्तीर्थेतु
राजेन्द्र ! प्राणत्यागंकरोतियः ६५ चतुर्भुजस्त्रिनेत्रश्चशिवतुल्यबलोभवेत् । वसेत्कल्पा
युतंसाग्रं शिवतुल्यपराक्रमः ६६ कालेनमहताप्राप्तः पृथिव्यामेकराट्भवेत् । ततोगच्छेच्च
राजेन्द्र ! ऐरण्डीतीर्थमुत्तमम् ६७ प्रयागेयत्फलंदृष्टंमार्कण्डेयेनभाषितम् । तत्फलंल
भतेराजन् ! स्नातमात्रोहिमानवः ६८ मासिभाद्रपदेचैव शुक्लपक्षेचतुर्दशी । उपोष्यरज
नीमेकां तस्मिन्स्नानंसमाचरेत् ६९ यमदूतैर्नबाध्येत रुद्रलोकंसगच्छति । ततोगच्छेत्तु
राजेन्द्र ! सिद्धोयत्रजनार्दनः ७० हिरण्यदीपेतिख्यातं सर्वपापप्रणाशनम् । तत्रस्नात्वा
नरोराजन् ! धनवान्रूपवान्भवेत् ७१ ततोगच्छेत्तुराजेन्द्र ! तीर्थङ्कनखलंमहत् । गरु
डेनतपस्तप्तं तस्मिंस्तीर्थेनराधिप ! ७२ प्रख्यातंत्रिषुलोकेषु योगिनीतत्रतिष्ठति । क्रीडते
योगिभिःसार्द्धं शिवेनसहनृत्यति ७३ तत्रस्नात्वानरोराजन् ! रुद्रलोकेमहीयते । ततो
गच्छेत्तुराजेन्द्र ! हंसतीर्थमनुत्तमम् ७४ हंसास्तत्रविनिर्मुक्तागताऊर्ध्वंनसंशयः । ततोग
च्छेत्तुराजेन्द्र ! सिद्धोयत्रजनार्दनः ७५ वाराहंरूपमास्थाय अर्चितःपरमेश्वरः । वराहती
र्थेनरःस्नात्वा द्वादश्यान्तुविशेषतः ७६ विष्णुलोकमवाप्नोति नरकंनचपश्यति । ततोग
च्छेत्तुराजेन्द्र ! चन्द्रतीर्थमनुत्तमम् ७७ पौर्णमास्यांविशेषेण स्नानंतत्रसमाचरेत् । स्ना

वर्णके विमानमें बैठकर ब्रह्मलोकमें प्राप्तहोताहै ६१ । ६३ इसके विशेष जहां वृषभने पापोंको धोया
है उस धौतपाप तीर्थपर जानाचाहिये वहांभी सबपापोंका नाशहोता है ६४ उस तीर्थपर स्नान करनेवाला
पुरुष ब्रह्महत्याको दूरकरताहै हे राजेन्द्र उस तीर्थपर जो प्राणोंको त्यागताहै वह चतुर्भुज
तीननेत्रवाला होकर शिवजी के समान बलवान् होजाताहै और दिव्य दशहज़ार कल्पोंतक शिवलोकमें
बासकरताहै ६५ । ६६ फिर पृथ्वीमें जन्मलेकर निष्कंटक पृथ्वीका राजाहोताहै हे राजेन्द्र
इसके अनन्तर उत्तम ऐरंडी तीर्थपर जानायोग्यहै ६७ जो प्रयागजीके स्नानका फलकहाहै वहीपुण्य
फल यहां स्नानकरनेसे होताहै ६८ भाद्रपदमहीने के शुक्लपक्षकी चतुर्दशीको एकरात्रि उपवासव्रत
कर जो उसतीर्थमें स्नान करताहै वह पुरुष धर्मराजके दूतोंसे पीड़ित नहीं होताहै और रुद्रलोकमें
चलाजाताहै इसके पीछे जहां जनार्दनसिद्धहै वहां हिरण्यदीप नाम तीर्थहै वह तीर्थभी सबपापोंका
नाश करनेवालाहै वहां स्नान करनेवाला पुरुष धनवान् और रूपवान् होताहै ६९ । ७१ इसकेपीछे
बडे उत्तम कनखल तीर्थपर जानाचाहिये वहां गरुड़जी ने तपकियाहै यहां योगिनी रहती हैं योगियों
के साथ क्रीड़ा करती हैं और शिवजी के साथनृत्यभी करती हैं यह तीर्थभी त्रिलोकी में विख्यात है
हे राजन् यहां स्नान करनेवाला पुरुष रुद्रलोकमें प्राप्तहोताहै फिर उत्तम हंस नाम तीर्थपर जानाचाहिये
वहां मुक्तहुए परमहंस निश्चय ऊर्ध्वलोकों में प्राप्तहोगये हैं हे राजेन्द्र फिर जहां जनार्दन भगवान्
वाराहरूप धारणकर सिद्धहोकर पूजितहुए हैं वह वाराहतीर्थ है वहां विशेषकरके द्वादशीको जाकर
स्नान करनेवाला पुरुष विष्णुलोकमें प्राप्त होता है और नरकको नहीं देखताहै इसकेपीछे बडे

तमात्रोनरस्तत्र चन्द्रलोकेमहीयते ७८ दक्षिणेनतुतीरेण कन्यातीर्थन्तुविश्रुतम् । शुक्लपक्षेतृतीयायां स्नानंतत्रसमाचरेत् ७९ प्रणिपत्यतुचेशानं बलिस्तेनप्रसीदति । हरिश्चन्द्रपुरंदिव्यमन्तरिक्षेचदृश्यते ८० शक्रध्वजेसमावृत्ते सुप्तेनागरिकेजने । नर्म्मदासलिलौघेन तरूनूसंप्लावयिष्यति ८१ अस्मिनूस्थानेनिवासःस्याद्विष्णुःशङ्करमब्रवीत् । दीपेश्वरेनरःस्नात्वा लभेद्बहुसुवर्णकम् ८२ ततोगच्छेत्तुराजेन्द्र ! कन्यातीर्थेसुसङ्गमेस्नातमात्रोनरस्तत्र देव्याःस्थानमवाप्नुयात् ८३ देवतीर्थंततोगच्छेत् सर्वतीर्थमनुत्तमम् । तत्रस्नात्वातुराजेन्द्र ! दैवतैःसहमोदते ८४ ततोगच्छेच्चराजेन्द्र ! शिखितीर्थमनुत्तमम् । यत्तत्रदीयतेदानं सर्वंकोटिगुणंभवेत् ८५ अपरपक्षेत्वमायान्तु स्नानंतत्रसमाचरेत् । ब्राह्मणंभोजयेदेकं कोटिर्भवतिभोजिता ८६ भृगुतीर्थन्तुराजेन्द्र ! तीर्थकोटिर्व्यवस्थिता । अकामोवासकामोवा तत्रस्नानंसमाचरेत् ८७ अश्वमेधमवाप्नोति दैवतैःसहमोदते । तत्रसिद्धिंपरांप्राप्तो भृगुस्तुमुनिपुङ्गवः । अवतारःकृतस्तत्र शङ्करेणमहात्मना ८८ ॥

इतिश्रीमत्स्यपुराणेद्विनवत्यधिकशततमोऽध्यायः १९२ ॥

(मार्कण्डेय उवाच) ततोगच्छेत्तुराजेन्द्र ! ह्यंकुशेश्वरमुत्तमम् । दर्शनात्तस्यदेवस्य मुच्यतेसर्वपातकैः १ ततोगच्छेच्चराजेन्द्र ! नर्मदेश्वरमुत्तमम् । तत्रस्नात्वानरोराजन् !

पवित्र चन्द्रतीर्थपर जानाचाहिये ७२ । ७७ वहां विशेषकरके पूर्णिमाको स्नानकरना योग्यहै वहांके स्नानसे चन्द्रलोककी प्राप्तिहोती है ७८ उस चन्द्रतीर्थ के दक्षिण तटपर कन्यातीर्थ प्रसिद्धहै वहां शुक्लपक्षकी तृतीयाको स्नानकरनाचाहिये उस तीर्थपर महादेवके प्रणामकरनेसे बलिनाम दैत्य प्रसन्न होताहै जबकि नगरके सबलोग वहां रात्रिकेसमय सोजाते हैं उससमय कभी२ इन्द्रधनुष निकलताहै उसमें बहुधा हरिश्चन्द्रराजाका पुर दिखाई पड़ताहै और नर्मदानदी का जल वहांके वृक्षोंको डबोदेताहै पूर्व्वकालमें विष्णुभगवान्ने शिवजीसे कहाथा कि इसस्थानमें निवास करना चाहिये तभीसे वहां दीपेश्वर तीर्थ है वहां स्नान करनेवाला पुरुष बहुतसे सुवर्णको प्राप्तकरताहै ७९ । ८२ फिर कन्या तीर्थके संगमपर स्नान करनेवाला पुरुष देवी पार्वतीजीके स्थानमें प्राप्त होताहै ८३ फिर सब तीर्थोंमें श्रेष्ठ देवतीर्थ है वहाँजाके उसमें स्नान करनेवालापुरुष देवताओंके साथ आनन्दकरताहै ८४ फिर महा उत्तम शिखि तीर्थपर जाना चाहिये वहाँ जो कुछ दानदियाजाता है वह अनन्त गुणा होजाताहै ८५ अमावास्याके दिन वहाँ स्नानकरकेजो एकब्राह्मणको भोजन करवादेताहै उसको किरोड़ ब्राह्मणोंके भोजनकरवानेका पुण्य होताहै ८६ हे राजेन्द्र भृगुतीर्थ के समीपमें तीर्थोंकी कोटि व्यवस्थितहै वहाँ कामनायुक्त अथवा निष्काम होकर पुरुषको स्नान करना चाहिये वहाँ स्नान करनेवाला पुरुष अश्वमेध यज्ञके फलको प्राप्त होकर देवताओं के साथ आनन्द करता है उसीतीर्थपर जब भृगुमुनिने परम सिद्धिको पायाहै उसी समय शिवजीनेअपना अवतार धारण करलियाहै ८७ । ८८ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांद्विनवत्यधिकशततमोऽध्यायः १९२ ॥

मार्कण्डेयजी बोले हे राजेन्द्र इसके पीछे अंकुशेश्वर तीर्थपर जाना चाहिये उन महादेवजी के द-

स्वर्गलोकेमहीयते २ अश्वतीर्थंततोगच्छेत् स्नानंतत्रसमाचरेत्। सुभगोदर्शनीयश्च भोगवान्जायतेनरः ३ पितामहंततोगच्छेत्ब्रह्मणानिर्मितंपुरा। तत्रस्नात्वानरोभक्त्या पितृपिण्डन्तुदापयेत् ४ तिलदर्भविमिश्रन्तु ह्युदकंतत्रदापयेत्। तस्यतीर्थप्रभावेण सर्वं भवतिचाक्षयम् ५ सावित्रीतीर्थमासाद्य यस्तुस्नानंसमाचरेत्। विधूयसर्वपापानि ब्रह्म लोकेमहीयते ६ मनोहरंततोगच्छेत् तीर्थंपरमशोभनम्। तत्रस्नात्वानरोराजन्! पितृ लोकेमहीयते ७ ततोगच्छेत्तुराजेन्द्र! मानसंतीर्थमुत्तमम्। तत्रस्नात्वानरोराजन्! रुद्र लोकेमहीयते ८ ततोगच्छेच्चराजेन्द्र! कुब्जतीर्थमनुत्तमम्। विख्यातंत्रिषुलोकेषु सर्व पापप्रणाशनम् ९ यान्यान्कामयतेकामान् पशुपुत्रधनानिच। प्राप्नुयात्तानिसर्वाणि तत्र स्नात्वानराधिप १० ततोगच्छेत्तुराजेन्द्र! त्रिदशज्योतिविश्रुतम्। यत्रताऋषिकन्या स्तु तपोऽतप्यन्तसुव्रताः ११ भर्ताभवतुसर्वासा मीश्वरःप्रभुरव्ययः। प्रीतस्तासांमहादेवो दण्डरूपधरोहरः १२ विकृताननबीभत्सुर्व्रतीतीर्थमुपागतः। तत्रकन्यांमहाराज! वरयन्परमेश्वरः १३ कन्यांऋषेर्वरयतः कन्यादानंप्रदीयताम्। तीर्थंतत्रमहाराज! ऋषिकन्येतिविश्रुतम् १४ तत्रस्नात्वानरोराजन्! सर्वपापैःप्रमुच्यते।ततोगच्छेच्चराजेन्द्र! स्वर्णविन्दुत्वितिस्मृतम् १५ तत्रस्नात्वानरोराजन्! दुर्गतिंनचपश्यति। अप्सरेशंततो गच्छेत् स्नानंतत्रसमाचरेत् १६ क्रीडतेनागलोकस्थो ह्यप्सरैःसहमोदते। ततोगच्छेत्तु

र्शन करनेसे मनुष्य सब पापोंसे छुटजाताहै १ फिर परमोत्तम नर्मदेश्वर तीर्थपर जाना चाहिये वहाँ स्नान करनेवाला पुरुष स्वर्गलोकमें प्राप्त होताहै २ इसके पीछे अश्व तीर्थपर स्नानकरनेवाला पुरुष सुन्दर ऐश्वर्य्यवान् दर्शनीय भोक्ता पुरुष होता है ३ इसके पीछे ब्रह्माजीके रचेहुए पितामह तीर्थपर जाना चाहिये वहाँ भक्तिसे स्नानकर पितरोंके अर्थ पिण्डदान पूर्वक तिल कुश समेत जो जलका दान करता है उसका वह संपूर्ण कर्म उस तीर्थ के प्रभावसे अक्षयगुणा होजाताहै ४।५ सावित्री तीर्थपर स्नान करनेवाला पुरुष संपूर्ण पापोंको दूरकरके ब्रह्मलोकमें प्राप्त होताहै ६ फिर महा उत्तम मनोहर तीर्थपर स्नान करनेवाला पुरुष पितरों के लोकमें प्राप्त होताहै ७ हे राजन् इसके अनन्तर बड़े उत्तम मानस तीर्थपर जाना चाहिये वहाँ स्नानकरनेवाला पुरुष रुद्रलोकमें प्राप्त होताहै ८ फिर उत्तम कुंज तीर्थपर जाना योग्यहै यह तीर्थभी सबपापोंका हरनेवाला त्रिलोकीमें विख्यातहै ९ वहाँ पशु पुत्र धन और जिन२ कामनाओंको विचारताहै वही सब प्राप्त होजातीहैं १० इसके पीछे त्रिदशज्योति तीर्थपर जाना चाहिये वहाँ ऋषियोंकी कन्याओंने बड़ा तीव्र व्रतकियाहै ११ उनसब कन्याओंपर जब महादेवजी प्रसन्न हुएहैं तबउन सबोंके पति श्रीकृष्ण भगवान् हुएहैं १२ इसके आगे ऋषिकन्यानाम तीर्थहै वहाँ किसी समय कोई पुरुष ऋषिसे कन्यामांगताथा उसीको वह कन्या वहाँ विवाही गईहै उसतीर्थमें जो स्नान करताहै वह सब पापोंसे छुटजाताहै इसके अनन्तर स्वर्णविन्दुनाम तीर्थपर जाना चाहिये वहाँ स्नान करनेवाला पुरुष कभी दुर्गतिकोनहीं प्राप्त होताहै फिर अप्सरेश तीर्थपर जाकर स्नान करना चाहिये १३।१६ वहाँ स्नान

राजेन्द्र ! नरकंतीर्थमुत्तमम् १७ तत्रस्नात्वार्चयेद्देवं नरकंचनपश्यति । भारभूतिंततोगच्छेदुपवासपरोजनः १८ एतत्तीर्थंसमासाद्य चावतारंतुशाम्भवम् । अर्चयित्वाविरूपाक्षं रुद्रलोकेमहीयते १९ अस्मिंस्तीर्थेनरःस्नात्वा भारभूतौमहात्मनः । यत्रतत्रमृतस्यापि ध्रुवंगाणेश्वरीगतिः २० कार्तिकस्यतुमासस्य ह्यर्चयित्वामहेश्वरम् । अश्वमेधाद्दशगुणं प्रवदन्तिमनीषिणः २१ दीपकानांशतंतत्र घृतपूर्णन्तुदापयेत् । विमानैःसूर्य्यसङ्काशैः व्रजतेयत्रशङ्करः २२ वृषभंयःप्रयच्छेत्तु शङ्खकुन्देन्दुसप्रभम् । वृषयुक्तेनयानेन रुद्रलोकंसगच्छति २३ धेनुमेकान्तुयोदद्यात्तस्मिंस्तीर्थेनराधिप ! । पायसंमधुसंयुक्तं भक्ष्याणिविविधानिच २४ यथाशक्त्याचराजेन्द्र ! ब्राह्मणान्भोजयेत्ततः । तस्यतीर्थप्रभावेण सर्वंकोटिगुणंभवेत् २५ नर्म्मदायाजलंपीत्वा ह्यर्चयित्वावृषध्वजम् । दुर्गतिंचनपश्यति तस्मिंस्तीर्थेनराधिप ! २६ हंसयुक्तेनयानेन रुद्रलोकंसगच्छति । यावच्चन्द्रश्च सूर्यश्च हिमवांश्चमहोदधिः २७ गङ्गाद्याःसरितोयावत्तावत्स्वर्गेमहीयते । अनाशकन्तु यःकुर्यात्तस्मिंस्तीर्थेनराधिप ! २८ गर्भवासेतुराजेन्द्र ! नपुनर्जायतेपुमान् । ततोगच्छेत्तु राजेन्द्र ! आषाढीतीर्थमुत्तमम् २९ तत्रस्नात्वानरोराजन्निन्द्रस्यार्द्धासनंलभेत् । स्त्रियास्तीर्थंततोगच्छेत् सर्वपापप्रणाशनम् ३० तत्रापिस्नातमात्रस्य ध्रुवंगाणेश्वरीगतिः । ऐरण्डीनर्म्मदयोश्च सङ्गमंलोकविश्रुतम् ३१ तच्चतीर्थंमहापुण्यं सर्वपापप्रणाशनम् । उ

करनेवाला पुरुष नागलोकमें स्थितहोकर अप्सराओंके साथ क्रीड़ा करताहै इसके पीछे बड़े उत्तम नरक तीर्थपर जाना चाहिये वहाँ स्नान करके महादेवजीका पूजन करनेवाला पुरुष नरक को नहीं देखताहै फिर भारभूति तीर्थपर निराहार व्रतकर विरूपाक्ष महादेवका पूजन करनेवाला पुरुष रुद्रलोक में प्राप्त होताहै इसभारभूति तीर्थपर स्नान करनेवाला पुरुष जब कहीं मृत्युको प्राप्त होता है तब शिवजीका गण होताहै १७। २० वहाँ कार्तिक मासकी चतुर्दशीको महादेवका पूजन करनेवाला पुरुष अश्वमेध यज्ञके दशगुणे पुण्यको प्राप्तहोताहै और घृतसे पूर्ण सौ १०० दीपकों को प्रकाश करनेवाला पुरुष सूर्य्यकी तुल्य प्रकाश वाले विमानपर बैठकर शिवजी के समीप प्राप्तहोता है २१। २२ जो पुरुष वहां शंख तथा चन्द्रकान्तिवाले वृषभका दानकरता है वह बैलसे युक्तहुई सवारी में बैठकर रुद्रलोकमें प्राप्तहोता है २३ हे राजन् उस तीर्थपर जो एकगोदान करता है और शक्तिके अनुसार खीर खांड़से ब्राह्मणोंको भोजनकरवाताहै वह सबदान और पुण्य उस तीर्थ के प्रभावसे किरोड़गुणे फलदायी होते हैं २४। २५ नर्मदानदीके जलको पीकर महादेवका पूजन करनेवाला पुरुष दुर्गतिको न प्राप्तहोकर हंसयुक्त विमानमें बैठकर रुद्रलोकमें प्राप्तहोता है और जबतक चन्द्रमा सूर्य्य हिमवान् पर्व्वत समुद्र और गंगाआदिक नदी इन सबकी स्थिति रहती है तबतक वह स्वर्गलोक में वासकरता है हे पाण्डव उस तीर्थपर अनशनव्रत करनेवाला पुरुष कभी गर्भमें वासनहींकरता है इसकेपीछे आषाढ़ी तीर्थपर जानाचाहिये वहां स्नान करनेवाला पुरुष इन्द्रके अर्द्धासनको ग्रहण करताहै फिर सबपापों के दूरकरनेवाले स्त्री के तीर्थपर

पवासपरोभूत्वा नित्यव्रतपरायणः ३२ तत्रस्नात्वातुराजेन्द्र ! मुच्यतेब्रह्महत्यया । ततो
गच्छेन्नराजेन्द्र ! नर्म्मदोदधिसङ्गमम् ३३ जामदग्न्यमितिख्यातं सिद्धोयत्रजनार्दनः ।
यत्रेष्ट्वाबहुभिर्यज्ञैरिन्द्रोदेवाधिपोऽभवत् ३४ तत्रस्नात्वातुराजेन्द्र ! नर्म्मदोदधिसङ्गमे ।
त्रिगुणंचाश्वमेधस्य फलंप्राप्नोतिमानवः ३५ पश्चिमस्योदधेःसन्धौ स्वर्गद्वारविघट्टनम् ।
तत्रदेवाःसगन्धर्वा ऋषयःसिद्धचारणाः ३६ आराधयन्तिदेवेशं त्रिसन्ध्यंविमलेश्वरम् ।
तत्रस्नात्वानरोराजन् ! रुद्रलोकेमहीयते ३७ विमलेशंपरंतीर्थं नभूतंनभविष्यति । त
त्रोपवासंकृत्वाये पश्यन्तिविमलेश्वरम् ३८ सप्तजन्मकृतंपापं हित्वायान्त्यमरालयम् ।
ततोगच्छेत्तुराजेन्द्र ! कौशिकीतीर्थमुत्तमम् ३९ तत्रस्नात्वानरोराजन्नुपवासपरायणः ।
उपोष्यरजनीमेकां नियतोनियताशनः ४० एतत्तीर्थप्रभावेण मुच्यतेब्रह्महत्यया । सर्व
तीर्थाभिषेकन्तु यःपश्येत्सागरेश्वरम् ४१ योजनाभ्यन्तरेतिष्ठन्नावर्त्तेसंस्थितःशिवः । तंदृ
ष्ट्वासर्वतीर्थानि दृष्टान्येवनसंशयः ४२ सर्वपापविनिर्मुक्तो यत्ररुद्रःसगच्छति । नर्म्मदास
ङ्गमंयावद्यावच्चामरकण्टकम् ४३ अत्रान्तरेमहाराज ! तीर्थकोट्योदशस्मृताः । तीर्थात्ती
र्थान्तरंयत्र ऋषिकोटिनिषेवितम् ४४ साग्निहोत्रैस्तुविद्वद्भिः सर्वैर्ध्यानपरायणैः । सेवि
तानेनराजेन्द्र ! त्वीप्सितार्थप्रदायिका ४५ यस्त्विदंवैपठेन्नित्यं शृणुयाद्वापिभावतः । त

जानाचाहिये वहां स्नान करनेवाला पुरुष निश्चय करके गणेश्वर होताहै ऐरंडी और नर्मदानदियों
का उत्तम संगम त्रिलोकी में विख्यातहै वहां स्नानकर उपवासव्रत करनेवाला पुरुष ब्रह्महत्या से
छुटजाताहै इसकेपीछे नर्मदा और समुद्रके संगममें जामदग्न्यनाम तीर्थपर जानाचाहिये वहां जनार्दन
भगवान् सिद्धहुएहैं वहांही इन्द्रबहुतसे यज्ञकरके देवताओं का पतिहुआहै वहां स्नान करनेवाला
पुरुष अश्वमेधयज्ञसे त्रिगुणितपुण्यको प्राप्तहोताहै और पश्चिमके समुद्रकी सन्धिमें स्वर्गद्वार
तीर्थहै वहां देवता ऋषि गन्धर्व सिद्ध और चारण यहसब तीनों सन्धियोंमें विमलेश्वर महादेवजी
का पूजन करते हैं वहां स्नान करनेवाला पुरुष रुद्रलोकमें प्राप्तहोताहै इस विमलेश्वर के समान
कोई उत्तम तीर्थ नहीं है वहां निराहारव्रत करके जो विमलेश्वर महादेवके दर्शनकरतेहैं वह सात
जन्मके संचित कियेहुए पापोंको दूरकरके स्वर्गलोकमें प्राप्त होते हैं हे राजेन्द्र इसके अनन्तर उत्तम
कौशिकी तीर्थपर जानाचाहिये वहां स्नानकर एकरात्रि उपवासव्रत करना चाहिये इसतीर्थके प्रभाव
से ब्रह्महत्या दूर होजाती है जहां सब तीर्थोंका अभिषेक होताहै ऐसे सागरेश महादेवजी के दर्शन
करने चाहिये वहां महादेवजी एकयोजन के विस्तारमें स्थित हैं केवल उनकेही दर्शन करने से निस्सन्देह
सब तीर्थोंके दर्शनका पुण्यहोजाताहै २६।४२ और सबपापों से छुटकर रुद्रलोकमें प्राप्त
होताहै हे राजन् नर्मदानदी के संगम और अमरकंटक तीर्थ के मध्यमें दशकिरोड़तीर्थ कहे हैं और
प्रत्येक तीर्थमें अनेक२ ऋषियोंका वासहै ४३।४४ अग्निहोत्रवाले और सम्पूर्ण ध्यानोंमें तत्पर ऐसे
विद्वान् पुरुषोंने इसनर्मदानदीको सेवनकियाहै यहनदी मनोवांछितफलोंकी देनेवाली है इस नर्मदा
नदी के माहात्म्यको जो पुरुष पढ़ैगा वा भक्तिपूर्वक सुनेगा उसको सब तीर्थों के जलोंको अभिषेक

स्यतीर्थानिसर्वाणि ह्यभिषिञ्चन्तिपाण्डव ! ४६ नर्म्मदाचसदाप्रीता भवेद्दैनात्रसंशयः ।
प्रीतस्तस्यभवेद्रुद्रो मार्कण्डेयोमहामुनिः ४७ बन्ध्याचैवलभेत्पुत्रान् दुर्भगासुभगाभवे
त् । कन्यालभेतभर्तारं यश्चवाञ्छेत्तुयत्फलम् ४८ तदेवलभतेसर्वं नात्रकार्याविचारणा ।
ब्राह्मणोवेदमाप्नोति क्षत्रियोविजयीभवेत् ४९ वैश्यस्तुलभतेलाभं शूद्रःप्राप्नोतिसद्गतिम् ।
मूर्खस्तुलभतेविद्यां त्रिसन्ध्यंयःपठेन्नरः । नरकञ्चनपश्येत्तु वियोगञ्चनगच्छति ५० ॥

इति श्रीमत्स्यपुराणे त्रिनवत्यधिकशततमोऽध्यायः १९३ ॥

(सूत उवाच) इत्याकर्ण्यसराजेन्द्र ओङ्कारस्याभिवर्णनम् । ततःपप्रच्छदेवेशं म
त्स्यरूपंजलार्णवे १ (मनुरुवाच) ऋषीणांनामगोत्राणि वंशावतरणंतथा । प्रवराणां
तथासाम्यमसाम्यंविस्तराद्वद २ महादेवेनऋषयः शप्ताःस्वायम्भुवान्तरे । तेषांवैवस्व
तेप्राप्ते सम्भवंममकीर्त्तय ३ दाक्षायणीनचतथा प्रजाःकीतर्यमेप्रभो । ऋषीणांचतथावंशं
भृगुवंशविवर्धनम् ४ (मत्स्य उवाच) मन्वन्तरेऽस्मिन्संप्राप्ते पूर्ववैवस्वतेतथा । चरित्रं
कथ्यतेराजन् ! ब्रह्मणःपरमेष्ठिनः ५ महादेवस्यशापेन त्यक्त्वादेहंस्वयंतथा । ऋषयश्च
समुद्भूताश्च्युतेशुक्रेमहात्मनः ६ देवानांमातरोदृष्ट्वा देवपत्न्यस्तथैवच । स्कन्नंशुक्रंमहा
राज ! ब्रह्मणःपरमेष्ठिनः ७ तज्जुहावततोब्रह्मा ततोजाताहुताशनात् । ततोजातोमहा
तेजा भृगुश्चतपसांनिधिः ८ अङ्गारेष्वाङ्गिराजातो ह्यर्चिभ्योऽत्रिस्तथैवच । मरीचिभ्यो

कियेका पुण्यहोगा और नर्मदानदी मार्कण्डेयमुनि और श्रीमहादेवजी यह तीनों उसपर प्रसन्न होंगे ४५ । ४७ इसके माहात्म्य सुननेसे बन्ध्या स्त्री पुत्रवती दुर्भगा सुभगा और कन्या निस्सन्देह उत्तमवरको प्राप्तहोजातीहै ब्राह्मण वेदपाठी होजाताहै क्षत्रिय विजयीहोताहै वैश्य धनवान् होताहै शूद्र उत्तम गतिको प्राप्त होजाताहै और तीनों सन्धियोंमें इस माहात्म्यका सुननेवाला मूर्खजन विद्यावान् होजाता है इसका सुननेवालापुरुप नरक और वियोगको कभीनहीं प्राप्त होताहै ४८।५०॥

इतिश्रीमत्स्यपुराणभापाटीकायांत्रिनवत्यधिकशततमोऽध्यायः १९३ ॥

सूतजी बोले कि वह राजा युधिष्ठिर इसप्रकार से नर्मदानदी के और ओंकारेश्वर महादेवजी के माहात्म्यको सुनकर जलार्णव में मत्स्यजी के कहेहुए इसप्रश्नको पूछताभया अर्थात् जो मनुजी ने श्रीभगवान मत्स्यावतारसे पूछा है कि हे देव आप ऋषियों के गोत्र वंश अवतार और प्रवरों को विस्तारपूर्वक वर्णन कीजिये १ । २ और स्वायंभुव मन्वन्तर में जो महादेवजी ने ऋषियों को शाप दियाथा उस सब समेत वैवस्वत मन्वन्तरकी उत्पत्तिको भी कहिये ३ दक्षकी सन्तानकहिये और भृगुवंश के बढ़ानेवाले ऋषियों के वंशको भी कहिये ४ मत्स्यजी बोले हे राजन् इसवैवस्वतमनुमें प्रथम ब्रह्माजी के चरित्रों को तू सुन ५ प्रथम महादेवजी के शापसे सब ऋषि अपने २ शरीरको आपही त्यागकर स्वर्गलोक में जातेभये, वहां ब्रह्माजी के वीर्य्यसे फिर सब ऋषि उत्पन्नहुए हैं तब देवताओं की माता और देवताओं की स्त्रियां ब्रह्माजी के वीर्य्यको स्खलित हुआ जानकर ब्रह्माजी के समीप से उस वीर्य्य को अग्नि में हवन करवा देतीभईं जब ब्रह्माजी ने

मरीचिस्तु ततोजातोमहातपाः ९ केशैस्तुकपिशोजातः पुलस्त्यश्चमहातपाः। केशैःप्रलम्बैःपुलहस्ततोजातोमहातपाः १० वसुमध्यात्समुत्पन्नो वसिष्ठस्तुतपोधनः। भृगुःपुलोम्नस्तुसुतां दिव्यांभार्यामविन्दत ११ यस्यामस्यसुताजाता देवाद्वादशयाज्ञिकाः। भुवनोभौवनश्चैव सुजन्यःसुजनस्तथा १२ शुचिःक्रतुश्चमूर्धाच त्याज्यश्चवसुदश्चह। प्रभवश्चाव्ययश्चैव दक्षोऽथद्वादशस्तथा १३ इत्येतेभृगवोनाम देवाद्वादशकीर्तिताः। पौलोम्यांजनयन्विप्रान् देवानांतुकनीयसः १४ च्यवनन्तुमहाभागमाप्नुवानंतथैवच। आप्नुवानात्मजश्चौर्वो जमदग्निस्तदात्मजः १५ और्वोगोत्रकरस्तेषां भार्गवाणांमहात्मनाम्। तत्रगोत्रकरास्त्वन्ये भृगोर्वैदीप्ततेजसः १६ भृगुश्चच्यवनश्चैव आप्नुवानस्तथैवच। और्वश्चजमदग्निश्च वात्स्योदण्डिर्नडायनः १७ वैगायनोवीतिहव्यः पैलश्चैवात्रशौनकः। शौनकायनजीवन्ति रावेदःकार्पणिस्तथा १८ वैहीनरिर्विरूपाक्षो रौहित्यायनिरेवच। वैश्वानरिस्तथानीलो लुब्धःसावर्णिकश्चसः १९ विष्णुःपौरोऽपिवालाकिरैलिकोऽनन्तभागिनः। भृतभार्गेयमार्कण्डजाविनोवीतिनस्तथा २० मण्डमाण्डव्यमाण्डूकफेनपास्तनितस्तथा। स्थलःपिण्डःशिखावर्णः शार्कराक्षिस्तथैवच २१ जालधिःसौधिकःक्षुभ्यः कुत्सन्योमौद्गलायनः। कर्मायनोदेवपतिः पाण्डुरोचिःसगालवः २२ साङ्कृत्यश्चातकिःसार्पिर्यज्ञपिण्डायनस्तथा। गार्ग्यायनोगायनश्च ऋषिर्गार्हायनस्तथा २३ गोष्ठा

वीर्यका हवनकिया तब अग्निमें से महातेजवाले भृगुऋषि उत्पन्न हुए ६।८ उस समय उस अग्निके अंगारोंसे अंगिरा ऋषि उत्पन्नहुए, अग्निकी शिखाओं से अत्रिऋषि उत्पन्न हुए अग्निकी झलोंमें से महातपस्वी मरीचि ऋषि उत्पन्न हुए ब्रह्माजी के बालों से कपिश ऋषि और पुलस्त्य ऋषि उत्पन्न हुए लंबे कियेहुए केशोंसे महातेजस्वी पुलहऋषि उत्पन्न हुए ९।१० वसु अर्थात् अग्निकी कान्तिमें से वसिष्ठ ऋषि उत्पन्न हुए, इनमें से भृगुऋषि से पुलोमा ऋषिकी दिव्य पुत्रीका विवाह हुआ ११ उन दोनोंके संयोग से इन नामोंवाले बारह १२ याज्ञिक देवता उत्पन्न भये, भुवन १ भौवन २ सुजन्य ३ सुजन ४ शुचि ५ क्रतु ६ मूर्द्धा ७ त्याज्य ८ वसुद ९ प्रभव १० अव्यय ११ और दक्ष १२ यह बारह भार्गव कहाते हैं और उसी पौलोमी स्त्री में देवताओंसे छोटे विप्र उत्पन्न होतेभये १३।१४ उनके नाम यह हैं च्यवन, और आप्नुवान फिर आप्नुवानके और्वनाम पुत्रहुआ और्वके जमदग्नि हुए इन सबमें भार्गव ऋषियोंका बढ़ानेवाला और्वऋषि हुआहै अबबड़े २ दीप्ततेजवाले भृगुगोत्रके बढ़ाने वाले ऋषियोंको कहते हैं भृगु, च्यवन, आप्नुवान, और्व, जमदग्नि, वात्स्य, दंडि, नडायन १५।१७ वैगायन, वीतिहव्य, पैल, शौनक, शौनकायन, जीवन्ति, आवेद, कार्पणि, १८ वैहीनरि, विरूपाक्ष, रौहित्यायनि, वैश्वानरि, नील, लुब्ध, सावर्णिक, १९ विष्णु, पौर, वालाकिरैलिक, अनन्तभागी, भृत, भार्गेय, मार्कण्ड, जवी, वीती, २० मंड, मांडव्य, मांडूक, फेनप, तनित, स्थल, पिण्ड, शिखावर्ण, शार्कराक्षि, २१ जालधि, सौधिक, क्षुभ्य, कुत्सन्य, मौद्गलायन, कर्मायन, देवपति, पांडुरोचि, गालव, २२ सांकृत्य, चातकि, सार्पि, यज्ञपिण्डायन, गार्ग्यायन, गायन, गार्हायन,

यनोवात्यायनो वैशम्पायनएवच । वैकर्णिनिःशाङ्करवो याज्ञेयिर्भ्राष्ट्रकायनिः २४ लालाटिर्नाकुलिश्चैव लौक्षिण्योपरिमण्डली । आलुकिःसौचकिःकौत्सस्तथान्यःपैङ्गलायनिः २५ सात्यायनिर्मालायनिः कौटिलिःकौचहस्तिकः । सौहसोक्तिःसकौवाक्षिः कौसिश्चान्द्रमासिस्तथा २६ नैकजिह्वोजिह्मकश्च व्यधाद्योलोहवैरिणः । शारद्वतिकनेतिष्यौ लोलाक्षिश्चलकुण्डलः २७ वागायनिश्चानुमतिः पूर्णिमागतिकोऽसकृत् । सामान्येनयथातेषां पञ्चैतेप्रवरामताः २८ भृगुश्चच्यवनश्चैव आप्नुवानस्तथैवच । और्वेश्चजमदग्निश्च पञ्चैतेप्रवरामताः २९ अतःपरंप्रवक्ष्यामि शृणुत्वन्यान्भृगूद्वहान् । जमदग्निर्विदश्चैव पौलस्त्योवैजभृत्तथा ३० ऋषिश्चोभयजातश्च कायनिःशाकटायनः । और्वेयामारुताश्चैव सर्वेषांप्रवराःशुभाः ३१ भृगुश्चच्यवनश्चैव आप्नुवानस्तथैवच । परस्परमवैवाह्या ऋषयःपरिकीर्तिताः ३२ भृगुदासोमार्गपथो ग्राम्यायनिकटायनी । आपस्तम्बिस्तथाबिल्विर्नैकशिःकपिरेवच ३३ आर्ष्टिषेणोगार्दभिश्च कार्दमायनिरेवच । आश्वायनिस्तथारूपिर्येचार्षेयाःप्रकीर्तिताः ३४ भृगुश्चच्यवनश्चैव आप्नुवानस्तथैववच । आर्ष्टिषेणस्तथारूपिः प्रवराःपञ्चकीर्तिताः ३५ परस्परमवैवाह्या ऋषयःपरिकीर्तिताः । यस्कोवावीतिव्योवा मथितस्तुतथादमः ३६ जैवन्त्यायनिमौञ्जश्च पिलिश्चैवचलिस्तथा । भागिलोभागवित्तिश्च कौशापिस्त्वथकाश्यपिः ३७ बालपिःश्रमदागेपिः सौरस्तिथिस्तथैवच । गार्गीयस्त्वथजावालिस्तथापौष्ण्यायनोह्यृषिः ३८ ग्रामदश्चत

गोष्ठायन, वात्यायन, वैशंपायन, वैकर्णिनि, शांकरव, याज्ञेयि, भ्राष्ट्रकायनि, २३।२४ लालाटि, नाकुलि, लौक्षिण्य, परिमंडली, आलुकि, सौचकि, कौत्स, पैंगलायनि, २५ सात्यायनि, मालायनि, कौटिलि,कौचहस्तिक, सौहसोक्ति, कौवाक्षि, कौसि, चान्द्रमसि, २६ नैकजिह्व, जिह्मक, व्यधाद्य, लोहवैरी, शारद्वतिक, नेतिष्य, लोलाक्षि, चलकुंडल, वागायनि, अनुमति, पूर्णिमा, अगतिक, और असकृत् इन नामों वाले यह सब ऋषि भृगुवंश में हुए हैं सामान्यसे इन सबके पांच २ प्रवर कहे हैं २७।२८ भृगु, १ च्यवन २ आप्नुवान ३ और्व ४ जमदग्नि, यह पांच प्रवर कहे हैं २९ इसके अनन्तर भृगुवंशमें होने वाले अन्य ऋषियोंको भी सुनो, जमदग्नि, विद,पौलस्त्य, वैजभृत् ३० उभयजात ऋषि, कायनि, और शाकटायन इन सबको शुभ और्वेय, मारुत, भृगु, च्यवन, और आप्नुवान यह सब प्रवर कहाते हैं, यह ऋषि परस्परमें विवाहादिक संबंधनहीं करते हैं ३१।३२ और भृगुदास, मार्गपथ, ग्राम्यायनि, कटायनि, आपस्तंबि, विल्वि, नैकशि, कपि, ३३ आर्ष्टिषेण, गार्दभि, कार्दमायनि आश्वायनि, और रूपि यह सब आर्षेय कहातेहैं ३४ और भृगु, च्यवन आप्नुवान आर्ष्टिषेण और रूपि यह पांचप्रवर कहाते हैं ३५ इनऋषियोंका भी आपसमें बिवाहादिक संबंधनहीं होताहै और यस्क,वीतिव्य,माथित,दम, जैवंत्यायनि,मौंज,पिलि,चलि, भागिल,भागवित्ति, कौशापि, काश्यपि, ३६।३७ बालपि श्रमदागेपि, सौर, गार्गीय, जावालि, पौष्ण्यायन, ग्रामद यह इनके आर्षेय प्रवर कहातेहैं और भृगु वीतिहव्य रैवस वैवस, यह ऋषिभी परस्पर विवाहनहीं

थैतेषामार्षेयाःप्रवरामताः । भृगुश्चवीतिहव्यश्च तथारैवसवैवसौ ३९ परस्परमवैवाह्या ऋषयःपरिकीर्तिताः । शालायनिःशाकटाक्षो मैत्रेयःखाण्डवस्तथा ४० द्रौणायनोरौक्मायनः पिशलीचापिकायनिः । हंसजिह्वस्तथैतेषामार्षेयाःप्रवरामताः ४१ भृगुश्चैवाथवध्यश्वो दिवोदासस्तथैवच । परस्परमवैवाह्या ऋषयःपरिकीर्तिताः ४२ एकायनोयाज्ञपतिर्मत्स्यगन्धस्तथैवच । प्रत्यूहश्चतथासौरिश्चौक्षिर्वैकार्दमायनिः ४३ तथागृत्समदोराजन् ! सनकश्चमहान्नृषिः । प्रवरास्तुतथोक्तानामार्षेयाःपरिकीर्तिताः ४४ भृगुर्गृत्समदश्चैव आर्षावेतौप्रकीर्तितौ । परस्परमवैवाह्या ऋषीवैपरिकीर्तितौ ४५ एतेतवोक्ता भृगुवंशजाता महानुभावान्नृपगोत्रकाराः । एषांतुनाम्नापरिकीर्तितेन पापंसमग्रंविजहाति जन्तुः ४६ ॥

इति श्रीमत्स्यपुराणे चतुर्नवत्यधिकशततमोऽध्यायः १९४ ॥

(मत्स्य उवाच) मरीचितनयाराजन् ! सुरूपानामविश्रुता । भार्याचाङ्गिरसोदेवास्तस्याःपुत्रादशस्मृताः १ आत्मायुर्दमनोदक्षः सदःप्राणस्तथैवच । हविष्मांश्चगविष्ठश्च ऋतःसत्यश्चतेदश २ एतेचाङ्गिरसोनाम देवावैसोमपायिनः । सुरूपाजनयामास ऋषीन् सर्वेश्वरानिमान् ३ बृहस्पतिङ्गौतमञ्च संवर्त्तमृषिमुत्तमम् । उतथ्यंवामदेवंच अजास्यमृषिजन्तथा ४ इत्येतेऋषयःसर्वे गोत्रकाराःप्रकीर्तिताः । तेषांगोत्रसमुत्पन्नान् गोत्रकारान्निबोधमे ५ उतथ्योगौतमश्चैव तौलेयोऽभिजितस्तथा । सार्धनेमिःसलौगाक्षिः क्षीरःकौष्टिकिरेवच ६ राहुकर्णिःसौपुरिश्च कैरातिःसामलोमकिः । पौषजितिर्भार्गवतो ह्यृ

करतेहैं और शालायानि, शाकटाक्ष, मैत्रेय, खांडव, द्रौणायन, रौक्मायन, पिशली, कायनि, हंसजिह्व यह इनके आर्षेय प्रवरकहातेहैं और भृगु वध्यश्व, और दिवोदास यहभी आपसमें संबंधनहीं करतेहैं ३८।४२ और एकायन, याज्ञपति, मत्स्यगन्ध, प्रत्यूह, सौरि, औक्षि, कार्दमायनि, गृत्समद, और सनक यह सब इन उक्तोंके आर्षेय प्रवर कहातेहैं ४३।४४ और भृगु, गृत्समद, यहदो आर्ष प्रवरकहेहैं यहदोनों ऋषि प्रवरभी आपसमें परस्पर संबंधरहितहैं ४५ हेराजन् यहसब भृगुवंशमें होनेवाले ऋषिजोतेरे आगे कहेहैं सब बड़े अनुभाव वालेहैं और गोत्रोंके बढ़ाने वाले हैं इनके नामोच्चारणही करनेसे सबपापदूरहोजातेहैं ४६ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांचतुर्नवत्यधिकशततमोऽध्यायः १९४ ॥

मत्स्यजीबोले हेराजन् मरीचिके पुत्र सुरूपानामसे प्रसिद्धहैं और अंगिराऋषिकी स्त्री के दशपुत्र उत्पन्नहुए वह सब देवताहोतेभये १ आत्मा[१], आयु[२], दमन[३], दक्ष[४], सद[५], प्राण[६] हविष्मान[७], गविष्ठ[८], ऋत[९], सत्य[१०], यहदशों देवताहुए इनको सोमपायी देवताकहतेहैं और आगेलिखेहुए ऋषियोंको सुरूपाजनतीभई २।३ और बृहस्पति, गौतम, संवर्त्त, उतथ्य, वामदेव और अजास्य यह सब ऋषि गोत्रबढ़ानेवाले कहेहैं अब इनगोत्रोंमें उत्पन्न होनेवाले अन्यगोत्रकारोंको कहतेहैं ४।५ उतथ्य, गौतम, तौलेय, अभिजित, आर्धनेमि, लौगाक्षि, क्षीर, कौष्टिकि, ६ राहुकर्णी, सौपुरि, कैराति, सामलोमकि, पौषजिति,

षिश्चैरीडवस्तथा ७ कारोटकःसजीवीच उपविन्दुसुरैषिणौ। वाहिनीपतिवैशाली क्रोष्टा
चैवारुणायनिः ८ सोमोत्रायनिकासोरु कौशल्याःपार्थिवास्तथा। रौहिण्यायनिरेवाग्नी
मूलपःपाण्डुरेवच ९ क्षपाविश्वकरोऽरिश्च पारिकारारिरेवच। त्र्यार्षेयाःप्रवराश्चैव तेषां
चप्रवरान्शृणु १० अङ्गिराःसुवचोतथ्य उशिजश्चमहानृषिः। परस्परमवैवाह्या ऋषयः
परिकीर्तिताः ११ आत्रेयायनिसौवेष्ठ्यावग्निवेश्यःशिलास्थलिः। वालिशायनिश्चैके
पी वाराहिर्बाष्कलिस्तथा १२ सौटिश्चत्रिणकर्णिश्च प्रावहिश्चाश्वलायनिः। वाराहिर्ब
र्हिसादीच शिखाग्रीविस्तथैवच १३ कारकिश्चमहाकापिस्तथाचोडुपतिःप्रभुः। कौंचकि
र्धूमितश्चैव पुष्पान्वेषिस्तथैवच १४ सोमतन्विर्ब्रह्मतन्विः सालडिर्बालडिस्तथा। देव
रारिर्देवस्थानिर्हारिकर्णिःसरिद्भविः १५ प्रावेपिःसाद्यसुग्रीविस्तथागोमेदगन्धिकः। मत्
स्याच्छाद्योमूलहरः फलाहारस्तथैवच १६ गाङ्गोदधिःकौरुपतिः कौरुक्षेत्रिस्तथैवच।
नायकिर्जैत्यद्रौणिश्च जैह्वलायनिरेवच १७ आपस्तम्बिर्मौञ्जवृष्टिर्मार्ष्टिपिङ्गलिरेवच।
पैलश्चैवमहातेजाः शालङ्कायनिरेवच १८ द्व्याख्येयोमारुतश्चैषां त्र्यार्षेयःप्रवरोनृप!।
अङ्गिराःप्रथमस्तेषां द्वितीयश्चवृहस्पतिः १९ तृतीयश्चभरद्वाजः प्रवराःपरिकीर्तिताः।
परस्परमवैवाह्या इत्येतेपरिकीर्तिताः २० काण्वायनाःकोपचयास्तथावात्स्यतरायणाः।
भ्राष्ट्रकृद्राष्ट्रपिण्डीच लैन्द्राणिःसायकायनिः २१ क्रोष्टाक्षीवहुवीतीच तालकृन्मधुरावहः।
लावकृद्गालविद्गाथी मार्कटिःपौलिकायनिः २२ स्कन्दसश्चतथाचक्री गार्ग्यःश्यामायनि
स्तथा। वालाकिःसाहरिश्चैव पञ्चार्षेयाःप्रकीर्तिताः २३ अङ्गिराश्चमहातेजा देवाचार्यो

भार्गवत, ऐरिडिवऋषि, कारोटक, सजीवी, उपविन्दु, सुरैपिण, वाहिनीपति, वैशालि, क्रोष्टा, वरुणायनि ७।८ सोम, अत्रायनि, कासोरु, कौशल्य, येराजे, रौहिण्यायनि, रैवाग्नि, मूलप, पांडु, ९ क्षपाकर, विश्वारि, पारिकारि, यह सवउन पूर्व ऋषियोंके आर्षेय प्रवरकहाते हैं अवइनकेभी प्रवरोंको सुनो
१० अंगिरा, सुवच, तथ्यवड़े महात्मा उशिज, यह सवभी परस्पर संवन्धनहीं करते ११ और आत्रेयायनि, सौवेष्ठ्य, अग्निवेश्य, शिलास्थलि, वालिशायनि, ऐकेपि, वाराहि, वाष्कलि १२ सौटि, त्रिणकर्णि, प्रावहि, आश्वलायनि, वाराहि वर्हिसादी, शिखाग्रीवि, १३ कारकि, महाकापि, उडुपति, कौंचकि धूमित, पुष्पान्वेषी १४ सोमतन्वि, व्रह्मतन्वि, सालडि, वालडि, देवरारि, देवस्थानि, हारिकर्णि, सरिद्भावि १५ प्रावेपि, साद्यसुग्रीवि, गोमेदगन्धिक, मत्स्याच्छाद्य, मूलहर, फलाहार, गांगोदधि, कौरुपति, कौरुक्षेत्रि, नायकि, जैत्यद्रौणि, जैह्वलायनि, आपस्तंबि, मौंजवृष्टि, मार्ष्टि पिंगालि, वड़ेतेजस्वीपैल, शालंकायनि, १६।१८ द्व्याख्येय, और मारुत यह ऋषिहैं और आगे कहे हुए इनके तीनप्रवरहैं उनमें पहिला अंगिरा दूसरा वृहस्पति, और तीसराभरद्वाज यहतीन प्रवरहैं यहतीन प्रवरवाले पूर्वोक्तऋषिभी आपसमें विवाह संवन्धनहीं करते हैं १९।२० और काण्वायन, कोपचय, वात्स्यतरायण, भ्राष्ट्रकृत्, राष्ट्रपिण्डी, लैन्द्राणि, सायकायनि, क्रोष्टाक्षी, वहुवीती, तालकृत्

वृहस्पतिः। भरद्वाजस्तथागर्गः सैन्यश्चभगवानृषिः २४ परस्परमवैवाह्या ऋषयःपरिकीर्तिताः। कपीतरःस्वस्तितरो दाक्षिःशक्तिःपतञ्जलिः २५ भूयासिर्जलसन्धिश्च विन्दुर्मादिःकुसीदकिः। ऊर्वस्तुराजकेशीच वौषडिःशंसपिस्तथा २६ शालिश्चकलशीकण्ठऋषिःकारीरयस्तथा। काट्योधान्यायनिश्चैव भावास्यायनिरेवच २७ भारद्वाजिःसौबुधिश्च लघ्वीदेवमतिस्तथा। त्र्यार्षेयोऽभिमतश्चैषां प्रवरोभूमिपोत्तम! २८ अङ्गिरादमवाह्यश्च तथाचैवाप्युरुक्षयः। परस्पराण्यपर्णींच लौक्षिर्गार्ग्यहरिस्तथा २९ गालविश्चैवत्र्यार्षेयः सर्वेषांप्रवरोमतः। अङ्गिराःसंकृतिश्चैव गौरवीतिस्तथैवच ३० परस्परमवैवाह्या ऋषयःपरिकीर्तिताः। वृहदुक्थोवामदेवस्तथात्रिःप्रवरामताः ३१ अङ्गिरावृहदुक्थश्च वामदेवस्तथैवच। कुत्साकुत्सैरवैवाह्या एवमाहुःपुरातनाः ३२ रथीतराणांप्रवरात्र्यार्षेयाःपरिकीर्तिताः। अङ्गिराश्चविरूपश्च तथैवचरथीतरः ३३ रथीतराह्यवैवाह्या नित्यमेवरथीतरैः। विष्णुवृद्धिःशिवमतिर्जतृणःकत्तृणस्तथा ३४ पुत्रवश्चमहातेजास्तथावैरपरायणः। त्र्यार्षेयोऽभिमतस्तेषां सर्वेषांप्रवरोनृप ३५ अङ्गिरामत्स्यदग्धश्च मुद्गलश्चमहातपाः। परस्परमवैवाह्या ऋषयःपरिकीर्तिताः ३६ हंसजिह्वोदेवजिह्वो ह्यग्निजिह्वोविराडपः। अपाग्नेयस्त्वश्वयुश्च परण्यस्ताविमौद्गलाः ३७ त्र्यार्षेयाभिमतास्तेषां सर्वेषांप्रवराःशुभाः। अङ्गिराश्चैवताण्डिश्च मौद्गल्यश्चमहातपाः ३८ परस्परमवैवाह्या

मधुरावह, लावकृत, गालवित्, गार्थी, मार्कटि, पौलिकायनि, स्कन्दस्, चक्री, गार्ग्य, श्यामायनि, वालाकि, साहरि, यह आगे लिखेहुए पांच आर्षेय प्रवरवाले हैं, महातेजस्वी अंगिरा १ देवाचार्य्य वृहस्पति २ भरद्वाज ३ गर्ग ४ और सैन्य यहपांच प्रवरहैं यह आपसमें विवाहादिक संबन्ध नहीं करते–और कपीतर, स्वस्तितर, दाक्षि, शक्ति, पतंजलि, भूयसि, जलसंधि, विन्दुर्मादि, कुसीदकि, ऊर्व, राजकेशी, वौपडि, शंसपि, २१। २६ शालि, कलशीकंठ, कारीरय, काट्य, धान्यायनि, भावास्यायनि, २७ भारद्वाजि, सौबुधि, लघ्वी, देवमति, इन ऋपियोंके अंगिरा १ दमवाह्य २ और उरुक्षय यहतीन आर्षेय प्रवरहैं यह तीनोंप्रवर वाले सब ऋपिभी आपसमें संबन्ध नहीं करते हैं इसके विशेष यहसब ऋपि लौक्षि, गार्ग्यहरि, और गालवि इनतीन प्रवरवाले भी कहेजातेहैं और इन ऋषियोंके अंगिरा १ संकृति २ गौरवीति, ३ यह तीनभी प्रवरहैं इसीप्रकार अंगिरा १ वृहदुक्थ २ वामदेव ३ यहभी तीनप्रवरहैं यह सबभी परस्पर संबन्ध नहीं करते हैं और कुत्सगोत्रमें होनेवाले कुत्सप्रवरवालों से संबन्ध नहीं करते ऐसाप्राचीन ऋपियों ने कहाहै २८। ३२ और रथीतरगोत्रमें होनेवाले ऋषियोंके भी अंगिरा १ विरूप २ और रथीतर ३ यहतीन आर्षेयप्रवरहैं यहभी अपने गोत्रवालों से संबन्धनहीं करते–और विष्णुवृद्धि, शिवमति, जतृण कत्तृण, पुत्रव और वैरपरायण इनसब ऋषियों के भी तीनप्रवरकहेहैं ३३।३५ अंगिरा, मत्स्यदग्ध, और महातपस्वी मुद्गलऋषि ३ यह तीनप्रवरहैं इनतीन प्रवरवालें ऋपियों को भी परस्पर संबन्ध न करनाचाहिये ३६ और हंसजिह्व, देवजिह्व, अग्निजिह्व, विराडप, अपाग्नेय, अश्वयु, परण्यस्तावि, मौद्गल, इनके भी तीनप्रवरहैं अंगिरा, तांडि, मौद्गल्य,

ऋषयःपरिकीर्तिताः। अपाण्डुश्चगुरुश्चैव तृतीयःशाकटायनः ३९ ततःप्रागाथमानारी मार्कण्डोमरणःशिवः। कटुमर्कटपश्चैव तथानाडायनोह्यृषिः ४० श्यामायनस्तथैवैषां त्र्यार्षेयाःप्रवराःशुभाः। अङ्गिराश्चाजमीढश्च कण्वश्चैवमहातपाः ४१ परस्परमवैवाह्या ऋषयःपरिकीर्तिताः। तित्तिरिःकपिभूश्चैव गार्ग्यश्चैवमहानृषिः ४२ त्र्यार्षेयोहिमतस्तेषां सर्वेषांप्रवरःशुभः। अङ्गिरास्तित्तिरिश्चैव कपिभूश्चमहानृषिः ४३ परस्परमवैवाह्या ऋषयःपरिकीर्तिताः। अथऋक्षभरद्वाजौ ऋषिवान्मानवस्तथा ४४ ऋषिर्मैत्रवरश्चैव पञ्चार्षेयाःप्रकीर्तिताः। अङ्गिराःसभरद्वाजस्तथैवचबृहस्पतिः ४५ ऋषिर्मित्रवरश्चैव ऋषिवान्मानवस्तथा। परस्परमवैवाह्या ऋषयःपरिकीर्तिताः ४६ भारद्वाजोहुतःशौङ्गः शैशिरेयस्तथैवच। इत्येतेकथिताःसर्वे द्व्यामुष्यायणगोत्रजाः ४७ पञ्चार्षेयास्तथाह्येषांप्रवराःपरिकीर्तिताः। अङ्गिराश्चभरद्वाजस्तथैवचबृहस्पतिः। मौद्गल्यःशैशिरश्चैवप्रवराःपरिकीर्तिताः ४८ एतेतवोक्ताङ्गिरसस्तुवंशे महानुभावाऋषिगोत्रकाराः। येषान्तु नाम्नापरिकीर्तितेन पापंसमग्रंपुरुषोजहाति ४९ ॥

इतिश्रीमत्स्यपुराणेपञ्चनवत्यधिकशततमोऽध्यायः १९५ ॥

(मत्स्य उवाच) अत्रिवंशसमुत्पन्नान् गोत्रकारान्निबोधमे। कर्दमायनशाखेयास्तथाशारायणाश्चये १ उद्दालकिःशोणकर्णिरथौशौक्रतवश्चये। गौरग्रीवागौरजिनस्तथा चैत्रायणाश्चये २ अर्द्धपण्यावामरथ्या गोपनास्तकिबिन्दवः। कणजिह्वोहरप्रीतिर्नैद्रा

यह तीनप्रवरहैं इन ऋषियोंको भी परस्पर संबन्ध नहीं करना चाहिये और अपांडु, गुरु, शाकटायन, प्रागाथमा स्त्री, मार्कण्ड, मरण, शिव, कटु, मर्कटप, नाडायन और श्यामायन, इन ऋषियों के भी तीनप्रवर कहे हैं, अंगिरा, अजमीढ, और महातप कण्वऋषि ३ यह तीनप्रवर हैं ३७। ४१ इनको भी परस्पर संबन्ध करना अयोग्य है और तित्तिरि, कपिभू, और बड़ेमहात्मा गार्ग्यऋषि यह तीनप्रवर कहे हैं और अंगिरा १ तित्तिर और महान् कपिभूऋषि ३ यहतीनोंभी प्रवरहैं इनकाभी परस्पर संबन्ध अयोग्यहै, ऋक्ष१, भरद्वाज२, ऋषिवान् ३ मानव ४ मैत्रवरऋषि ५ यह पांचभी आर्षेय प्रवर कहाते हैं और अंगिरा १ भरद्वाज २ बृहस्पति ३ मित्रवरऋषि ४ ऋषिवान् ५ और मानव यहसबभी परस्पर संबन्ध नहींकरते ४२। ४६ भरद्वाज हुत, शौंग, शैशिरेय यहसबऋषि द्व्यामुष्यायणगोत्र में उत्पन्नहुएहैं इनके भी पांच आर्षेय प्रवर कहे हैं, अंगिरा १ भरद्वाज २ बृहस्पति ३ मौद्गल्य, ४ और शैशिर यह पांचप्रवरहैं ४७। ४८ हे राजन् यहसब अंगिरागोत्र में होनेवाले महानुभाववाले ऋषियों के गोत्रवर्द्धक ऋषि मैंने तेरेआगे वर्णन किये हैं इनकानाम लेनेवाला पुरुष सबपापोंको दूरकरके सद्गतिकोपाताहै ४९ ॥ इतिश्रीमत्स्यपुराणभाषाटीकायांपंचनवत्यधिकशततमोऽध्यायः १९५ ॥

मत्स्यजीबोले हे राजन् अब अत्रिवंशमें होनेवाले गोत्रचलानेवाले ऋषियोंको मुझसे श्रवणकरो, कार्द्दमायनशाखामें होनेवाले शारायण, १ उद्दालकि, शोण, कर्णिरथ, शौक्रतु, गौरग्रीवा, गौराजिन, चैत्रायण, २ अर्द्धपण्य, वामरथ्य, गोपन, तकिबिन्दु, कणजिह्व, हरप्रीति, नैद्राणि, शाकलायनि, तै-

विजानता १२ कार्यावस्थांचविज्ञाय कार्यमेवयथाभवेत् । सततंक्रियमाणेऽस्मिन् लाघ
वन्तुव्रजेद्ध्रुवम् १३ राज्ञःप्रियाणिवाक्यानि नचात्यर्थंपुनःपुनः । महासुशीलस्तुभवेत्
नचापिभृकुटीमुखः १४ नातिवक्तानानिर्वक्ता नचमात्सारिकस्तथा । आत्मसम्भावितश्चै
व नभवेत्तुकथञ्चन १५ दुष्कृतानिनरेन्द्रस्य नतुसङ्कीर्त्तयेत्क्वचित् । वस्त्रमस्त्रमलङ्कारं
राज्ञादत्तंतुधारयेत् १६ औदार्येणनतद्देयमन्यस्मैभूतिमिच्छता । तत्रैवात्मासनंकार्यंदि
वास्वप्नंनकारयेत् १७ नानिर्दिष्टेतथाद्वारे प्रविशेत्तुकथञ्चन । नचपश्येत्तुराजानमयोग्या
सुचभूमिषु १८ राज्ञस्तुदक्षिणेपार्श्वे वामेचोपविशेत्तदा । पुरस्ताच्चतथापश्चादासनन्तु
विगर्हितम् १९ जृम्भांनिष्ठीवनङ्कासं कोपंपर्यस्तिकाश्रयम् । भृकुटिंवान्तमुद्गारन्तत्समी

यरहै राजाके स्वरूप आदिकी कभी नकल न करे राजाकी लीलानहींकरे राजासे शत्रुता न करे राजा
के समान अथवा राजासे अधिक अपने स्वरूपका बेषनहीं बनावे ६।७ द्यूतपाशे आदिकोंके समयपर
राजाके साथहोकर अपनी चतुराई दिखादेवे और राजाहीको जितादेवै ८ हे राजन् राजाकी स्त्रियों
के महलोंके रहनेवालोंके साथ, शत्रुओंके दूतोंकेसाथ और राजाके निकालेहुए नौकरोंके साथ राजा
की आज्ञाबिना गमन नहीं करे ९ और स्नेहरहित वार्त्ताको तथा राजाके अपमानको गुप्तरक्खे और जो
राजासे गुप्तवार्त्ताहोवे उसको दूसरे मनुष्यके आगे नहीं कहै १० और राजाने जो कोई गुप्तवार्त्ता क-
हदीहो उसको अन्यके आगे नहींकहै और जो किसीके आगे कह देताहै वहराजाका प्रियनहीं रहता
है ११ और राजा अन्य किसी भृत्यको जब आज्ञादेताहो तब आप राजा से कहै कि जो आपकी
आज्ञाहोतो मैं इसकामको करूं और जो कार्य्यकी व्यवस्थाको जानकर निरन्तर कार्य्य करनेवाला
पुरुष राजासे वारंवार पूछताहै वहनिश्चय अविश्वस्थ होजाताहै १२।१३ और जो वचन कि राजा
को प्याराहो उसको भी वारंवार नहीं कहै महासुशील स्वभाव वालारहै कभी भृकुटी न चढ़ावे १४
राजाके आगे विशेष न बोले चुपकाभी न रहै कभी कुटिलता और अहंकार न करे १५राजाके दुष्कृत
कर्मोंको न कहै, राजाके दियेहुए वस्त्र अस्त्र शस्त्र और आभूषणोंको धारण करले अपना कल्याण
चाहनेवाला पुरुष राजाके दियेहुए द्रव्य और किसी प्रकारकी वस्तुको उदारता करके दूसरेको न दे
और जहाँ पहराहोवे उसी स्थानपर अपना आसन रक्खे दिन में सोवे नहीं और ज़हाँ आज्ञा न होवे
ऐसेद्वारमें होकर कभी गमन न करे और अयोग्य स्थानोंमें राजाके दर्शननहींकरे और राजाके दक्षिण
अथवा बाईं ओरको बैठे राजाके आगे और पीछे आसन करना कभी योग्य नहीं है १६।१९ जंभाई
थकना, खांसी, क्रोध, तकिया आदिक आश्रय भ्रकुटि वमन, और डकार, इन सब बातोंको राजाके

पेविन:र्नयेत् २० स्वयंतत्रनकुर्वीत स्वगुणाख्यापनंबुधः । स्वगुणाख्यापनेयुक्ता परमेव
प्रयोजयेत् २१ हृदयंनिर्मलंकृत्वा परांभक्तिमुपाश्रितैः । अनुजीविगणैर्भाव्यं नित्यंराज्ञा
मतन्द्रितैः २२ शाठ्यंलौल्यंचपैशून्यं नास्तिक्यंक्षुद्रतातथा । चापल्यञ्चपरित्याज्यं नित्यं
राज्ञोऽनुजीविभिः २३ श्रुतिविद्यासुशीलैश्च संयोज्यात्मानमात्मना । राजसेवान्ततःकु
र्याद्भूतयेभूतिवर्द्धनीम् २४ नमस्कार्याःसदाचास्य पुत्रवल्लभमन्त्रिणः । सचिवैश्चास्य
विश्वासोनतुकार्यःकथञ्चन २५ अपृष्टश्चास्यनब्रूयात् कामंब्रूयात्तथायदि । हितंतथ्यञ्च
वचनं हितैःसहसुनिश्चितम् २६ चित्तञ्चैवास्यविज्ञेयं नित्यमेवानुजीविना । भर्त्तुराराधनं
कुर्याच्चित्तज्ञोमानवःसुखम् २७ रागापरागौचैवास्य विज्ञेयौभूतिमिच्छता । त्यजेद्विरक्तं
नृपतीरक्तवृत्तिन्तुकारयेत् २८ विरक्तःकारयेन्नाशं विपक्षाभ्युदयंतथा । आशावर्द्धनकं
कृत्वा फलनाशंकरोतिच २९ अकोपोऽपिसकोपाभः प्रसन्नोऽपिचनिष्फलः । वाक्यंचस
मदंवक्ति वृत्तिच्छेदंकरोतिवै ३० प्रदेशवाक्यमुदितो नसम्भावयतेऽन्यथा । आराधनासु
सर्वासु सुप्तवच्चविचेष्टते ३१ कथासुदोषंक्षिपति वाक्यभङ्गंकरोतिच । लक्ष्यतेविमुखश्चै
व गुणसङ्कीर्तनेऽपिच ३२ दृष्टिंक्षिपतिचान्यत्र क्रियमाणेचकर्मणि । विरक्तलक्षणंचैतत्
शृणुरक्तस्यलक्षणम् ३३ दृष्ट्वाप्रसन्नोभवति वाक्यंगृह्णातिचादरात् । कुशलादिपरिप्रश्नं
संप्रयच्छतिचासनम् ३४ विविक्तदर्शनेचास्य रहस्येनंनशङ्कते । जायतेहृष्टवदनःश्रुत्वा

समीप कभी न करे २० अपनी वड़ाई आप न करे अपने गुण किसी अन्यसेही कहलावे २१ राज्य
से आजीविका करनेवाले भृत्यजन अपना हृदय निर्मलकर परमभक्तिपूर्व्वक निरालस्य होकर
राजाकी उपासना करें २२ और चंचलता शठता, चुगली नास्तिकपन और तुच्छ व्यवहार यह सब
सदैव त्यागदेनाचाहिये २३ और वेदविद्या शील स्वभाव इनवातोंसे युक्तहुएभृत्यको अपने ऐश्वर्यकी
वृद्धिके निमित्त राजाकी उत्तम सेवा करनी चाहिये २४ और राजाके पुत्र मित्र और मंत्री इनसबको
नित्य नमस्कार करनाचाहिये राजाके मंत्रीका विश्वास नहीं करनाचाहिये २५ मंत्रीसे विनापूछे कुछ
न बोले जो यह मंत्री हित सत्य और निश्चित वचन कहता होवे तो उसके चित्तको पहचानलेवे फिर
उसके चित्तकी सचाई जानकर सदैव उसका सत्कार करे और उसके कहनेपरचले २६।२७ और जो
विरक्त मंत्री होवे उसको राजा त्यागदेवे और अनुरक्तचित्तके साथ प्रसन्नमनवाले मन्त्रीकोरक्खे २८
विरक्तमंत्री राजाका नाशकरदेताहै और शत्रुकीभी प्राप्तिकरदेताहै एकबार आशाको बढ़ाकरफिर फल
कानाशकरदेताहै २९ विनाहीक्रोधके क्रोधवालेके समानरहताहै प्रसन्नभी निष्फल रहताहै वह मद-
युक्त बातेंकरके राजाकी वृत्तिका छेदन करदेता है ३० और परदेशी अन्यराजाके वाक्यको अच्छे
प्रकारसे नहीं बताताहुआ सम्पूर्ण आराधनके कर्मोंमें राजाकेआगे सोतेहुएके समान चेष्टाकरताहै
राजाकीवार्त्तामें दोषठहराकर वाक्यको भंगकरके उसके गुण कथनकरनेमें विमुख विदित होता है
३१।३२ कार्य्य करनेके समय अन्यत्र चित्तलगावे यह सब विरक्त मंत्रीके लक्षणहैं अब अनुरक्त और
प्रसन्नचित्त होनेवाले मंत्रीके लक्षणोंकोसुनो ३३ कि जो राजाको देखकर प्रसन्नहो आदरसे उसके

तस्यतुतत्कथाम् ३५ अप्रियाण्यपिवाक्यानि तदुक्तान्यभिनन्दते । उपायनञ्चगृह्णाति स्तोकमप्यादरात्तथा ३६ कथान्तरेषुस्मरति प्रहृष्टवदनस्तथा । इतिरक्तस्यकर्तव्या सेवा रविकुलोद्वह! ३७ मित्रंनचापत्सुतथाचभृत्या भजन्तियेनिर्गुणमप्रमेयम् । विभुंविशेषेण चतेव्रजन्ति सुरेन्द्रधामामरवृन्दजुष्टम् ३८ ॥

इतिश्रीमत्स्यपुराणेपञ्चदशाधिकद्विशततमोऽध्यायः २१५ ॥

(मत्स्य उवाच) राजासहायसंयुक्तः प्रभूतयवसेन्धनम् । रम्यमानतसामन्तं मध्यमन्देशमावसेत् १ वैश्यशूद्रजनप्रायमनाहार्यंतथापरैः । किञ्चिद्ब्राह्मणसंयुक्तं बहुकर्मकरन्तथा २ अदैवमातृकंरम्यमनुरक्तजनान्वितम् । करैरापीडितञ्चापि बहुपुष्पफलंतथा ३ अगम्यंपरचक्राणां तद्वासगृहमापदि । समदुःखसुखंराज्ञः सततंप्रियमास्थितम् ४ सरीसृपविहीनञ्च व्याघ्रतस्करवर्जितम् । एवंविधंयथालाभं राजाविषयमावसेत् ५ तत्र दुर्गंनृपःकुर्यात् षण्णामेकतमंबुधः । धनुर्दुर्गंमहीदुर्गं नरदुर्गंतथैवच ६ वार्क्षंचैवाम्बुदुर्गं चगिरिदुर्गंचपार्थिव !। सर्वेषामेवदुर्गाणां गिरिदुर्गंप्रशस्यते ७ दुर्गंचपरिखोपेतं वप्राट्टालकसंयुतम् । शतघ्नीयन्त्रमुख्यैश्च शतशश्चसमावृतम् ८ गोपुरंसकपाटञ्चतत्रस्या

वचनको ग्रहणकरे कुशलआदिक पूछे आसनदेवे एकान्तमें राजाके दर्शनहोनेमें कुछ शंका न करे और राजाकी कहीहुई वार्त्ताको सुनकर प्रसन्नहोजाय ३४।३५ राजाके कहेहुए अप्रियवाक्योंको भी अच्छे बतावे राजाके थोडेसेभी दियेहुए पारतोषिकको आदरसे ग्रहणकरे ३६ अन्यवार्त्ताओंमेंभी राजाकाही स्मरणरक्खे यह अनुरक्त और प्रसन्न मनवाले मंत्रीका लक्षणहै इसमंत्रीकीसेवा सबभृत्योंको करनी चाहिये ३७ जो राजाके भृत्यलोग विपत्तिकालमें मित्रआदि किसीकी सेवानहींकरते हैं और निर्गुणी राजाकीही विशेषकर पूजाकरतेहैं वह देवताओंसे सेवित कियेहुए इन्द्रलोकमें प्राप्त होतेहैं ३८ ॥ इतिश्रीमत्स्यपुराणभाषाटीकायांपंचदशाधिकद्विशततमोऽध्यायः २१५ ॥

मत्स्यजी बोले कि राजाअपनी उत्तमसेनासेयुक्त होके जहां बहुतसी घास और काष्ठादि होवे ऐसे रमणीक मध्यदेशमें अपने निवासके निमित्त क़िला बनवावे वह स्थान ऐसाहो जहां बहुतसे मनुष्य बासकरते हों शत्रुकी गम्य न हो बहुतसे कर्म करनेवाले थोडे ब्राह्मणरहते हों १।२ मनोहर प्रीतिवाले जनोंसे युक्त बहुतसे पुष्पोंसे सुगन्धित जिसमें परायेराज्यके जन न आसक्ते हों ऐसे स्थानमें राजा विपत्तिकालमें वासकरे जहां विपत्तिकालमें राजाको सुख दुख समानहो सर्प बिच्छू सिंहादिक हिंसकजीव और चोरादिक दुष्ट न हों ऐसे प्रकारके देशमें राजा बासकरे ३।५ ऐसेही देशमें राजा अपना क़िला बनवावे क़िला इन छः प्रकारोंका होताहै, धनुषदुर्ग, महीदुर्ग, नरदुर्ग, वृक्षदुर्ग, जलदुर्ग, और गिरिदुर्ग इन छओं प्रकारके क़िलोंमें सबसे उत्तम गिरिदुर्ग कहाहै ६।७ खाही, कोटयुक्त, तोपोंके सैकडों मोरचोंवाला सुन्दर मनोहरद्वार और फाटकवाला दुर्ग होनाचाहिये और द्वारइतनाऊँचा होनाचाहिये कि जिसमें ध्वजासहित हाथीपर बैठाहुआ राजा प्रवेश करसके और उसराजाकी पुरीमें चारचौपडकी सड़क होनीचाहिये एकसड़कके आगे देवताका मन्दिर बनाना चाहिये दूसरीसड़क

त्सुमनोहरम् । सपताकङ्गजारूढो येनराजाविशेत्पुरम् ९ चतस्रश्चतथातत्र कार्यास्त्वा
यतवीथयः । एकस्मिंस्तत्रवीथ्यग्रे देववेश्मभवेद्दृढम् १० वीथ्यग्रेचद्वितीयेच राजवेश्म
विधीयते । धर्माधिकरणंकार्यं वीथ्यग्रेचतृतीयके ११ चतुर्थेत्वथवीथ्यग्रे गोपुरञ्चविधी
यते । आयतञ्चतुरस्रंवा वृत्तंवाकारयेत्पुरम् १२ मुक्तिहीनंत्रिकोणञ्चयवमध्यंतथैवच ।
आयतञ्चतुरस्रंवा वृत्तंवाकारयेत्पुरम् १३ अर्द्धचन्द्रंप्रशंसन्ति नदीतीरेषुतद्वसन् । अ
न्यत्तत्रनकर्तव्यं प्रयत्नेनविजानता १४ राज्ञाकोशगृहंकार्यं दक्षिणेराजवेश्मनः । तस्यापि
दक्षिणेभागे गजस्थानंविधीयते १५ गजानांप्राङ्मुखीशाला कर्तव्यावाप्युदङ्मुखी ।
आग्नेयेचतथाभागे आयुधागारमिष्यते १६ महानसञ्चधर्मज्ञ ! कर्मशालास्तथापराः ।
गृहंपुरोधसःकार्यं वामतोराजवेश्मनः १७ मन्त्रिवेदविदाञ्चैव चिकित्साकर्त्तुरेवच । तत्रै
वचतथाभागे कोष्ठागारंविधीयते १८ गवांस्थानंतथैवात्र तुरगाणांतथैवच । उत्तराभि
मुखाश्रेणी तुरगाणांविधीयते १९ दक्षिणाभिमुखावाथ परिशिष्टास्तुगर्हिताः । तुरगास्ते
तथाधार्याः प्रदीपैःसार्वरात्रिकैः २० कुक्कुटान्वानरांश्चैव मर्कटांश्चविशेषतः । धारयेदश्व
शालासु सवत्सांधेनुमेवच २१ अजाश्चधार्यायत्नेन तुरगाणांहितैषिणा । गोगजाश्वादि
शालासु तत्पुरीषस्यनिर्गमः २२ अस्तंगतेनकर्तव्यो देवदेवेदिवाकरे । तत्रतत्रयथास्था
नं राजाविज्ञायसारथीन् २३ दद्यादावसथस्थानं सर्वेषामनुपूर्वशः । योधानांशिल्पिनां

के आगे राजाके घर होनेचाहिये तीसरी सड़कके आगे न्यायकरनेवाले शास्त्र देखनेवाले मनुष्यों के
स्थान हों और चौथी सड़कके आगे पुरका द्वार होनाचाहिये इसप्रकार राजाके वसनेकापुर लंबाहो
वा चौखूँटाहो अथवा गोलहोवे तो सवसे श्रेष्ठहै अथवा जौके मध्य समान आकारवाला तिखूंटा
किलावनावे ८।१२ और नदी के किनारेपर अर्द्धचन्द्रमाके आकारवाला किलावनाना कहाहै इसके
सिवाय नदी के किनारेपर किसी अन्यप्रकारका किला वनाना योग्यनहीं है राजाको किलेके भीतर
दक्षिणकी ओर खजाना रखना चाहिये और खजानेसे दक्षिण की सीमापर हाथीबांधनेका स्थान
वनाना चाहिये इस गजवंधनशालाका मुख पूर्व अथवा उत्तरकी ओर रखना चाहिये और अग्नि
कोणकी दिशा में शस्त्रोंका मकान वनाना चाहिये १४।१६ और इसी अग्निकोण में रसोई वनाने
का भी स्थानहोना योग्यहै राजाको अपने घरसे बाईंओर को पुरोहितका मकान वनाना चाहिये और
उसीओरको मंत्री,वेदपाठी, विद्वान् और चिकित्साकरनेवाला वैद्य इनसबके स्थान बनाने चाहिये
उसी दिशामें गौओं के और अश्वों के भी स्थान होनेचाहिये घोड़ोंका मुख उत्तरकीओरहो ऐसीपंक्ति
खड़ीरहै १७।१८ अथवा घोड़ोंकामुख दक्षिणहीहो परन्तु उत्तमश्रेष्टघोड़े तो दक्षिणकीओर मुखकरके
कभी खड़े न करने चाहिये और जो संपूर्ण रात्रिमें दीपक के समान लालप्रकाशित होतेरहैं ऐसे
घोड़े रखनेचाहिये १९।२० और घोड़ों की शालामें कुक्कुट,वानर और सवत्सागौ इनसवको रक्खे और
घोड़ोंके हितके निमित्त वकरियां भी रक्खे और हाथी घोड़े और गौ इनकी शालामें लीद तथा गोबर
सूर्य्य अस्तहोनेके पीछे कभी न रक्खे और इन हस्तीआदि पशुओं के समीपमेंही इनके सारथी

चैवसर्वेषामविशेषतः २४ दद्यादावसथांदुर्गे कालमंत्रविदांशुभान्। गोवैद्यानश्ववैद्यांश्च
गजवैद्यांस्तथैवच २५ आहरेतभृशंराजा दुर्गेहिप्रबलारुजः। कुशीलवानांविप्राणां दुर्गे
स्थानंविधीयते २६ नबहूनामतोदुर्गे विनाकार्यंतथाभवेत्। दुर्गेचतत्रकर्तव्या नानाप्रहर
णान्विताः २७ सहस्रघातिनोराजंस्तैस्तुरक्षाविधीयते। दुर्गेद्वाराणिगुप्तानि कार्याण्यपिच
भूभुजा २८ सञ्चयश्चात्रसर्वेषामायुधानांप्रशस्यते। धनुषांक्षेपणीयानान्तोमराणांचपा
र्थिवः २९ शराणामथखड्गानां कवचानांतथैवच। लगुडानांगुडानाञ्चहुडानांपरिघैःसह ३०
अश्मनाञ्चप्रभूतानां मुद्गराणांतथैवच। त्रिशूलानांपट्टिशानां कुठाराणाञ्चपार्थिव ! ३१
प्रासानाञ्चसशूलानां शक्तीनाञ्चनरोत्तमः। परश्वधानांचक्राणांवर्मणाञ्चर्मभिःसह ३२
कुद्दालक्षुरवेत्राणां पीठकानान्तथैवच। तुषाणाञ्चैवदात्राणामङ्गाराणाञ्चसञ्चयः ३३ सर्वे
षांशिल्पिभाण्डानां सञ्चयश्चात्रचेष्यते। वादित्राणाञ्चसर्वेषामौषधीनान्तथैवच ३४
यवसानांप्रभूतानामिन्धनस्यचसञ्चयः। गुड़स्यसर्वतैलानां गोरसानान्तथैवच ३५
वसानामथमज्जानां स्नायुनामस्थिभिःसह। गोचर्मपटहानाञ्च धान्यानांसर्वतस्तथा
३६ तथैवाभ्रपटानाञ्च यवगोधूमयोरपि। रत्नानांसर्ववस्त्राणां लोहानामप्यशेषतः ३७
कलापमुद्गमाषाणाञ्चणकानान्तिलैःसह। तथाचसर्वशस्यानां पांशुगोमययोरपि ३८
शणसर्जरसंभूर्जं जतुलाक्षाचटङ्कणम्। राजासञ्चिनुयाद्दुर्गे यच्चान्यदपिकिञ्चन ३९
कुम्भाश्चाशीविषैःकार्या व्यालासिंहादयस्तथा। मृगाश्चपक्षिणश्चैव रक्ष्यास्तेचपरस्पर
म् ४० स्थानानिचविरुद्धानां सुगुप्तानिपृथक्पृथक्। कर्तव्यानिमहाभाग ! यत्नेनपृथि

और सहीसआदिके भी स्थान वनवादे इनके सिवाय योद्धा अथवा कारीगरोंके भी स्थान वनवावे
काल और मंत्रकेजाननेवाले शुभपुरुष गौ वा अश्वोंकेवैद्य यहसवभी किलेमेंरक्खे और चारणोंकाभी
निवास किलेमेंही रक्खे २१।२६ विना प्रयोजन किलेमें वहुतसे पुरुषोंको नहीं घुसनेदेवे और उसमें
अनेकप्रकारके तोपआदि अस्त्र और शस्त्ररखनेचाहिये हे राजा हजारों मनुष्योंके मारदेनेवाले अस्त्र
शस्त्रोंसे राजाकी रक्षारहतीहै इनवातोंके सिवाय राजाको अपने क़िलेमेंगुप्त दरवाजेभी रखनेचाहिये
२७।२८ और ऐसेक़िलेमें धनुप, तोमर, वरछी, वाण, खड्ग, संजोवा, लाष्टिका, वज्र, मूसल, पत्थरके
भार, मुद्गर, त्रिशूल, गोफ़िया, खांडा, भाला, शूल, शक्ति, फरशा, चैत्र, और कुदाल इत्यादि सवशस्त्र
तैयाररखनेचाहिये और तुष, फूंस, काष्ठ, कोयले आदिक सववस्तुभीरखनी वाहियें संपूर्ण कारीगरोंके
आजार, वाजे, और नानाऔपधीभी तैयाररखनीचाहिये २९।३४ वहुतसी घास, और इंधनआदिका
भी संचयरखनाचाहिये, गुड़ संपूर्ण तेल दूध आदिगोरस वसा मज्जा स्नायु गौकीचर्म ढाल और नगा-
ड़ों के चर्मसंपूर्ण धान्य, रेशमी वस्त्र, जौ, गेंहू, रत्न सब वस्त्र सब प्रकारका लोहा इनसबवस्तुओं का
संचय राजाको क़िलेमें रखनाचाहियं ३५।३७ मोठ, मूंग, उड़द, चने, तिल और सबप्रकारकेधान्य
धूल, गोबर, सन, राल, भोजपत्र, लाख, सुहागा इत्यादिक बस्तुओंकाभी राजा संग्रहरक्खे ३८।३९
घटोंमें सर्प बन्द रक्खेसिंह, मृग और पक्षी आदिक जीवों को भी यत्नपूर्वक पृथक् २ स्थानों में

वीक्षिता ४१ उक्तानिचाप्यनुक्तानि राजद्रव्याण्यशेषतः। सुगुप्तानिपुरेकुर्याज्जनानांहित
काम्यया ४२ जीवकर्षभकाकोलमामलक्याटरूषकान्। शालपर्णीपृष्ठिपर्णी मुद्गपर्णीतथै
वच ४३ माषपर्णीचमेदद्वे सारिवेद्वेवलात्रयम्। श्वशन्तीब्रराव्रस्व्याच वृहतीकण्टका
रिका ४४ शृङ्गीशृङ्गाटकीद्रोणी वर्षाभूर्दर्भरेणुकाः। मधुपर्णीविदार्येद्वे महाक्षीरामहातपाः
४५ धन्वनःसहदेवाह्वा कटुकैरण्डकंविषः। पर्णीशताङ्काम्रृद्वीका ल्फागुखर्जूरयष्टिकाः ४६
शुक्रातिशुककाश्मर्यञ्छत्रातिच्छत्रवीरणाः। इक्षुरिक्षुविकाराश्च फाणिताद्याश्चसत्तम!
४७सिंहीचसहदेवीच विश्वेदेवाश्वरोधकम्। मधुकंपुष्पहंसाख्या शतपुष्पामधूलिका४८
शतावरीमधूकेच पिप्पलन्तालमेवच। आत्मगुप्ताकट्फलाख्या दार्विकाराजशीर्षकी ४९
राजसर्षपधान्याक मृष्यप्रोक्तातथोत्कटा। कालशाकंपद्मवीजं गोवल्लीमधुवल्लिका ५०
शीतपाकीकुवेराक्षी काकजिह्वोरुपुष्पिका। पर्वतत्रपुसौचोभौ गुञ्जातकपुनर्नवे ५१ कसे
रुकारुकाश्मीरी बल्याशालूककेसरम्। तुषधान्यानिसर्वाणि शमीधान्यानिचैवहि ५२
क्षीरंक्षौद्रन्तथातक्रं तैलंमज्जावसाघृतम्। नीपश्चारिष्टकाक्षोड़ वातामसोमब्राणकम्५३
एवमादीनिचान्यानि विज्ञेयोमधुरोगणः। राजासञ्चिनुयात्सर्वं पुरेनिरवशेषतः ५४
दाड़िमाम्रातकौचैव तिन्तिड़ीकाम्लवेतसम्। भव्यकर्कन्धुलकुचकरमर्द्दकरूषकम् ५५
वीजपूरककण्डूरे मालतीराजबन्धुकम्। कोलकद्वयपर्णानि द्वयोरास्नातयोरपि ५६ पा
रावतंनागरकं प्राचीनोत्नकमेवच। कपित्थामलकंचुक्रफलन्दन्तशठस्यच ५७ जाम्ब
वंनवनीतञ्च सौवीरेकरुषोदके। सुरासवञ्चमद्यानि मण्डतक्रदधीनिच ५८ शुक्तानिचैव

रक्खे जोपरस्पर विरोधी जीवहोवें उनकोगुप्तस्थानोंमें रक्खे ४०।४१ इनके विशेपसबकाहित चाहने
वाला राजा कहेहुए अथवा विनाकहेहुए राजसंबन्धी द्रव्यों कोभी यत्नसे रक्षितकरे और जीवक,
ऋषभक, काकोली, आंवले, वांसा, शालपवण, पिठवन, मूंगपर्णी, मापमर्णी, दोनों अनन्तमूल.
तीनों प्रकारकी खरैटी, नेत्रबाला, असगंध, मूंसापर्णी, दोनोंकटेरी, ४२।४४ काकड़ासिगी, शृंगाट
की, द्रोणपुष्पी, सांठी, कुशा, मधुपर्णी, दोनों विदारीकन्द, महाक्षीरा, महातपा, धमासा, सहदेई,
अरंड, विष, सतावरी, मुनक्का,दाख, फालसा, खिजूर, मुलहटी,श्वेतपुष्पी, खंभारी,बड़ीसौंफ, वीर-
णतृण, ईख, अनेक प्रकारके क्वाथ ४५।४७ सिंहपुच्छी, कनेर, महुआ, हंसपुपी, सौंफ, धनुपकी
उपयोगिनी, मोरबेल, बड़ीसतावरी, जलमेंहोनेवालामहुआ, पीपल, तालमखाना- कायफल--दारु-
हल्दी-- राई ४८।४९ गौरीसिरसम, धनियां, कौंच, दालचीनी, कालाशाक, पद्माख, गोवल्ली,
सोमलता, शातीयकी, पाडल, कांवड़ी- उरुपुष्पिका--पत्थर- रांग, चिमिठी- दोनोंप्रकारकी सांठी-
कसेलू- पीलुपर्णी- उड़द आदिशमीधान्य, जवआदिशूकधान्य, नीवारआदि तृणधान्य दूध-- शहद--
तक्र, तैल, मज्जा, वसा, घृत-इत्यादिक वस्तुओंका मधुरगणहै सोइनसबवस्तुओंको राजाअपनेकि-
लेमेंरक्खे ५०।५४ अनार-लिहसौडा-अमली- चूका-वेर-बड़हल-करौंदा-विजौरा दोनोंप्रकारकेकौंच
मालती- राजबन्धुक- लिहसौड़ेकेपत्ते- नागरमोथा-कैथ- आंवला- चूकाकाफल-जंबीरीनींबू- जामन-

सर्वाणिज्ञेयमाम्लगणांद्विज!।एवमादीनिचान्यानि राजा सञ्चिनुयात्पुरे ५९ सैन्धवोद्भि
दपाठेयपाक्यसामुद्रलोमकम्।कुप्यसौवर्चलविडं वालकेयंयवाङ्ककम् ६० और्वेक्षारंका
लभस्म विज्ञेयोलवणोगणः।एवमादीनिचान्यानि राजासञ्चिनुयात्पुरे ६१ पिप्पलीपि
प्पलीमूलचव्यचित्रकनागरम्।कुवेरकंमरिचकंशिग्रुभल्लातसर्षपाः ६२ कुष्ठाजमोदाकि
णिहीहिंगुमूलकधान्यकम्।कारवीकुञ्चिकायाज्या सुमुखाकालमालिका ६३ फणिज्ज
कोथलशुनं भूस्तृणांसुरसन्तथा।कायस्थाचवयस्थाच हरितालंमनःशिला ६४ अमृता
चरुदन्तीच रोहिषंकुंकुमन्तथा।जयाएरण्डकाण्डीरं सल्लकीहञ्जिकातथा ६५ सर्व
पित्तानिमूत्राणि प्रायोहरितकानिच।फलानिचैवहितथा सूक्ष्मैलाहिंगुपत्रिका ६६ एव
मादीनिचान्यानि गणःकटुकसंज्ञितः।राजासञ्चिनुयाद्दुर्गे प्रयत्नेननृपोत्तम ६७ मुस्तञ्च
न्दनह्रीवेरकृतमालकदारवः।दरिद्रानलदोशीरनक्तमालकदम्बकम् ६८ दूर्वापटोलक
टुका दीर्घत्वक्पत्रकंवचा।किराततिक्तभूतुम्वी विषाचातिविषातथा ६९ तालीशपत्रत
गरं सप्तपर्णविकङ्कताः।काकोदुम्बरिकादिव्या तथाचैवसुरोद्भवा ७० षड्ग्रन्थारोहिणी
मांसीपर्पटश्चाथदन्तिका।रसाञ्जनंभृङ्गराजं पतङ्गीपरिपेलवम् ७१ दुःस्पर्शागुरुणी
कामा श्यामाकंगन्धनाकुली।रूपपर्णीव्याघ्रनखं मञ्जिष्ठाचतुरंगुला ७२ रम्भाचैवांकु
रास्फोता तालास्फोताहरेणुका।वेत्राग्रवेतसस्तुम्बी विषाणीलोध्रपुष्पिणी ७३ मालती
करकृष्णाख्या वृश्चिकाजीवितातथा।पर्णिकाचगुडूचीच सगणस्तिक्तसंज्ञकः ७ एव
मादीनिचान्यानि राजासञ्चिनुयात्पुरे।अभयामलकेचोभे तथैवचविभीतकम् ७५ प्रियंगु

नौनीघृत- मदिराके योगकाजल- मदिराकाआसव- मद्य- मांड़- तक्र- दही- और सबप्रकारकीकांजी यह अम्लगण अर्थात् खट्टी वस्तुओंकागण कहाता है इनसब वस्तुओं को राजा अपने पुरमेंरक्खे ५५।५९ सेंधानोन- सांभरिनोन- खारीनोन- समुद्रीनोन-कुओंकेजलसे बनायाहुआनोन-मणियारी-नोन-लालनोन-क्षार- कालभस्म- यहसब लवणगणकहाते हैं-इनसबलवणोंकोभी राजापुरमें रक्खे ६०।६१ और पीपल-पीपलामूल-चव्य-चीता-सोंठ-नादरूपी-मिरच-सहजना-भिलावां-सिरसम ६२ कूट-अजमोद-ओंगा-हींग-मूली-धनियां-सोंफ-अजवाइन-मंजीठ-जंवीर-लहसन-माला के आकारवाला जलतृण-हरड़-हरताल-मनासिल-गिलोय-रुदंती-रोहिपतृण-केशर-अरणी-अरंड-सल्लकी- भारंगी सम्पूर्ण हरेफल-छोटीइलायची-तेजपात-इत्यादिवस्तु कटुकगणहैं इनसबको विशेषकरके राजाअपने किलेमेंरक्खे ६३।६७ नागरमोथा-चन्दन-वालछड़-करंजुवा-हल्दी-विशखश-कदंब-दूब परवल-तेजपात-बच-चिरायता-विषा-अतीस-तालीसपत्र-तगर- सातला,खैर-कालीगूलर-बचारोहिडा-जटामांसी, पटोल-जमालगोटा-रसौत-भंगरा-पतंग-जलमोथा,धमासा-कैम-शामक,मुंगसवेल-रूपपर्णी- व्याघ्रनख-मंजीठ-अमलतास ६८।७२ केला, अंकुरास्फोता, तालास्फोता, रेणुकवीज, वेतकाअग्रभाग, वेत तुंवी, काकड़ासिंगी, लोधपुष्पी, मालती, कलौंजी, पिठवन, जीवन्ती, पर्णिका और गिलोय, यह कटु औषधियोंकागण है इनको राजा अपनेपुरमें संचितरक्खे, और हड़, वहेड़ा, आंवला, माल

धातकीपुष्पं मोचाख्याचार्जुनासनाः । अनन्तास्त्रीतुवरिका स्योनाङ्कट्फलन्तथा ७६
भूर्जपत्रंशिलापत्रं पाटलापत्रलोमकम् । समङ्गात्रिवृतामूल कार्पासगैरिकाञ्जनम् ७७
विद्रुमंसमधूच्छिष्टं कुम्भिकाकुमुदोत्पलम् । न्यग्रोधोदुम्बराश्वत्थ किंशुकाःशिंशुपाश
मी ७८ प्रियालपीलुकासारि शिरीषाःपद्मकन्तथा । विल्वोऽग्निमन्थःप्लक्षश्च श्यामाकञ्च
वकोघनम् ७९ राजादनंकरीरञ्च धान्यकंप्रियकस्तथा। कङ्कोलाशोकबदराः कदम्बखदि
रद्वयम् ८० एषांपत्राणिसाराणि मूलानिकुसुमानिच । एवमादीनिचान्यानि कषायाख्यो
मतोरसः ८१ प्रयत्नेननृपश्रेष्ठ ! राजासञ्चिनुयात्पुरे । कीटाश्चमारणेयोग्या व्यङ्गतायां
तथैवच ८२ वातधूमाश्चमार्गाणां दूषणानितथैवच । धार्याणिपार्थिवैर्दुर्गे तानिवक्ष्यामि
पार्थिव ! ८३ विषाणांधारणंकार्यं प्रयत्नेनमहीभुजा । विचित्राश्चाङ्गदाधार्या विषस्यशम
नास्तथा ८४ रक्षोभूतपिशाचघ्नाः पापघ्नाःपुष्टिवर्धनाः । कलाविदश्चपुरुषाः पुरेधार्याः
प्रयत्नतः ८५ भीतान्प्रमत्तान्कुपितांस्तथैवचविमानितान् । कुभृत्यान्पापशीलांश्च न
राजावासयेत्पुरे ८६ यन्त्रायुधाट्टालचयोपपन्नं समग्रधान्यौषधिसम्प्रयुक्तम् । वणिग्ज
नैश्चवृतमावसेत दुर्गंसुगुप्तंनृपतिःसदैव ८७ ॥

इतिश्रीमत्स्यपुराणेषोडशाधिकद्विशततमोऽध्यायः २१६ ॥

(मनुरुवाच) रक्षोघ्नानिविषघ्नानि यानिधार्याणिभूभुजा । अगदानिसमाचक्ष्व
तानिधर्मभृताम्वर ! १ (मत्स्य उवाच) विल्वाटकीयवक्षारं पाटलावाह्लिकोषणाः । श्री

कांगनी, धायकेफूल, मोचरस, अर्जुनवृक्ष, आसना, अनन्ता, मुल्तानीमट्टी, कायफल, भोजपत्र,शिलाजीत,
पाटलवृक्ष, लोवान, मंजीठ, निशोथ, कपास, गेरू, अंजन, मूंगा, शहद, जलकुंभी, कुमोदिनी,
कमल, बड़, गूलर, पीपल, केशू, सीसम, जाँटी, चिरोंजीकावृक्ष, पीलूवृक्ष, शिरस, पद्माक,
वेलपत्र, अरणी, पिलखन,चिरोंजी,कैर,कंकोल,अशोकवृक्ष,वड़वेर, कदंब, दोनोंखैर,इनवृक्षोंकेपत्ते
गोंद, जड़ और इनके पुष्पोंकेरसको कापाय कहते हैं यह सब औषधिभी राजाको अपनेपुर में यत्न
सेरखनीचाहियें और जिनके विषोंसे शत्रुमरजांय ऐसे कीट और शत्रुओंके मार्गमें विघ्न करने के
निमित्त विषोंकी धूनियांभी अपने पुरमें राजाको रखनीचाहियें- अबराजाके पुरमें धारण करनेवाली
औषधियोंको कहताहूं- ७६।८३ राजाको यत्नपूर्व्वक विषधारण करने चाहियें और विषके शान्तकरनेवाले
कवचपहरनेचाहियें ८४ राक्षस-भूत, पिशाच,और पाप इनसबके नष्टकरनेवाले पुष्टिकेबढ़ाने
वाले चौंसठ कलाओंके ज्ञाता ऐसे पुरुषभी राजाको अपने क़िलेमें रखने चाहियें ८५ और भयभीत
प्रमत्त-क्रोधी-और मानरहित ऐसे भृत्योंको राजा अपने पुरमें न बसनेदे ८६ और यंत्र-आयुध और
अट्टारी आदिसे युक्त हुए संपूर्ण धान्य और औषधियों से युक्त वैश्यजन आदिकों से सेवित ऐसे गुप्त
कियेहुए पुरमें राजा सदैव बासकरे ८७ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांषोडशाधिकद्विशततमोध्यायः २१६ ॥

११ मनुजी पूछते हैं हेदेवदेव राक्षसोंकी नष्ट करनेवाली और विषोंकी हर्त्ता जो औषधी हैं उनसब

पर्णीशल्लकीयुक्तो निक्काथःप्रोक्षणंपरम् २ सविषंप्रोक्षितंतेन सद्योभवतिनिर्विषम्। यव
सैन्धवपानीय वस्त्रशय्यासनोदकम् ३ कवचाभरणंछत्रं बालव्यजनवेश्मनाम्। शेलुःपा
टलातिविषा शिग्रुमूर्वापुनर्नवा ४ समङ्गावृषमूलञ्च कपित्थवृषशोणितम्। महादन्तशठ
न्तद्वत्प्रोक्षणंविषनाशनम् ५ लाक्षाप्रियंगुमाञ्जिष्ठा सममेलाहरेणुका। यष्ट्याह्वामधुराचैव
बभ्रुपित्तेनकल्पिताः ६ निखनेद्गोविषाणस्थं सप्तरात्रंमहीतले। ततःकृत्वामणिंहेम्ना बद्धं
हस्तेनधारयेत् ७ संस्पृष्टंसविषन्तेन सद्योभवतिनिर्विषम्। मनोह्वयाशमीपत्रं तुम्बिकाश्वे
तसर्षपाः ८ कपित्थकुष्ठमाञ्जिष्ठाः पित्तेनश्लक्ष्णकल्पिताः। शुनोगोःकपिलायाश्च सौ
म्याक्षिप्तोऽपरोगदः ९ विषजित्परमंकार्यं मणिरत्नञ्चपूर्ववत्। मूषिकाजतुकाचापि हस्तेब
द्धाविषापहा १० हरेणुमांसीमञ्जिष्ठा रजनीमधुकामधु। अक्षत्वक्सुरसंलाक्षा श्वपित्तं
पूर्ववद्भुवि ११ वादित्राणिपताकाश्च पिष्टैरेतैःप्रलेपिताः। श्रुत्वादृष्ट्वासमाघ्राय सद्योभ
वतिनिर्विषः १२ त्र्युषणंपञ्चलवणं मञ्जिष्ठारजनीद्वयम्। सूक्ष्मैलात्रिवृतापत्रं विडङ्गा
नीन्द्रवारुणी १३ मधुकंवेतसंक्षौद्रं विषाणेचनिधापयेत्। तस्मादुष्णाम्बुनामात्रं प्रागु
क्तंयोजयेत्ततः १४ शुक्लंसर्जरसोपेत सर्षपाएलवालुकैः १५ सुवेगातस्करसुरौ कुसुमै

को आप बर्णन कीजिये १ मत्स्यजी बोले—विल्वाटकी-जवाखार-पाडलवृक्ष-हींग—पीपल-सालवन-
शल्लकी इन सबका क्काथबनाके उसके जलसे विषवाली बस्तु शीघ्रही विषरहित होजाती है और
जवाखार-सेंधानिमक और पीछे कहीहुई औषधि इन सबके पानीसे वस्त्र शय्या, आसन, कवच,
आभूषण-छत्र और चंवर इन सबको छिडक देने से लगाहुआ विष दूर होजाताहै और ल्हसोडा-पाड-
लवृक्ष-अतीस-सहजना-मुर्वा सांटीकीजड और चूका इन सबके भी क्काथके जल छिड़कने से विषका
नाश होजाताहै २।५ लाख,मालकांगनी, मंजीठ, इलायची, रेणुकबीज, मुलहटी, सौंफ इनसबको
नौलेके पित्तेसे भावनादे महीन पीस गौके घृतमें डालकर सातदिन तक पृथ्वी में गाड़ रक्खे फिर
सुवर्णके जड़ावसे मणि बनवावे उसमें उस औषधिको लगवाले और उस आभूषणको हाथमें धारण
रक्खे वह आभूषण जिस विषकी वस्तुको स्पर्शकरेगा उसका विष दूर होजायगा और मनशिल,जां-
टीकेपत्ते, श्वेततुंबी, सिरसम, कैथ, कूट और मंजीठ इन सबको कुत्तेके पित्तेमें बारीकपीस कपिला
गौके सींगमें भरकर पृथ्वीमें गाड़देवे इसकोभी पूर्वके समान मणि रत्नादि आभूषणोंमें धारणरक्खे
यह संपूर्ण बिषोंकी हरनेवाली है और मूपिका तथा चामचिराई इन दोनोंजीवोंको जो हाथमें रक्खै
तो विषका नाशहोताहै ६।१० रेणुकबीज, जटामांसी, मंजीठ, हल्दी, मुलहटी, शहद, बहेड़ेकीछाल,
मुंगसबेल और लाख इन सबको भी कुत्तेके पित्तेमें पीसकर गोकै सींगमेंभरके पृथ्वीमें गाड़देवे फिर
इस औषधिको नक्कारे आदिक बाजोंपर लीपदेवे और ध्वजाओंके लगादेवे फिर इनबाजों के शब्द
सुनने से और ध्वजादिके देखने और सूंघने से बिषवाले पुरुषका विष दूर होजाताहै ११।१२ और
सोंठि--मिरच--पीपरि, पांचोंनोन---मंजीठ--दोनोंहल्दी--छोटीइलायची--निशोत--तेजपात--वायवि-
ड़ंग-इन्द्रायण-मुलहटी और वेत इनसबकोपीस शहदमेंमिला सींगमें भरकर धरे फिर इस औषधि

रर्जुनस्यतु । धूपोवासगृहेहन्ति विषंस्थावरजङ्गमम् १६ नतत्रकीटानविषन्दर्दुरानसरीसृपाः । नकृत्याकर्मणाञ्चापि धूपोऽयंयत्रदह्यते १७ कल्पितैश्चन्दनक्षीर पलाशद्रुमवल्कलैः । मूर्वैलावालुसरसा नाकुलीतण्डुलीयकैः १८ क्वाथःसर्वोदकार्येषु काकमाचीयुतोहितः । रोचनापत्रनेपाली कुंकुमैस्तिलकान्वहन् १९ विषैर्नबाध्यतेस्याच्च नरनारीन्नृपप्रियः । चूर्णैर्हरिद्रामञ्जिष्ठा किणिहीकणनिम्बजैः २० दिग्धंनिर्विषतामेति गात्रंसर्वविषार्दितम् ! शिरीषस्यफलंपत्रं पुष्पंत्वङ्मूलमेवच २१ गोमूत्रघृष्टोह्यगदः सर्वकर्मकरः स्मृतः । एकवीर ! महौषध्यः शृणुचातःपरंनृप ! २२ बन्ध्याकर्कोटकीराजन् ! विष्णुक्रान्तातथोत्कटा । शतमूलीसितानन्दा बलामोचापटोलिका २३ सोमापिण्डानिशाचैव तथादग्धरुहाचया । स्थलेकमलिनीयाच विशालीशङ्खमूलिका २४ चण्डालीहस्तिमगधा गोऽजापर्णीकरम्भिका । रक्ताचैवमहारक्ता तथावर्हिशिखाचया २५ कोशातकीनक्तमालं प्रियालञ्चसुलोचनी । वारुणीवसुगन्धाच तथावैगन्धनाकुली २६ ईश्वरीशिवगन्धाच श्यामलावंशनालिका । जतुकालीमहाश्वेताश्वेताचमधुयष्टिका २७ वज्रकःपारिभद्रश्च तथावैसिन्धुवारकाः । जीवानन्दावसुच्छिद्रा नतनागरकण्टका २८ नालञ्चजालीजातीच तथाचवटपत्रिका । कार्तस्वरंमहानीला कुन्दुरुर्हंसपादिका २९ मण्डूकपर्णी वाराही द्वेतथातण्डुलीयके । सर्पाक्षीलवलीब्राह्मी विश्वरूपासुखाकरा ३० रुजापहोद्ट

को गरमजलसे मिलाकर छिड़कदेनेसे विपका नाशहोताहै १३।१४ अर्जुन वृक्षकीछाल-राल-सिरसम-एलुआ-सुहागा-गठौना-अर्जुनवृक्षकेफूल इनसबकी घरमें धूपदेनेसे सब स्थावर और जंगम विषों का नाशहोजाताहै १५।१६ उसघरमें कीट नहींरहते हैं विपनहींरहता है मेढक-सांप-बिच्छूआदिक जीवनहींरहतेहैं इसके सिवाय जिसकेघरमें यह धूपदीजाती है वहाँ घायल-मूंठ और प्रेतआदिकका भी प्रभाव नहींरहताहै और बटआदिक दूधकेवृक्षोंकी छाल- मूर्वा-एलुआ-सिरस-नाकुली अर्थात् मुंगसवेल-चौलाई-मकोह इनसबका क्वाथबना जलमें छिड़कने से जलमें मिलाहुआ विष दूरहोजाताहै और गोरोचन–तेजपात–पाठा–केशर–तिलकपुष्पी वृक्षकीछाल इनकोपीस शरीर के लगानेसे विपनष्टहोताहै अथवा हल्दी मजीठ-ऊंगा-निंबौली-इनसबकोपीस विपसे विपभरे शररिके लगाने से शरीरका संपूर्ण विपदूरहोजाताहै और सिरसके फल- फूल- पत्ते छाल और जड़ इनसबको गोमूत्रमें पीस शरीरके लगानेसे विप दूरहोजाताहै-अबमहान् औषधिको कहतेहैं १७।२२ हे राजा बांझ ककोड़ी- विष्णुक्रान्ता- दालचीनी- शतावरि- धायटी-खरेहटी- मोचरस- परवल-सोमवल्ली- हल्दी-भूंड- स्थलकमलनी-इन्द्रायण-शंखमूलिका- गठौना-गजपीपरि-गोभी- करंभिका- लाजावन्ती- महा लाजावन्ती- मोरशिखा- कोशातकी-करंजुआ- चिरोंजी वृक्ष-वंशलोचन- वारुणीमदिरा- दीर्घ मुंगसवेल-भूमिआंवली- शिवगन्धा- नील- बांसकीनाली- जतुकाली- श्वेता-महाश्वेता- मुलहटी- थोहर-नींब- संभालू- जीवन्ती- तगर- सोंठि- कटेहली- २३।२८ कमलनाली- सातला- वटपत्री- चोख महानीला- पालक- हंसपादिका- मंजीठ- बाराहीकन्द-चौलाई सर्पाक्षी- ब्राह्मी- विश्वरूपा- कुटकी

द्धिकरी तथाचैवतुशल्यदा । पत्रिकारोहिणीचैव रक्तमालामहौषधी ३१ तथामलकव
न्दाकं श्यामचित्रफलाचया । काकोलीक्षीरकाकोली पीलुपर्णीतथैवच ३२ केशिनीवृ
श्चिकालीच महानागाशतावरी । गरुडीचतथावेगा जलेकुमुदिनीतथा ३३ स्थलेचो
त्पलिनीयाच महाभूमिलताचया । उन्मादिनीसोमराजी सर्वरत्नानिपार्थिव ! ३४ विशे
षान्मरकतादीनि कीटपक्षंविशेषतः । जीवजाताश्चमणयः सर्वेधार्याप्रयत्नतः ३५ रक्षो
घ्नाश्चविषघ्नाश्च कृत्यावेतालनाशनाः । विशेषान्नरनागाश्च गोखरोष्ट्रसमुद्भवाः ३६
सर्पतित्तिरगोमायु बस्तमएडकजाश्चये । सिंहव्याघ्रर्क्षमार्जार द्वीपिवानरसंभवाः । कपि
ञ्जलागजावाजि महिषैणभवाश्चये ३७ इत्येवमेतैःसकलैरुपेतन्द्रव्यैश्चसर्वैःस्वपुरं
सुरक्षितम् । राजावसेत्तत्रगृहंसुशुभ्रंगुणान्वितंलक्षणसंप्रयुक्तम् ३८ ॥

इतिश्रीमत्स्यपुराणेसप्तदशाधिकद्विशततमोऽध्यायः २१७ ॥

(मनुरुवाच) राजरक्षारहस्यानि यानिदुर्गेनिधापयेत् । कारयेद्वामहीभर्ता ब्रूहित
त्वानितानिच १ (मत्स्यउवाच) शिरीषोदुम्बरशमीबीजपूरंघृतप्लुतम् । क्षयुद्योगःकथि
तोराजन् ! मासार्द्धंतुपुरातनैः २ कशेरुफलमूलानि इक्षुमूलंतथाबिसम् । दूर्वाक्षीरघृतै
र्मण्डः सिद्धोऽयंमासिकःपरः ३ नरंशस्त्रहतंप्राप्तो नतस्यमरणंभवेत् । कल्माषवेणुनातत्र
जनयेत्तुविभावसुम्४ गृहेत्रिरपसव्यन्तु क्रियतेयत्रपार्थिव! । नान्योऽग्निर्ज्वलतेतत्र नात्र
कार्याविचारणा ५ कार्पासास्थ्नाभुजङ्गस्य तेननिर्मोचनंभवेत् । सर्पनिर्वासनेधूपःप्रशस्तः

वृद्धजावित्री- रोहिड़ा- सोंठि- अमरवेल- त्रिफला-काकोली-क्षीर काकोली- पीलुपर्णी- सहस्तरूंगी-
क्रौंच- गंगेरन- शतावरी- गरुडी- जलकुमोदनी- स्थलकमलनी- महाभूमि- आंवला- उन्मादिनी
सोमलता- यहसबऔषधी और संपूर्ण प्रकारकेरत्न- मरकतमणि- जीवजातियोंकीमणि- यहसबवस्तु
राजाको यत्नकरके धारण करनीचाहिये २९ । ३५ यह सब वस्तु तथा नर हस्ती गौ- गधा और
ऊँट इन्होंकीमणि राजाको विशेषकरके धारण करनी चाहिये और सर्प- तीतर- गीदड़- सिंह- व्याघ्र-
रीछ- बिलाव- गैंड़ा- बानर- कपोत- घोड़ा- भैंसा- हिरण इन्हों से उत्पन्नहुए रत्नभी राजाको धा-
रण करना चाहिये ३६ । ३७ इन सब वस्तुओं से रक्षित कियेहुए अपने पुर में राजा अपना
महासुन्दर और रमणीक उत्तम लक्षणोंसे युक्त स्थान बनाकर उसमें निवास करे ३८ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांसप्तदशाधिकद्विशततमोऽध्यायः २१७ ॥

मनुजीने पूछा हेप्रभो राजाको अपने किलेमें जिन २ वस्तुओंकी गुप्तरक्षा करनी योग्यहै उन
सब वस्तुओंको भी आप यथार्थ रीतिसे वर्णन कीजिये १ मत्स्यजी बोले हेराजा सिरस–गूलर और
जांटी इनके फलोंको घृतमें पकाके पन्द्रह दिवस खाय यहक्षुतयोग कहाताहै २ कसेरूके फल और
मलईखकी जड़--ज़िमीकन्द--कमलकन्द और दूब इन सबको दूध अथवा घृतमें सिद्धकरके एकमहीने
तक भक्षणकरे यह एकमासका परम योग कहाताहै इस योगके करनेसे शस्त्रसे कटाहुआ पुरुषनहीं
मरताहै और जिस स्थानपर कालेबाँसोंको जलादे उसस्थानपर निस्सन्देह दूसरीअग्निनहींजलतीहै

सततंगृहे ६ सामुद्रसैन्धवयवा विद्युद्दग्धाचमृत्तिका । तयानुलिप्तंयद्वेश्म नाग्निना
दह्यतेनृप ! ७ दिवाचदुर्गेरक्ष्योऽग्निर्वातिवातेविशेषतः । विषाच्चरक्ष्योनृपतिस्तत्रयुक्तिं
निबोधमे ८ क्रीड़ानिमित्तंनृपतिर्धारयेन्मृगपक्षिणः । अन्नंवैप्राक्परीक्षेत वह्नौचाप्यन्यतरेषु
च ९ वस्त्रंपुष्पमलङ्कारं भोजनाच्छादनंतथा । नापरीक्षितपूर्वन्तु स्पृशेदपिमहामतिः १०
स्याच्चासौवक्त्रसन्तप्तः सोद्वेगश्चनिरीक्षते । विषदोऽथविषंदत्तं यच्चतत्रपरीक्षते ११ स्रस्तो
त्तरीयोविमनाः स्तम्भकुड्यादिभिस्तथा । प्रच्छादयतिचात्मानं लज्जतेत्वरतेतथा १२
भुवंविलिखतिग्रीवां.तथाचालयतेनृप ! । कण्डूयतिचमूर्द्धानं परिलोड्याननन्तथा १३
क्रियासुत्वरितोराजन् ! विपरीतास्वपिध्रुवम् । एवमादीनिचिह्नानि विषदस्यपरीक्षयेत्
१४ समीपेर्विक्षिपेद्वह्नौ तदन्नंत्वरयान्वितैः । इन्द्रायुधसवर्णन्तु रूक्षंस्फोटसमन्वितम् १५
एकावर्तन्तुदुर्गन्धि भृशञ्चटचटायते । तद्धूमसेवनाज्जन्तोः शिरोरोगश्चजायते १६ स
विषेऽन्नेविलीयन्ते नचपार्थिव ! मक्षिकाः । निलीनाश्चविपद्यन्ते संस्पृष्टेसविषेतथा १७
विरज्यतिचकोरस्य दृष्टिःपार्थिवसत्तम ! । विकृतिञ्चस्वरोयाति कोकिलस्यतथानृप ! १८
गतिस्खलतिहंसस्य भृङ्गराजश्चकूजति । क्रौञ्चोमदमथाभ्येति कृकवाकुर्विरौतिच १९
विक्रोशतिशुकोराजन् ! सारिकावमतेततः । चामीकरोऽन्यतोयाति मृत्युंकारण्डवस्तथा
२० मेहतेवानरोराजन् ! ग्लायतेजीवजीवकः । हृष्टरोमाभवेद्बभ्रुः पृषतश्चैवरोदिति २१

है बिनौलोंकी अग्निमें सर्पकी काँचली जलाकर उसकी धूप देनेसे घरके सब सर्प चलेजातेहैं--और
सांभर निमक सेंधानिमक--जवाखार और बिजलीसे जलीहुई मृत्तिका इन सबसे जो घरको लिपवावे
वह घर अग्निसे नहीं जलसक्ताहै--जबकि दिनमें अत्यन्त वायु चलतीहो उससमय किलेमें अग्निकी
रक्षा करनी चाहिये---अब विषसे राजाकी रक्षाकरनेकी युक्ति वर्णन करताहूं राजाको क्रीड़ाके निमित्त
मृग और पक्षी भी रखने चाहिये प्रथम अग्निमें अथवा अन्यत्रही अन्नकी परीक्षा करनी चाहिये
वस्त्र पुष्प--आभूषण और भोजन इन सबकी परीक्षा किये बिना राजा स्पर्श भी इनका न करे
राजाके विष देनेवाले पुरुषका.मुख लाल और उद्वेग संयुक्त दीखताहै यही उसकी परीक्षाहै ११
दुपट्टा गिरपड़े--उन्मना होजाय--क्रोधादिसे युक्तहोजाय अपने शरीरको छुपावे--लज्जाकरे १२ पृथ्वी
को कुरेदने लगजाय--गर्दन हिलानेलगे--मुखमसलने लगजाय मस्तकको खुजाने लगजाय और
सब कामोंमें शीघ्रता करने लगजाय यह सब लक्षण विषदेनेवाले पुरुषके होतेहैं १३। १४ विषवाले
अन्नको अग्निमें डाले अगर वह अन्न शीघ्रतासे इन्द्रधनुषके समान विचित्र वर्णहोके दुर्गन्धितहो
बारंबार चट २ शब्द करे और उसके धुएंसे मनुष्यके शिरमें दर्द होजाय तो विषयुक्त जानो-विषवाले
अन्नपर मक्खी नहीं बैठतीहै जो कदाचित् बैठ भी जाय तो तत्काल मरजातीहै १५। १७
विषवाले अन्नके देखनेसे चकोरकी दृष्टि लीन होजातीहै कोकिलाका स्वर बिगड़जाताहै १८ हंसकी
गति बिगड़ती, भौंरे गुंजारने लगते, कूंज पक्षी मदोन्मत्त होजाते--और मुर्गावियां चिल्लाने लगजाती
हैं १९ हे राजन् तोता पुकारने--सारिकावमनकरने--कारंडवपक्षी विषदेखतेही मरजाताहै--बन्दर

हर्षमायातिचशिखी बिषसन्दर्शनान्नृप !। अन्नञ्चसविषंराजंश्चिरेणचविपद्यते २२ त
दांभवतिनिःश्राव्यं पक्षपर्युषितोपमम्। व्यापन्नरसगन्धश्च चन्द्रिकाभिस्तथायुतम् २३
व्यञ्जनानान्तुशुष्कत्वं द्रवाणांबुद्बुदोद्भवः।ससैन्धवानांद्रव्याणां जायतेफेनमालिता २४
सस्यराजिश्चताम्रास्यात् नीलाचपयसस्तथा । कोकिलाभाचमद्यस्य तोयस्यचनृपोत्त
म ! २५ धान्याम्लस्यतथाकृष्णा कपिलाकोद्रवस्यच । मधुश्यामाचतक्रस्य नीलापीता
तथैवच २६ घृतस्योदकसङ्काशा कपोताभाचसक्तनुः । हरितामाक्षिकस्यापि तैलस्यच
तथारुणा २७ फलानामप्यपक्वानां पाकःक्षिप्रंप्रजायते । प्रकोपश्चैवपक्वानां माल्यानां
म्लानतातथा २८ मृदुताकठिनानांस्यात् मृदूनांचविपर्ययः । सूक्ष्माणांरूपदलनं तथा
चैवातिरंगता २९ श्याममण्डलताचैव वस्त्राणांवैतथैवच । लोहानांचमणीनांच मलप
ङ्कोपदिग्धता ३० अनुलेपनगन्धानां माल्यानाञ्चनृपोत्तम !। विगन्धताचविज्ञेया तथ
राजन् ! जलस्यतु ३१ दन्तकाष्ठत्वचःश्यामास्तनुसत्वास्तथैवच । एवमादीनिचिह्नानि
विज्ञेयानिनृपोत्तम ३२ तस्माद्राजासदातिष्ठेत् मणिमन्त्रौषधांगणैः। उक्तैःसंरक्षितोराजा
प्रमादपरिवर्जकः ३३ प्रजातरोर्मूलमिहावनीशस्तद्रक्षणाद्राष्ट्रमुपैतिवृद्धिम्। तस्मात्प्रय
त्नेननृपस्यरक्षा सर्वेणकार्यारविवंशचन्द्र ! ३४ ॥

इतिश्रीमत्स्यपुराणेऽष्टादशाधिकद्विशततमोऽध्यायः २१८ ॥

मूतने लगजाताहै--जीवजीवक पक्षी ग्लानियुक्त होजाताहै--नौलेके रोम खड़ेहोजाते हैं--मोर विषको
देखकर प्रसन्नहोजाताहै--और विषवाला अन्न थोड़ेही कालमें पन्द्रह दिनकेवासी अन्नकेसमान बिगड़
जाताहै दुर्गन्ध होजातीहै तार छुटने लगतेहैं २० । २३ शाक तो विषयुक्त होनेसे सूखजाते हैं
पतले भोजनों में बुलबुले उत्पन्न होजाते हैं और विषयुक्त सेंधव निमकवाले भोजनमें झाग
उठाकरतेहैं २४ अन्न लालहोजाताहै, दूध नीला होजाताहै, मदिराका रंग कोकिला के रंग
समान होजाताहै और जलका भी कोकिलाही के समान रंग होजाताहै २५ और धान्य की
काँजीकाली होजाती है--कोदो धान्यकी काँजी कपिलरंगकी और तक्र काला नीला अथवा पीत
वर्णका होजाताहै २६ घृत जलके समान दीखताहै और अच्छे शरीरकारंग कपोतके सदृशहोजाता
है--मक्खीका हरितवर्ण--तेल लालवर्ण और कच्चे फल विषके योगसे शीघ्रही पकजाते हैं--पके हुए
फलशीघ्र गलजाते हैं पुष्प मुरझा जाते हैं--कठोर फल विष के योगसे कोमल होजाता है--कोमल
फल बिगड़ जातेहैं--सूक्ष्म फलों का रूप नष्ट होजाताहै २७ । २९ बिष लगे हुए बस्त्रों में काले
मंडल और चकत्तेसे होजातेहैं और लोहे और मणियोंके मलकी कीचसी लिपीहुई दीखने लगजातीहै
२० हेराजा चन्दन--पुष्प और जल इनमें बिष लगने से बुरीगन्धि होजातीहै--दांतन के बिष
लगनेसे उसकी त्वचा काली होजातीहै हेराजा यहसब चिह्न बिषके कहेहैं ३१ । ३२ इसहेतुसे राजा
को मणिमन्त्र औषधि और इनसब कही हुई बस्तुओं से युक्तहो प्रमादसे रहितहोकर अपने पुरमें

(मत्स्यउवाच) राजन् ! पुत्रस्यरक्षाच कर्तव्यापृथिवीक्षिता । आचार्यश्चात्रकर्त
व्यो नित्ययुक्तश्चरक्षिभिः १ धर्मकामार्थशास्त्राणि धनुर्वेदञ्चशिक्षयेत् । रथेचकुंजरेचैनं
व्यायामङ्कारयेत्सदा २ शिल्पानिशिक्षयेच्चैनं नाप्तोमिथ्याप्रियंवदेत् । शरीररक्षाव्याजेन
रक्षिणोऽस्यनियोजयेत् ३ नचास्यसङ्गोदातव्यः क्रुद्धलुब्धावमानितैः । तथाचविनयेदेनं
यथायौवनगोचरे ४ इन्द्रियैर्नापकृष्येत सतांमार्गात्सुदुर्गमात् । गुणाधानमशक्यन्तु यस्य
कर्तुंस्वभावयः ५ बन्धनंतस्यकर्तव्यं गुप्तदेशेसुखान्वितम् । अविनीतकुमारंहि कुलमाशु
विशीर्यते ६ अधिकारेषुसर्वेषु विनीतंविनियोजयेत् । आदौस्वल्पेततःपश्चात् क्रमेणार्थ
महत्स्वपि ७ मृगयापानमक्षांश्च वर्जयेत्पृथिवीपतिः । एतान्येसेवमानास्तु विनष्टाःपृ
थिवीक्षितः ८ बहवोनरशार्दूल ! तेषांसङ्ख्यानविद्यते । दिवास्वापंक्षितीशस्तु विशेषेण
विवर्जयेत् ९ वाक्पारुष्यंनकर्तव्यंदण्डपारुष्यमेवच । परोक्षनिन्दाचतथावर्जनीया मही
क्षिता १० अर्थस्यदूषणंराजाद्विप्रकारंविवर्जयेत् । अर्थानांदूषणंचैकंतथार्थेषुचदूषणम्
११ प्रकाराणांसमुच्छेदो दुर्गादीनामसत्क्रिया । अर्थानांदूषणंप्रोक्तं विप्रकीर्णत्वमेवच
१२ अदेशकालेयद्दानमपात्रेदानमेवच । अर्थेषुदूषणंप्रोक्तमसत्कर्मप्रवर्तनम् १३ कामः

वास करना चाहिये ३३ प्रजारूपी वृक्षकी जड़ राजाहै राजाकी रक्षाहोनेसे संपूर्ण देशभरकी वृद्धि होतीहै इसहेतुसे सब लोगों को राजाकीरक्षा करना चाहिये ३४ ॥

इति श्रीमत्स्यपुराणभाषाटीकायामष्टादशाधिकद्विशततमोऽध्यायः २१८ ॥

मत्स्यजी बोले—हेराजन् राजाको पुत्रकीरक्षा करनी चाहिये अर्थात् गौरव बढ़ानेको पुत्रकीरक्षाके निमित्त बहुतसे भृत्य रखने चाहिये १ और धर्म काम और अर्थ के शास्त्र, धनुष विद्या, रथहाथी और घोड़े की सवारी सिखाकर २ शिल्पविद्या को पढ़ावे पुत्रके आगे कभी प्रिय मिथ्या बातनकरे उसके शरीर की रक्षा करनेके बहाने से इसकी रक्षा करने वाले जन ऐसे रखने चाहियें ३ जो क्रोधी–लोभी और निरादर वाले नहों क्योंकि लोभी क्रोधी और निरादरवाले पुरुषोंके संग तो कभी बैठने भी नदे यह सब लोग उसको विनय सिखावें और तरुण अवस्था होनेपर उसको विषयादि भोगोंसे न रोंकें परन्तु श्रेष्ठ पुरुषोंकेही मार्ग में रक्खें जिस पुत्र को सबगुण न आसकें उसको एकान्त में बैठाके सुखपूर्वक सब गुण सिखवावे क्योंकि विना नीति वाले राजकुमारका कुलशीघ्रही नष्ट होजाताहै नीतिमें निपुण होने वाले राजकुमारों को राजा सब कामोंमें नियुक्तकर दे प्रथम तो स्वल्प अधिकारमें नियुक्त करे फिरक्रम २ से सब अधिकारोंमें नियुक्त करदेवे ४ । ७ राजाकुमारों को शिकार खेलनेसे मदिरा पीनेसे और द्यूत खेलनेसे निषेध करदे क्योंकि इनतीनों बातोंके करनेवाले बहुतसे राजा नष्टहोगयेहैं हेराजा उनबहुतसे नष्टहुए राजाओंकी संख्या असंख्यहै इसके विशेष दिनके सोने को भी राजा निषेध करदे ८ । ९ राजा कभी कठोर वचन न बोले कठोर दंड न दे पीठ पीछे किसीकी निन्दानकरे राजा आगेके दोप्रकारके अर्थ दोषोंका निषेध करदे पहलादोष यहहै कि खाईंको तुड़वाना और सब द्रव्यों की पर तालन करना कोईकाम देश और कालके बिना

क्रोधोमदोमानो लोभोहर्षस्तथैवच । एतेवर्ज्याःप्रयत्नेन सादरंपृथिवीक्षिता १४ एतेषां
विजयंकृत्वा कार्योभृत्यजयस्ततः । कृत्वाभृत्यजयंराजा पौरान्जानपदान्जयेत् १५
कृत्वाचविजयन्तेषां शत्रून्बाह्यांस्ततोजयेत् । बाह्याश्चविविधाज्ञेयास्तुल्याभ्यन्तरकृ-
त्रिमाः १६ गुरवस्तेयथापूर्वा तेषुयत्नपरोभवेत् । पितृपैतामहंमित्रमामित्रञ्चतथारिपोः
१७ कृत्रिमञ्चमहाभाग ! मित्रंत्रिविधमुच्यते । तथापिचगुरुःपूर्वंभवेत्तत्रापिचाहृतः १८
स्वाम्यमात्योजनपदो दुर्गंदण्डस्तथैवच । कोशोमित्रञ्चधर्मज्ञ ! सप्तांगंराज्यमुच्यते १९
सप्तांगस्यापिराज्यस्य मूलंस्वामीप्रकीर्तितः । तन्मूलत्वात्तथांगानां सतुरक्ष्यःप्रयत्नतः
२० षडंगरक्षाकर्त्तव्या तथातेनप्रयत्नतः । अंगेभ्योयस्तथैकस्तु द्रोहमाचरतेऽल्पधीः
२१ बन्धस्तस्यतुकर्त्तव्यः शीघ्रमेवमहीक्षिता । नराज्ञामृदुनाभाव्यं मृदुर्हिपरिभूयते २२
नभाव्यंदारुणेनातितीक्ष्णादुद्विजतेजनः । कालेमृदुर्योभवति कालेभवतिदारुणः २३
राजालोकद्वयापेक्षी तस्यलोकद्वयंभवेत् । भृत्यैःसहमहीपालः परिहासंविवर्जयेत् २४
भृत्याःपरिभवन्तीह नृपंहर्षवशंगतम् । व्यसनानिचसर्वाणि भूपतिःपरिवर्जयेत् २५
लोकसंग्रहणार्थाय कृतकव्यसनीभवेत् । शौण्डीरस्यनरेन्द्रस्य नित्यमुद्रिक्तचेतसः २६
जनाविरागमायान्ति सदादुःसेव्यभावतः । स्मितपूर्वाभिभाषीस्यात् सर्वस्यैवमहीपतिः २७

विचारे न करना चाहिये और अन्यराजा को दानभेट देना और असत्कर्मोंकी प्रवृत्तिकरनी यहदूसरा दूषणहै १० । १३ काम–क्रोध–मद अभिमान–लोभ और हर्ष इन सबको राजा यत्न पूर्व्वक न रहनेदे प्रथम इन सबको अपने वश में करके अर्थात् विजय करके अपने भृत्यों को वशमेंकरनायोग्य है इसके पीछेअपने देशपुरआदिको वशकरे फिर आगेलिखेहुए इनकईशत्रुओंको जीते वे शत्रुतुल्य अभ्यन्तर–और कृत्रिम आदिक अनेकप्रकारकेहैं १४।१६ इनमें उत्तरोत्तर बलवान् शत्रुहैंइनसबोंमें यत्न पूर्व्वक रहनाचाहिये अपनेपिता और पितामहका मित्र, शत्रुकाशत्रु–और कृत्रिममित्र–यहतीनप्रकारके मित्रहोतेहैं–इनतीनोंमेंभी पूर्व्वके मित्र अधिकहैं १७।१८ और राजा मन्त्री, देश, किला, दंड, खजाना, और मित्र यह सात राज्यके अंगहोतेहैं १९ इनसातों अंगवाले राज्यकामूल स्वामी राजाहोताहै इसलिये विशेषकरके राजाकी रक्षा करनी चाहिये और राजाको भी अपने छः अंगोंकी रक्षाकरनी चाहिये और जो मन्दबुद्धी मनुष्य राजाके इन छः अंगों से द्रोह करें उसको राजा शीघ्रही क़ैदमें करे राजा को कोमल और सरल स्वभाव न होना चाहिये कोमल स्वभाव वाले राजाका तिरस्कार होताहै और जिससे प्रजा बहुतसी भयभीत हो ऐसे उग्र तीक्ष्ण और दारुण स्वरूप से भी नहीं रहना चाहिये और जो कामपर कभी सरल और कभी दारुण हो जाताहै ऐसे राजाके यहलोक औरपरलोक दोनों बने रहते हैं और राजाको अपने भृत्यों के साथ कभी हास्य न करना चाहिये २० । २४ क्योंकि हर्ष के वशमें होजाने वाले राजा का भृत्यजन तिरस्कार करदेतेहैं इसके सिवाय राजा सब व्यसनों को त्यागदे परन्तु लोकों के संग्रह करने के निमित्त व्यसन करना भी योग्यहै मद वाले अभिमानी राजाके राज्य में वसने वाले सब जन प्रीति वाले नहीं रहते हैं इस हेतुसे राजा को सबसे हास्य

बध्येष्वपिमहाभाग ! भ्रूकुटिंनसमाचरेत् । भाव्यंधर्मभृतांश्रेष्ठ ! स्थूललक्ष्येणभूभु
जा २८ स्थूललक्ष्यस्यवशगा सर्वाभवतिमेदिनी । अदीर्घसूत्रश्चभवेत् सर्वकर्मसुपा
र्थिवः २९ दीर्घसूत्रस्यनृपतेः कर्महानिर्ध्रुवम्भवेत् । रागेदर्पेचमानेच द्रोहेपापेचकर्मणि
३० अप्रियेचैवकर्तव्ये दीर्घसूत्रः प्रशस्यते । राज्ञासंवृतमन्त्रेण सदाभाव्यंनृपोत्तम !
३१ तस्यासंवृतमन्त्रस्यराज्ञः सर्वापदोध्रुवम् । कृतान्येवतुकार्याणिज्ञायन्तेयस्यभूपतेः ३२
नारब्धानिमहाभाग! तस्यस्याद्वसुधावशे । मन्त्रमूलंसदाराज्यं तस्मान्मत्रस्सुरक्षितः ३३
कर्तव्यः पृथिवीपालैर्मन्त्रभेदभयात्सदा । मन्त्रवित्साधितोमन्त्रः सम्पत्तीनांसुखावहः ३४
मन्त्रच्छलेनबहवो विनष्टाः पृथिवीक्षितः । आकारैरिंगितैर्गत्या चेष्टयाभाषितेनच ३५
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतंमनः । नयस्यकुशलैस्तस्य वशेसर्वावसुन्धरा ३६
भवतीहमहीपाले सदापार्थिवनन्दन ! । नैकस्तुमन्त्रयेन्मन्त्रं राजानबहुभिःसह ३७
नारोहेद्विषमांनावमपरीक्षितनाविकाम् । येचास्यभूमिजयिनो भवेयुःपरिपन्थिनः ३८
तानानयेद्वशेसर्वान् सामादिभिरुपक्रमैः । यथानस्यात्कृशीभावः प्रजानामनवेक्षया ३९
तथाराज्ञाप्रकर्तव्यं स्वराष्ट्रंपरिरक्षता । मोहाद्राजास्वराष्ट्रंयः कर्षयत्यनवेक्षया ४० सोऽ
चिराद्भ्रश्यते राज्याज्जीविताच्चसबान्धवः । भृतोवत्सोजातबलः कर्मयोग्योयथाभवेत्

पूर्वक वात करना अयोग्यहै २६ । २७ और जो मारने के योग्य होंय उन अपराधी पुरुषों परभी राजा को भृकुटी नहीं चढ़ानी चाहिये राजाको सदैव स्थूल लक्षणोंसे युक्त रहना चाहिये २८ स्थूल लक्षणोंसे रहने वाले राजाके वशमें संपूर्ण प्रजा होजाती हैं राजाको संपूर्ण कामों में आलस्यनहीं करना चाहिये और जो अप्रिय कर्त्तव्य हो उसमें राजा को दीर्घ सूत्रीही रहना चाहिये और राजा को अपनीसलाह सदैव गुप्तरखनी चाहिये जो राजा अपनी सलाह को प्रकटकरदेता है उसको अवश्यही विपत्ति प्राप्तहोजातीहै और जिस राजाके कर्मके आरंभको कोई नहींजानता और कर्म के सिद्धहोजानेहीपर सब जानतेहैं उसराजाके बशमें संपूर्णपृथ्वी होजातीहै राज्य सदैव मंत्रमूलवाला है इसहेतुसे सदैव मंत्रकी रक्षाकरनीचाहिये २९।३३ राजाओंको मन्त्र अर्थात् सलाहके भेदकेभय से मन्त्रवेत्ता पुरुषोंके द्वारा अपने मन्त्रको सिद्धकरलेनाचाहिये ऐसे करनेवाले राजाकामन्त्र सम्पत्तियोंके सुखका देनेवाला होताहै ३४ मन्त्रके छलहोनेसे पूर्व्वके बहुतसे राजा नष्टहोगयेहैं, आकार चिह्न- गमन- चेष्टा- और बोलना इत्यादिसे तथा नेत्र मुखके बिकारकरके भीतरका मन पहचाना जाता है और नीतिमें निपुणरहनेवाले राजाके वशमें सम्पूर्ण पृथ्वी रहती है राजाको नतो केवल एकही मनुष्यकेसंग और न बहुतसेही मनुष्यों के संग सलाहकरनी चाहिये और विनाजाने पहचाननेवाले मल्लाहकी विषम नौकामेंभी राजाको कभी न बैठनाचाहिये और जो इस पृथ्वीजीतने वाले राजाको मार्गमें कोई लूटनेकोआवे तो उन लुटेरेपुरुषोंको राजा सामआदिक उपायोंसे शान्त करे और जिसरीतिसे प्रजाको खेदनहो वही व्यवहारकरना योग्यहै ३५।३९ राजाको अपने राज्य में सबप्रजाको सुखदेना योग्यहै, जोराजा अपनी प्रजाको अज्ञानसे दुःखदेताहै वह राजा अपने सब

४१ तथाराष्ट्रंमहाभाग ! भृतंकर्मसहम्भवेत् । योराष्ट्रमनुगृह्णाति राज्यंसपरिरक्षति
४२ सञ्जातमुपजीवेत्तु विन्दतेसमहत्फलम् । गृह्याद्धिरण्यंधान्यञ्चमहींराजासुरक्षितां
४३महतातुप्रयत्नेन स्वराष्ट्रस्यचरक्षिता । नित्यंस्वेभ्यःपरेभ्यश्च यथामातायथापिता४४
गोपितानिसदाकुर्यात् संयतानीन्द्रियाणिच । अजस्रमुपयोक्तव्यं फलन्तेभ्यस्तथैवच४५
सर्वंकर्मेदमायत्तं विधानेदैवमानुषे । तयोर्दैवमचिन्त्यञ्चपौरुषेविद्यतेक्रिया४६ एवंमहीं
पालयतोऽस्यभर्तुर्लोकानुरागः परमोभवेत्तु । लोकानुरागप्रभवाचलक्ष्मीर्लक्ष्मीवतश्चापि
पराचलक्ष्मीः ४७॥ इतिश्रीमत्स्यपुराणेएकोनविंशत्यधिकद्विशततमोऽध्यायः २१९॥

(मनुरुवाच) दैवेपुरुषकारेच किंज्यायस्तद्ब्रवीहिमे । अत्रमेसंशयोदेव ! च्छेत्तुमर्हस्यशेषतः
१ (मत्स्यउवाच) स्वमेवकर्मदैवाख्यं विद्धिदेहान्तरार्जितम् । तस्मात्पौरुष
मेवेह श्रेष्ठमाहुर्मनीषिणः २ प्रतिकूलन्तथादैवं पौरुषेणविहन्यते । मङ्गलाचारयुक्तानां
नित्यमुत्थानशालिनाम् ३ येषांपूर्वकृतंकर्म सात्विकंमनुजोत्तम ! । पौरुषेणविनातेषां के
षांचिद्दृश्यतेफलम् ४ कर्मणाप्राप्यतेलोके राजसस्यतथाफलम् । कृच्छ्रेणकर्मणाविद्धि
तामसस्यतथाफलम् ५ पौरुषेणाप्यतेराजन् ! प्रार्थितव्यंफलंनरैः । दैवमेवविजानन्ति
नराःपौरुषवर्जिताः ६ तस्मात्त्रिकालसंयुक्तं दैवन्तुसफलंभवेत् । पौरुषंदैवसम्पत्त्या का

वन्धुगणोंसमेत शीघ्र नष्टहोजाताहै जैसे कि पालाहुआ वछडा भारआदिके कर्मकरनेके योग्यहोताहै इसीप्रकार पालनकियाहुआ राज्य कर्मके सहनेकेयोग्य होजाताहै, जोराजा अपने राज्यके लोगोंपर अनुग्रहकरताहै उसीकाराज्य रहताहै और वही बड़े२ फलोंकोभोगताहै, राजा अपने रक्षितकियेहुए राज्यमेंसे माता पिताकेसमान सरलहोकर प्रतिदिन धन धान्य सुवर्ण और पृथ्वी इनसबको ग्रहण करे और अन्यराज्य के पुरुषों से सदैव कररूपी दान लियाकरे ४०।४४ और राजाको अपनी सब इन्द्रियांभी वशमें करनीचाहिये अर्थात् उन इन्द्रियोंसे निरन्तर फलभोगतारहे इसप्रकारसे पुरुषार्थ करना योग्यहै ऐसे बिधिपूर्वक पुरुषार्थकरनेवाले राजापर सबलोगोंकी प्रीतिरहतीहै और सबप्रजा की प्रसन्नतासे राजाके धन लक्ष्मी बढ़ती है फिर अन्यराजाकीभी लक्ष्मी प्राप्तहोजातीहै ४५।४७॥

इति श्रीमत्स्यपुराणभाषाटीकायामेकोनविंशत्यधिकद्विशततमोऽध्यायः २१९ ॥

मनुजीनेपूछा हेप्रभो भाग्य और पुरुषार्थ इनदोनों में कौनवड़ा और श्रेष्ठ है इस मेरे सन्देहको आप दूरकीजिये १ मत्स्यजीबोले- पहलेजन्ममें कियेहुए अपनेही कर्मको दैव तथा भाग्य कहते हैं इसहेतुसे बुद्धिमान्लोगोंने पुरुषार्थही को श्रेष्ठकहा है २ प्रतिदिन मंगलाचरण आदि सत्कर्म और पुरुषार्थकरनेवाले पुरुषका प्रतिकूलदैवभी अनुकूलहोजाताहै ३ हेमनुजोत्तम जिन्हों ने पूर्वजन्म में सतोगुणसंयुक्त सत्कर्मकियाहै उनको पुरुषार्थ कियेविनाही कुछफल प्राप्तहोकर दीखताहै ४ रजोगुण युक्त कर्मकरनेवालोंको कर्मकरनेसे फलमिलताहै और जिन्होंने तमोगुणके कर्मकियेहैं उनको कष्ट से फलप्राप्तहोताहै, हेराजा मनुष्योंको पुरुषार्थकरनेसे मनोवांछितफल प्राप्तहोजाताहै और जोपुरुष पुरुषार्थकरनेमें समर्थ नहींहोते हैं वह केवल दैवहीको प्रधान जानते हैं ५।६ इसहेतुसे त्रिकालसे

लेफलतिपार्थिव ! ७ दैवंपुरुषकारश्च कालश्चपुरुषोत्तम ! । त्रयमेतन्मनुष्यस्य पिण्डि
तंस्यात्फलावहम् ८ कृष्टिवृष्टिसमायोगा दृश्यन्तेफलसिद्धयः । तास्तुकालेप्रदृश्यन्ते नै
वाकालेकथञ्चन ९ तस्मात्सदैवकर्तव्यं सधर्मंपौरुषंनरैः । विपत्तावपियस्येह परलोकेध्रु
वंफलम् १० नालसाःप्राप्नुवन्त्यर्थान् नचदैवपरायणाः । तस्मात्सर्वप्रयत्नेन आचरेद्धर्म
मुत्तमम् ११ त्यक्त्वालसान्दैवपरान् मनुष्यानुत्थानयुक्तान्पुरुषान्हिलक्ष्मीः । अन्विष्य
यत्नाद्वृणुयान्नृपेन्द्र ! तस्मात्सदोत्थानवताहिभाव्यम् १२ ॥

इतिश्रीमत्स्यपुराणेविंशत्यधिकद्विशततमोऽध्यायः २२० ॥

(मनुरुवाच) उपायांस्त्वंसमाचक्ष्व सामपूर्वान्महाद्युते ! लक्षणञ्चतथातेषां प्रयो
गंचसुरोत्तम ! १ (मत्स्यउवाच) सामभेदस्तथादानदण्डश्चमनुजेश्वर ! । उपेक्षाचत
थामाया इन्द्रजालंचपार्थिव ! २ प्रयोगाःकथिताःसप्त तन्मेनिगदतःशृणु । द्विविधंकथि
तंसाम तथ्यञ्चातथ्यमेवच ३ तत्राप्यतथ्यंसाधूना माक्रोशायैवजायते । तत्रसाधुःप्रयत्ने
न सामसाध्योनरोत्तम ! ४ महाकुलीनाऋजवो धर्मनित्याजितेन्द्रियाः । सामसाध्यानचा
तथ्यन्तेषुसामप्रयोजयेत् ५ तथ्यंसामचकर्तव्यं कुलशीलादिवर्णनम् । तथातदुपचारा
णां कृतानांचैववर्णनम् ६ अनयैवतथायुक्त्या कृतज्ञाख्यापनंस्वकम् । एवंसाम्नाचकर्त
व्या वशगाधर्मतत्पराः ७ साम्नायद्यपिरक्षांसि गृह्णन्तीतिपराश्रुतिः । तथाप्येतदसाधू

युक्तहुआ दैव सफलहोताहै और पुरुपार्थतो दैवयोगसे कभी अपने समयमेंभी सफलहोताहै, हेमनु
इस मनुष्यके दैव-पुरुपार्थ और काल यह तीनोंपदार्थ इकट्ठेहोके फलदायक होतेहैं ७। ८ खेतियों की
सिद्धि वर्षाके योगसे दीखतीहै वहतो अपने समयपरही सिद्धिदीखती है क्योंकि विनासमयके कभी
फल फूल नहीं दीखताहै ९ इसकारण मनुष्यको सदैव धर्मसहित पुरुपार्थ करनाचाहिये धर्मसहित
पुरुपार्थकरनेवाले पुरुषोंको विपत्तिकालमेंभी पारलौकिकफल मिलताहै १० आलसी तथा दैवकी
वाट देखनेवाले पुरुप कभीभी मनोरथके फलको प्राप्त नहींहोतेहैं इसनिमित्त यत्नकरके उत्तम धर्म
का आचरण करनाचाहिये ११ दैवके आधीनरहनेवाले आलसी पुरुषोंको त्यागकर उद्योगीपुरुषोंको
ढूंढ २ कर लक्ष्मी वरलेतीहै इसलिये सदैव उद्योगी रहना चाहिये १२ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांविंशत्यधिकद्विशततमोऽध्यायः २२० ॥

मनुजी बोले हे देव देव आप साम आदिक सब उपायों का वर्णन कीजिये और उनसब उपा-
योंके लक्षण भी कहिये १ मत्स्यजीबोले साम--भेद--दान--दण्ड--उपेक्षा--माया--और इन्द्रजालविद्या
यह सात प्रयोग अर्थात् उपाय राजाको करने कहे हैं इनमें से साम सत्यसाम और असत्यसाम
इन दो प्रकारोंका है २ । ३ यह असत्यसाम साधु पुरुषोंसे कभी न कहे क्योंकि श्रेष्ठ साधु पुरुष
तो सत्य साम उपायसेही सिद्ध होतेहैं--अच्छे कुलीन सुन्दर प्रकृतिके कृतज्ञ राजाओं के कुलकी
प्रशंसाकरे और अपने कियेहुए कर्म को उनसेकहै ऐसे साम उपायोंसे तो धर्मज्ञ राजाओंको अपने
वशमेंकरे ४ । ७ क्योंकि साम उपायों से सब बश में होजाते हैं यह परम श्रुतिहै परन्तु ऐसाहोने

नां प्रयुक्तंनोपकारकम् ८ अतिशङ्कितमित्येवं पुरुषंसामवादिनम् । असाधवोविजान
न्ति तस्मात्तत्तेषुवर्जयेत् ९ येशुद्धवंशाऋजवःप्रणीता धर्मेस्थिताःसत्यपराविनीताः। ते
षामसाध्याःपुरुषाःप्रदिष्टा मानोन्नतायेसततञ्चराजन्! १० ॥

इतिश्रीमत्स्यपुराणेएकविंशत्यधिकद्विशततमोऽध्यायः २२१ ॥

(मत्स्यउवाच) परस्परन्तुयेदुष्टाः क्रुद्धाभीतावमानिताः। तेषांभेदंप्रयुंजीत भेदसा
ध्याहितेमताः १ येतुयेनैवदोषेण परस्मान्नापिबिभ्यति । तेतुतद्दोषपातेन भेदनीयाभृश
न्ततः २ आत्मीयांदर्शयेदाशां परस्माद्दर्शयेद्भयम्। एवंहिभेदयेद्भिन्नान् यथावद्वशमान
येत् ३ संहताहिविनाभेदं शक्रेणापिसुदुःसहाः। भेदमेवप्रशंसन्ति तस्मान्नयविशारदाः
४ स्वमुखेनाश्रयेद्भेदम्भेदम्परमुखेनच। परीक्ष्यसाधुमन्येत भेदंपरमुखाच्छ्रुतम् ५ सद्यः
स्वकार्यमुद्दिश्य कुशलैर्येहिभेदिताः। भेदितास्तेविनिर्दिष्टा नैवराज्ञार्थवादिभिः ६ अन्तः
कोपोबहिःकोपो यत्रस्यातांमहीक्षिताम्। अन्तःकोपोमहांस्तत्र नाशकःपृथिवीक्षिताम्
७ साम्नानकोपोबाह्यस्तु कोपःप्रोक्तोमहीभृतः। महिषीयुवराजभ्यां तथासेनापतेर्नृप! ८
अमात्यमन्त्रिणाञ्चैव राजपुत्रेतथैवच। अन्तःकोपोविनिर्दिष्टो दारुणःपृथिवीक्षितात् ९

पर भी दुष्ट पुरुषोंके साथ साम उपाय नहीं करना चाहिये वह असाधु दुष्ट पुरुष सामवादी राजा
को भयभीत मानते हैं इस निमित्त उनसे कभी साम उपाय न करे ८। ९ हे राजन् शुद्धवंशमेंहोने
वाले सरल--धर्मरत–और सत्यवक्ता होते हैं ऐसे पुरुषों से अभिमानी और दुष्टजन कभी प्रसन्ननहीं
होते हैं १० ॥

इतिश्रीमत्स्यपुराणभाषाटीकायामेकविंशत्यधिकद्विशततमोऽध्यायः २२१ ॥

मत्स्यजीबोले-जोमनुष्य परस्परमें दुष्ट-क्रोधी और अभिमानीहों उनमें भेद उपाय करना चाहिये
क्योंकि वहलोग भेद अर्थात् आपसकी फूटकरने सेही जीते जासक्तेहैं १ जो पुरुष जिस दोषकरके
परजनोंसे नहींडरतेहैं उनके ऊपर वहीदोष लगाकर उनमें परस्पर फूटकरवा देनीचाहिये २ उनको
अपनी ओरकी आशा दिखावे और पर पुरुषोंसे भय दिखवावे इसप्रकारके अन्य पुरुषोंके भेद करने से
वह पुरुष यथार्थ रीतिसे वशमें होजातेहैं ३ और जो कदाचित् कईराजा आपसमें इकट्ठे होरहेहों
तो उनकी परस्परमें फूटहुए बिना एकराजा कभी उनको नहीं जीतसक्ता है इस निमित्त उनके
जीतनेके निमित्त नीतिज्ञ पुरुषोंने भेदकाही उपाय उत्तम कहाहै–परन्तु भेद उपाय अपने मुखसे
नहीं करे अन्य जनोंके मुखसे करवावे क्योंकि वहलोग अन्यों के मुखसे कहेहुए भेद उपायोंकोसुन
कर अच्छा जानलेतेहैं ४।५ जो भेदकिये हुए पुरुष अपनेही कार्य्य का उद्देशकरतेहों अर्थात् अपना
ही प्रयोजन सिद्ध करने वालेहों वह भेद करवाने वाले राजा को श्रेष्ठ न समझने चाहिये ६ जिन
राजाओंके बाहर तथा भीतर क्रोधहो उनदोनोंमें भीतर क्रोधवाले राजाओंका बड़ानाश होताहै, जो
साम उपायसे शान्त होजाय वह राजाका बाहरी क्रोध कहाता है और रानी राजकुमार-सेनापति-
मन्त्री--और राजपुत्री इनके क्रोधसे जो राजाको क्रोध उत्पन्न होताहै वह भीतरका क्रोध कहलाता

शुद्धान्तस्तुमहाभाग ! शीघ्रमेवजयीभवेत् १०
बाह्यकोपेसमुत्पन्ने सुमहत्यपिपार्थिवः । शुद्धान्तस्तुमहाभाग ! शीघ्रमेवजयीभवेत् १०
अपिशक्रसमोराजा अन्तःकोपेननश्यति । सोऽन्तःकोपःप्रयत्नेन तस्माद्रक्ष्योमहीभृता
११ परतःकोपमुत्पाद्य भेदेनविजिगीषुणा । ज्ञातीनांभेदनंकार्यं परेषांविजिगीषुणा १२
रक्ष्यश्चैवप्रयत्नेन ज्ञातिभेदस्तथात्मनः । ज्ञातयःपरितप्यन्ते सततंपरितापिताः १३ त
थापितेषांकर्तव्यं सुगम्भीरेणचेतसा । ग्रहणंदानमानाभ्यां भेदस्तेभ्योभयङ्करः १४ न
ज्ञातिमनुगृह्णन्ति नज्ञातिंवैश्वसन्तिच । ज्ञातिभिर्भेदनीयास्तु रिपवस्तेनपार्थिवैः १५
भिन्नाहिशक्यारिपवःप्रभूताः स्वल्पेनसैन्येननिहन्तुमाजौ । सुसंहतानांहितदस्तुभेदः का
र्योरिपूणांनयशास्त्रविद्भिः १६ ॥

इतिश्रीमत्स्यपुराणेद्वाविंशत्यधिकद्विशततमोऽध्यायः २२२ ॥

(मत्स्यउवाच) सर्वेषामप्युपायानां दानंश्रेष्ठतमंमतम् । सुदत्तेनेहभवति दानेनोभय
लोकजित् १ नसोऽस्तिराजन् ! दानेनवशगोयोनजायते । दानेनवशगादेवाभवन्तीह
सदानृणाम् २ दानमेवोपजीवन्ति प्रजाःसर्वानृपोत्तम ! । प्रियोहिदानवान्लोके सर्वस्यै
वोपजायते ३ दानवानचिरेणैव तथाराजापरान्जयेत् । दानवानेवशक्नोति. संहतान्भेदितुंपरान्
४यद्यप्यलुब्धगम्भीराः पुरुषाःसागरोपमाः । नगृह्णन्तितथाप्येते जायन्तेप
क्षपातिनः ५ अन्यत्रापिकृतंदानं करोत्यन्यान्यथावशे । उपायेभ्यःप्रशंसन्ति दानंश्रेष्ठतमं

हे हे महाभाग राजाका बाहरी क्रोध जो बहुत अधिकभी होजाय तौ भी शुद्ध अन्तःकरणवाले राजा
की शीघ्र विजय होती है ७ । १० और भीतरका क्रोधकरनेवाला इन्द्र के समान भी राजा होकर
नष्टहोजाताहै इस निमित्त वह भीतरका क्रोध बहुत यत्नकरके रक्षित करना चाहिये ११ भेदउपायसे
अन्योंके जीतनेकी इच्छाकरनेवाले राजाको उन अन्य राजाओंके ज्ञाति बन्धुकी परस्पर फूटकरवानी
चाहिये १२ परन्तु अपनेज्ञाति बन्धुओंका भेद बड़ेयत्नोंसे न होनेदे क्योंकि दुःखितहुए बन्धुजनराजा
ओंको दुःखितकरदेते हैं इसनिमित्त दान मानकरके उनको अपनेमें संयुक्तरक्खे उनकी फूटहोने से
राजाको भयहोताहै १३।१४ बुद्धिमान् राजा शत्रुओंके बन्धुंजनोंको फूटकरवाकर शत्रुकोजीते १५
परस्परमें भेद फूटवाले प्रबल शत्रुभी थोड़ीहीसेनासे नष्टहोजाते हैं इसहेतुसे इकट्ठेहुये शत्रुओं का
भेद करनाही योग्यहै १६ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांद्वाविंशत्यधिकद्विशततमोऽध्यायः २२२ ॥

मत्स्यजीबोले- हेराजन् सब उपायोंमें दान उपाय श्रेष्ठहै अच्छीभेट देनेसे दोनोंलोकोंकी विजय
होतीहै १ ऐसा कोई नहींहै जो दानकरके वशमें नहींहोय दानकरनेसे देवताभी मनुष्यों के वशमें
होजातेहैं २ सबप्रजाका उपकार दानहीसे होताहै दानदेनेवाला पुरुष सबलोकोंका प्रिय होता है ३
दानवाला राजा शीघ्रही सबराजाओंको जीतलेताहै दान और भेटदेनेवाला राजा बहुतसे इकट्ठेहुए
शत्रुओंकोभी निश्चय जीतलेताहै- लोभरहित समुद्रके समान गंभीरपुरुष कभी भेट दानादिक नहीं
लेतेहैं परन्तु ऐसेलोगभी उस दानीराजाके पक्षपाती होजातेहैं ४।५ और अन्यत्र दियेहुएदान और

जनाः ६ दानंश्रेयस्करंपुंसां दानंश्रेष्ठतमंपरम् । दानवानेवलोकेषु पुत्रत्वेध्रियतेसदा७न केवलंदानपराजयन्ति भूलोकमेकंपुरुषप्रवीराः । जयन्तितेराजसुरेन्द्रलोकं सुदुर्जयंयोविबुधाधिवासः ८॥ इतिश्रीमत्स्यपुराणेत्रयोविंशत्यधिकद्विशततमोऽध्यायः २२३ ॥

(मत्स्यउवाच) नशक्यायेवशेकर्तुमुपायत्रितयेनतु । दण्डेनतान्वशीकुर्यात् दण्डोहिवशाकृन्नृणाम् १ सम्यक्प्रणयनंतस्य तथाकार्यंमहीक्षिता । धर्मशास्त्रानुसारेण ससहायेन धीमता २ तस्यसम्यक्प्रणयनं तथाकार्यंमहीक्षिता । वानप्रस्थांश्चधर्मज्ञान्निर्ममान्निष्प्यरिग्रहान् ३ स्वदेशेपरदेशेवा धर्मशास्त्रविशारदान् । समीक्ष्यप्रणयेद्दण्डं सर्वंदण्डेप्रतिष्ठितम् ४ आश्रमीयदिवावर्णी पूज्योवाथगुरुर्महान् । नादण्ड्योनामराज्ञोऽस्ति यःस्वधर्मेन तिष्ठति ५ अदण्ड्यान्दण्डयेद्राजा दण्ड्यांश्चैवाप्यदण्डयन् । इहराज्यात्परिभ्रष्टो नरकञ्च प्रपद्यते ६ तस्माद्राज्ञाविनीतेन धर्मशास्त्रानुसारतः । दण्डप्रणयनंकार्यं लोकानुग्रहकाम्यया ७ यत्रश्यामोलोहिताक्षो दण्डश्चरतिनिर्भयः । प्रजास्तत्रनमुह्यन्ति नेताचेत्साधु पश्यति ८ बालवृद्धातुरयति द्विजस्त्रीविधवायतः । मात्स्यन्यायेनभक्ष्येरन् यदिदण्डंन पातयेत् ९ देवदैत्योरगगणाः सर्वेभूतपतत्रिणः । उत्क्रामयेयुर्मर्यादां यदिदण्डंनपातयेत् १० एषब्रह्माभिशापेषु सर्वप्रहरणेषुच । सर्वविक्रमकोपेषु व्यवसायेचतिष्ठति ११ पूज्य

भेंटभी अन्यलोगोंको वशमें करलेतीहैं सबउपायोंमें दान उपाय श्रेष्ठहै लोकमें सदैव दानवालेही उत्तम कहातेहैं हेराजेन्द्र दानीराजा केवल इसी भूलोकको नहीं जीतलेते हैं किन्तु देवताओंके वास वाले उत्तम इन्द्रलोकको भी जीतलेतेहैं ६।८ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांत्रयोविंशत्यधिकद्विशततमोऽध्यायः २२३ ॥

मत्स्यजीबोले इन पिछले कहेहुए तीन उपायोंकरके जो वशमें न होसके उसको राजा दंडदेकर वशीभूतकरे दंड सबको वशमें करनेवालाहै १ अपने सहायकोंसे युक्तहोकर राजा धर्मशास्त्र के अनुसार सबको दंडदेके वशमेंकरे अपनेदेशमें और परदेशमें सबको पहचानकर नीतिशास्त्रके अनुसार दंडदेवे क्योंकि दंडमें सबवस्तु स्थितरहतीहैं और ममतारहित वानप्रस्थ आश्रममें रहनेवाले महात्माजनोंको देख२कर सबकोदंडदेवे आश्रमवाले तथा विनाआश्रमवाले पूज्य- महान् और गुरु इन सबोंमें जोकोई अपनेधर्मसे चलायमानहोजावे उसीको राजादंडदेवे ऐसा कोईनहीं है जिसकोराजा दंड न देसके और जोराजा दंडदेनेके अयोग्य पुरुषोंको दंडदेताहै और दंडके योग्योंकोनहीं दंडदेताहै वह इसलोकमें राज्यसे भ्रष्टहोजाताहै और अन्तमें मरकर नरकमें प्राप्त होताहै २।६ इस निमित्त लोकके अनुग्रहकेलिये राजा धर्मशास्त्र और नीतिशास्त्रके अनुसार सबकोदंडदे ७ जहां श्यामवर्ण वाला रक्तनेत्रयुक्त दंड निर्भय विचरता है वहां जो राजाकी बुद्धि सरलस्वभावकी होय तो प्रजा नहीं बिगड़तीहै ८ जो राजा दंड न देवे तो बालक-वृद्ध-रोगी और विधवास्त्री इनसबको बलवान पुरुष मत्स्यजीवोंके समान भक्षणकरजायं ९ देवता- दैत्य- सर्पगण- भूत और पक्षी यहसबभी दंड दियेविना मर्यादाओंको तोड़देतेहैं यहदंड, ब्राह्मणके अभिशाप-- सबप्रहार- संपूर्णपराक्रम क्रोध और

न्तेदण्डिनोदेवैर्न पूज्यन्तेत्वदण्डिनः। नब्रह्माणंविधातारं नपूषार्यमणावपि १२ यजन्ते मानवाःकेचित् प्रशान्ताःसर्वकर्मसु। रुद्रमग्निञ्चशक्रञ्चसूर्याचन्द्रमसौतथा १३ विष्णुं देवगणांश्चान्यान् दण्डिनःपूजयन्तिच। दण्डःशास्तिप्रजाःसर्वा दण्डएवाभिरक्षति १४ दण्डःसुप्तेषुजागर्ति दण्डंधर्मंविदुर्बुधाः। राजदण्डभयादेव पापाःपापंनकुर्वते १५ यमदण्डभयादेके परस्परभयादपि। एवंसांसिद्धिकेलोके सर्वंदण्डेप्रतिष्ठितम् १६ अन्धेतमसिमज्जेयुर्यदिदण्डंनपातयेत्। यस्माद्दण्डोदमयति अदण्ड्यान्दमयत्यपि। दमनाद्दण्डनाच्चैव तस्माद्दण्डंविदुर्बुधाः १७ दण्डस्यभीतैस्त्रिदशैःसमेतैर्भागोधृतःशूलधरस्ययज्ञे। दत्तंकुमारेध्वजिनीपतित्वं वरंशिशूनाञ्चभयाद्बलस्य १८॥

इतिश्रीमत्स्यपुराणेचतुर्विंशत्यधिकद्विशततमोऽध्यायः २२४॥

(मत्स्यउवाच) दण्डप्रणयनार्थाय राजासृष्टःस्वयम्भुवा। देवभागानुपादाय सर्वभूतादिगुप्तये १ तेजसायदमुंकश्चिन्नैवशक्नोतिवीक्षितुम्। ततोभवतिलोकेषु राजाभास्करवत्प्रभुः २ यदास्यदर्शनेलोकः प्रसादमुपगच्छति। नयनानन्दकारित्वात्तदाभवतिचन्द्रमाः ३ यथायमःप्रियद्वेष्ये प्राप्तेकालेप्रयच्छति। तथाराज्ञाविधातव्याः प्रजास्तद्धियमव्रतम् ४ वरुणेनयथापाशैर्बद्धएवप्रदृश्यते। तथापापान्निगृह्णीयाद्व्रतमेतद्धिवारुणम् ५ परिपूर्णंयथाचन्द्रं दृष्ट्वाहृष्यतिमानवः। तथाप्रकृतयोयस्मिन् सचन्द्रप्रतिमोनृपः ६

निश्चय इनसबोंमें नियुक्तकरना योग्यहै, दंडदेनेवाले राजाओंको देवता पूजते हैं परन्तु विना दंडदेनेवालोंको नहींपूजते और कितनेही शान्तपुरुष ब्रह्मा- पूषादेव- अर्य्यमादेव- रुद्र- अग्नि- सूर्य्य- चन्द्रमा- विष्णु और देवताओंके गण इनसबोंसेभी विशेष दंडदेनेवाले राजाओंको पूजतेहैं दंड सब प्रजाको शिक्षादेताहै दंडही सबकी रक्षाकरताहै सबके सोजानेपर दंडही जागाकरताहै पंडितलोग दंडहीको धर्मकहतेहैं राजाके दंडकेभयसे पापीपुरुष पाप नहींकरतेहैं १०।१५ कोई २ धर्मराजके दंडके भयसे पाप नहींकरते इसरीतिसे सर्वत्र संसारमें दंडही प्रबलहै १६ जो राजा दंड नहींकरता है वह अन्धतामिश्र नरकमेंपड़ताहै दंड सबपुरुषोंको दमनकरके अपनेवशमें करलेताहै इसीसे पंडितोंने इसको दंडकहा है १७ दंडसे डरतेहुए देवताओंने यज्ञमें शिवजीको भागदिया है दंडहीके भयसे स्वामिकार्त्तिकजी कुमारअवस्थाहीमें सेनाकेपति वनायेगयेहैं १८॥

इतिश्रीमत्स्यपुराणभाषाटीकायांचतुर्विंशत्यधिकद्विशततमोऽध्यायः २२४॥

मत्स्यजी बोले ब्रह्माजीने दंडदेनेकेलिये संपूर्ण भूतमात्रकी रक्षाके निमित्त देवताओंके अंशोंसे राजाको रचाहै १ तेजकरके इसराजाको कोईनहीं देखसक्ताहै इसीसे राजाका शरीर सूर्य्यकेसमान है राजाके दर्शनकरनेसे सबजन प्रसन्नहोजातेहैं राजा सबकेनेत्रोंको आनन्दकरताहै इसीसे इसका चन्द्रशरीरहै २।३ जैसे कि धर्मराज कालसमयपर प्रजापर प्रीति और द्वेषकरताहै उसीप्रकार राजा भी सबप्रजापर कृपा और दंडकरताहै यह धर्मराजका स्वभावहै ४ जैसे कि वरुणदेवता फांसीसे बांधताहै इसीप्रकार राजाभी पापियोंको बेड़ियोंसे बांध लेताहै यह वरुणका नियम है ५ जैसे कि पूर्ण

प्रतापयुक्तस्तेजस्वी नित्यंस्यात्सर्वकर्मसु । दुष्टसामन्तहिंस्रेषु राजाग्नेयव्रतेस्थितः ७
यथासर्वाणिभूतानि बिभ्रतःपार्थिवंव्रतम् । इन्द्रस्यार्कस्य वातस्ययमस्यवरुणस्यच ८
चन्द्रस्याग्नेःपृथिव्याश्च तेजोव्रतंनृपश्चरेत् । वार्षिकांश्चतुरोमासान्यथेन्द्रोप्यथवर्षति
९ तथाभिवर्षेत्स्वंराज्यं काममिन्द्रव्रतंस्मृतम् । अष्टौमासान्यथादित्यस्तोयंहरतिर
श्मिभिः । तथाहरेत्करंराष्ट्रान्नित्यमर्कव्रतंहितत् १० प्रविश्यसर्वभूतानि यथाचरतिमारु
तः । तथाचारैःप्रवेष्टव्यं व्रतमेतद्धिमारुतम् ११ ॥

इतिश्रीमत्स्यपुराणेपञ्चविंशत्यधिकद्विशततमोऽध्यायः २२५ ॥

(मत्स्य उवाच) निक्षेप्यस्यसमंमूल्यं दण्ड्योनिक्षेपभुक्तथा । वस्त्रादिकसमस्तस्य
तदाधर्म्मोनहीयते १ योनिक्षेपंनार्पयति यश्चानिक्षेप्ययाचते । तावुभौचोरवच्छास्यौ
दाप्यौवाद्विगुणन्धनम् २ उपधाभिश्चयःकश्चित्परद्रव्यंहरेन्नरः ॥ ससहायःसहन्त
व्यः प्रकामंविविधैर्वधैः ३ योयाचितंसमादाय नतद्दद्याद्यथाक्रमम् । सनिगृह्यबलाद्दाप्यो
दण्ड्योवापूर्वसाहसम् ४ अज्ञानाद्यदिवाकुर्यात्परद्रव्यस्यविक्रयम् । निर्दोषोज्ञानपूर्वन्तु
चोरवद्वधमर्हति ५ मूल्यमादाययोविद्यां शिल्पंवानप्रयच्छति । दण्ड्यःसमूल्यंसकलंध
र्मज्ञेनमहीक्षिता ६ द्विजभोज्येतुसंप्राप्ते प्रतिवेश्ममभोजयन् । हिरण्यमाषकंदण्ड्यः पा

चन्द्रमाको देखकर सबप्रजा प्रसन्नहोतीहैं ऐसेही सबलोग राजाकोभीदेख प्रसन्नहोजाते हैं यहराजा
में चन्द्रमाका स्वभाव है राजा सबकर्मोंमें प्रताप और तेजसे युक्तरहता है यह राजामें अग्निकातेज
है ६।७ और जैसे कि सबप्रजा राजाके व्रतमें स्थितरहतीहै उसीप्रकार राजाभी इन्द्र- सूर्य्य- वायु-
यम- वरुण- चन्द्रमा- अग्नि और पृथ्वी इनसबोंके तेजोंका व्रत करतारहताहै, जैसे वर्षाऋतुमें चार
महीनोंतक इन्द्र वर्षाकरताहै उसीप्रकार राजाभी अपनीप्रजाकी पालनाकरताहै यह इन्द्रव्रत कहा
ताहै- जैसे सूर्य्य आठमहीनेतक अपनीकिरणोंसे जलको शोषताहै उसीप्रकार राजाभी अपने देश
भरसे करलेताहै यह सूर्य्यव्रत कहाताहै ८। १० जैसे वायु सबभूतोंमें प्रवेशकरके विचरता है उसी
प्रकार राजाभी सबमें अपने आचरणोंसे प्रवेशरखताहै यह वायुका व्रतकहाताहै ११ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांपंचविंशत्यधिकद्विशततमोऽध्यायः २२५ ॥

मत्स्यजी बोले कि जो किसी की धरोहडको मारले उसको राजा उसधरोहड़के धनके समान
दण्डदेवे और जिसको उसधनके बराबरअन्यकुछ धनदेदिया हो उसका कुछदोषनहीं है १ जोधरोहड़
को नहींदे और जो झूठी धरोहड़मांगे इनदोनों को राजा चोरीका दण्डदेवे अथवा दूने धनकादण्ड
देवे २ जो किसीके धनको जालसाजीसे हर ले उसको सब जालसाजी वाले सहायकजनों समेत
अनेक प्रकारके बधदण्ड देवे ३ जो किसीकी मांगी लाई हुई वस्तुको यथार्थ रीतिसे नहींदेवे उस
कोराजा बलसे दिला देवे और प्रथम साहसका २७० पण दण्ड देवे ४ जोविनाजाने पराये द्रव्य
कोबेचदेवे उस को कुछ दोष नहीं है परन्तु जानबूझकर जो पराये द्रव्यको बेच दे उसको चोर के
समान दण्ड देनाचाहिये ५ जो मूल्य लेके किसी विद्याको अथवा शिल्प विद्याको नहीं बताताहो

पेनास्तिव्यतिक्रमः ७ आमन्त्रितोद्विजोयस्तु वर्त्तमानश्चस्वेगृहे । निष्कारणंनगच्छेद्यः सदाप्योऽष्टशतंदमम् ८ प्रतिश्रुत्याप्रदातारं सुवर्णंदण्डयेन्नृपः । भृत्यश्चाज्ञांनकुर्याद्यो दर्पात्कर्मयथोदितम् ९ सदण्ड्यःकृष्णलान्यष्टौ नदेयञ्चास्यवेतनम् । संगृहीतंनदद्याद्यः कालेवेतनमेवच १० अकालेतुत्यजेद् भृत्यं दण्ड्यःस्याच्छतमेवच । योग्रामदेशसस्यानां कृत्वासत्येनसंविदम् ११ विसंवदेन्नरोलोभात् तंराष्ट्राद्विप्रवासयेत् । क्रीत्वाविक्रयवान् किञ्चित्यस्येहानुशयोभवेत् १२ सोऽन्तर्दशाहात्तत्साम्यन्दद्याच्चैवाददीतवा । परेणतदशाहस्य नदद्यान्नैवदापयेत् १३ आददन्विददंश्चैव राज्ञादण्ड्यःशतानिषट् । यस्तुदोषवतींकन्यामनाख्यायप्रयच्छति १४ तस्यकुर्यान्नृपोदण्डं स्वयंषण्णवतिंपणान् । अकन्येवेतियःकन्यां ब्रूयाद्द्वेषेणमानवः १५ सशतंप्राप्नुयाद्दण्डं तस्यादोषमदर्शयन् । यस्त्वन्यां दर्शयित्वान्यां वोढुःकन्यांप्रयच्छति १६ उत्तमन्तस्यकुर्वीत राजादण्डंतुसाहसम् । वरोदोषाननाख्याय यःकन्यांवरयेदिह १७ दत्ताप्यदत्तासातस्य राज्ञादण्ड्यःशतद्वयम् । प्रदायकन्यांयोऽन्यस्मै पुनस्तांसंप्रयच्छति १८ दण्डःकार्योनरेन्द्रेण तस्याप्युत्तमसाहसः। तत्प्रकारेणवावाचा युक्तंपण्यमसंशयम् १९ लुब्धोंह्यन्यत्रविक्रेता षट्शतंदण्डमर्हति ।

उसको राजा सम्पूर्ण मूल्यका दण्डदेवे ६ जिसके ब्रह्म भोज्यहुआ हो और वह अपनेपड़ोसी ब्राह्मणको नहीं जिमावे तो राजा उसको सुवर्णके मासों का दण्ड देवे और जो पापी ब्राह्मणको नहीं जिमावे तो उसको कुछ दोष नहीं है, निमान्त्रित कियाहुआ जो ब्राह्मण बुलानेके समय घरमेंबैठाहुआ विना कारणजीमने को न आवे तो उससे एकसौ आठ पण दण्ड लेवे७।८ जो कोई दानदेनेकी प्रतिज्ञा करके फिर दान नहींदेवे उससे राजा सुवर्णकेमासे दण्डलेवे--जोकोई भृत्यस्वामीकीआज्ञा नहींमाने उसको आठरत्ती सुवर्णका दण्डकरे और उसकी नौकरी भी नहींदेवे--जो स्वामी भृत्यके समय पूरे होनेपर नौकरी नहीं देवे और विनाकालमें भृत्यको त्यागदे उसपरसौ१००पणका दण्डकरे- जो पुरुष ग्राम देश खेती आदिक बस्तुओं को सत्य प्रतिज्ञासे देनेका वचनकरे और फिर नहींदे उसको राजा अपने देशसे निकालदेवे, जो पुरुष किसी वस्तुका मोल लेकर फिर उलटी फेरनाचाहै उसका यह नियमहै कि कैतो मोललीहुई बस्तुको दश दिनके भीतर फेरदे वह दश दिन पीछेउलटी नहीं फेरे ९।१३ और दश दिन पीछे विकीहुई वस्तुको उलटा लेताहो और वहदेता न हो उसको राजा ६००पणका दण्डदेवे, जो पुरुषदोषवाली कन्या के दोष कहे विना विवाहदेवे उस पर राजा ९६ पणका दण्डकरे और जो पुरुष मिथ्या बोलके कन्याको नपुंसक बताता हो उस मिथ्या दोष बताने वालेको सौपणका दण्डदे जो एक कन्याको दिखाकर फिर और दूसरी कन्यासे विवाह करदेताहै उसको राजा उत्तम साहसका दण्ड अर्थात् १०८० पणका दण्ड दे जो वर कन्याके दोष सुनेविना अनजाने दोषवती कन्याको विवाह लेताहै वह उसकी अविवाहीही गिनीजाती है वह वर राजाको १०० पणदण्ड दे जो पुरुष अपनी कन्याकी सगाई एक पुरुषसे करके किसी अन्यसे विवाह करदेतो वह राजाको १०८० पणदण्डदे इसी प्रकार जो किसी बेचनेकी बस्तुका वचनसे सौदाकर

दुहितुःशुल्कविक्रेता सत्यंकारात्तुसन्त्यजेत् २० द्विगुणंदण्डयेदेनमितिधर्मोव्यवस्थितः ।
मूल्यैकदेशंदत्त्वातु यदिक्रेताधनन्त्यजेत् २१ सदण्ड्योमध्यमंदण्डं तस्यपण्यस्यमोक्ष
णम् । दुह्याद्धेनुञ्चयःपालो गृहीत्वाभक्तवेतनम् २२ सतुदण्ड्यःशतंराज्ञा सुवर्णञ्चाप्य
रक्षिता । दण्डंदत्त्वातुविरमेत् स्वामितःकृतलक्षणः २३ बद्धःकार्ष्णायसैःपाशैस्तस्यक
र्मकरोभवेत् । धनुःशतपरीणाहो ग्रामस्यतुसमन्ततः २४ द्विगुणंत्रिगुणंवापि नगरस्यतु
कल्पयेत् । वृतिंतत्रप्रकुर्वीत यामुष्ट्रोनावलोकयेत् २५ छिद्रंवावारयेत्सर्वं श्वसूकरमुखा
नुगम् । यत्रापरिवृतंधान्यं विहिंस्युःपशवोयदि २६ नतत्रकारयेद्दण्डं नृपतिःपशुरक्षिणे
अनिर्दशाहाद्गांसूतां वृषंदेवपशुंतथा २७ छिद्रंवावारयेत्सर्वं नदण्ड्यामनुरब्रवीत् । अतो
ऽन्यथाविनष्टस्य दशांशंदण्डमर्हति २८ पालस्यपालकस्वामी विनाशेक्षत्रियस्यतु । भक्ष
यित्वोपविष्टस्तु द्विगुणंदण्डमर्हति २९ विशंदण्ड्याद्दशगुणं विनाशेक्षत्रियस्यतु । गृहंत
डागमारामं क्षेत्रंवापिसमाहरन् ३० शतानिपञ्चदण्डःस्यादज्ञानाद्द्विशतोदमः । सी
माबन्धनकालेतु सीमान्तंयोहिकारयेत् ३१ तेषांसंज्ञांददानस्तु जिह्वाच्छेदनमाप्नुयात् । म
थैनामपियोदद्यात्संविदंवाधिगच्छति ३२ उत्तमंसाहसंदण्ड्य इतिस्वायम्भुवोऽब्रवीत् ।

के फिर दूसरेको बेचदे उसपर ६०० पणदण्डकरे जो अपनी पुत्रीके विवाह में रुपये लेनेका इकरार करनेवाला होके समयपर अधिक रुपये मांगता हो १४ । २० उस्से राजा उन रुपयोंसे दूना दण्ड लेवे यह धर्मकी व्यवस्था है जो मोल लेनेवाला पुरुष थोड़ासामूल्य देके फिर उस वस्तुको त्यागताहो उसपर राजा मध्यम साहसवाला अर्थात् ५४० पण दण्डकरे और उसकी वस्तुको उलटी फिरवादे जो कोई रक्षाकी नौकरी करनेवाला किसी रक्षित की हुई गौका दूधदुहले अथवा उसकी रक्षा न करे उसको राजा सुवर्णका मासा दण्ड देकर उसके स्वामी से मिलापकरवादे और लोहे की बेड़ी डलवाकर स्वामीके काम करवावे--२१।२२ ग्रामसे सौ धनुषके अन्तरपर गौके पड़ाव बाड़ बनाने चाहिये बड़े नगरोंमें दोसौ अथवा तीनिसौ धनुष के अन्तरपर बनने चाहियें (एक धनुषचार हाथका होताहै) उनबाड़ोंकी मेंड या दीवार इतनी ऊंची बनानी चाहिये जहां कि धरेहुए तृण आदिको ऊंटनहीं देखसके २३ । २५ और उसमें ऐसा कोई छिद्रभी न रहनेदे जिसमें कि कुत्ता और शूकर आदि जीव घुसजायं ऐसे सुप्रबन्धवाले बाड़ेमेंसे जोधरेहुए तृण धान्यादिकोई पशुचरजाय उसके रक्षकको राजा दण्ड न दे दशदिन व्याई गौ और आंकिल बैल इन दोनोंको राजादण्डनदे यह मनुका वचन है इनसे अन्यपशुजो रक्षित कियेहुए खेतादिमें चरकरहानिकरदे उसके स्वामीसे राजा दशांश दण्डलेले २६।२८जो जो क्षत्रिय मनुष्य ब्राह्मणके खेतमें पशुओंसे हानि करवादे अथवा वहपशु चरकर उसी खेतमें बैठजाय तो राजा उससे पूर्वके दशांशदंडसे दूनादंड उसको दिलवावे, जो वैश्य क्षत्रियके खेतकी हानिकरवादे उसको दशगुणा दंडदेवे और जोकोईपुरुष किसीके गृह- तड़ागवन उपवन और खेतआदिको हरताहो २९।३० उसपर राजा पांचसौ रुपयेका दंडकरे जो बिना जाने करताहो उसपर दोसौ रुपयेका दंडकरे और सीमबाँधनेके समय जो पुरुष उस सीमकीपहि-

वर्णानामानुपूर्व्वेण त्रयाणामविशेषतः ३३ अकार्यकारिणःसर्वान् प्रायश्चित्तानिकारयत्। असत्येनप्रमाप्यस्त्री शूद्रहत्याव्रतंचरेत् ३४ दानेनचधनेनैकं सर्पादीनामशक्नुवन्। एकैकंसचरेत्कृच्छ्रं द्विजःपापापनुत्तये ३५ फलदानाञ्चवृक्षाणां छेदनेजप्यमृक्शतम्। गुल्मवल्लीलतानाञ्च पुष्पितानांचवीरुधाम् ३६ अस्थिमताञ्चसत्वानां सहस्रस्यप्रमापणे। पूर्णेवानस्यवस्थातुं शूद्रहत्याव्रतञ्चरेत् ३७ किञ्चिद्देयञ्चविप्राय दद्यादस्थिमतांवधे। अनस्न्याञ्चैवाहिंसायां प्राणायामैर्विशुद्ध्यति ३८ अन्नादिजानांसत्वानां रसजानाञ्चसर्वशः। फलपुष्पोद्भवानाञ्च घृतप्राशोविशोधनम् ३९ कृष्टानामोषधीनाञ्च जातानाञ्चस्वयंवने। वृथाच्छेदेनगच्छेत दिनमेकंपयोव्रती ४० एतैर्व्रतैरपोह्यंस्यादेनोहिंसासमुद्भवम्। स्तेयकर्तृपहर्तृणां श्रूयतांव्रतमुत्तमम् ४१ धान्यान्नधनचौर्याणि कृत्वाकामंद्विजोत्तमः। सजातीयगृहादेव कृच्छ्रार्द्धेनविशुध्यति ४२ मनुष्याणान्तुहरणे स्त्रीणांक्षेत्रगृहस्यतु। कूपवापीजलानान्तु शुद्धिश्चान्द्रायणंस्मृतम् ४३ द्रव्याणामल्पसाराणां स्तेयंकृत्वान्यवेश्मतः। चरेत्सान्तपनंकृच्छ्रन्तन्निर्यात्यविशुद्धये ४४ भक्ष्यभोज्यापहरणे यानशय्यासनस्यतु। पुष्पमूलफलानान्तु पञ्चगव्यंविशोधनम् ४५

वानको नष्टकरदें अथवा पुरुषोंको मिथ्या सलाह और झूठोंको सलाहदेतेहों उनकी जिह्वा कटवावे अथवा १०८० वाला उत्तम साहस दंडदेवे यह ब्रह्माजीका वचनहै ३१।३२ और ब्राह्मण आदिक तीनोंवर्ण यथाक्रमसे जो अकार्यको करडालें उनसे राजा प्रायश्चित्तकरवावे जो ब्राह्मण विनादोषके स्त्रीको मारडाले वह शूद्रहत्याके व्रतकोकरे ३४ जो पुरुष एक किसीप्रायश्चित्तके दानकरनेमें धनसे असमर्थहो वह उसएक प्रायश्चित्तके स्थानमें एककृच्छ्र व्रतकरे ३५ जो द्विजफलवाले वृक्षोंका छेदन करदेवे अथवा गुच्छेलता और पुष्पोंवाली लताओंको काटडाले वह सौऋचाओंके जप करनेसे शुद्ध होताहै ३६ और अस्थिवाले हजारजीव और बिना अस्थि के मच्छरलीक आदिक करोड़ोंहों तब इनके और उनके मारनेका समानपापहो इसकी शुद्धिकेनिमित्त शूद्र तो हत्याका व्रतकरे और अस्थिवालेजीवोंके वधहोने में ब्राह्मणको कुछदानभी देनायोग्य है और जो विना अस्थिवाले मच्छर कुटकी आदि जीव मरजायँ तो प्राणायामहीके करनेसे शुद्धीहोजातीहै ३७।३८ अन्नादिकोंमें तथा गुड़ आदि रसोंमें जो पड़ेहुए जीवोंकी हिंसाहोजाय अथवा फल पुष्पोंके जीवोंकी हिंसाहोजाय तो घृतका आचमनकरनेसे शुद्धिहोजाती है ३९ वनकी औषधियोंको जो विना प्रयोजनकाटे वह एकदिन दूधकेही आहार व्रतकरनेसे शुद्धहोजाता है ४० इन हिंसाओंका पाप इनव्रतोंसे दूरहोजाता है अब चोरीकरनेवालोंके व्रतोंका वर्णन करताहूं ४१ धान्य अन्न और रुपयाआदिक द्रव्योंकीचोरी जिसने अपनेही जातिके घरमेंकीहो तो अर्द्धकृच्छ्र व्रतकरनेसे शुद्धिहोजाती है ४२ और मनुष्य स्त्री गृह और खेत इनकी चोरीकरनेवाला पुरुष अथवा कूप, तड़ाग, वापीआदि जलाशयोंका हरनेवालापुरुष चान्द्रायणव्रत करनेसे शुद्धहोजाताहै ४३ थोड़े सारवाले द्रव्योंकी चोरीकरनेवालापुरुष सांतपन कृच्छ्रव्रतकरनेसे शुद्धहोताहै ४४ और भक्ष्य भोज्य पदार्थ, सवारी शय्या आसन पुष्प मूल और

तृणकाष्ठद्रुमाणान्तु शुष्कान्नस्यगुड़स्यच। चैलचर्मामिषाणान्तु त्रिरात्रंस्यादभोजनम् ४६
मणिमुक्ताप्रवालानां ताम्रस्यरजतस्यच। अयकांस्योपलानाञ्च द्वादशाहंकणान्नभुक् ४७
कार्पासकीटवर्णानां द्विशफैकशफस्यच। पक्षिगन्धौषधीनाञ्च रज्वाश्चैवत्र्यहंपयः ४८ ए
तैर्व्रतैरपोहन्ति पापंस्तेयकृतंद्विजः। अगम्यागमनीयन्तु व्रतैरेभिरपानुदेत् ४९ गुरुतल्प
व्रतंकुर्याद्रेतःसिक्त्वास्वयोनिषु। सख्युःपुत्रस्यचस्त्रीषु कुमारीष्वंत्यजासुच ५० पितृष्वस्री
यभगिनीं स्वस्रीयांमातुरेवच। मातुश्चभ्रातुरार्यायाङ्गत्वाचान्द्रायणंचरेत् ५१ एतास्त्रिय
स्तुभार्यार्थे नोपगच्छेत्तुबुद्धिमान्। ज्ञातीश्चमातुलेयास्ते पतिताउपयन्तिये ५२ अमानुषी
षुपुरुषो उदक्यायामयोनिषु। रेतःसिक्त्वाजलेचैव कृच्छ्रंसान्तपनंचरेत् ५३ मैथुनञ्चसमा
लोक्य पुंसियोषित्तिवाद्विजः। गोयानेप्सुदिवाचैव सवासास्नानमाचरेत् ५४ चाण्डालान्त्य
स्त्रियोगत्वा भुक्त्वाचप्रतिगृह्यच। पतत्यज्ञानतोविप्रो ज्ञानात्साम्यन्तुगच्छति ५५ विप्रदुष्टां
स्त्रियंभर्तानिरुन्ध्यादेकवेश्मनि। यत्पुंसःपरदारेषु तच्चैनाञ्चारयेद्व्रतम् ५६ साचेत्पुनःप्रदुष्ये
त्तु सदृशेनोपमन्त्रिता। कृच्छ्रंचान्द्रायणञ्चैव तत्तस्यापावनंस्मृतम् ५७ यःकरोत्येकरात्रेण
वृषलीसेवनंद्विजः। तदेकभुक्जपेन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ५८ एषापापकृतामुक्ता चतुर्णा
मपिनिष्कृतिः। पतितैःसंप्रयुक्तानामिमांशृणुतनिष्कृतिम् ५९ संवत्सरेणपतति पतितेन

फल इनकाहरलेनेवाला पुरुष पंचगव्यपीने से शुद्धहोताहै ४५ तृण-काष्ठ-वृक्ष-सूखाअन्न-गुड़-बस्त्र
चर्म और मांस इनका हरलेनेवाला पुरुष तीनदिन निराहार व्रतकरनेसे शुद्धहोता है ४६।४७ कपास
रेशम-दोफटेखुरवाले पशु घोड़ाआदि एकखुरवाले पशु पक्षी गन्ध औषधी और रस्सी इनकाचुराने
वाला पुरुष तीनदिनके दूधके व्रतकरनेसे शुद्धहोताहै ४८ इनव्रतोंके करनेसे पुरुषचोरीके पापोंसे
छूटजाताहै अब अगम्या स्त्रीके संग गमन करनेवालोंके व्रतोंको कहते हैं-अपने गोत्रकी स्त्रीकेसंग गमनकरनेवाला
पुरुष गुरुपत्नीकेसंग भोगकरनेवालेके व्रतकोकरे और माताकीसखी, पुत्रबधू-कुमारीकन्या-चांडाली-भुवा-
बहन-माता-माताकीबहन-और श्रेष्ठ पतिव्रतास्त्री इनसबका संगम करने
वाला पुरुष चान्द्रायण व्रतकरे ४९।५१ बुद्धिमान् पुरुष इनकहीहुई स्त्रियोंकेसाथ भोगनकरे और
मामाकीबेटी-पतितस्त्री-पशुकीयोनि-रजस्वलास्त्री-गुदा और जल इनमें वीर्य्य छोड़नेवाला पुरुष
कृच्छ्र सान्तपन व्रतकरनेसे शुद्धहोताहै ५२।५३ स्त्री पुरुषके मैथुनका देखनेवाला-दिनमें मैथुनकरने
वाला और बैलकी सवारीकरनेवाला पुरुष बस्त्रों सहित जलमें स्नानकरनेसे शुद्धहोताहै ५४ चांडाल
और अन्यजातिकी स्त्रीके संग भोग करनेवाला वा इनके अन्नकाभोक्ता अथवा इनका प्रतिग्रह
लेनेवाला ब्राह्मण जो अज्ञानसे करनेवालाहै तो पतितहोजाय और जानकेकरनेवाला चांडालहीके समान
होजाताहै ५५ जो स्त्री दुष्टाहै उसकापति उसको एकघरमें रोककर रक्खे और परस्त्री संगके
करनेका जो पुरुषका व्रतहै वही उस्सेकरवावे ५६ इसके पीछे भी जो वह दुष्टाही रहे तोकृच्छ्र सांतपन
व्रत करवानेसे उसकी शुद्धि होती है ५७ एक रात्रि शूद्रा स्त्रीके साथभोग करनेवाला द्विज तीन
वर्षतक एक बार भोजनकरके गायत्री का जपकरे इन सबप्रकारों से चारोंवर्णोंके पाप दूरहोजाते हैं

समाचरन् । याजनाध्यापनाद्यौनादनुयानाशनासनात् ६० योयेनपतितेनैषां संसर्गंया
समाचरन् । याजनाध्यापनाद्यौनादनुयानाशनासनात् ६० योयेनपतितेनैषां संसर्गंया
तिमानवः । सतस्यैवव्रतंकुर्यात् तत्संसर्गविशुद्धये ६१ पतितस्योदकंकार्यं सपिण्डैर्बान्ध
वैःसह । निन्दितेऽहनिसायाह्ने ज्ञातिभिर्गुरुसन्निधौ ६२ दासीघटमपांपूर्णं पर्यस्येत्प्रेत
वत्सदा । अहोरात्रमुपासीरन् नाशौचंबान्धवैःसह ६३ निवर्त्तयेरंस्तस्मात्तु सम्भाषण
सहासनम् । दायादस्यप्रमाणञ्च यात्रामेवंचलौकिकीम् ६४ ज्येष्ठभावान्निवर्तेत ज्यैष्ठ्या
वाप्तंचयत्पुनः । ज़्येष्ठांशंप्राप्नुयाच्चास्ययोवास्याद्गुणतोऽधिकः ६५ स्थापिताञ्चापिमर्यादां
येभिन्द्युःपापकर्मिणः । सर्वेपृथक्दण्डनीया राज्ञाप्रथमसाहसम् ६६ शतंब्राह्मणमाक्रुश्य
क्षत्रियोदण्डमर्हति । वैश्यस्तुद्विशतंराजन्! शूद्रस्तुवधमर्हति ६७ पञ्चाशद्ब्राह्मणोदण्ड्यः
क्षत्रियस्याभिशंसने । वैश्यस्याप्यर्द्धपञ्चाशच्छूद्रेद्वादशकोदमः ६८ क्षत्रियस्याप्नुयाद्वै
श्यः साहसंपुनरेवच । शूद्रःक्षत्रियमाक्रुश्य जिह्वाच्छेदनमाप्नुयात् ६९ पञ्चाशत्क्षत्रियो
दण्ड्यस्तथावैश्याभिशंसने । शूद्रेचैवार्द्धपञ्चाशत्तथाधर्मोनहीयते ७० वैश्यस्याक्रोशने
दण्ड्यः शूद्रश्चोत्तमसाहसम् । शूद्राक्रोशेतथावैश्यः शतार्द्धदण्डमर्हति ७१ सवर्णाक्रोश
नेदण्ड्यस्तथाद्वादशकंस्मृतम् । वादेष्ववचनीयेषुतदेवद्विगुणंभवेत् ७२ एकजातिर्द्वि
जातिन्तु वाचादारुणयाक्षिपन् ! जिह्वायाःप्राप्नुयाच्छेदं जघन्यःप्रथमोहिसः ७३ नाम

अबपतित पुरुषोंके संगवास करनेवालेपुरुषोंके प्रायश्चित्तको कहते हैं ५८।५९ पतित पुरुषके साथ
एक वर्षतक रहनेवाला जनभी पतितहोजाताहै औरयज्ञकरानेसे पढ़ानेसे सम्बन्ध करनेसे औरभोजन
करनेसे भी पतित होजाताहै और जिस दोषसे संग वास करनेवाला पुरुष पतित होताहै उसीदोषके
व्रत करनेसे शुद्ध होताहै ६०।६१ पतित पुरुष होजानेसे उसको सब भाई बन्धुजन ग्रामसे बाहर ले
जाकरदासीके घरकेजलकोपिलावें औरजब पतितपुरुष मरजाताहै तबअहोरात्रका पातक लगजाता
है पतित पुरुषसे वार्त्तालाप न करे उसके आसन पर न बैठे उसकेनिर्वाहके योग्यविभागदे बड़ा भाई
होकर अपने बड़े भाईपनेके भागकोनलेसके परन्तु शेष उसके भागको सबमें अधिकगुणवाला ज्येष्ठ
भागको ग्रहणकरे ६२।६५ और जोपापीपुरुष राजाकी स्थापितकीहुई मर्य्यादाको तोड़डाले उसपर
राजाप्रथम साहसका २७० पण दंडकरे ६६ जो क्षत्रियहोकर ब्राह्मणको गालीदेवे तोउसपर १००
पण दंड राजाकरे वैश्य ऐसाकरे तो उस्से २०० पण दंडले और जो शूद्र ब्राह्मणको गाली देतो उसका
बधही करवादे ६७ और जो ब्राह्मण क्षत्रियको गाली देवे वह ५० पण दंड देवे जो वैश्यको
गाली देवे तो २५ पणदंडदेवे, शूद्रको गालीदे तो बारह पण दंडलेवे ६८ वैश्यक्षत्रियको गाली दे
तो ५० पण दंडदेवे, शूद्रको गाली देतो २५ पण दंड दे ७० शूद्र वैश्यको गालीदेतो उत्तम साहस
१०८० पण दंडदेवे वैश्यशूद्रको गाली दे तो ५० पण दंड देनेके योग्यहै ७१ अपने वर्णके पुरुषको
गाली देनेवाले बारह पण दंडके योग्यहैं और अवाच्य गाली देनेवालेको साधारण दंडसे दूना दंड
देनाचाहिये ७२ शूद्र द्विजातियोंको गालीदेवे तो उसकी जिह्वा कटवादेवे क्योंकि वह सब वर्णों में
छोटा है ७३ जो शूद्र पुरुष उन द्विजातियों के नाम ज्ञाति और घर इन सबसे द्रोहरक्खे उसकेमुख

जातिगृहंतेषामभिद्रोहेणकुर्वतः । निक्षेप्योऽयोमयःशंकुर्ज्वलन्नास्येदशांगुलः ७४ ध
र्मोपदेशंशूद्रस्तु द्विजानामाभिकुर्वतः। तप्तमासेचयेत्तैलं वक्त्रेश्रोत्रेचपार्थिवः ७५ श्रुतिं
देशञ्चजातिञ्च कर्मशारीरमेवच। वितथञ्चब्रुवन्दण्ड्यो राजाद्विगुणसाहसम् ७६ यस्तु
पातकसंयुक्तः क्षिपेद्वर्णान्तरंनरः। उत्तमंसाहसंदण्डःपात्यस्तस्मिन्यथाक्रमम् ७७ राज्ञो
निवेशनियमं वितथंयान्तिवैमिथः। सर्वेद्विगुणदण्ड्यास्ते विप्रलम्भान्नृपस्यतु ७८ प्री
त्यामयास्याभिहितं प्रमादेनाथवावदेत्। भूयोनचैवंवक्ष्यामि सतुदण्डार्द्धभाग्भवेत् ७९
काणंवाप्यथवाखञ्जमन्धंचापितथाविधम्।तथैवापिब्रुवन्दाप्यो दण्डंकार्षापणंधनम् ८०
मातरंपितरंज्येष्ठं भ्रातरंश्वशुरंगुरुम्। आक्रोशयन्शतंदण्ड्यः पन्थानञ्चार्थयन्गुरोः
८१ गुरुवर्ज्यन्तुमार्गार्हं योहिमार्गंनयच्छति। सदाप्यःकृष्णलंराज्ञः तस्यपापस्यशान्त
ये ८२ एकजातिर्द्विजातिन्तु येनाङ्गेनापराध्नुयात् । तदेवछेदयेत्तस्य क्षिप्रमेवाविचारय
न् ८३ अवनिष्ठीवतोदर्पात् द्वावोष्ठौच्छेदयेन्नृप ।। अवमूत्रयतोमेढ्रमपशब्दयतोगुदम्
८४ सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः। कट्यांकृताङ्कोनिर्वास्यः स्फिचंवाप्यस्यकर्त
येत् ८५ केशेषुगृह्णतोहस्तंछेदयेदविचारयन्। पादयोर्नासिकायाञ्च ग्रीवायांवृषणेषुच
८६ त्वग्भेदकःशतंदण्ड्यो लोहितस्यचदर्शकः। मांसभेत्ताचषण्णिष्कान् निर्वास्यस्त्व
स्थिभेदकः ८७ अङ्गभङ्गकरस्याङ्गं तदेवापहरेन्नृपः । दण्डपारुष्यकृद्दण्ड्यो समुत्थान

वा कानमें राजा तप्त तेलको डलवावे ७४ जो शूद्र द्विजोंके निमित्त धर्मका उपदेशकरे उसके भी मुख
तथा कानमें राजा तपायाहुआ तेल गिरवादे ७५ जो पुरुष अपनेवेददेश ज्ञाति औरशारीरक कर्मादि-
कों में मिथ्या बोले उसको उत्तम साहससे दूना २१६० पण दंड देना योग्यहै ७६ जो पातकीपापी
पुरुष किसी उत्तम वर्णको गालीदेवे वह क्रम से उत्तम साहस दंडके योग्यहै, जो पुरुष राजाकी सेना
के स्थानके नियमको तोड़डाले वह दूना दंडदेवे क्योंकि वह राजाकी प्रतिज्ञाको असत्य करनेवाला
है ७७। ७८ जो किसीको गाली देनेवाला पुरुष यह बात कहै कि मैंने इससे यह बात विनोद और
प्रीति में अथवा प्रमादसे कहदी थी अब फिर कभी न कहूंगा ऐसे कहनेवाले पुरुषको राजा आधा
दंडदेवे ७९ जो पुरुष काणे, अन्धे, गंजे, और लूले आदि पुरुषोंको उनके रोगों के नाम लेलेकर चि-
ढ़ावे वह एक तोले चाँदीका दंडदेवे ८० जो माता पिता वड़ाभाई-श्वशुर-और गुरू इनको गाली देवे
और गुरूके अर्थ मार्ग नहीं छोड़ उससे १०० पण राजा दंडले ८१ जो पुरुषगुरूसे पृथक् अन्य किसी
महात्माके निमित्त मार्ग नहीं छोड़े वह एक रत्ती चाँदी के दंड योग्यहै ८२ जो शूद्र किसी द्विजाति
को जिस अंगसे पीड़ितकरै उसके उसीअंगको राजाकटवादे ८३ जो अभिमानकरके किसीकी ओर
खखारडाले उसके दोनों ओठ कटवादे जो किसीके आगे अर्थात् सन्मुख मूतदेवे उसके लिङ्गको
और अभिमानसे सन्मुख अपशब्द अर्थात् पादनेवालेकी गुदाको कटवावे ८४ जो नीचवर्ण उत्तम
वर्णके एक आसनपर बैठजाय उसके कूले कटवादेवे ८५ जो पुरुष किसी के केश, पाद, नासिका,
ग्रीवा और वृषण इनके पकड़ने को हाथ चलावे उसके हाथको कटवादेवे ८६ चोट मारकर रुधिर

ञ्ययन्तथा ८८ अर्द्धपादकरःकार्यो गोगजाश्वोष्ट्रघातकः। पशुक्षुद्रमृगाणाञ्च हिंसायां द्विगुणोदमः ८९ पञ्चाशच्चभवेद्दण्ड्यस्तथैवमृगपक्षिषु। कृमिकीटेषुदण्ड्यःस्याद्रजतस्यचमाषकम् ९० तस्यानुरूपंमौल्यञ्च प्रदद्यात्स्वामिनेतथा। स्वस्वामिकानांसकलं शेषाणांसकलंतथा ९१ वृक्षन्तुसफलञ्छित्त्वा सुवर्णंदण्डमर्हति। द्विगुणंदण्डयेच्चैनंपथिसीम्निजलाशये ९२ छेदनादफलस्यापि मध्यमंसाहसंस्मृतम्। गुल्मवल्लीलतानाञ्च सुवर्णस्यचमाषकम् ९३ वृथाच्छेदीतृणस्यापि दण्ड्यःकार्षापणंभवेत्। त्रिभागं कृष्णलादण्ड्याः प्राणिनस्ताडनेतथा ९४ देशकालानुरूपेण मूल्यंराजाद्रुमादिषु। तत्स्वामिनस्तथादण्ड्या दण्डमुक्तन्तुपार्थिव! ९५ यत्रातिवर्ततेयुग्यं वैगुण्यात्प्राजकस्यतु। तत्रस्वामीभवेद्दण्ड्यो नाप्तश्चेत्प्राजकोभवेत् ९६ प्राजकश्चभवेदाप्तः प्राजकोदण्डमर्हति। नास्तिदण्डश्चतस्यापि तथावैहेतुकल्पकः ९७ द्रव्याणियोहरेद्यस्य जानतोऽजानतोऽपिवा। सतस्योत्पादयेत्तुष्टिं राज्ञोदद्यात्ततोदमम् ९८ यस्तुरज्जुंघटंकूपाद्धरेद्भिन्द्याच्चतांप्रपाम्। सदण्डंप्राप्नुयान्माषं तच्चसम्प्रतिपादयेत् ९९ धान्यंदशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकंवधः। शेषेऽप्येकादशगुणं तस्यदण्डंप्रकल्पयेत् १०० तथाभ

निकालनेवाले पर सौपण मांसके छेदन करनेवालेको चौबीसतोले सुवर्ण वा चांदीका दंड और हाड़ तोड़नेवाले को देशसे वाहर निकालदेवे ८७ जो जिसके जिस अंगको तोड़दे उसके उसी अंगको राजा कटवादेवे जो किसीसे कठोर वचन बोले और कुछ दंडभी देदे उसको राजा उसके दंडकेही खर्चके प्रमाण दंडदेवे जो गौ बकरी, हाथी और ऊंट इनको मारडाले उसके आधे २ पैर और हाथ कटवाडाले और क्षुद्र पशु मृगकीट और पक्षी आदिके मारनेवालेको चांदीके मापेकादंडदेवे ८८।९० और उसजीवके मूल्यको स्वामीके निमित्त दिलवादेवे जो अपने स्वामीके वा अन्य किसी के वृक्षको काटडाले उसको एक तोले चांदीका दंडदेवे और मार्ग, सीमा और सरोवरके वृक्षके तोड़नेवाले पर चांदीका दंड ९१।९२ फलवाले गुच्छेवाले और लताप्रतान वेलवाले वृक्षों के तोड़नेवाले पर सुवर्णके मासेका दंडकरे ९३ वृथा जो तृणको भी छेदनकरे उसपर एक पणकादंडकरे, जो किसी प्राणीको ताड़नाकरे उसपर तीनरत्ती चांदी या सुवर्णका दंडकरे ९४ इन वृक्षादि छेदनका मूल्य राजा देशकालके अनुसार स्वामीको दिलवादेवे और दंडको आपले ले ९५ जहाँ सवारी का हाँकने वाला सारथी मूर्खहोवे उस सवारी से जो कुछ हानि होजाय वह स्वामी का दोष है और सारथी चतुर बुद्धिमान् होवे तो स्वामी निर्द्दोष है सारथीकोही दंडदेना योग्य है, और जो कुछ दैव योगसे आपही हानिहोजाय तो किसीका भी दोषनहीं है ९६।९७ जो जानबूझकर अथवा विनाजाने किसी के धनको हरले वह उसको प्रसन्नकरे और राजाको दंडदेवे ९८ जो कुएके ऊपर से रस्सीको वा घटको चुराले अथवा प्याऊको तोड़डाले उस पर एक मासेचांदीका दंडकरे और इन नष्टकी हुई वस्तुओंको मेंगाकर तैयार करवादेवे ९९ दशघटसे अधिक धान्यके चुरानेवाले को वधकरवादे इस्से न्यून धान्य वा अन्न चुरानेवाले को अन्न से ग्यारह गुणा दंडदेवे १०० भक्ष्य भोज्यादि पक्वान दङ-

क्ष्यान्नपानानां नतथाप्यधिकेवधः। सुवर्णरजतादीनामुत्तमानाञ्चवाससाम् १०१ पुरु
षाणांकुलीनानां नारीणाञ्चविशेषतः। महापशूनांहरणे शस्त्राणामौषधस्यच १०२ मु
ख्यानाञ्चैवरत्नानां हरणेवधमर्हति। दध्नःक्षीरस्यतक्रस्य पानीयस्यरसस्यच १०३ वेणु
वैदलभाण्डानां लवणानांतथैवच। मृन्मयानाञ्चसर्वेषां मृदोभस्मनएवच १०४ काल
मासाद्यकार्य्यञ्च राजादण्डंप्रकल्पयेत्। गोषुब्राह्मणसंस्थासु महिषीषुतथैवच १०५ अश्वा
पहारकश्चैव सद्यःकार्योऽर्द्धपादकः। सूत्रकार्पासकिण्वानां गोमयस्यगुडस्यच १०६ म
त्स्यानांपक्षिणाञ्चैवतैलस्यचघृतस्यच। मांसस्यमधुनश्चैवयच्चान्यद्वस्तुसम्भवम् १०७ अ
न्येषांलवणादीनां मद्यानामोदनस्यच। पक्कान्नानाञ्चसर्वेषान्तन्मूल्याद्द्विगुणोदमः १०८
पुष्पेषुहरितेधान्ये गुल्मवल्लीलतासुच। अन्नेषुपरिपूर्णेषु दण्डःस्यात्पञ्चमाषकम्। परि
पूर्णेषुधान्येषु शाकमूलफलेषुच १०९ निरन्वयेशतंदण्ड्यः सान्वयेद्विशतन्दमः। येनये
नयथाङ्गेन स्तेनोऽन्येषुविचेष्टते ११० तत्तदेवहरेत्तस्य प्रत्यादेशायपार्थिवः। द्विजोऽध्व
गःक्षीणवृत्तिर्द्वाविक्षूद्वेचमूलके १११ त्रपुसोर्वारुकौद्वौच तावन्मात्रंफलेषुच। तथाचस
र्वधान्यानां मुष्टिग्राहेणपार्थिव! ११२ शाकेशाकप्रमाणेन गृह्यमाणेनदुष्यति। वानस्प
त्यंफलंमूलं दार्वग्न्यर्थंतथैवच ११३ तृणञ्चोऽभ्यवहारार्थमस्तेयंमनुरब्रवीत्। अदेववा
टिजंपुष्पं देवतार्थंतथैवच ११४ आददानःपरक्षेत्रात् नदण्डंदातुमर्हति। शृङ्गिणंनखि
नंराजन्! दंष्ट्रिणञ्चवधोद्यतम् ११५ योहन्यान्नसपापेन लिप्यतेमनुजेश्वर!। गुरुंवा

घटसे अधिक चुरानेवालेको भी बध दंडकरे, सुवर्ण, चांदी, उत्तमबस्त्र, कुलीन पुरुषकीस्त्री, बैलआदि पशु, शस्त्र और औषध इनके हरने में और मुख्यरत्नोंके हरने में बधकरना योग्यहै और दही, दूध, तक्र, पानी, रस, बांस आदिके बरतन, मृत्तिकाकेपात्र और भस्म इन बस्तुओंके चुरानेवाले पुरुषको राजा समय और बुद्धिके अनुसार दंडदेवे इसी प्रकार गौ भैंस आदिके भी चुरानेवाले को बुद्धिकेही अनुसार दंडदेवे १०१।१०५ घोड़ेके चुरानेवालेके आधे २ पैर कटवादेवे और सूत, कपास, मदिरा, गोबर, गुड़ मत्स्य, पक्षी, तेल, घृत, मांस, शहद, लवण आदिकोंके चुरानेवाले को इन वस्तुओं के मूलयसे दूना दंडदेवे १०६।१०८ खेतीमें पूर्णहुए अन्नके चुरानेवाले को पांचमासेका दंडदेवे और पकेहुए धान्य शाकमूल और फल इन सबके आधेके चुरानेवालेको सौ१००पणदंडदेवे मूलसमेत संपूर्ण चोरीकरनेवालेको दौसौपण दंडदेवे, जो चोर जिस २ अंगसे चोरीकी चेष्टाकरे उसकेउसी २ अंगको कटवादेवे और मार्गमें चलनेवाला भूखाब्राह्मण दोईखके गांड़े तथा मूलियोंको उपाड़लेतो कुछदोष नहींहै १०९।१११ दोककड़ी, दोखरबूजे, वा कोई दोफल अथवा सब धान्यों में से दोमुट्ठी अन्न ग्रहण करले और अनुमानके समान शाकलेले, बनके वृक्षोंके फलमूल, इन्धन और तृण इनवस्तुओं केलेनेकी चोरी नहीं कहातीहै यह मनुका वचनहै और देवताकी वाटिकाके विना अन्य स्थानके पुष्पोंको देवताके निमित्त लेआवे उसको कुछ दंडनहींहै, जो सींगवाले, नखवाले, और डाढ़वाले सिंह सर्प आदि जीवोंको मारदेताहै उसको कुछ दोषनहींहोता है यहमनुका वचनहै, ब्राह्मण- गुरु-

बालवृद्धंवा ब्राह्मणंवाबहुश्रुतम् ११६ आततायिनमायान्तं हन्यादेवाविचारयन्। आ
ततायिवधेदोषो हन्तुर्भवतिकश्चन ११७ प्रकाशंवाऽप्रकाशंवा मन्युस्तंमन्युमृच्छति। गृ
हक्षेत्राभिहर्तारस्तथागम्याभिगामिनः ११८ अग्निदोगरदश्चैव तथाचाभ्युद्यतायुधः।
अभिचारन्तुकुर्वाणो राजगामिचपैशुनम् ११९ एतेहिकथितालोके धर्मज्ञैराततायिनः।
परस्त्रीणान्तुसम्भाषे तीर्थेऽरण्येगृहेऽपिवा १२० नदीनाञ्चैवसम्भेदैः ससंग्रहणमाप्नुया
त्। नसम्भाषेत्सहस्त्रीभिः प्रतिषिद्धःसमाचरेत् १२१ प्रतिषिद्धेसमाभाष्य सुवर्णंदण्डम
र्हति। नैषचारणदारेषु विधिरात्मोपजीविषु १२२ सज्जयन्तिमनुष्यैस्ता निगूढंवाचर
न्त्युत। किञ्चिदेवतुदाप्यःस्यात्सम्भाषेणापचारयन् १२३ प्रेष्यासुचैवसर्वासु गृहप्रव्र
जितासुच। योऽकामांदूषयेत्कन्यां ससद्योबधमर्हति १२४ सकामांदूषमाणस्तु प्राप्नुया
द्विशतंदमम्। यश्चसंरक्षकस्तत्र पुरुषःसतथाभवेत् १२५ पारदारिकवद्दण्ड्योयोऽपि
स्यादवकाशदः। बलात्संदूषयेद्यस्तु परभार्यांनरःक्वचित् १२६ बधोदण्डोभवेत्तस्य ना
पराधोभवेत्स्त्रियः। रजस्तृतीयंयाकन्या स्वगृहेप्रतिपद्यते १२७ अदण्ड्यासाभवेद्राज्ञा
वरयन्तीपतिंस्वयम्। स्वदेशेकन्यकान्दत्त्वा तामादायतथाव्रजेत् १२८ परदेशेभवेद्व
ध्यः स्त्रीचोरःसयतोभवेत्। अद्रव्यांमृतपत्नीस्तु संगृह्णन्नापराध्यति १२९ सद्रव्यातां

बालक- और विद्वान् इनका मारनेवाला, आततायी पुरुष और चले आनेवाले पुरुषको जोविना
विचारेहुए मारदेवे तोउसका कुछ दोषनहीं है ११२। ११७ गृह क्षेत्रका हरनेवाला- अगम्यास्त्रीके
साथ भोग करनेवाला अग्नि लगानेवाला- विषदेने वाला शस्त्र उठाकर मारनेवाला अनुष्ठान करने
वाला- रांड़के संग भोग करनेवाला और चुगलखोर-ऐसे २ पुरुष आततायी कहातेहैं और तीर्थ वन
और अपनागृह इन्होंमें पराई स्त्रीके संग बतलानेवाला और नदियों का तोड़नेवाला ऐसापुरुष प-
कड़लेनेके योग्यहै और निषेधाकियेहुए पुरुषको एकान्त स्थानमें स्त्रियोंसे कभी न बतरानाचाहि-
ये ११८। १२१ जोनिषेध कियाहुआ पुरुष फिर पराई स्त्रियों से बतरावे उसको एकतोले चाँदी
अथवा सुवर्णका दंड देवे औरचारण दास आदिकों की स्त्रियों के संग बतराने में ऐसी विधि नहीं है
१२२क्योंकि यह नट चारण आदिकलोग अपनी स्त्रियोंको आजीविकाके निमित्त शृंगारकराकराकर
साथलिये विचरतेहैं उनस्त्रियोंसे कुछ मूल्यदेकर बतरानाचाहिये १२३ विना कामनावाली घरकी
दासियोंके संग जोमैथुन करताहै वह बधकरनेके योग्यहोताहै १२४ कामनायुक्त स्त्रीके संग मैथुन
करनेवालोंपर् बीसपणका दंडयोग्यहै और जोपुरुष उसकी रक्षामें प्रवृत्तहो उसपरभी इतनाही दंड
होनाचाहिये १२५ जोअपने घरमें ऐसे कर्मकरनेको स्थानदेताहै वहभी उसीजार पुरुषके समान
दंडपानेके योग्यहै जोपुरुषबलसे पराई स्त्री के संगभोगकरले उसका बधही करनादंड है और उस
स्त्रीमें कोई दोषनहीं है और कन्या अपने पिताके घरमें तीसरीबार रजस्वलाहोजावे उससमय जो
वह अपना पतिं आपहीढूंढ़े उसको राजा दंडनहींदेवे जोपुरुष अपने देशमें कन्याका विवाहकरके
उसको लेकर परदेस जाताहो वह स्त्रीका चोरहै और बधकरवाने के योग्य है और जोउसकी स्त्री

संगृहीता दण्डन्तुक्षिप्रमर्हति । उत्कृष्टंयाभजेत्कन्या देयातस्यैवसाभवेत् १३० यच्चान्यं सेवमानाञ्च संयतांवासयेद्गृहे । जघन्यमुत्तमानारी सेवमानातथैवच १३१ भर्त्तारंलङ्घयेद्यास्त्री ज्ञातिभिर्बलदर्पिता । ताञ्चनिष्कासयेद्राजा संस्थानेबहुसंस्थिते १३२ हताधिकारांमलिनां पिण्डमात्रोपजीविनीम् । वासयेत्स्वैरिणींनित्यं सवर्णेनाभिदूषिताम् १३३ ज्यायसादूषितानारी मुण्डनंसमवाप्नुयात् । वासश्चमलिनंनित्यं शिखांसंप्राप्नुयाद्दश १३४ ब्राह्मणःक्षत्रियोवैश्यः क्षत्रविट्शूद्रयोषितः । ब्रह्मदाप्योभवेद्राजा दण्डमुत्तमसाहसम् १३५ वैश्यागमेचविप्रस्य क्षत्रियस्यान्त्यजागमे । मध्यमंप्रथमंवैश्यो दण्ड्यः शूद्रागमाद्भवेत् १३६ शूद्रःसवर्णागमने शतंदण्ड्योमहीक्षिता । वैश्यस्तुद्विगुणंराजन् ! क्षत्रस्तुत्रिगुणन्तथा १३७ ब्राह्मणश्चभवेद्दण्ड्यस्तथाराजंश्चतुर्गुणम् । अगुप्तासुभवेद्दण्डः स्वगुप्तास्वधिकोभवेत् १३८ मातापितृष्वसाश्वश्रूर्मातुलानीपितृव्यजा । पितृव्यसखिशिष्यस्त्री गर्भिणीतत्सखीतथा १३९ भ्रातृभार्यागमेपूर्वाद्दण्डस्तुद्विगुणोभवेत् । चण्डालींश्वपाकीञ्च गच्छन्वधमवाप्नुयात् १४० तिर्य्यग्योनिञ्चगोवर्ज्यं मैथुनंयोनिसेवते । वपनंप्राप्नुयाद्दण्डं तस्याश्चयवसादिकम् १४१ सुवर्णञ्चभवेद्दण्ड्यो गांव्रजन्मनुजोत्तम ! । वेश्यागामीद्विजोदण्ड्यो वेश्याशुल्कसमम्पणम् १४२ गृहीत्वावेतनंवेश्या

अर्थात् कन्याकी माता मरगईहो तब निर्द्रव्यहोकर अपनी कन्याको लेकर जाताहो तोउसकाकोई दोषनहींहै १२६।१२६ द्रव्ययुक्तहोके जो कन्याको लियेजाताहो तोवहशीघ्रही दंडके योग्यहै और जो कन्या उत्तम वर्णवाले पुरुषको भजतीहो तोउसको उसीके अर्थदेदे १३० और जोअन्य किसी नीच वर्णको सेवतीहो उसकन्याको रोककररक्खे १३१ जोस्त्री अपने भाई बन्धुओंके बलसे गर्वितहोके अपने पतिके वचनको नहींमाने उसको राजा घरसे बाहर निकलवादेवे १३२ अधिकारसे रहित करके मलिनवस्त्रदेवे क्षुधासे निवृत्तिहोजानेके योग्य भोजनदेवे ऐसा करके अपने पड़ोसमें निवासकरवादे १३३ जोअत्यन्त दूषित स्त्रीहोवे उसका मुंडनकरवादेवे और मलिनवस्त्र पहिरावे १३४ जोब्राह्मण क्षत्रिय वैश्य और शूद्रकी स्त्रीके साथ मैथुनकरले उसको उत्तम साहसका दंडदेनायोग्यहै और ब्राह्मण वैश्यकी स्त्रीसे संगमकरे क्षत्रिय नीचजातिकी स्त्रीसे भोगकरे और वैश्य शूद्रकी स्त्रीका संभोगकरे तोउनको मध्यम साहस और प्रथम साहसोंका दंडदेवे १३५। १३६ जो शूद्रअपने वर्णकीस्त्रीसे संभोगकरे वह १०० पणदंडदेवे वैश्यासेकरे तो दूना क्षत्रियासेकरे तो तिगुना और ब्राह्मणीसेकरे तो चौगुना दंडयोग्यहै यह दंड विना रक्षितकीहुई स्त्रियोंके विषयमें कहाहै, जो रक्षितकीहुई स्त्रियों के संग भोगकरे वह इसपूर्व दंडसे अधिक दंडके योग्य है १३७। १३८ जो माता पिता की बहिन, सास, मामी, चाचाकी बेटी-चाची-मित्र की और शिष्यकी स्त्री, गर्भिणी, और भाई की स्त्री इनकेसंग मैथुनकरे वह पूर्वदंडसे द्विगुणदंडका अधिकारीहै और मेहतर और चांडाल की स्त्री के संग मैथुनकरनेवाले का बधदंड योग्यहै १३९। १४० जो पुरुष गधीआदि पशुकी योनि में मैथुनकरे उसका मुंडनहींकरवादेनादंडहै १४१ गौकेसाथ मैथुनकरनेवालेपर एकतोले चांदी का

लोभादन्यत्रगच्छति। वेतनंद्विगुणंदद्याद्दण्डञ्चद्विगुणंतथा १४३ अन्यमुद्दिश्ययोवेश्यां नयेदन्यस्यकारयेत्। तस्यदण्डोभवेद्राजन्! सुवर्णस्यचमाषकम् १४४ नीत्वाभोगान्न योदद्याद्दाप्योद्विगुणवेतनम्। राज्ञश्चद्विगुणंदण्ड तथाधर्म्मोनहीयते १४५ बहूनांव्रज तामेकां सर्वेतेद्विगुणन्दमम्। दद्युःपृथक्पृथक्सर्वे दण्डञ्चद्विगुणंपरम् १४६ नमातान पितानस्त्री नऋत्विक्याज्यमानवाः। अन्योन्यंपतितास्त्याज्या योगेदण्ड्याःशतानिषट् १४७ पतितागुरवस्त्याज्या नतुमाताकथञ्चन। गर्भधारणपोषाभ्यां तेनमातागरीयसी १४८ अधीयानोऽप्यनध्याये दण्ड्यःकार्षापणत्रयम्। अध्यापकश्चद्विगुणं तथाचारस्यलङ्घने १४९ अनुक्तस्यभवेद्दण्डः सुवर्णस्यचकृष्णलम्। भार्यापुत्रश्चदासश्च शिष्योभ्राताचसोदरः १५० कृतापराधास्ताड्याःस्यूरज्ज्वावेणुदलेनवा। पृष्ठतस्तुशरीरस्य नोत्तमाङ्गंकथञ्चन १५१ अतोऽन्यथाप्रहरतः प्राप्तःस्याच्चोरकिल्बिषम्। दूतींसमाह्वयंश्चैव योनिषिद्धंसमाचरेत् १५२ आच्छन्नंवाप्रकाशंवा सदण्ड्यःपार्थिवेच्छया। वासांसिफलकैःश्लक्ष्णैर्निर्णिज्याद्रजकःशनैः १५३ अतोऽन्यथाहिकुर्वंस्तु दण्ड्यःस्याद्रुक्ममाषकम्। रक्षास्वाधिकृतैश्चैव प्रदेयंयैर्विलुप्यते १५४ कर्षकेभ्योऽर्थमादाय यःकुर्यात्करमन्यथा। तस्यसर्वस्वमादाय तंराजाविप्रवासयेत् १५५ येनियुक्ताःस्वकार्येषु हन्युःकार्या

दंडयोग्यहै वेश्याके संग मैथुन करनेवाले द्विजजातिसे वेश्याके शुल्कमूल्यको दिवादेवे १४२ जो वेश्या अपने परिश्रमका मूल्यलेकर फिर किसी अन्यपुरुषकेपास चलीजाय तो उस वेश्यासे उसपुरुषको दियेहुए मूल्यसे द्विगुणमूल्य दिलादेवे १४३ जो अन्यका नाम लेकर किसी अन्यकेपास वेश्याको लेजावे वह एकमासे सुवर्ण के दंडयोग्य है १४४ जो पुरुष वेश्यासे भोगकरके उसकामूल्य नहीं देताहो उससे राजा उसमूल्यका द्विगुणदिवादेवे और उतनाही दंड आप लेले १४५ जो हठकरके बहुतसे पुरुष एक वेश्यासे मैथुन करलें उनकेपाससे राजा दूना२ मूल्य वेश्याको दिलवादेवे १४६ और पतितहुए माता, पिता, स्त्री-पुरोहित-और याजकोंको त्यागदेना योग्यहै परन्तु जो विनापतित हुए इनको त्यागदे वह सौ १०० पणदंडदेवे १४७ पतितहुए गुरुओंको त्यागदेवे परन्तु माताको कभी न त्यागे क्योंकि माता गर्भधारण करने से और पालन पोषणके करने से सबसे बड़ीहै १४८ जो अनध्यायमें पढ़े वह तीन पणदंड देवे और इस्से दूना अध्यापकको दंड देवे—और स्त्री पुत्र-दास-शिष्य-और सहोदरभाई यहसब अपराधकरें तो इनको रस्सीसे वा बेतसे पीठकेऊपर ताड़नकरे मस्तकपर कभी न मारे इस्से विपरीत मारनेवालेको चोरकासा दंड देवे, दूतीको बुलाताहुआ जो पुरुष निषिद्धवचनका आचरण करे उसको राजा अपनी इच्छाके अनुसार दंडदेवे और धोबीको सूक्ष्म वस्त्र बड़ेधीरेपने और सुघड़पने से धोनेचाहिये इसके विपरीत धोनेवाले धोबीपर एकमासे चांदीका दंडकरे और जो पुरुष किसीवस्तुकी रक्षाके निमित्त नियुक्त कियेगये हों उनके समक्षमें जो कोई वस्तुनष्टहोजाय वह वस्तु उन्हींसे लीजाय १४९।१५४ जो नम्बरदार किसानों से अधिक पृथ्वीकी भेजलेकर राजाको स्वल्प भेजदेवे उसका सर्वस्वधन छीनकर राजा अपने देशसे निकाल बाहरकरे

णिकार्यिणाम् । निर्घृणाःक्रूरमनसः सर्वैकर्मापराधिनः १५६ धनोष्मणापच्यमानास्तान्निःस्वान्कारयेन्नृपः । कूटशासनकर्त्तृंश्च प्रकृतीनाञ्चदूषकान् १५७ स्त्रीबालब्राह्मणघ्नांश्च बध्याद्विट्सेविनस्तथा । अमात्यःप्राड्विवाकोवायःकुर्यात्कार्यमन्यथा १५८ तस्यसर्वस्वमादाय तंराजाविप्रवासयेत् । ब्रह्मघ्नश्चसुरापश्चतस्करोगुरुतल्पगः १५९ एतान्सर्वान्पृथक्हिंस्यात्महापातकिनोनरान्। महापातकिनोबध्याब्राह्मणन्तुविवासयेत् १६० कृतचिह्नंस्वदेशाच्चशृणुचिह्नाकृतिन्ततः । गुरुतल्पेभगःकार्यःसुरापानेसुराध्वजः १६१ स्तेनेतुश्वपदन्तद्वद् ब्रह्महण्यशिराःपुमान् । असम्भाष्याह्यसम्भोज्या असंवाह्याविशेषतः १६२ त्यक्तव्याश्चतथाराजन् ! ज्ञातिसम्बन्धिबान्धवैः । महापातकिनोवित्तमादायन्नृपतिःस्वयम् १६३ अप्सुप्रवेशयेद्दण्डवरुणायोपपादयेत् । सहोढंनविनाचोरंघातयेद्धार्मिकोनृपः १६४ सहोढंसोपकरणं घातयेदविचारयन् । ग्रामेष्वपिचयेकेचिच्चोराणांभक्ष्यदायकाः १६५ भाण्डावकाशदाश्चैव सर्वांस्तानपिघातयेत् । राष्ट्रेषुराज्ञाधिकृताः सामन्ताश्चैवदूषकाः १६६ अभ्यघातेषुमध्यस्थाः क्षिप्रंशास्यास्तुचोरवत् । ग्रामघातेमठाभङ्गे पथिमोषाभिमर्द्दने १६७ शक्तितोनाभिधावन्तो निर्वास्याःसपरिच्छदाः । राज्ञःकोशापहर्तृंश्च प्रतिकू

१५५ जो अपने२ कार्य्योंपर नियुक्त होनेवाले राजपुरुष प्रजाके कार्य्योंको नष्टकरदें और दयारहित क्रूरस्वभाववाले होकर वसतेहों उन अपराधी पुरुषोंका सबधन राजा छीनलेवे इसीप्रकार मिथ्या आज्ञा प्रकटकरके प्रजाको दुःखदेतेहों उनकोभी यहीदंडदेवे १५६।१५७ स्त्री, बालक, और ब्राह्मण इनके मारनेवाले और राजाके शत्रुकी सेवाकरनेवालेको फाँसीदेवे जो मन्त्री अथवा न्यायकर्त्ता प्राड्विवाक अन्यथा कामकरताहो उसको सर्वस्वधन छीनकर राजा अपने देशसे बाहर निकलवादे और ब्रह्मघाती,मदिरापीनेवाले, चोर, और गुरुपत्नी से भोगकरनेवाले इनमहापातकी पुरुषों को पृथक्२ मारणकरदे और ब्राह्मणहोय तो उसे देशसे बाहर निकलवादे १५८।१६० अथवा इनसबको जुदे२ चिह्न अंकितकरके देशसे निकाले उनका यहक्रमहै कि गुरुपत्नी से भोगकरनेवालेके भगका चिह्न, मदिरा पीनेवालेके मदिराकी ध्वजाका चिह्न १६१ चोरके कुत्ते के पैरोंका चिह्न और ब्रह्महत्या करनेवाले के मनुष्यके शिरका चिह्नकरदे फिर इन चिह्नोंसमेत निकालेहुए पुरुषोंके साथ कोई संभाषण--भोजन--और वासकभी न करे १६२ हे राजा ऐसे सबलोग भाईबन्धुओंकरके भी त्याज्यहैं और इनके धनको राजालेकर जलमें डुबोकर वरुण देवताके निमित्त दानकरदे और चोरी करनेवाले जालसाज पुरुषकी जो चोरीके द्रव्यसे सत्यता न हो अर्थात् उसपर चोरीकरना निश्चय न हो तो उसे नहींमारे जिसपर निश्चयहोजाय उसे मरवाडाले और ग्राममें चोरोंके निमित्त जो खानपानदेते हों अथवा बरतनदेतेहों उनको भी मरवादेवे जो पुरुष राजाने अधिकारों परनियत रक्खेहों उन्होंने जो प्रजामें कोई दोष करदियाहो उनको भी चोरकेही तुल्य दंडदेवे जो ग्रामघाती स्थान भंग करनेवाले-मार्ग में,लूटनेवाले औरनिर्बल न भागनेवालोंको लूटतेहों उन पुरुषोंकी सब वस्तुओंको छीनकर उन्हेंदेशसे बाहर निकाल देवे और जोराजाके ख़ज़ानेको लूटें तथा राजाके शत्रुओंकी सहायता

लेषुसंस्थितान् १६८ अरीणामुपजर्तृंश्च घातयेद्विविधैर्वधैः । सन्धिंकृत्वातुयेचौर्यं रात्रौ
कुर्वन्तितस्कराः १६९ तेषांछित्वानृपोहस्तौ तीक्ष्णशूलेनिवेशयेत् । तड़ागभेदकंहन्यात्
अप्सुशुद्धबधेनतु १७० यस्तुपूर्वनिविष्टंस्यात्तड़ागस्योदकंहरेत् । आगमञ्चाप्यपांभि
न्द्यात्सदाप्यःपूर्वशासनम् १७१ कौष्ठागारायुधागारदेवागारविभेदकान् । पापान्पाप
समाचारान् घातयेच्छीघ्रमेवच १७२ समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि । सहिका
र्षापणंदण्ड्यस्तत्त्वमेध्यञ्चशोधयेत् १७३ अजङ्गमोऽथवावृद्धो गर्भिणीबालएववा । परि
भाषणमर्हन्ति नचशोध्यमितिस्थितिः १७४ प्रथमंसाहसंदण्ड्यो यश्चमिथ्याचिकित्सते ।
पुरुषेमध्यमंदण्डमुत्तमञ्चतथोत्तमे १७५ छत्रस्यध्वजयष्टीनां प्रतिमानाञ्चभेदकाः ।
प्रतिकुर्युस्ततःसर्वे पञ्चदण्ड्याःशतानिच १७६ अदूषितानांद्रव्याणां दूषणेभेदनेतथा ।
मणीनामपिभेदेन दण्ड्याःप्रथमसाहसम् १७७ समञ्चविषमञ्चैव कुरुतेमूल्यतोऽपिवा ।
समाप्नुयात्सवैपूर्वं दममध्यममेवच १७८ बन्धनानिचसर्वाणि राजमार्गेनिवेशयेत् । क
र्षन्तोयत्रदृश्यन्ते विकृताःपापकारिणः १७९ प्राकारस्यचभेत्तारं परिखानाञ्चभेदकम् ।
द्वाराणांचैवभेत्तारं क्षिप्रंनिर्वासयेत्पुरात् १८० मूलकर्माभिचारेषु कर्तव्योद्विशतोदमः ।
अबीजविक्रयीयश्च बीजोत्कर्षकएवच १८१ मर्यादाभेदकश्चापि विकृतंबन्धमाप्नुयात् ।
सर्वसङ्करपापिष्ठं हेमकारनराधिप ! १८२ अन्यायेवर्तमानञ्च च्छेदयेल्लवशःक्षुरैः । द्र

करतेहों उनकोभी अनेकप्रकारके वध उपायोंसे मरवादेवे जोपुरुष ऍडालगाकर या और प्रकारकासाज
लगाकर रात्रिमें चोरीकरतेहों उनके हाथोंमें शूलगडवादेवे और जो तडागको फुडवावे उसको जलमें
डुबोकर मारडाले १६३।१७० जो तडागादिक जलाशयोंमें आतेहुए जलकोरोके उसकोभी यही दंड
देवे १७१ जो पुरुष राजाके शस्त्रोंके स्थानको फोड़डाले तथा देवताओंके मन्दिरको फोड़डाले ऐसे
पापीपुरुषको शीघ्रही मरवाडाले १७२ जो पुरुष आपत्तिकालके विना राजकार्यमें अपवित्रवस्तुको
देदेकर वहाँसे शुद्धवस्तुओंको लेले उसपर तीन पणका दंडकरनायोग्यहै १७३ लंगड़ा-बंधाहुआ-
गर्भिणी और बालक इनसे झगड़कर वस्तुलेले और वस्तुको शुद्ध नहीं करे १७४ और जो बैद्यहो-
कर चिकित्साको बिगाड़दे उन सब पर प्रथम साहसका दंड करना योग्यहै १७५ छत्र-ध्वजा और
मूर्त्ति इनके छेदन करनेवाले पर पांच सौ पण का दंड करना योग्यहै और सबोंको मरवादेवे १७६
अच्छे द्रव्योंमें दोष लगानेवाले और मणि आदिकोंके भेदकर देनेवाले इनको प्रथम साहसका दंड
योग्यहै १७७ जो किसी वस्तुके मूल्यको विषमकरदेवे उसपर मध्यम साहसका दंड करना योग्यहै
और राजा सबकारागृहोंको अर्थात् जेलखानोंको अपने राजस्थानोंके समीप ऐसे स्थलमें बनवावे
जहाँ सब कैदी लोग दीखते रहें १७८।१७९ नगरके कोट खाई और दरवाजोंके फोड़नेवाले पुरुषों
को राजा अपने देशसे बाहर निकलवादेवे १८० और अज्ञानियोंके कार्य्य में दोष करनेवाले पर
दोसौ पण का दंड करे--जो कोई बुरेबीजको अच्छा बतलाकर बेचताहो तथा मर्य्यादाकी तोड़ताहो
उसका बंधनही करवादेवे जो सुनार अन्यायसे बर्त्ताव करनेवालाहोकर शुद्ध द्रव्यमें सब द्रव्योंको

व्यमादायवणिजामनर्घेणावरुन्धताम् १८३ द्रव्याणांदूषकोयस्तु प्रतिच्छन्नस्यविक्र
यी। मध्यमंप्राप्नुयाद्दण्डं कूटकर्तातथोत्तमम् १८४ राजापृथक्पृथक्कुर्याद्दण्डंचोत्तमसा
हसम्। शास्त्राणांयज्ञतपसां देशानांक्षेपकोनरः १८५ देवतानांसतीनाञ्च उत्तमंदण्डमर्ह
ति। एकस्यदण्डपारुष्ये बहूनांद्विगुणोदमः १८६ कलहोयद्गतोदाप्यो दण्डश्चद्विगुण
स्ततः। मध्यमंब्राह्मणंराजा विषयाद्विप्रवासयेत् १८७ लशुनञ्चपलाण्डुञ्च शूकरंग्राम
कुक्कुटम्। तथापञ्चनखंसर्वं भक्ष्यादन्यत्तुभक्षयेत् १८८ विवासयेत्क्षिप्रमेव ब्राह्मणंवि
षयात्स्वकात्। अभक्ष्यभक्षणेदण्ड्यःशूद्रोभवतिकृष्णलम् १८९ ब्राह्मणक्षत्रियविशां
चतुस्त्रिद्विगुणंस्मृतम्। यःसाहसंकारयति सदण्ड्योद्विगुणन्दमम् १९० यस्त्वेवमुक्त्वाह
न्दाता कारयेत्सचतुर्गुणम्। सन्दिष्टस्याप्रदाताच समुद्रगृहभेदकः १९१ पञ्चाशत्पणि
कोदण्डस्तत्रकार्य्योमहीक्षिता॥ अस्पृश्यञ्चास्पृशन्नार्य्यो ह्ययोग्योऽयोग्यकर्मकृत् १९२
पुंस्त्वहर्त्तापशूनाञ्च दासीगर्भविनाशकृत्। शूद्रप्रव्रजितानाञ्च दैवेपैत्रेचभोजकः १९३
अव्रजन्वाढमुक्त्वातु तथैवचनिमन्त्रणे। एतेकार्षापणशत सर्वेदण्ड्यामहीक्षिता १९४
दुःखोत्पादिगृहेद्रव्यं क्षिपेदन्धस्यकृष्णलम्। पितापुत्रविरोधेच साक्षिणांद्विशतोदमः।
स्यान्नरश्चतथार्य्यःस्यात्तस्याप्यष्टशतोदमः १९५ तुलाशासनमानानां कूटकृन्नाणकस्य
च। एभिश्चव्यवहर्ताच सदण्ड्योदममुत्तमम् १९६ विषाग्निदाम्पतिगुरु निजापत्यप्र

मिलादेवे उसको शस्त्रों से राजा कटवाडाले, और जो वैश्य व्यवहार वाली वस्तुओंको सस्ताकरके
रोकदेवे और द्रव्यों में दोष निकालदेवे और गुप्तकी हुई द्रव्यको बेचताहो उस पर राजा मध्यम
साहसका दंड करे, जो मिथ्या बोलकर किसी द्रव्यको बेचताहो उस पर भी यही दंड करना योग्य
है १८१। १८४ जो पुरुष शास्त्र-यज्ञ-तप-देश-देवता- और सती इनको नष्ट करदे उस पर उत्तम
साहसका दंड योग्यहै और एक कामको बहुतजने बिगाड़तेहों उनको पृथक् २ दूना दंडदेवे १८५
१८६ और लहसन- प्याज- शूकर-मुरगा और पंचनख वाले जीव इनके भक्षण करनेवाले ब्राह्मण
को राजा अपने देशसे निकालदेवे और जो इनको शूद्र भक्षणकरे उस पर एक रत्ती सुवर्णका दंड
करे १८७। १८९ और ब्राह्मण क्षत्रिय और वैश्य यह चौगुनं तिगुने और दूने हैं जो शूद्र इनमें
कलहकरवावे उसपर द्विगुणित दंडकरनायोग्यहै और जोकहै कि इसतुम्हारे झगड़ेका खर्च मैं दूंगा
उसविवादी पुरुषपर चौगुनादंड करनायोग्यहै, जो किसीके संदेशेको न कहे बन्दकियेहुए पिटारे और
ताले आदिको तोड़डाले उसपर ५०पण दंडकरे १९०।१९१ और जो उत्तमपुरुष अस्पृश्य वस्तुको
छूले अयोग्यकर्मकरे पशुओंको बधिया अर्थात् नपुंसककरे दासीकेगर्भको नष्टकरदे शूद्रजातिके संन्यासियोंको
देवकर्म और पितृकर्मोंमें भोजन करवावे और सत्यनिमंत्रणदेके फिर नहींबुलवावे ऐसेसब
पुरुषोंको राजा तीनसौ पणका दंडदेवे १९२।१९४ जो श्रेष्ठपुरुषकेघरमें काँटे आदिक गेरदेवे वहएक
रत्ती सुवर्ण दंडके योग्यहै और पितापुत्रके विरोधमें जो गवाही देवे वह दोसौ पण दंडकेयोग्यहै और
श्रेष्ठ धर्मशास्त्र अर्थात् उत्तमकानूनका जाननेवालाहो जो मिथ्यासाक्षी अर्थात् गवाहीदेताहो उसपर

मापणीम् । विकर्णनासिकांव्योष्ठीं कृत्वागोभिःप्रमापयेत् १९७ खलस्यदाहकायेच येच क्षेत्रस्यवेश्मनः । राजपत्न्यभिगामीच दग्धव्यास्तेकटाग्निना १९८ ऊनंवाप्यधिकञ्चापि लिखेद्योराजशासनम् । पारदारिकचौरंवा मुञ्चतोदण्डउत्तमः १९९ अभक्ष्येण द्विजंदूष्य दण्डउत्तमसाहसः । क्षत्रियंमध्यमंवैश्यं प्रथमंशूद्रमर्द्धकम् २०० मृताङ्गलग्नविक्रेतुर्गांतुताडयतस्तथा । राजयानासनारोढुर्दण्डउत्तमसाहसः २०१ योमन्येताजितोऽस्मीति न्यायेनापिपराजितः । तमायान्तंपुनर्जित्वा दण्डयेत्द्विगुणन्दमम् २०२ आह्वानकरोमध्यःस्यादनाह्वानेतथाह्वयन् । दण्डिकस्यचयोहस्तादभियुक्तःपलायते २०३ हीनपुरुषकारेणतंदण्ड्याद्दाण्डिकोधनम् । प्रेष्यापराधात्प्रेष्यस्तु सदण्ड्याश्चार्द्धमेवच २०४ दण्ड्यार्थंनियमार्थञ्च नीयमानेषुबन्धनम् । यदिकश्चित्पलायेत दण्डश्चाष्टगुणो भवेत् २०५ अनिन्दितेविवादेतु नखरोमावतारणम् । कारयेद्यःसपुरुषो मध्यमंदण्डमर्हति २०६ बन्धनञ्चाप्यबध्यस्य बलान्मोचयतेतुयः । बध्यंविमोचयेद्यस्तु दण्डाद्द्विगुणभाग्भवेत् २०७ दुर्दृष्टव्यवहाराणां सभ्यानांद्विगुणोदमः । राज्ञात्त्रिशद्गुणोदण्डः प्रक्षेप्यउदकेभवेत् २०८ अल्पदण्डेऽधिकंकुर्य्याद्विपुलेचाल्पमेवच । ऊनाधिकन्तुतंदण्डं सभ्योदद्यात्स्वकाद्गृहात् २०९ यावानबध्यस्यबधे तावान्बध्यस्यरक्षणे । अधर्मोनृपतेर्द

८००पणका दंड करना योग्यहै जो पुरुष जाली तराजू और बांटबनाकर व्यवहारकरता हो उसपर उत्तम साहसका दंडकरना योग्यहै १९५।१९६ जोस्त्री अपने पुत्र पति और गुरुआदिको विष अग्नि आदिसे मारडाले उसके कान नाकको काटकर गौओंके समीप मरवावे-जो अन्यके अन्नके खरियान खेत और घरोंको जलावे अथवा जो रानीके संग मैथुनकरताहो इन सबलोगों को फसकी अग्निसे जलादे १९७।१९८ जो राजाके प्रचलित पत्रमें अर्थात् स्टाम्पके काग़ज़पर न्यूनाधक लिखदेवे और जिसने पराई स्त्री चुरालीहो यह दोनों उत्तम साहस दंडकेयोग्य हैं १९९ जो ब्राह्मणको अभक्ष्य वस्तु खिलाकर दूषितकरडाले वहभी उत्तम साहसके दंडकेयोग्यहै क्षत्रियको दूषितकरनेपर मध्यम साहसदंड, वैश्यको दूषितकरनेपर प्रथम साहसदंड और शूद्रके दूषितकरनेवाले को प्रथमसे आधा अर्थात् १३५ पणकादंडदेवे २०० कफ़नबेचनेवाले-किसीको ताड़नकरनेवाले-और राजाकी सवारी पर बैठनेवाले इन सबपर उत्तम साहसका दंड करनायोग्यहै २०१ और जो न्यायसे हाराहुआ पुरुष फिर अपना मुक़द्दमा दायरकरे उसको हरानेके पीछे दूनादंडदेवे २०२ जो पुरुष बुलानेसे भी राजद्वारमें नहीं आवे अथवा किसी राजाके सिपाही के हाथसे अपराधी छूटकर भागजावे इन दोनों पर अपराधी से आधा दंडकरे, जो कोई पुरुष दंडदेने के लिये तथा नियमके निमित्त बाँधरक्खाहो वह भागजावे उसपर अष्टगुणित दंडकरे २०३।२०५ जो पुरुष निन्दारहित विवादों में किसी के नख तथा बालोंको कटवादेवे वह मध्यम साहस दंडके योग्यहै २०६ जो बंधन कियेहुए पुरुषके बन्धनको बलसे छुड़वादेवे और मारनेके योग्य पुरुषको छोड़देवे उसपर अपराधी पुरुषसे दूना दंड करना योग्य है २०७ जो राजाकी सभाके पुरुषों ने मिथ्या मुक़द्दमा करदियाहो तो उन सभ्य

ष्टस्तथावध्यस्यमोक्षणे २१० ब्राह्मणंनैवहन्यात्तु सर्वपापेष्ववस्थितम्। प्रवासयेत्स्वकाद्राष्ट्रात्समग्रधनसंयुतम् २११ नजातुब्राह्मणंबध्यात्पालकंत्वधिकंभवेत्। यस्मात्तस्मात्प्रयत्नेन ब्रह्महत्यांविवर्जयेत् २१२ अदण्ड्यान्दण्डयेद्राजा दण्डांश्चैवाप्यदण्डयन्। अयशोमहदाप्नोति नरकञ्चाधिगच्छति २१३ ज्ञात्वापराधंपुरुषस्यराजा कालंतथाचानुमतंद्विजानाम्। दण्ड्येषुदण्डंपरिकल्पयेत्तु मोयस्ययुक्तःससमीक्ष्यकुर्य्यात् २१४॥

इतिश्रीमत्स्यपुराणे षड्विंशदधिकद्विशततमोऽध्यायः २२६ ॥

(मनुरुवाच) दिव्यांन्तरिक्षभौमेषु याशान्तिरभिधीयते। तामहंश्रोतुमिच्छामि महोत्पातेषुकेशव ! १ (मत्स्य उवाच) अथातःसंप्रवक्ष्यामि त्रिविधामद्भुतादिषु। विशेषेणतुभौमेषु शान्तिःकार्य्यातथाभवेत् २ अभयाचान्तरिक्षेषु सौम्यादिव्येषुपार्थिव!। विजिगीषुःपरंराजन्! भूतिकामस्तुयोभवेत् ३ विजिगीषुपरानेवमभियुक्तस्तथापरैः। तथाभिचारशङ्कायां शत्रूणामभिनाशने ४ भयेमहतिसंप्राप्ते अभयाशान्तिरिष्यते। राजयक्ष्माभिभूतस्य क्षतक्षीणस्यचाप्यथ ५ सौम्याप्रशस्यतेशान्तिर्यज्ञकामस्यचाप्यथ। भूकम्पेचसमुत्पन्ने प्राप्तेचान्नक्षयेतथा ६ अतिवृष्ट्यामनावृष्ट्यां शलभानांभयेषुच। प्र

पुरुषोंको उस मुकद्दमे से दूना दंडदेना योग्यहै उस दंडके द्रव्यमें से राजा तृतीयांश करुण देवताके निमित्त दानकरदे २०८ जो सभासद पुरुष थोड़े दंडमें विशेष और विशेषमें थोड़ादंडदेवे तो उसकी कमी अपने घरसे करदेवे २०९ राजाको अवध्य पुरुषके वधकरनेमें जो दोषहोताहै वही दोषवध्य अपराधी पुरुषकी रक्षाकरने और छोड़देने में होताहै २१० सब पापकरनेवाले भी ब्राह्मणको नहीं मरवावे किन्तु उसका धन छीनकर उसको राज्यसे बाहर निकलवादेवे २११ ब्राह्मणका वध कभी नकरें ब्राह्मण के वधकरने में अधिक पापहोताहै इस हेतुसे सदैव ब्रह्महत्या से बचना योग्यहै २१२ जो राजा दंडदेने के योग्य पुरुषको दंडनहीं देताहै औरअदण्ड्य पुरुषको दंडदेताहै उस राजाको महाभारी अपयश होताहै और नरककी भी अवश्य प्राप्ति होतीहै २१३ राजा अपराधी के अपराध और समयको विचारकर ब्राह्मणों के मतसे जैसा जिसको उचित समझे वही दंडदेवे २१४॥

इतिश्रीमत्स्यपुराणभाषाटीकायांषड्विंशदधिकद्विशततमोऽध्यायः २२६ ॥

मनुजी ने पूछा—हे भगवन् आकाश, पृथ्वीलोक और देवलोक में होनेवाले आन्तरिक्ष—भौम और दिव्य इन महान् उत्पातों के शान्त करनेवाली जो शान्ति है उसको मैं सुननेकी इच्छा करता हूं १ मत्स्यजी बोले कि मैं तीन प्रकारकी शान्तियों को तुमसे कहताहूं इन सबमें विशेष करके पृथ्वी के उत्पातों की शान्ति अवश्य करनी चाहिये २ हे राजन् आकाश में शान्ति अभय होतीहै और देवलोक में सौम्य होती है जो ऐश्वर्य्य की इच्छा करनेवाला पुरुष शत्रुओं से पीड़ित होरहा हो उसको शत्रुओं के नाशके निमित्त आकाशवाली अभया शान्ति करनी चाहिये और क्षयीरोग और क्षतक्षीण आदि रोगोंमें सौम्याशान्ति करनी योग्यहै, यज्ञकी कामनावालेको भूकम्प उत्पातमें--अन्न के क्षयमें—अतिवृष्टिमें—अनावृष्टिमें टीड़ियों के भयमें और प्रबलचोरों के भय में वैष्णवी शान्ति

वाचाथसर्वेषां देवानांभयकारकः। सर्वान्वोभक्षयिष्यामि अथवामापिवस्तथा ४४ तम
शक्तावयंग्रस्तुं सोऽस्मान्शक्तोबलोत्कटः। एषनिश्वासमात्रेण शतपर्वसमद्युतिः ४५
विष्णुःकृष्णःकृतस्तेन यमश्चविषमात्मवान्। मूर्च्छिताःपतिताश्चान्ये विप्रणाशङ्गताःप
रे ४६ अर्थोऽनर्थक्रियांयाति दुर्भगानांयथाविभो !। दुर्बलानाञ्चसङ्कल्पो यथाभवतिचा
पदि ४७ विषमेतत्समुद्भूतं तस्माद्वामृतकांक्षया। अस्माद्भयान्मोचयत्वं गतिस्त्वञ्चपरा
यणम् ४८ भक्तानुकम्पीभावज्ञो भुवनाधीश्वरोविभुः। यज्ञाग्रभुक्सर्वहविः सौम्यःसोमः
स्मरान्तकृत् ४९ त्वमेकोनोगतिर्देव गीर्वाणगणशर्मकृत्। रक्षास्मान्भक्षसङ्कल्पाद्वि
रूपाक्ष ! विषज्वरात् ५० तच्छ्रुत्वाभगवानाह भगनेत्रान्तकृद्भवः। भक्षयिष्याम्यहंघोरं
कालकूटंमहाविषम् ५१ तथान्यदपियत्कृत्यं कृच्छ्रसाध्यंसुरासुराः ! तच्चापिसाधयिष्यामि
तिष्ठध्वंविगतज्वराः ५२ इत्युक्ताहृष्टरोमाणो बाष्पगद्गदकण्ठिनः। आनन्दाश्रुपरीताक्षाः
सनाथाइवमेनिरे। सुराब्रह्मादयःसर्वे समाश्वस्ताःसुमानसाः ५३ ततोऽव्रजद्द्रुतगति
नाककुक्षिना हरोऽम्बरेपवनगतिर्जगत्पतिः। प्रधावितैरसुरसुरेन्द्रनायकैः स्ववाहनैर्विगृ
हीतशुभ्रचामरैः। पुरःसरैःसतुशुशुभेशुभाश्रयैः शिवोवशीशिखिकपिशोर्ध्वजूटकः ५४
आसाद्यदुग्धसिन्धुंतं कालकूटंविषंयतः। ततोदेवोमहादेवो विलोक्यविषमंविषम् ५५
छायास्थानकमास्थाय सोऽपिबद्वामपाणिना। पीयमानेविषेतस्मिंस्ततोदेवाःमहासुराः

तीक्ष्ण हलाहलकालकूट नाम विषनिकलाहै वह विष हम सबसे कहताहै कि मैं तुम सबको भक्षण करूंगा नहीं तो तुम मुझको पियो ४३। ४४ जब हमारा उसपर वश न चलसका तब सब आपकी शरण में आये हैं वह विषबिजली के तेजके समान श्याम लेताहै उसने विष्णुको काला करदिया धर्मराजको विषम आत्मावाला किया कितनेही मूर्च्छित होगिरे और कितनेही नष्ट करदिये ४५।४६ हे विभो जैसे कि दुर्भगा स्त्रियोंका अर्थ अनर्थ की क्रियाको प्राप्त होताहै और जैसे विपत्तिकालमें दुर्बल मनुष्यों के संकल्प सफल नहीं होते उसीप्रकार हम सब अमृतकी इच्छा करनेवालोंको यह विष प्राप्त होगया है सो हम सब आपकी शरण में आये हैं आप शरणागतवत्सल होकर हमारी रक्षाकीजिये ४७। ४८ आप भक्तोंपर अनुग्रह करनेवाले, सब भाव के ज्ञाता, महेश्वर यज्ञके अग्रभागी सौम्य सोम और कामदेव के अन्तकहो आपही केवल हमारी गति हो गणोंकी रक्षा करनेवाले हो हेदेव आपही हमको इस भक्षण करने की इच्छाकरनेवाले महाकाल रूप विषसे बचाइये ४९।५० यह वचन सुनकर महादेवजीने कहा कि उस कालकूटनामी विषको मैं भक्षण करूंगा ५१ और जो तुम सब देवता दैत्योंका अन्य कोई दुस्साध्य कार्य्यहोगा उसको भी मैंकरूंगा ५२ यह शिवजी के वचन सुनकर सबके रोमांचखड़े होकर नेत्रोंसे आनन्दके अश्रुपात गिरनेलगे सब प्रसन्न होगये ५३ इसके पीछे जगत्पति महादेवजी वायु की गति करके आकाश मार्गसे गमन करतेभये तब देवता और दानव भी अपने २ वाहनों समेत हाथोंमें श्वेत २ चमरोंको लेकर शिवजी के पीछे२भाजते भये ५४ तब महादेवजी क्षीरसमुद्रके समीप प्राप्तहोकर उस कालकूट विषको देखतेभये ५५ फिर

५६ जगुश्चननृतुश्चापि सिंहनादांश्चपुष्कलान्। चक्रुःशक्रमुखाद्याश्च हिरण्याक्षाद
यस्तथा ५७ स्तुवन्तश्चैवदेवेशं प्रसन्नाश्चाभवंस्तदा। कण्ठदेशेततःप्राप्ते विषेदेवमथा
ब्रुवन् ५८ विरिञ्चिप्रमुखादेवा बलिप्रमुखतोऽसुराः। शोभतेदेव! कण्ठस्ते गात्रेकुन्दनि
भप्रभे ५९ भृङ्गमालानिभंकण्ठेऽप्यत्रैवास्तुविषंतव। इत्युक्तःशङ्करोदेवस्तथाप्राहपुरा
न्तकृत् ६० पीतेविषेदेवगणान्विमुच्य गताहरोमन्दरशैलमेव। तस्मिन्गतेदेवगणाः
पुनस्तं ममन्थुरब्धिंविविधप्रकारैः ६१॥

इतिश्रीमत्स्यपुराणेएकोनपञ्चाशदधिकद्विशततमोऽध्यायः २४९॥

(सूतउवाच) मथ्यमानेपुनस्तस्मिन् जलधौसमदृश्यत। धन्वन्तरिःसभगवान्
आयुर्वेदप्रजापतिः १ मदिराचायताक्षीसा लोकचित्तप्रमाथिनी। ततोऽमृतञ्चसुरभिः स
र्वभूतभयापहा २ जग्राहकमलांविष्णुः कौस्तुभञ्चमहामणिम्। गजेन्द्रञ्चसहस्राक्षो हय
रत्नञ्चभास्करः ३ धन्वन्तरिश्चजग्राह लोकारोग्यप्रवर्तकम्। छत्रंजग्राहवरुणः कुण्डले
चशचीपतिः ४ पारिजाततरुंवायुर्जग्राहमुदितस्तथा। धन्वन्तरिस्ततोदेवो वपुष्मानुद
तिष्ठत ५ श्वेतंकमण्डलुंबिभ्रदमृतंयत्रतिष्ठति। एतदत्यद्भुतंदृष्ट्वा दानवानांसमुत्थितः ६

छाया के स्थान में प्राप्तहोकर वह शिवजी अपने वाम हस्तसे उस विषको पीजातेभये जब शिव
जी विषको पीनेलगे तब देवता और सब दानव सिंहके समान शब्द करनेलगे और गानपूर्वक
नृत्यभी करतेभये और विष पानकरते महादेवजीकी ब्रह्माआदिक बड़े २ देवता स्तुतिकरते भये जब
शिवजी के कण्ठमें विष प्राप्तहोगया उस समय देवता और दैत्यों समेत बलिदानव महा प्रसन्नहोकर
यह वचन बोले हेकुन्दके समान श्वेत कान्तिवाले आपके कण्ठमें यह विष महाशोभा देरहाहै ५६।५९
इसके कारण भौंरों कीसी मालाधारण किये यह आपका कण्ठ अत्यन्तही शोभादेरहाहै यह सुनकर
महादेवजीने कहा कि अच्छा यह विष कंठमें धारणकरूंगा नीचे न जानेदूंगा इस प्रकार शिवजी विष
को पानकरके अपने स्थानको जातेभये और देवता दानव दोनों फिर उस समुद्रको मथनेलगे६०।६१॥

इति श्रीमत्स्यपुराणभाषाटीकायामेकोनपंचाशदधिकद्विशततमोऽध्यायः २४९॥

सूतजीबोले--कि जब यह समुद्र फिर मथागया तब उसमें से आयुर्वेदका प्रजापति धन्वन्तरि
नाम वैद्य निकलता भया १ इस वैद्य के पीछे चित्तकी मथन करनेवाली मदिरा निकली फिर अमृत
निकला तदनन्तर सबके भयके दूरकरनेवाली सुरभि गौ उत्पन्न होतीभई २ फिर लक्ष्मी को और
कौस्तुभ मणिको तो विष्णु भगवान् ग्रहणकरतेभये और फिर ऐरावत हाथी निकला उसको इन्द्र
ग्रहण करलेताभया-सप्तमुख घोड़ेको सूर्य्यने ग्रहणकरलिया ३ और धन्वन्तरि वैद्य लोकों के आरोग्य
करनेवाले होतेभये और छत्रभी निकसा उसको वरुण ग्रहण करतेभये फिर दोकुंडल निकले उनको
भी इन्द्रनेही ग्रहण करलिया ४ पारिजात कल्पवृक्षको वायुने ग्रहण करलिया फिर धन्वन्तरि वैद्य
उत्तम शरीर को धारणकर हाथमें कमंडलु लेके वहाँ पहुंचे जहाँ कि वह अमृत वर्त्तमानथा तब दे-
वता और दैत्य अमृत के निमित्त हमाराहै हमाराहै यह शब्द पुकारतेभये उस समय विष्णु भगवान

अमृतार्थेमद्दानादो ममेदमितिजल्पताम्। ततोनारायणोमायामास्थितोमोहिनींप्रभुः ७ स्त्रीरूपमतुलंकृत्वा दानवानभिसंस्मृतः। ततस्तदमृतंतस्यै ददुस्तेमूढचेतनाः। स्त्रियैदानवदैतेयाः सर्वेतद्गतमानसाः ८ अथास्त्राणिचमुख्यानि महाप्रहरणानिच। प्रगृह्याभ्यद्रवन्देवान् सहितादैत्यदानवाः ९ ततस्तदमृतंदेवो विष्णुरादायवीर्यवान्। जहारदानवेन्द्रेभ्यो नरेणसहितःप्रभुः १० ततोदेवगणाःसर्वे पपुस्तदमृतंतदा। विष्णोःसकाशात्संप्राप्य संग्रामेतुमुलेसति ११ ततःपिवत्सुतत्कालं देवेष्वमृतमीप्सितम्। राहुर्विबुधरूपेण दानवोऽप्यपिवत्तदा १२ तस्यकण्ठमनुप्राप्ते दानवस्यामृतेतदा। आख्यातंचन्द्रसूर्याभ्यां सुराणांहितकाम्यया १३ ततोभगवतातस्य शिरश्छिन्नमलंकृतम्। चक्रायुधेनचक्रेण पिवतोऽमृतमोजसा १४ तच्छैलशृङ्गप्रतिमं दानवस्यशिरोमहत्। चक्रेणोत्कृतमपतच्चालयन्वसुधातलम् १५ ततोवैरविनिर्बन्धः कृतोराहुमुखेनवै। शाश्वतश्चन्द्रसूर्याभ्यां प्रसह्याद्यापिबाधते १६ विहायभगवांश्चापि स्त्रीरूपमतुलंहरिः। नानाप्रहरणैर्भीमैर्दानवान्समकम्पयत् १७ प्रासाःसुविपुलास्तीक्ष्णाः पतन्तश्चसहस्रशः। तेसुराश्चक्रनिर्भिन्ना वमन्तोरुधिरंवहु १८ असिशक्तिगदाभिन्ना निपेतुर्धरणीतले। भिन्नानिपट्टिशैश्चापि शिरांसियुधिदारुणैः १९ तप्तकाञ्चनमाल्यानि निपेतुरनिशन्तदा। रुधिरेणावलिप्ताङ्गा निहताश्चमहासुराः २० अद्रीणामिवकूटानि धातुरक्तानिशेरते। त

अपनी मायाकरके मोहिनी स्त्रीके रूपको धारणकरतेभये ५।७ अर्थात् वड़ी उत्तम स्त्रीका रूपबनाकर दानवोंको मोहित करतेभये उस स्त्रीरूपी विष्णु भगवान् के हाथमें वह दानव उस अमृत के कलश को देतेभये और सब दैत्य उसी मोहिनी स्त्रीके वशीभूत होगये फिर सब दैत्य अपने २ शस्त्रों को धारण करके देवताओं के सन्मुख भाजतेभये तब विष्णु भगवान् अपनी मायाके कपटसे सब देवताओं को अमृत पानकरातेभये जब देवताओं ने विष्णु के पाससे अमृत पानकिया तब देवता और दानवों का महायुद्ध होताभया जब देवताओं ने अमृत पानकिया उस समय राहुभी देवताका रूप धारणकरके अमृत पानकरने लगा ८।१२ जब राहुके कंठही तक अमृत पहुंचाथा तभी चन्द्रमा और सूर्य्यने देवताओं के हितके निमित्त इस दैत्यको वतादिया उसी समय विष्णु भगवान् ने अपने सुदर्शन चक्रके द्वारा उस राहुके शिरको काटलिया तभीसे पर्व्वतके आकारवाला इस राहुका शिरभी जीवसहित होगयाहै उसीको केतु कहतेहैं इस राहुके मुखरूप केतुने चन्द्रमा और सूर्य्यसे वैर भावकर लिया इसीसे वह राहुका मुख अवतक ग्रहण समयमें सूर्य्य और चन्द्रमाके साथ उस शत्रुताका बदला लिया करताहै १३।१६ इसके अनन्तर विष्णुभगवान् मोहिनी स्त्रीके रूपको त्याग कर अनेक प्रकार के शस्त्रोंके प्रहारसे दैत्योंको वाधा देतेभये १७ तीक्ष्ण धारके हजारों भालों से और सुदर्शनचक्रसे वह सब दैत्य रुधिरकी वमन करतेभये १८ खड्ग शक्ति गदा और शूल इन सब शस्त्रोंके लगनेसे वहुत से दैत्य पृथ्वी में गिरे और कितनेही दैत्योंके शिर दारुण गोफियोंके लगने से फटजातेभये १९ इसके पीछे रुधिरसे लिप्तांग तप्तसुवर्णके समान कान्तिवाले वह बड़े २ असुर मृत्युको प्राप्त

तोहलहलाशब्दः सम्बभूवसमन्ततः २१ अन्योऽन्यञ्छिन्दतांशस्त्रैरादित्येलोहिताय
ति। परिघैश्चायसैःपीतैः सन्निकर्षैश्चमुष्टिभिः २२ निघ्नतांसमरेऽन्योऽन्यंशब्दोदिव
मिवास्पृशत्। छिन्धिभिन्धिप्रधावेति पातयेभिसरेतिवै २३ विश्रूयन्तेमहाघोराः श
ब्दास्तत्रसमन्ततः। एवंसुतुमुलेयुद्धे वर्त्तमानेमहाभये २४ नरनारायणौदेवौ समाज
ग्मतुराहवम्। तत्रदिव्यंधनुर्दृष्ट्वा नरस्यभगवानपि। चिन्तयामासवैचक्रं विष्णुर्दान
वसत्तमान् २५ ततोऽम्बराच्चिन्तितमात्रमागतं महाप्रभंचक्रममित्रनाशनम्। विभा
वसोस्तुल्यमकुण्ठमण्डलं सुदर्शनंभीममसह्यमुत्तमम् २६ तदागतंज्वलितहुताशन
प्रभं भयङ्करंकरिकरबाहुरच्युतः। महाप्रभंदनुकुलदैत्यदारणं तथोज्ज्वलज्ज्वलनसमा
नविग्रहम् २७ मुमोचवैतपनमुदप्रवेगवान् महाप्रभंरिपुनगरावदारणम्। सम्वर्त्तकज्व
लनसमानवर्चसं पुनःपुनर्न्यपततवेगवत्तदा २८ व्यदारयद्दितितनयान्सहस्रशः करेरि
तंपुरुषवरेणसंयुगे। दहत्क्वचिज्ज्वलनइवानिलेरितं प्रसह्यतानसुरगणानकृन्तत २९
प्रवेरितंवियतिमुहुःक्षितौतदा पपौरणेरुधिरमयःपिशाचवत्। अथासुरागिरिभिरदीन
मानसा मुहुर्मुहुःसुरगणमर्दयंस्तथा ३० महाचलाविगलितमेघवर्चसः सहस्रशोगगन
महाप्रपातिनः। अथान्तराभरजननाःप्रपेदिरे सपादपावहुविधमेघरूपिणः ३१ महाद्र
यःप्रविगलिताग्रसानवः परस्परंद्रुतमभिपत्यभास्वराः। ततोमहीप्रचलितसाद्रिकानना

होकर पृथ्वी में गिरतेभये २० जैसे कि गेरूके पर्व्वतके शिखर कट २ कर गिर पड़े हों इसी प्रकार
यह महान् असुरभी मर २ कर गिरतेभये उनके गिरने और युद्धकरने से बड़ाभारी कोलाहल शब्द
होताभया २१ परस्पर प्रहार करते हुए उनसबके शस्त्रसूर्य्यके समान रक्तवर्ण होजातेभये इसी प्रकार
परस्पर युद्धकरते हुए उन सब दैत्योंके महान् शब्द स्वर्ग में सुनेजातेभये इनके सिवाय परस्पर
काटो २ तोड़ो२ भाजो२ गिरादो २ यह सब शब्दभी होतेभये २२।२३ जबचारों ओरके महाशब्दों
वाला घोर युद्ध प्रवृत्तहुआ तब उस युद्ध में नरनारायण देव आतेभये और विष्णुभगवानभी
नर अवतारके धनुषको देखकर अपने सुदर्शनचक्रकी इच्छा करतेभये उसी समय आकाश से शत्रुओंका
नाशक सुदर्शनचक्र उतरताभया, उस सूर्य्यके समान कान्तिवाले शत्रुओंके भय कर्त्ता ज्वलित
अग्निके समान देदीप्त दैत्योंके कुलके नाश करनेवाले उस सुदर्शनचक्रको आताहुआ देखकर
विष्णुभगवान् अति वेगकरके उस शत्रुहन्ता अपने अस्त्रको दैत्योंके ऊपर छोड़देते भये तब वह
सुदर्शनचक्र बड़े वेगसे वारंवार शत्रुओंके ऊपर गिरताभया २४।२८ फिर उस भगवानके हाथमें
प्राप्तहोने वाले चक्रने हज़ारों दैत्योंको काटा और हज़ारोंहीको अपने वलकरके काट २ करगेरा २९
इस प्रकारसे उस चक्रने महा निर्दयीरूपहोकर हज़ारों दैत्योंको मार २ कर उनके रुधिरका पान
किया उस समय उसचक्रकी झपटके वेगसे महामेघके समान आकार वाले बड़े २ वृक्षोंसे युक्त
वहुत से पर्व्वतभी परस्पर मिल२ कर गिरतेभये फिर वायुसे हतहुए उन पर्व्वतोंके गिरनेसे संपूर्ण
पृथ्वी चलायमान होगई और परस्पर गर्जनेके भी शब्दहोते भये उन देवता और दैत्योंके परस्पर

महीधराःपवनहताःसमन्ततः ३२ परस्परंभृशमभिगर्जितंमुहूरणाजिरेभृशमभिसम्प्रवर्त्तते ।
नरस्ततोवरकनकाग्रभूषणैर्महेषुभिःपवनपथंसमावृणोत् ३३ विदारयन्गिरिशिखराणिप
त्रिभिर्महाभयेसुरगणविग्रहेतदा। ततोमहीलवणजलञ्चसागरं महासुराःप्रविविशुरर्दिताः
सुरैः ३४ वियद्गतंज्वलितहुताशनप्रभंसुदर्शनंपरिकुपितंनिशाम्यच । ततःसुरैर्विजयम
वाप्यमन्दरः स्वमेवदेशंगमितःसुपूजितः ३५ विनादयन्स्वदिशमुपेत्यसर्वशस्ततोगताः
सलिलधरायथागतम्। ततोऽमृतंसुनिहितमेवचक्रिरे सुराःपरांमुदमभिगम्यपुष्कलाम् ।
ददुश्चतंनिधिममृतस्यरक्षितुं किरीटिनेबलिभिरथामरैःसह ३६ ॥

इतिश्रीमत्स्यपुराणेपञ्चाशदधिकद्विशततमोऽध्यायः २५० ॥

(ऋषय ऊचुः) प्रासादभवनादीनां निवेशंविस्तराद्वद। कुर्य्यात्केनविधानेन कश्च
वास्तुरुदाहृतः १ (सूत उवाच) भृगुरत्रिर्वसिष्ठश्च विश्वकर्मामयस्तथा। नारदोनग्न
जिच्चैव विशालाक्षःपुरन्दरः २ ब्रह्माकुमारोनन्दीशः शौनकोगर्गएवच। वासुदेवोऽनिरु
द्धश्च तथाशुक्रबृहस्पती ३ अष्टादशैतेविख्याता वास्तुशास्त्रोपदेशकाः। सङ्क्षेपेणोप
दिष्टन्तु मनवेमत्स्यरूपिणा ४ तदिदानींप्रवक्ष्यामि वास्तुशास्त्रमनुत्तमम्। पुरान्धकव
धेघोरे घोररूपस्यशूलिनः ५ ललाटस्वेदसलिल मपतद्भुविभीषणम्। करालवदनं
तस्माद् भूतमुद्भूतमुल्वणम् ६ ग्रसमानमिवाकाशं सप्तद्वीपांवसुन्धराम्। ततोऽन्धका

छोड़े हुए वाणों करके पर्व्वतोंके शिखरभी टूट२ कर गिरतेभये-इसके पीछे देवताओं से पीड़ित हुए दानव समुद्र में प्रवेश कर जाते भये ३०।३४ फिर अग्निकी ज्वालाकेसमान आकाशमें व्याप्तकोपभरे सुदर्शन चक्रसे वह मन्दराचल पर्व्वत विजय को प्राप्तहोकर सब देवताओं से पूजित होकर अपने स्थानमें प्राप्तहोताभया इसके अनन्तर संपूर्ण देवताभी अपने२ स्थानोंको जातेभये और परमानन्द को प्राप्तहोकर उस अमृतको गुप्तकरके रक्षित करते भये ३५।३६ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांपंचाशदधिकद्विशततमोऽध्यायः २५० ॥

ऋषि पूछतेहैं हे सूतजी तुम राजाके महल और अन्यलोगों के स्थानों के बनानेकी विधिवर्णन कीजिये स्थान किसविधि से चिने और वास्तु क्या पदार्थ है उस कोभी वर्णन कीजिये १ सूतजी बोले- भृगु अत्रि, वसिष्ठ, विश्वकर्मा, मय, नारद, अनग्नजित्, विशालाक्ष, इन्द्र, ब्रह्मा, स्वामिकार्त्तिक, नन्दीश, शौनक गर्ग, श्रीकृष्ण, अनिरुद्ध, शुक्र, और बृहस्पति यह अठारह जने वास्तु शास्त्र के उपदेश करनेवाले हैं और सब लोकों में विख्यात हैं परन्तु मत्स्यरूपी भगवान् ने तो मनुके आगे इस वास्तुशास्त्रको संक्षेपतासे वर्णन कियाहै २।४ उसी मत्स्यजी के कहे हुए वास्तु प्रकरणको मैं तुमसे कहताहूं तुम चित्त से सुनो कि पूर्व्वकाल में अन्धक दैत्यके घोर वध होने के समय घोररूपी महादेवजी के मस्तकमें से पसीने का जल निकलताभया उस जल से विकराल मुखवाला भयानक शरीरयुक्त सप्तद्वीपों समेत पृथ्वीको ग्रसतेहुए के समान एक उग्रगणदिखाई दिया वह शिवजीका गण अन्धक दैत्योंके पृथ्वीमें पड़ेहुए रुधिरको पान करताभया उस गणने सब

नांरुधिरमपिवत्पतितंक्षितौ ७ तेनतत्समरेसर्वं पतितंयन्महीतले । तथापितृप्तिमगम
न्नतद्भूतंयदातदा ८ सदाशिवस्यपुरतस्तपश्चक्रेसुदारुणम् । क्षुधाविष्टन्तुतद्भूत
माहतुंजगतीत्रयम् ९ ततःकालेनसन्तुष्टो भैरवस्तस्यचाहवे । वरंवृणीष्वभद्रन्ते यद
भीष्टन्तवानघ ! १० तमुवाचततोभूतं त्रैलोक्यग्रसनक्षमम् । भवामिदेवदेवेश तथेत्युक्त
ञ्चशूलिना ११ ततस्तत्त्रिदिवंसर्वं भूमण्डलमशेषतः । स्वदेहेनान्तरिक्षञ्च रुन्धानं
प्रपतद्भुवि १२ भीतभीतैस्ततोदेवैर्ब्रह्मणाचाथशूलिना । दानवासुररक्षोभिरवष्टब्धंस
मन्ततः १३ येनयत्रैवचाक्रान्तं सतत्रैवावसत्पुनः । निवासात्सर्वदेवानां वास्तुरित्यभि
धीयते १४ अवष्टब्धाश्चतेनापि विज्ञप्ताःसर्वदेवताः । प्रसीदध्वंसुरास्सर्वे युष्माभिर्निश्च
लीकृतः १५ स्थास्याम्यहंकिमाकारो ह्यवष्टब्धोह्यधोमुखः । ततोब्रह्मादिभिःप्रोक्तं वास्तु
मध्येतुयोबलिः १६ आहारोवैश्वदेवान्ते नूनमस्मिन्भविष्यति । वास्तुपूजामकुर्वाणस्त
वाहारोभविष्यति १७ अज्ञानात्तुकृतोयज्ञस्तवाहारोभविष्यति । यज्ञोत्सवादौचबलि
स्तवाहारोभविष्यति १८ एवमुक्तस्ततोहृष्टः सवास्तुरभवत्तदा । वास्तुयज्ञःस्मृतस्तस्मा
त्ततःप्रभृतिशान्तये १९ ॥ इतिश्रीमत्स्यपुराणेएकपञ्चाशदधिकद्विशततमोऽध्यायः २५१॥

पड़ाहुआ रुधिर पीलिया तब भी वह तृप्त नहींहुआ फिर क्षुधायुक्त होकर वह शिवजीका गण त्रिलोकीके नष्ट करनेके निमित्त शिवजीके समीप तप करताभया फिर समय पाकर उस अपने भैरवनाम गणपर महादेवजी प्रसन्न होकर युद्धमें यह बरदेतेभये कि हेवीर मैं तुम्हारपर प्रसन्नहोगयाहूं तू अपनी इच्छापूर्व्वक वरमांग ५।१० यह सुनकर वह भैरवगण कहताभया कि हे देव में आपकी कृपासे त्रिलोकी के भक्षणकरनेको समर्थ होजाऊं तब महादेवजीनेभी उसके इसवचनको अंगीकार करलिया फिर स्वर्गलोक पृथ्वीलोक और आकाशको वह भैरव अपने शरीरसे रोकदेताभया ११।१२ तबभयभीत हुए देवताओंने ब्रह्माजीने शिवजीने और दैत्य दानव समेत सब राक्षसोंने अपने२ शरीरसे उसके शरीरको दाबकर अपना२ वासकरलिया फिर संपूर्ण देवताओंके निवासहोनेसे सबघरोंकानाम वास्तु प्रसिद्ध होगया १३।१४ फिर सब देवताओंने अपने २ लोकोंके घरों में वास करलिया तब वह भैरव कहनेलगा कि हे देवताओ तुम प्रसन्नहो तुमने तो सर्वत्र अपने २ वास स्थान निश्चलकरलिये हैं अब मैं कहाँ वास करूंगा मैं तो नीचेको मुख करेहुए रुकगयाहूं इससे में कैसे आकारसे वासकरूं तब देवताओंने कहा कि वास्तुके मध्यमें जब वैश्वदेव कर्म के अन्तमें जो बलि दीजायगी वही तुम्हारा आहारहोवेगा और जोपुरुष वास्तुकी पूजानहींकरेगा वहपुरुष तुम्हारा आहारहोजावेगा अर्थात् उस पूजा न करने वाले को तुम भक्षण करोगे १५।१७ और जो बिना ज्ञानके यज्ञ करेगा उस यज्ञका आहार तुम करोगे और जो यज्ञ वा उत्सवों की आदिमें बलिदेंगे वह तुम्हारा आहार होगा यह सब सुनकर वह भैरव बड़ा प्रसन्न होकर वास्तु होताभया इसके पीछे उस भैरवकी शान्तिके निमित्त यह वास्तु पूजन प्रवृत्त हुआ है १८।१९ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायामेकपंचाशदधिकद्विशततमोऽध्यायः २५१ ॥

(सूत उवाच) अथातःसम्प्रवक्ष्यामि गृहकालविनिर्णयम्। यथाकालंशुभंज्ञात्वासद्भवनमारभेत् १ चैत्रेव्याधिमवाप्नोति योगृहंकारयेन्नरः। वैशाखेधेनुरत्नानि ज्यैष्ठेमृत्युंतथैवच २ आषाढ़ेभृत्यरत्नानिपशुवर्गमवाप्नुयात्। श्रावणेभृत्यलाभन्तु हानिंभाद्रपदेतथा ३ पत्नीनाशोऽश्विनेविन्द्यात्कार्तिकेधनधान्यकम्। मार्गशीर्षेतथाभक्तं पौषेतस्करतोभयम् ४ लाभञ्चबहुशोविन्द्यादग्निंमाघेविनिर्दिशेत्। फाल्गुनेकाञ्चनंपुत्रानितिकालबलंस्मृतम् ५ अश्विनीरोहिणीमूलमुत्तरात्रयमैन्दवम्। स्वातीहस्तोऽनुराधाच गृहारम्भे प्रशस्यते ६ आदित्यभौमवर्ज्यास्तु सर्वेवाराःशुभावहाः। वर्ज्यंव्याघातशूलेच व्यतीपातातिगण्डयोः ७ विष्कुम्भगण्डपरिघ वज्रयोगेषुकारयेत्। श्वेतेमैत्रेऽथमाहेन्द्रे गान्धर्वाभिजितिरौहिणे ८ तथावैराजसावित्रेमुहूर्तेगृहमारभेत्। चन्द्रादित्यबलंलब्ध्वाशुभलग्नंनिरीक्षयेत् ९ स्तम्भोच्छ्रायादिकर्तव्यमन्यत्तुपरिवर्जयेत्। प्रासादेष्वेवमेवंस्यात् कूपवापीषुचैवहि १० पूर्वंभूमिंपरीक्षेत पश्चाद्वास्तुंप्रकल्पयेत्। श्वेतारक्तातथापीताकृष्णाचैवानुपूर्वशः ११ विप्रादेःशस्यतेभूमिरतःकार्य्यंपरीक्षणम्। विप्राणांमधुरास्वादाकटुकाक्षत्रियस्यतु १२ तिक्ताकषायाचतथा वैश्यशूद्रेषुशस्यते। अरत्निमात्रेवैगर्ते स्वनुलि

सूतजी कहते हैं कि अब गृहके वनाने और चिनने के समयको कहता हूं कि समयको विचार कर घर चिनना चाहिये १ जो चैत्रमें घर वनवाता है. उसके रोग उत्पन्न होताहै वैशाखमें घर वनवाने वाले को धेनु और रत्नादिकों की प्राप्ति होती है ज्येष्ठ में वनवावे तो मृत्यु होती है २ आषाढ़ में घरको वनावे तो भृत्य और रत्नोंकी प्राप्ति होकर पशुगणोंकी प्राप्ति होती है, श्रावणमें भृत्योंका लाभ होताहै भाद्रपदमें हानि होती है आश्विन में वनाने से स्त्री का नाश होताहै कार्त्तिक में धन धान्यकी वृद्धि मार्गशिर में घर चिनवाने वालेको भोजनकी प्राप्ति और पौष में वनवाने से चोरोंका भय होताहै ३। ४ माघ में घर वनवानेसे वहुतसा लाभ होताहै परन्तु अग्निका भी भय होजाताहै और फाल्गुनमें घर वनवानेवाले को पुत्रोंका लाभ होताहै यह सब समय का वल कहा है-अबनक्षत्रों केवल कहते हैं-अश्विनी-रोहिणी-मूल-तीनों उत्तरा-मृगशिर-स्वाति हस्त और अनुराधा यह सब नक्षत्र घर चिनने के आरंभ में श्रेष्ठ कहे हैं ५।६ और मंगल और रविवारको छोड़ कर सब वार श्रेष्ठ कहे हैं-व्याघात-शूल- व्यतीपात- अतिगंड-विष्कुंभ-गंड-परिघ- और वज्र इनयोगोंके विना अन्य संपूर्ण योगोंमें घरका प्रारंभ करना श्रेष्ठहै और श्वेत,मैत्र, माहेन्द्र, गान्धर्व, अभिजित् और रौहिण इन नामोंवाले मुहूर्त्तोंमें और वैराज तथा सावित्र नाम मुहूर्त्तमें घरके चिनने का प्रारंभ करवानाचाहिये, इन सबके सिवाय चन्द्रमा सूर्य्यके वल समेत शुभ लग्नको भी देखलेना चाहिये ७।९ इन मुहूर्त्तोंमें स्तंभलगाना अथवा घरकी उंचाई करवाना योग्यहै और यही विधि महल, कूप, वावड़ी और तड़ाग की भी करनीचाहिये १० प्रथम पृथ्वीकी परीक्षा करके वास्तुदेव कल्पितकरने चाहिये, श्वेत भूमि ब्राह्मणको, लालक्षत्रीको, पीतवैश्यको और कालीभूमि शूद्रके निमित्त श्रेष्ठ कही हैं इनकी परीक्षा खोदकर करनाचाहिये, जो पृथ्वी मधुर स्वादवालीहोवे वह ब्राह्मणको अच्छी है, कटुक और चर्चरी

सेचसर्वशः १३ घृतमामशरावस्थं कृत्वावर्तिचतुष्टयम् । ज्वालयेद्भूपरीक्षार्थं तत्पूर्णं
सर्वदिङ्मुखम् १४ दीप्तौपूर्वादिगृह्णीयाद्वर्णानामनुपूर्वशः । वास्तुःसामूहिकोनाम दीप्य
तेसर्वतस्तुयः १५ शुभदःसर्ववर्णानां प्रासादेषुगृहेषुच । अरत्निमात्रमधोगर्ते परीक्ष्यंखा
तपूरणे १६ अधिकेश्रियमाप्नोति न्यूनेहानिंसमेसमम् । फालकृष्टेऽथवादेशे सर्वबीजानि
वापयेत् १७ त्रिपञ्चसप्तरात्रेच यत्रारोहन्तितान्यपि । ज्येष्ठोत्तमाकनिष्ठाभूर्वर्जनीयतरास
दा १८ पञ्चगव्यौषधिजलैः परीक्षित्वाचसेचयेत् । एकाशीतिपदंकृत्वा रेखाभिःकनकेनच
१९ पश्चात्पिष्टेनचालिप्य सूत्रेणालोड्यसर्वतः । दशपूर्वायतालेखादशचैवोत्तरायताः २०
सर्ववास्तुविभागेषु विज्ञेयानवकानव । एकाशीतिपदंकृत्वा वास्तुवित्सर्ववास्तुषु २१ प
दस्थान्पूजयेद्देवांस्त्रिंशत्पञ्चदशैवतु । द्वात्रिंशद्बाह्यतःपूज्याः पूज्याश्चान्तस्त्रयोदश २२
नामतस्तान्प्रवक्ष्यामि स्थानानिचनिबोधत । ईशानकोणादिषुतान् पूजयेद्धविषानरः २३
शिखीचैवाथपर्जन्यो जयन्तःकुलिशायुधः । सूर्य्यसत्यौभृशश्चैव आकाशोवायुरेवच २४
पूषाचवितथश्चैव बृहत्क्षतयमावुभौ । गन्धर्वोभृङ्गराजश्च मृगःपितृगणस्तथा २५ दौ

पृथ्वी क्षत्रियको श्रेष्ठहै और वैश्य वा शूद्रको कडुएस्वादवाली पृथ्वीमें घर चिनवानाचाहिये ११।१२
फैली कनिष्ठा समेत हथेलीके प्रमाण खोदीहुई और लिपीहुई पृथ्वीपर कच्ची सराई में घृतभरकर
उस में चारवत्ती चारों दिशाओं में मुखकरके रक्खे उनचारों वत्तियों में जो पूर्व दिशाकी वत्ती अधि-
कजले तो वह धरती ब्राह्मणको शुभदायकहै दक्षिणकी वत्ती अधिकजले तो क्षत्रियको शुभहै पश्चिम
की अधिकहोयतो वैश्यको और उत्तर में अधिक होयतो शूद्रको शुभहै यह चारों वर्णोंका क्रमहै और
जो चारोंही दिशाओंमें वत्ती अच्छे प्रकारसे जलें तो वह पृथ्वी सब वर्णोंके निमित्त शुभदायी होती
है पौन बिलस्तके अनुमान खोदीहुई खातसे पूर्णहुई भूमिकी यह परीक्षा करनी योग्यहै १३।१६
जो अधिक खोदीहुई पृथ्वी में अच्छे प्रकारसे दीपक प्रकाशहोवे तो लक्ष्मी की प्राप्ति-न्यूनखोदीहुई
में हानि-और समान में समान फलहोताहै अथवा हलसे जोतकर उस पृथ्वी में बीज बुवादेवे जो
तीन-पांच वा सात दिनमें जो बीज जमजावें तो क्रमसे ज्येष्ठा उत्तमा और कनिष्ठा भूमिकहाती है
इस कनिष्ठा भूमिको सदैवत्यागदेवे १७।१८ इसप्रकारसे भूमिकी परीक्षाकरके फिर पंचगव्य और
सर्वौषधिके जलसे उस भूमिको छिड़क देवे इसके पीछे सुवर्ण से रेखा खेंचके इक्यासी ८१ पद के
चिह्न करलेवे फिर चूने वा अन्यकिसी रँगसे रँगे हुए सूत्रसे चारोंओरको रेखाका संकेत करे दश १०
रेखातो पूर्व्वकी ओर लंबीकरे-दश १० उत्तरकी ओर लंबीकरे ऐसे करनेसे संपूर्ण वास्तु में इननौ२
विभागों पर इक्यासी पद बनवादेवे फिर वास्तुके पैरों में पैंतालीस ४५ देवताओं को पूजे इन
में बत्तीस देवता तो वास्तुके बाहर पूजे और तेरह देवताओं को भीतर पूजे- इन पैंतालीस देवतों
के नामोंको सुनो-ईशान आदिचारोंकोणों में इन देवताओं को हविष अन्नसे पूजे १९।२३ अग्नि
पर्जन्य-जयन्त-इन्द्र-सर्प-सत्य-भृश-आकाश-यह आठ८ईशानमें हैं वायु-पूषा-वितथ-बृहस्पति-
यम--गन्धर्व-मृग और भृंगराज ८ पितृगण २४। २५ दौवारिक-सुग्रीव-पुष्पदन्त-जलाधिप-असुर-

बारिकोऽथसुग्रीवः पुष्पदन्तोजलाधिपः । असुरःशोषपापौच रोगोहिर्मुख्यएवच २६ भ
ल्लाटःसोमसर्पौच अदितिश्चदितिस्तथा । वाहिर्द्वात्रिंशदेतेतु तदन्तस्तुततःशृणु २७ ई
शानादिचतुष्कोणसंस्थितान्पूजयेद्बुधः । आपश्चैवाथसावित्रो जयोरुद्रस्तथैवच २८
मध्येनवपदेब्रह्मा तस्याष्टौचसमीपगान् । साध्यानेकान्तरान्विद्यात्पूर्वाद्यान्नामतःशृणु
२९ अर्य्यमासविताचैव विवस्वान्विबुधाधिपः । मित्रोऽथराजयक्ष्माच तथापृथ्वीधरः
स्मृतः ३० अष्टमश्चापवत्सस्तु परितोब्रह्मणःस्मृतः । आपश्चैवापवत्सश्च पर्ज्जन्योऽ
ग्निर्दितिस्तथा ३१ पदिकानान्तुवर्गोऽयमेवंकोणेष्वशेषतः । तन्मध्येतुबहिर्विंशद्द्विप
दास्तेतुसर्वशः ३२ अर्य्यमाचविवस्वांश्च मित्रःपृथ्वीधरस्तथा । ब्रह्मणःपरितोदिक्षु त्रि
पदास्तेतुसर्वशः ३३ वंशानिदानींवक्ष्यामि ऋजूनपिपृथक्पृथक् । वायुंयावत्तथारोगात्
पितृभ्यःशिखिनंपुनः ३४ मुख्याद्भृशंतथाशोषाद्वितथंयावदेवतु।सुग्रीवाददितिंयावन्मृ
गात्पर्जन्यमेवच ३५ एतेवंशाःसमाख्याताः क्वचिच्चजयमेवतु । एतेषांयस्तुसम्पातः पदं
मध्यंसमंतथा ३६ मर्मचैतत्समाख्यातं त्रिशूलंकोणगञ्चयत् । स्तम्भंन्यासेषुवर्ज्यानि तु
लाविधिषुसर्वदा ३७ कीलोच्छिष्टोपघातादि वर्जयेद्यत्नतोजनः । सर्वत्रवास्तुर्निर्दिष्टो
पुरुषोऽधोमुखस्तथा ३८ मूर्द्धन्यग्निःसमादिष्टो मुखेचापःसमाश्रितः । पृथ्वीधरोऽर्यमा
चैवस्तनयोस्तावधिष्ठितौ ३९ वक्षस्थलेचापवत्सः पूजनीयःसदाबुधैः । नेत्रयोर्दितिपर्ज

शोष-पाप-रोग-अहिर्मुख्य-भल्लाट-सोम- सर्प-अदिति–दिति–यह बत्तीस देवता तो वास्तुके बाहर पूजेजाते हैं–और भीतर जो पूजे जातेहैं उनके नाम सुनो २६।२७ ईशान आदिक चारों कोणों में स्थित होनेवाले आप–सावित्र–जय और रुद्र यह चारों देवता चारों कोणों के भीतर वर्त्तमान हैं और वास्तु के मध्य के नव पदों में ब्रह्मा स्थित है ब्रह्मा के चारों ओर आठ देवता एक २ कोष्ठ के अन्तर में स्थित हैं अब इन आठों के नामों को सुनो २८। २९ अर्य्यमा–सविता--विवस्वान्–इन्द्र–मित्र– राजयक्ष्मा--पृथ्वीधर और आपवत्स यह आठ नाम हैं और आप--आपवत्स--पर्जन्य-- अग्नि और दिति यह पांच देवताओं का समूह हर एक ईशानकोणके कोष्ठका स्वामी है ऐसे क्रमसे चारोंकोणों में जान लेना चाहिये और बीस देवता बाहिर के दो २ पदोंके स्वामी हैं और अर्य्यमा-विवस्वान्-मित्र-पृथ्वीधर-यह चार देवता ब्रह्मासे पूर्व्वादिक दिशाओं में स्थित तीन २ पदों के स्वामी हैं सबके मध्यमें ब्रह्माहैं इसरीति से यह ४५ देवता वास्तु में स्थित हैं ३०। ३३ अब इस वास्तुमें पृथक् २ सूत्र डालने की विधिको कहते हैं-रोग देवतासे अनिलपर्य्यन्त पितृ देवसे अग्निपर्य्यन्त- मुख्यसे भृशपर्य्यन्त- शोषसे वितथपर्य्यन्त- सुग्रीवसे अदितिपर्य्यन्त- मृगसे पर्जन्य पर्य्यन्त- इस प्रकारसे यह वंश अर्थात् सूत डालनेके जो संपात हैं और वा समान जो पद है वह मर्मस्थान कहाता है इसके सिवाय कोणों में भी मर्मस्थान होताहै इन वास्तुके मर्मस्थानों में स्तंभ नहीं लगावे और कील गाड़ने आदिका उपघातभी नहीं करे सर्वत्र यह वास्तु पुरुष नीचेको मुख वाला कहाताहै ३४ । ३८ इस वास्तु पुरुषके मस्तक पर अग्निदेव स्थित है मुखपर आप देव है-

न्यो श्रोत्रेऽदितिजयन्तकौ ४० सर्वेन्द्रावंससंस्थौतु पूजनीयौप्रयत्नतः । सूर्यसोमादयस्तद्वत् बाह्वोःपञ्चचपञ्चच ४१ रुद्रश्चराजयक्ष्माच वामहस्तेसमास्थितौ । सावित्रःसवितातद्वद्धस्तंदक्षिणमास्थितौ ४२ विवस्वानथमित्रश्च जठरेसंव्यवस्थितौ । पूषाच पापयक्ष्माच हस्तयोर्मणिबन्धने ४३ तथैवासुरशोषौच वामपार्श्वसमाश्रितौ । पार्श्वेतु दक्षिणेतद्वत् वितथःसबृहत्क्षतः ४४ ऊर्वोर्यमांबुपौज्ञेयौ जान्वोर्गन्धर्वपुष्पकौ ! जङ्घयोर्मृगसुग्रीवौस्फिक्स्थौदौवारिकोमृगः ४५ जयशक्रौतथामेढ्रे पादयोःपितरस्तथा । मध्ये नवपदेब्रह्मा हृदयेसतुपूज्यते ४६ चतुःषष्टिपदोवास्तुः प्रासादेब्रह्मणास्मृतः । ब्रह्माचतुष्पदस्तत्र कोणेष्वर्धपदास्तथा ४७ बहिःकोणेषुवास्तौतु सार्धाश्चोभयसंस्थिताः । विंशतिद्विपदाश्चैव चतुःषष्टिपदेस्मृताः ४८ गृहारम्भेषुकण्डूतिः स्वाम्यङ्गेयत्रजायते । शल्यंत्वपनयेत्तत्र प्रासादेभवनेतथा ४९ सशल्यंभयदंयस्मादशल्यंशुभदायकम् । हीनाधिकांगतावास्तो सर्वथातुविवर्जयेत् ५० नगरग्रामदेशेषु सर्वत्रैवंविवर्जयेत् । चतुःशालंत्रिशालञ्च द्विशालंचैकशालकम् । नामतस्तान्प्रवक्ष्यामि स्वरूपेणाद्विजोत्तमाः ५१ ॥

इतिश्रीमत्स्यपुराणेद्विपञ्चाशदधिकद्विशततमोऽध्यायः २५२ ॥

पृथ्वीधर और अर्य्यमा यह दोनों देवता दोनों स्तनोंपर हैं छातीपर आपवत्स देवका पूजन करना नेत्रोंपर दिति और पर्जन्य देवको पूजे कानोंपर अदितिको और जयन्तक को पूजे ३९।४० सूर्य्य और इन्द्र कन्धोंपर स्थितहैं और सूर्य्य से लेकर चन्द्रमा आदि पांच २ देवता दोनों भुजाओं पर स्थित हैं रुद्र वा राजयक्ष्मा- यह दोनों देवता वाम हाथ पर स्थित हैं ४१।४२ विवस्वान् और मित्र यह दोनों उदरमें स्थितहैं- पूषा और पापयक्ष्मा यह दोनों हाथोंके पहुंचोंके स्थानमें स्थित हैं ४३ असुर और शोष यह दो वाम पार्श्व में स्थितहैं वितथ और बृहन्क्षत यह दोनों दक्षिण पार्श्व में स्थितहैं ४४ जाघोंपर यम और जलाधिप यह दोनों स्थित हैं गोड़ोंपर गन्धर्व और पुष्पदन्त यह दोनों स्थित हैं, पिण्डलियों पर मृग और सुग्रीव स्थित हैं, दौवारिक और मृग यह दोनों टकनों पर हैं, जय और इन्द्र यह लिंग पर स्थित हैं पैरोंपर पितर स्थितहैं मध्यके नव पदों में ब्रह्मा स्थितहै वह हृदय में पूजाजाताहै ४५।४६ब्रह्माजीने हवेली चिननेमें चौंसठ पदका वास्तु स्थित वर्णन कियाहै वहां ब्रह्माचतुष्पद स्थितहै-कोणों में आधेपाद वाले देवता स्थितहैं-वास्तुके बाहर के कोणों में डेढ़ पदवाले देवता वर्त्तमान हैं बीस देवता दो पदवाले हैं ऐसे वास्तु के चौंसठ पद हैं ४७। ४८ गृह चिनने के आरम्भ के समय घरके स्वामीके जिस अंगमें खुजली लगजाय वास्तुके उसी अंगके स्थानमें गड़ी हुई शल्य वा कील आदिको निकाल देवे ४९ क्योंकि वास्तुके मर्म में शल्य होय तो भय होता है और न होय तो शुभफल होताहै और वास्तुके अंगकी हीनता और अधिकता सर्वत्र निषेध करनी चाहिये ५० और इसीप्रकार से नगर, ग्राम और देश इनमें भी वास्तुके मर्मको त्यागकरदे-अब चतुःशाला त्रिशाला-द्विशाला और एकशाला इनके भी नाम और स्वरूपोंको सुनो ५१ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांद्विपञ्चाशदधिकद्विशततमोऽध्यायः २५२ ॥

(सूतउवाच)चतुःशालंप्रवक्ष्यामि स्वरूपन्नामतस्तथा। चतुःशालश्चतुर्द्वारैरलिन्दैः सर्वतोमुखम् १ नाम्नातत्सर्वतोभद्रं शुभंदेवनृपालये। पश्चिमद्वारहीनश्च नन्द्यावर्तःप्रचक्षते २ दक्षिणद्वारहीनन्तु वर्द्धमानमुपाहृतम्। पूर्वद्वारविहीनंतत्स्वस्तिकंनामविश्रुतम्३ रुचकंचोत्तरद्वारविहीनंतत्प्रचक्षते । सौम्यशालाविहीनं यत्त्रिशालंधान्यकञ्चतत् ४ क्षेमवृद्धिकरंनृणां बहुपुत्रफलप्रदम्। शालयापूर्वयाहीनं सुक्षेत्रमितिविश्रुतम् ५ धन्यंयशस्यमायुष्यं शोकमोहविनाशनम्। शालयायाम्ययाहीनं यद्विशालंतुशालया ६ कुलक्षयकरंनृणां सर्वव्याधिविनाशनम्। हीनंपश्चिमयायत्तु पक्षघ्नंनामतत्पुनः ७ मित्रबन्धून्सुतान्हन्ति तथासर्वभयावहम्। याम्यापराभ्यांशालाभ्यां धनधान्यफलप्रदम् ८ क्षेमवृद्धिकरंनृणां तथापुत्रफलप्रदम्। यमसूर्यञ्चविज्ञेयं पश्चिमोत्तरशालिकम् ९ राजाग्निभयदं नृणां कुलक्षयकरंचयत्। उदक्पूर्वेतुशालेह दण्डाख्येयत्रतद्भवेत् १० अकालमृत्युभयदं परचक्रभयावहम्। धनाख्यंपूर्वयाम्याभ्यां शालाभ्यांयद्विशालकम् ११ तच्छस्त्रभयदंनृणां पराभवभयावहम्। चुल्लीपूर्वापराभ्यांतु साभवेन्मृत्युसूचनी १२ वैधव्यदायकंस्त्रीणा मनेकभयकारकम्। कार्यमुत्तरयाम्याभ्यां शालाभ्यांभयदंनृणाम् १३ सिद्धार्थवज्रव

सूतजीबोले–कि मैं प्रथम चार शालावाले स्थानके स्वरूप और नामोंको कहताहूं–द्वार और चौखटों समेत चारोंओर जिसका मुखहो वह सर्वतोभद्रनामस्थान देवता और राजा का होवे तो शुभहै–जिसके पश्चिमके विना अन्यतीन दिशाओंमें द्वारहोंय वह नंद्यावर्त्तनामस्थान कहाताहै १।२ जो दक्षिण के द्वारसेहीन तीन द्वारोंवालाहोय वह वर्द्धमाननामस्थानहै-पूर्वके द्वारसेहीन तीन द्वारोंवाला स्थान स्वस्तिकनामसे प्रसिद्धहै–उत्तरकेद्वारसेहीन द्वारवाला स्थान रुचिकनामसे विख्यातहै–और जिस स्थानमें उत्तरकी ओर शालनहीं बने वह तीन शालावाला स्थान धान्यक नाम से प्रसिद्ध मनुष्योंके क्षेमकी वृद्धि करनेवाला और बहुत पुत्रोंका देनेवालाहोताहै–पूर्व्वकीशालासे हीन स्थानको सुक्षेत्र कहते हैं ३।५ यह स्थान आयुवर्द्धक शोकमोहका नाशकरनेवालाहोकर बड़ाधन्य कहाता है–जोदक्षिणकी शालासेहीन स्थानहोवे वह कुलकाक्षयकरनेवाला है--और जो पश्चिमकी शाला से हीन अन्यतीन शाला वाला स्थान है वह पक्षघ्ननाम स्थानहै और पुत्रमित्रोंका नाशकरनेवाला है और भयकाभी दाताहै-- जिसघरके पश्चिम और दक्षिणकी ओर दोही शालाहोंय वहधन धान्यका बढ़ानेवाला है ६।८ यह स्थान मनुष्योंकी कुशल और पुत्रों की वृद्धिका करनेवाला है-- और जो पश्चिमतथा उत्तरकी ओर दोशालावालास्थानहै वह यम सूर्य नामसे विख्यातहै और राजा वा अग्नि से भयका करने वाला होकर कुलकाक्षय करनेवालाहै--और जो उत्तर तथा पूर्व्वकी ओर दोशाला होंय वहदंड नाम वाली कहाती हैं वह स्थान अकालमृत्युके भयका और दूसरे राजाकाभय करने वालाहै--जो पूर्व्वतथा दक्षिण में दोशाला वाला स्थानहोवे वह धनाख्यनाम वाला स्थान मनुष्यों को शस्त्रोंकाभय करनेवाला और निरादरका करनेवालाहै--और जो पूर्व्व तथा पश्चिम में दोशाला वाला स्थान होताहै वह चुल्ली नाम स्थान कहाताहै यह स्थान मृत्यु करने वाला वर्णन किया

ज्याणि विशालानितथाबुधैः । अथातःसंप्रवक्ष्यामि भवनंपृथिवीपतेः १४ पञ्चप्रकारंत
त्प्रोक्तमुत्तमादिविभेदतः । अष्टोत्तरंहस्तशतं विस्तरश्चोत्तमोमतः १५ चतुर्ष्वन्येषुवि
स्तारो हीयतेचाष्टभिःकरैः । चतुर्थांशाधिकंदैर्घ्यं पञ्चस्वपिनिगद्यते १६ युवराजस्यव
क्ष्यामि तथाभवनपञ्चकम् । षड्भिःषड्भिस्तथाशीति हीयतेतत्रविस्तरात् १७ त्र्यंशे
नचाधिकंदैर्घ्यं पञ्चस्वपिनिगद्यते । सेनापतेःप्रवक्ष्यामि तथाभवनपञ्चकम् १८ चतुः
षष्टिस्तुविस्तारात् षड्भिःषड्भिस्तुहीयते।पञ्चस्वेतेषुदैर्घ्यञ्च षड्भागेनाधिकंभवेत् १९
मन्त्रिणामथवक्ष्यामि तथाभवनपञ्चकम् । चतुश्चतुर्भिर्हीनास्यात् करषष्टिप्रविस्तरे २०
अष्टांशेनाधिकंदैर्घ्यं पञ्चस्वपिनिगद्यते । सामन्तामात्यलोकानां वक्ष्येभवनपञ्चकम् २१
चत्वारिंशत्तथाष्टौच चतुर्भिर्हीयतेक्रमात् । चतुर्थांशाधिकंदैर्घ्यं पञ्चस्वेतेषुशस्यते २२
शिल्पिनांकञ्चुकीनाञ्च वेश्यानांगृहपञ्चकम्।अष्टाविंशत्कराणान्तु द्विहीनंविस्तरेक्रमात् २३
द्विगुणंदैर्घ्यमेवोक्तं मध्यमेष्वेवमेवतत् । दूतीकर्मान्तिकादीनां वक्ष्येभवनपञ्चकम् २४ च
तुर्थांशाधिकंदैर्घ्यं विस्तारोद्वादशैवतु । अर्धार्धकरहानिःस्याद्विस्तारात्पञ्चशःक्रमात् २५
दैवज्ञगुरुवैद्यानां सभास्तारपुरोधसाम् । तेषामपिप्रवक्ष्यामि तथाभवनपञ्चकम् २६

जाताहै--९।१२ और स्त्रियोंको वैधव्ययोगका देनेवाला है--और उत्तर तथा दक्षिणकी ओर जिसमें दोशालाहोंय यह दोशालावाला मकानभी भयदुःखका देने वालाहै--ऐसे भयदुःखके देने वाले स्थान बुद्धिमान् पुरुषको नहीं बनाने चाहियें--अब राजाके स्थानके बनानेकी विधि वर्णन करते हैं--१३।१४ राजाके पांच स्थान होतेहैं एकसौ आठ हाथ चौड़ा तो राजाका उत्तम घरहोताहै और शेषचार स्थान क्रमसे आठ२ हाथ कमकी चौड़ाई वाले होतेहैं और इन सब मकानोंकी लंबाई अपनी२ चौड़ाई से सवाई होतीहै १५।१६ राजाके युवराजकुमारका घरभी पांच प्रकारकाहोता है पहला उत्तम घर अस्सी हाथ चौड़ा और अन्यचारघर छः२ हाथ कम चौड़ाई वाले होतेहैं इन सबोंकी लंबाई अपनी२ चौड़ाई में उसी चौड़ाईकी तिहाई जोड़देने से होती है--अब सेनापतिके घरकीविधि कहतेहैं-१७।१८ सेनापतिका उत्तमघर चौंसठहाथ चौड़ाहोताहै और अन्य चारोंघर छःहाथ हीन चौड़ाईवाले होतेहैं इनपांचोंघरोंकी लंबाई चौड़ाई में चौड़ाई के छठे भाग युक्त अधिक होती है १९ राजाके मंत्री का उत्तमघर साठ हाथका चौड़ा होताहै और शेषचारोंघर चार २ हीनचौड़ाई वाले होते हैं--इन पांचों घरोंकी लंबाई चौड़ाईमें चौड़ाई के आठवेंभाग मिलानेसे होती है—अबराजाके मंडलके राजा और राजाके प्रधान पुरुषोंके पांच२ घरोंकी रीति कहतेहैं २०।२१ इनका उत्तमस्थान अड़तालीस हाथ चौड़ाहोताहै और बाकीके—चारघर चार२हाथ हीन चौड़ाई वालेहोतेहैं—इनपांचों घरोंकी लंबाई चौड़ाई से सवाई होती है २२ और शिल्पी कारीगर--राजाके घरों के समीपरहनेवाले कंचुकी,रक्षक, वेत्रधारी--और वेश्या इन सबकेभी पांच प्रकारके घरहोते हैं--उत्तमघर अट्ठाईसहाथ चौड़ाहोताहै--और शेषचारघर दो २ हाथहीन चौड़ाई वाले होते हैं २३ इनसब घरों की लंबाई चौड़ाईसेदूनी होती है—अबदूती-दासीआदि के पांचघरोंको कहते हैं २४ इन दूतीआदिकों का उत्तमघर बारह हाथका चौड़ा होताहै शेष चारघर क्रमसे आधे २ हाथहीन चौड़ाईवाले होते हैं-इन सबघरोंकी लंबाई चौड़ाई से

च्चत्वारिंशत्तुविस्ताराच्चतुर्भिर्हीयतेक्रमात्। पञ्चस्वेतेषुदैर्घ्यञ्च षड्भागेनाधिकंभवेत् २७
चतुर्वर्णस्यवक्ष्यामि सामान्यंगृहपञ्चकम्। द्वात्रिंशतिकराणान्तु चतुर्भिर्हीयतेक्रमात्
२८ आषोड़शादितिपरं नूनमन्तेवसायिनाम्। दशांशेनाष्टभागेन षड्भागेनाथपादिक
म् २९ अधिकंदैर्घ्यमित्याहुर्ब्राह्मणादेःप्रशस्यते। सेनापतेर्नृपस्यापि गृहयोरन्तरेणतु
नृपवासगृहंकार्य्यं भाण्डागारन्तथैवच ३० सेनापतेर्गृहस्यापि चातुर्वर्ण्यस्यचान्तरे।
वासायचगृहंकार्य्यं राजपूज्येषुसर्व्वदा ३१ पश्वाश्रमिणाममितंधान्यायुधवह्निरतिग्रहा
णांच। नेच्छन्तिशास्त्रकारा हस्तशतादुच्छ्रितंपरतः ३२ सेनापतेर्नृपस्यापि सप्तत्यासहि
तेऽन्विते। चतुर्दशहृतेव्यासे शालान्यासःप्रकीर्तितः ३३ पञ्चत्रिंशान्वितेतास्मिन्नलि
न्दःसमुदाहृतः। तथाषट्त्रिंशद्धस्तातु सप्ताङ्गुलसमन्विता ३४ विप्रस्यमहतीशाला
नदैर्घ्यपरतोभवेत्। दशाङ्गुलाधिकातद्वत् क्षत्रियस्यनविद्यते ३५ पञ्चत्रिंशत्करावै

सवाई होनीचाहिये २५ ज्योतिषी-राजाका गुरु-वैद्य-सभापति और पुरोहित इन सबके भी पांचों प्रकारके घरोंका वर्णनकरते हैं-इन सबका उत्तमघर चालीसहाथ चौड़ाहोताहै और अन्य चारोंघर चार २ हाथहीन चौड़ाईवाले होते हैं और सबोंकी लम्बाइयां चौड़ाईमें चौड़ाई के छठेभाग अधिक होतीहै २६। २७ अब सामान्यसे चारों वर्णोंके पांचप्रकारके घरोंका वर्णन करते हैं-ब्राह्मणका उत्तम घर बत्तीसहाथ चौड़ाहोताहै शेष-चारोंघरचार २ हाथहीन चौड़े होते हैं-क्षत्रियका उत्तमघर २८ हाथ चौड़ा-वैश्यका २४ हाथ और शूद्रका २० हाथ चौड़ा होताहै और सोलह हाथसेहीन चौड़ाई इन चारों वर्णोंके नहीं होती है-नीचजातियों के होती है-ब्राह्मणके चौड़ाई के दशांश-क्षत्रियके अष्टमांश-वैश्यके षष्टांश-शूद्रके चतुर्थांश अधिक होनेसे घरोंकी लम्बाई होती है-और सेनापति तथा राजाको घरके बीचमें वासकरने का घर बनवाना चाहिये और उसी स्थानमें शस्त्र आयुध और अस्त्रआदिकों का भांडागार बनानाचाहिये-सेनापति और चारों वर्णों के घरोंके बीचमें राजाके पूज्य पुरुषों के घर होने चाहिये- इन स्थानों के विशेष पशुओं के और परिव्राजक आदिक आश्रमियों के घरोंका कोई प्रमाण नहीं है ऐसेही धान्य-शस्त्र-रति अग्नि इन वस्तुओं के घरकाभी कुछ प्रमाण नहीं है चाहें जितनालंबा चौड़ा कोई बनवावे और शास्त्रके आचार्य्यों ने सौ १०० हाथसे अधिक ऊंचा घर बनाना नहीं कहाहै २८। ३२ सेनापति और राजाके घरकी चौड़ाईमें ७० जोड़कर दोस्थानोंमें लिखे पूर्वके स्थानमें चौदहकाभागदेवे फिर जितनेहाथ और अंगुललब्धमिले वहीशालाका मानहोताहै-दूसरेस्थान में पैंतीस का भाग देने से जो लब्ध हो वह अलिन्दका मानहोताहै (शालासे बाहर गमनिका जाली से घिरीहुई आंगनके सन्मुख होती है उसको अलिन्द कहते हैं अर्थात् द्वारके बाहरका चौंतरा अथवा चौपाड़) बत्तीस हाथ आदिक जो ब्राह्मणआदि वर्णोंके घरका प्रमाण कहाहै उनकी शालाका प्रमाण कहते हैं-ब्राह्मणके उत्तम घरकी शाला ४ हाथ १७ अंगुल-दूसरे घरकी ४ हाथ ३ अंगुल-तीसरे की ३ हाथ १५ अंगुल चौथेमें ३ हाथ १३ अंगुल औरपांचवें घरकी शाला तीनहाथ ४ अंगुलकी होती है-यह ऐसे समझनाचाहिये कि ब्राह्मणका दूसराघरक्षत्रियका प्रधानघरहै-ब्राह्मणका तीसराघर वैश्य का प्रधान घरहै चौथा घर शूद्रका प्रधानघरहै इसी रीतिसे सबकीशालाका प्रमाण जानलेना-ब्राह्मण

श्ये अङ्गुलानित्रयोदश । तावत्करैवशूद्रस्य युतापञ्चदशाङ्गुलैः ३६ शालायास्तुत्रि
भागेन यस्याग्रेवीथिकाभवेत् । सोष्णीषंनामतद्वास्तु पश्चाच्छ्रेयोच्छ्रयंभवेत् ३७ पार्श्व
योर्वीथिकायत्र सावष्टम्भन्तदुच्यते । समन्ताद्वीथिकायत्र सुस्थितंतदिहोच्यते ३८ शुभ
दंसर्वमेतत्स्याच्चातुर्वर्णेचतुर्विधम् । विस्तरात्षोड़शोभागस्तथाहस्तचतुष्टयम् ३९ प्रथ
मोभूमिकोच्छ्राय उपरिष्टात्प्रहीयते । द्वादशांशेनसर्वासु भूमिकासुतथोच्छ्रयः ४० पक्केष्ट
काभवेद्भित्तिः षोड़शांशेनविस्तरात् । दारवैरविकल्पास्यात्तथामृन्मयाभित्तिका ४१ ग
र्भमानेनमानन्तु सर्ववास्तुषुशस्यते । गृहव्यासस्यपञ्चाशद्ह्यष्टादशभिरङ्गुलैः ४२ सं
युतोद्वारविष्कम्भो द्विगुणश्चोच्छ्रयोभवेत् । द्वारशाखासुबाहुल्यमुच्छ्रायकरसम्मितैः ४३
अङ्गुलैःसर्ववास्तूनां पृथुत्वंशस्यतेबुधैः । उदुम्बरोत्तमागञ्चतदर्धार्धप्रविस्तरात् ४४॥

इतिश्रीमत्स्यपुराणेत्रिपञ्चाशदधिकद्विशततमोऽध्यायः २५३ ॥

के प्रधान घरमें ३ हाथ १९ अंगुलका अलिन्द-दूसरे में ३ हाथ ८ अंगुल-तीसरे में २ हाथ २० अंगुल-चौथेमें २ हाथ १८ अंगुल और पांचवें घरमें अलिन्दका प्रमाण २ हाथ ३ अंगुलकाहै इसीरीति अन्योंके भी जानलेना ३३।३६ शालाकी तिहाईके समान घरके बाहर वीथी अर्थात् गली बनावे-जो वह वीथी वास्तुके आगे होय तो वह वास्तु सोष्णीष कहाता है-पिछली ओर होय तो श्रेयोच्छ्रय दाहिने बायें होय तो सावष्टंभ और वास्तुके चारों ओर वीथी होय तो उस वास्तुको सुस्थित कहते हैं यह सब वीथी चारों वर्णों को शुभ और श्रेष्ठ कही हैं-घरकी चौड़ाई के मानमें सोलहका भागदेकर जो लब्ध आवे उसमें चार हाथ और जोड़े वही घरकी पहली भूमिके खंडकी उंचाईका प्रमाण होताहै उसमें उसका द्वादशांश घटादेवे तो दूसरी भूमिकी उंचाई होजाती है इसीभांति दूसरीका द्वादशांशघटाने से तीसरी की उंचाई तीसरिके द्वादशांश घटानेसे चौथी की उंचाई और चौथी के द्वादशांश घटानेसे पांचवीं की उंचाईका प्रमाणहोताहै और सबघरों की भीतका प्रमाण घरकी चौथाई के षोड़शांश के तुल्यहोताहै यह नियम पक्की ईंटों के घरका है और काष्ठ तथा मट्टी के घर में भीतकी चौड़ाई लम्बाई और उंचाई का कुछ नियम नहीं है राजा और सेनापति के घर की चौड़ाई में उसका एकादशांश जोड़कर ७० और जोड़े उस जोड़ने से जो अंकहोय उतने अंगुल के प्रमाण उनके घरका द्वार बनाना चाहिये और द्वारकी उंचाई से आधी द्वारकी चौड़ाई रखनी चाहिये और ब्राह्मण आदि वर्णोंके घरोंकी जो चौड़ाई होय उसका पंचमांश लेकर उसी में मिलावे लब्ध फलको अंगुल माने फिर इसमें अठारह और मिलादेवे फिर मिलकर जितने अंगुल होवें उतनीही उनके द्वारोंकी चौखटकी चौड़ाई होनीचाहिये और इस चौड़ाई से दूनी ऊंची चौखटहोनी चाहिये-और द्वारकी चौखटकी दोनों भुजाओं को शाखा कहते हैं और ऊपर नीचेके काष्ठको शिरधर और देहलीको उदुम्बर कहते हैं द्वार जितने हाथ ऊंचाहोय उतने अंगुल शाखाओं की मुटाई रखनी चाहिये औरशाखाओंकी मुटाई से ड्यौढ़ी मुटाई उदुम्बरों की होती है ३७ । ४४ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांत्रिपंचाशदधिकद्विशततमोऽध्यायः २५३ ॥

(सूत उवाच) अथातःसंप्रवक्ष्यामिस्तम्भमानविनिर्णयम्। कृत्वास्वभुवनोच्छ्रायं सदासप्तगुणंबुधैः १ अशीत्यंशःपृथुत्वंस्यादग्रेणावगुणैःसह । रुचकश्चतुरःस्यात्तु अष्टास्रोवज्रउच्यते २ द्विवज्रःषोड़शास्रस्तु द्वात्रिंशास्रःप्रलीनकः । मध्यप्रदेशेयस्तम्भो वृत्तोवृत्तइतिस्मृतः ३ एतेपञ्चमहास्तम्भाः प्रशस्ताःसर्ववास्तुषु। पद्मवल्लीलताकुम्भ पत्रदर्पणरूपिताः४स्तम्भस्यनवमांशेन पद्मकुम्भान्तराणितु।स्तम्भतुल्यातुलाप्रोक्ता हीनाचोपतुलाततः ५ त्रिभागेनेहसर्वत्रचतुर्भागेनवापुनः। हीनंहीनंचतुर्थांशात्तथासर्वासुभूमिषु ६ वासगेहानिसर्वेषां प्रवेशेदक्षिणेनतु। द्वाराणितुप्रवक्ष्यामि प्रशस्तानीहयानितु ७ पूर्वेणेन्द्रं जयन्तञ्च द्वारंसर्वत्रशस्यते। याम्यञ्चवितथंचैव दक्षिणेनविदुर्बुधाः ८ पश्चिमेपुष्पदन्तंच वारुणञ्चप्रशस्यते। उत्तरेणतुभल्लाटंसौम्यंतुशुभदंभवेत् ९ तथावास्तुषुसर्वत्र वेधंद्वारस्य वर्जयेत्। द्वारेतुरथ्ययाविद्धे भवेत्सर्वकुलक्षयः १० तरुणाद्वेषबाहुल्यं शोकःपङ्केनजायते। अपस्मारोभवेन्नूनं कूपवेधनसर्वदा ११ व्यथाप्रस्रवणेन स्यात्कीलेनाग्निभयंभवेत्। विनाशोदेवताविद्धैस्तम्भेनस्त्रीकृतंभवेत् १२ गृहभर्तुर्विनाशःस्यात् गृहेणचगृहेकृते। अमेध्यावस्करैर्विद्धे गृहिणीबन्धकीभवेत् १३ तथाशस्त्रभयंविन्द्यादन्त्यजस्यगृहेणतु। उच्छ्रा

सूतजी बोले-अबस्तंभ अर्थात् खंभवनानेकी विधि वर्णन करतेहैं-घरकी उंचाई को सातगुणा कर अस्सी का भागदेनेसे जोलब्धहोय वही सबस्तंभोंकी चौड़ाई होती है और स्तंभकी उंचाईको नौसे गुणाकर अस्सी का भागदेनेसे जोलब्धहोय वह स्तंभके मूलकी मुटाई होती है और उस स्तंभका दशांश उस में घटा देवे तो उस के अग्रभाग की मुटाई होती है जो स्तंभ मध्यभाग में चतुरस्रहोवे वह रुचक कहाताहै और जो अष्टास्र अष्टदलहोवे वह वज्रनाम स्तंभ कहाताहै १।२ सोलहदल वा अस्रोंवाला स्तंभद्विवज्रनामसे प्रसिद्धहोताहै जिसके मध्य में बत्तीसदल होते हैं वह प्रलीनक स्तंभ कहाताहै जो स्तंभमध्य में वृत्त अर्थात् गोलहोवे वह वृत्तनाम स्तंभ कहाता है ३ यहसब महास्तंभ कहातेहैं सब स्तंभ भरके नौ समान भागकर सबके नीचेकेभागको वहन वनावे (बहन उस को कहते हैं जिसके कि ऊपर पृथ्वी में स्तंभ रहताहै) बहन के ऊपर प्रथम भाग में घट वनावे दूसरे भागमें कमल वनावे-फिर उत्तरोष्ट बनाके शेप पांचभागोंमें चतुरस्रवनादेवे.(जिसमें कि अनेक प्रकार के चित्र वनायेजाते हैं उस को उत्तरोष्ट कहतेहैं) ४।६ अब संपूर्ण वास करने वाले घरों के दक्षिण आदि दिशाओंमें द्वारवनानेकी विधि वर्णन करतेहैं-पूर्वदिशा में इन्द्र तथा जयन्त देवताके पदके ऊपर घरका द्वार करना शुभहै-दाक्षिण दिशा में धर्मराज और वितथ देवके ऊपर द्वार वनानाचाहिये ७।८ पश्चिमकी ओर पुष्पदन्त और वरुण देवता के ऊपर द्वार वनाना चाहिये—उत्तरकी ओर भल्लाट और सौम्य देवताके ऊपर द्वार वनानाचाहिये-९ और संपूर्ण वास्तुओं में द्वारका वेध वर्जदनाचाहिये-मार्ग-वृक्ष-किसी दूसरे घरकी खूंट और गलीकी फेट यह अशुभहैं—रथ्या अर्थात् गली के वेधसे कुलकानाशहोताहै—कीचके वेधसे शोक होताहै—कूपके वेध से मृगीरोग होताहै—कीला और देवताके वेधसे अग्निका भय होताहै घरके आगे दूसरे घरका कोना होवे तो घरके स्वामीका नाशहो-

याद्विगुणांभूमिं त्यक्त्वावेधोनजायते १४ स्वयमुत्पाटितेद्वारे उन्मादोगृहवासिनाम् । स्व
यंवापिहितेविद्यात् कुलनाशंविचक्षणः १५ मानाधिकेराजभयं न्यूनेतस्करतोभवेत् । द्वा
रोपरिचयद्द्वारं तदन्तकमुखंस्मृतम् १६ अध्वनोमध्यदेशेतु अधिकोयस्यविस्तरः ।
कुब्जन्तुसङ्कटंमध्ये सद्योभर्तुर्विनाशनम् १७ तथान्यपीड़ितंद्वारं बहुदोषकरंभवेत् । मूल
द्वारात्तथान्यत्तु नाधिकंशोभनंभवेत् १८ कुम्भश्रीपर्णिवल्लीभिर्मूलद्वारन्तुशोभयेत् । पू
जयेच्चापितन्नित्यं बलिनाचाक्षतोदकैः १९ भवनस्यबटःपूर्वे दिग्भागेसर्वकामिकः । उदु
म्बरस्तथायाम्ये वारुण्यांपिप्पलःशुभः २० प्लक्षश्चोत्तरतोधन्यो विपरीतास्त्वसिद्धये ।
कण्टकीक्षीरवृक्षश्च आसनःसफलोद्रुमः २१ भार्य्याहानौप्रजाहानौ भवेतांक्रमशस्तदा ।
नच्छिन्द्याद्यदितानन्यानन्तरेस्थापयेच्छुभान् २२ पुन्नागाशोकबकुलशमीतिलकचम्प
कान् । दाड़िमीपिप्पलीद्राक्षा तथाकुसुममण्डपान् २३ जम्बीरपूगपनसद्रुमकेतकीभि
र्जातीसरोजशतपत्रिकमल्लिकाभिः । यन्नालिकेरकदलीदलपाटलाभिर्युक्तंतदत्रभवनं
श्रियमातनोति २४ ॥ इतिश्रीमत्स्यपुराणेचतुःपञ्चाशदधिकद्विशततमोऽध्यायः २५४ ॥
(सूत उवाच) उदगादिप्लवंवास्तु समानाशिखरंतथा । परीक्ष्यपूर्ववत्कुर्य्यात्स्तम्भो

ताहै जिसकी देहली के आगे अशुद्ध वस्तुओं को तथा मोरीका वेधहोवे तो उसका बन्धन होता है-
द्वारकी उंचाई से दूने फासलेपर किसी वस्तुका वेधहोवे तो उसवेधका बुराफल नहींहोताहै १०।१४
जिसकेघर के द्वारका किवाड़ आपही खुलजावे अथवा आपही भिड़जावे उसके कुलका नाश होता
है १५ जो घर का द्वार कहेहुए मानसे अधिकहोवे उसको राजा से भय होताहै और न्यूनहोवे तो
चोरोंका भय होताहै द्वारके ऊपर जो द्वार होवे वह अन्तक मुख नाम वाला घर कहाताहै १६ मार्ग
के बीचमें जिसकेघर का अधिक विस्तारहोवे वा जिसका कुबड़ा द्वारहोवे उसघरके मालिककी मृत्यु
होतीहै १७ जो द्वार अन्य द्वारोंसे पीड़ित होताहै उस घर में बड़ा दोष होताहै औरघरके मुख्य द्वार
के समान अन्यद्वार नहीं बनाने चाहिये बल्कि उस मुख्य द्वारको कलश-फल पत्र अथवा शिवजीके
गण आदिकोंकी मूर्त्तियों से शोभित करना चाहिये १८। १९ घरके पूर्वभागमें बड़का वृक्ष शुभदायी
है-दक्षिणदिशामें गूलरका वृक्ष उत्तम है-घरसे पश्चिमकी ओर पीपलका वृक्ष शुभदायी है-उत्तर की
ओर पिलखनका वृक्षहोवे तो शुभदायी है और इनसे विपरीत होवें तो विपरीत फल होताहै और
घर के समीपमें कांटोंके वृक्ष होवें अथवा दूध और फल वाले वृक्ष होवें तो क्रमसेस्त्रीकी औरप्रजाकी
हानि होती है जो कोई इन वृक्षोंको नहींकाटे तो इनके समीपमें दूसरे शुभवृक्षोंको लगादेवे-नाग-
केशर-अशोक-बकुल-जांट-तिलकपुष्पी-चंपा-अनार-पीपली-दाख-अर्जुनवृक्ष-जम्बीरवृक्ष-सुपारीऔर
फालसे के वृक्ष-केतकी-जावित्री-कमल-चमेली-नारियल-केला-पाडलवृक्ष-इन वृक्षों से युक्त हुआ
घर शुभदायी होताहै २०।२४॥

इतिश्रीमत्स्यपुराणभाषाटीकायांचतुःपंचाशदधिकद्विशततमोऽध्यायः २५४ ॥

सूतजी बोले-उदकप्लव अर्थात् उत्तरकी ओर झुकाव वाली भूमि ब्राह्मणोंको शुभहै ऐसेही पूर्वा-

च्छ्रायंविचक्षणः १ नदेवधूर्तसचिव चत्वराणांसमन्ततः । कारयेद्भवनंप्राज्ञो दुःखशोक
भयंततः २ तस्यप्रदेशाश्चत्वारस्तथोत्सर्गोग्रतःशुभः । पृष्ठतःपृष्ठभागस्तु सव्यावर्तः
प्रशस्यते ३ अपसव्योविनाशाय दक्षिणेशीर्षकस्तथा । सर्वकामफलोनृणां सम्पूर्णोनाम
वामतः ४ एवंप्रदेशमालोक्य यत्नेनगृहमारभेत् । अथसांवत्सरेप्रोक्ते मुहूर्तेशुभलक्षणे ५
रत्नोपरि शिलांकृत्वा सर्वबीजसमन्विताम् । चतुर्भिर्ब्राह्मणैःस्तम्भं कारयित्वासुपूजितम् ६
शुक्लाम्बरधरःशिल्पि सहितोवेदपारगैः । स्नापितंविन्यसेत्तद्वत्सर्वौषधिसमन्वितम् ७
नानाक्षतसमोपेत वस्त्रालङ्कारसंयुतम् । ब्रह्मघोषेणवाद्येन गीतमङ्गलनिःस्वनैः ८ पाय
संभोजयेद्विप्रान् होमन्तुमधुसर्पिषा । वास्तोष्पतेप्रतिजानीहि मन्त्रेणानेनसर्वदा ९ सू
त्रपातेतथाकार्य्यमेवं स्तम्भोदयेपुनः । द्वारवंशोच्छ्रयेतद्वत्प्रवेशसमयेतथा १० वास्तूप
शमनेतद्वद्वास्तुयज्ञस्तुपञ्चधा । ईशानेसूत्रपातः स्यादाग्नेयेस्तम्भरोपणम् ११ प्रदक्षि
णञ्चकुर्वीत वास्तोःपदविलेखनम् । तर्जनीमध्यमाचैव तथाङ्गुष्ठस्तुदक्षिणे १२ प्रवा
लरत्नकनकफलं पिष्टाकृतोदकम् । सर्ववास्तुविभागेषु शस्तंपदविलेखने १३ नमस्माङ्गा
रकाष्ठेन नखशस्त्रेणचर्मभिः । नशृङ्गास्थिकपालैश्च क्वचिद्वास्तुविलेखयेत् १४ एभिर्वि
लिखितंकुर्य्याद्दुःखशोकभयादिकम् । यदागृहप्रवेशःस्याच्छिल्पीतत्रापिलक्षयेत् १५ स्त
म्भसूत्रादिकं तद्वच्छुभाशुभफलप्रदम् । आदित्याभिमुखंरौति शकुनिःपुरुषंयदि १६

दि क्रमसे बुद्धिमान पुरुष अच्छे प्रकार परीक्षा करके समान शिखर और उत्तम उंचाई वाला स्तंभ
बनावे १ देवता-धूर्त्त और चौराहा इनके समीपमें अपना घर नहीं बनाना चाहिये इन सबके समीप
घर बनानेसे शोक दुःखादिकी प्राप्ति होती है २ यह सब घर आदि अपने घरके आगे की ओर होंय
तो शुभ फल होताहै-पीठकी ओर वा बाईं ओर को होंय तो भी शुभ फल होताहै इसप्रकारसे उत्तम
स्थानको विचार कर शुभ मुहूर्त्त में उत्तमरत्नों से युक्त शिला बनाके उसके ऊपर स्तंभको स्थापित
करे फिर ब्राह्मणों के समीप कारीगर पुरुषको स्नानकरा श्वेत वस्त्र पहराय अक्षत चन्दनादि और
गीत मंगलादिपूर्व्वक वेदपाठ के द्वारा मंगलाचरण करवाकर स्तंभको स्थापित करे उसी दिन ब्राह्मणोंको
तो खीरका भोजन और मधु घृत से हवन करवावे और वास्तोष्पते प्रतिजानीहि इसमंत्र
से घरका पूजनकरे यह संपूर्ण विधि घर में सूत भड़वाने के समय अथवा स्तंभ लगवाने के समय
करनी चाहिये चौखट लगाने वा घर में प्रवेश करनेके समय करनी चाहिये ३ । १० और वास्तुके
शान्तिके समय भी यह संपूर्ण विधि करनी चाहिये ऐसे पांच प्रकारका वास्तु यज्ञ करना चाहिये—
ईशानदिशा में सूत लगाना-अग्निकोण में स्तंभ लगाना घरके प्रदक्षिण क्रम करके तर्जनी-मध्यमा
और अंगुष्ठ इन सब करके मूंगा-रत्न और सुवर्ण इन करके घर के स्थान में पद की रेखा लिखे
११ । १३ पत्थर, अंगार, काष्ठ, नख, शस्त्र, चाम, सींग, अस्थि, कपाल, इत्यादिकों करके कभी
सूत न भाड़े इन वस्तुओं के द्वारा पद लिखने से दुःख शोक और भय होता है और जिस समय
गृहप्रवेश होय उससमयभी संपूर्ण शकुनोंकी परीक्षा करनी चा हिये १४ । १५ जब अशुभ शकुन

तुल्यकालंस्पृशेदङ्गं गृहभर्तुर्यदात्मनः । वास्त्वङ्गेतद्विजानीयान्नरशल्यंभयप्रदम् १७
अङ्कनानन्तरंयत्र हस्त्यश्वश्वापदंभवेत् । तदङ्गसम्भवंविन्द्यात्तत्रशल्यंविचक्षणः १८
प्रसार्य्यमाणेसूत्रेतु श्वागोमायुर्विलङ्घते । तत्तुशल्यंविजानीयात् खरशब्देतिभैरवे १९
यदीशानेतुदिग्भागे मधुरंरौतिवायसः । धनंतत्रविजानीयाद् भागेवास्वाम्यधिष्ठिते २०
सूत्रच्छेदेभवेन्मृत्युर्व्याधिःकीलेत्वधोमुखे । अङ्गारेषुतथोन्मादं कपालेषुचसम्भ्रमम् २१
कंबुशल्येषुजानीयात्पौंश्चल्यंस्त्रीषुवास्तुवित् । गृहभर्तुर्गृहस्यापिविनाशःशिल्पिसंभ्रमे २२
स्तम्भेस्कन्धच्युतेकुम्भे शिरोरोगंविनिर्दिशेत् । कुम्भापहारेसर्वस्य कुलस्यापिक्षयोभवे
त् २३ मृत्युःस्थानच्युतेकुम्भे भग्नेबन्धंविदुर्बुधाः । करसङ्ख्याविनाशेतु नाशंगृहपते
र्विदुः २४ वीजौषधिविहीनेतु भूतेभ्योभयमादिशेत् । ततःप्रदक्षिणेनान्यान् न्यसेत्स्त
म्भान्विचक्षणः २५ यस्माद्भयकरंनृणां योजिताह्यप्रदक्षिणम् २६ रक्षांकुर्वीतयत्नेन स्त
म्भोपद्रवनाशिनीम् २६ तथाफलवतींशाखां स्तम्भोपरिनिवेशयेत् । प्रागुदक्प्रवणंकु
र्य्याद्दिङ्मूढन्तुनकारयेत् २७ स्तम्भंवाभवनंवापि द्वारंवासगृहंतथा । दिङ्मूढेकुलनाशः

होवे तब यह देखे कि घरका स्वामी वास्तु पुरुषके किस अंगपर बैठाहै और अपने किस अंगको स्पर्श कर रहाहै उस समय सूर्य्यके वशीभूत जो दीप्त दिशाहै उस दिशामें स्थितहुआ पक्षी रूखाशब्द बोलताहोय तो गृहपति जिस स्थानपरस्थितहो उसस्थानकी पृथ्वीमें मनुष्यकी हड्डी गडीहुई जानना और गृहपति जिस अंगको स्पर्श कर रहाहो उसी अंगकी हड्डी गड़ीहुई जानना १६ । १८ जिस समय घरकी नींबकी जगह सूत तानाहो और उस सूतको कुत्ता और शृगाल उल्लंघजावें अथवा गधे ने अत्यन्त भयानक शब्द कर दियाहो तो जान लेना कि इसजगह शल्यहै जो कदाचित् ईशानकोण में काक मधुर२ शब्द कर रहाहो अथवा जिस दिशामें स्वामी स्थितहो वहां शब्द कररहाहो तो वहां धन गड़ाहुआ जान लेना जो उस सूत्रकाछेदन होजावे तो मृत्यु होती है कीलेका मुख नीचेको हो जाय तो व्याधि होती है–कोयले निकस आवें तो उन्माद होजाय–कपाली निकसे तो गृहपति के संभ्रम होजाताहै १९ । २१ शंख निकस आवे तो घरकी स्त्री व्यभिचारिणी होती है–घरके चिनने वाले कारीगरके संभ्रम होजावे तो गृहपतिका अथवा घरकानाश होताहै २२ जो धराहुआ घरका स्तंभ कन्धेपर गिरपडे अथवा कलश गिरपड़े तो गृहपतिके शिरमें रोग होजाताहै और संपूर्ण कलश खोय जावे तो कुलका क्षय होता है और वह जलका कलश फूटजावे तो मजदूरकी मृत्यु होती है और जो मापकी हाथोंकी संख्याका नाश होजावे तो घरके स्वामीका नाश होताहै २३ । २४ जिस घरमें वीज ओषधियोंका नाश होजावे तो भूत प्रेतादिकोंसे भयहोता है और घरके प्रदक्षिण क्रमसे स्तंभ लगाने चाहिये जो घरमें बाईंओरके क्रम करके स्तंभ लगाये जावें भय होताहै इस निमित्त स्तंभके उपद्रवों की दूरकरनेवाली शान्ति करनी चाहिये २५ । २६ फलवाली शाखाको स्तंभ के ऊपर स्थापितकरे और स्तंभका विस्तार पूर्व वा उत्तरकी ओर करना चाहिये घरमें दिग्मूढ़ता न करे अर्थात् ऐसा न करे जिसमें दिशाका ज्ञान न हो २७ स्तंभ--द्वार और वासस्थान इन तीनों में दि

स्यान्नचसंवर्द्धयेद्गृहम् २८ यदिसंवर्द्धयेद्गेहं सर्वदिक्षुविवर्द्धयेत् । पूर्वेणवर्द्धितंवास्तु कुर्य्याद्वैराणिसर्वदा २९ दक्षिणेवर्द्धितंवास्तु मृत्यवेस्यान्नसंशयः ।पश्चाद्विवृद्धंयद्वास्तु तदर्थक्षयकारकम् ३० वर्द्धापितंतथासौम्ये बहुसन्तापकारकम् । आग्नेयेयत्रवृद्धिःस्यात् तदग्निभयदम्भवेत् ३१ वर्द्धितंराक्षसेकोणे शिशुक्षयकरंभवेत् । वर्द्धापितन्तुवायव्ये वातव्याधिप्रकोपकृत् ३२ ईशान्यामन्नहानिःस्यात् वास्तौसंवर्द्धितेसदा । ईशानेदेवतागारं तथाशांतिगृहंभवेत् ३३ महानसन्तथाग्नेये तत्पार्श्वेचोत्तरेजलम् । गृहस्योपस्करंसर्वं नैर्ऋत्येस्थापयेद्बुधः ३४ वधस्थानंबहिःकुर्य्यात् स्नानमण्डपमेवच । धनधान्यञ्च वायव्ये कर्मशालान्ततोबहिः । एवंवास्तुविशेषःस्यात् गृहभर्तुःशुभावहः ३५ ॥

इतिश्रीमत्स्यपुराणेपञ्चपञ्चाशदधिकद्विशततमोऽध्यायः २५५ ॥

(सूत उवाच) अथातःसंप्रवक्ष्यामि दार्वाहरणमुत्तमम् ।धनिष्ठापञ्चकंमुक्त्वा विष्ट्यादिकमतःपरम् १ ततःसांवत्सरादिष्टे दिनेयायाद्वनंबुधः । प्रथमंबलिपूजाञ्च कुर्य्याद्वृक्षस्यसर्वदा २ पूर्वोत्तरेणपतितं गृहदारुप्रशस्यते । अन्यथानशुभंविन्द्यात् याम्योपरिनिपातनम् ३ क्षीरवृक्षोद्भवंदारु नगृहेविनिवेशयेत् । कृताधिवासंविहगैरनिलानलपीड़ितम् ४ गजावरुग्णञ्चतथा विद्युन्निर्घातपीड़ितम् । अर्द्धशुष्कंतथादारु भग्नशुष्कंतथै

ङ्मूढ होय तो कुलका नाश होताहै घरको किसी एकही दिशामें ऊंचा न बढ़ावे जो एकही दिशामें ऊंचाहोय तो सब दिशाओंमें ऊंचा करवाले या करले जो पूर्वकी ओर ऊंचा बढ़ाहुआ वास्तुहोवे तो शत्रुता होती है २८ । २९ दक्षिणकी ओर वढ़ाहुआ वास्तु होवे तो मृत्यु होती है पश्चिमकी ओर वढ़ाहोवे तो धनका नाश होताहै उत्तरकी ओर वढ़ाहुआ होय तो वहुतसा संताप होवे--अग्निकोण में वढ़ाहुआ होवे तो अग्निका भयहोय--नैर्ऋत्य कोणमें वढ़ाहुआ होवे तो वात व्याधिका रोग होताहै ३० । ३२ ईशान कोणमें वास्तु वढ़ाहोवे तो अन्नकी हानि होती है घर के ईशान कोणमें घरहीं में देवताका घर तथा शान्तिगृह बनाना चाहिये--अग्निकोण में रसोई करनेका स्थान वनावे रसोई के समीप उत्तरकी ओर जलका स्थान वनावे-- घरकी संपूर्ण चीज वस्तुओंको नैर्ऋत्य कोणमें रक्खे ३३ । ३४ स्नान करने आदिका स्थान घरसे वाहर वनावे धन धान्य रखनेका स्थान वायव्य कोण में वनावे इसप्रकारसे वनायाहुआ घर घरके स्वामीको शुभदायी होताहै ३५ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांपंचपंचाशदधिकद्विशततमोऽध्यायः २५५ ॥

सूतजी बोले—अब घरके काष्ठके निमित्त वृक्ष काटने की विधिको कहते हैं—धनिष्ठादि पञ्चकों को और भद्राको त्यागकर शुभ दिन में गमन करे प्रथम वृक्षों के वलिदानकर फिर उनकी पूजाकरे १ । २ जो काटा हुआ वृक्ष पूर्व तथा उत्तर की ओर को गिरे तो शुभदायी होताहै और पश्चिम वा दक्षिणकी ओर गिरे तो अशुभहै ३ पीपल आदिक दूधवाले वृक्षों के काष्ठको घर में न लगावे और जिसमें वहुत से पक्षियोंने वासकर रक्खाहो अथवा जो अग्निसे जल रहाहो ऐसे वृक्षको नहींलावे ४ और हस्ती या बिजली से पीड़ित वा दग्ध आधा सूखा सूखके फटेहुए यज्ञ स्थान तथा देवालय

वच ५ चैत्यदेवालयोत्पन्नं नदीसङ्गमजन्तथा । श्मशानकूपनिलयं तडागादिसमुद्भवम् ६
वर्जयेत्सर्वथादारु यदीच्छेद्विपुलांश्रियम् । तथाकण्टकिनोवृक्षान् नीपनिम्बविभीतकान्
७ श्लेष्मातकानाम्रतरूनूवर्जयेद् गृहकर्माणि । आसनाशोकमधुकसर्जशालाःशुभाव
हाः ८ चन्दनंपनसन्धन्यं सुरदारुहरिद्रवः । द्वाभ्यामेकेनवाकुर्यात् त्रिभिर्वाभवनंशुभम्
९ बहुभिःकारितंयस्मादनेकभयदंभवेत् । एकैवशिंशपाधन्या श्रीपर्णीतिन्दुकीतथा १०
एतानान्यसमायुक्ताः कदाचिच्छुभकारकाः । स्यन्दनःपनसस्तद्वत्सरलार्जुनपद्मकाः ११
एतेनान्यसमायुक्ता वास्तुकार्यफलप्रदाः । तरुच्छेदमहापीते गोधाविन्द्याद्विचक्षणः १२
माञ्जिष्ठवर्णेभेकः स्यान्नीलेसर्पादिनिर्दिशेत् । अरुणेसरटंविद्यान्मुक्ताभेशुकमादिशेत्
१३ कपिलेमूषकान्विद्यात् खड्गाभेजलमादिशेत् । एवंविधंसगर्भन्तु वर्जयेद्वास्तुकर्माणि
१४ पूर्वच्छिन्नन्तुगृह्णीयान्निमित्तशकुनैःशुभैः । व्यासेनगुणितेदैर्घ्ये अष्टाभिर्विहृतेतथा १५
यच्छेषमायतंविद्यादष्टभेदंवदामिवः । ध्वजोधूमश्चसिंहश्च वृषभःखरएवच १६ हस्ती
ध्वांक्षश्चपूर्वाद्याः करशेषाभवन्त्यमी । ध्वजःसर्वमुखोधन्यः प्रत्यग्द्वारोविशेषतः १७ उ
दङ्मुखोभवेत्सिंहः प्राङ्मुखोवृषभोभवेत् । दक्षिणाभिमुखोहस्ती ऋषिभिःसमुदाहृतः १८
एकेनध्वजउद्दिष्टस्त्रिभिःसिंहःप्रकीर्तितः । पञ्चभिर्वृषभःप्रोक्तो विकोणस्थाश्चवर्जयेत् १९

के समीप में उत्पन्न नदीके संगमपर श्मशान तथा कूपके स्थानमें उत्पन्न और तलाव के ऊपर होने
वाला इन सब वृक्षोंका काष्ठ नहीं लगाना चाहिये ५। ६ कीकर आदि कांटोंके वृक्ष कदंब-नींब-बहे
ड़ा-ल्हसोड़ा और आंब-इन सब वृक्षोंको घरके काम में वर्जदेवे और आसना-अशोक-महुआ-सर्जवृक्ष
साल-यह सब वृक्ष घरके काममें शुभकहे हैं ७। ८ चन्दन-फालसे का वृक्ष देवदारु इन सबसे अथवा
एक वृक्षसे घर बनाना शुभ है ९ बहुत से काष्ठोंसे बनाया हुआ घर अनेकप्रकार के भयोंको करता
है इसहेतु से अकेली सीसम अथवा सालवण और टेसू के वृक्ष यह सब अकेलेही लगाने चाहिये
और यह नहीं मिलें तो साल वा अर्जुन आदि अकेले वृक्षोंका काष्ठ लगानेसे उत्तम फल होता है
और वृक्ष काटनेके समय वृक्षमें से बहुत पीलावर्ण निकले तो उस वृक्षमें गोहका भय होताहै-मजी
ठी रंग निकले तो मेंडकका भय होताहै-नीलावर्ण निकले तो सर्पादि का भय होता है लाल निकले
तो किरलकांटों का भय-मोती के समान रंग निकले तो वहां बहुतसे तोतेजाने १० । १३ कपिल
वर्ण निकले तो मूसोंका भय-तलवारके समान आकार होय तो जलका भय ऐसे इन लक्षणोंवाले
वृक्षोंको काटनेके समयमें निषेध करदेवे १४ और जो पहलेका कटा हुआ वृक्ष पड़ाहो उसको अच्छे
शकुन होनेके समयले आवे-वृक्षकी मुटाईके हाथोंसे उसकी लम्बाईको गुणाकरे फिर आठका भाग
देवे एकबचे तो ध्वज दो बचे से धूम तीनबचेसे सिंह चार बचे से वृषभ-पांच से गधा-छठे से हाथी
और सातबचे तो ध्वांक्ष नाम जाने इनमें ध्वजका सब ओर को मुखहै शुभदायी है विशेष करके
इसका मुख पश्चिम की ओर है १५। १७ सिंहनामवाले का मुख उत्तरको है—वृषभनामका पूर्व
को हस्तीका मुख दक्षिणको है यह ऋषियोंका कथनहै यह सब शुभदायी हैं अन्यवृक्षों के मुखकोणों

तमेवाष्टगुणंकृत्वा करराशिंविचक्षणः । सप्तविंशाहृतेभागे ऋक्षंविद्याद्विक्षचणः २० अष्टभिर्भाजितेऋक्षे यःशेषःसव्ययोमतः । व्ययाधिकंनकुर्वीत यतोदोषकरम्भवेत् । आयाधिकेभवेच्छान्तिरित्याहभगवान्हरिः २१ कृत्वाग्रतोद्विजवरानथपूर्णकुम्भं दध्यक्षताम्रदलपुष्पफलोपशोभम् । कृत्वाहिरण्यवसनानितदाद्विजेभ्यो मङ्गल्यशान्तिनिलयाय गृहंविशेत्तु २२ गृह्योक्तहोमविधिनाबलिकर्मकुर्यात् प्रासादवास्तुशमनेचविधिर्यउक्तः । सन्तर्पयेद्द्विजवरानथभोक्ष्यभक्ष्यैः शुक्लाम्बरःस्वभवनंप्रविशेत्सधूपम् २३ ॥

इतिश्रीमत्स्यपुराणेषट्पञ्चाशदधिकद्विशततमोऽध्यायः २५६ ॥

(ऋषय ऊचुः) क्रियायोगःकथंसिद्ध्येद्गृहस्थादिषुसर्वदा । ज्ञानयोगसहस्राद्धिकर्मयोगोविशिष्यते १ (सूत उवाच) क्रियायोगंप्रवक्ष्यामि देवतार्चानुकीर्तनम् । भुक्तिमुक्तिप्रदंयस्मान्नान्यत्लोकेषुविद्यते २ प्रतिष्ठायांसुराणांतुदेवतार्चानुकीर्तनम् । देवयज्ञोत्सवञ्चापिवन्धनाद्येनमुच्यते ३ विष्णोस्तावत्प्रवक्ष्यामि यादृग्रूपंप्रशस्यते । शङ्खचक्रधरंशान्तं पद्महस्तंगदाधरम् ४ छत्राकारंशिरस्तस्य कम्बुग्रीवंशुभेक्षणम् । तुङ्गनासं शुक्तिकर्णं प्रशान्तोरुभुजक्रमम् ५ क्वचिदष्टभुजंविद्याच्चतुर्भुजमथापरम् । द्विभुजश्चापि कर्तव्योभवनेषुपुरोधसा ६ देवस्याष्टभुजस्यास्य यथास्थानंनिबोधत । खड्गोगदाशरः

में हैं उनको निषेध करदेवे १८ । १९ और इसीप्रकार से गुणाकरके भागदियेहुए शेषरहे हाथोंको आठगुणाकर पीछे सत्ताईससे गुणाकरे फिर आठका भागदेवे एक बचे तो व्यय दो बचे तो लाभ इसीक्रम से जाने जिसमें व्यय अर्थात् खर्च अधिकबचे ऐसी मुटाईवाले वृक्षको नहीं लावे–जिस में लाभ अधिकहो उसमें शान्तिहोती है यहहरि भगवान् का मतहै २० । २१ इसप्रकारसे घरको चिनवाकर पीछेसे जलपूर्ण कुंभको दधि अक्षत फलपुष्पादिसे शोभितकर सुवर्ण वस्त्र समेत ब्राह्मणोंके हाथमेंदे उनब्राह्मणोंको आगेकर पीछे घरमें प्रवेशकरे और शास्त्रके अनुसार हवनकरे बलिदानदेवे उत्तम भक्ष्य भोज्यपदार्थोंसे ब्राह्मणोंको भोजनकरवा श्वेत वस्त्रोंको धारणकर घरमें प्रविष्टहोवे २२ । २३ ॥ इति श्रीमत्स्यपुराणभाषाटीकायांषट्पंचाशदधिकद्विशततमोऽध्यायः २५६ ॥

ऋषियोंने पूछा-कि सब गृहस्थियोंका क्रियायोग कैसे सिद्धहोताहै हज़ारों ज्ञानयोगोंसे कर्मयोग उत्तम कहाहै १ सूतजी कहतेहैं-कि अब देवताके पूजन करने के कर्म्मयोगको कहताहूं क्योंकि त्रिलोकी में इस के समान अन्यकोई भुक्ति मुक्तिका देने वाला नहीं है २ देवताओं की प्रतिष्ठा में देवताओंकी पूजाका वर्णन कियाहै और देवयज्ञके उत्सवका वर्णन कियाहै इसको सुननेवाला मनुष्य बन्धनसे छुट जाताहै ३ अब विष्णुकी मूर्त्ति बनाने की विधि वर्णन करते हैं-शंख चक्र गदा और पद्म इनको हाथों में धारण करने वाली छत्राकार शिरवाली शंखसीग्रीवा सुन्दर नेत्र-ऊंची नासिका-सीपसे कान वाली शान्त स्वरूप ऐसी विष्णुभगवान्की मूर्त्ति बनानी चाहिये ४।५ विष्णुकी मूर्त्तिके आठहाथ बनावे वा चारहाथ बनावे अथवा दोही हाथ बनावे-६ आठहाथवाली मूर्त्तिके शस्त्रोंके स्थानोंको सुनो-खड्ग गदा-बाण-पद्म और कमल यह दाहिनी भुजाओंमें और धनुष-खेटक अर्थात् खाड़ा

पद्मं दिव्यंदक्षिणतोहरेः ७ धनुश्चखेटकञ्चैव शङ्खचक्रेचवामतः । चतुर्भुजस्यवक्ष्यामि यथैवायुधसंस्थितिः ८ दक्षिणेनगदापद्मं वासुदेवस्यकारयेत्। वामतःशङ्खचक्रेच कर्त्तव्येभूतिमिच्छता ९ कृष्णावतारेतुगदा वामहस्तेप्रशस्यते। यथेच्छयाशङ्खचक्रे चोपरिष्टात्प्रकल्पयेत् १० अधस्तात्पृथिवीतस्य कर्तव्यापादमध्यतः । दक्षिणेप्रणतंतद्वद् गरुत्मन्तंनिवेशयेत् ११ वामतस्तुभवेल्लक्ष्मीः पद्महस्ताशुभानना । गरुत्मानग्रतोवापिसंस्थाप्योभूतिमिच्छता १२ श्रीश्चपुष्टिश्चकर्तव्येपार्श्वयोःपद्मसंयुते। तोरणञ्चोपरिष्टात्तु विद्याधरसमन्वितम् १३ देवदुन्दुभिसंयुक्तं गन्धर्वमिथुनान्वितम् । पत्रवल्लीसमोपेतं सिंहव्याघ्रसमान्वितम् १४ तथाकल्पलतोपेतं स्तुवद्भिरमरेश्वरैः । एवंविधोभवेद्विष्णोस्त्रिभागेनास्यपीठिका १५ नवतालप्रमाणास्तु देवदानवकिन्नराः। अतःपरंप्रवक्ष्यामि मानोन्मानंविशेषतः १६ जालान्तरप्रविष्टानां भानूनांयद्रजःस्फुटम् । त्रसरेणुःसविज्ञेयो वालाग्रन्तैरथाष्टभिः १७ तदष्टकेनलिक्षातु यूकालिक्षाष्टकैर्मता। यवोयूकाष्टकंतद्वदष्टभिस्तैस्तदङ्गुलम् १८ स्वकीयाङ्गुलिमानेन मुखंस्याद्द्वादशाङ्गुलम्। मुखमानेन कर्तव्या सर्वावयवकल्पना १९ सौवर्णीराजतीवापि ताम्रीरत्नमयीतथा। शैलीदारुमयी चापि लोहसंघमयीतथा २० रीतिकाधातुयुक्तावा ताम्रकांस्यमयीतथा। शुभदारुमयी

और शंख चक्र यहबायें हाथ में धारण करानेचाहिये-अब चारहाथोंवाली विष्णुकी मूर्त्तिके शस्त्रोंको सुनो-७। ८ दाहिने हाथों में गदा और पद्म धारण करावे और बायें हाथों में शंख चक्रोंको धारण करानाचाहिये ९ कृष्णावतार की मूर्त्ति के वाम हाथ मेंही गदाधारण करानी योग्यहै और उसके ऊपर इच्छापूर्व्वक शंख चक्रको धारण करावे १० और विष्णुकी मूर्त्तिके बायें पैरके नीचे पृथ्वीरहने देवे दाहिनेपैरके नीचे विनय करतेहुए गरुड़ को बैठावै-११ अथवा विष्णुके वामांगकी ओर लक्ष्मीजीको स्थापित करे और गरुड़को विष्णुके आगे स्थित करे और श्री-पुष्टि इन्हों को कमलसे युक्त करके दोनों बगलों में स्थितकरे- विष्णुकी मूर्त्तिके ऊपर विद्याधरसे युक्तकीहुई तोरण लगावे १२।१३ और देवताओंके नगाड़े गन्धर्वोंके मिथुन जोड़े और बेलबूटी सिंह आदिक चित्राम भी विष्णुभगवान्की मूर्त्तिके समीपमें बनाने चाहिये १४ और समीपवर्त्ती स्तुति करतेहुए देवताओंकी मूर्त्तिभी बनानी चाहिये ऐसे प्रकारकी विष्णुकी मूर्त्तिके तीसरे भागके प्रमाण तुल्य पीठिका स्थित होनेकी सीढ़ी बनानी चाहिये १५ और देवता दानव और मनुष्य यह सब ९ तालप्रमाणके होतेहैं (अंगुष्ठ से मध्यमाअंगुली तकके विस्तारको ताल कहते हैं) अब अन्य२ विशेष प्रमाण और वेदोंको कहते हैं १६ झरोखोंमें जो सूर्य्यकी किरणोंपर रजदिखाई देती है उसको त्रसरेणु कहते हैं आठत्रसरेणुओंको बालाग्र कहते हैं—आठबालाग्रोंकी लिक्षा—आठलिक्षाओंकी यूकाहोती है-आठयूकाओंका यव होताहै उन आठयवोंका अंगुलहोताहै १७।१८ और अपने बारहअंगुल प्रमाणका मुखहोताहै-मूर्त्तिके मुखके प्रमाणसे संपूर्ण अवयवोंकी कल्पना होती है १९ सुवर्ण[१] चाँदी[२]-तांबा[३]-रत्न[४]-पाषाण[५]-काष्ठ[६]-लोहवापीतलकी-अथवा तांबा काँशीकी मिलीहुई अथवा चन्दन आदि शुभकाष्ठकी इत्यादि अनेक

वापि देवतार्चाप्रशस्यते २१ अङ्गुष्ठपर्वादारभ्य वितस्तिर्यावदेवतु । गृहेषुप्रतिमाकार्या नाधिकाशस्यतेबुधैः २२ आषोडशातुप्रासादे कर्तव्यानाधिकाततः । मध्योत्तमकनिष्ठातु कार्यावित्तानुसारतः २३ द्वारोच्छ्रायस्ययन्मानमष्टधातत्तुकारयेत् । भागमेकंततस्त्यक्त्वा परिशिष्टन्तुयद्भवेत् २४ भागद्वयेनप्रतिमात्रिभागीकृत्यतत्पुनः । पीठिकाभागतःकार्या नातिनीचानचोच्छ्रिता २५ प्रतिमामुखमानेन नवभागान्प्रकल्पयेत् । चतुरङ्गुलाभवेद्ग्रीवा भागेनहृदयंपुनः २६ नाभिस्तस्मादधःकार्या भागेनैकेनशोभना । निम्नत्वेविस्तरत्वेच अङ्गुलंपरिकीर्तितम् २७ नाभेरधस्तथामेढ्रं भागेनैकेनकल्पयेत् । द्विभागेनायतावूरू जानुनीचतुरङ्गुले २८ जङ्घेद्विभागेविख्याते पादौचचतुरङ्गुलौ । चतुर्दशाङ्गुलस्तद्वन्मौलिरस्यप्रकीर्तितः २९ ऊर्द्ध्वमानमिदंप्रोक्तं पृथुत्वञ्चनिबोधत । सर्वावयवमानेषु विस्तारंशृणुतद्द्विजाः ! ३० चतुरङ्गुलंललाटं स्यादूर्ध्वंनासातथैवच । द्व्यङ्गुलन्तुहनुर्ज्ञेयमोष्ठः स्याङ्गुलसम्मितः ३१ अष्टाङ्गुलेललाटेच तावन्मात्रेभ्रुवौमते । अर्द्धाङ्गुलाभ्रुवोर्लेखा मध्येधनुरिवानता ३२ उन्नताग्राभवेत्पार्श्वे श्लक्ष्णातीक्ष्णा प्रशस्यते । अक्षिणीद्व्यङ्गुलायामे तदर्धंचैवविस्तरे ३३ उन्नतोदरमध्येतु रक्तान्तेशुभलक्षणे । तारकार्धविभागेन दृष्टिःस्यात्पञ्चभागिका ३४ द्व्यङ्गुलन्तुभ्रुवोर्मध्ये नासामू

प्रकारकी मूर्त्ति बनानी श्रेष्ठ कहीहैं २०।२१ अंगूठेकी पोरीसे एक विलस्त तककी मूर्त्ति घरमें रखनी चाहिये इससे अधिक प्रमाणकी मूर्त्ति घरोंमें नहीं रखनी योग्यहै २२ और प्रासाद अर्थात् देवताओं के मन्दिरोंमें वा राजाओंके घरों में सोलह अंगुलकी बनावे इससे अधिक नहीं बनवावे और अपने वित्तके अनुसार मध्यमा-उत्तमा और कनिष्ठामूर्त्तिबनानी कही है २३ और मन्दिरके द्वारकी उंचाईके आठभाग करके एक भागको त्यागदेवे फिर उनवाकी बचेहुओंके तीनभाग कर दो भागमें तो देवताकी मूर्त्ति बनवावे और तीसरे भागमें पीठिका अर्थात् मूर्त्तिके स्थितहोनेको पैंडीबनावे वह पैंडी अधिक नीची नहीं रखनी और अधिक ऊंचीभी नहीं रखनी चाहिये २४। २५ फिर मूर्त्तिके मुखके प्रमाण भरके नव ९ भाग कल्पित करले उसमें चार अंगुलकी तो ग्रीवाबनावे और भागमें हृदय बनावे २६ उसहृदय से नीचे एकभागमें सुन्दर नाभिबनावे वह नाभि एकअंगुलगहरी और एकही अंगुल विस्तारवाली बनानी चाहिये २७ नाभिसे नीचे एक भागमें लिंगबनावे दो भागोंमें जंघा बनावे चार अंगुलमें घोंटू बनावे दो भागोंमें पिंडली बनावे और चार अंगुलमें पैरबनावे इसमूर्त्तिका मस्तक चौदह अंगुल ऊंचा होताहै यह तो मूर्त्तिकी उंचाई कही है-अब इसकी मुटाई को कहतेहैं-हे द्विजवर्य्यो तुम संपूर्ण अवयवों के विस्तारको श्रवण करो २८। ३० मस्तक चार अंगुल मोटाहोता है मस्तकसे ऊपर दीखतीहुई नासिकाबनावे दो अंगुलकी ठोढ़ीबनावे अपने एकअंगुलका ओष्ठ बनावे ३१ आठ अंगुलकी कनपटी बनावे आठअंगुलमें दोनों भ्रुकुटी बनावे और आधे अंगुलके प्रमाणमें भ्रुकुटीके बालोंकी रेखाबनावे पर वह भ्रुकुटी धनुषके समान नमित अर्थात् नईहुई बनानी चाहिये ३२ मूर्त्तिके नेत्रोंके दोनों ओरोंको आगेसे ऊंचाकरे और सुन्दर महीन औरपैने २ करे दोअं-

लमथाङ्गुलम्। नासाग्रविस्तरंतद्वत् पुटद्वयमथानतम् ३५ नासापुटबिलंतद्वदर्धाङ्गुलमुदाहृतम्। कपोलेद्व्यङ्गुलेतद्वत् कर्णमूलाद्विनिर्गते ३६ हन्वग्रमङ्गुलंतद्वद्विस्तारोद्व्यङ्गुलोभवेत्। अर्द्धाङ्गुलाभ्रुवोराजी प्रणालसदृशीसमा ३७ अर्द्धाङ्गुलसमस्तद्वदुत्तरोष्ठस्तुविस्तरे। निष्पावसदृशन्तद्वन्नासापुटदलंभवेत् ३८ सृक्किणीज्योतिस्तुल्ये तु कर्णमूलात्षड़ङ्गुले। कर्णौतुभ्रूसमौज्ञेयो ऊर्द्ध्वन्तुचतुरङ्गुलौ ३९ द्व्यङ्गुलौकर्णपाश्वौतु मात्रामेकान्तुविस्तृतौ। कर्णयोरुपरिष्टाच्च मस्तकंद्वादशाङ्गुलम् ४० ललाटात् पृष्ठतोऽर्धेन प्रोक्तमष्टादशाङ्गुलम्। षट्त्रिंशदङ्गुलश्चास्य परिणाहःशिरोगतः ४१ सकेशनिचयोयस्य द्विचत्वारिंशदङ्गुलः। केशान्ताद्धनुकातद्वदङ्गुलानितुषोडश ४२ ग्रीवामध्यपरीणाहश्चतुर्विंशतिकाङ्गुलः। अष्टाङ्गुलाभवेद्ग्रीवा पृथुत्वेनप्रशस्यते४३ स्तनग्रीवान्तरंप्रोक्तमेकतालंस्वयम्भुवा। स्तनयोरन्तरंतद्वद्द्वादशाङ्गुलमिष्यते ४४ स्तनयोर्मण्डलंतद्वद् द्व्यङ्गुलंपरिकीर्तितम्। चूचुकौमण्डलस्यान्तर्यवमात्रावुभौस्मृतौ ४५ द्वितालश्चापिविस्ताराद्वक्षस्थलमुदाहृतम्। कक्षेषड़ङ्गुलेप्रोक्ते बाहुमूलस्तनान्तरे ४६ चतुर्दशाङ्गुलौपादावङ्गुष्ठौतुत्रियङ्गुलौ। पञ्चाङ्गुलपरीणाहमङ्गुष्ठाग्रं तथोन्नतम् ४७ अङ्गुष्ठकसमातद्वदायामास्यात्प्रदेशिनी। तस्याःषोड़शभागेन हीयते

गुल विस्तारवाले नेत्रबनाने चाहिये नेत्रके बीचमें उंचाईकरे कोयोंको लालबनावे और आंखकेतारेके आधेभागसे पांचगुनी नेत्रकी काली पुतली बनानी चाहिये ३३। ३४ दोनों भ्रुकुटियोंके बीचकी जगह दोअंगुलरखनी चाहिये एकअंगुलमें नासिकाकी जड़बनावे एकअंगुलमें नासिकाका अग्रभागबनाकर दोनों पुटबनावे-नासिकाके पुटके छिद्रको आधे अंगुलके प्रमाणमें बनावे दो अंगुलमें कपोल बनावे दो अंगुलका ठोढ़ीका अग्रभाग बनावे और कमल की डंडीके समान आधे अंगुल प्रमाणवाली भ्रुकुटियोंके बालोंकी रेखाबनावे आधअंगुलके ओठबनावे मोरके समानदलवाला नासिकाकापुट बनावे ३५। ३८ भ्रुकुटियोंके समान चार अंगुल ऊंचेकान बनावे और कानोंके पशवारे दो अंगुल प्रमाणके बनावे-कानोंके ऊपर बारह अंगुलका मस्तकबनावे इससंपूर्ण मूर्त्तिके शिर पर्य्यन्त छत्तीस अंगुलका प्रमाणहोना चाहिये शिखासे ठोढ़ी पर्य्यन्त सोलह अंगुल विस्तार होताहै और पैरोंसे शिखापर्य्यन्त बयालीस ४२ अंगुलका विस्तारहोताहै ३९। ४२ ग्रीवा और कटिके बीचमें चौबिस अंगुलका विस्तारकरे और स्तन वा ग्रीवाका एकताल प्रमाण अन्तर करना यह सब ब्रह्माजीका वचन है और दोनों स्तनोंके बीचमें बारहअंगुल के प्रमाण जगह छोड़नी चाहिये ४३। ४४ स्तनोंके मंडल दो २ अंगुलके बनावे मंडलोंके बीचका चूचुक बीटकना जौके प्रमाण बनावे छातीको दोताल विस्तारवाली बनावे छः अंगुल की दोनोंकोख बनावे और भुजाओंके मूल और स्तनोंके बीचमें छः अंगुल जगह छोड़े चौदह अंगुल प्रमाणमें दोनों पैरबनावे तीनअंगुल प्रमाणके दोनों अंगूठे बनावे और अग्रभागतक अंगूठेकी लंबाई और उँचाई पांच अंगुल की बनावे अंगूठेके समान प्रदेशिनी नाम प्रथम उंगली बनावे इससे सोलहवें भाग हीन मध्यमा उंगली बना

मध्यमाङ्गुली ४८ अनामिकाष्टभागेन कनिष्ठाचापिहीयते। पर्वत्रयेणचाङ्गुल्योगुल्फौ द्व्यङ्गुलकौमतौ ४९ पार्ष्णिद्व्यङ्गुलमात्रस्तु कलयोच्चः प्रकीर्तितः । द्विपर्वाङ्गुष्ठकः प्रोक्तः परीणाहश्चद्व्यङ्गुलः ५० प्रदेशिनीपरीणाहस्त्र्यङ्गुलःसमुदाहृतः । कन्यसा चाष्टभागेन हीयतेक्रमशोद्विजाः ५१ अङ्गुलेनोच्छ्रयःकार्यो ह्यङ्गुष्ठस्यविशेषतः । तदर्धेनतुशेषाणामङ्गुलीनान्तथोच्छ्रयः ५२ जङ्घाग्रेपरिणाहस्तु अङ्गुलानिचतुर्दश। जङ्घामध्येपरीणाहस्तथैवाष्टादशाङ्गुलः ५३ जानुमध्येपरीणाह एकविंशतिरङ्गुलः। जानूच्छ्रयोऽङ्गुलःप्रोक्तो मण्डलन्तुत्रिरङ्गुलम् ५४ ऊरुमध्येपरीणाहो ह्यष्टाविंशतिकाङ्गुलः। एकत्रिंशोपरिष्टाच्च वृषणौतुत्रिरङ्गुलौ ५५ द्व्यङ्गुलञ्चतथामेढ्रं परीणाहः षडङ्गुलम्। मणिबन्धादधोविद्यात् केशरेखास्तथैवच ५६ मणिकोशपरीणाहश्चतुरङ्गुलइष्यते। विस्तरेणभवेत्तद्वत्कटिरष्टादशाङ्गुला ५७ द्वाविंशतितथास्त्रीणां स्तनौचद्वादशाङ्गुलौ। नाभिमध्यपरीणाहो द्विचत्वारिंशदङ्गुलः ५८ पुरुषेपञ्चपञ्चाशत् कट्याञ्चैवतुवेष्टनम्। कक्षयोरुपरिष्टात्तु स्कन्धौप्रोक्तौषडङ्गुलौ ५९ अष्टाङ्गुलान्तुविस्तारे ग्रीवाञ्चैवविनिर्दिशेत्। परीणाहेतथाग्रीवां कलाद्वादशनिर्दिशेत् ६० आयामोभूजयोस्तद्वत् द्विचत्वारिंशदङ्गुलः। कार्यन्तुबाहुशिखरं प्रमाणेषोड़शाङ्गुलम् ६१ शेषाणाम

वे ४५।४८ मध्यमासे आठवेंभागहीन अनामिकाबनावे दोअंगुलप्रमाणके गुल्फ अर्थात् टकनेबनावे ४९ दो अंगुलके प्रमाणकी एड़ीबनावे और अंगूठेके दोपोरुए और प्रदेशिनी अंगुलीके तीन पोरुए बनावे और अंगूठेकी उंचाई एक अंगुलकी अंगुलियोंके आधे अंगुलकी उंचाई होती है पिंडलियोंके मध्यभागका विस्तार चौदह अंगुलका होताहै और मध्यभागका विस्तार अठारह अंगुलका होताहै और घोंटुओंके मध्यभागका विस्तार इक्कीस अंगुलका बनावे एक अंगुल ऊंचे घोंटूबनावे और घोंटुओंके मंडल तीन अंगुलके बनावे ५०।५४ जांघोंकेमध्यमें अट्ठाईसअंगुलका विस्तारहोताहै और ऊपरकी ओर इकतीस अंगुलका विस्तार होताहै, तीन अंगुलके वृषण बनावे और दो अंगुलका लिंग बनाना चाहिये लिंगका सब विस्तार छःअंगुल प्रमाणका बनावे और पहुँचे के नीचेके भागमें केशोंकीरेखा बनावे पहुंचे की मुटाई चार अंगुलके प्रमाणकी बनावे कटिका विस्तार अठारह अंगुलका होताहै और देवताओंकी मूर्त्तिकी कटिका विस्तार बत्तीस अंगुलका होताहै और नाभिके मध्यमें बयालीस अंगुलका विस्तार बनावे और पुरुषकी कटिमें पचपन अंगुलकी तागड़ी बनावे और कांखोंसे ऊपर छः अंगुलके कंधे होते हैं, ग्रीवाको आठ अंगुलके विस्तारमें बनावे दोनों भुजाओंकी सुरुषि बयालीस अंगुलकी बनावे, वाहुकी शिखरको सोलह अंगुलकी बनावे, सात अंगुलकी हथेली बनावे और पूर्व्वोक्त प्रकार से एकसे एकहीन भागवाली अंगुली बनावे और सब अंगुलियों के यव एकसे एक हीन भागवाले होते हैं और अंगूठे के पोरुए मध्यमा अंगुली के पोरुए के समान होते हैं, अंगूठे का अगला पोरुआ दो यव अधिकका बनावे, आधे पोरुएमें नख बनावे नखोंको चिकना और लाल करे आगेसे कुछ थोड़े लालकरे अंगुलियोंकी पीठको डूंघीबनावे किनारों को कुछ ऊंचा बनावे और

ङ्गुलीनान्तु भागोभागेनहीयते । मध्यमामध्यभागन्तु अङ्गुलद्वयमायतम् ६२ यवौ
यवेनसर्वासान्तस्यास्तस्याःप्रहीयते । अङ्गुष्ठपर्वमध्यन्तु तर्जन्यासद्दशंभवेत् ६३ यव
द्वयाधिकंतद्वदग्रपर्वउदाहृतम् । पर्वार्धेतुनखान्विद्यादङ्गुलीषुसमन्ततः ६४ स्निग्धं
श्लक्ष्णंप्रकुर्वीतईषद्रक्तंतथाग्रतः । निम्नपृष्ठंभवेन्मध्ये पार्श्वतःकलयोच्छ्रितम् ६५ तथै
वकेशवल्लीयंस्कन्धोपरिदशाङ्गुला।स्त्रियःकार्यास्तुतन्वङ्ग्यः स्तनोरुजघनाधिकाः६६
चतुर्दशाङ्गुलायाममुदरंनामनिर्दिशेत् । नानाभरणसम्पन्नाः किञ्चित्श्लक्ष्णभुजास्त
तः ६७ किञ्चिद्दीर्घंभवेत्वक्त्रमलकावलिरुत्तमा । नासाग्रीवाललाटञ्च सार्द्धमात्रंत्रिरङ्गु
लम् ६८ अध्यर्द्धाङ्गुलविस्तारः शस्यतेऽधरपल्लवः । अधिकंनेत्रयुग्मन्तु चतुर्भागेण
निर्दिशेत् । ग्रीवावलिश्चकर्तव्या किञ्चिदर्धाङ्गुलोच्छ्रया ६९ एवंनारीषुसर्वासु देवानां
प्रतिमासुच । तवचालमिदंप्रोक्तं लक्षणंपापनाशनम् ७० ॥

इतिश्रीमत्स्यपुराणेसप्तपञ्चाशदधिकद्विशततमोऽध्यायः २५७ ॥

(सूत उवाच) अतःपरंप्रवक्ष्यामि देवाकारान्विशेषतः । दशतालःस्मृतोरामो बलि
वैरोचनिस्तथा १ वराहोनारसिंहश्च सप्ततालस्तुवामनः । मत्स्यकूर्मौचनिर्दिष्टौ यथा
शोभंस्वयम्भुवा २ अतःपरंप्रवक्ष्यामि रुद्राद्याकारमुत्तमम् । सपीनोरुभुजस्कन्धस्तप्त
काञ्चनसप्रभः ३ शुक्लोऽर्करश्मिसंघातश्चन्द्राङ्कितजटोविभुः । जटामुकुटधारीच द्व्यष्टव
र्षाकृतिश्चसः ४ बाहुवारणहस्ताभौ वृत्तजङ्घोरुमण्डलः। ऊर्ध्वकेशश्चकर्तव्यो दीर्घाय
तविलोचनः ५ व्याघ्रचर्मपरीधानः कटिसूत्रत्रयान्वितः। हारकेयूरसम्पन्नो भुजङ्गाभरण

देवताओं की स्त्रियोंके पतले और सूक्ष्म अंग बनावे कुचा जंघा और नितम्बों को भारी स्थूलबनावे
चौदह अंगुलके विस्तारमें उदरको बनावे इन संपूर्ण मूर्त्तियोंको अनेक प्रकारके आभूषणोंसे युक्तकरे
भुजाओं को कुछ पतली बनावे मुख को भी पतला बनावे जुल्फों की रेखा बनावे ओष्ठ आधे २
अंगुलके बनावे दोनों नेत्रोंको ओष्ठोंके चतुर्थांशभाग अधिक बनावे ग्रीवा की वलिको आध अंगुलसे
कुछ ऊंचीकरे यह संपूर्ण देवताओं की मूर्तिका लक्षण पापोंका नाश करनेवाला है वह सब तुम्हारे
आगे वर्णन करदिया है ५५ । ७० ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांसप्तपंचाशदधिकद्विशततमोऽध्यायः २५७ ॥

सूतजी बोले—अब विशेष भेदके द्वारा अलग २ देवताओंकी मूर्त्तिके आकारों को कहते हैं रामचन्द्रजी
की मूर्त्तिको दशताल प्रमाणकी बनावे बलिकी मूर्तिको भी दशतालही ऊंची बनावे (एक
ताल अंगूठे से लेकर मध्यमा अंगुली तकके विस्तारका होताहै) वाराह, नृसिंह और वामन यह
साततालके होते हैं मत्स्यजी और कूर्म अवतारकी मूर्त्तिको जैसी अच्छलगे वैसीबनाले १।२ अब
शिवजी आदिक देवताओंके आकारको कहते हैं कड़ी जांघ भुजा और कन्धोंसे युक्त तप्त सुवर्णकीसी
कान्ति श्वेत चन्द्रमा से युक्त जटामुकुट समेत सोलह वर्षकी अवस्था संयुक्त ऐसी मूर्त्ति शिवजीकी
बनावे ३।४ और भुजा हाथीकी सूंड़के समान जांघ और पिंडलियों को गोलबनावे ऊपरको खड़े

स्तथा ६ बाहवश्चापिकर्तव्या नानाभरणभूषिताः । पीनोरुगण्डफलकः कुण्डलाभ्याम
लङ्कृतः ७ आजानुलम्बबाहुश्च सौम्यमूर्त्तिःसुशोभनः । खेटकंवामहस्तेतु खङ्गञ्चैव
तुदक्षिणे ८ शक्तिंदण्डंत्रिशूलञ्च दक्षिणेषुनिवेशयेत् । कपालंवामपार्श्वेतु नागंखट्वाङ्गमे
वच ९ एकश्चवरदोहस्तस्तथाक्षवलयोऽपरः । वैशाखस्थानकंकृत्वा नृत्याभिनयसंस्थि
तः १० नृत्यन्दशभुजःकार्यो गजचर्मधरस्तथा । तथात्रिपुरदाहेच बाहवःषोड़शैवतु ११
शङ्खंचक्रंगदाशार्ङ्गं घण्टातत्राधिकाभवेत् । तथाधनुःपिनाकञ्च शरोविष्णुमयस्तथा १२
चतुर्भुजोऽष्टबाहुर्वा ज्ञानयोगेश्वरोमतः । तीक्ष्णनासाग्रदशनः करालवदनोमहान् १३
भैरवःशस्यतेलोके प्रत्यायतनसंस्थितः । नमूलायतनेकार्ये भैरवस्तुभयङ्करः १४ नार
सिंहवराहोवा तथान्येऽपिभयङ्कराः । नाधिकाङ्गानहीनाङ्गाः कर्तव्यादेवताःक्वचित् १५
स्वामिनंघातयेत्न्यूना करालवदनातथा । अधिकाशिल्पिनंहन्यात् कृशाचैवार्थनाशिनी
१६ कृशोदरीतुदुर्भिक्षं निर्मांसाधननाशिनी । वक्रनासातुदुःखाय संक्षिप्ताङ्गीभयङ्करी १७
चिपिटादुःखशोकाय अनेत्रानेत्रनाशिनी । दुःखदाहीनवक्त्रातु पाणिपादकृशातथा १८
हीनाङ्गाहीनजङ्घाच भ्रमोन्मादकरीनृणाम् । शुष्कवक्त्रातुराजानं कटिहीनाचयाभवेत्
१९ पाणिपादविहीनोयो जायतेमारकोमहान् । जङ्घाजानुविहीनाच शत्रुकल्याणका

हुए केशबनावे लम्बे और विस्तृत नेत्रबनावे व्याघ्रचर्म उढ़ावे कटिमें तीन लड़ी के सूतकी तागड़ी
बांधे, हार बाजूबन्द और सर्प इत्यादि भूषणों से युक्तकरे और भुजाओंको भी अनेक प्रकारके आभूषणों
से भूषित करे कपोल स्थूल बनाकर कुण्डलों की शोभा से विभूषित करे लम्बी भुजावाली
सुन्दर सौम्य मूर्त्ति बनाकर वाम हाथ में खेटक शस्त्र, दहिने हाथ में शंख, शक्ति, दण्ड और त्रिशूल
धारण करवावे बाईं ओर कपाल, सर्प और खट्वांग स्थापित करे एक हाथ को वर देने के समान
बनावे दूसरे हाथ में रुद्राक्ष धारण करे और नृत्य देखने में तत्पर ऐसी मूर्त्ति बनावे ५।१० नृत्य
करते हुए शिवजीकी दश भुजा बनावे और हस्ती के चर्म्मको उढ़ावे और त्रिपुरको दग्ध करतेहुए
शिवजी की मूर्त्तिके सोलह भुजबनावे उन भुजाओं में शंख, चक्र, गदा, शार्ङ्ग धनुष, पिनाक धनुष
और विष्णुरूपी बाण धारणकरे ११।१२ और जब शिवजी की चतुर्भुजी तथा अष्टभुजी मूर्त्तिबनावे
तब ज्ञान योगेश्वर महादेव होते हैं और पैनी नासिका पैने दाँत और महान् विकरालमुख भैरवकी
मूर्त्ति बनानी चाहिये और नृसिंह वराह इत्यादिक मूर्त्ति भी भयंकर होती हैं परन्तु देवता की किसी
मूर्त्तिको भी अधिक वा न्यून अंगवाली न बनावे १३।१५ हीन अंगवाली तथा विकराल मुखवाली
देवताकी मूर्त्ति स्वामी का नाश करती है अधिक अंगवाली मूर्त्ति कारीगर का नाशकरती है कृशमूर्त्ति
धनका नाशकरती है कृश उदरवाली दुर्भिक्षकरती है, मांसरहित मूर्त्ति धनकानाशकरती है,टेढ़ी नासिका
वाली दुःखकरती है संक्षिप्त अंगवाली भयकरतीहै १६।१७ चिपटे नेत्रोंवाली दुःख और शोक
को करती है अंधी मूर्त्ति नेत्रोंका नाशकरती है मुखरहित तथा पंगे हाथ पैरोंवाली मूर्त्ति दुःखकरती
है १८ हीन अंगवाली वा हीन जंघावाली भय और उन्माद करती है सूखे मुखवाली मूर्त्ति राजाका

रिणी २० पुत्रमित्रविनाशाय हीनवक्षस्थलातुया । सम्पूर्णावयवायातु आयुर्लक्ष्मीप्रदा
सदा २१ एवंलक्षणमासाद्य कर्तव्यःपरमेश्वरः । स्तूयमानःसुरैःसर्वैः समन्ताद्दर्शयेद्भवम्
२२शक्रेणनन्दिनाचैव महाकालेनशङ्करम् । प्रणतालोकपालास्तु पार्श्वेतुगणनायकाः२३
नृत्यत्भृङ्गीरिटिश्चैव भूतवेतालसंवृताः । सर्वेहृष्टास्तुकर्तव्यास्तुवन्तःपरमेश्वरम् २४
गन्धर्वविद्याधरकिन्नराणामथाप्सरोगुह्यकनायकानाम् । गणैरनेकैःशतशोमहेन्द्रैर्मुनिप्र
वीरैरपिनम्यमानम् २५ धृताक्षसूत्रैःशतशःप्रवालपुष्पोपहारप्रचयन्ददद्भिः । संस्तूयमा
नंभगवन्तमीड्यं नेत्रत्रयेणामरमर्त्यपूज्यम् २६ ॥

इतिश्रीमत्स्यपुराणेऽष्टपञ्चाशदधिकद्विशततमोऽध्यायः २५८ ॥

(सूत उवाच) अधुनासम्प्रवक्ष्यामि अर्धनारीश्वरंपरम् । अर्धेनदेवदेवस्य नारीरू
पंसुशोभनम् १ ईशार्द्धेतुजटाभागोबालेन्दुकलयायुतः। उमार्द्धेचापिदातव्यौ सीमन्ततिल
कावुभौ २ वासुकिर्दक्षिणेकर्णेवामेकुंडलमादिशेत् । बालिकाचोपरिष्टात्तुकपालंदक्षिणेकरे।
त्रिशूलंवापिकर्तव्यंदेवदेवस्यशूलिनः३ वामतोदर्पणंदद्यादुत्पलंतुविशेषतः४ वामबाहुश्च
कर्तव्यः केयूरवलयान्वितः । उपवीतञ्चकर्तव्यंमणिमुक्तामयन्तथा ५ स्तनभारंतथार्धेतुवा
मेपीनंप्रकल्पयेत् । परार्घ्यमुज्ज्वलंकुर्याच्छ्रोण्यर्धेतुतथैवच ६ लिङ्गार्द्धमूर्ध्वगंकुर्यात्व्याला

नाशकरती है हाथ पैरोंसे रहित मूर्त्ति महामारी करती है पिंडली और घोंटुओं से हीन मूर्त्ति शत्रु
को आनन्द करती है १९।२० छातीरहित मूर्त्ति पुत्र और मित्रोंका नाशकरती है और सांगोपांग
संपूर्ण अंगोंवाली मूर्त्तिको बनवावे तो आयु और लक्ष्मी देती है ऐसे इन पूर्वोक्त लक्षणों से युक्त
शिवजी की मूर्त्ति बनानीचाहिये, सबदेवताओं से स्तुति होतेहुए इन्द्र, नन्दिकेश्वर, लोकपाल, और
गणेश्वर, इन प्रणतहुओं की मूर्त्ति बराबरमें बनावे और नृत्य करतेहुए भूत वेताल आदिकों की मू-
र्त्तियोंको भी बनावे इन सबकी मूर्त्ति शिवजी की स्तुतिमें तत्पर और आनन्दमें भरीहुई बनावे और
गन्धर्व, विद्याधर, किन्नर, अप्सरा, गुह्यक, अनेक गणेश्वर मुनि सिद्ध इत्यादिकोंसे पूजित और पुष्पों
के हार गुंथतेहुए महादेवजी की स्तुति करतेहुए अनेक गणोंसे संयुक्त त्रिनेत्र महादेवजी की मूर्त्ति
बनवानी योग्यहै २१।२६ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायामष्टपंचाशदधिकद्विशततमोऽध्यायः २५८ ॥

सूतजीबोले-कि ऋषिलोगो अब मैं अर्धनारीश्वर महादेवजीकी मूर्त्तिका वर्णन करताहूं अर्थात्
शिवजी का आधाअंग जो सुन्दर नारीकाहै उसको कहताहूं १ शिवजी के शिरकी आधीजटामें एक
कलासे युक्त बालचन्द्रमा बनावे और आधे भागमें पार्वतीजी की मूर्त्तिबनावे यह दोनों शिवजी के
मस्तक के तिलकहैं २ दाहिने कानमें वासुकिसर्प बायें में कुंडल धारणकरे दक्षिण हाथमें कपाल
और वामहाथमें सीसा वा कमल धारण करावे ३।४ वाम भुजाको बाजूबन्दादि भूषणों से विभूषित
करे फिर मणि वा मोतियों के यज्ञोपवीतसे अलंकृतकरे और बायें अंगमें स्थूल कुचा बनाकर आ-
धीकटि में उज्ज्वल तागड़ी धारणकरवावे ५।६ फिर दूसरे आधेअंगमें ऊपरको लिंगका चिह्नकरे दक्षिण

जिनकृतांवरम्।वामेलम्बपरीधानं कटिसूत्रत्रयान्वितम् ७ नानारत्नसमोपेतं दक्षिणेभुजगान्वितम्। देवस्यदक्षिणंपादं पद्मोपरिसुसंस्थितम् ८ कञ्चिदर्धेतथावामं भूषितंनूपुरेणतु। रत्नैर्विभूषितान्कुर्य्यादङ्गुलीष्वङ्गुलीयकान् ९ सालक्तकंतथापादं पार्वत्यादर्शयेत्सदा। अर्धनारीश्वरस्येदं रूपमस्मिन्नुदाहृतम् १० उमामहेश्वरस्यापि लक्षणंशृणुतद्विजाः!। संस्थानन्तुतयोर्वक्ष्ये लीलाललिताविभ्रमम् ११ चतुर्भुजंद्विबाहुंवा जटाभारेन्दुभूषणम्। लोचनत्रयसंयुक्तमुमैकस्कन्धपाणिनम् १२ दक्षिणेनोत्पलंशूलं वामेकुचभरेकरम्। द्वीपिचर्मपरीधानं नानारत्नोपशोभितम् १३ सुप्रतिष्ठंसुवेषञ्च तथार्धेन्दुकृताननम्। वामेतु संस्थितादेवी तस्योरौबाहुगूहिता १४ शिरोभूषणसंयुक्तैरलकैर्ललिताननां। सवालिकाकर्णवती ललाटतिलकोज्ज्वला १५ मणिकुण्डलसंयुक्ता कर्णिकाभरणाक्वचित्। हारकेयूरबहुला हरवक्त्रावलोकिनी १६ वामांसन्देवदेवस्य स्पृशन्तीलीलयाततः। दक्षिणन्तु बहिःकृत्वा बाहुंदक्षिणतस्तथा १७ स्कन्धंवादक्षिणेकुक्षौ स्पृशन्त्यङ्गुलजैःक्वचित्।वामेतु दर्पणंदद्यात् उत्पलंवासुशोभनम् १८ कटिसूत्रत्रयञ्चैव नितम्बेस्यात्प्रलम्बकम्। जयाचविजयाचैव कार्तिकेयविनायकौ १९ पाश्र्वयोर्दर्शयेत्तत्र तोरणेगणगुह्यकान्। मालाविद्याधरांस्तद्वद्वीणावानप्सरोगणः २० एतद्रूपमुमेशस्य कर्तव्यंभूतिमिच्छता। शिवनारायणंवक्ष्ये सर्वपापप्रणाशनम् २१ वामार्धेमाधवंविद्यात् दक्षिणेशूलपाणिनम्।

भुजामेंअनेकप्रकारकेरत्न और सर्पोंकेआभूषणबनावे महादेवकेदक्षिणचरणकोकमलकेऊपरस्थितकरे और बायें चरणको नूपुर बिछुए और अंगूठी आदि से विभूषितकरे ७।९ पार्वतीजी के चरणको सदैव मेंहदीसे रंगाहुआ बनावे यह संपूर्ण अर्द्धनारीश्वररूप महादेवजीका कहा है हे द्विजवर्य्यो अब पार्वती और महादेवके पृथक्२ रूपको सुनो १०।११ चार भुजावाले वा दो भुजावाले जटाभार और चन्द्रमासे विभूषित तीन नेत्रोंवाले एकहाथको पार्वतीके कन्धेपै स्थितकिये हुये दाहिने हाथमें त्रिशूल और बायें हाथको पार्वतीजी की कुचापै स्थितकियेहुए गैंड़ेके चर्मको धारण कियेहुए अनेक रत्नोंसे शोभित आधेचन्द्रमासे विभूपित सुन्दरवस्त्रको ओढ़ेहुए ऐसे शिवजीके स्वरूपको बनावे उस रूपकी बाईं जंघा पर पार्वतीको वैठावे शिरके आभूषणोंसे युक्त जुल्फों से शोभित मुखवाली कुंडल और मस्तक की वेंदी आदिसे शोभित हार बाजूबन्दादिकों से विभूपित शिवजी के मुखको देखती हुई १२।१६ और क्रीड़ाकरके शिवजीके बायें कन्धेको स्पर्श करतीहुई अपनी बाईं भुजाको बाहर निकासके शिवजी की दक्षिण कुक्षिको उंगलियों से स्पर्श करती हुई बायें हाथ में दर्पण समेत सुन्दर कमल को धारण किये हुए कटि में तागड़ी लंबायमान ऐसी मूर्त्ति श्रीपार्वतीजी की बनानी चाहिये और इस मूर्तिके बराबरमें जया, विजया, स्वामिकार्तिक और गणेश इन सबकी मूर्त्तिको भी बनावे तोरणके ऊपर गुह्यकोंकी मूर्त्ति बनावे फिर मालाको धारण करनेवाले विद्याधर और बीनको धारण करनेवाली अप्सरागणों की मूर्त्ति समीप में बनावे १७। २० ऐश्वर्य्य की इच्छा करनेवाले पुरुषको इस प्रकारके स्वरूप बनाने चाहिये, अब शिवनारायणकी मूर्त्तिको कहते

बाहुद्वयञ्चकृष्णस्य मणिकेयूरभूषितम् २२ शङ्खचक्रधरंशान्तमारक्ताङ्गुलिविभ्रमम्।
चक्रस्थानेगदांवापि पाणौदद्याद्गदाभृतः २३ शङ्खञ्चैवेतरेदद्यात् कट्यर्धंभूषणोज्ज्वलम्।
पीतवस्त्रपरीधानं चरणंमणिभूषणम् २४ दक्षिणार्धेजटाभारमर्धेन्दुकृतभूषणम्। भुजङ्ग
हारवलयं वरदंदक्षिणंकरम् २५ द्वितीयञ्चापिकुर्वीत त्रिशूलवरधारिणम्। व्यालोपवी
तसंयुक्तं कट्यर्धङ्कृत्तिवाससम् २६ मणिरत्नैश्चसंयुक्तं पादंनागविभूषितम्। शिवनारा
यणस्यैवं कल्पयेद्रूपमुत्तमम् २७ महावराहंवक्ष्यामि पद्महस्तंगदाधरम्। तीक्ष्णदंष्ट्राग्रघो
णास्यं मेदिनीवामकूर्परम् २८ दंष्ट्राग्रेणोद्धृतांदान्तां धरणीमुत्पलान्विताम्। विस्मयोत्फु
ल्लवदनामुपरिष्टात्प्रकल्पयेत् २९ दक्षिणंकटिसंस्थन्तु करंतस्याःप्रकल्पयेत्। कूर्मोपरि
तथापादमेकंनागेन्द्रमूर्धनि ३० संस्तूयमानंलोकेशैः समन्तात्परिकल्पयेत्। नारसिंह
न्तुकर्तव्यं भुजाष्टकसमन्वितम् ३१ रौद्रंसिंहासनंतद्वत् विदारितमुखेक्षणम्। स्तब्धपी
नसटाकर्णं दारयन्तान्दितेःसुतम् ३२ विनिर्गतान्त्रजालञ्च दानवंपरिकल्पयेत्। वमन्तं
रुधिरंघोरं भ्रुकुटीवदनेक्षणम् ३३ युध्यमानश्चकर्तव्यः क्वचित्करणबन्धनैः। परिश्रान्ते
नदैत्येन तर्ज्यमानोमुहुर्मुहुः ३४ दैत्यंप्रदर्शयेत्तत्र खड्गखेटकधारिणम्। स्तूयमानंतथा
विष्णुं दर्शयेदमराधिपैः ३५ तथात्रिविक्रमंवक्ष्ये ब्रह्माण्डक्रमलोल्बणम्। पादपार्श्वेत

हैं २१ बाईं ओर के आधे अंगमें नारायणको जाने और दाहिनी ओर शिवजी को जाने—विष्णु
भगवान्की दोनों भुजाओं में मणि और बाजूबन्द पहरावे शंख चक्र और गदाको धारण करवावे
लाल अंगुली बनावे, गदाभृत विष्णुके हाथके चक्रके स्थानमें गदाहीको धारण करवावे, दूसरे
हाथमें शंख धारण करवावे, आधी कटिमें उज्ज्वल भूषण पहिरावे पीले वस्त्रकी धोती बाँधे और
चरणमें आभूषण पहरावे २२। २४ दाहिनी ओरके आधे अंगको जटाभार और आधे चन्द्रमासे यु-
क्तकरे सर्पोंकेहार पहिरावे दहिने हाथको बरदेनेवालारक्खे दूसरे हाथमें त्रिशूल धारणकरे, सर्पका
यज्ञोपवीत और व्याघ्रचर्मको धारणकरावे मणिरत्न और सर्पोंसे विभूषितकरे ऐसे यह एकही मूर्त्ति
शिव नारायण अर्थात् शिवजीकीओर श्रीकृष्णकी मिलीहुई बनती है २५। २७ अबवराह अवतारकी
मूर्त्तिको कहतेहैं, वराहकी मूर्त्तिके हाथमें पद्म और गदाधारणकरे पैनी डाढ़ और पैनी नासिका बनावे
और डाढ़ोंके अग्रभागमें उद्धारकीहुई पृथ्वीकी मूर्त्ति बनावे एक पैरकोतो कछुएके ऊपररक्खे एकको
शेषनागके मस्तकपै और इस मूर्त्तिके चारोंओर स्तुतिकरतेहुए लोकपालोंकीमूर्त्ति बनावे और नृसिं-
हजीकी मूर्त्तिकी आठभुजा बनानी चाहिये २८। ३१ नृसिंहकी मूर्त्तिके सिंहासनको भयानक बनावे
मूर्त्तिके नेत्र फटेहुए बनावे, ग्रीवाके बालोंको प्रफुल्लितकरदे और हिरण्यकशिपु दैत्यकी छाती का
फाड़ना आंतनिकालना दैत्यके मुखसे रुधिरका गिरना और नृसिंहजीकी भ्रुकुटीका चढ़ना यहसब
आकारभी बनाने चाहिये ३२। ३३ दैत्योंके साथ युद्ध करताहुआ हारेहुए दैत्यसे बारबार ताडितहु-
आ स्वरूप बनानाचाहिये ३४ वहाँ खड्ग और खांड़ा धारणकियेहुए दैत्यकीभी मूर्त्ति बनानीयोग्यहै
इस विष्णुकी मूर्त्तिकेसमीपमें स्तुतिकरतेहुए अनेक देवताओंकीमूर्त्तिभी बनादेवे ३५ अब वामनजी

थाबाहुमुपरिष्टात्प्रकल्पयेत् ३६ अधस्ताद्वामनंतद्वत्कल्पयेत्सकमण्डलुम्। दक्षिणेछत्रिकांदद्यान्मुखंदीनंप्रकल्पयेत् ३७ भृङ्गारधारिणंतद्वद्वलिंतस्यचपार्श्वतः। बन्धनञ्चास्यकुर्वन्तं गरुडन्तस्यदर्शयेत् ३८ मत्स्यरूपंतथामात्स्यं कूर्मंकूर्माकृतिंन्यसेत्। एवंरूपस्तु भगवान् कार्य्योनारायणोहरिः ३९ ब्रह्माकमण्डलुधरः कर्त्तव्यःसचतुर्म्मुखः। हंसारूढःक्वचित्कार्य्यः क्वचिच्चकमलासनः ४० वर्णतःपद्मगर्भाभश्चतुर्बाहुःशुभेक्षणः। कमण्डलुंवामकरे स्रुवंहस्तेतुदक्षिणे ४१ वामेदण्डधरंतद्वत् स्रुवञ्चापिप्रदर्शयेत्। मुनिभिर्देवगन्धर्व्वैः स्तूयमानंसमन्ततः ४२ कुर्वाणमिवलोकांस्त्रीन् शुक्लाम्बरधरंविभुम्। मृगचर्म्मधरञ्चापि दिव्ययज्ञोपवीतिनम् ४३ आज्यस्थालिंन्यसेत्पार्श्वे वेदांश्चचतुरःपुनः। वामपार्श्वेऽस्यसावित्रीं दक्षिणेचसरस्वतीम् ४४ अग्रेचऋषयस्तद्वत्कार्य्याःपैतामहेपदे। कार्तिकेयंप्रवक्ष्यामि तरुणादित्यसप्रभम् ४५ कमलोदरवर्णाभं कुमारंसुकुमारकम्। दण्डकैश्चीरकैर्युक्तं मयूरवरवाहनम् ४६ स्थापयेत्स्वेष्टनगरे भुजान्द्वादशकारयेत्। चतुर्भुजःखर्वटेस्याद्वनेग्रामेद्विबाहुकः ४७ शक्तिःपाशस्तथाखड्गः शरश्शूलंतथैवच। वरदश्चैकहस्तःस्या दथचाभयदोभवेत् ४८ एतेदक्षिणतोज्ञेयाः केयूरकटकोज्ज्वलाः। धनुःपताकामुष्टिश्च तर्जनीतुप्रसारिता ४९ खेटकंताम्रचूडञ्च वामहस्तेतुशस्यते।

की मूर्त्तिको सुनो ब्रह्मांडको मापनेवाले वामनजीकी मूर्त्तिके चरणपसली औरभुजा इनसबकोऊपरको ऊंचाबनावे इसके नीचे वामनजीकी मूर्त्तिबनावे उसके हाथमें कमंडलु धारणकरे—दाहनेहाथमें छत्री लियेहुए बडेदीन मुखवाली मूर्त्ति बनावे ३६।३७ और मूर्त्तिके समीपमें गरुड़की मूर्त्ति बनावे और मत्स्य अवतारकी मूर्त्ति मत्स्यकी बनावे-कूर्म अवतारकी कछुएकी बनावे ऐसे अनेक रूपोंवाले विष्णुभगवान् बनाने चाहियें ३८।३९ ब्रह्माको कमंडलु समेत चारमुखवाला बनावे-कहीं हंसपर चढ़ाहुआ बनावे अथवा कमलासनपर स्थितहुआ बनादेवे ४० लाल वर्ण चतुर्भुज सुन्दरनेत्र युक्त ब्रह्माजीकी मूर्त्ति बनावे उनके बायें हाथ में दंडधारणकरे-दहिने में स्रुवा बनाकर चारों ओर स्तुति करतेहुए मुनि देवता और गन्धर्वोंकी मूर्त्तियांभी बनादेवे-इन ब्रह्माजीको त्रिलोकीको रचते हुए के समान श्वेतवस्त्रधारी मृगचर्म और दिव्य यज्ञोपवीत पहराकर बनावे ४१।४३ इस मूर्त्तिके दाहिनी ओर बराबर में घृतकी स्थाली और चारों वेदोंको स्थापित करदेवे बाईं ओर सावित्रीजी की मूर्त्ति बनावे दाहिनी ओर सरस्वतीको बनावे ब्रह्माजीके आगे चरणों में ऋषियोंकी मूर्त्ति बनावे, स्वामिकार्त्तिककी मूर्त्ति तरुण सूर्य्यके समान कान्तिवाली कमलके समान वर्णयुक्त सुकुमार अवस्थाकी दंड और चीरधारण किये हुए मयूरकी बाहनवाली होतीहै इसी प्रकारकी मूर्त्ति इनकी बनती है ४४।४६ यह मूर्त्ति बारह भुजावाली बनवावे तो अपनी इच्छावाले नगर में रक्खे-चार भुजावाली इनकी मूर्त्ति पर्वतके ग्राममें श्रेष्ठहै-और दोभुजावाली मूर्त्ति वनमें स्थापित करनीचाहिये ४७ इन षट्मुखजीके एक हाथमें-शक्ति-पाश-खड्ग-बाणऔर शूल इनसबकेभी चिह्न बनावे एक हाथ वरदेने वालारक्खे ४८ सब शस्त्र बाजूबन्द और कडूले आदि उज्ज्वल भूषण दाहिने हाथ में धारण करने

द्विभुजस्यकरेशक्तिर्वामेस्यात्कुक्कुटोपरि ५० चतुर्भुजेशक्तिपाशौ वामतोदक्षिणेत्वसिः।
वरदोभयदोवापि दक्षिणःस्यात्तुरीयकः ५१ विनायकंप्रवक्ष्यामि गजवक्त्रंत्रिलोचनम्।
लम्बोदरंशूर्पकर्णं व्यालयज्ञोपवीतिनम् ५२ ध्वस्तकर्णंबृहत्तुण्ड मेकदंष्ट्रंपृथूदरम्।
स्वदन्तंदक्षिणकरे उत्पलञ्चापरेतथा ५३ मोदकंपरशुञ्चैव वामतःपरिकल्पयेत् । बृहत्वा
त्क्षिप्तवदनं पीनस्कन्धांघ्रिपाणिकम् ५४ युक्तन्तुऋद्धिबुद्धिभ्यामधस्तान्मूषकान्वितम्।
कात्यायन्याःप्रवक्ष्यामि रूपंदशभुजंतथा ५५ त्रयाणामपिदेवानामनुकारानुकारिणीम्।
जटाजूटसमायुक्ता मर्द्धेन्दुकृतलक्षणाम् ५६ लोचनत्रयसम्पन्नां पद्मेन्दुसदृशाननाम्।
अतसीपुष्पसङ्काशां सुप्रतिष्ठांसुलोचनाम् ५७ नवयौवनसम्पन्नां सर्वाभरणभूषिताम्।
सुचारुदशनान्तद्वत्पीनोन्नतपयोधराम् ५८ त्रिभङ्गस्थानसंस्थानां महिषासुरमर्दिनीम्।
त्रिशूलंदक्षिणेदद्यात्खड्गंचक्रंतथैवच ५९ तीक्ष्णंवाणंतथाशक्तिं वामतोऽपिनिबोधत।
खेटकंपूर्णचापञ्च पाशमङ्कुशमेवच ६० घण्टांवापरशुञ्चापि वामतःसन्निवेशयेत् ।
अधस्तान्महिषन्तद्वद्विशिरस्कंप्रदर्शयेत् ६१ शिरश्छेदोद्भवंतद्वद्दानवंखड्गपाणिनम्।
रक्तरक्तीकृताङ्गंच रक्ताविस्फारतेक्षणम् ६२ वेष्टितंनागपाशेन भ्रुकुटीभीषणाननम् ।
वमद्रुधिरवक्त्रञ्च देव्याःसिंहंप्रदर्शयेत् ६३ देव्यास्तुदक्षिणंपादं समंसिंहोपरि स्थितम्।
किञ्चिदूर्ध्वंतथावाम मङ्गुष्ठंमहिषोपरि ६४ स्तूयमानञ्चतद्रूप ममरैःसन्निवेशयेत्।
इदानींसुरराजस्य रूपंवक्ष्येविशेषतः ६५ सहस्रनयनंदेवं मत्तवारणसंस्थितम् । पृथूरु

चाहिये श्रौर खांड़ा बायें हाथमें शुभहै दोहाथोंवाली मूर्त्तिके बायें हाथ में शक्तिधारण करनीचाहिये-चतुर्भुजी मूर्त्तिके बायें हाथ में शक्ति श्रौर पाशधारण करे दक्षिण हाथमें खड्ग धारण कराके तुरीनाम बाजेकोभी देवे ४९।५१ अब गणेशजीकी मूर्त्तिको वर्णन करते हैं-हस्तीकामुख त्रिनेत्र लम्बा उदर सूर्पाकार कान यज्ञोपवीत युक्त लंबे दांत भारी उदर समेत दाहिने हाथ में अपने दांतको धारण किये हुए बायें हाथमें कमल मोदक श्रौर फरसाधारणाकिये कन्धे श्रौर हाथ पैरोंसेभारी ऋद्धि सिद्धियोंसे पूर्ण करके मूषेकी सवारी पर गणेशजीकी मूर्त्ति बनावे-अब कात्यायनी देवीके दशभुजी रूप कावर्णन करतेहैं ५२।५५ तीनों देवताओंके अनुसार करनेवाली जटाजूटोंसेयुक्तहुए मस्तकमें अर्द्ध चन्द्रधारणाकिये हुए ५६ त्रिनेत्र युक्त कमल श्रौर चन्द्रमाके समान मुखवाली अलसीके पुष्पके समान कान्तिभरी उत्तम नेत्रोंसे शोभित नवीन यौवनसे युक्त संपूर्ण भूषणोंसे भूषित सुन्दर दांतवाली उन्नत श्रौर पृथुकुचा समेत ५७।५८ महिपासुर को मारने वाली चक्र-त्रिशूल तीक्ष्ण वाण श्रौर शक्ति इनसबको धारणकिये बायें हाथमें खांड़ा-धनुष-पाश-अंकुश-घंटा श्रौर परशा इनसब समेत कात्यायनीकी मूर्त्ति बनावे इस के नीचे दो शिरों वाले महिषासुरको बनावे-शिरकटाहुश्रा हाथ में खड्गधारणाकिये रुधिरसे लित रक्तांगफटे नेत्रोंसे भयानक पाश से बँधा हुश्रा मुखसे रुधिर गेरताहुश्रा ऐसा महिषासुर का रूप बनावे श्रौर देवीके सिंहकी मूर्त्ति कोभी बनावे देवीके दक्षिण चरणको सिंहके ऊपर करे श्रौर वायें पैरके अंगूठेकोकुछेक ऊपरको करके महिषासुरके ऊपर लगावे ऐसी देवी के रूपको

वक्षोवदनं सिंहस्कन्धंमहाभुजम् ६६ किरीटकुण्डलधरं पीवरोरुभुजेक्षणम् । वज्रोत्प
लधरंतद्वन्नानाभरणभूषितम् ६७ पूजितंदेवगन्धर्वैरप्सरोगणसेवितम् । छत्रचामरधा
रिण्यः स्त्रियःपार्श्वेप्रदर्शयेत् ६८ सिंहासनगतञ्चापि गन्धर्वगणसंयुतम् । इन्द्राणींवाम
तश्चास्य कुर्य्यादुत्पलधारिणीम् ६९ ॥

इति श्रीमत्स्यपुराणेएकोनषष्ट्यधिकद्विशततमोऽध्यायः २५९ ॥

(सूतउवाच) प्रभाकरस्यप्रतिमामिदानींशृणुतद्विजाः!।रथस्थंकारयेद्देवं पद्महस्तं
सुलोचनम् १ सप्ताश्वञ्चैकचक्रञ्च रथंतस्यप्रकल्पयेत् ।मुकुटेनविचित्रेण पद्मगर्भस
मप्रभम् २ नानाभरणभूषाभ्यां भुजाभ्यांधृतपुष्करम् । स्कन्धस्थेपुष्करेतेतु लीलयैवधृ
तेसदा ३ चोलकच्छन्नवपुषं क्वचित्चित्रेषुदर्शयेत् । वस्त्रयुग्मसमोपेतं चरणौतेजसावृ
तौ ४ प्रतिहारौचकर्तव्यौपार्श्वयोर्दण्डिपिङ्गलौ । कर्त्तव्यौखड्गहस्तौतौ पार्श्वयोःपुरुषा
वुभौ ५ लेखनीकृतहस्तञ्चपार्श्वेधातारमव्ययम् । नानादेवगणैर्युक्तमेवंकुर्य्याद्दिवाकर
म् ६ अरुणःसारथिश्चास्यपद्मिनीपत्रसन्निभः । अश्वौसुवलयग्रीवावन्तस्थौतस्यपार्श्व
योः ७ भुजङ्गरज्जुभिर्बद्धाःसप्ताश्वारश्मिसंयुताः । पद्मस्थंवाहनस्थंवा पद्महस्तंप्रकल्पये
त् ८ वह्नेस्तुलक्षणंवक्ष्येसर्वकामफलप्रदम् । दीप्तंसुवर्णवपुषमर्धचन्द्रासनेस्थितम् ९

देवताओं से स्तूयमान स्थापित करे—अब इन्द्र के रूपका वर्णन करते हैं ५९। ६५.हज़ार नेत्र युक्त
मदोन्मत्त हाथीपर आरूढ भारी जंघा छाती और मुखवाला सिंह के समान कन्धे महाभुजों से युक्त
मुकुट कुण्डल धारण किये हुए सुन्दर नेत्र वज्रधारी अनेक भूषणों से भूषित देवता और गन्धर्वों से
पूजित अप्सरागणों से सेवित छत्र चामरादि ढुलानेवाली उत्तम स्त्रियों से युक्त गन्धर्वगणों समेत
सिंहासनपर विराजमान बाईं ओर कमलधारिणी इन्द्राणी को साथ लिये हुए इन्द्रका स्वरूप बनाना
चाहिये ६६। ६९ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायामेकोनषष्ट्यधिकद्विशततमोऽध्यायः २५९ ॥

सूतजी कहतेहैं हे द्विजो अब सूर्य्यकी मूर्त्तिको सुनो-सूर्य्य देवताको रथ में बैठाकर उनके हाथ
में पद्म धारणकरे और सुन्दर नेत्र बनावे १ सात अश्वोंवाला एक चक्रयुक्त ऐसा सूर्य्यकारथ बनानाचाहिये
और विचित्र लालकान्तियुक्त सूर्य्यको मुकुट धारण करवावे २ अनेक प्रकारके भूषणों से
युक्त भुजामें कमल धारण करे और कन्धोंपरभी कमल धारण करवावे शरीरके किसी अंगको रक्त
वस्त्रसे और किसीको विचित्ररंगवाले वस्त्रोंसे आच्छादनकरे दोनों चरणोंको लालकान्तिका बनावे
३।४ दोनों कमर और हाथ में खड्ग धारण किये हुए दोपुरुषोंको बनावे ५ एक बराबर बैठाकमल
हाथमें लिये ब्रह्माजीकी मूर्त्ति बनावे ऐसे अनेक देवतागणों से युक्त हुए सूर्य्यको बनावे सूर्य्यका सारथी
कमलिनीके पत्तोंके समान कान्तिवाला अरुण नामहै- सुवलय और ग्रीव यहदोनों अश्व उस
के बराबर में स्थितरहतेहैं यह सब आकार बनावे और पूर्व्वोक्त सात अश्वोंको सर्पोंकी रस्सीसे बांधे
इस प्रकारसे सूर्य्यकी मूर्त्तिको वाहनके ऊपर बनावे अथवा पद्मासन केही ऊपर बनादेवे ६।८

बालार्कसदृशंतस्यवदनञ्चापिदर्शयेत्। यज्ञोपवीतिनंदेवं लम्बकूर्चधरंतथा १० कमण्ड
लुंवामकरे दक्षिणेत्वक्षसूत्रकम्। ज्वालावितानसंयुक्तमजवाहनमुज्ज्वलम् ११ कुण्डस्थं
वापिकुर्वीत मूर्ध्निसप्तशिखान्वितम्। तथायमंप्रवक्ष्यामि दण्डपाशधरंविभुम् १२ महा
महिषमारूढं कृष्णाञ्जनचयोपमम्। सिंहासनगतञ्चापि दीप्ताग्निसमलोचनम् १३
महिषश्चित्रगुप्तश्चकरालाःकिङ्करास्तथा। समन्ताद्दर्शयेत्तस्य सौम्यासौम्यान्सुरासुरा
न् १४ राक्षसेन्द्रंतथावक्ष्ये लोकपालञ्चनैर्ऋतम्। नरारूढंमहामायं रक्षोभिर्बहुभिर्वृत
म् १५ खड्गहस्तंमहानीलं कज्जलाचलसन्निभम्। नरयुक्तविमानस्थं पीताभरणभूषि
तम् १६ वरुणञ्चप्रवक्ष्यामि पाशहस्तंमहाबलम्। शङ्खस्फटिकवर्णाभं सितहाराम्बरा
वृतम् १७ झषासनगतंशान्तं किरीटाङ्गदधारिणम्। वायुरूपंप्रवक्ष्यामि धूम्रन्तुमृगवा
हनम् १८ चित्राम्बरधरंशान्तं युवानंकुञ्चितभ्रुवम्। मृगाधिरूढंवरदं पताकाध्वजसंयु
तम्१९कुवेरञ्चप्रवक्ष्यामि कुण्डलाभ्यामलङ्कृतम्। महोदरंमहाकायं निध्यष्टकसमन्वि
तम् २० गुह्यकैर्बहुभिर्युक्तं धनव्ययकरैस्तथा। हारकेयूररचितं सिताम्बरधरंसदा २१
गदाधरञ्चकर्तव्यं वरदंमुकुटान्वितम्। नरयुक्तविमानस्थं एवंरीत्याचकारयेत् २२ तथै

अबसब कामनाओं के देनेवाले अग्निके लक्षणको कहते हैं-देदीप्त सुवर्णकी सी कान्तिवाला अर्द्धचन्द्रासनपर बैठाहुआ उदयके सूर्य्यके समान मुखवाला यज्ञोपवीत धारण किये लम्बे मस्तकयुक्त ऐसा अग्निकास्वरूप बनावे इसके बायें हाथमें कमंडलु और दक्षिण हाथ में अक्षोंकी माला धारण करे ज्वालाकी तोरण और बकरेका बाहन बनाकर सातों शिखाओंको रथके कुंडल पहिरावे ऐसी अग्निकी मूर्त्ति होती है-अब धर्मराजकी मूर्त्तिको सुनो—दंड और फांसीको धारण कियेहुए काले अंजनके समान रूपयुक्त बड़ेभारी भैंसे परचढ़ाहुआ अथवा सिंहासनपर बैठाहुआ ज्वलित अग्निके समान नेत्रधारी ऐसे धर्मराजको बनावे इसके चारोंओर चित्रगुप्त-विकरालदूत-सौम्य और क्रूर देवता इन सबकीभी मूर्त्ति बनादेवे ९।१४ अब राक्षसोंके स्वामी नैर्ऋत लोकपालकी मूर्त्तिको सुनो मनुष्यकी सवारीपरबैठा महामायावी बहुतसे राक्षसोंसे युक्त हाथमें खड्गलिये बड़े नीलकज्जलके पर्व्वतके समान कान्तिवाला मनुष्यों से युक्तहुए विमान में बैठाहुआ पीले आभूषणों से विभूषित ऐसारूप नैर्ऋत राक्षसका बनानाचाहिये-अब वरुणकी मूर्त्तिको सुनो-हाथमें फांसी को धारणकिये हुए महाबली शंखकेसमान श्वेतवर्ण श्वेतहार और वस्त्रोंसे युक्त मत्स्यकी सवारीपर आरूढ़ शान्त होकर मुकुट बाजूबन्द धारणकिये ऐसावरुणका स्वरूप बनताहै-अब वायुकेरूपको कहते हैं-धूम्रवर्ण मृगकीसवारी-विचित्रवस्त्रधारी तरुणअवस्थावाला पताका और ध्वजासे बिभूषित वायुकीमूर्त्तिबनानीचाहिये अब कुबेरकीमूर्त्तिको कहतेहैं कुंडलोंसे विभूषित महाशरीर और उदरसेयुक्त आठखज़ानों से आढ्य धनके ख़र्चनेवाले बहुत से गुह्यकों के साथ हार बाजूबन्द आदिक भूषणोंसे अलंकृत श्वेत वस्त्रधारी गदा धारणकिये मुकुट पहिरेहुए मनुष्यों से युक्त विमानपर बैठाहुआ ऐसा कुबेरका स्वरूप बनानाचाहिये १५।२२ इसी प्रकारकी महादेवकी भी मूर्त्तिको कहताहूं श्वेतनेत्र त्रिशूलधारी

येशंप्रवक्ष्यामि धवलंधवलेक्षणम्। त्रिशूलपाणिनंदेवं त्र्यक्षंवृषगतंप्रभुम् २३ मातॄणां लक्षणंवक्ष्ये यथावदनुपूर्वशः। ब्रह्माणीब्रह्मसदृशी चतुर्वक्त्राचतुर्भुजा २४ हंसाधिरूढा कर्त्तव्या साक्षसूत्रकमण्डलुः। महेश्वरस्यरूपेण तथामाहेश्वरीमता २५ जटामुकुटसंयुक्ता वृषस्थाचन्द्रशेखरा। कपालशूलखट्वाङ्गवरदाढ्याचतुर्भुजा २६ कुमाररूपाकौमारी मयूरवरवाहना। रक्तवस्त्रधरातद्वच्छूलशक्तिधरामता २७ हारकेयूरसम्पन्ना कृकवाकुधरातथा। वैष्णवीविष्णुसदृशा गरुडेसमुपस्थिता २८ चतुर्बाहुश्चवरदा शङ्खचक्रगदाधरा। सिंहासनगतावापि बालकेनसमन्विता २९ वाराहींचप्रवक्ष्यामि महिषोपरिसंस्थिताम्। वराहसदृशींदेवीं शिरश्चामरधारिणी ३० गदाचक्रधरातद्वद्दानवेन्द्रविनाशिनी। इन्द्राणीमिन्द्रसदृशीं वज्रशूलगदाधराम् ३१ गजासनगतांदेवीं लोचनैर्बहुभिर्वृताम्। तप्तकाञ्चनवर्णाभां दिव्याभरणभूषिताम् ३२ तीक्ष्णखड्गधरंतद्वद्वक्ष्येयोगेश्वरीमिमाम्। दीर्घजिह्वामूर्ध्वकेशींमस्थिखण्डैश्चमण्डिताम् ३३ दंष्ट्राकरालवदनां कुर्य्याच्चैवकृशोदरीम्। कपालमालिनींदेवीं मुण्डमालाविभूषिताम् ३४ कपालंवामहस्तेतु मांसशोणितपूरितम्। मस्तिष्काक्तञ्चबिभ्राणां शक्तिकांदक्षिणेकरे ३५ गृध्रस्थावायसस्थावा निर्मांसाविनतोदरी। करालवदनातद्वत्कर्त्तव्यासात्रिलोचना ३६ चामुण्डाबद्धघ

तीनों नेत्रोंको धारण किये और बैलपरचढ़ेहुए ऐसी मूर्त्ति सबके प्रभु महादेवजी की बनावे २३ अब क्रमसे यथावत्षोडश मातृयोंका लक्षण कहताहूं चार मुख और भुजावाली २४ हंसका बाहन अक्ष शूत्र और कमंडलु इन्होंसे युक्त ऐसी ब्रह्माजी के समान ब्रह्माणी की मूर्त्ति बनावे इसी प्रकार महेश्वर रूपके समान माहेश्वरी वर्णनकी है २५ वह जटाजूटसे युक्त बैलकीसवारी मस्तक चन्द्रमासे भूषित और कपाल शूल खट्वांगसे युक्त वरदाता चारभुजावाली माहेश्वरी की मूर्त्ति बनावे २६ और मयूरकी सवारी रक्त वस्त्रसे आच्छादित शूल शक्ति धारणकिये २७ हार बाजूबन्दादिसे भूषित मुर्गेको हाथमें लिये कुमारकेही समान कुमारी की मूर्त्ति बनावे और विष्णुके समान गरुडपर स्थित २८ वरदेनेवाली चारों भुजाओं में शंख चक्र गदादि धारणकिये सिंहासनपर विराजमान बालक करके युक्त वैष्णवीकी मूर्त्ति बनावे २९ अब महिषके ऊपर स्थित वाराही देवी को कहते हैं वराहजी केसमान शिरपर चमर धारणकिये ३० गदा चक्रको धरेहुए दानवेन्द्रों की नष्टकरनेवाली वाराही देवीकी मूर्त्ति बनावे और वज्र गदा धारणकिये ३१ हाथीपर सवार बहुत नेत्रयुक्त सुवर्णकीसी कान्तिवाली दिव्य आभूषणों समेत तीक्ष्ण खड्गको धारणकिये इन्द्रकेही समान इन्द्राणी देवीकी मूर्त्तिबनावे ३२ अब योगेश्वरीकी मूर्त्तिको कहते हैं बडी जिह्वावाली खड़ेकेशोंसे युक्त अस्थिके टुकड़ोंसे भूषित ३३ दंष्ट्राओं से भयंकर मुखवाली सूक्ष्म कटि समेत कपालोंकी माला धारे मुंडमालाओं से भूषित ३४ मांसरुधिरसे पूरित वाम हस्तमें कपाल लिये मस्तिष्क अर्थात् शिरसे उत्पन्न हुए घृततुल्यपदार्थोंसे भीगहुई दक्षिण हाथमें सीपकोलिये ३५ गिद्ध वा काककी सवारी मांसरहित सूखे उदर वाली भयंकर मुख समेत योगेश्वरीजी की मूर्त्ति बनावे ३६ इसी प्रकार तीन नेत्रोंवाली घंटाधारण किये सुन्दर

एटावा द्वीपिचर्मधराशुभा । दिग्वासाःकालिकातद्वद्रासभस्थाकपालिनी ३७ सुरक्तपुष्पा
भरणा वर्धनीध्वजसंयुता । विनायकञ्चकुर्वीत मातॄणामन्तिकेसदा ३८ वीरेश्वरश्चभ
गवान् वृषारूढ़ीजटाधरः । वीणाहस्तास्त्रिशूलीच मातॄणामग्रतोभवेत् ३९ श्रियंदेवींप्रव
क्ष्यामि नवेवयसिसंस्थिताम् । सुयौवनांपीनगण्डां रक्तोष्ठींकुञ्चितभ्रुवम् ४० पीनोन्नत
स्तनतटां मणिकुण्डलधारिणीम् । सुमण्डलंमुखंतस्याः शिरःसीमन्तभूषणम् ४१ पद्म
स्वस्तिकशंखैर्वा भूषितांकुण्डलालकैः । कञ्चुकाबद्धगात्रौच हारभूषौपयोधरौ ४२ नाग
हस्तोपमौबाहू केयूरकटकोज्ज्वलौ । पद्मंहस्तेप्रदातव्यं श्रीफलंदक्षिणेभुजे ४३ मेखला
भरणांतद्वत्तप्तकाञ्चनसप्रभाम् । नानाभरणसम्पन्नां शोभनाम्बरधारिणीम् ४४ पार्श्वेत
स्याःस्त्रियःकार्य्याश्चामरव्यग्रपाणयः । पद्मासनोपविष्टातु पद्मसिंहासनस्थिता ४५ करि
भ्यांस्नाप्यमानासौ भृङ्गाराभ्यामनेकशः । प्रक्षालयन्तौकरिणौ भृङ्गाराभ्यांतथापरौ ४६
स्तूयमानाचलोकेशैस्तथागन्धर्वगुह्यकैः । तथैवयक्षिणीकार्या सिद्धासुरनिषेविता ४७पा
र्श्वयोःकलशौतस्यास्तोरणेदेवदानवाः । नागाश्चैवतुकर्तव्याः खड्गखेटकधारिणः ४८
अधस्तात्प्रकृतिस्तेषां नाभेरूर्ध्वन्तुपौरुषी । फणाश्चमूर्ध्निकर्तव्या द्विजिह्वाबहवःसमाः
४९ पिशाचाराक्षसाश्चैव भूतवेतालजातयः । निर्मांसाश्चैवतेसर्वे रौद्राविकृतरूपिणः ५०
क्षेत्रपालश्चकर्तव्यो जटिलोविकृताननः । दिग्वासाजटिलस्तद्वच्छ्वागोमायुनिषेवितः ५१

हस्ति चर्मधारिणी श्रीचामुंडाजीकी मूर्त्ति वनावे-और दिगंबर गर्दनपरसवार कपाल धारणकिये ३७
रक्तपुष्पोंके आभूषणोंवाली वर्धनीध्वजा से युक्त कालिका जीकी मूर्त्ति वनावे-और महामातृकाओं के
समीप गणेशजीकी मूत्ति बनावे ३८ वृषभकी सवारी जटाधारी वीणा हाथमें त्रिशूलधारण किये
ऐसी वीरेश्वर भगवान्की मूर्त्ति मातृकाओं के आगेके भागमें स्थापनकरे ३९ अब श्रीदेवीकी मूर्त्तिको
कहतेहैं-नवीन अवस्था और यौवनयुक्त स्थूलकपोल रक्त ओष्ठ और टेढ़ीभ्रुकुटियों वाली ४० स्थूल
उन्नत कुचयुक्त मणि कुंडल समेत सुन्दर गोलमुखवाली शिरमें सीमन्त भूषण धारण करने
वाली ४१ पद्म स्वस्तिक शंख कुंडल और अलकोंसे भूषित कंचुकसे बंधेहारोंसे भूषित कुचोंको
धारण किये ४२ बाजूबन्द कटकोंसे भूषित हाथीकी शुंडके समान भुजाओंको धारणकिये वामहाथमें
कमल दक्षिणमें नारियललिये ४३ क्षुद्रघंटिका धारणकिये तप्त सुवर्णकीसी कान्तिवाली नाना आभरणयुक्त
शोभनवस्त्रोंको धारण करनेवाली ४४ उस श्रीदेवीके ओरपासचामर हाथमें लिये स्त्रियोंकी
मूर्त्ति और कमलके आसन और सिंहासनपर स्थित भृंगोंसे युक्त हस्तियोंसे स्नानकराईहुई ४५।४६
गन्धर्व-गुह्यक और लोकेशोंकरके स्तूयमान ऐसी श्रीबनावे-और इसीप्रकार सिद्ध सुरेशोंसे सेवित
यक्षिणीकी मूर्त्ति बनावे ४७ उसके ओर पास कलश स्थापनकरे और खड्ग खेटकधारणकिये
देव दानव और नाग बनावे ४८ नाभिके नीचेतो सर्पोंकी और नाभिसे ऊपर पुरुषकी मूर्त्ति बनावे
और मस्तकके ऊपर दो जीभोंवाले फण बनावे ४९ और पिशाच-राक्षस-वेताल और भूतजाति यह
सब मांससेरहित महाभयंकर और विकृत रूपके बनावे ५० अबक्षेत्रपालकी मूर्त्तिको कहतेहैं-जटा-

कपालंवामहस्तेतु शिरःकेशैःसमावृतम् । दक्षिणेशक्तिकांदद्यादसुरक्षयकारिणीम् ५२
अथातःसम्प्रवक्ष्यामि द्विभुजंकुसुमायुधम् । पार्श्वेचाश्वमुखंतस्य मकरध्वजसंयुत
म् ५३ दक्षिणेपुष्पबाणञ्च वामेपुष्पमयंधनुः । प्रीतिःस्याद्दक्षिणेतस्य भोजनोपस्करा
न्विता ५४ रतिश्चवामपार्श्वेतु शयनंसारसान्वितम् । पटश्चपटहश्चैव खरःकामातुर
स्तथा ५५ पार्श्वतोजलवापीच वनंनन्दनमेवच । सुशोभनश्चकर्तव्यो भगवान्कुसुमा
युधः ५६ संस्थानमीषद्वक्त्रंस्याद्विस्मयास्मितवक्त्रकम् । एतदुद्देशतःप्रोक्तं प्रतिमालक्षणं
मया । विस्तरेणनशक्नोति बृहस्पतिरपिद्विजाः ! ५७॥

इतिश्रीमत्स्यपुराणे षष्ठ्याधिकद्विशततमोऽध्यायः २६०॥

(सूत उवाच) पीठिकालक्षणंवक्ष्ये यथावदनुपूर्वशः। पीठोच्छ्रायंयथावच्च भागान्
षोड़शकारयेत् १ भूमावेकःप्रविष्टःस्याच्चतुर्भिर्जगतीमता। वृत्तोभागस्तथैकः स्याद्वृतः
पटलभागतः २ भागैस्त्रिभिस्तथाकण्ठः कण्ठपट्टास्त्रिभागतः । भागाभ्यामूर्ध्वपट्टश्च शे
षभागेनपट्टिका ३ प्रविष्टंभागमेकैकं जगतीयावदेवतु । निर्गमस्तुपुनस्तस्य यावद्वैशेष
पट्टिका ४ वारिनिर्गमनार्थन्तु तत्रकार्य्यःप्रणालकः । पीठिकानान्तुसर्वासा मेतत्सामान्य
लक्षणम् ५ विशेषान्देवताभेदान् शृणुध्वंद्विजसत्तमाः ! । स्थण्डिलावाथवापीवा यक्षी

युक्त विकृतरूप दिगम्बरवेष कुत्ते और शृगालोंसे सेवित ५१ वामहाथमें शिरकेबालोंसे ढकाहुआ
कपाल और दक्षिण हाथमें असुरोंकी नाशकरने वाली शक्ति ऐसी क्षेत्रपालकी मूर्त्ति बनावे ५२
इसके अनन्तर दोभुजवाला कामदेव बनादे और उसके ओरपास मकरध्वजसे युक्त घोडे का मुख
स्थापनकरे ५३ उसकामदेवके दक्षिणहाथमें पुष्पोंकाबाण बायें हाथमें पुष्पमयीधनुष दाहिनेभागमें
भोजनकी सबसामग्रियोंसहित प्रीतिको विराजमानकर बामभागमें सारसलिये शयनसेयुक्त रतिकी
मूर्त्तिबनावे और वस्त्र पट पटह वाजे अर्थात् ढोलका आकार और कामातुरहुए गधेकी भी सूरत
बनावे५४।५५और पासमें जलकी बावडी समेत नन्दनवन बनावे ऐसेमहासुन्दर भगवान् कुसुमायुध
नाम कामदेवकी मूर्त्तिकोबनावे५६सूतजीबोले कि हे ऋषीश्वरो यह प्रतिमालक्षण मैंने उद्देश करकेही
कहाहै क्योंकि इसप्रतिमा लक्षणके विस्तार पूर्व्वक कहनेको वृहस्पतिजीभी समर्थ नहीं हैं ५७॥

इतिश्रीमत्स्यपुराणभाषाटीकायांषष्ट्यधिकद्विशततमोऽध्यायः २६०॥

सूतजी कहतेहैं कि हेऋषीश्वरलोगो अब यथावत् आनुपूर्व्वी पीठिका अर्थात् जलहरी आदिमूर्त्ति
स्थापनकी जगहका लक्षण कहताहूं पीठकी उंचाई के यथावत् सोलह भागकरे १ एकभागतो पृथ्वीमें
प्रवेशकरे-चारभागकी पृथ्वीमाने फिरगोलाकार एकभाग पटलभागसे ढके२ फिर तीनभागों करकेकंठ
और तीनही भागोंसे कंठपट्ट बनावे-दोभागोंकरके ऊर्ध्वपटबनावे और शेषसंपूर्ण भागोंकी पट्टिकाबनावे
३फिर प्रविष्टहुए एकभागसे ऊपर जो जगती अर्थात् पृथ्वीकाभागहै वहांसे लेकर शेषपट्टिकातक निर्गम
अर्थात् निकसनेका मार्ग बनावे ४ और जलके निकलनेकी भी नालीबनावे संपूर्ण पीठिकाओंका यह

वेदीचमण्डला ६ पूर्णचन्द्राचवज्राच पद्मावार्धशशिस्तथा । त्रिकोणादशमीतासां संस्थानंवानिबोधत ७ स्थण्डिलाचतुरस्रातु वर्जितामेखलादिभिः । वापीद्विमेखलाज्ञेया यक्षीचैवत्रिमेखला ८ चतुरस्रायतावेदी न तांलिङ्गेषुयोजयेत् । मण्डलावर्तुलायातु मेखलाभिर्गणप्रिया ९ रक्ताद्विमेखलामध्ये पूर्णचन्द्रातुसाभवेत् । मेखलात्रयसंयुक्ता षड़स्रावज्रिकाभवेत् १० षोड़शास्राभवेत्पद्मा किञ्चिद्ध्रस्वातुमूलतः । तथैवधनुषाकारासार्द्धचन्द्राप्रशस्यते ११ त्रिशूलसदृशीतद्वत् त्रिकोणाह्यूर्द्ध्वतोमता । प्रागुदक्प्रवणातद्वत् प्रशस्तालक्षणान्विता १२ परिवेषंत्रिभागेन निर्गमंतत्रकारयेत् । विस्तारंतत्प्रमाणञ्च मूलेचाग्रेततोर्ध्वतः १३ जलमार्गश्चकर्तव्यस्त्रिभागेनसुशोभनः । लिङ्गस्यार्द्धविभागेन स्थौल्येनसमधिष्ठिता १४ मेखलातत्त्रिभागेन खातञ्चैवप्रमाणतः । अथवापादहीनन्तु शोभनंकारयेत्सदा १५ उत्तरस्थंप्रणालञ्च प्रमाणादधिकारयेत् । स्थण्डिलायामथारोग्यं धनंधान्यञ्चपुष्कलम् १६ गोप्रदाचभवेद्यक्षी वेदीसंपत्प्रदाभवेत् । मण्डलायांभवेत्कीर्तिर्वरदापूर्णचन्द्रिका १७ आयुःप्रदाभवेद्वज्रा पद्मासौभाग्यदाभवेत् । पुत्रप्रदार्धचन्द्रास्यात् त्रिकोणाशत्रुनाशिनी १८ देवस्ययजनार्थन्तु पीठिकादशकीर्तिताः । शैलेशैलमयींदद्यात् पार्थिवेपार्थिवींतथा १९ दारुजेदारुजांकुर्यात् मिश्रेमिश्रांतथैवच । नान्ययो

सामान्य लक्षणहै ५ सूतजीने कहा हे द्विजसत्तमलोगो अब इनका देवता और विशेष भेदोंको सुनो-एक स्थंडिलोवदी होती है-दूसरी बापी-तीसरी यक्षी-चौथी मंडला ६ पांचवीं पूर्णचन्द्रा-छठी वज्रा-सातवीं पद्मा-आठवीं अर्धशशि नवीं त्रिकोणा और दशवीं पंचकोणा होती है-अब इन सबकी संस्थासुनो ७ मेखलावर्जित चतुष्कोणवाली को स्थंडिलाकहते हैं-दो मेखलाकीवेदी को बापी कहते हैं-तीन मेखलावाली को यक्षी कहते हैं-चतुष्कोण वेदीको लिंगोंमें योजन नहीं करे-मेखलाओं करके युक्त मंडला और वर्त्तुलावेदी, गणोंको प्यारी होती है ८।९ जिसके बीचमें दो मेखलाहोवें उसको पूर्णचन्द्रा कहते हैं और तीन मेखलाओंसे युक्त छः कोणकी वेदीको वज्रिका कहते हैं १० सोलहकोणकी वेदी को पद्मा कहते हैं वह नीचेसे कुछ २ न्यूनहोती है ऐसीही धनुपाकार सार्द्ध चन्द्रा कहाती है ११ और ऊपरसे त्रिशूलके सदृश त्रिकोणा कही है जो वेदी पूर्वोत्तरमें नीचीहो वह सुलक्षण युक्त श्रेष्ठ वर्णनकी है १२ तीन भागोंकरके परिधि बनावे वहीं निर्गम बनावे और मूलमें वा ऊर्ध्व भागमें वरावर प्रमाणकरे तीन भागकरके श्रेष्ठ जल मार्ग बनावे और लिंगके अर्ध भागकरके स्थूलता बनावे १३।१४ उसके तीन भागकरके मेखला बनावे और खोदना प्रमाणसेकरे अथवा पादहीन शोभन खातकरे १५ और उत्तरमें प्रणालिका प्रमाण से अधिक बनावे-स्थंडिलावेदी आरोग्य युक्त पुष्कलधन धान्य की देनेवाली है १६ यक्षी वेदी गौओं समेत अनेक संपत्तियोंकी देनेवाली है-मंडला वेदीकीर्त्तिको बढ़ातीहै और पूर्ण चन्द्रिकावेदी वरोंकी देनेवाली है १७ वज्रावेदी आयुको बढ़ाती है पद्मा वेदी सौभाग्यकी देनेवाली है-अर्द्धचन्द्रा वेदी पुत्रकी देनेवाली है और त्रिकोणा वेदी शत्रुकानाश करती है १८ ऐसे देव पूजनके निमित्त दशप्रकारकी वेदी कहीं हैं-पत्थरके ऊपर पत्थरकी वेदीकरे-मृत्तिकामें

निस्तुकर्त्तव्या सदाशुभफलेप्सुभिः २० अर्च्चायामासमन्दैर्घ्यं लिङ्गायामसमन्तथा । यस्यदेवस्ययापत्नी तांपीठेपरिकल्पयेत् । एतत्सर्वंसमाख्यातं समासात्पीठलक्षणम् २१

इतिश्रीमत्स्यपुराणेएकषष्ट्यधिकद्विशततमोऽध्यायः २६१ ॥

(सूत उवाच) अथातःसंप्रवक्ष्यामि लिङ्गलक्षणमुत्तमम् । सुस्निग्धञ्चसुवर्णञ्च लिङ्गंकुर्याद्विचक्षणः १ प्रासादस्यप्रमाणेन लिङ्गमानंविधीयते । लिङ्गमानेनवाविद्यात् प्रासादंशुभलक्षणम् २ चतुरस्रेसमेगर्त्ते ब्रह्मसूत्रंनिपातयेत् । वामेनब्रह्मसूत्रस्य अर्च्चावा लिङ्गमेवच ३ प्रागुत्तरेणलीलन्तु दक्षिणापरयाश्रितम् । पुरस्यापरदिग्भागे पूर्वद्वारंप्रकल्पयेत् ४ पूर्वेणचापरंद्वारं माहेन्द्रंदक्षिणोत्तरम् । द्वारंविभज्यपूर्वन्तु एकविंशतिभागिकम् ५ ततोमध्यगतंज्ञात्वा ब्रह्मसूत्रंप्रकल्पयेत् । तस्यार्द्धन्तुत्रिधाकृत्वा भागञ्चोत्तरतस्त्यजेत् ६ एवंदक्षिणतस्त्यक्त्वा ब्रह्मस्थानंप्रकल्पयेत् । भागार्द्धेनतुयल्लिङ्गं कार्यन्तदिहशस्यते ७ पञ्चभागविभक्तेवा त्रिभागेज्यैष्ठमुच्यते । भाजितेनवधागर्भे मध्यमंपाञ्चभागिकम् ८ एकस्मिन्नेवनवधा गर्भे लिङ्गानिकारयेत् । समसूत्रंविभज्याथ नवधागर्भभाजितम् ९ ज्येष्ठमर्द्धकनीयोऽर्धं तथामध्यममध्यमम् । एवंगर्भःसमाख्यातस्त्रिभिर्भागैर्विभाजयेत् १० ज्येष्ठन्तुत्रिविधंज्ञेयं मध्यमन्त्रिविधन्तथा । कन्यसंत्रिविधंतद्वत् लिङ्गभेदानवै

मृत्तिकाकी १९ और काष्ठदेशमें काष्ठकी वेदीकरे मिश्रितदेशमें मिलीहुई वस्तुकीकरे इनके सिवाय शुभफलकी इच्छाकरनेवाला पुरुष अन्यवस्तुकी नहीं करे २० मूर्त्तिके चारोंओर बड़ा चौतराकरे और जिस देवताकी जो शक्तिरूप देवीस्त्रीहोय उसको पीठमें कल्पनाकरे-यह सामान्यरीतिसे संपूर्ण पीठ लक्षण कहा है २१ ॥

इति श्रीमत्स्यपुराणभाषाटीकायामेकषष्ट्यधिकद्विशततमोऽध्यायः २६१ ॥

ते समासतःप्रोक्ता नामतःशृणुताधुना २७ मेरुमन्दरकैलासकुम्भसिंहमृगास्तथा। विमानच्छन्दकस्तद्वच्चतुरस्रस्तथैवच २८ अष्टास्रःषोडशास्रश्च वर्तुलःसर्वभद्रकः । सिंहास्योनन्दनश्चैव नन्दिवर्धनकस्तथा २९ हंसोवृषःसुपर्णेशः पद्मकोऽथसमुद्गकः । प्रासादानामतःप्रोक्ता विभागंशृणुतद्द्विजाः! ३० शतशृङ्गश्चतुर्द्वारो भूमिकाषोड़शोच्छ्रितः। नानाविचित्रशिखरो मेरुःप्रासादउच्यते ३१ मन्दरोद्वादशप्रोक्तः कैलासोनवभूमिकः। विमानच्छन्दकस्तद्वदनेकशिखराननः ३२ सचाष्टभूमिकस्तद्वत् सप्तभिर्नन्दिवर्धनः। विषाणकसमायुक्तो नन्दनःसउदाहृतः ३३ षोडशास्रसमायुक्तो नानारूपसमन्वितः। अनेकशिखरस्तद्वत्सर्वतोभद्रउच्यते ३४ चित्रशालासमोपेतो विज्ञेयःपञ्चभूमिकः । वलभीच्छन्दकस्तद्वदनेकशिखराननः ३५ वृषस्योच्छ्रायतस्तुल्यो मण्डलश्चास्रवर्जितः । सिंहःसिंहाकृतिर्ज्ञेयो गजोगजसमस्तथा ३६ कुम्भःकुम्भाकृतिस्तद्वद्भूमिकानवकोच्छ्रयः। अङ्गुलीपुटसंस्थानः पञ्चाण्डकविभूषितः ३७ षोड़शास्रःसमन्ताच्च विज्ञेयःससमुद्गकः। पार्श्वयोश्चन्द्रशालेऽस्य उच्छ्रायोभूमिकाद्वयम् ३८ तथैवपद्मकःप्रोक्त उच्छ्रायोभूमिकात्रयम्। षोड़शास्रःसविज्ञेयो विचित्रशिखरःशुभः ३९ मृगराजस्तुविख्यातश्चन्द्रशालाविभूषितः। प्राग्ग्रीवेणविशालेन भूमिकासुषडुन्नतः ४० अनेकश्चन्द्रशालश्च गजःप्रासादइष्यते। पर्यस्तगृहराजोवै गरुड़ोनामनामतः ४१ सप्तभूम्युच्छ्रयस्तद्वच्चन्द्रशालात्रयान्वितः। भूमिकाषडशीतिस्तु बाह्यतःसर्वतोभवेत् ४२ तथान्योगरुड़स्तद्वदुच्छ्र

कहे हैं, अब मन्दिरोंके नामोंको सुनो २१।२७ मेरु, मन्दर, कैलास, कुंभ, सिंह, मृग, विमानच्छन्दक, चतुरस्त्र, २८ अष्टास्त्र, षोड़शास्त्र, वर्त्तुल, सर्व्वभद्रक, सिंहास्य, नन्दन, नन्दिवर्धन, २९ हंस, वृष, सुपर्णेश अर्थात् गरुड़ नामक, पद्मक और समुद्गक, इन नामोंवाले प्रासाद अर्थात् मन्दिर कहातेहैं-अब इनके विभागोंको कहताहूं ३० सैकड़ों शृङ्गोंवाला-चारद्वारवाला-सोलह भूमिका गृहवाला ऊंचा-बिचित्र-ऐसामेरु-प्रासादहोताहै ३१ बारह भूमिकावाला मन्दरहोताहै-नवभूमिकावाला कैलास कहाताहै-अनेक शिखर तथा अनेक मुखोंवाला विमानच्छन्दक कहलाताहै ३२ वह विमानच्छन्दक आठ भूमिकावाला होताहै-सात भूमिकावाला नन्दिवर्द्धनहोताहै-अनेक शृंगोंवाला नन्दन कहाताहै-सोलहदलों वाला अनेक रूपवाला अनेक शिखरों से युक्त पांच भूमिकावाला ऐसा सर्बतोभद्र प्रासाद कहाताहै ३३।३५ सिंहके समान आकृति वाला सिंह मूर्त्ति से विभूषित सिंह प्रासादहोताहै-हस्ती के समान आकारवाला गजकहाताहै--नवभूमिकाओंवाला कुंभ के समान आकार जिसका होता है वह कुम्भक कहाताहै-गोलाकार चारों ओर सोलह दलोंवाला समद्गक प्रासाद होताहै-दोनों वरावरों में चन्द्रशाला युक्त दो भूमिका समेत पद्मक प्रासाद होताहै-सोलह दलों से युक्त बिचित्र शिखरोंवाला षोडशास्त्र प्रासाद होताहै ३६। ३९ चन्द्रशाला से बिभूषित विशाल बारजे समेत छः भूमिकाओंवाला मृगराज कहाताहै-सात भूमिकावाला तीन चन्द्रशालाओं से बिभूषित गरुड़नाम प्रासाद कहाताहै-कितनेही आचार्य्य दशभूमिकायुक्त सोलह दलों समेत को गरुड़ कह-

यादृशभूमिकः। भूमिकाषोड़शास्रस्तु भूमिद्वयमथाधिकः ४३ पद्मतुल्यप्रमाणेन श्रीवृक्षकइतिस्मृतः। पञ्चाण्डकोद्विभूमिश्च गर्भेहस्तचतुष्टयम् ४४ वृषोभवतिनाम्नायं प्रासादःसार्वकामिकः। सप्तकाःपञ्चकाश्चैव प्रासादावैमयोदिताः ४५ सिंहास्येनसमाज्ञेया येचान्येतत्प्रमाणकाः। चन्द्रशालैःसमोपेताःसर्वेप्राग्ग्रीवसंयुताः। ऐष्टकादारवाश्चैव शैलावास्युःसतोरणाः ४६ मेरुःपञ्चाशद्धस्तःस्यान्मन्दरःपञ्चहीनकः। चत्वारिंशत्तुकैलासश्चतुस्त्रिंशद्विमानकः ४७ नन्दिवर्द्धनकस्तद्वत् द्वात्रिंशत्समुदाहृतः। त्रिंशतानन्दनःप्रोक्तः सर्वतोभद्रकस्तथा ४८ वर्तुलःपद्मकश्चैव विंशद्धस्तउदाहृतः। गजःसिंहश्चकुम्भश्च वलभीच्छन्दकस्तथा ४९ एतेषोड़शहस्ताःस्युश्चत्वारोदेववल्लभाः। कैलासोमृगराजश्चविमानच्छन्दकोमतः ५० एतेद्वादशहस्ताःस्युरेतेषामिहमन्मतम्। गरुड़ोऽष्टकरोज्ञेयो हंसोदशउदाहृतः ५१ एवमेतेप्रमाणेन कर्तव्याःशुभलक्षणाः। यक्षराक्षसनागानां मातृहस्तान्प्रशंस्यते ५२ तथामेर्वादयःसप्त ज्येष्ठलिङ्गशुभावहाः। श्रीवृक्षकादयश्चाष्टौ मध्यमस्यप्रकीर्तिताः ५३ तथाहंसादयःपञ्च कन्यसेशुभदामताः। बलभीच्छन्दकेगौरी जटामुकुटधारिणी ५४ वरदाभयदातद्वत् साक्षसूत्रकमण्डलुः। गृहेतुरक्तमुकुटा उत्पलांकुशधारिणी। वरदाभयदाचापिपूजनीयासभर्तृका ५५ तपोवनस्थामितरां तांतुसंपूजयेद्बुधः। देव्याविनायकस्तद्वत्बलभीच्छन्दकेशुभः ५६ ॥

इतिश्रीमत्स्यपुराणेऽष्टषष्ठ्यधिकद्विशततमोऽध्यायः २६८ ॥

तेहैं ४०।४३ और अष्टास्र वा चतुरस्र यह दोनों अपने २ नामके अनुरूप वाले होतेहैं और हंसके समान आकार वालेको हंस कहतेहैं-एक भूमिका समेत एक शृंगदशहाथ प्रमाण और चारों ओर से गोल ऐसा वृष प्रासादहोताहै ४४।४५ इनके सिवाय विना कहेहुए अन्य सब मन्दिर सिंहास्यकी तुल्य और चन्द्र शालासे युक्त होते हैं यह सब मन्दिर ईंटोंके वा काष्ठके अथवा पत्थरोंसे चिनवाये जातेहैं इन सबोंके तोरण बन्दन वार बंधवा देवे ४६ मेरुनामवाला देवमन्दिर और बिमानक चौंतीस हाथ विस्तार वालाहोताहै ४७ नन्दिवर्धन बत्तीस हाथका नन्दन और सर्वतोभद्र यह दोनोंतीसहाथ प्रमाणके होते हैं ४८ और बर्तुल पद्मक बीस २ हाथ विस्तारवाले होते हैं और गज-सिंह-कुम्भ और वलभीच्छन्दक यह चार मन्दिर सोलह २ हाथकेहोते हैं और सूतजीका वचनहै कि मेरे मतमें कैलास-मृगराज और विमानच्छन्दक यह बारह २ हाथकेहोते हैं-गरुड़ आठहाथका होताहै-हंसदश हाथकाहोताहै ४९।५१ इसप्रकारसे यह सब प्रमाणवाले मन्दिर शुभलक्षणवाले होतेहैं-यहां यक्ष-राक्षस-नाग और मातृका इन्होंके हाथ श्रेष्ठ कहे हैं-५२ और मेरु आदिक सात मन्दिरों में बड़ा शिवलिंग स्थापित करना शुभहै और श्रीवृक्षक आदि आठ मंदिर मध्यम लिंगके स्थापन में श्रेष्ठहैं हंस आदि पांच मन्दिरछोटे शिवलिंग स्थापन करने के योग्य हैं ५३ वलभीच्छन्दक नाम वाले मन्दिरमें जटामुकुट धारण करने वाली गौरी स्थापित करनीचाहिये ५४ और वरदेनेवाली साक्षसूत्र-कमंडलु और रक्तमुकुट कमल और अंकुश इन सबकी धारण करनेवाली महादेव सहित

(सूत उवाच) अथातःसंप्रवक्ष्यामि मण्डपानान्तुलक्षणम्। मण्डपप्रवरान्वक्ष्ये प्रासादस्यानुरूपतः १ विविधामण्डपाःकार्या ज्येष्ठमध्यकनीयसः। नामतस्तान्प्रवक्ष्यामि शृणुध्वमृषिसत्तमाः २ पुष्पकःपुष्पभद्रश्च सुव्रतोऽमृतनन्दनः। कौशल्योबुद्धिसंकीर्णो गजभद्रोजयावहः ३ श्रीवत्सोविजयश्चैव वास्तुकीर्तिःश्रुतिंजयः। यज्ञभद्रोविशालश्च सुश्लिष्टःशत्रुमर्दनः ४ भागपञ्चोनन्दनश्च मानवोमानभद्रकः। सुग्रीवोहरितश्चैव कर्णिकारःशतार्द्धकः ५ सिंहश्चश्यामभद्रश्च सुभद्रश्चतथैवच। सप्तविंशतिराख्याता लक्षणं शृणुतद्विजाः! ६ स्तम्भायत्रचतुःषष्टि पुष्पकःसमुदाहृतः। द्विषष्टिपुष्पभद्रस्तु षष्टिः सुव्रतउच्यते ७ अष्टपञ्चाशकस्तम्भः कथ्यतेमृतनन्दनः। कौशल्यःषट्चपञ्चाशच्चतुःपञ्चाशतापुनः ८ नाम्नातुबुद्धिसंकीर्णो द्विहीनोगजभद्रकः। जयावहस्तुपञ्चाशत् श्रीवत्सस्तद्द्विहीनकः ९ विजयस्तद्द्विहीनःस्यात् वास्तुकीर्तिस्तथैवच। द्वाभ्यामेवप्रहीयेततः श्रुतिजयोऽपरः १० चत्वारिंशद्यज्ञभद्रस्तद्द्विहीनोविशालकः। षट्त्रिंशच्चैवसुश्लिष्टो द्विहीनःशत्रुमर्द्दनः ११ द्वात्रिंशद्भागपञ्चस्तु त्रिंशद्भिर्नन्दनःस्मृतः। अष्टाविंशन्मानवस्तु मानभद्रोद्विहीनकः १२ चतुर्विंशन्तुसुग्रीवो द्वाविंशोहरितोमतः। विंशतिःकर्णिकारःस्यादष्टादशशतार्धिकः १३ सिंहोभवेद्द्विहीनश्च श्यामभद्रोद्विहीनकः। सुभद्रस्तुतथाप्रोक्तोद्वादशस्तम्भउच्यते १४ मण्डपाःकथितास्तुभ्यं यथावल्लक्षणान्विताः। त्रिकोणंवृतमर्द्धन्तु ह्य

पार्वती देवी सदैव घरमें पूजनीचाहिये ५५ और अन्य प्रकारकी गौरीकी मूर्त्तिको तपोवनमें स्थापित करके पूजे और गौरीपुत्र गणेशजीको बलभिच्छन्दकनामवाले मन्दिरमें स्थापितकरे ५६ ॥

इति श्रीमत्स्यपुराणभाषाटीकायामष्टषष्ट्यधिकद्विशततमोऽध्यायः २६८ ॥

सूतजीबोले—अब मंडपों के लक्षण और प्रासाद के रूपों के अनुसार उत्तम मण्डपों का वर्णन करते हैं १ उत्तम मध्यम और निकृष्ट इन सब प्रकारों से अनेक मंडपहोते हैं उनके यह नामहैं २ पुष्पक, पुष्पभद्र, सुव्रत, अमृतनन्दन, कौशल्य, बुद्धिसंकीर्ण, गजभद्र, जयावह ३ श्रीवत्स, विजय, वास्तुकीर्त्ति, श्रुतिंजय, यज्ञभद्र, विशाल, सुश्लिष्ट, शत्रुमर्द्दन ४ भागपंच, नन्दन, मानव, मानभद्रक, सुग्रीव, हरित, कर्णिकार, शतार्द्धिक ५ सिंह, श्यामभद्र, सुभद्र, ऐसे यह सत्ताईस प्रकारके मंडपहोते हैं अब इनके नाम सुनो ६ जहाँ चौंसठ स्तंभ बनायेजावें वह पुष्पक मंडप कहाताहै बासठ स्तंभों वाला पुष्पभद्र कहाता है साठ स्तंभोंवाला सुव्रत कहाता है ७ अट्ठावन स्तंभोंवाला अमृतनन्दन कहाता है छप्पन स्तंभोंवाला कौशल्य चौवन स्तंभोंवाला बुद्धिसंकीर्ण बावन स्तंभोंवाला गजभद्रक मंडप, पचास स्तंभवाला जयावह और अडतालीस स्तंभोंवाला श्रीवत्समंडप कहाताहै ८। ९ छयालीस स्तंभोंवाला विजय चौवालीस स्तंभोंवाला वास्तुकीर्त्ति बयालीस स्तंभोंवाला श्रुतिंजय मंडप कहाता है १० चालीस स्तंभवाला यज्ञभद्र ३८ का विशालक ३६ का सुश्लिष्ट ३४ का शत्रुमर्द्दन मंडपहै ११। ३२ का भागपंच ३० का नन्दन २८ का मानव २६ का मानभद्र २४ का सुग्रीव बाईसका हरित २० का कर्णिकार १८ का शतार्द्धिक मंडप होताहै १२। १३ सोलहका सिंह चौदहका श्यामभद्र

ष्टकोणंद्विरष्टकम् १५ चतुःकोणन्तुकर्तव्यं संस्थानंमण्डपस्यतु । राज्यञ्चविजयश्चैव आयुवर्द्धनमेवच १६ पुत्रलाभःश्रियःपुष्टिस्त्रिकोणादिक्रमाद्भवेत् । एवंतुशुभदाप्रोक्ताश्चान्यथात्वशुभावहाः १७ चतुःषष्टिपदंकृत्वा मध्येद्वारंप्रकल्पयेत् । विस्ताराद्द्विगुणोच्छ्रायं तत्त्रिभागःकटिर्भवेत् १८ विस्तारार्द्धोभवेद्गर्भोभित्तयोऽन्याःसमन्ततः । गर्भपादेनविस्तीर्णं द्वारंत्रिगुणमायतम् १९ तथाद्विगुणविस्तीर्णमुखस्तद्वदुदुम्बरः । विस्तारपादप्रतिमं बाहुल्यंशाखयोऽस्मृतम् २० त्रिपञ्चसप्तनवभिः शाखाभिर्द्वारमिष्यते । कनिष्ठमध्यमंज्येष्ठं यथायोगंप्रकल्पयेत् २१ अंगुलानांशतंसार्द्धं चत्वारिंशतथोन्नतम् । त्रिंशद्विंशोत्तरंचान्य द्धन्यमुत्तममेवच २२ शतञ्चाशीतिसहितं वातनिर्गमनेभवेत् । अधिकंदशभिस्तद्वत् तथाषोडशभिःशतम् २३ शतमानंतृतीयञ्च नवत्याशीतिभिस्तथा । दशद्वाराणिचैतानि क्रमेणोक्तानिसर्वदा २४ अन्यानिवर्जनीयानि मनसोद्वेगदानितु । द्वारवेधंप्रयत्नेन सर्ववास्तुषुवर्जयेत् २५ वृक्षकोणभ्रमिद्वारस्तम्भकूपध्वजादपि । कुड्यश्वभ्रेणवाबिद्धं द्वारंनशुभदम्भवेत् २६ क्षयश्चदुर्गतिश्चैव प्रवासःक्षुद्भयंतथा । दौर्भाग्यंबंधनंरोगो दारिद्र्यंकलहंतथा २७ विरोधश्चार्थनाशश्च सर्ववेधाद्भवेत्क्रमात् । पूर्वेणफलिनोवृक्षाः क्षीरवृक्षास्तुदक्षि

और बारह स्तंभोंवाला सुभद्र होताहै १४ यह इसप्रकारके यथार्थ लक्षणवाले मंडप मैंने तुमसे कहे इनको त्रिकोणबनावे गोलबनावे अष्टकोण बनावे अथवा सोलह कोणके मंडप बनावे यहसब मंडप राज्य, विजय, आयु और कीर्तिको बढ़ातेहैं यहसब त्रिकोण आदि मंडप यथा क्रमसे पुत्रलाभ, लक्ष्मी और पुष्टिके कर्त्ता हैं और इनसे अन्यथा कियेहुए मंडपोंका अशुभफल होताहै १५। १७ मंडपके चौंसठपद करके मध्यमें द्वार कल्पितकरे मण्डपको विस्तारसे दूना ऊंचाकरे तीन भागकी कटि बनावे विस्तारसे आधा गर्भ अर्थात् चौक बनावे और चारों ओरको अन्य भीतें बनवावे और गर्भ मध्यभागके शिखरके विस्तारसे चौथाई चौडाकरे और चौथाईसे त्रिगुणितलंबा अथवा दूना लंबाद्वार रक्खे और द्वारकी चौथाईका चतुर्थांश द्वारकी चौखटके ऊपर सिरदर बनावे और नीचे देहलरक्खे और सिरदरकी चौड़ाईसे चौथाई चौड़ाई चौखटके बाजुओंकी रक्खे, यहाँ चौखटके तीन, पांच, सात अथवा नौबाजू लगाके निकृष्ट, मध्यम और उत्तम इन क्रमोंसे द्वार बनावे १८। २१ और एकसौ पचास अंगुल ऊंचा वा १४० अंगुलऊंचा वा १३० अंगुलऊँचा अथवा १२० अंगुलऊंचा यह ऐसे द्वारधन्य और उत्तम गिनेजातेहैं और एकसौ अस्सी अंगुलऊंचा द्वार वात निर्गमन अर्थात् वायु निकसनेके निमित्त श्रेष्ठ कहाहै और ११० अंगुलऊंचा वा ११६ अंगुलऊंचा वा १०० अंगुलऊंचा, वा ९० अंगुल ऊंचा अथवा ८० अंगुलऊंचा इस रीतिसे यहसब दशद्वार कहेहैं इनसे अन्यथा द्वार बनावे तो मनको उद्वेग होकर शुभफल नहीं होताहै और संपूर्ण वास्तुओं में यत्नपूर्वक द्वारके आगे वेधको न रहनेदेवे २२। २५ वृक्ष, कोण, भौंरी, स्तंभ, ध्वजा और भीत इन्होंके वेध अर्थात् फट फेट वालाद्वार शुभदायी नहीं होता है २६ नाश, दुर्गति, देशनिकाला, भूखामरना, दुर्भाग्य, बन्धन, रोग दारिद्र्य, कलह, विरोध और द्रव्यकानाश यह संपूर्ण वस्तु यथा क्रमसे वृक्षआदिकोंके वेधसे होती हैं

णे २८ पश्चिमेनजलंश्रेष्ठं पद्मोत्पलविभूषितम्। उत्तरेसरलैस्तालैः शुभास्यात्पुष्पवाटि
का २९ सर्वतस्तुजलंश्रेष्ठं स्थिरमस्थिरमेवच । पार्श्वतश्चापिकर्त्तव्यं परिवारादिकाल
यम् ३० याम्येतपोवनस्थान मुत्तरेमातृकागृहम्। महानसंतथाग्नेये नैर्ऋत्येऽर्थविनाय
कम् ३१ वारुणेश्रीनिवासस्तु वायव्येगृहमालिका । उत्तरेयज्ञशालातु निर्माल्यस्थानमु
त्तरे३२वारुणेसोमदैवत्ये बलिनिर्वपणंस्मृतम्। पुरतोवृषभस्थानं शेषेस्यात्कुसुमायुधः
३३ जलंवापितथैशाने विष्णुस्तुजलशाय्यपि । एवमायतनंकुर्यात् कुण्डमण्डपसंयुत
म् ३४ घण्टावितानकसतोरणचित्रयुक्तं नित्योत्सवप्रमुदितेनजनेनसार्धम् । यः कार
येत्सुरगृहांविविधध्वजाङ्कं श्रीस्तं न मुञ्चतिसदादिविपूज्यते च ३५ एवंगृहार्चनविधा
वपिशक्तितःस्यात् संस्थापनंसकलमन्त्र विधानयुक्तम् ३६॥

इति श्रीमत्स्यपुराणेएकोनसप्तत्यधिकद्विशततमोऽध्यायः २६९॥

(ऋषय ऊचुः) पूरोर्वंशस्त्वयासूत ! सभविष्योनिवेदितः। सूर्यवंशेनृपायेतु भविष्य
न्तिहितान्वद १ तथैवयादवेवंशे राजानःकीर्तिवर्धनाः । कलौयुगेभविष्यन्ति तानपीह
वदस्वनः २ वंशान्तेज्ञातयोयाश्च राज्यंप्राप्स्यन्तिसुव्रताः। ब्रूहिसंक्षेपतस्तासां यथाभा
व्यमनुक्रमात् ३ (सूत उवाच) बृहद्बलस्यदायादो वीरोराजाह्युरुक्षयः । उरुक्षयसुत

और द्वारसे पूर्वकीओर फलवाले वृक्ष, और दक्षिणओर दूधवाले वृक्ष शुभदायी होतेहैं–२७। २८
पश्चिमकीओर कमल आदिकोंसे विभूषित जलका स्थान,उत्तरमें सरल,तालवृक्ष और पुष्पोंकीवाड़ी
यहसब शुभदायकहैं २९ स्थिर वा अस्थिरजल सब दिशाओंमें श्रेष्ठहै और निजमन्दिर के मंडप आ-
दिके बराबरमें उसके उपयोगी देवताओंके स्थान बनवावे ३० दक्षिणमें तपोवन स्थान बनावे, उ-
त्तर मातृकागृह बनावे–अग्नि कोणमें रसोईका स्थान बनावे नैर्ऋत्यमें गणेशजीका स्थान बनावे३१
पश्चिममें लक्ष्मीका निवास बनावे–वायव्यमें ग्रहोंकी वेदी बनावे, उत्तरमें यज्ञशाला और निर्माल्य
स्थान बनावे ३२ पश्चिममें सोमदैवत्यबलिदेने का स्थान बनावे, शिवजीके आगे वृषभका स्थान
बनावे और अन्यत्र कामदेवका स्थान बनावे ३३ ईशान दिशामें जलका स्थान और विष्णुकी जल-
शय्या बनावे, ऐसे कुंड मंडपसे युक्त कियाहुआ देव मन्दिर बनाना चाहिये ३४ घंटा, तोरण और चि-
त्राम इन्होंसे तथा नित्योत्सवसे और प्रमुदित हुएजनोंसे युक्त हुए देवमन्दिरको जो बनाताहै उसके
घरमें सदा लक्ष्मीका निवास रहताहै और स्वर्ग लोकमें पूजाजाताहै ३५ इसीप्रकार शक्तिके अनु-
सार घरकी प्रतिष्ठामें भी संपूर्ण विधान और पूजन करना चाहिये ३६ ॥

इति श्रीमत्स्यपुराणभाषाटीकायामेकोनसप्तत्यधिकद्विशततमोऽध्यायः २६९ ॥

ऋषिबोले–हे सूतजी आपने राजा पुरुके संपूर्ण वंशको हमसे कहा परन्तु सूर्य्यवंशमें जो राजा
हुएहैं या होंगे उन सबको भी हमारे आगे वर्णन कीजिये १ और कीर्त्तिके बढ़ानेवाले जो राजा या-
दववंशके कलियुगमें होंगे उनका भी वर्णनकीजिये २ इनके विशेष वंशोंके अन्तमें जो सुन्दर आच-
रण करनेवाली जातिके लोग राज्यको प्राप्तहोवेंगे उनको भी यथा क्रम संक्षेप पूर्वक जैसे हों वैसे

इचापि वत्सद्रोहोमहायशाः ४ वत्सद्रोहात्प्रतिव्योमस्तस्यपुत्रोदिवाकरः । तस्यैवमध्य
देशेतु अयोध्यानगरीशुभा ५ दिवाकरस्यभविता सहदेवोमहायशाः । सहदेवाद्भविता
ध्रुवाश्वोवैमहामनाः ६ तस्यभाव्योमहाभागः प्रतीपाश्वश्चतत्सुतः । प्रतीपाश्वसुतश्चा
पि सुप्रतीपोभविष्यति ७ मरुदेवःसुतस्तस्य सुनक्षत्रस्ततोभवत् । किन्नराश्वःसुनक्ष
त्राद्भविष्यति परन्तपः ८ किन्नराश्वादन्तरिक्षो भविष्यतिमहामनाः । सुषेणश्चान्तरिक्षा
च्च सुमित्रश्चाप्यमित्रजित् ९ सुमित्रजोबृहद्राजः बृहद्राजस्यवीर्यवान् । पुत्रःकृतञ्जयो
नाम धार्मिकश्चभविष्यति १० कृतञ्जयसुतोविद्वान् भविष्यतिरणेजयः । भवितासञ्ज
यश्चापि वीरोराजारणेजयात् ११ सञ्जयस्यसुतःशाक्यः शाक्याच्छुद्धौदनोनृपः । शु
द्धौदनस्यभविता सिद्धार्थःपुष्कलःसुतः १२ प्रसेनजित्ततोभाव्यः क्षुद्रकोभविताततः ।
क्षुद्रकात्कुलकोभाव्यः कुलकात्सुरथःस्मृतः १३ सुमित्रसुरथाज्जातो अन्यस्तुभविता
नृपः । एतेचैक्ष्वाकवःप्रोक्ता भविष्यायेकलौयुगे १४ बृहद्वलान्ववायेतु भविष्याःकुलव
र्द्धनाः । अत्रानुवंशश्लोकोऽयंविप्रैर्गीतःपुरातनैः १५ इक्ष्वाकूणामयंवंशःसुमित्रान्तोभवि
ष्यति । सुमित्रंप्राप्यराजानं संस्थांप्राप्स्यतिवैकलौ १६ इत्येवंमानवोवंशः प्रागेवसमुदाहृ
तः । अतऊर्ध्वंप्रवक्ष्यामि मागधायेबृहद्रथाः १७ पूर्वेणयेजरासन्धात् सहदेवान्वयेनृपाः ।
अतीतावर्त्तमानाश्च भविष्यांश्चनिबोधत १८ संग्रामेभारतेवृत्ते सहदेवेनिपातिते । सो
माधिस्तस्यदायादो राजाभूत्सगिरिव्रजे १९ पञ्चाशतंतथाष्टौच समाराज्यमकारयत् ।
कहिये ३-सूतजीबोले बृहद्वलके दायादनाम पुत्र, शूरवीर राजा उरुक्षय, उरुक्षयका पुत्र बड़ा य-
शस्वी वत्सद्रोह, वत्सद्रोहके प्रतिव्योम, प्रतिव्योमके दिवाकर पुत्र उसी के मध्यदेशमें अयोध्या-
नाम नगरी बड़ी सुन्दरहै ४।५ दिवाकरके महायशी सहदेव पुत्रहोगा, सहदेवके ध्रुवाश्व ६ ध्रुवाश्वके
भाव्यनाम पुत्र, भाव्यमानके प्रतीपाश्व प्रतीपाश्वके सुप्रतीप ७ सुप्रतीपके मरुदेव, मरुदेवके सुन
क्षत्र, सुनक्षत्रके परम तपस्वी किन्नराश्व नामपुत्रहोगा, किन्नराश्वके अन्तरिक्ष अन्तरिक्षके सुषेण
और सुमित्रहोंगे ८।९ सुमित्रके बृहद्राज. बृहद्राजके महाधीर धर्मात्मा कृतंजय १० कृतंजयका विद्या-
वान् रणेजयहोगा, रणेजयका पुत्र संजयहोगा ११ संजयका पुत्र शाक्य, शाक्यका पुत्र शुद्धौदन,शु-
द्धौदनका सिद्धप्रयोजन पुष्कलनाम पुत्रहोगा, पुष्कलके प्रसेनजित्, प्रसेनजित्का क्षुद्रकनाम पुत्र
होगा क्षुद्रकका कुलक, कुलकका सुरथ, सुरथका सुमित्र नाम राजा होगा जो इक्ष्वाकु वंशमें होने
वाले कलियुगमें राजाहोंगे वह सब तुमकहे और बृहद्वलके वंशमें जो कीर्त्तिके बढ़ानेवाले होंगे
वहभी कहे यह सब पूर्वहोनेवाले ब्राह्मणों ने पृथक् २ वंशोंके यशगाये हैं १२ । १५ यह इक्ष्वाकुओं
का वंश सुमित्र राजा तकहोगा और इसी सुमित्र राजाको प्राप्तहोकर यह वंशनाशको प्राप्तहोजाय-
गा १६ इसीप्रकार हमने मनुकाभी वंश पूर्वहीं कहाहै, इससे आगे बृहद्रथ वंशमें होनेवाले मगध
देशवासी राजाओंको कहते हैं, जरासन्धसे आदिलेकर सहदेवके वंशमें जो राजा प्रथमहुए और व-
र्तमान हैं और जो आगे अन्यहोंयगे उनको भी सुनो, भारतके संग्राममें सहदेवके मरे पीछे सोमाधि

श्रुतश्रवाश्चतुःषष्टिं समास्तस्यान्वयेभवत् २० अप्रतीपीचषट्त्रिंशत् समाराज्यमकारयत्। चत्वारिंशत्समास्तस्य निरमित्रोदिवङ्गतः २१ पञ्चाशतंसमाःषट्च सुरक्षःप्राप्तवान्महीम्। बृहतंकर्मात्रयोविंशदब्दंराज्यमकारयत् २२ सेनाजित्सम्प्रयातश्च भुकापञ्चशतंमहीम्। श्रुतञ्जयस्तुवर्षाणिचत्वारिंशद्भविष्यति २३ अष्टाविंशतिवर्षाणि महीं प्राप्स्यतिवैविभुः। अष्टपञ्चाशतंषट्च राज्येस्थास्यतिवैशुचिः २४ अष्टाविंशत्समाराजा क्षेमोभोक्ष्यतिवैमहीम्। अनुव्रतश्चतुःषष्टि राज्यंप्राप्स्यतिवीर्यवान् २५ पञ्चत्रिंशतिवर्षाणि सुनेत्रोभोक्ष्यतेमहीम्। भोक्ष्यतेनिर्वृतिश्चेमा मष्टपञ्चाशतंसमाः २६ अष्टाविंशत्समाराज्यं त्रिनेत्रोभोक्ष्यतेततः। चत्वारिंशत्तथाष्टौच द्युमत्सेनोभविष्यति २७ त्रयस्त्रिंशत्तुवर्षाणि महीनेत्रःप्रकाश्यते। द्वात्रिंशत्तुसमाराजा ह्यचलस्तुभविष्यति २८ रिपुञ्जयस्तुवर्षाणि पञ्चाशत्प्राप्स्यतेमहीम्। द्वाविंशतिनृपाह्येते भवितारोबृहद्रथाः २९ पूर्णंवर्षसहस्रन्तु तेषांराज्यंभविष्यति। जयतांक्षत्रियाणाञ्च बालकःपुलकोभवेत् ३० ॥

इतिश्रीमत्स्यपुराणेसप्तत्यधिकद्विशततमोऽध्यायः २७० ॥

(सूत उवाच) बृहद्रथेष्वतीतेषु वीतिहोत्रेष्ववन्तिषु। पुलकःस्वामिनंहत्वा स्वपुत्रमभिषेक्ष्यति १ मिषतांक्षत्रियाणाञ्च बालकःपुलकोद्भवः। सर्वैप्रणतसामन्तो भविष्योतचधर्मतः २ त्रयोविंशत्समाराजा भवितासनरोत्तमः। अष्टाविंशतिवर्षाणि पालकोभवि

राजा, सोमाधिके दायाद राजा गिरिव्रजनाम पुरीमेंहुआ और ५८ वर्ष राज्यकरताभया और उसीके वंशमें श्रुतश्रवानाम राजा ६४ वर्ष राज्यकरताभया १७।२० फिर सुप्रतीपनाम राजाने ३६ वर्ष राज्य किया और ४० वर्ष उसका मित्र राज्यकरके स्वर्गवासीहुआ २१ तदनन्तर सुरक्षने ५६ वर्ष राज्य किया और ३३ वर्ष बृहत्कर्माने किया २२ सेनाजित् और संप्रयात यह दोनों ५०० वर्ष राज्यकरके ४० वर्षतक श्रुतंजय नाम राजा राज्यकरेगा २३ फिर २८ वर्ष विभुराजा राज्यकरेगा फिर ५६ वर्ष तक राजा शुचि स्थित रहैगा २४ फिर अट्टाईस वर्ष क्षेमनाम राजा पृथ्वीको भोगेगा, फिर बड़ा पराक्रमी अनुव्रतनाम राजा ६४ वर्ष राज्यकरेगा २५ फिर ३५ वर्षतक राजा सुनेत्र राज्यकरेगा, फिर ५८ वर्ष निर्वृतिनाम राज्यकरेगा २६ फिर २८ वर्ष त्रिनेत्र राज्यकरेगा, फिर ४८ वर्ष द्युमत्सेन राज्यकरेगा २७ फिर ३३ वर्ष महीनेत्र राज्यकरेगा और ३२ वर्ष अचलनाम राज्य भोगेगा २८ फिर ५० वर्ष रिपुंजय पृथ्वीको भोगेगा, बृहद्रथके वंशके होनेवाले और जो आगे राज्यकरेंगे वह सब १००० वर्ष तक रहैंगे फिर विजयी क्षत्रियोंका बालक पुलकनाम राजाहोगा २९। ३० ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांसप्तत्यधिकद्विशततमोऽध्यायः २७० ॥

सूतजी बोलेकि वीतिहोत्र संज्ञक बृहद्रथोंसेपीछे पुलक अपने स्वामीको मारकर अपने राज्यमें अपने पुत्रको अभिषेक करेगा १ और वह पुलक का पुत्र क्षत्रियोंके देखतेही प्रणत सामन्त अर्थात् नम्र और स्नेह करनेवाला होगा कुछ धर्म स्वभावसे नहींहोगा २ वह नरोत्तम राजा २३ वर्ष राज्य

तान्नृपः ३ विशाखयूपोभविता त्रिपञ्चाशत्तथासमाः । एकविंशत्समाराजा सूर्यकस्तुभविष्यति ४ वाराणस्यांसुतंस्थाप्य श्रयिष्यतिगिरिव्रजम् । शिशुनाकस्तुवर्षाणि चत्वारिंशद्भविष्यति ५ काकवर्णःसुतस्तस्य षट्विंशत्प्राप्स्यतेमहीम् । षट्त्रिंशच्चैववर्षाणि क्षेमधर्माभविष्यति ६ चतुर्विंशत्समाःसोऽपि क्षेमजित्प्राप्स्यतेमहीम् । अष्टाविंशतिवर्षाणि विन्ध्यसेनोभविष्यति ७ भविष्यतिसमाराजा नवकाण्वायनोनृपः । भूमिमित्रःसुतस्तस्य चतुर्दशभविष्यति ८ अजातशत्रुर्भविता सप्तविंशत्समान्नृपः । चतुर्विंशत्समाराजा वंशकस्तुभविष्यति ९ उदासीभवितातस्मात्त्रयस्त्रिंशत्समान्नृपः । चत्वारिंशत्समाभाव्यो राजावैनन्दिवर्द्धनः १० चत्वारिंशत्त्रयश्चैव महानन्दीभविष्यति । इत्येतेभवितारोवै दशद्वौशिशुनाकजाः ११ शतानित्रीणिपूर्णानि षष्टिवर्षाधिकानितु । शिशुनाकाभविष्यन्ति राजानःक्षत्रबन्धवः १२ एतैःसार्द्धंभविष्यन्ति यावत्कालिन्नृपाःपरे । तुल्यकालंभविष्यन्ति सर्वेह्येतेमहीक्षितः १३ चतुर्विंशत्तथैक्ष्वाकाः पाञ्चालाःसप्तविंशतिः । काशेयास्तुचतुर्विंशदष्टाविंशत्तुहैहयाः १४ कलिङ्गाश्चैवद्वात्रिंशदश्मकाःपञ्चविंशतिः । कुरवश्चापिषट्विंशदष्टाविंशास्तुमैथिलाः १५ शूरसेनास्त्रयोविंशद्वीतिहोत्राश्चविंशतिः । एतेसर्वेभविष्यन्ति एककालंमहीक्षितः १६ महानन्दिसुतश्चापि शूद्रायांकलिकांशजः । उत्पत्स्यतेमहापद्मः सर्वक्षत्रान्तकोनृपः १७ततःप्रभृतिराजानो भविष्याःशूद्रयोनयः । एकराट्समहापद्मो एकच्छत्रोभविष्यति १८ अष्टाशीतितुवर्षाणि पृथि

करेगा और २८वर्षतक पालक नाम राजा राज्यकरेगा ३ फिर ५३ वर्ष विशाखयूपनाम राजा राज्यकरेगा-फिर २१ बर्ष सूर्य्यकराजा राज्यकरेगा ४ वह अपने पुत्रको काशी पुरीमें स्थापित करके पर्व्वतोंके व्रज अर्थात् समूहमें जायगा फिर ४० वर्ष शिशुनाक राजाहोवेगा ५ फिर शिशुनाककापुत्र काकवर्ण २६ बर्षरहैगा-फिर ३६ हीबर्ष क्षेमधर्मा राजाराज्यकरेगा-६ फिर क्षेमजित् २४ बर्षराज्यकरेगा-फिर २८ बर्ष विन्ध्यसेन राज्यकरेगा ७ फिर ९ बर्ष काण्वायन राज्यकरेगा और काण्वायनका पुत्र चौदह १४ बर्ष भोगेगा-और २७ बर्ष अजातशत्रुराज्यकरेगा-२४बर्ष वंशकराज्य करेगा-फिर बंशककापुत्र उदासी नामराजा ३३ बर्षराज्यकरेगा और ४० बर्ष नन्दिवर्द्धन राजा राज्यकरेगा-८। १० फिर तेंतालीस बर्ष महानन्दी राज्यकरेगा-यह बारहपुत्र शिशुकके होंगे ११।३०८ वर्ष शिशुनाक बंशमें होनेवाले और क्षत्रियों में अधमराजाहोंगे १२ कलियुगमें यह सबराजा एकसाथ एकहीकालमें होवेंगे और चौबीस इक्ष्वाकुराजा होवेंगे फिर अट्ठाईस हैहयनाम वाले राजाहोंगे १३।१४ फिर ३२ कलिंगराजाहोंगे-फिर २५ अश्मक नाम राजाहोंगे और २६ कुरवनामके राजाहोंगे फिर २८मैथिल राजाहोंगे फिर २३ शूरसेनानामी राजाहोंगे फिर २० बीतिहोत्र नामके राजाहोंगे यह सबराजा एकही कालमें होवेंगे फिर कलियुगके अंशसे शूद्रा स्त्रीसे महानन्दि का पुत्र महापद्म नामसे बिख्यातहोगा वह संपूर्ण क्षत्रियोंका अन्तकर देगा १५।१७ इसके अनन्तर सब राजा शूद्रयोनिहोजावेंगे-वह महाभाग नन्दिसुत एक छत्र राज्य करेगा और अट्टासी बर्षतक पृथ्वी पै राज्य करेगा उसी

ऽव्याङ्चभविष्यति । सर्वक्षत्रमथोत्साद्य भाविनार्थेनचोदितः १९ सुकल्पादिसुताह्यष्टौ
समाद्वादशतेनृपाः । महापद्मस्यपर्य्याये भविष्यन्तिनृपाःक्रमात् २० उद्धरिष्यतिकौटि
ल्यः समैर्द्वादशभिःसुतान् । भुक्त्वामहींवर्षशतं ततोमौर्य्यान्गमिष्यति २१ भविताशत
धन्वाच तस्यपुत्रस्तुषट्समाः । वृहद्रथस्तुवर्षाणि तस्यपुत्रश्चसप्ततिः २२ षट्त्रिंशत्तुस
माराजा भविताशकएवच । सप्तानांदशवर्षाणि तस्यनप्ताभविष्यति २३ राजादशरथोऽ
ष्टौतु तस्यपुत्रोभविष्यति । भवितानववर्षाणि तस्यपुत्रश्चसप्ततिः २४ इत्येतेदशमौ
र्य्यास्तु येभोक्ष्यन्तिवसुन्धराम् । सप्तत्रिंशच्छतंपूर्णं तेभ्यःशुङ्गान्गमिष्यति २५ पुष्य
मित्रस्तुसेनानीरुद्धृत्यसबृहद्रथान् । कारयिष्यतिवैराज्यं षट्त्रिंशतिसमानृपः २६ भ
वितापिवसुज्येष्ठः सप्तवर्षाणिवैनृपः । वसुमित्रस्तथाभाव्यो दशवर्षाणिवैततः २७ ततो
न्तकः समेद्वेतु तस्यपुत्रोभविष्यति । भविष्यतिसमस्तस्मात्त्रीण्येवंसपुलिन्दकः २८
भवितावज्रमित्रस्तु समाराजापुनर्भवः । द्वात्रिंशत्तुसमाभागः समाभागात्ततोनृपः २९ भ
विष्यतिसुतस्तस्य देवभूमिःसमादश । दशैतेक्षुद्रराजानो भोक्ष्यन्तीमांवसुन्धराम् ३०
शतंपूर्णंशतेद्वेच ततःशुङ्गान्गमिष्यति । अमात्योवसुदेवस्तु प्रसह्यह्यवनींनृपः ३१ दे
वभूमिमथोत्साद्य शौङ्गस्तुभवितानृपः । भविष्यतिसमाराजा नवकाण्वायनोनृपः ३२ भू
मिमित्रःसुतस्तस्य चतुर्दशभविष्यति । नारायणःसुतस्तस्य भविताद्वादशैवतु ३३ सुश
र्मातत्सुतश्चापि भविष्यतिदशैवतु । इत्येतेशुङ्गभृत्यास्तु स्मृताःकाण्वायनानृपाः ३४
चत्वारिंशद्द्विजाह्येते काण्वाभोक्ष्यन्तिवैमहीम् । चत्वारिंशत्पञ्चचैव भोक्ष्यन्तीमांवसुन्ध

कालमें संपूर्ण क्षत्रियोंका नाश करदेगा फिर महापद्मके पर्य्यायमें सुकल्प आदिक-आठ पुत्र होवेंगे फिर उन आठों के पाससे यह पृथ्वीसौ १०० बर्षमें मौर्यनामवाले राजाओंको प्राप्तहोगी उनमौर्योंमें शतधन्वानाम एक राजाहोगा उसके बराबर छःवर्षतक राज्यहोगा-फिर,वृहद्रथ राजा का पुत्रसत्तर वर्षतक राज्यकरेगा फिर छत्तीसवर्ष तक शकनाम राजा होगा उसका दौहित्र सत्तर बर्ष तक राज्य करेगा १८। २३ फिर दशरथनाम राजाहोगा उसका सप्ततिनाम पुत्रहोगा वह आठ बर्ष तकराज्यकरेगा इसप्रकार यह संपूर्ण मौर्यराजा एकसौसैंतीसवर्षतक राज्यकरेंगे-फिर शुंगनामवाले राजाहोंगे-पुष्य मित्र राजा का सेनापति वृहद्रथ बंशके राजाओं को मारकर छत्तीस वर्षतक राज्य करेगा २४। २६ फिर वसुज्येष्ठनाम राजा सातवर्षतक राज्यकरेगा और दशवर्ष सुमित्रनाम राजा होगा २७ फिर दोवर्षतक अन्तक और तीनबर्ष तक पुलिन्दकनाम राजाहोगा फिर बत्तीस वर्षतक वज्रमित्रनाम महाभागी राजाहोगा २८। २९ उसकापुत्र देवभूमि नामहोगा वह दश बर्षतक राज्य करेगा इस प्रकारसे यह दशक्षुद्र राजाहोंगे यह सब तीनसौ वर्षतक राज्य करेंगे इनकेपास वसुदेव नाममंत्री देवभूमि को मारकर राज्य छीनलेगा फिर नौ ९ काण्वायन नाम राजाहोंगे उस वसुदेव का पुत्र भूमिमित्र चौदहवर्षतक राज्य करेगा फिर इसका पुत्र नारायण बारह वर्ष तक राज्य करेगा ३०। ३३ फिर इस नारायणका पुत्र सुशर्मा दशवर्ष तक राज्यकरेगा-यह सब काण्वायन राजा

राम् ३५ एतेप्रणतसामन्ता भविष्याधार्मिकाश्चये । येषांपर्य्यायकालेतु भूमिरान्ध्रान्गमिष्यति ३६ ॥

इतिश्रीमत्स्यपुराणेएकसप्तत्यधिकद्विशततमोऽध्यायः २७१ ॥

(सूत उवाच) काण्वायनास्ततोभूपाः सुशर्माणःप्रसह्यताम् । शुङ्गानाञ्चैवयच्छेषं क्षपित्वातुबलीयसः १ शिशुकोन्ध्रःसजातीयः प्राप्स्यतींमांवसुन्धराम् । त्रयोविंशत्समाराजा शिशुकस्तुभविष्यति २ श्रीमल्लकर्णिर्भविता तस्यपुत्रस्तुवैदश । पूर्णोत्सङ्गस्ततोराजा वर्षाण्यष्टादशैवतु ३ पञ्चाशतंसमाःषट्च शान्तकर्णिर्भविष्यति । दशचाष्टौच वर्षाणि तस्यलम्बोदरःसुतः ४ आपीतकोदशद्वेच तस्यपुत्रोभविष्यति । दशचाष्टौचवर्षाणि मेधस्वातिर्भविष्यति ५ स्वातिश्चभविताराजा समास्त्वष्टादशैवतु । स्कन्दस्वातिस्तथाराजा सप्तैवतुभविष्यति ६ मृगेन्द्रस्वातिकर्णस्तु भविष्यतिसमास्त्रयः । कुन्तलःस्वातिकर्णस्तु भविताष्टौसमान्नृपः ७ एकसंवत्सरंराजा स्वातिवर्णोभविष्यति ८ भविता रिक्तवर्णस्तु वर्षाणिपञ्चविंशतिः । ततःसंवत्सरान्पञ्च हालोराजाभविष्यति ९ पञ्च मन्दुलकोराजा भविष्यतिसमान्नृपः । पुरीन्द्रसेनोभविता तस्मात्सौम्योभविष्यति १० सुन्दरःशान्तिकर्णस्तु अब्दमेकंभविष्यति । चकोरःस्वातिकर्णस्तु षण्मासान्वैभविष्यति ११ अष्टाविंशतिवर्षाणि शिवस्वातिर्भविष्यति । राजाचगौतमीपुत्रो ह्येकविंशत्यतोनृपः १२ अष्टाविंशतिसुतस्तस्य सुलोमावैभविष्यति । शिवश्रीर्वैसुलोमात्तु सप्तैवभविता

शुंगराजाओंके भृत्यकहातेहैं और सबब्राह्मणहैं और पैंतालीसबर्षतक राज्यकरेंगे यहसामनीतिवाले और धार्मिक राजाहोंगे-इनके अन्तमें यहपृथ्वी आन्ध्रनामवाले राजाओंको प्राप्तहोजावेगी ३४ । ३६ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायामेकसप्तत्यधिकद्विशततमोऽध्यायः २७१ ॥

सूतजीबोले-शुंगराजाओंमें जो बलवाला राजा रहैगा उसको अन्ध्रजातिवाला शिशुकराजा मारेगा फिर तेईस वर्षतक शिशुकराजाहोगा १ । २ फिर उसकापुत्र श्रीमल्लकर्णिहोगा वह दशबर्षतक राज्यकरेगा फिर पूर्णोत्संगनामराजा अठारह वर्षतक राज्यकरेगा ३ फिर छप्पन ५६ वर्षतक कर्णि नाम राजाहोगा, और उसकापुत्र लम्बोदर अठारह बर्ष राज्यकरेगा, उसकापुत्र आपीतकनाम राजा बीसवर्षतक राज्यकरेगा फिर मेधस्वातिनाम राजा अठारहबर्ष राज्यकरेगा ४ । ५ फिर स्वातिनाम राजाभी अठारह वर्ष राज्यकरेगा, फिर सातवर्षतक स्कन्दस्वातिनाम राजाहोगा तीन वर्षतक मृगेन्द्रस्वाति कर्णनाम राजाहोगा-फिर कुंतलस्वातिकर्ण राजा आठ वर्षतक रहैगा ६ । ७ फिर एक वर्ष स्वातिवर्णनाम राजाहोगा पच्चीस वर्षतक रिक्तवर्णनाम राजाहोगा और पांच वर्षतक हालनाम राजाहोगा ८ । ९ फिर पांच वर्षतक मंदुलक नाम राजाहोगा फिर पुरीन्द्रसेन, उसकापुत्र सौम्य, उसकापुत्र शान्तिकर्ण होगा वहएकही वर्ष राज्यकरेगा फिर चकोर और स्वातिकर्ण यहदोनों छः महीनोंतक राज्यकरेंगे फिर अट्ठाईस वर्षतक शिवस्वातिनाम राजाहोगा फिर इक्कीस वर्षतक गौतमीपुत्र राजाहोगा उसकापुत्र सुलोमानाम अठारह वर्षतक राज्यकरेगा, और सुलोमाकापुत्र

नृपः १३ शिवस्कन्धःशान्तिकर्णाद्भविताह्यात्मजःसमाः । नवविंशतिवर्षाणि यज्ञश्रीःशान्तिकर्णिकः १४ षड़ेवभवितातस्माद्विजयस्तुसमास्ततः । चण्डश्रीःशान्तिकर्णस्तु तस्य पुत्रःसमादश १५ सुलोमासप्तवर्षाणि अन्यस्तेषांभविष्यति । एकोनविंशतिर्ह्येते आन्ध्राभोक्ष्यन्तिवैमहीम् १६ तेषांवर्षशतानिस्युश्चत्वारिषष्टिरेवच । आन्ध्राणांसंस्थितताराज्ये तेषांभृत्यान्वयेनृपाः १७ सप्तैवान्ध्राभविष्यन्तिदशाभीरास्तथानृपाः । सप्तगर्दभिलाश्चापि शकाश्चाष्टादशैवतु १८ यवनाष्टौभविष्यन्ति तुषाराश्चचतुर्दश । त्रयोदश गुरुण्डाश्च हूणाह्येकोनविंशतिः १९ यवनाष्टौभविष्यन्ति सप्ताशीतिमहीमिमाम् । सप्त गर्द्दभिलाभूयो भोक्ष्यन्तीमांवसुन्धराम् २० सप्तवर्षसहस्राणि तुषाराणांमहीस्मृता । शतानित्रीण्यशीतिश्च शतान्यष्टादशैवतु २१ शतान्यर्द्धञ्चतुष्काणि भवितव्यास्त्रयोदश । गुरुण्डावृषलैःसार्धं भोक्ष्यन्तेम्लेच्छसम्भवाः २२ शतानित्रीणिभोक्ष्यन्ते वर्षाण्येकादशैवतु । आन्ध्राःश्रीपार्व्वतीयाश्च तेद्विपञ्चाशतंसमाः २३ सप्तषष्टिस्तुवर्षाणि दशाभीरास्तथैवच । तेषूत्सन्नेषुकालेन ततःकिलकिलानृपाः २४ भविष्यन्तीहयवना धर्मतःकामतोऽर्थतः । तैर्विमिश्राजनपदा आर्य्याम्लेच्छाश्चसर्वशः २५ विपर्ययेणवर्तन्ते क्षयमेष्यन्तिवैप्रजाः । लुब्धानृतब्रुवाश्चैव भवितारोनृपास्तथा २६ कल्किनानुहताःसर्वे आर्य्याम्लेच्छाश्चसर्वतः । अधार्मिकाश्चयेऽत्यर्थं पाषण्डाश्चैवसर्वशः २७ प्रणष्टेनृपवंशेतु सन्ध्याशिष्टेकलौयुगे । किञ्चिच्छिष्टाःप्रजास्तावै धर्मेनष्टेऽपरिग्रहाः २८ असाधवोह्यस

शिवश्री सातवर्षतक राज्यकरेगा १० । १३ फिर शिवस्कन्ध, शान्तिकर्ण, यज्ञश्री और शान्तिकर्णिक यहसब नौ वर्षतक राज्यकरेंगे १४ फिर विजयराजा छः वर्ष राज्यकरेगा इनमेंसे एक सुलोमानाम अन्यराजा सात वर्षतक रहैगा यह आन्ध्र संज्ञक राजा उन्नीस वर्षतक राज्यकरेंगे १५ । १६ भृत्योंसहित इनसब सातों आंध्रनाम राजाओंकी स्थिति एकसौ चालीस वर्षतक रहैगी इसकेपीछे दशअहीर राजाहोंगे- फिर सात गर्द्दभिलनाम राजाहोंगे, अठारह शकनामवाले राजाहोंगे, फिर आठयवन राजाहोंगे फिर चौदह तुषारनाम राजाहागे फिर तेरह गोरण्डनाम गोरे राजाहोंगे, फिर उन्नीस हूणनाम राजाहोंगे इनमें आठयवन तो सत्तासी वर्ष राज्यकरेंगे फिर मध्यमें सात गर्द्दभिलनाम राजाहोंगे १७ । २० और वह १४ तुषार नामवाले राजा सातहज़ार तीनसौअस्सी वर्षतक राज्य करेंगे और अठारहसौ पचास वर्षतक तेरहचतुष्कसंज्ञकनाम राजारहेंगे, फिर वह गुरुंड गोरे शूद्र म्लेच्छादिकोंके साथ तीनसौग्यारह वर्षतक राज्यकरेंगे और पहाड़ी आन्ध्रनाम राजा बावन ५२ वर्षतक राज्यकरेंगे २१ । २३ फिर दशआभीर राजा सड़सठ ६७ वर्षतक राज्यकरेंगे फिर कालके योगसे वहसब नष्ट होजांयगे तब किलकिलानाम वाले राजाहोंगे वह अर्थ धर्म और कामके आचरण करके म्लेच्छहोवेंगे उनसे मिलेहुए सब आर्य जनभी म्लेच्छहोजांयगे और सब विपरीत आचरण करेंगे तब प्रजानष्टहोजायगी सबराजा लोभी और मिथ्याबादी होजांयगे २४ । २६ कलियुगसे हतहुए सबही म्लेच्छहोजावेंगे तब अधर्मी और पापण्डी होजांयगे २७ राजाओं का बंश नष्टहोजा-

त्वाश्च व्याधिशोकेनपीड़िताः। अनावृष्टिहताश्चैव परस्परवधेप्सवः २९ अशरण्याः
परित्रस्ताः सङ्कटंघोरमाश्रिताः। सरित्पर्वतवासिन्यो भविष्यन्त्यखिलाःप्रजाः ३० पत्र
मूलफलाहाराश्चीरपत्राजिनाम्बराः। वृत्त्यर्थमभिलिप्सन्त्यश्चरिष्यन्तिवसुन्धराम् ३१
एवंकष्टमनुप्राप्ताः प्रजाःकालेयुगान्तके। निःशेषास्तुभविष्यन्ति सार्द्धंकलियुगेनतु ३२
क्षीणेकलियुगेतास्मिन् दिव्येवर्षसहस्रके। ससन्ध्यांशेसुनिःशेषे कृतंतुप्रतिपत्स्यते ३३
एवंवंशक्रमःकृत्स्नः कीर्त्तितोयोमयाक्रमात्। अतीतावर्त्तमानाश्च तथैवानागताश्चये
३४ महापद्माभिषेकात्तु यावज्जन्मपरीक्षितः। एवंवर्षसहस्रन्तु ज्ञेयंपञ्चाशदुत्तरम् ३५
पौलोमास्तुतथान्ध्रास्तु महापद्मान्तरेपुनः। अनन्तरंशतान्यष्टौ षट्त्रिंशत्तुसमास्तथा३६
तावत्कालान्तरंभाव्यमान्ध्रान्तादापरीक्षितः। भविष्यन्तेप्रसङ्ख्याताः पुराणज्ञैःश्रुतर्षिभिः
३७ सप्तर्षयस्तदाप्रांशु प्रदीप्तेनाग्निनासमाः। सप्तविंशतिभाव्यानामान्ध्राणान्तुयदा
पुनः ३८ सप्तर्षयस्तुवर्त्तन्ते यत्रनक्षत्रमण्डले। सप्तर्षयस्तुतिष्ठन्ति पर्य्यायेणशतंशतम्
३९ सप्तर्षीणामुपर्येतत् स्मृतंवैदिव्यसंज्ञया। समादिव्याःस्मृताषष्टिर्दिव्याब्दानितु
सप्तभिः ४० एभिःप्रवर्ततेकालो दिव्यःसप्तर्षिभिस्तुवै। सप्तर्षीणाञ्चयौपूर्वौ दृश्येतेह्युदितौ
निशि ४१ तयोर्मध्येतुनक्षत्रं दृश्यतेयत्समंदिवि। तेनसप्तर्षयोज्ञेया युक्ताव्योम्नि
शतंसमाः ४२ नक्षत्राणामृषीणाञ्च योगस्यैतन्निदर्शनम्। सप्तर्षयोमघायुक्ताः कालेपारिक्षिते
शतम् ४३ ब्राह्मणस्तुचतुर्विंशा भविष्यन्तिशतंसमाः। ततःप्रभृत्ययंसर्वोलोको

वेगा और कलियुगकी जब सन्धि शेषरहजावेगी तबकुछ बाकी बचीहुई प्रजा दुष्टहोजावेगी धर्म नष्ट
होजायगा व्याधि और शोकसे भी प्रजा महापीड़ित होजायगी फिर वर्षा न होनेसे परस्परमें मारने
कीइच्छा रक्खेंगे २८।२९ बनमें रहैंगे कोई रक्षाकरनेवाला न रहैगा तब घोर संकटमें प्राप्तहोकर सब
जन नदी और पर्व्वतोंपर बासकरेंगे पत्र मूल और फल इन्होंका आहार करेंगे पुराने फटे वस्त्र पत्र-
बक्कल और चर्म इन सबको ओढ़ैंगे भोजनकी इच्छा करतेहुए पृथ्वीपै विचरेंगे ३०।३१ ऐसे २ कष्ट
को प्राप्तहुई प्रजा चौथे युग कलियुगके अन्तमें संपूर्णनष्टहोजाती है और जब दिव्य हज़ार वर्षमें संन्ध्यांश
सहित संपूर्ण कलियुग नष्ट होजाताहै तब सत्ययुग प्राप्त होजाताहै ३२।३३ इस प्रकारसे मैंने
व्यतीत, वर्त्तमान और आगे होनेवाले संपूर्ण राजाओं के वंश क्रम पूर्व्वक कहदिये हैं ३४ और महापद्मराजाके
अभिषेकसे लेकर परीक्षितके जन्मतक संपूर्ण राजाओंके वंशकहे हैं सो इनकी संख्याका
एक हज़ार पचास वर्षका यह काल व्यतीत होताहै ३५ और पौलोम वा आन्ध्र यह दोनों राजाओं
के वंश महापद्मके अनन्तर आठसौ छत्तीस वर्षतक आन्ध्र पर्य्यन्त राजा होंगे यह सब पुराण के
जाननेवालोंने कहरक्खे हैं उस समय सप्तऋषि ज्वलित अग्निके समान तेजवाले दीखेंगे फिर जब
सत्ताईस २७ आन्ध्रराजा होलेंगे तब सप्तऋषि नक्षत्र मंडलमें स्थित दीखेंगे और इन सप्तऋषियों
के अनुसार काल प्रवर्त्तहोताहै और रात्रिके समय जो तारे सप्तऋषियोंसे पहलेदीखते हैं और जो
तारा समान नक्षत्रोंके बीचमें दीखताहै वहाँ यह सप्तऋषि आकाशमेंयुक्तहैं जब नक्षत्रोंका और सप्त-

ऽयापत्स्यतेभृशम् ४४ अनृतोपहतालुब्धा धर्मतःकामतोऽर्थतः । श्रौतस्मार्तेतिशिथिले
नष्टवर्णाश्रमेतथा ४५ शङ्करंदुर्बलात्मानःप्रतिपत्स्यन्तिमोहिताः।ब्राह्मणाःशूद्रयोनिस्थाः
शूद्रावैमन्त्रयोनयः ४६ उपस्थास्यन्तितान्विप्रास्तदर्थमभिलिप्सवः । क्रमेणैवचद्दश्यन्ते
स्ववर्णान्तरदायकम् ४७ क्षयमेवगमिष्यन्तिक्षीणशेषायुगक्षये । यस्मिन्कृष्णोदिवंयात
स्तस्मिन्नेवतदाहनि ४८ प्रतिपन्नंकलियुगंप्रमाणंतस्यमेशृणु । चतुःशतसहस्रन्तु वर्षाणां
वैस्मृतंबुधैः४९ चत्वार्यष्टसहस्राणिसंख्यातंमानुषेणतु। दिव्यंवर्षसहस्रन्तु तदासंख्याप्रव
र्तते ५० निःशेषेतुतदातस्मिन् कृतंवैप्रतिपत्स्यते । ऐलश्चेक्ष्वाकुवंशश्चसहदेवःप्रकीर्त्ति
ताः५१इक्ष्वाकोःसंस्मृतंक्षत्रं सुमित्रान्तंभविष्यति। ऐलंक्षत्रंसमाक्रान्तंसोमवंशविदोविदुः
५२एतेविवस्वतःपुत्राःकीर्तिताःकीर्तिवर्धनाः।अतीतावर्तमानाश्चतथैवानागताश्चये ५३
ब्राह्मणाःक्षत्रियावैश्यास्तथाशूद्राश्चवैस्मृताः । वैवस्वतेऽन्तरेतस्मिन्नितिवंशःसमाप्यते
५४देवापिःपौरवोराजा ऐक्ष्वाकोयश्चतेमतः। महायोगबलोपेतौ कलापग्राममाश्रितौ५५
एतौक्षत्रप्रणेतारौ नवविंशेचतुर्युगे। सुवर्चामनुपुत्रस्तु ऐक्ष्वाकाद्योभविष्यति ५६ नववि
शेयुगेसोवै वंशस्यादिर्भविष्यति । देवापिपुत्रःसत्यस्तु ऐलानांभवितानृपः ५७ क्षत्रप्रव
र्तकावेतौ भविष्येतुचतुर्युगे । एवंसर्वेषुविज्ञेयं सन्तानार्थन्तुलक्षणम् ५८ क्षीणेकलियुगे

ऋषियों का योग । अर्थात् मघानक्षत्रमें जब सप्तऋषि आवेंगे तब ब्रह्माजी के सौवर्ष पूरे होजाने का कालआजावेगा तवसे लेके यह संपूर्ण लोक नष्ट होने लगजाताहै उस समय सबलोग मिथ्यावादी और लोभीहोजावेंगे और संपूर्ण श्रुति और स्मृतियोंका धर्मनष्ट होजावेगा ३६।४५ सबलोग बर्णसंकरहोजांयगे ब्राह्मण शूद्रहोजावेंगे शूद्रबेदको पढ़नेलग जांयगे ४६ और उन्हीं शूद्ररूपी द्विजोंकी सब उपासना करेंगे फिर क्रम२ करके सबही शूद्रहोजावेंगे इसके अनन्तर युगके अन्त में शेषरहे हुए सब लोगभी नष्टहोजावेंगे-और जिस दिन श्रीकृष्णजी स्वर्गलोक को पधारे हैं उसी दिन और उसी समय कलियुगका प्रवेशहोगयाहै ४७।४८ उस कलियुगका प्रमाण सुनो कि मनुष्योंके चार लाख बत्तीसहज़ार वर्षोंका कलियुगका प्रमाणहै और इतनीही संख्या में दिव्य हजार बर्ष होते हैं यही कलिका प्रमाणहै ४९।५० इस प्रकारसे जब यह संपूर्ण कलियुग व्यतीत होजाताहै तब सत्य-युगका प्रवेशहोताहै तबहीं ऐल-इक्ष्वाकु और सहदेव यह इक्ष्वाकु बंशके राजा प्रवृत्तहोतेहैं यह बंश सुमित्र राजाके अन्तमें समाप्त होजाताहै इस ऐल राजाको सोम बंशमें प्राप्तहुआ कहते हैं और इसके सिवाय इक्ष्वाकु आदिक अन्यराजा विवस्वान् सूर्य्यके पुत्रहुएहैं इसी प्रकारसे व्यतीत-वर्त्तमान और आगे होनेवाले राजा और ब्राह्मण क्षत्रिय वैश्य शूद्र यह सब वर्णभी सनातन चलेआते हैं और देवापिनाम पौरवराजा और इक्ष्वाकु यह दोनों महायोग और बलसे युक्तहो उन्तीसवीं चौकड़ी में क्षत्रिय वंशके बढ़ानेवाले होंगे और सुवर्चानाम मनुका पुत्र इक्ष्वाकु वंशकी आदि में होगा यहभी उन्तीसवीं चौकड़ी में होगा और जो देवापिका पुत्र सत्यनाम होगा वह ऐल राजाओं के वंशको प्रवृत्तकरेगा ऐसे यह दोनों राजा अगले युगोंकी चौकड़ी में होकर क्षत्रिय वंशको प्रवर्त्त करेंगे इसी

चैव तिष्ठन्तीतिकृतेयुगे । सप्तर्षयस्तुतैःसार्द्धं मध्येत्रेतायुगेपुनः ५९ बीजार्थंवैभविष्यन्ति
ब्रह्मक्षत्रस्तुवैपुनः । एवमेवंतुसर्वेषु तिष्यान्तेष्वन्तरेषुच ६० सप्तर्षयोनृपैःसार्द्धं सन्ताना
र्थंयुगेयुगे । एवंक्षत्रस्यचोत्सेधः सम्बन्धोवैद्विजैःस्मृतः ६१ मन्वन्तराणांसन्ताने सन्ता
नाश्चश्रुतौस्मृताः । अतिक्रान्तयुगाश्चैव ब्रह्मक्षत्रस्यसम्भवाः ६२ यथाप्रशान्तिस्तेषां
वैप्रकृतीनांयथाक्षयः । सप्तर्षयोविदुस्तेषां दीर्घायुस्त्वंक्षयोदयौ ६३ एतेनक्रमयोगेन
ऐलाइक्ष्वाकवोनृपाः । उत्पद्यमानास्त्रेतायां क्षीयमाणाःकलौयुगे ६४ अनुयान्तियुगा
ख्यान्तुयावन्मन्वन्तरक्षयम् । जामदग्न्येनरामेण क्षत्रेनिरवशेषिते ६५ रिक्तेयंवसुधा
सर्वाक्षत्रियैर्वसुधाधिपैः । द्विवंशकरणंसर्वं कीर्तयिष्टेनिबोधमे ६६ ऐलञ्चेक्ष्वाकुवंशञ्च
प्रकृतिंपरिचक्षते । राजानःश्रेणिबद्धाश्च तथान्येक्षत्रियाभुवि ६७ ऐलवंशास्तुभूयां
सोनतथेक्ष्वाकवोनृपाः । एषामेकशतंपूर्णं कुलानामभिरोचते ६८ तावदेवतुभोजानां
विस्तराद्द्विगुणंस्मृतम् । भोजानांद्विगुणंक्षत्रं चतुर्द्धातद्यथातथम् ६९ तेह्यतीताः
सनामानो ब्रुवतस्तान्निबोधमे । शतंवैप्रतिविन्ध्यानां शतंनागाःशतंहयाः ७० शत
मेकंधार्तराष्ट्रा ह्यशीतिर्जनमेजयाः । शतंवैब्रह्मदत्तानां वीराणांकुरवःशतम् ७१ ततः
शतञ्चपञ्चालाः शतंकाशिकुशादयः । तथापरेसहस्रेद्वे येनीपाःशशविन्दवः ७२ इष्ट
वन्तश्चतेसर्वे सर्वेनियुतदक्षिणाः । एवंराजर्षयोऽतीताः शतशोऽथसहस्रशः ७३ मनोर्वै
वस्वतस्यासन् वर्तमानेऽन्तरेविभोः । तेषांतुनिधनोत्पत्तौ लोकसंस्थितयःस्थिताः ७४
नशक्योविस्तरस्तेषां सन्तानस्यपरस्परम् । तत्पूर्वापरयोगेन वक्तुंवर्षशतैरपि ७५

प्रकारसे यही दोनों सबोंकी सन्तानके निमित्त कलियुगके क्षीणहोने के पीछे सत्ययुग में ठहरते हैं और त्रेतायुगमें इन्हीं के साथ बीजके निमित्त सप्तऋषि भी जन्मलेते हैं इसी प्रकार युग२ के अन्तमें पुष्यनक्षत्र के अन्तरमें यह सप्तऋषि जब राजाओं के जन्मलेते हैं तब राजाओंका ब्राह्मणों के साथ संबंध होताहै ५१।६१ मन्वन्तरों के युगों के अन्तमें क्षत्रियोंके बंशको और ब्राह्मणोंकेबंश को बढ़ाने वाले सप्तऋषि होतेहैं यह सप्तऋषि संपूर्णप्रजाकी आयु नाश और उत्पत्तिकेजानने वाले हैं-इस प्रकारसे यह ऐलराजा और इक्ष्वाकु राजा त्रेतायुगमें उत्पन्न होते हैं फिर कलियुगमें क्षीण होजाते हैं मन्वन्तरके क्षयतक प्रसिद्ध रहते हैं और जमदग्निके पुत्र परशुरामजीने संपूर्ण क्षत्रीनष्ट करदिये तब इस पृथ्वीपर कोईक्षत्री नहीं रहाथा तब उनका बंश जैसेचलाथा उसको मुझसे सुनो ६२।६६ जब परशुरामके क्षयकरने के पीछे ऐल और इक्ष्वाकु बंशमें अन्य राजाओंकी श्रेणीइकट्ठी हुई है तब इनके सौपीढ़ियोंके जन प्रवर्त्तहुएहैं-औरभोजराजाओंका इनसेदूने विस्तारवालाबंशप्रवृत्त हुआहै फिर यह भोजवंशी राजालोगचार प्रकारकेहोगये हैं उनव्यतीतहोने वालों के नाम कहताहूं प्रतिबिंध्योंके सौ^{१००} बंश-नागकेसौ-^{१००} हयके-^{१००} ६७।७० धार्त्तराष्ट्रके^{१००} जनमेजयके अस्सी- शूरबीर ब्रह्मदत्तके-^{१००} कुरव^{१००} पांचोलं-काशिकुशं-^{२००} और दो हजार नीप और शशबिन्दव यह सब इष्ट वाले और उत्तम राजाहुए हैं यह सब दश २ लक्षकी दक्षिणा देने वालेथे ऐसे हजारों राजर्षि व्यतीत

अष्टाविंशसमाख्याता गतावैवस्वतेऽन्तरे। एतेदेवगणैःसार्द्धं शिष्टायेतान्निबोधत ७६ चत्वारिंशत्त्रयश्चैव भविष्यास्तेमहात्मनः। अवशिष्टायुगाख्यास्ते ततोवैवस्वतोह्ययम् ७७ एतद्वःकीर्तितंसम्यक् समासव्यासयोगतः। पुनर्वक्तुंबहुत्वात्तु नशक्यंविस्तरेणतु ७८ उक्ताराजर्षयोयेतु अतीतास्तेयुगैःसह। येतेययातिवंश्यानां येचवंशाविशाम्पते! ७९ कीर्तिताद्युतिमन्तस्तेय एतान्धारयेन्नरः। लभतेसवरान्पञ्च दुर्लभानिहलौकिकान् ८० आयुःकीर्तिंधनंस्वर्गं पुत्रवांश्चाभिजायते। धारणाच्छ्रवणाच्चैव परंस्वर्गस्यधीमतः ८१

इति श्रीमत्स्यपुराणेद्विसप्तत्याधिकद्विशततमोऽध्यायः २७२ ॥

(ऋषय ऊचुः) न्यायेनार्जनमर्थानां वर्द्धनञ्चाभिरक्षणम्। सत्पात्रप्रतिपत्तिश्च सर्वशास्त्रेषुपठ्यते १ कृतकृत्योभवेत्केन मनस्वीधनवान्बुधः। महादानेनदत्तेन तन्नोविस्तरतोवद २ (सूत उवाच) अथातःसम्प्रवक्ष्यामि महादानानुकीर्तनम्। दानधर्मेऽपियन्नोक्तं विष्णुनाप्रभविष्णुना ३ तदहंसम्प्रवक्ष्यामि महादानमनुत्तमम्। सर्वपापक्षयकरं नृणांदुःस्वप्ननाशनम् ४ यत्तत् षोड़शधाप्रोक्तं वासुदेवेनभूतले। पुण्यंपवित्रमायुष्यं सर्वपापहरंशुभम् ५ पूजितंदेवताभिश्च ब्रह्मविष्णुशिवादिभिः। आद्यन्तुसर्वदानानां तुलापुरुषसंज्ञकम् ६ हिरण्यगर्भदानञ्च ब्रह्माण्डंतदनन्तरम्। कल्पपादपदानञ्च गोसहस्रञ्चपञ्चमम् ७ हिरण्यकामधेनुश्च हिरण्याश्वस्तथैवच। हिरण्याश्वरथास्तद्वत् हे

होगये हैं इनसबके जन्ममरणके विस्तारको कोई सैकडों वर्षतकभी कहनेको समर्थनहीं है ७१।७५ यह अट्ठाईस राजा तो व्यतीत होकर वैवस्वतमनुके अन्तरमें देवतागणों के साथ स्वर्गलोकमें प्राप्त होगये हैं और तेंतालीस महात्मा राजा आगे होवेंगे इसप्रकारसे ययातिवंश में होनेवाले जो राजा व्यतीतहोगये हैं वहसब मैंने कहदिये-इन ययाति आदिक उत्तमराजाओंको जो धारण करता है वह इसलोकमें आगे कहेहुए उत्तम पांचवरोंको प्राप्तहोताहै ७६।८० अर्थात् इनके धारण करनेवाले को आयु-कीर्त्ति-धन-स्वर्ग और पुत्रकी प्राप्तिहोती है इनराजाओंके धारण करने वा सुनने से भी स्वर्गकी प्राप्तिहोती है ८१ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांद्विसप्तत्यधिकद्विशततमोऽध्यायः २७२ ॥

ऋषियोंने पूछाकि हे सूतजी द्रव्यको न्यायसे संचितकरना बढ़ाना और रक्षित करनाभीचाहिये और सत्पात्रकी प्राप्ति सब शास्त्रोंमें श्रेष्ठकही है १ सो धनवान् विद्वान पुरुष कौनसे महादानके देनेसे कृतकृत्यहोताहै इस बातको आप विस्तापूर्वक वर्णनकीजिये २ सूतजीबोले-कि अब मैं उस महादानका वर्णन करताहूं जोदान धर्म में भी विष्णुभगवान् ने नहीं कहाहै वह महागुह्यदान मनुष्योंके सबपाप और दुष्टस्वप्नोंका नाश करनेवाला है उसे सुनो ३।४ जो विष्णुभगवान्ने पृथ्वीपर सोलह प्रकारके दानकहे हैं उनसबमें आद्य-पुण्य-पवित्र-आयुवर्द्धन-सर्वपापनाशक ब्रह्मा विष्णु औरशिवादिक देवताओं से पूजित सब दानोंमें मुख्य पहला तुलापुरुष नाम महादान है ५। ६ दूसरा हिरण्यगर्भदान-तीसरा ब्रह्मांडदान-चौथा कल्पपादपदान-पांचवां गोसहस्रक-छठा हिरण्यकामधेनु-सातवाँ

महस्तिरथस्तथा ८ पञ्चलाङ्गलकंतद्वत् धरादानंतथैवच। द्वादशंविश्वचक्रन्तु ततःकल्पलतात्मकम् ९ सप्तसागरदानञ्च रत्नधेनुस्तथैवच । महाभूतघटस्तद्वत् षोड़शंपरिकीर्तितम् १० सर्वाण्येतानिकृतवान् पुराशम्वरसूदनः। वासुदेवस्तुभगवान् अम्बरीषोऽथभार्गवः ११ कार्तवीर्य्यार्जुनोनाम प्रह्लादःपृथुरेवच । कुर्युरन्येमहीपालाः केचिच्चभरताद्यः १२ यस्माद्विघ्नसहस्रेण महादानानिसर्वदा । रक्षन्तेदेवताःसर्वा एकैकमपिभूतले १३ एषामन्यतमंकुर्य्याद्वासुदेवप्रसादतः । नशक्यमन्यथाकर्तुमपिशक्रेणभूतले १४ तस्मादाराध्यगोविन्दमुमापतिविनायकौ । महादानमखंकुर्य्याद्विप्रैश्चैवानुमोदितः १५ एतदेवाहमनवे परिपृष्टोजनार्दनः । यथावदनुवक्ष्यामि शृणुध्वमृषिसत्तमाः! १६ (मनुरुवाच) महादानानियानीह पवित्राणिशुभानिच। रहस्यानिप्रदेयानि तानिमेकथयाच्युत! १७ (मत्स्य उवाच) यानिनोक्तानिगुह्यानि महादानानिषोड़श । तानितेकथयिष्यामि यथावदनुपूर्वशः १८ तुलापुरुषयागोऽयं येषामादौविधीयते। अयनेविषवेपुण्ये व्यतीपातेदिनक्षये १९ युगादिषूपरागेषु तथामन्वन्तरादिषु । संक्रान्तौवैधृतिदिनेचतुर्दश्यष्टमीषुच २० सितपञ्चदशीपर्व द्वादशीष्वष्टकासुच । यज्ञोत्सवविवाहेषु दुःस्वप्नाद्भुतदर्शने २१ द्रव्यब्राह्मणलाभेवा श्रद्धावायत्रजायते। तीर्थेवायतनेगोष्ठे कूपारामसरित्सुच २२ गृहेवायतनेवापि तड़ागेरुचिरेतथा। महादानानिदेयानि संसारभयभीरुणा २३ अनित्यंजीवितंयस्मात् वसुचातीवचञ्चलम्। केशेष्वेवगृहीतःसन् मृत्यु

हिरण्याश्व-आठवां हिरण्याश्वरथ-नवां हेमहस्तिरथ-दशवां पंचलांगलक-ग्यारहवांधरादान-बारहवां विश्वचक्र-तेरहवां कल्पलतात्मक-चौदहवां सप्तसागरक-पन्द्रहवां रत्नधेनुदान और सोलहवां महाभूतघट यह सोलहदान हैं इन सबोंको प्रथम प्रद्युम्न-श्रीकृष्ण-अंबरीष-सहस्राबाहु-प्रह्लाद-पृथु-और भरतादिक बहुत से राजा करतेभये ७।१२ इनसब दानों में से एक २ दानको सब देवता हज़ारों विघ्नोंसे रक्षित करते हैं १३ सोविष्णुभगवानकी कृपासे इन में से कोई एकभी बनजावेतो उस केफलको इन्द्रभी अन्यथानहीं करसक्ताहै १४ इसलिये विष्णु भगवान्काआराधनकर शिवजी समेत गणेशजीकोपूज ब्राह्मणोंकी आज्ञालेकर महादानोंका यज्ञकरना चाहिये १५ प्रथमयही प्रश्न विष्णु भगवान् से मनुजीनेभी कियाथा उसीकोमैंभी अपनी बुद्धिके अनुसार यथार्थता पूर्वक कहताहूं तुम चित्तसे श्रवण करो १६ मनुने पूछा हे भगवन् इसपृथ्वीपर जितने महादान हैं उनसबको आप मेरे आगेकहो १७ मत्स्यजी कहने लगे कि जो सोलहमहादान कहीं नहीं कहे हैं उनको मैं तेरे आगे यथार्थ क्रमसे कहताहूं १८ इन सबके पूर्वमें तुलापुरुष संज्ञक दानयज्ञ कहा है यह महादान समान दिनरात्रि- विषवकाल, व्यतीपातके दिन, युगादिनोंमें, ग्रहणोंमें, मन्वन्तरों के दिनोंमें, संक्रान्ति तथा वैधृति योगकेदिन, चतुर्दशी, अष्टमी, पूर्णिमा, द्वादशी, अष्टकयोग, यज्ञ उत्सव और विवाहमें दुःस्वप्न दर्शन में अथवा द्रव्य और ब्राह्मणके लाभमें वा श्रद्धामें तीर्थपर, देवमन्दिरमें, गौकेस्थान में कूप, वापी और तड़ागादिपर करनेकेयोग्यहै १९। २३ जीवनअनित्यहै धनचलायमान है, मृत्युस-

नाधर्ममाचरेत् २४ पुण्यांतिथिमथासाद्य कृत्वाब्राह्मणवाचनम्। षोड़शारत्निमात्रन्तु दशद्वादशवाकरान् २५ मण्डपंकारयेद्विद्वान् चतुर्भद्रासनंबुधः। सप्तहस्ताभवेद्वेदी मध्ये पञ्चकरातथा २६ तन्मध्येतोरणंकुर्य्यात् सारदारुमयंबुधः। कुर्य्यात्कुण्डानिचत्वारि चतुर्दिक्षुविचक्षणः २७ समेखलायोनियुतानिकुर्य्यात् सम्पूर्णकुम्भानिसहासनानि। सुताघपात्रद्वयसंयुतानि सयज्ञपात्राणिसुविष्टराणि २८ हस्तप्रमाणानितिलाज्यधूप पुष्पोपहाराणिसुशोभनानि। पूर्वोत्तरेहस्तामिताथवेदी ग्रहादिदेवेश्वरपूजनाय २९ अत्रार्चनंब्रह्मशिवाच्युतानां तत्रैवकार्य्यंफलमाल्यवस्त्रैः। लोकेशवर्णाःपरितःपताकामध्येध्वजः किङ्किणिकायुतःस्यात् ३० द्वारेषुकार्य्याणिचतोरणानि चत्वार्य्यपिक्षीरवनस्पतीनाम्। द्वारेषुकुम्भद्वयमत्रकार्य्यं स्रग्गन्धधूपाम्बररत्नयुक्तम् ३१ शालेङ्गुदीचन्दनदेवदारु श्रीपर्णिविल्वप्रियकाञ्चनोत्थम्। स्तम्भद्वयंहस्तयुगावखातं कृत्वादृढंपञ्चकरोच्छ्रितञ्च ३२ तदन्तरंहस्तचतुष्टयंस्यादथोदरङ्गश्चतदङ्गमेव। समानजातिश्चतुलावलम्ब्यां हैमेन मध्येपुरुषेणयुक्ता ३३ दैर्घ्येणसाहस्तचतुष्टयंस्यात् पृथुत्वमस्यास्तुदशाङ्गुलानि। सुवर्णपट्टाभरणातुकार्य्या सालोहपाशद्वयशृङ्खलाभिः ३४ युतासुवर्णेनतुरत्नमाला विभूषितामाल्यविलेपनाभ्याम्। चक्रंलिखेद्वारिजगर्भयुक्तं नानारजोभिर्भुविपुष्पकीर्णम् ३५ वि

दैववालोंको पकडेहीहुएहै ऐसीदशामें मनुष्यको धर्मका आचरण सदैव करना चाहिये २४ पुण्य पवित्र तिथिकेदिन ब्राह्मणोंसे स्वस्तिवाचन करवाकर दश वा बारहहाथ अथवा सोलह अरत्नियों का मंडप बनवावे (एकअरत्नि खुलीमुट्ठी अर्थात् हथेलीको कहतेहैं) विद्वान् पुरुष चतुर्भद्रासन मंडप बनवावे उसके सात वा पांच हाथकी वेदी बनवावे २५। २६ उसके मध्यमें उत्तमकाष्ठकी तोरणबनवावे और चारों दिशाओंमें चार कुंडबनावे सबकुंडोंमें मेखला बनावे और पूर्णकुंभोंसे संयुक्त करे फिर तांबेकेदो पात्रोंसमेत एकहाथ प्रमाणवाले यज्ञके विष्टरआदि पात्रोंको स्थापितकरे फिर उनको तिल घृत धूप और पुष्पादिकोंसे शोभितकरे इसके सिवाय ईशानकोणमें एकहाथके विस्तारकी ग्रहोंकीवेदी बनावे २७। २९ वहाँ ब्रह्मा विष्णु और शिव इनतीनोंका पूजनफल पुष्पादिसे करे, चारोंओर लोकपालोंके वर्णकी पताकाबनावे मध्यमें किंकिणी जालीसेयुक्त ध्वजाबनावे और द्वारपर दूधवाले पीपलआदि वृक्षोंकी चारतोरणबाँधे और मालावस्त्र और धूप इन्होंसे विभूषित कियेहुए कलशोंको स्थापितकरे और शाल इंगुदीवृक्ष चन्दन, देवदारु, सालवण, वेलपत्र और कचनार इतने वृक्षोंमेंसे किसीएक वृक्षके काष्ठके पांच २ हाथऊंचे और दो २ हाथ पृथ्वीमें गढ़ेहुए दोस्तंव बनावे ३०। ३२ फिर समान जातिवाला पुरुष तुलाकोबाँधे उसतुलाके मध्यमें सुवर्णके पुरुषको स्थापितकरे उसतुलानाम तराजूमें चारहाथ लंबीडंडी लगाकर पलडे दश २ अंगुलमोटे बनावे पलडोंमें सुवर्णकी पट्टी और आभूषण लगावे और दोनों ओरके पलड़ोंमें लोहेकी सांकल और उस बनवावे फिर सुवर्ण रत्नोंकीमाला पुष्प और चन्दन इन्होंसे तुलाको विभूषितकर उसमें कमलका चक्र लिखे और उसतुलाके नीचे पृथ्वीमें अनेक प्रकारकी रज और पुष्पोंको बखेरदेवे और तुला

नानंकश्चोपरिपञ्चवर्णं संस्थापयेत्पुष्पफलोपशोभम् । अथर्त्विजोवेदविदश्चकार्य्याः सुरूपवेशान्वयशीलयुक्ताः ३६ विधानदक्षाःपटवोऽनुकूला येचार्य्यदेशप्रभवाद्विजेन्द्राः । गुरुश्चवेदान्तविदार्य्यवंशसमुद्भवःशीलकुलाभिरूपः ३७ पुराणशास्त्राभिरतोऽतिदक्षः प्रसन्नगम्भीरसरस्वतीकः । सिताम्बरःकुण्डलहेमसूत्र केयूरकण्ठाभरणाभिरामः ३८ पूर्वेणऋग्वेदविदावथास्तांयजुर्विदौदक्षिणतश्चशस्तौ । स्थाप्यौद्विजौसामविदौतुपश्चादाथर्वणावुत्तरतस्तुकार्य्यौ ३९ विनायकादिग्रहलोकपाल वस्वष्टकादित्यमरुद्गणानाम् । ब्रह्माच्युतेशार्कवनस्पतीनां स्वमन्त्रतोहोमचतुष्टयंस्यात् ४० जप्यानिसूक्तानितथैवचैषा मनुक्रमेणापियथास्वरूपम् । होमावसानेकृततूर्य्यनादो गुरुर्गृहीत्वाबलिपुष्पधूपम् । आवाहयेल्लोकपतीन्क्रमेण मन्त्रैरमीभिर्यजमानयुक्तः ४१ एह्येहिसर्वामरसिद्धसाध्यै रभिष्टुतोवज्रधरोऽमरेशः । संवीज्यमानोऽप्सरसाङ्गणेन रक्षाध्वरन्नोभगवन्नमस्ते ४२ एह्येहि सर्वामरहव्यवाह ! मुनिप्रवीरैरभितोऽभिजुष्टः । तेजस्विनालोकगणेनसार्द्धं ममाध्वरंरक्षकवे ! नमस्ते ४३ एह्येहिवैवस्वतधर्मराज ! सर्वामरैरर्चितदिव्यमूर्ते ! । शुभाशुभानन्द शुचामधीश ! शिवायनःपाहिमखंनमस्ते ४४ एह्येहिरक्षोगणनायकस्त्वं सर्वैस्तुवेताल पिशाचसङ्घैः । ममाध्वरंपाहिशुभादिनाथ ! लोकेश्वरस्त्वंभगवन्नमस्ते ४५ एह्येहियादोगणवारिधीनाङ्गणेनपर्जन्यमहाप्सरोभिः । विद्याधरेन्द्रामरगीयमान ! पाहित्वमस्मान्न

काष्ठके ऊपर पांच रंगकी बन्दनवारबाँधे फिर वेदोंके ज्ञाता सुन्दररूप वेश और श्रेष्ठ स्वभावयुक्त सब विधानजाननेमें चतुर अनुकूल और आर्यदेशमें उत्पन्नहुए ऋषिक वा पुरोहित बनाने चाहिये और वेदान्तज्ञ आर्य वंशोद्भव पुराणशास्त्रज्ञ प्रसन्न गंभीर बोलनेवाला श्वेतवस्त्र, कुंडल, सुवर्णकी तागड़ीबाजूबन्द और कंठ भूषणादिसे शोभितहुए पुरुषको गुरूबनावे ३३। ३८ और पूर्वदिशामें ऋग्वेदकेज्ञाता दो ब्राह्मण बैठावे, दक्षिणमें यजुर्वेदके जाननेवाले, पश्चिम में सामवेदके ज्ञाता दो ब्राह्मणों को और उत्तरमें अथर्व वेदके जाननेवाले दो ब्राह्मणों को बैठावे फिर वह सब विद्वान् अपने २ कुंडोंमें अपने २ वेदके मंत्रोंसे गणेश ग्रह, लोकपाल, अष्टवसु, आदित्य, मरुद्गण, ब्रह्मा विष्णु शिव और सूर्य्य इन सबके अर्थ हवनकरें ३९। ४० फिर अनुक्रमसे इन सब देवताओं के सूक्त और मंत्रोंको जपैं हवनके अन्तमें वह पूर्वोक्त गुरु शंखभेरी आदिके शब्द करवाके पुष्प धूपादि से युक्तकीहुई बलियोंको ग्रहणकर क्रमपूर्वक मंत्रोंकरके लोकपालों का आवाहनकरे ४१ आवाहनमंत्रार्थ–हे सबदेवता समेत सिद्ध साध्यों से पूजित इन्द्र आप आइये, हे वज्रधारी अप्सरागणों से संवीज्यमान तुमको नमस्कार है आप हमारे यज्ञकी रक्षाकरिये ४२ हेअग्ने तुमआओ तुम मुनियोंसे सेवितहो आप तेज युक्त लोकगणों सहित होकर मेरे यज्ञकी रक्षाकरो मैं आपके अर्थ नमस्कार करताहूं ४३ हे धर्मराज आप आइये तुम सब देवताओं से पूजित दिव्य मूर्त्तिवाले होके शुभ अशुभ शोकादिकें पतिहो आप हमारे कल्याण के अर्थ इस यज्ञकी रक्षाकरिये आपको नमस्कारहै ४४ हे रक्षोगणनायक नैर्ऋते आप आओ संपूर्ण वेताल पिशाच भूत प्रेतादिकों से युक्तहोकर मेरे इस यज्ञकी रक्षाकरो आपके अर्थ नमस्कारहै ४५

गवन्नमस्ते ४६ एह्येहियज्ञेममरक्षणाय मृगाधिरूढःसहसिद्धसङ्घैः। प्राणाधिपःकालकवेःसहायः गृहाणपूजांभगवन्नमस्ते ४७ एह्येहियज्ञेश्वर ! यज्ञरक्षां विधत्स्वनक्षत्रगणेन सार्द्धम्। सर्वौषधीभिःपितृभिःसहैव गृहाणपूजांभगवन्नमस्ते ४८ एह्येहिविश्वेश्वर ! नस्त्रिशूल कपालखट्वाङ्गधरेणसार्द्धम्। लोकेशयज्ञेश्वरयज्ञसिद्ध्यै गृहाणपूजांभगवन्नमस्ते ४९ एह्येहिपातालधराधरेन्द्र ! नागाङ्गनाकिन्नरगीयमान !। यक्षोरगेन्द्रामरलोकसार्द्धमनन्त ! रक्षाध्वरमस्मदीयम् ५० एह्येहिविश्वाधिपते ! मुनीन्द्र ! लोकेनसार्द्धंपितृदेवताभिः। सर्वस्यधातास्यमितप्रभाव विशाध्वरन्नोभगवन्नमस्ते ५१ त्रैलोक्येयानिभूतानि स्थावराणिचराणिच। ब्रह्मविष्णुशिवैःसार्द्धं रक्षांकुर्वन्तुतानिमे ५२ देवदानवगन्धर्वा यक्षराक्षसपन्नगाः। ऋषयोमनवोगावो देवमातरएवच ५३ सर्वेममाध्वरेरक्षां प्रकुर्वन्तुमुदान्विताः।इत्यावाह्यसुरान्दद्यादृत्विग्भ्योहेमभूषणम् ५४ कुण्डलानिचहैमानि सूत्राणिकटकानिच। अङ्गुलीयपवित्राणि वासांसिशयनानिच ५५ द्विगुणंगुरवेदद्याद् भूषणाच्छादनानिच। जपेयुःशान्तिकाध्यायं जापकाःसर्वतोदिशम् ५६ तत्रोषितास्तुतेसर्व्वे कृत्वैवमधिवासनम्। आदावन्तेचमध्येच कुर्य्याद् ब्राह्मणवाचनम् ५७ ततोमङ्गलशब्देन स्नापि

हे वरुण आप आओ तुम जलोंके गण- समुद्र और पर्जन्य इन्हों से युक्त रहनेवाले अप्सरा- विद्याधर और देवताओं से स्तुतिकियेहुए हो आपके अर्थ नमस्कारहै आप हमारे यज्ञकी रक्षाकरो ४६ हेवायो तुम मेरी रक्षाके निमित्त इस यज्ञमें आओ पूजाको ग्रहणकरो और मृगपर चढ़ेहुए सिद्धों से युक्त प्राणाधिप कालके सहायक आपके अर्थ नमस्कार है ४७ हेयज्ञेश्वर चन्द्रमा आप नक्षत्रगणों सहित मेरे यज्ञमें आकर सर्वौषधी पितर और अमृत से युक्त होकर पूजा ग्रहणकरो और रक्षाकरो आपके अर्थ नमस्कारहै ४८ हेविश्वेश्वर महादेव पूजाकोग्रहणकरो तुम्हारेअर्थ नमस्कारहै हेलोकेश यज्ञेश्वर तुम यक्ष सिद्धादिसे युक्त त्रिशूल, कपाल और खट्वाङ्ग धारणकरके मेरी रक्षाकरो और पूजा ग्रहणकरो आपको नमस्कार है ४९ हेअनन्त पाताल धराधरेन्द्र नागोंकी स्त्री और किन्नरों से पूजित यक्ष उरग आदिकों से युक्त होकर मेरी पूजाको ग्रहणकरो आपको नमस्कारहै ५० हेविश्वाधिपते तुम पितृ देवतादिकों से युक्त मेरे यज्ञमें प्राप्तहो और सबके रचनेवाले हो हे भगवन् और हेब्रह्मन् आपको नमस्कार है ५१ त्रिलोकी में जितने स्थावर जंगमादिक भूतहैं वह सब ब्रह्मा विष्णु और शिवआदिकों से युक्त होकर मेरी रक्षाकरो ५२ और देव, दानव,यक्ष, गन्धर्व,पन्नग,राक्षस, ऋषि, मनुष्य, गौ और देवमातर यह सब आनन्द से युक्त हो मेरे यज्ञमें मेरी रक्षाकरो, इस प्रकारसे सब देवताओं का आवाहन करके ऋत्विगोंके अर्थ सुवर्णके आभूषण देवे ५३।५४ कुंडल, सुवर्णकीतागड़ी, कड़ूले, अंगूठी, पवित्र वस्त्र, और शय्या यह सब देवे और इन सबसे दूनी दक्षिणा गुरुके निमित्त देवे और सबदिशाओं में बैठेहुए जपकरनेवाले ब्राह्मण लोग शान्तिकाध्याय जपें ५५।५६ उपवास करनेवाले ब्राह्मण लोगोंको वहाँ यह सब विधानकरना योग्यहै और आदिमध्य तथा अन्तमें ब्राह्मणों को स्वस्तिवाचनकरनाभी योग्यहै ५७ फिर मंगल शब्द करके वेदके मंत्रोंकरके ब्राह्मणों से अपना स्नानकरवा

तोवेदपुङ्गवैः । त्रिःप्रदक्षिणमावृत्य गृहीतकुसुमाञ्जलिः ५८ शुक्लमाल्याम्बरोभूत्वा तांतु
लामभिमन्त्रयेत् । नमस्तेसर्वदेवानां शक्तिस्त्वंसत्यमास्थिता ५९ साक्षिभूताजगद्धात्री
निर्मिताविश्वयोनिना । एकतःसर्वसत्यानि तथानृतशतानिच ६० धर्माधर्मकृतांमध्ये स्था
पितासिजगद्धिते । त्वंतुले ! सर्वभूतानां प्रमाणमिहकीर्तिता ६१ मांतोलयन्तीसंसारादु
द्धरस्वनमोऽस्तुते । योऽसौतत्वाधिपोदेवः पुरुषःपञ्चविंशकः ६२ सएकोऽधिष्ठितोदेवि !
त्वयितस्मान्नमोनमः । नमोनमस्तेगोविन्द ! तुलापुरुषसंज्ञक ६३ त्वंहरे ! तारयस्वा
स्मान्नस्मात्संसारकर्दमात् । पुण्यकालंसमासाद्य कृत्वैवमधिवासनम् ६४ पुनःप्रदक्षि
णांकृत्वा तुलामारोहयेद्बुधः । सखड्गचर्मकवचः सर्वाभरणभूषितः ६५ धर्मराजमथादा
य हैमंसूर्य्येणसंयुतम् । कराभ्यांबद्धमुष्टिभ्यामास्तेपश्यन्हरेर्मुखम् ६६ ततोऽपरेतुला
भागे न्यसेयुर्द्विजपुङ्गवाः । समादभ्यधिकंयावत् काञ्चनंचातिनिर्मलम् ६७ पुष्टिकाम
स्तुकुर्वीत भूमिसंस्थंनरेश्वरः । क्षणमात्रंततःस्थित्वा पुनरेवमुदीरयेत् ६८ नमस्तेसर्व
भूतानां साक्षिभूते ! सनातनि ! । पितामहेनदेवित्वं निर्मितापरमेष्ठिना ६९ त्वयाधृतंज
गत्सर्वं सहस्थावरजङ्गमम् । सर्वभूतात्मभूतस्थे ! नमस्तेविश्वधारिणि ७० ततोऽवती
र्य्यगुरवे पूर्वमर्द्धंनिवेदयेत् । ऋत्विग्भ्योपरमर्धन्तु दद्यादुदकपूर्वकम् ७१ गुरवेग्रामर

के तीन प्रदक्षिणापूर्वक पुष्पोंकी अंजली ग्रहणकर श्वेतमाल और वस्त्रोंकोपहर उस तुलाको अभिमंत्रितकरे
और कहे कि हेतुले तुम सब देवताओं की शक्ति हो आपके अर्थ नमस्कारहै ५८।५९
तुम सबकी साक्षी जगद्धात्री और ब्रह्माजी से रचीहुई हो तुम्हारे एक ओर को संपूर्ण सत्य स्थितहैं
तुही धर्म और अधर्म करनेवालोंके बीच में स्थितहै हेतुले तुम सबका प्रमाण करनेवाली हो६०।६१
आप मुझको तोलती हुई संसार रूपी सागर से मुझे पार उतारो आप के अर्थ नमस्कार है और हे
देवि जो चौबीस तत्त्वोंका अधिपति पंचविंशतिक पुरुष है सो तुझमेंही स्थित है इसलिये तुझको
नमस्कार है--हेतुलापुरुषसंज्ञक गोविन्द तुमको नमस्कार है हे हरे तुम मुझको इस संसाररूपी
कीच से पार उतारो इसप्रकारसे अधिवासन करे ६२।६४ फिर प्रदक्षिणा करके खड्ग चर्म और
आभूषण धारण करके उस तुलामें स्थित होवे ६५ उसमें बैठेहुए सुवर्णसे बनाई हुई धर्मराज की
मूर्त्तिको और हेम पुरुषको हाथों की मुट्ठी बाँधकर दोनों भुजाओं से उठावे और इस मूर्त्ति उठाने के
समय हरि भगवान् की मूर्त्तिके मुखकी ओर देखतारहै फिर उत्तम ब्राह्मण लोग उस यजमान को
एक ओर तराजूके दूसरे पलड़ेमें बैठादेवें फिर पुष्टिकी कामना करनेवाला राजा अपने तुल्य प्रमाण
से भी अधिक सुवर्ण को पृथ्वी में रखकर क्षणमात्र स्थित होके इस वचनका उच्चारण करे कि हे देवि
तू सब भूतोंकी साक्षी रूपहै इसलिये तुझे नमस्कार है तुमको प्रथम ब्रह्माजी ने रचा है और तुझी
से यह स्थावर जंगम सब जगत् धारण होरहा है तू सब भूतोंकी आत्मभूत है विश्वको धारण करने
वाली है ऐसाकह उस तुलामें से उतर के उस सपूर्ण धनमें से आधा धन तो गुरुके अर्थ देदेवे और
आधेधन को संकल्प करके ऋत्विजों के अर्थ दानकरदे और उन्हों की आज्ञा पाकर उस धनके कुछ

त्नानि ऋत्विग्भ्यश्चनिवेदयेत्। प्राप्यतेषामनुज्ञांतु तथान्येभ्योऽपिदापयेत् ७२ दीना
नाथविशिष्टादीन् पूजयेद्ब्राह्मणैःसह। नचिरंधारयेद्गेहे सुवर्णंप्रोक्षितंबुधः ७३ तिष्ठद्भ
यावद्भयंयस्माच्छोकव्याधिकरंनृणाम्। शीघ्रंपरस्वीकरणाच्छ्रेयःप्राप्नोतिमानवः ७४ अनेन
विधिनायस्तु तुलापुरुषमाचरेत्। प्रतिलोकाधिपस्थाने प्रतिमन्वन्तरंवसेत् ७५ विमा
नेनार्कवर्णेन किङ्किणीजालमालिना। पूज्यमानोऽप्सरोभिश्च ततोविष्णुपुरंव्रजेत्। क
ल्पकोटिशतंयावत्तस्मिन्लोकेमहीयते ७६ कर्मक्षयादिहपुनर्भुविराजराजो भूपालमौलि
मणिरञ्जितपादपीठः। श्रद्धान्वितोभवतियज्ञसहस्रयाजी दीप्तप्रतापजितसर्वमहीपलो
कः ७७ योदीयमानमपिपश्यतिभक्तियुक्तः कालान्तरेस्मरतिवाचयतीहलोके। योवा
शृणोतिपठतीन्द्रसमानरूपः प्राप्नोतिधामसपुरन्दरदेवजुष्टम् ७८॥

इतिश्रीमत्स्यपुराणेत्रिसप्तत्यधिकद्विशततमोऽध्यायः २७३॥

(मत्स्य उवाच) अथातःसम्प्रवक्ष्यामि महादानमनुत्तमम्। नाम्नाहिरण्यगर्भाख्यं
महापातकनाशनम् १ पुण्यंदिनमथासाद्य तुलापुरुषदानवत्। ऋत्विग्मण्डपसम्भार
भूषणाच्छादनादिकम् २ कुर्य्यादुपोषितस्तद्वल्लोकेशावाहनंबुधः। पुण्याहवाचनंकृत्वात
द्वत्कृत्वाधिवासनम् ३ ब्राह्मणैरानयेत्कुम्भं तपनीयमयंशुभम्। द्विसप्तत्यंगुलोच्छ्रायंहे
मपङ्कजगर्भवत् ४ त्रिभागहीनविस्तारमाज्यक्षीराभिपूरितम्। दशास्त्राणिचरत्नानिदा

भाग को अन्यों के अर्थ भी बाँट देवे ६६। ७२ दीन–अनाथ–उत्तम शिष्ट पुरुष और ब्राह्मण इन
सबका पूजनकरे और संकल्प किये हुए इस तुलादान के सुवर्ण को बुद्धिमान् पुरुष बहुत देरतक घर
में नहीं रक्खे–ऐसे धनको जो बहुत दिनतक घरमें रक्खे तो उस मनुष्यके भय शोक और व्याधि
उत्पन्न होती है और शीघ्रही अन्योंको बाँट देवे तो परमकल्याण होता है ७३। ७४ इस विधि से
जो पुरुष तुला दान करते हैं वह एक २ मन्वन्तर में एक २ लोकेशके स्थानमें वास करते हैं ७५
इस तुला दानका करनेवाला सूर्य्यके समान कान्तियुक्त किंकिणी जाली और मालाओंसे विभूषित
विमान में बैठ अप्सराओं से पूजित होकर विष्णुलोक में प्राप्तहोताहै और किरोड़ों कल्पोंतक वहां
वासकरताहै ७६ फिर क्षीण पुण्य होनेपर यहां पृथ्वी लोकमें जन्मलेकर संपूर्ण राजाओं का शिरोम-
णिराजा होताहै और श्रद्धायुक्त होकर हज़ारों यज्ञकरके अपनेप्रतापसे संपूर्णराजाओंको जीतलेताहै
और जो अन्यके दियेहुए भी इस दानको भक्ति से देखकर कालान्तर में स्मरण करता है अथवा
अन्योंको सुनाताहै वा इस विधिको पढ़तासुनताहै वह भी इन्द्रसे सेवित कियेहुए स्वर्ग लोक में प्राप्त
होता है ७७। ७८॥ इति श्री मत्स्यपुराणभाषाटीकायांत्रिसप्तत्यधिकद्विशततमोऽध्यायः २७३॥

मत्स्यजी बोले–अब उत्तम हिरण्यगर्भनाम वाले महापातकनाशक महादान को कहते हैं १
पुण्य पवित्र दिनमें तुला पुरुष दान के सदृश ऋत्विग् मण्डप–सामग्री–भूषण और आच्छादन
आदिको संचितकरे–पूर्वकेही समान उपवास व्रत करके लोकपालों का आवाहनकरे फिर पुण्या-
हवाचन करवाकर अधिवासन करवावे–फिर ब्राह्मणों करके सुन्दर शुभ सुवर्णके कलशको मँगवावे

त्रींसूचींतथैवच ५ हेमनालंसपिठकं वहिरादित्यसंयुतम् । तथैवावरणंनाभेरुपवीतञ्चका
ञ्चनम् ६ पार्श्वतःस्थापयेत्तद्वत् हैमदण्डकमण्डलू । पद्माकारंपिधानंस्यात् समन्तादं
गुलादिकम् ७ मुक्तावलीसमोपेतं पद्मरागसमन्वितम् । तिलद्रोणोपरिगतंवेदिमध्येऽव्य
वस्थितम् ८ ततोमङ्गलशब्देन ब्रह्मघोषरवेणच । सर्वौषध्युदकस्नानस्नापितोवेदपुङ्ग
वैः ९ शुक्लमाल्याम्बरधरः सर्वाभरणभूषितः । इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः १०
नमोहिरण्यगर्भाय हिरण्यकवचायच । सप्तलोकसुराध्यक्ष जगद्धात्रेनमोनमः ११ भूर्लो
कप्रमुखालोकास्तवगर्भेऽव्यवस्थिताः । ब्रह्मादयस्तथादेवाः नमस्तेविश्वधारिणे १२ न
मस्तेभुवनाधार ! नमस्तेभुवनाश्रय ! । नमोहिरण्यगर्भाय गर्भेयस्यपितामहः १३ यत
स्त्वमेवभूतात्मा भूतेभूतेऽव्यवस्थितः । तस्मान्मामुद्धराशेष दुःखसंसारसागरात् १४ एव
मामन्त्र्यतन्मध्यमाविश्यास्तउदङ्मुखः । मुष्टिभ्यांपरिसंगृह्य धर्मराजचतुर्मुखौ १५ जानु
मध्येशिरःकृत्वा तिष्ठेदुच्छ्वासपञ्चकम् । गर्भाधानंपुंसवनं सीमन्तोन्नयनंतथा १६ कुर्युर्हि
रण्यगर्भस्य ततस्तेद्विजपुङ्गवाः। गीतमङ्गलघोषेण गुरुरुत्थापयेत्ततः १७ जातकर्मादिकाः
कुर्युः क्रियाःषोडशचापराः । सूच्यादिकञ्चगुरवे दद्यान्मन्त्रमिमंजपेत् १८ नमोहिरण्यग

वह बहत्तर अंगुल ऊंचा सुवर्ण कमलके गर्भ के समान तीन भागमें विस्ताररहित घृत और दूधसे भरा हुआ दश अस्त्र–रत्न-दरांती सूई-सुवर्ण की नाली और पिटारी इन सबको उसके भीतर भरकर बाहरकीओर सूर्य्यकी मूर्त्तिसे युक्तकरे फिर नाभिको ढककर सुवर्णका यज्ञोपवीत पहिरावे २–६ उस हिरण्यगर्भ कलशके बराबर में सुवर्णका दंड और कमंडलु स्थापितकरे फिर इसको एकअंगुल ऊंचे कमलके आकारके समान वस्त्रसे ढकदेवे और मोतियोंकी लड़ी वा पुखराज रत्नको स्थापित करे फिर एकद्रोणभर तिलोंको अर्थात् ३२ सेर तिलोंको वेदीकेऊपर स्थापितकर हिरण्यगर्भ कलशको वस्त्र सहित स्थापितकरै ७। ८ तदनन्तर मंगलशब्द करके और ब्राह्मणों से वेदकापाठकरवा सर्वौषधीके जलसे यजमान स्नान करके श्वेतमाला, वस्त्र और भूषणोंको धारणकरे फिर पुष्पांजली लेकर इसमंत्रका उच्चारणकरे ९–१० हिरण्यगर्भयुक्त हिरण्यकवचवाले सप्तलोक वा देवताओं के अधिपति और जगद्धाता ऐसेविष्णु भगवान्के अर्थ नमस्कारहै ११ हेदेव भूलोकआदि सबलोक तुम्हारे गर्भमें स्थितहैं और ब्रह्मादिक देवताभी तुम्हारे गर्भमें स्थितहैं आप विश्वके धारण करनेवाले हो ऐसे आपके अर्थ नमस्कारहै १२ हे भुवनाधार भुवनाश्रय जो कि आपकेगर्भमें पितामह ब्रह्माजी ठहरतेहैं ऐसे आपके अर्थ नमस्कारहै १३ तुमही भूतात्मा और सबभूतोंमें पृथक् २ स्थितहो इसी से संसाररूपी सबदुःखोंको आपहरिये १४ ऐसेआमंत्रितकर फिर उस हिरण्यगर्भ के मध्यमें प्रवेश कर उत्तरको मुखकरके धर्मराज और ब्रह्माकी मूर्त्तिको हाथोंकी मुट्ठियोंमें पकड़लेवे और घोंटुओंके मध्यमें शिरकरके पांचऊंचे श्वरलेवे फिर वह उत्तम वेदपाठी ब्राह्मण उस हिरण्यगर्भका गर्भाधान, पुंसवन, और सीमन्तादिक कर्मकरे फिर गुरु ब्राह्मण गीतमंगल शब्दपूर्वक यजमानका उत्थापन करे १५। १७ पीछेजातकर्मादि सोलहकर्मोंकोकरे और वह यजमान उन सूईआदि वस्तुओंकोगुरु

र्भाय विश्वगर्भायवैनमः। चराचरस्यजगतो गृहभूतायवैनमः १९ यथाहंजनितःपूर्वमर्त्यधर्मासुरोत्तम!। त्वद्गर्भसम्भवादेष दिव्यदेहोभवाम्यहम् २० चतुर्भिःकलशैर्भूयःततस्तेद्विजपुङ्गवाः। स्नापयेयुःप्रसन्नागाः सर्वाभरणभूषिताः २१ देवस्यत्वेतिमन्त्रेण स्थितस्यकनकासने। अद्यजातस्यतेऽङ्गानि अभिषेक्ष्यामहेवयम् २२ दिव्येनानेनवपुषाचिरं जीवसुखीभव। ततोहिरण्यगर्भंतन्तेभ्योदद्याद्विचक्षणः २३ तेपूज्याःसर्वभावेन बहवो वातदाज्ञया। तत्रोपकरणंसर्वंगुरवेविनिवेदयेत् २४ पादुकोपानहच्छत्र चामरासनभाजनम्। ग्रामंवाविषयंवापि यदन्यदपिसम्भवेत् २५ अनेनविधिनायस्तु पुण्येऽहनिनिवेदयेत्। हिरण्यगर्भदानंस ब्रह्मलोकेमहीयते २६ पुरेषुलोकपालानां प्रतिमन्वन्तरंवसेत्। कल्पकोटिशतंयावद् ब्रह्मलोकेमहीयते २७ कलिकलुषविमुक्तःपूजितःसिद्धसाध्यैरमरचमरमालाबीज्यमानोप्सरोभिः। पितृशतमथबन्धून् पुत्रपौत्रान्प्रपौत्रान्अपिनरकनिमग्नांस्तारयेदेकएव २८ इतिपठतियइत्थंयःशृणोतीहसम्यक् मधुरिपुरिवलोकेपूज्यतेसोऽपिसिद्धैः।मतिमपिचजनानां योददातिप्रियार्थंविबुधपतिजनानांनायकःस्यादमोघम् २९॥

इतिश्रीमत्स्यपुराणेचतुःसप्तत्यधिकद्विशततमोऽध्यायः २७४॥

के निमित्त देकर इस मंत्रका उच्चारणकरे १८ हिरण्यगर्भ विश्वगर्भ और चराचर जगत्‌के घररूप आपको नमस्कारहै १९ हे देव जैसे आपने प्रथम मर्त्य धर्मवाला मुझको उत्पन्नकियाहै वैसेही अब आपके गर्भसे उत्पन्नहोनेके कारण मैं दिव्यदेहवाला होजाऊं २० इसके पीछे वह ब्राह्मण संपूर्ण आभूपणोंसे विभूषित होके चार कलशोंसे यजमानको स्नान करवावे अर्थात् सुवर्णके आसनपर बैठाकर देवस्यत्वा सविता० इसमंत्रसे स्नानकरवावे और ऐसा कहैकि अब उत्पन्नहुए तेरे अंगोंकाहम अभिषेक करेंगे २१।२२ तुम इस दिव्यशरीरकरके बहुत कालतक जीतेहुए सुखीरहो फिर उसहिरण्यगर्भको ऋत्विग् ब्राह्मणोंके अर्थ देदेवे २३ वह ऋत्विग् थोड़ेहों या बहुतहों सबको पूजे और सामग्री की सब वस्तुगुरुको निवेदनकरे २४ और खड़ाऊं, जूती जोड़ा, छत्री, चँवर, आसन, पात्र ग्राम और देश इनमेंसे शक्तिके अनुसार जिन २ वस्तुओंकी श्रद्धा देनेकी हो उनकाही दानकरे २५ इस पूर्व्वोक्त विधिसे जो पुरुष इस हिरण्यगर्भ नामवाले दानको पवित्र दिनमें करेगा वह ब्रह्मलोकमें प्राप्तहोगा २६ और मनु २ के अन्तरमें एक २ लोकपालोंके लोकों में क्रमपूर्व्वक वासकरके किरोड़ों कल्पों तक २७ कलियुगके पापोंसे छुटाहुआ सिद्ध साध्योंसे पूजित अप्सरागणोंसे सेवित होकर बड़े आनन्दपूर्व्वक ब्रह्मलोकमें वासकरेगा यह पुरुष अपने सैकड़ों पितर भाई बन्धु पुत्र पौत्रादिकोंकाभी अकेलाही उद्धार करनेवाला होताहै २८ इस दानको जो पढ़ताहै वा सुनता है वह विष्णुलोक में प्राप्त होताहै और जो पुरुष इस दानकरनेकी किसीको अनुमति देताहै वहभी स्वर्गलोक में देवताओंका पति इन्द्र होता है २९॥

इतिश्रीमत्स्यपुराणभाषाटीकायांचतुःसप्तत्यधिकद्विशततमोऽध्यायः २७४॥

(मत्स्य उवाच) अथातःसम्प्रवक्ष्यामि ब्रह्माण्डविधिमुत्तमम्। यच्छ्रेष्ठंसर्वदानानां महापातकनाशनम् १ पुण्यंदिनमथासाद्य तुलापुरुषदानवत्। ऋत्विग्मण्डपसम्भारभूषणाच्छादनादिकम् २ लोकेशावाहनंकुर्य्यादधिवासनकंतथा। कुर्य्याद्विंशपलादूर्ध्वमासहस्राच्चशक्तितः ३ कलशद्वयसंयुक्तं ब्रह्माण्डंकाञ्चनंबुधः। दिग्गजाष्टकसंयुक्तं षड्वेदाङ्गसमन्वितम् ४ लोकपालाष्टकोपेतं मध्यस्थितचतुर्मुखम्। शिवाच्युतार्कशिखरमुमालक्ष्मीसमन्वितम् ५ वस्वादित्यमरुद्गर्भं महारत्नसमन्वितम्। वितस्तेरंगुलशतं यावदायामविस्तरम् ६ कौशेयवस्त्रसंवीतं तिलद्रोणोपरिन्यसेत्। तथाष्टादशधान्यानि समन्तात्परिकल्पयेत् ७ पूर्वेणानन्तशयनं प्रद्युम्नंपूर्वदक्षिणे। प्रकृतिंदक्षिणेदेशे सङ्कर्षणमतःपरम् ८ पश्चिमेचतुरोवेदाननिरुद्धमतःपरम्। अग्निमुत्तरतोहैमं वासुदेवमतःपरम् ९ समन्ताद् गुडपीठस्थानर्चयेत्काञ्चनान्बुधः। स्थापयेद्वस्त्रसंवीतान् पूर्णकुम्भान्दशैवतु १० दशैवधेनवोदेयाः सहैमाम्बरदोहनाः। पादुकोपानहच्छत्र चामरासनदर्पणैः। भक्ष्यभोज्यान्नदीपेक्षुफलमाल्यानुलेपनैः ११ होमाधिवासनान्तेचस्नापितोवेदपुङ्गवैः। इममुच्चारयेन्मंत्रंत्रिःकृत्वाथप्रदक्षिणम् १२ नमोऽस्तुविश्वेश्वर!विश्वधाम!जगत्सवित्रेभगवन्नमस्ते। सप्तर्षिलोकामरभूतलेश ! गर्भेणसार्द्धंवितराभिरक्षाम् १३ येदुःखितास्तेसुखिनोभवन्तु

मत्स्यजीबोले-कियह दान महापातकों का नाश करनेवाला और सब दानों में श्रेष्ठहै १ इसके अनन्तर तुलापुरुष दानके सदृश ऋत्विक्-मंडप और आभूषणादिक सामग्रियोंको इकट्ठीकरके पवित्र दिनमें लोकपालोंका आवाहनकरे और अधिवासनकरे-बुद्धिमान् पुरुष २० पलसे ऊपर हज़ार पलतक अपनी शक्तिके अनुसार सुवर्णका ब्रह्मांड बनवावे यह ब्रह्माण्ड दोकलशोंसे युक्तहोकर बनता है और (पलचारतोलेकाहोताहै) इस ब्रह्माण्डके चारों ओर आठदिग्गज हाथी और छःवेदांग शास्त्र इनको स्थापित करे २।४ उस ब्रह्मांडके चारमुख बनाकर उसके चारोंओर अष्टलोकपालोंकी मूर्त्ति बनाकर शिव विष्णु-सूर्य्य-पार्वती और लक्ष्मी इनकीभी मूर्त्तियोंसे संयुक्तकरे औरवसु आदित्य और मरुद्गण इनको गर्भमें स्थापितकरे उस ब्रह्माण्डकी लंबाई एक बिलस्तसे लेकर सौअंगुलतककी करके रेशमी वस्त्रसे ढक उसको ३२ सेर तिलोंपर स्थापित करदे फिर उसकेचारों ओर आठधातु धरदे ५।७ पूर्व्वकी ओर अनन्त भगवान्की शय्या-दक्षिणमें प्रद्युम्नजीकी शय्या और दक्षिणही में माया-तथा संकर्षण नाम बलदेवजी की मूर्त्तिबनादे- पश्चिम में चारों वेदोंसमेत अनिरुद्धको स्थापितकरे-उत्तरमें अग्निकी मूर्त्ति और स्वर्णमयी वासुदेव भगवान्की मूर्त्ति स्थापितकरे ८।९ उसके चारों ओर दशसुवर्णके पूर्ण कलश स्थापितकरे और उनपर गुडधरकर कसूमे वस्त्र ढकदे और पूजनकरे और सुवर्णवस्त्र-दोहनीपात्र-इन समेत दशगौओं का दानकरे खड़ाऊं-धोतीजोड़ा-छत्री-चँवर-आसन-दर्पण-भक्ष्यभोज्य पदार्थ-दीपक-इक्षुफल-पुष्प और चन्दन इनसब काभी गौओंकेही साथ दानकरे १०।११ और होम वा अधिवासन कर्मके अन्तमें वह यजमान वेदपाठी ब्राह्मणोंके द्वारा स्नानकरवाकर तीनवार प्रदक्षिणाकर इसमंत्रका उच्चारणकरे १२ हे विश्वेश्वर विश्वधाम

प्रयान्तुपापानिचराचराणाम्। त्वद्दानशस्त्राहतपातकानां ब्रह्माण्डदोषाःप्रलयंव्रजन्तु १४
एवंप्रणम्यामरविश्वगर्भं दद्याद्द्विजेभ्योदशधाविभज्य। भागद्वयंतत्रगुरोःप्रकल्प्य समं
भजेच्छेषमनुक्रमेण १५ स्वल्पेचहोमंगुरुरेकएव कुर्य्यादथैकाग्निविधानयुक्त्या। सए
वसम्पूज्यतमोऽल्पवित्ते यथोक्तवस्त्राभरणादिकेन १६ इत्थंयएतदखिलंपुरुषोऽत्रकुर्य्या
द् ब्रह्माण्डदानमधिगम्यमहद्विमानम्। निर्धूतकल्मषविशुद्धतनुर्मुरारेरानन्दकृत्पदमु
पैतिसहाप्सरोभिः १७ सन्तारयेत्पितृपितामहपुत्रपौत्र बन्धुप्रियातिथिकलत्रशताष्टकं
सः। ब्रह्माण्डदानशकलीकृतपातकौघमानन्दयेच्चजननीकुलमप्यशेषम् १८ इतिपठति
शृणोतिवायएतत् सुरभवनेषुगृहेषुधार्मिकाणाम्। मतिमपिचददातिमोदतेऽसावमरपते
र्भवनेसहाप्सरोभिः १९ ॥

इतिश्रीमत्स्यपुराणेपंचसप्तत्यधिकद्विशततमोऽध्यायः २७५॥

(मत्स्यउवाच) कल्पपादपदानाख्यमतःपरमनुत्तमम्। महादानंप्रवक्ष्यामि सर्वपा
तकनाशनम् १ पुण्यंदिनमथासाद्य तुलापुरुषदानवत्। पुण्याहवाचनंकृत्वा लोकेशा
वाहनंतथा २ ऋत्विग्मण्डपसम्भारभूषणाच्छादनादिकम्। काञ्चनंकारयेत्वृक्षं ना
नाफलसमन्वितम् ३ नानाविहगवस्त्राणि भूषणानिचकारयेत्। शक्तितस्त्रिपलादूर्ध्वमा
सहस्रंप्रकल्पयेत् ४ अर्धक्लृप्तसुवर्णस्य कारयेत्कल्पपादपम्। गुडप्रस्थोपरिष्टाच्च सितव

भगवन् आपको नमस्कारहै तुम सब लोकोंके ईशहो मेरीरक्षाकरो हे देव जोदुःखी पुरुषहैं वा पापी
हैं वहभी आपके दानरूपी शस्त्रसे अपने २ पापोंको काटके सुखी होजाते हैं इस प्रकारसे उस विश्व-
गर्भको अर्थात् उक्त प्रकारसे बनाये हुए ब्रह्माण्डको प्रणाम करके उसके दशभागकर ब्राह्मणोंको
बाँटदेवे-और स्वल्पधनके कार्य्य में अकेला गुरुही अग्निहोत्र विधानसे हवनकर देवे और उसी अ-
केले गुरुको वह सब वस्त्र आभूषणादिक देनेकेयोग्यहैं १३।१६ जोपुरुष इस प्रकारसे इसब्रह्माण्ड
दानको करताहै वहसब पापोंसे छुटकर विमानमें बैठ विष्णुलोकमें प्राप्तहो अप्सरागणोंसे सेवित
होताहै १७ और इस ब्रह्माण्ड दानके प्रभावसे मातापिताके कुटुम्बभरके पापोंके खंडकरके पिता
पितामह बंधु और स्त्री इनसबको आनन्दकरवाता है १८ जोपुरुष इस कथाको पढ़ता है वा सुन-
ताहै अथवा किसीको करनेकी अनुमति देताहै वह इन्द्रके स्वर्गलोकमें प्राप्तहोके अप्सराओं के साथ
रमण करताहै १९ ॥

इति श्रीमत्स्यपुराणभाषाटीकायांपंचसप्तत्यधिकद्विशततमोऽध्यायः २७५ ॥

मत्स्यजी बोले—अब कल्पपादप नाम महापातकों के नाशक महादानको कहते हैं १ उक्त तुला
पुरुषकेही समान पवित्रदिनमें पुण्याहवाचन करवाके लोकपालों का आवाहनकरे २ और ऋत्विक्
मंडप-आभूषण और वस्त्र यह सब पूर्वकेही सदृश ग्रहण करने योग्यहैं अनेकप्रकार के फलों से युक्त
सुवर्णका वृक्ष बनावे और वृक्षके पक्षियोंके अनेकप्रकारके वस्त्र और आभूषण बनावे यह वृक्ष शक्ति
के अनुसार तीन पलसे ऊपर हज़ार पलतक सुवर्णका बनताहै (एक पल चार तोले का होता है)

स्त्रयुगान्वितम् ५ ब्रह्मविष्णुशिवोपेतं पञ्चशाखंसभास्करम् । कामदेवमधस्ताच्च सकल
त्रंप्रकल्पयेत् ६ सन्तानंपूर्वतस्तद्वत्तुरीयांशेनकल्पयेत् । मन्दारंदक्षिणेपार्श्वे श्रियासार्धं
घृतोपरि ७ पश्चिमेपारिजातन्तु सावित्र्यासहजीरके । सुरभीसंयुतंतद्वत्तिलेषुहरिचन्द
नम् ८ तुरीयांशेनकुर्वीत सौम्येनफलसंयुतम् । कौशेयवस्त्रसम्बीतानिक्षुमाल्यफलान्वि
तान् ९ तथाष्टौपूर्णकलशान् पादुकाशनभाजनम् । दीपिकोपानहच्छत्र चामरासनसंयु
तम् १० फलमाल्ययुतंतद्वदुपरिष्टात्वितानकम् । तथाष्टादशधान्यानि समन्तात्परि
कल्पयेत् ११ होमाधिवासनान्तेच स्नापितोवेदपुङ्गवैः । त्रिःप्रदक्षिणमावृत्य मन्त्रमेतमु
दीरयेत् १२ नमस्तेकल्पवृक्षाय चिन्तितार्थप्रदायिने । विश्वम्भरायदेवाय नमस्तेवि
श्वमूर्तये १३ यस्मात्त्वमेवविश्वात्मा ब्रह्मास्थाणुर्दिवाकरः । मूर्तोऽमूर्तपरंबीजमतःपा
हिसनातन! १४ त्वमेवामृतसर्वस्वमनन्तःपुरुषोऽव्ययः । सन्तानाद्यैरुपेतोस्मान् पा
हिसंसारसागरात् १५ एवमामन्त्र्यतंदद्यात् गुरवेकल्पपादपम् । चतुर्भ्यश्चाथऋत्वि
ग्भ्यः सन्तानादीन्प्रकल्पयेत् १६ स्वल्पेत्वेकाग्निवत्कुर्य्यात् गुरवेचाभिपूजनम् । न
वित्तशाठ्यंकुर्वीत नचविस्मयवान्भवेत् १७ अनेनविधिनायस्तु महादानंनिवेदयेत् ।
सर्वपापविनिर्मुक्तः सोऽश्वमेधफलंलभेत् १८ अप्सरोभिःपरिवृतःसिद्धचारणकिन्नरैः । भू

३।४ इस सुवर्णके कल्पवृक्षको ३२ सेर प्रमाण गुड़की राशिके ऊपर स्थापितकर श्वेत वस्त्र उढ़ा
देवे ५ और ब्रह्मा विष्णु-शिव-सूर्य्य और कामदेव इन पांचों देवताओं की मूर्त्तियों से युक्त पांचशा-
खा बनावे और स्त्री सहित कामदेवको नीचे की शाखा में बनावे और इस कल्पवृक्षसे चतुर्थांश
सन्तान वृक्षको पूर्व्वकी ओर स्थापित करे मंदार वृक्ष लक्ष्मी से युक्तकर घृतके ऊपर दक्षिण में स्था-
पिनकरे पश्चिममें सावित्रीकी मूर्त्ति से युक्त किये हुए पारिजात वृक्षको जीरे के ऊपर स्थापितकरे
ऐसेही सुरभि गौ से युक्तहुए हरिचन्दन वृक्षको उत्तरदिशामें तिलोंके ऊपर स्थापित करे ६।७ इनसब
वृक्षोंको प्रथमसे चौथाई प्रमाणके बनावे और कुसुंभी वस्त्र ईखका गांडा और फल इत्यादिसे युक्त
करे ८ और आठ पूर्ण कलशों को, पादुका, भोजनपात्र, दीपक, जूतीजोड़ा, छत्री, चँवर और आसन
इत्यादि पदों सहित दानकरे और उनके ऊपर फल, पुष्प और तोरणादिक स्थापितकरे और चारों
ओर आठ वा दश धान्योंको स्थापितकरे ९।११ जब होम और अधिवास होजाय तब यजमान वेदके
मंत्रोंसे स्नानकरवा तीनवार प्रदक्षिणाकर इस मंत्रार्थका उच्चारणकरे १२ कि चिन्तित प्रयोजनके
दाता विश्वभरण विश्वमूर्त्ति कल्पवृक्षको नमस्कार है १३ तुमही विश्वात्मा ब्रह्मा हो दिवाकर हो
सनातन हो और परमबीज हो इस निमित्त मेरी रक्षाकरो १४ अमृत हो अनन्त हो अव्यय पुरुषहो
ऐसे सन्तानादि वृक्षोंसे युक्तहुए तुम संसार सागरसे मेरी रक्षाकरो १५ इस प्रकार अभिमंत्रितकरके
उस वृक्षको गुरुके अर्थ देदेवे और उन सन्तानादि वृक्षोंको चार ऋत्विगों के अर्थ देदेवे १६ जो स्वल्प
धनवालाहो तोकेवल गुरुकाही पूजनकरे वित्तके लोभसेरहित होकरकिसी प्रकार काभी आश्चर्य्य न
करे १७ इस विधिसे जोकोई इस महादानको देताहै वह सब पापोंसे रहितहोकर अश्वमेध यज्ञके

तान्भार्य्यांश्चमनुजांस्तारयेत्गोत्रसंयुतान् १९ स्तूयमानोदिवःपृष्ठे पितृपुत्रप्रपौत्रकान्। विमानेनार्कवर्णेन विष्णुलोकंसगच्छति २० दिविकल्पशतांतिष्ठेत् राजराजोभवेत्ततः। नारायणवलोपेतो नारायणपरायणः। नारायणकथासक्तो नारायणपुरंव्रजेत् २१ योवापठेत्सकलकल्पतरुप्रदानं योवाश्रृणोतिपुरुषोऽल्पधनःस्मरेद्वा। सोऽपीन्द्रलोकमधिगम्यसहाप्सरोभिर्मन्वन्तरंवसतिपापविमुक्तदेहः २२॥

इति श्रीषट्सप्तत्यधिकद्विशततमोऽध्यायः २७६॥

(मत्स्यउवाच) अथातःसम्प्रवक्ष्यामि महादानमनुत्तमम्। गोसहस्रप्रदानाख्यं सर्वपापहरंपरम् १ पुण्यांतिथिंसमासाद्य युगमन्वन्तरादिकीम्। पयोव्रतंत्रिरात्रंस्यादेकरात्रमथापिवा २ लोकेशावाहनंकुर्य्यात् तुलापुरुषदानवत्। पुण्याहवाचनंकुर्याद्धोमः कार्य्यस्तथैवच ३ गोसहस्रंवहिःकुर्याद्वस्त्रमाल्यविभूषणम्। सुवर्णशृङ्गाभरणंरौप्यपादसमन्वितम् ४ अन्तःप्रवेश्यदशकं वस्त्रमाल्यैश्चपूजयेत्। सुवर्णघण्टिकायुक्तं कांस्यदोहनकान्वितम् ५ सुवर्णतिलकोपेतं हेमपट्टैरलंकृतम्। कौशेयवस्त्रसम्वीतं माल्यगन्धसमन्वितम् ६ हेमरत्नमयैःशृङ्गैश्चामरैरुपशोभितम्। पादुकोपानहच्छत्रभाजनासनसंयुतम् ७ गवांदशकमध्येस्यात् काञ्चनोनन्दिकेश्वरः। कौशेयवस्त्रसम्वीतो नानाभरणभूषितः ८ लवणद्रोणशिखरे माल्येक्षुफलसंयुतः। कुर्यात्पलशतादूर्ध्वं सर्वमेतदशेषतः ९ श

फलको प्राप्तहोताहै १८ और अप्सरा सिद्ध चारण और किन्नरादिकों सेभी पूजाजाताहै इनवातोंके सिवाय वह अपने भून वर्त्तमान और भविष्य पुरुखाओं कोभी पार उतार देता है १९ और सूर्य्यके सदृश कान्तिवाले विमानमें वैठ देवताओं से स्तूयमान होकर विष्णु लोकमें प्राप्त होताहै २० वहां सैकडों कल्पोंतक वासकरके दूसरे जन्ममें राजाहो नारायणकीकथा भक्ति में तत्परहो फिर नारायणहीके पुरमें प्राप्तहोजाताहै २१ जोपुरुप इस कल्पवृक्षके दानको पढ़ताहै वहभी अप्सरागणोंसे युक्त होकर एक मनुतक स्वर्गलोकमें वासकरताहै और सव पापोंसे छुटजाताहै २२॥

इति श्रीमत्स्यपुराणभापाटीकायांपट्सप्तत्यधिकद्विशततमोऽध्यायः २७६॥

मत्स्यजीवोले अव सव पापोंके हरनेवाले गोसहस्रनामक उत्तम दानको कहते हैं १ युग अथवा मन्वंतर आदिकों की पवित्र तिथिमें जव इस दानको करे तो पहले तीनरात्रितक वा एकहीरात्रितक दूधकाव्रतकरे फिर तुलापुरुप दानके सदृश लोकपालोंका आवाहनकर स्वस्तिवाचन पूर्व्वक हवन करवावे फिर वस्त्र-पुष्प माला-और आभूपणादिकों से विभूपितकर हज़ार गौओंको सुवर्णके सींग रूपे के खुरोंसे युक्तकरके वाहरनिकाले २। ४ फिर दशगौओंको वस्त्रमालां सुवर्णकी घंटी कांसीके दोहनीपात्र सुवर्णकी पट्टीसे शोभित रक्तवस्त्रगन्ध और मालाओंसे युक्त पादुका, जूती जोड़ा, छत्री पात्र आसनादि समेत करके ५। ७ उन दशोंके मध्यमें सुवर्णका नन्दिकेश्वर वृपभ वनावे उसको रक्त वस्त्र और अनेकप्रकारके आभूपण पहराके द्रोणभर तिलोंके शिखरपर स्थापितकर उसकेपास ईख और फलादिक रखदेवे यह नन्दिकेश्वर ४०० तोलेसे कमनहो जो विशेप श्रद्धाहोयतो आठसौ वा

क्तितःपलसाहस्र त्रितयंयावदेवतु । गोशतेऽपिदशांशेन सर्वमेतत्समाचरेत् १० पुण्यकालंसमासाद्य गीतमङ्गलनिःस्वनैः । सर्वौषध्युदकस्नान स्नापितोवेदपुङ्गवैः ११ इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः । नमोऽस्तुविश्वमूर्तिभ्यो विश्वमातृभ्यएवच १२ लोकाधिवासिनीभ्यश्च रोहिणीभ्योनमोनमः । गवामङ्गेषुतिष्ठन्ति भुवनान्येकविंशतिः १३ ब्रह्मादयस्तथादेवा रोहिण्यःपान्तुमातरः । गावोमेअग्रतःसन्तु गावःपृष्ठत एवच १४ गावःशिरसिमेनित्यं गवांमध्येवसाम्यहम् । यस्मात्त्वंवृषरूपेण धर्मएवसनातनः १५ अष्टमूर्तेरधिष्ठान मतःपाहिसनातन ! । इत्यामन्त्र्यततोदद्याद् गुरवेनन्दिकेश्वरम् १६ सर्वोपकरणोपेतं गोयुतञ्चविचक्षणः । ऋत्विग्भ्योधेनुमेकैकां दशकाद्विनिवेदयेत् १७ गवाञ्चशतमेकैकं तदर्द्धंवाथविंशतिम् । दशपञ्चाथवादद्या दन्येभ्यस्तदनुज्ञया १८ नैकाबहुभ्योदातव्या यतोदोषकरीभवेत् । बह्व्यश्चैकस्यदातव्या धीमतारोग्यवृद्धये १९ पयोव्रतःपुनस्तिष्ठेदेकाहंगोसहस्रदः । श्रावयेच्छृणुयाद्वापि महादानानुकीर्तनम् २० तद्दिनेब्रह्मचारीस्यात् यदीच्छेद्विपुलांश्रियम् । अनेनविधिनायस्तु गोसहस्रप्रदोभवेत् । सर्वपापविनिर्मुक्तः सिद्धचारणसेवितः २१ विमानेनार्कवर्णेन किङ्किणीजालमालिना । सर्वेषांलोकपालानां लोकेसंपूज्यतेऽमरैः २२ प्रतिमन्वन्तरंतिष्ठेत्पुत्रपौत्रसमन्वितः । सप्तलोकानतिक्रम्यततःशिवपुरंव्रजेत् २३ शतमेकोत्तरन्तद्वत्पितॄणां

बारहसौ तोलेतक सुवर्णका नन्दिकेश्वर बनावे और १०० गोदानकरे वहभी इस संपूर्ण विधान को दशांश द्रव्यसे करे ८-१० पवित्रदिनमें गीतमंगल शब्द करके वेदपाठी ब्राह्मणोंके द्वारा सर्वौषधीके जलसे स्नानकरवा पुष्पांजलि ग्रहण करके इस मंत्रार्थका उच्चारणकरे कि हे विश्वकी मूर्त्ति और विश्वकीमाता आपके अर्थ नमस्कारहै ११ । १२ लोकाधि वासिनी गौहै और गौओंके अंगोंमें इक्कीस भुवन और ब्रह्मादिक सब देवता स्थितरहतेहैं इसलिये मेरी रक्षाकरो गौमेरे आगेरहो पीछेरहो शिरपैरहो और मैं गौओंके मध्यमें वासकरूं और नन्दिकेश्वर तुम वृषरूपसे धर्महो स्थितहो आठमूर्त्तियोंके अधिष्ठानहो इससे आपमेरी रक्षाकरो ऐसे आमंत्रित करके उसवृषभको सब सामाग्रियोंसे युक्त करके गुरुके अर्थ देदेवे और दशगौओंमेंसे प्रत्येक गौको ऋत्विगोंके अर्थ देदेवे एक २ ऋत्विक् पुरोहितको सौसौ पचास २ बीस २ अथवा दश २ गौदेवे फिर उनकी आज्ञालेके अन्य ब्राह्मणोंकोभी गौदेवे परन्तु बहुतोंके अर्थ एकगौ कभीनदेवे सुखकी वृद्धिके निमित्त बुद्धिमान् पुरुष एक ही ब्राह्मणको बहुतसी गौदेदेवे १३। १८ फिर एकदिनतक दूधका आहार करे और बहुतसीलक्ष्मी की इच्छाकरनेवाला मनुष्य जिसदिन इसमहादानको करे अथवा सुनावे उसदिन ब्रह्मचारी रहे इस विधिसे जो गोसहस्र अर्थात् हज़ार गौओंका दानकरताहै वह सब पापोंसे छुटकर सिद्धचारणादिसे सेवित सूर्य के सदृश देदीप्तजालीझरोखेवाले विमानमें बैठ सबलोकपालों के स्थानमें प्राप्त होके पूजाजाताहै वहां पुत्र पौत्रादिकों से युक्तहो एक २ मनुके राज्यतक वास करताहै ऐसे सात लोकोंमें प्राप्तहोकर शिवलोकमें प्राप्तहोताहै १९। २३ इसके विशेष १०१ पितरोंका तथा माताम-

तारयेद्बुधः। मातामहानांतद्वच्च पुत्रपौत्रसमन्वितः। यावत्कल्पशतन्तिष्ठेद्राजराजोभ
वेत्पुनः २४ अश्वमेधशतंकुर्याच्छिवध्यानपरायणः। वैष्णवंयोगमास्थाय ततोमुच्येत
बन्धनात् २५ पितरश्चाभिनन्दन्ति गोसहस्रप्रदंसुतम्। अपिस्यात्सकुलेऽस्माकं पुत्रो
दौहित्रएववा। गोसहस्रप्रदोभूत्वा नरकादुद्धरिष्यति २६ तस्यकर्मकरोवास्या दपिद्ध
ष्टातथैवच। संसारसागरादस्माद्योऽस्मान् सन्तारयिष्यति २७ इतिपठतियएतत् गो
सहस्रप्रदानं सुरभुवनमुपेयात् संस्मरेद्वाथपश्येत्। अनुभवतिमुदंवामुच्यमानोनिकामं
प्रहतकलुषदेहः सोऽपियातीन्द्रलोकम् २८॥

इति श्रीमत्स्यपुराणेसप्तसप्तत्यधिकद्विशततमोऽध्यायः २७७॥

(मत्स्यउवाच) अथातःसंप्रवक्ष्यामि कामधेनुविधिंपरम्। सर्वकामप्रदंनृणांमहा
पातकनाशनम् १ लोकेशावाहनंतद्वद्धोमःकार्योऽधिवासनम्। तुलापुरुषवत्कुर्यात् कु
ण्डमण्डपवेदिकम् २ स्वल्पेत्वेकाग्निवत्कुर्यात् गुरुरेकःसमाहितः। काञ्चनस्याति
शुद्धस्य धेनुंवत्सञ्चकारयेत् ३ उत्तमापलसाहस्री तदर्धेनतुमध्यमा। कनीयसीत
दर्धेन कामधेनुःप्रकीर्तिता ४ शक्तितस्त्रिपलादूर्ध्वमशक्तोऽपीहकारयेत्। वेद्यांकृष्णा
जिनंन्यस्य गुडप्रस्थसमन्वितम् ५ न्यसेदुपरितांधेनुं महारत्नैरलंकृताम्। कुम्भाष्ट
कसमोपेतां नानाफलसमन्विताम् ६ तथाष्टादशधान्यानि समन्तात्परिकल्पयेत्। इक्षु

हादि मातृपक्षकाभी उद्धार करताहै और १०० कल्पतक वासकर दूसरे जन्ममें राजाहोकर शिव-
जीके ध्यानमें तत्परहोके अश्वमेध यज्ञके द्वारा विष्णु लोकमें प्राप्तहो सबबंधनोंसे छुटजाताहै २४।२५
गो सहस्र दानकरनेवाले पुत्रकीबाट पितरलोगभीदेखा करतेहैं और ऐसे कहतेहैं कि हमारे कुलमें
कोईपुत्र व दौहित्र ऐसाहो जो गो सहस्रका दानकरके इस नरकसे हमारा उद्धारकरे जोकोई हम
को संसाररूपी सागरसे पारउतारेगा उसके कामोंको हमपितृलोग भृत्योंके समान करेंगे २६।२७
इस प्रकारसे इस गोसहस्र नामवालेदानको जो पढ़ैगा वा स्मरण करेगा वहभी संपूर्ण पापोंसे छुट-
कर इन्द्रलोकमें प्राप्तहोगा २८॥

इतिश्रीमत्स्यपुराणभाषाटीकायांसप्तसप्तत्यधिकद्विशततमोऽध्यायः २७७॥

मत्स्यजीबोले- अब हमकामधेनु दानकी विधिको कहतेहैं यह दानमनुष्योंकी सबकामनाओंको
देकर महापातकोंका नाशकरनेवालाहै १ प्रथम तुलादानकेतुल्य लोकपालोंका आवाहनकर मंडप
वेदी बनाकर हवनकरे- २ स्वल्पद्रव्य होवेतो एकाग्नि विधानके सदृश अकेले गुरूजीही हवनकरदें
आधा द्रव्यखर्च करनेसे कनिष्ठा कामधेनु कहातीहै और बारहतोले सुवर्णसे कममें यह कामधेनु न-
हीं बनसक्तीहै- काले मृगचर्मको वेदीपै बिछाउसपर प्रस्थभर गुडधरे फिर उस गुड़पर सब रत्नोंसे
शोभितकीहुई गौकोस्थापितकरे उसके पास आठ पूर्णकलशे और फलोंकोधरे ३।६ उसके चारों
ओर आठवा दशधान्य इक्षुदंड-अनेक प्रकारकेफल-पात्र-आसन तांबेकी दोहनी कुसुमी वस्त्र-दीपक--
छत्री-चँवर-कुण्डल-घण्टा और सुवर्ण की सींगड़ी- रूपेकेखुर इन्होंसे युक्तकर सबरस हल्दी-जीरा

दण्डाष्टकन्तद्वन्नानाफलसमन्वितम्। भाजनञ्चासनंतद्वत्ताम्रदोहनकन्तथा ७ कौशेयवस्त्रद्वयसंयुताङ्गां दीपातपत्राभरणाभिरामाम्। सचामरांकुण्डलिनींसघण्टां सुवर्णशृङ्गींपरिक्लृप्यपादाम् ८ रसैश्चसर्वैःपरितोऽभिजुष्टां हरिद्रयापुष्पफलैरनेकैः। अजाजिकुस्तुम्बुरुशर्करादिभिर्वितानकञ्चोपरिपञ्चवर्णम् ९ स्नातस्ततोमङ्गलवेदघोषैः प्रदक्षिणीकृत्यसपुष्पहस्तः। आवाहयेत्तांगुरुणोक्तमन्त्रैर्द्विजायदद्यादथदर्भपाणिः १० त्वंसर्वदेवगणमन्दिरमङ्गभूता विश्वेश्वरि त्रिपथगोदधिपर्वतानाम्। त्वद्दानशस्त्रशकलीकृतपापकौघः प्राप्तोऽस्मिनिर्वृतिमतीवपरांनमामि ११ लोकेयथेप्सितफलार्थविधायिनींत्वा मासाद्यकोहिभुविदुःखमुपैतिमर्त्यः। संसारदुःखशमनाययतस्वकामं त्वांकामधेनुमितिदेवगणावदन्ति १२ आमन्त्र्यशीलकुलरूपगुणान्वितायविप्राययःकनकधेनुमिमांप्रदद्यात्। प्राप्नोतिधाम सपुरन्दरदेवजुष्टं कन्यागणैःपरिवृतःपदमिन्दुमौलेः १३ ॥

इतिश्रीमत्स्यपुराणेऽष्टसप्तत्यधिकद्विशततमोऽध्यायः २७८ ॥

(मत्स्य उवाच) अथातःसंप्रवक्ष्यामि हिरण्याश्वविधिंपरम्। यस्यप्रदानाद्भुवने चानन्त्यंफलमश्नुते १ पुण्यांतिथिमथासाद्य कृत्वाब्राह्मणवाचनम्। लोकेशावाहनंकुर्यात्तुलापुरुषदानवत् २ ऋत्विक्मण्डपसम्भार भूषणाच्छादनादिकम्। स्वल्पेत्वेकाग्निवत्कुर्याद्धेमवाजिमखम्बुधः ३ स्थापयेद्वेदिमध्येतु कृष्णाजिनतिलोपरि। कौशेयवस्त्रसम्वीतं कारयेद्धेमवाजिनम् ४ शक्तितस्त्रिपलादूर्ध्वमासहस्रपलाद्बुधः। पादुकोपानहच्छत्र

धनियां-और खांड़ इत्यादिक वस्तुओंको भी उसके समीप रक्खे-उसके पांचवर्णकी वन्दनवार वांधे ७।९ फिर वेदके मंत्र और मंगलशब्दों करके स्नानपूर्वक तीनप्रदक्षिणाकर पुष्पांजलीले गुरुसे मंत्रोंका उच्चारणकर वा उस कामधेनुका आवाहनकरे १० और कहे कि हे कामधेनु तुम संपूर्ण देवताओंके शरीर रूपहो विश्वेश्वरी हो तुम्हारे दान करनेसे मैं सव पापों से छुटकर परमानन्दको प्राप्तहोगयाहूं और तुम्हें नमस्कार करताहूं ११ तुझ मनोवाञ्छितकी देने वालीको प्राप्तहोकर कौनमनुष्य दुःखको पासक्ताहै संसारके दुःख दूरकरने से तुमको कामधेनु कहते हैं १२ इस प्रकारसे आमंत्रित करके जो ब्राह्मण के निमित्त इस सुवर्णकी धेनुको देताहै वह देवताओं से सेवितकियेहुए इन्द्रलोकमें प्राप्तहोताहै १३ ॥

इति श्रीमत्स्यपुराणभाषाटीकायामष्टसप्तत्यधिकद्विशततमोऽध्यायः २७८ ॥

मत्स्यजीबोले--अव उत्तम हिरण्याश्व दानकी विधिको कहताहूं इस दानका अनन्त गुणा फल प्राप्तहोताहै १ पवित्र तिथिमें स्वस्तिवाचन पूर्वक तुलादान केही समान लोकपालों का आवाहन करे २ फिर ऋत्विक् मंडप, भूषण और आच्छादन आदि सामग्री इकट्ठीकरे और जो स्वल्प धनहोय तो एकाग्नि विधानसे एकही स्थानमें हवनकरवादेवे ३ फिर सुवर्णका घोड़ा वनवाकर वेदीके ऊपर काले मृगचर्मपर तिलोंके ऊपर स्थापितकर रेशमी वस्त्रसे ढकदेवे यह अश्व वारह तोलोंसे हज़ार तोलेतक श्रद्धाके अनुसार वनता है इस अश्वको पादुका, जूतीजोड़ा, छत्री, चंवर, आसन, पात्र,

चामरासनभाजनैः ५ पूर्णकुम्भाष्टकोपेतं माल्येक्षुफलसंयुतम्। शय्यांसोपस्करांतद्वद्धेम
मार्तण्डसंयुताम् ६ ततःसर्वौषधीस्नान स्नापितोद्विजपुङ्गवैः।इममुच्चारयेन्मन्त्रं गृहीतकुसु
माञ्जलिः ७ नमस्तेसर्वदेवेश! वेदाहरणलम्पट!। वाजिरूपेणमामस्मात्पाहिसंसारसा
गरात् ८ त्वमेवसप्तधाभूत्वा छन्दोरूपेणभास्कर!। यस्माद्भासयसेलोकानतःपाहिस
नातन! ९ एवमुच्चार्यगुरवे तमश्वंविनिवेदयेत्। दत्त्वापापक्षयाद्भानोर्लोकमभ्येतिशाश्व
तम् १० गोभिर्विभवतःसर्वान्नृत्विजश्चापिपूजयेत्। सर्वधान्योपकरणं गुरवेविनिवेद
येत् ११ सर्वशय्यादिकंदत्त्वा भुञ्जीतातैलमेवहि। पुराणश्रवणंतद्वत् कारयेद्भोजना
दिकम् १२ इमंहिरण्याश्वविधिंकरोति यःसंपूज्यमानोदिविदेवसङ्घैः। विमुक्तपापःसपु
रंमुरारेः प्राप्नोतिसिद्धैरभिपूजितःसन् १३ इतिपठतियएतद्धेमवाजिप्रदानं सकलकलु
षमुक्तःसोऽश्वमेधेनयुक्तः। कनकमयविमानेनार्कलोकंप्रयाति त्रिदशपतिवधूभिःपूज्यते
योऽभिपश्येत् १४ योवाश्रृणोतिपुरुषोऽल्पधनःस्मरेद्वा हेमाश्वदानमभिनन्दयतीहलो
के। सोऽपिप्रयातिहतकल्मषशुद्धदेहः स्थानंपुरन्दरमहेश्वरदेवजुष्टम् १५॥

इतिश्रीमत्स्यपुराणेएकोनाशीत्यधिकद्विशततमोऽध्यायः २७९॥

(मत्स्य उवाच) अथातःसंप्रवक्ष्यामि महादानमनुत्तमम्। पुण्यमश्वरथंनाम महा
पातकनाशनम् १ पुण्यंदिनमथासाद्य कृत्वाब्राह्मणवाचनम्। लोकेशावाहनंकुर्यात्तुला
पुरुषदानवत् २ ऋत्विक्मण्डपसम्भारं भूषणाच्छादनादिकम्। कृष्णाजिनेतिलान्कृ

आठ पूर्ण कुंभ, माला, इक्षुदंड, इत्यादि सब सामग्रियों से युक्त शय्या और सुवर्णके सूर्य्य समेत कर
वेदके मन्त्रों से स्नानकर पुष्पांजली ले इस मंत्रके अर्थको उच्चारण करे ४।७ हेसर्वदेवेश वेदों के
लानेवाले विष्णु आप अश्वरूप करके संसाररूपी सागरसे मेरा उद्धार करो ८ तुमही सातप्रकार
से स्थितहोकर सूर्य्यरूपसे सब लोकोंको प्रकाशित करते हो ऐसे आप होकर मेरी रक्षाकरो ९ इन
सब बातोंको करके उस अश्वको गुरुको अर्पण करदेवे इस दानका करनेवाला पुरुष सूर्य्यलोकमें
प्राप्तहोताहै इसकरनेके पीछे गौदानादिसे ऋत्विगोंका पूजनकर धान्यादि सबसामग्री गुरुकेअर्थ दे-
देवे १०।११ इस दानको करके इसका कर्त्ता तेलका भोजन नहीं करे और पुराणों की कथाओं को
सुने १२ जो पुरुष इस हिरण्याश्व दानकी विधिको करताहै वह सब पापोंसे रहित होकर विष्णु-
लोकमें देवताओंसे पूजितहोताहै १३ जो इस हिरण्याश्व दानको पढ़ताहै वा सुनताहै अथवा स्वल्प
धन वाला पुरुष सराहता है और स्मरण करताहै वह सब पापोंसे छुटकर सूर्य्यके समान कान्ति
वाले विमानमें बैठ स्वर्गलोक में जाकर देवाङ्गनाओं से पूजाजाताहै १४।१५॥

इतिश्रीमत्स्यपुराणभाषाटीकायामेकोनाशीत्यधिकद्विशततमोऽध्यायः २७९॥

मत्स्यजीबोले—अब महापातक नाशक उत्तम अश्वरथ नामवाले दानको कहते हैं १ पवित्र दिव-
समें ब्राह्मणों के स्वस्तिवाचन सहित तुलापुरुष दानके समान लोकपालों का आवाहन करे २
फिर ऋत्विक्, मंडप, भूषण और आच्छादन इनसब बस्तुओंको संचितकरे और कालेमृगके चर्मपर-

त्वा काञ्चनंस्थापयेद्रथम् ३ अष्टाश्वंचतुरश्वंवा चतुश्चक्रंसकूबरम् । ऐन्द्रनीलेनकु
म्भेन ध्वजरूपेणसंयुतम् ४ लोकपालाष्टकंतद्वत्पद्मरागदलान्वितम्। चतुरःपूर्णकलशा
न् धान्यान्यष्टादशैवतु ५ कौशेयवस्त्रसंयुक्तमुपरिष्टाद्वितानकम् । माल्येक्षुफलसंयुक्तं पु
रुषेणसमन्वितम् ६ योयद्भक्तःपुमान्कुर्यात् सतन्नाम्नाधिवासनम् । छत्रचामरकौशे
य वस्त्रोपानहपादुकम् ७ गोभिर्विभवतःसार्द्धं दद्याच्चशयनादिकम् । आभारात्रिपलादू
र्ध्वं शक्तितःकारयेद्बुधः ८ अश्वाष्टकेनसंयुक्तं चतुर्भिरथवाजिभिः । द्वाभ्यामपियुतंदद्या
द्धेमसिंहध्वजान्वितम् ९ चक्ररक्षावुभौतस्य तुरगस्थावथाश्विनौ । पुण्यकालमथावाप्य
पूर्ववत्स्नापितोद्विजैः १० त्रिःप्रदक्षिणमावृत्य गृहीतकुसुमाञ्जलिः । शुक्लमाल्याम्बरो
दद्यादिमंमन्त्रमुदीरयेत् ११ नमोनमःपापविनाशनाय विश्वात्मनेवेदतुरङ्गमाय । धा
म्नामधीशायदिवाकराय पापौघदावानलदेहिशान्तिम् १२ वस्वष्टकादित्यमरुद्गणानां
त्वमेवधातापरमंनिधानम् । यतस्ततोमेहृदयंप्रयातु धर्मैकतानत्वमघौघनाशात् १३
इतितुरगरथप्रदानमेकं भवभयसूदनमत्रयःकरोति । सकलुषपटलैर्विमुक्तदेहः परमुपैति
पदंपिनाकपाणेः १४ देदीप्यमानवपुषांविजितप्रभावमाक्रम्यमण्डलमखण्डितचण्डभा
नोः । सिद्धाङ्गनानयनषट्पदपीयमान वक्त्राम्बुजोऽम्बुजभवेनचिरंसहास्ते १५ इतिपठ
तिशृणोतिवायइत्थं कनकतुरगरथप्रदानमस्मिन्। नसनरकपुरंव्रजेत्कदाचिन्नरकरिपोर्भ
वनंप्रयातिभूयः १६ ॥

इतिश्रीमत्स्यपुराणेऽशीत्यधिकद्विशततमोध्यायः २८० ॥

सुवर्णके रथको स्थापितकरे उसरथके चारघोड़े और चारपहिये बना इन्द्रनीलमणिके समान ध्वजा
से शोभितकर पुखराजके लोकपालबनावे फिर चारपूर्ण कुंभों समेत अठारह प्रकारके धान्यों को
स्थापित करके रेशमीवस्त्रसे ढकबन्दनवारबाँधे फिर माला इक्षुदंड-फल और पुरुषकी मूर्त्ति इनसब
से युक्तकरे और जो पुरुष जिस देवताका भक्त हो वह उसी देवके नामसे अधिवासनकरे और छत्री,
चंवर, कुसुंभी वस्त्र जूतीजोड़ा आदिक पद और सब सामग्रियों सहित गौ शय्यासे संयुक्तकरे यह
रथ बारहतोले से अधिक एकभार सुवर्णतकका शक्तिकेअनुसार बनताहै इसमें आठ, चार वा दोही
अश्वबनावे और सुवर्ण के सिंहसमेत ध्वजासे शोभितकर पूर्वकेही समान पवित्र दिनमें वेद मंत्रों
से स्नान तीनवार प्रदक्षिणा, पुष्पांजली, सफेदमाला और श्वेतही वस्त्रोंको धारणकर इस मंत्रार्थ
का उच्चारणकरे ३ । ११ हे पापोंके नाशक विश्वात्मा वेदरूपी अश्वोंवाले सूर्य्य स्वरूप तुमको न-
मस्कारहै आपमेरे शान्तिकरो आपही बसुआदित्य और मरुद्गणों के रचनेवालेहो परम निधान हो
मेरे पापोंको नाशकरो और हृदयमें निरन्तर धर्मकी स्थिति करो १२ । १३ इस प्रकारसे जो पुरुष
संसारके भयके दूर करनेवाले इस हिरण्यरथ दानको करता है वह सब पापोंसे छुटकर शिवजी के
परमपदको प्राप्त होता है १४ और उत्तम तेजस्वी हो सूर्य्य लोकमें प्राप्त होकर शिवलोकमें
प्राप्त होताहै वहां जाकर इसके मुख कमलको सिद्धोंकी स्त्रियां भ्रमररूप होकर पान करती हैं १५

(मत्स्य उवाच) अथातःसंप्रवक्ष्यामि हेमहस्तिरथंशुभम्। यस्यप्रदानाद्भुवनं
वैष्णवंयातिमानवः १ पुण्यांतिथिमथासाद्य तुलापुरुषदानवत्। विप्रवाचनकंकुर्याल्लो
केशावाहनंबुधः। ऋत्विक्मण्डपसम्भार भूषणाच्छादनादिकम् २ अत्राप्युपोषितस्तद्व
द्ब्राह्मणैःसहभोजनम्। कुर्यात्पुष्परथाकारं काञ्चनंमणिमण्डितम् ३ वलभीभिर्विचित्रा
भिश्चतुश्चक्रसमन्वितम्। कृष्णाजिनेतिलद्रोणं कृत्वासंस्थापयेद्रथम् ४ लोकपालाष्ट
कोपेतं ब्रह्मार्कशिवसंयुतम्। मध्येनारायणोपेतं लक्ष्मीपुष्टिसमन्वितम् ५ तथाष्टादशधा
न्यानि भाजनासनचन्दनैः। दीपिकोपानहच्छत्र दर्पणंपादुकान्वितम् ६ ध्वजेतुगरुडं
कुर्यात् कूबराग्रेविनायकम्। नानाफलसमायुक्तमुपरिष्टाद्वितानकम् ७ कौशेयंपञ्चवर्ण
न्तु अम्लानकुसुमान्वितम्। चतुर्भिःकलशैःसार्द्धं गोभिरष्टाभिरन्वितम् ८ चतुर्भिर्हैममा
तङ्गैर्मुक्तादामविभूषितैः। स्वरूपतःकरिभ्याञ्च युक्तंकृत्वानिवेदयेत् ९ कुर्यात्पञ्चपला
दूर्ध्वमाभारादपिशक्तितः। तथामङ्गलशब्देन स्नापितोवेदपुङ्गवैः १० त्रिःप्रदक्षिणमावृ
त्य गृहीतकुसुमाञ्जलिः। इममुच्चारयेन्मन्त्रं ब्राह्मणेभ्योनिवेदयेत् ११ नमोनमःशङ्कर
पद्मजार्कलोकेशविद्याधरवासुदेवैः। त्वंसेव्यसेवेदपुराणयज्ञैस्तेजोमयस्यन्दनपाहित
स्मात् १२ यत्तत्पदंपरमगुह्यतमंमुरारेर्ह्यानन्दहेतुगुणरूपविमुक्तवन्तः। योगैकमानस

जो पुरुष इस हिरण्यरथदानको पढ़ता व सुनता है वह कभी भी नरकमें नहीं पड़ताहै वारंवार स्व-
र्गही में जाताहै १६ ॥ इतिश्रीमत्स्यपुराणभाषाटीकायामशीत्यधिकद्विशततमोऽध्यायः २८० ॥

मत्स्यजी बोले--अब सुन्दर हेमहस्तीरथके दानको कहते हैं इस दानका करनेवाला पुरुष विष्णु-
लोकमें प्राप्त होता है १ इसको भी पवित्र तिथिमें तुलादानकेही समान ब्राह्मणों से स्वस्तिवाचन
करवा लोकपालोंका आवाहन करे और ऋत्विक् मंडप भूषण और वस्त्र इन सबको इकट्ठाकर उप-
वासव्रत करके ब्राह्मणोंके साथ भोजनकरे यहां पुष्परथके आकारका सुवर्ण और मणियोंका रथ
अनेक प्रकारकी गुमटी और चक्रों सहित बनावे फिर काले मृगचर्मपर द्रोणभरतिल स्थापितकर
उसपर रथको स्थापितकरे २।४ उसके चारों ओर आठलोकपाल ब्रह्मा सूर्य और शिव इनसबकी
मूर्त्तिको बनाके मध्यमें लक्ष्मी और पुष्टिसंयुक्त नारायणकी मूर्त्तिबनावे ५ फिर दशप्रकारके धान्य,
पात्र, चन्दन, दीपक,जूतीजोड़ा, छत्री दर्पण और पादुका से संयुक्तकरे और इस रथकी ध्वजापर
गरुड़ बनाकर जुएके आगे गणेशजीकी मूर्त्तिको बनावे और अनेक फलोंसे युक्तकीहुई बन्दनवारको
ऊपरबांधे ६।७पांचरंगके रेशमी वस्त्र,प्रफुल्लितपुष्प चारकलश और आठ गौ इनसबको भी उसरथके
बराबरमें स्थितकरदे फिर मोतियोंसे भूषित सुवर्णके चारहाथी बनाकर रथमेंजोड़देवे यह हेम गज रथ
बारह तोले से अधिक एकभारसुवर्ण पर्य्यन्तका अपनी शक्तिके अनुसार बनताहै इस रथको वेदके
मंत्रोंसे स्नानकर तीनवार प्रदक्षिणापूर्वक पुष्पांजली सहित इस मन्त्रार्थका उच्चारण करके ब्रा-
ह्मणोंके ।दानकरदेवे ८।११ तुम तेजस्वरूपी रथ शिव ब्रह्मा सूर्य्य लोकेश विद्याधर और वासुदेव इन
सबसे सेवितकिये जातेहो इस निमित्त आपको नमस्कारहै १२ जो विष्णुका आनन्दस्वरूप परम

दृशोमुनयःसमाधौ पश्यन्तितत्त्वमसिनाथरथाधिरूढ ! १३ यस्मात्त्वमेवभवसागरसंप्लु
तानामानन्दभागमृतमध्वगपारपत्रम् । तस्मादघौघशमनेनकुरुप्रसादञ्चामीकरेभरय
माधव ! सम्प्रदानात् १४ इत्थंप्रणम्यकनकेभरथप्रदानं यःकारयेत्सकलपापविमुक्तदेहः।
विद्याधरामरमुनीन्द्रगणाभिजुष्टं प्राप्नोत्यसौपदमतीन्द्रियमिन्दुमौलेः १५ कृतदुरितवि
तानप्रज्वलद्वह्निजाल व्यतिकरकृतदेहोद्वेगभाजोऽपिबन्धून् । नयतिसपितृपुत्रान्बान्ध
वानप्यशेषान् कृतगजरथदानाच्छाश्वतंसद्मविष्णोः १६ ॥

इतिश्रीमत्स्यपुराणेएकाशीत्याधिकद्विशततमोऽध्यायः २८१ ॥

(मत्स्य उवाच) अथातःसम्प्रवक्ष्यामि महादानमनुत्तमम् । पञ्चलाङ्गलकंनाम
महापातकनाशनम् १ पुण्यांतिथिमथासाद्य युगादिग्रहणादिकाम् । भूमिदानंनरोदद्या
त् पञ्चलाङ्गलकान्वितम् २ खर्वटंखेटकंवापि ग्रामंवासस्यशालिनम् । निवर्तनशतंवा
पि तदर्धंवापिशक्तितः ३ सारदारुमयान्कृत्वा हलान्पञ्चविचक्षणः । सर्वोपकरणैर्युक्ता
नन्यान्पञ्चचकाञ्चनान् । कुर्य्यात्पञ्चपलादूर्ध्वमासहस्रपलावधि ४ वृषान्लक्षण
संयुक्तान् दशचैवधुरन्धरान् ।सुवर्णशृङ्गाभरणान् मुक्तालांगूलभूषणान् ५ रूप्यपादाग्र
तिलकान् रक्तकौशेयभूषणान् । स्रग्दामचन्दनयुतान् शालायामधिवासयेत् ६ धरण्या
दित्यरुद्रेभ्यः पायसंनिर्वपेच्चरुम्।एकस्मिन्नेवकुण्डेतु गुरुस्तेभ्योनिवेदयेत् ७ पलाशस

पदहै जिसको कि मुनिजन लोग समाधिमें देखतेहैं हे नाथ वही तुम इस रथमें स्थितहो १३ तुमही
संसाररूपी सागरमें डूबेहुए पुरुषोंको पार उतारने वालेहो इसहेतुसे हे माधव मेरे पापोंके समूहका
नाशकरके मेरीं रक्षाकरो १४ इसप्रकारसे प्रणाम करके सुवर्णके हाथी समेत जोपुरुष इस रथका
दानकरताहै वह संपूर्ण पापोंसे छुटके शिवलोकमें प्राप्तहो विद्याधर और मुनियोंसे पूजा जाताहै १५
इस हेमहस्तीरथ दानवाले महादानका करने वाला पापी पुरुषभी स्वच्छदेहयुक्तहोके पितर, बान्धव और पुत्र इनसबोंका उद्धार करदेताहै १६ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायामेकाशीत्यधिकद्विशततमोऽध्यायः २८१ ॥

मत्स्यजी बोले—अब महापातकोंके नाशक पंचलांगलक अर्थात् पांचहलोंको कहते हैं १ युगादि
तिथि अथवा ग्रहण आदिकी पवित्र तिथिमें पांचहलोंसे युक्तकीहुई भूमिका दान देनाचाहिये २
कोई पर्व्वतका ग्राम वा मार्गकाग्राम अथवा सामान्यग्राम इनसबको अच्छी खेतियोंसे युक्त करके
दानकरे अथवा खेतीसे पूर्णहुई आधे ग्रामकी भूमिका दानकरे ३ और उत्तम काष्ठके पांचहलोंको
सांगोपांग बनावे और पांचपल अर्थात् बीस तोलोंसे अधिक चारहज़ार तोलों तक शक्तिके अनुसार
पांच सुवर्णके हल बनवावे और अच्छे लक्षणवाले दश धुरंधर बैललाके उनके सींगोंमें सुवर्णका
और पूंछोंमें मोतियोंका भूषण पहराय रूपेके खुर लगाकर रेशमी बस्त्र उढ़ावे फिर माला, चन्दनादि
सेपूज अपनी शालामें अधिबासकरावे ४ । ६ और पृथ्वी आदित्य और रुद्र इन देवताओं के अर्थ
एकही कुंडमें खीर और साकल्यका हवनकरे और होममें ढाककीलकडी, घृत और काले तिल इन

मिधस्तद्वदाज्यंकृष्णतिलास्तथा। तुलापुरुषवत्कुर्य्याल्लोकेशावाहनंबुधः ८ ततोमङ्गल
शब्देन शुक्लमाल्याम्बरोबुधः । आहूयद्विजदाम्पत्यं हेमसूत्रांगुलीयकैः ९ कौशेयवस्त्र
कटकैर्मणिभिश्चाभिपूजयेत्। शय्यांसोपस्करांदद्याद्धेनुमेकांपयस्विनीम् १० तथाष्टादश
धान्यानि समन्तादधिवासयेत् । ततःप्रदक्षिणीकृत्य गृहीतकुसुमाञ्जलिः ११ इममु
च्चारयेन्मन्त्र मथसर्वंनिवेदयेत् । यस्माद्देवगणाःसर्वेस्थावराणिचराणिच १२ धुरन्धरा
ङ्गेतिष्ठन्ति तस्माद्भक्तिःशिवेऽस्तुमे । यस्माच्चभूमिदानस्य कलांनार्हन्तिषोड़शीम् १३
दानान्यन्यानिमेभक्तिर्धर्मएवदृढ़ाभवेत् । दण्डेनसप्तहस्तेन त्रिंशद्दण्डंनिवर्तनम् १४
त्रिभागहीनंगोचर्म मानमाहप्रजापतिः । मानेनानेनयोदद्यान्निवर्तनशतंबुधः । विधि
नानेनतस्याशु क्षीयतेपापसंहतिः १५ तदर्द्धमथवादद्यादपिगोचर्ममात्रकम् । भवन
स्थानमात्रंवा सोऽपिपापैःप्रमुच्यते १६ यावन्तिलाङ्गलकमार्गमुखानिभूमेर्भासांपतेर्दुहि
तुरङ्गजरोमकाणि । तावन्तिशङ्करपुरेससमाहितिष्ठेत् भूमिप्रदानमिहयःकुरुतेमनुष्यः
१७ गन्धर्वकिन्नरसुरासुरसिद्धसङ्घैराधूतचामरमुपेत्यमहद्विमानम् । संपूज्यतेपितृपि
तामहबन्धुयुक्तः शम्भोःपदंव्रजतिचामरनायकःसन् १८ इन्द्रत्वमप्यधिगतंक्षयमभ्युपै
ति गोभूमिलाङ्गलधुरन्धरसम्प्रदानात् । तस्मादघौघपटलक्षयकारिभूमेर्दानंविधेयमि
तिभूतिभवोद्भवाय १९ ॥ इतिश्रीमत्स्यपुराणेद्व्यशीत्यधिकद्विशततमोऽध्यायः २८२ ॥

सबको काममेंलावे और तुला पुरुष दानमें कहेहुए विधानके तुल्यलोकपालोंका आवाहनकरे ७।८
फिर मंगलशब्दपूर्व्वक श्वेत वस्त्र धारणकर सस्त्रीक ब्राह्मणको बुलवाकर सुवर्ण की तागडी, अंगूठी,
कसूमी वस्त्र,कडूले और मणि इन सब वस्तुओंसे पूजे और संपूर्ण उपयोगी वस्तुओंसे संयुक्त
की हुई एक शय्या और गौको दानकरे और अठारह धान्योंको चारों ओर स्थापित कर अधिवासन
करे फिर प्रदक्षिणापूर्व्वक पुष्पांजली ग्रहणकर इस मन्त्रार्थ का उच्चारणकरे कि संपूर्ण देवता और
चराचर जगत् यह सब धुरंधर बैलके अंगपर विराजमान रहतेहैं इस हेतुसे शिवजी में मेरी भक्तिहो
और भूमिदानकी सोलहवीं कलाकेभी समान कोई दान नहीं है इसहेतुसे मेरी बुद्धि धर्ममें दृढ होय
९।१३ सात २ हाथके तीसडंडे जितनी भूमिमें आवें उतने प्रमाणको निवर्त्तन कहतेहैं इस निवर्त्तन
प्रमाणमें से तीसराभाग घटानेसे गोचर्मसंज्ञक प्रमाण बनजाताहै यह ब्रह्माजीका कहाहुआ प्रमाणहै
जोपुरुष इस निवर्त्तन शत अर्थात् सौ१०० निवर्त्तन प्रमाण वा पचास निवर्त्तन प्रमाण भूमिकोइस
उक्तविधि से दानकरताहै उसके सब पाप नष्टहोजाते हैं और जो पीछे कहेहुए गोचर्ममात्र प्रमाणकी भूमिका
अथवा घर बनजानेकेयोग्य भूमिका दानकरताहै वहभी संपूर्ण पापोंसेरहित होजाताहै १४।१६
इसके विशेष हलोंसे बीजबोनेके समय पृथ्वीमें जितने छिद्रहोवें तथा बैलोंके शरीरपर जितने रोम
होवें उतनेही वर्षोंतक इस दानका करनेवाला पुरुष शिवलोकमें वास करताहै १७ और गन्धर्व
देवता दैत्य और सिद्ध यह सब चंवर दुलाते हैं यह करनेवाला पुरुष अपने बन्धुगणों से युक्त बड़े
विमानमें बैठ शिवलोकमें वास करताहै १८ और इन्द्रका राज्यभी सदा स्थिर नहीं रहताहै इस-

(मत्स्य उवाच) अथातःसम्प्रवक्ष्यामि धरादानमनुत्तमम् । पापक्षयकरंनृणाममङ्गल्यविनाशनम् १ कारयेत्पृथिवींहैमीं जम्बुद्वीपानुकारिणीम् । मर्यादापर्वतवतीं मध्येमेरुसमन्विताम् २ लोकपालाष्टकोपेतां नववर्षसमन्विताम् । नदीनदसमोपेतामन्तेसागरवेष्टिताम् ३ महारत्नसमाकीर्णां वसुरुद्रार्कसंयुताम् । हेम्नःपलसहस्रेण तदर्द्धेनाथशक्तितः ४ शतत्रयेणवाकुर्यात् द्विशतेनशतेनवा । कुर्यात्पञ्चपलादूर्ध्वमशक्तोऽपिविचक्षणः ५ तुलापुरुषवत्कुर्याल्लोकेशावाहनंबुधः । ऋत्विक्मण्डपसम्भारभूषणाच्छादनादिकम् ६ वेद्यांकृष्णाजिनंकृत्वा तिलानामुपरिन्यसेत् । तथाष्टादशधान्यानि रसांश्चलवणादिकान् ७ तथाष्टौपूर्णकलशान् समंतात्परिकल्पयेत् । वितानकंचकौशेयं फलानिविविधानिच ८ तथांशुकानिरम्याणि श्रीखण्डशकलानिच । इत्येवंकारयित्वातामधिवासनपूर्वकम् ९ शुक्लमाल्याम्बरधरः शुक्लाभरणभूषितः । प्रदक्षिणंततःकृत्वा गृहीतकुसुमाञ्जलिः १० पुण्यंकालमथासाद्य मन्त्रानेतानुदीरयेत् । नमस्तेसर्वदेवानां त्वमेवभवनंयतः ११ धात्रीचसर्वभूतानामतःपाहिवसुन्धरे ! । वसुधारयसेयस्माद्वसुचातीवनिर्मलम् १२ वसुन्धराततोजाता तस्मात्पाहिभयादलम् । चतुर्मुखोऽपिनोगच्छेद्यस्मादन्तंतवाचले ! १३ अनन्तायैनमस्तस्मात्पाहिसंसारकर्दमात् । तमेवलक्ष्मीगोंविन्दे शिवेगौरीतिचा

लिये धनवान् पुरुष अपने पापोंकेनाशके अर्थ वा विभूतिको वृद्धिकेअर्थ इसपृथ्वीका दानकरे १९ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांद्व्यशीत्यधिकद्विशततमोऽध्यायः २८२ ॥

मत्स्यजी बोले--अब उत्तम धरादान अर्थात् भूमिदानको कहते हैं--यह दान मनुष्यों के सबपापों का नाश करताहै और मंगलकी वृद्धिको करताहै १ जंबूद्वीपके आकारवाली, पर्व्वतोंकी मर्य्यादावाली मध्यमें सुमेरुरूप वृत्तवाली अष्ट लोकपाल और नवखण्डोंसे युक्त नदी वा समुद्रोंसे लिपटीहुई महारत्नोंसे पूर्ण वसु,रुद्र और सूर्य्य इन्होंसे युक्त हज़ारपल अर्थात्४०००तोले सुवर्णकी वा पांचसौ तोले वा तीनसौ तोले वा दोसौ वा सौ अथवा पचासपल सुवर्णकी पृथ्वीबनवावे पचासपलसे न्यून की पृथ्वी नहीं बनती है इस दानमेंभी तुला पुरुषके तुल्य लोकपालोंका आवाहन और ऋत्विक् मंडप भूषण और वस्त्रादिकोंका संग्रहकरे २।६ वेदीके ऊपर कालेमृगके चर्मपर तिलोंको बिछाके उसपर इस पृथ्वीकी मूर्त्तिको स्थापितकरे और इसके चारोंओर अठारहप्रकारके धान्य और लवणादिकरसोंको स्थापितकरे और आठ पूर्ण कलश बन्दनवार रेशमी वस्त्र अनेक प्रकारके फल और गोलेके खंड इन सब वस्तुओंको स्थापितकरे इसप्रकार अधिवासन करके श्वेत वस्त्र माला और श्वेतही भूषणोंको धारण कर पुष्पांजलीको ग्रहणकरे ७।१० और पवित्र कालमें इन मंत्रार्थों का उच्चारण करे कि हेपृथ्वी तुम सब देवताओंके स्थानहो इसलिये तुमको नमस्कार है हे वसुंधरे तुम सब भूतोंको धारण करती हो वसु अर्थात् धनोंको धारण करती हो इसीसे तुमको वसुन्धरा कहते हैं सो मेरी रक्षाकरो हे अचले चतुर्मुख ब्रह्माभी तेरे अन्तको नहीं जानते इस निमित्त तुझ अनन्त रूपवालीको नमस्कार है संसाररूपी सागरसे मेरी रक्षाकरो और विष्णुके पास लक्ष्मीरूपसे शिवजीके पासगौरी

स्थिता १४ गायत्रीब्रह्मणःपार्श्वे ज्योत्स्नाचन्द्ररवौप्रभा । बुद्धिर्बृहस्पतौख्याता मेधा
मुनिषुसंस्थिता १५ विश्वंव्याप्यस्थितायस्मात्ततोविश्वम्भरास्मृता । धृतिःस्थितिः
क्षमाक्षोणी पृथ्वीवसुमतीरसा १६ एताभिर्मूर्तिभिः पाहि देवि ! संसारसागरात् । एव
मुच्चार्यतांदेवीं ब्राह्मणेभ्योनिवेदयेत् १७ धरार्द्धंवाचतुर्भागं गुरवेप्रतिपादयेत् । शेष
ञ्चैवाथऋत्विग्भ्यः प्रणिपत्यविसर्जयेत् १८अनेनविधिनायस्तु कुर्याद्धेमधरांशुभाम् ।
पुण्यकालेतुसंप्राप्ते सपदंयातिवैष्णवम् १९ विमानेनार्कवर्णेन किङ्किणीजालमालिनी ।
नारायणपुरंगत्वा कल्पत्रयमथावसेत् । पितॄन्पुत्रांश्चपौत्रांश्च तारयेदेकविंशतिम् २०
इतिपठतियइत्थंयःशृणोतिप्रसङ्गादपिकलुषवितानैर्मुक्तदेहःसमन्तात् । दिवममरवधूभि
र्यातिसंप्रार्थ्यमानो पदममरसहस्रैःसेवितंचन्द्रमौलेः २१ ॥

इतिश्रीमत्स्यपुराणेत्र्यशीत्यधिकद्विशततमोऽध्यायः २८३ ॥

(मत्स्य उवाच) अथातःसंप्रवक्ष्यामि महादानमनुत्तमम् । विश्वचक्रमितिख्यातं
महापातकनाशनम् १ तपनीयस्यशुद्धस्य विषुवादिषुकारयेत् । श्रेष्ठंपलसहस्रेण तदर्द्धे
नतुमध्यमम् २ तस्यार्द्धेनकनिष्ठंस्यात् विश्वचक्रमुदाहृतम् । अन्यद्विंशत्पलादूर्ध्वमश
क्तोऽपिनिवेदयेत् ३ षोडशारंततश्चक्रं भ्रमन्नेम्यष्टकीवृतम् । नाभिपद्मेस्थितंविष्णुं यो

रूपसे और ब्रह्माके पास सावित्रीरूपसे तुमही स्थितहो, चन्द्रमामें ज्योत्स्ना चांदनी, सूर्य्यमें प्रभा,
बृहस्पतिमें बुद्धि और मुनियोंमें मेधारूप भी तुमही हो ११।१५ तुम सब विश्वमें व्याप्तहोकर स्थित
होरही हो इसीसे तुमको विश्वम्भरा कहते हैं हे देवि तुम धृति स्थिति क्षमा क्षोणी पृथ्वी वसुमती
और रसा इन अपने रूपोंसे संसार सागरसे मेरी रक्षाकरो ऐसे उच्चारण करके उस पृथ्वीको ब्राह्मणोंके
अर्थ बांटदेवे आधी पृथ्वी वा चतुर्थांश पृथ्वी तो गुरुको देवे बाक़ी अन्य ऋत्विगोंको देदेवे
फिर प्रणाम करके उन ब्राह्मणोंका विसर्जन करदेवे १६।१८ इस विधि से जोपुरुष सुवर्णकी बनाई
हुई पृथ्वीको किसी पुण्यकाल में दानकरता है वह विष्णुके परमपदको प्राप्तहोता है और सूर्य्य के
समान कान्ति वाले जाली किंकिणियोंसे युक्त विमानमें बैठ नारायणकेपुरमें प्राप्तहो तीन कल्पतक
वास करताहै और पितर पुत्र और पौत्र इनसबकी इक्कीस कुलियोंकाभी उद्धारकरताहै इसकथाको
जोपढ़ताहै वा सुनताहै वहभी सब पापोंसे छुटकर हज़ारों देवताओं से सेवित कियेहुए शिवलोक में
प्राप्तहोताहै और अनेक देवाङ्गना उसकी अभिलाषा करती हैं १९।२१॥

इतिश्रीमत्स्यपुराणभाषाटीकायांत्र्यशीत्यधिकद्विशततमोध्यायः २८३ ॥

मत्स्यजी बोले- अब उत्तम महापातकोंको दूर करने वाले विश्वचक्रनाम दानको कहते हैं १
समान रात्रि दिनमें अथवा अन्य पवित्र दिनमें बहुत देदीप्त सुवर्णकी मूर्तिबनवावे इसमें हज़ारपलों
की उत्तम पांचसौकी मध्यम और ढाई सौ पल सुवर्णकी कनिष्ठ विश्वचक्रकी मूर्ति बनतीहै और असमर्थहोतो बीस पलकी अर्थात् ८० तोलेकी होतीहै इससे न्यून नहीं बन सक्तीहै २।३ सोलह
आरे आठ नेमि अर्थात् मध्यकी पंखडी वाले विश्वचक्रको बनवावे उसकी नाभिके मध्यमें योगा-

गारूढंचतुर्भुजम् ४ शङ्खचक्रेऽस्यपार्श्वेतु देव्यष्टकसमावृतम्। द्वितीयावरणेतद्वत् पूर्वेतोजलशायिनम् ५ अत्रिर्भृगुर्वशिष्ठश्च ब्रह्माकश्यपएवच । मत्स्यःकूर्मोवराहश्च नरसिंहोऽथवामनः ६ रामोरामश्चकृष्णश्च बुद्धःकल्कीतिचक्रमात् । तृतीयावरणेगौरी मातृभिर्वसुभिर्युता ७ चतुर्थेद्वादशादित्या वेदाश्चत्वारएवच । पञ्चमेपञ्चभूतानि रुद्राश्चैकादशैवतु ८ लोकपालाष्टकंषष्ठे दिग्मातङ्गास्तथैवच। सप्तमेऽस्त्राणिसर्वाणि मङ्गलानिचकारयेत् ९ अन्तरान्तरतोदेवान् विन्यसेदष्टमेपुनः । तुलापुरुषवच्छेषं समन्तात् परिकल्पयेत् १० ऋत्विग्मण्डपसम्भारभूषणाच्छादनादिकम् । विश्वचक्रंततःकुर्यात् कृष्णाजिनंतिलोपरि ११ तथाष्टादशधान्यानि रसांश्चलवणादिकान्।पूर्णकुम्भाष्टकञ्चैव वस्त्राणिविविधानिच १२ माल्येक्षुफलरत्नानि वितानञ्चापिकारयेत्। ततोमङ्गलशब्देन स्नातःशुक्लाम्बरोगृही। होमाधिवासनान्तेवै गृहीतकुसुमाञ्जलिः १३ इममुच्चारयेन्मन्त्रन्त्रिःकृत्वातुप्रदक्षिणम्। नमोविश्वमयायेति विश्वचक्रात्मनेनमः १४ परमानन्दरूपीत्वं पाहिनःपापकर्दमात्। तेजोमयमिदंयस्मात् सदापश्यन्तियोगिनः १५ हृदितत्वं गुणातीतं विश्वचक्रंनमाम्यहम्। वासुदेवेस्थितंचक्रं चक्रमध्येतुमाधवः १६ अन्योन्याधाररूपेण प्रणमामिस्थिताविह। विश्वचक्रमिदंयस्मात् सर्वपापहरंपरम् १७ आयुधं

रूढ चतुर्भुजी विष्णुकी मूर्ति बनवावे इन विष्णुके वाम पार्श्वमें शंख चक्र और आठ देवियोंकी मूर्ति बनवावे और चक्रके दूसरे आवरणमें जलशायी विष्णु भगवान्‌को पूर्वमें बनवावे और अत्रि, भृगु, वशिष्ठ, ब्रह्मा, कश्यप, मत्स्य, कूर्म, वराह,नृसिंह, वामन, परशुराम, रामचन्द्र, कृष्ण, बुद्ध, कल्कि, इनको क्रमसे बनवावे और तीसरे आवरणमें गौरी षोडशमातृका और अष्ट वसु इन सबको बनावे चौथे आवरणमें बारह आदित्य और चारों वेद बनवावे- पांचवेंमें पंचतत्त्व और ग्यारह रुद्रोंको बनवावे ४। ८ छठे आवरणमें अष्टलोकपाल और दिग्गज हाथियोंको बनवावे- सातवेंमें अस्त्रों समेत मंगलों को बनवावे और आठवेंमें भीतर २ देवताओं को बनवावे इस रीति से यह आठ आवरण वाला विश्वचक्र बनता है फिर तुला पुरुषके कहेहुए विधानकीसंपूर्ण वस्तुओंको चारों ओर स्थापन करके ऋत्विक्, मंडप, आभूषण और आच्छादनादिकोंका भी संग्रहकरे इसके पीछे विश्वचक्रको काले मृगचर्म पर रक्खेहुए तिलोंके ऊपर स्थापित करदेवे ९। ११ और अठारह प्रकारके धान्य वालवणादिक रस अनेक प्रकारके वस्त्रोंसे ढकेहुए आठ कलश, माला, इक्षुदंड, फल, रत्न और वन्दनवार आदिसे युक्तकरे तदनन्तर मंगलशब्दपूर्वक स्नानकर श्वेत वस्त्र पहर होम और अधिवासन के अन्तमें पुष्पांजली ग्रहण कर तीन प्रदक्षिणाकर इस मंत्रार्थका उच्चारण करे हे विश्वमय विश्व चक्रके आत्मा आपके अर्थ नमस्कारहै १२। १४ तुम परमानन्द रूपहोकर संसार सागरसे मेरी रक्षाकरो- तेजोमय योगीजन लोग जिस विश्वचक्रको सदैव हृदयमें चिन्तवन करते हैं उसगुणातीत विश्वचक्रको मैं नमस्कार करताहूं विष्णु भगवान्‌में यह विश्वचक्र स्थित है और इस विश्वचक्रमें विष्णु भगवान् स्थितहैं ऐसे अन्योन्य आधारणाओंसे दोनों स्थितहैं इस हेतुसे यह विश्व-

चापिवासश्च भवादुद्धरमामतः । इत्यामन्त्र्यचयोदद्याद्विश्वचक्रंविमत्सरः १८ विमुक्तः
सर्वपापेभ्यो विष्णुलोकेमहीयते । वैकुण्ठलोकमासाद्य चतुर्बाहुःसनातनः १९ सेव्यते
ऽप्सरसांसंघैस्तिष्ठेत्कल्पशतत्रयम् । प्रणमेद्वादशकृत्वा विश्वचक्रंदिनेदिने । तस्यायुर्व
र्धतेनित्यं लक्ष्मीश्चविपुलाभवेत् २० इतिसकलजगत्सुराधिवासं वितरतियस्तपनीय
षोडशारम् । हरिभवनमुपागतःससिद्धैश्चिरमभिगम्यनमस्यतेशिरोभिः २१ शुभदर्शन
तांप्रयातिशत्रोर्मर्दनसुदर्शनताञ्चकामिनीभ्यः । ससुदर्शनकेशवानुरूपः कनकसुदर्शनदा
नदग्धपापः २२ कृतगुरुदुरितानिषोडशारप्रवितरणेप्रवराकृतिर्मुरारेः । अभिभवतिभ
वोद्भवन्तिभीत्या भवमभितोभुवनेभयानिभूयः २३ ॥

इतिश्रीमत्स्यपुराणेचतुरशीत्यधिकद्विशततमोऽध्यायः २८४ ॥

(मत्स्य उवाच) अथातःसंप्रवक्ष्यामि महादानमनुत्तमम् । महाकल्पलतानाम महापा
तकनाशनम् १ पुण्यांतिथिमथासाद्य कृत्वाब्राह्मणवाचनम् । ऋत्विग्मंडपसंभार भूषणा
च्छादनादिकम् २ तुलापुरुषवत्कुर्याल्लोकेशावाहनंबुधः । चामीकरमयीःकुर्याद्दशकल्पल
ताःसमाः ३ नानापुष्पफलोपेता नानांशुकविभूषिताः । विद्याधरसुपर्णानांमिथुनैरुपशोभि
ताः ४ हारानादित्सुभिःसिद्धैः फलानिचविहङ्गमैः । लोकपालानुकारिण्यःकर्तव्यास्तासुदेव
ताः ५ ब्राह्मीमनंतशक्तिंचलवणस्योपरिविन्यसेत् । अधस्ताल्लतयोर्मध्येपद्मशङ्खकरेशुभे ६

चक्र सब पापोंका दूर करने वाला कहाहै १५।१७ हेविश्वचक्र तुम विष्णुके आयुधहो और वासस्थानहो
इस निमित्त आप मेरी संसार सागरसे रक्षाकरो ऐसे आमन्त्रित करके जो पुरुष इस विश्वचक्रका
दान करताहै वह सब पापों से छुटकर विष्णुलोकमें प्राप्तहो चतुर्भुजी रूपको धारण करता है
१८।१९ और अप्सरागणोंसे सेवित तीनसौकल्पतक वास करताहै,जो पुरुष भक्तिसे प्रतिदिन वासुदेव
विश्वचक्र भगवान्‌को प्रणाम करताहै उसकी प्रतिदिन आयु और लक्ष्मीकी वृद्धि होती है २० जो
पुरुष ऐसे सुवर्णके सोलहआरे और पंखड़ियों से युक्त विश्वचक्रको दान करताहै वह जब विष्णुलोकमें
जाताहै उसको सिद्धजन अपने २ शिरोंसे प्रणाम करते हैं २१ उसका रूपभी स्त्रियोंके मनका
हरनेवाला होजाताहै इस सुदर्शन चक्रका प्रभाव है कि शत्रुओंके नाशपूर्वक सबपापों का विध्वंस
होजाताहै २२ इस षोड़शार सुदर्शन चक्रके दानके प्रभाव से बहुत बड़े २ महापाप भी भयभीत
होकर भागजाते हैं और मनुष्य को कभी बाधा नहीं देते हैं २३ ॥

इतिश्रीमत्स्यपुराणभाषाटीकायांचतुरशीत्यधिकद्विशततमोऽध्यायः २८४ ॥

मत्स्यजी बोले -अब महापातकोंके नाश करनेवाले कल्पलता नाम दानको कहते हैं १ पवित्र
तिथिमें ब्राह्मणों से स्वस्तिवाचन करवा ऋत्विक् लोगोंको बुलवावे और मंडप भूषण और आच्छादन
आदि सामग्री को संचितकरे २ तुला पुरुष दानके बिधानके तुल्य लोकपालोंका आवाहनकरके
सुवर्णकी दशकल्पलता बनवावे और उनको अनेक प्रकारके फल पुष्प और अनेक प्रकारके तोते
आदिक पक्षियोंके जोड़ोंसे शोभितकरे ३।४ और फलाहार करने की इच्छा करनेवाले सिद्धों समेत

